सुश्रुतसंहिता ।

वैद्यवर-श्रीडल्हणाचार्य विरचित-

निबंधसंग्रहव्याख्यासहिता.

कल्पस्थानोत्तरतन्त्रात्मकः

द्वितीयो भागः ।

THE

SUSHRUTASAMHITÂ

OF

SUSHRUTA

With the Nibandhasangraha Commentary

OF

SHREE DALHANÂCHÂRYA

Volume II.

(KALPASTHÂN AND UTTARATANTRA)

EDITED

BY

VAIDYA JÂDAVJI TRIKAMJI ÂCHARYÂ

EDITOR OF ÂYURVEDÎYA-GRANTHAMÂLÂ.

Revised Second Edition.

PUBLISHED

BY

PÂNDURANG JÂWAJÎ,

PROPRIETOR OF THE "NIRṆAYA-SÂGAR" PRESS,

BOMBAY.

1931.

Price (for the complete work) 10 Rupees.

श्रीः ।

वैद्यवरश्रीडल्हणाचार्यविरचितया निबन्धसंग्रहाख्यव्याख्यया

समुल्लसिता

महर्षिणा सुश्रुतेन विरचिता

सुश्रुतसंहिता ।

कल्पस्थानोत्तरतन्त्रात्मकः

द्वितीयो भागः ।

आयुर्वेदीयग्रन्थमालासम्पादकेन

आचार्योपाह्वेन त्रिविक्रमात्मजेन यादवशर्मणा संशोधिता ।

द्वितीयं संस्करणम् ।

मुम्बय्यां

पाण्डुरङ्ग जावजी

इत्येतैः स्वकीये निर्णयसागरमुद्रायन्त्रालये आयसाक्षरैः

मुद्रापयित्वा प्रसिद्धिं नीता ।

शके १८५२

मूल्यं (संपूर्णग्रन्थस्य) १० रूप्यकाः ।

विषयाः. पृष्ठं.

अथ कल्पस्थानम् ५ ।

प्रथमोऽध्यायः १ ।

द्वितीयोऽध्यायः २ ।

तृतीयोऽध्यायः ३ ।

इति कल्पस्थानं समाप्तम् ।

अथोत्तरतन्त्रम् ।

प्रथमोऽध्यायः १ ।

द्वितीयोऽध्यायः २ ।

तृतीयोऽध्यायः ३ ।

एकोनविंशतितमोऽध्यायः १९ ।

विंशतितमोऽध्यायः २० ।

एकविंशतितमोऽध्यायः २१ ।

द्वाविंशतितमोऽध्यायः २२ ।

त्रयोविंशतितमोऽध्यायः २३ ।

चतुर्विंशतितमोऽध्यायः २४ ।

चत्वारिंशत्तमोऽध्यायः ४० ।

निबन्धसंग्रहाख्यव्याख्यासमुल्लसिता

सुश्रुतसंहिता ।

अथ कल्पस्थानम् ।

प्रथमोऽध्यायः ।

अथातोऽन्नपानरक्षाकल्पं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

चिकित्सास्थानानन्तरं कल्पस्थानमारभ्यते; यतश्चिकित्सास्थानादिभूते द्विव्रणीयाध्याये 'विषजुष्टस्य विज्ञानं विषनिश्चयमेव च । चिकित्सितं च वक्ष्यामि कल्पे तु प्रविभागशः' इत्यनेन श्लोकेन विषजुष्टव्रणस्य कल्पस्थाने प्रतिपादनं सूचितं तस्मात्, तत्रापि स्वस्थस्य व्याधिक्षीणस्य चान्नैरेव प्राणानां धारणं क्रियतेऽतः प्रागन्नपानरक्षाकल्पं व्याख्यातुकामः प्राह-अथात इत्यादि । अन्ने भक्ष्यमवरुद्धं घनसाधर्म्यात्; पाने लेह्यमवरुद्धं द्रवसाधर्म्यात्; एवं चतुर्विधस्यापि रक्षाकल्पः । रक्षणं रक्षा, सा पुनरदुष्टस्य; दुष्टस्य पुनर्विषभेषजकल्पनात् कल्पः; रक्षया सहितः कल्पो रक्षाकल्पः । आदिशब्दोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः, तेन दन्तकाष्ठादीनामपि लक्षणचिकित्सितकल्पनम् ॥ १ ॥ २ ॥

धन्वन्तरिः काशिपतिस्तपोधर्मभृतां वरः ॥
सुश्रुतप्रभृतीञ्छिष्याञ्छशासाहतशासनः ॥ ३ ॥

अथ प्रथममन्नादीनां रक्षामेव निर्दिदिक्षुराह-धन्वन्तरिरित्यादि । धन्वन्तरिः सुश्रुतप्रभृतीन् शिष्यान् शशास शिक्षितवान् । तपोधर्मभृतां वर इति तपस्विनां धार्मिकाणां च मध्ये श्रेष्ठः । अहतशासनः अनभिभूताज्ञ इत्यर्थः । अन्ये त्वेवं पठन्ति—'दिवोदासः क्षितिपतिस्तपोधर्मश्रुताकरः । सुश्रुतप्रमुखाञ्छिष्याञ्छशासाहतशासनः' इति । आकरः खनिः ॥ ३ ॥

रिपवो विक्रमाक्रान्ता ये च स्वे कृत्यतां गताः ॥
सिसृक्षवः क्रोधविषं विवरं प्राप्य तादृशम् ॥ ४ ॥
विषैर्निहन्युर्निपुणं नृपतिं दुष्टचेतसः ॥
स्त्रियो वा विविधान् योगान् कदाचित्सुभगेच्छया ॥ ५
विषकन्योपयोगाद्वा क्षणाज्जह्यादसून्नरः ॥
तस्माद्वैद्येन सततं विषाद्रक्ष्यो नराधिपः ॥ ६ ॥

नृपतिः कुतो रक्षणीय इत्याह—रिपव इत्यादि । सिसृक्षवः स्रष्टुमिच्छवः । क्रोधेन विषं क्रोधविषम् । न केवलं रिपवः स्वे चात्मीया भृत्याः, कृत्यतां गताः विद्वेषं गताः । तथा च कृत्यशब्दार्थोऽमरकोषे,—"कृत्यं क्रियादेवतयोस्त्रिषु विद्विष्टकार्ययोः"—इति । विवरं छिद्रं प्राप्य, तादृशं नृपतिं वधक्षमं, स्त्रियो दुष्टचित्ता विविधान् योगान् संयोगविषाणि प्राप्य, कदाचिदज्ञानात् सुभगेच्छया वा विविधान् योगान् सिसृक्षवो दातुमिच्छन्त्यो राजानं निहन्युः । विषकन्योपयोगाद्वा क्षणाज्जह्यादसून्नरः । उक्तं च—"हन्ति स्पृशन्ती स्वेदेन गम्यमाना च मैथुने । पक्वं वृन्तादिव फलं प्रशातयति मेहनम्"—इति । 'कृत्यतां' गता इत्यत्र 'विकृतिं गताः' इत्यन्ये पठन्ति ॥४-६॥

यस्माच्च चेतोऽनित्यत्वमश्ववत् प्रथितं नृणाम् ॥
न विश्वस्यात्ततो राजा कदाचिदपि कस्यचित् ॥७॥

न परं पूर्वोक्तेभ्यो रिपुप्रभृतिभ्यो राजा रक्षणीयोऽपि तु राज्ञा कस्यापि विश्वासो न विधेयः, कुत इत्याह—यस्माच्चेत्यादि । अश्ववदिति आशुतमगत्या अश्वा उच्यन्ते, एतेन शीघ्रसंचारित्वोपलक्षणार्थं चेतोऽनित्यत्वमुक्तं, यस्मादश्वस्येव शीघ्रसंचारित्वं नानाभावेन चेतसः, तस्मात् कदाचिदपि कस्यापि विश्वासं न विदध्यान्महीपतिः । वैद्यविषये च विश्वासहेतुः सूत्रस्थाने 'विसृजत्यात्मनाऽऽत्मानं'—इत्यादिश्लोकेनाभिहितः ॥७॥

कुलीनं धार्मिकं स्निग्धं सुभृतं संततोत्थितम् ॥
अलुब्धमशठं भक्तं कृतज्ञं प्रियदर्शनम् ॥ ८ ॥
क्रोधपारुष्यमात्सर्यमायालस्यविवर्जितम् ॥
जितेन्द्रियं क्षमावन्तं शुचिं शीलदयान्वितम् ॥ ९ ॥
मेधाविनमसंश्रान्तमनुरक्तं हितैषिणम्[1] ॥
पटुं प्रगल्भं निपुणं दक्षमालस्यवर्जितम्[2] ॥ १० ॥
पूर्वोक्तैश्च गुणैर्युक्तं नित्यं सन्निहितागदम् ॥
महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम् ॥ ११ ॥

स च वैद्यो गुणवानेव विश्वासभाजनमिति वैद्यस्य गुणान् निर्दिशन्नाह—कुलीनमित्यादि । कुलीनो ह्यदुष्टबीजक्षेत्रतया नाकार्येषु प्रवर्तते, कुलमत्रायुर्वेदाध्यायिकुलं ब्राह्मणक्षत्रियवैश्यभेदेन त्रिविधं, कुलगुणसंपन्नशूद्रेण सह चतुर्विधमित्यन्ये; 'तद्भवं' इति गयी । स्निग्धः स्नेहेन मित्रभावेन राज्ञा सह व्यवस्थितः, एतेन मित्रमिव सर्वथा रक्षति । सुभृतं सम्यग्भृतं यथाच शरीरयात्रा भवति । तथाचोक्तं,—"सूपौदनं घृतमलं व्यञ्जनं दृढममलिनं च वासः"—इति । सततोत्थितः अहोरात्रमध्ययनाध्यापनतदर्थचिन्तानृपशरीरस्वास्थ्यापादानेषु तत्परो

१ 'असंभ्रान्तं' इति पा० । २ 'दक्षं व्यसनवर्जितम्' इति पा० ।

नित्याभियुक्त इति । परगुणविध्वंसो मात्सर्यम् । माया परवन्धनबुद्धिः । अनुरक्तं सदाऽऽतुरलग्नं रागयुक्तम् । पटुं वक्तारं, प्रगल्भं धृष्टं, दक्षं चतुरं, आलस्यवर्जनं द्विरुक्तमत्यन्तनिषेधार्थम् । पूर्वोक्तैर्गुणैः 'तत्त्वाधिगतशास्त्रार्थः' इत्यादिकैः । महानसे रसवत्याम् । तद्विद्यपूजितमिति तद्विद्यैः पाकनिष्ठिततत्त्वज्ञानैः भिषग्भिः पूजितम् । गयी तु 'अलुब्धमशठं भक्तं' इत्यादिकं 'नित्यं सन्निहितागदम्' इत्यन्तं न पठति, पुनरुक्तदोषत्वात् ॥ ८–११ ॥

प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि ॥
सजालकं गवाक्षाढ्यमाप्तवर्गनिषेवितम् ॥ १२ ॥
विकक्षसृष्टसंसृष्टं सवितानं कृतार्चनम् ॥
परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम् ॥ १३ ॥

तदेव महानसं कीदृशं कार्यमित्याह—प्रशस्तेत्यादि । प्रशस्ता दिगत्राग्नेयी, देशस्तु प्रशस्तगुणसंपदा युक्तः, महत् विस्तीर्णं, शुचि अनुपहतं, सजालकं जालकसहितं, गवाक्षाढ्यं वातायनसमृद्धं, विकक्षसृष्टसंसृष्टं विगततृणस्थानसंपर्कं, एतेन रसवतीसमीपे तृणसंचयो न करणीय इत्युक्तं भवति, सवितानं वितानकसहितं, कृतार्चनं कृताग्निपूजनम् ॥ १२ ॥ १३ ॥

तत्राध्यक्षं नियुञ्जीत प्रायो वैद्यगुणान्वितम् ॥

महानसव्यापारिणमाह—तत्राध्यक्षमित्यादि । अध्यक्षमधिपतिम् । वैद्यगुणान्वितं वैद्यगुणैः कुलीनधार्मिकत्वादिभिर्युक्तमित्यर्थः ॥—

शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः ॥ १४ ॥
संविभक्ताः सुमनसो नीचकेशनखाः स्थिराः ॥
स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयताः ॥१५॥
तस्य चाज्ञाविधेयाः स्युर्विविधाः परिकर्मिणः ॥

शुचय इत्यादि । दक्षिणा अभिजाताः कुलीना इति यावत् । दक्षाश्चतुराः । विनीता विनययुक्ताः शक्तिमन्त इत्यर्थः । संविभक्ताः विभज्य कर्मणि नियोजिताः । स्थिरा अचपलाः । दृढं संयमिनः सोपशमा इत्यर्थः । सुसंयताः सुष्ठु लौल्यादिदोषरहिताः, आयत्तपरिधानादिका वा इत्यर्थः । आज्ञाविधेया आदेशकारिणः । परिकर्मिणः सूपकारादयः ॥ १४ ॥ १५ ॥—

आहारस्थितयश्चापि भवन्ति प्राणिनो यतः ॥ १६ ॥
तस्मान्महानसे वैद्यः प्रमादरहितो भवेत् ॥

महानसे वैद्यस्य सावधानत्वं सहेतुकमाह—आहारस्थितय इत्यादि ॥ १६ ॥—

माहानसिकवोढारः सौपौदनिकपौपिकाः ॥ १७ ॥
भवेयुर्वैद्यवशगा ये चाप्यन्येऽत्र केचन ॥

तेषां परिकर्मिणां वैद्याधीनत्वमाह—माहानसिकवोढार इत्यादि । महानसे नियुक्ता माहानसिका रसवतीपतय इत्यर्थः; वोढारो वोढ्रादयो वेष्टिकर्मकराः काहारादयो वा । सौपा उपकरणभूतद्रव्यसाधकाः सूपव्यञ्जनादिकारकाः, औदनिका उपकार्यभूतभक्तस्य साधकाः, पौपिकाः पूपादिभक्ष्याणां साधकाः कन्दूका इत्यर्थः । अन्येऽत्र केचनेति वेसवारकारकादयः १७—

इङ्गितज्ञो मनुष्याणां वाक्चेष्टामुखवैकृतैः ॥ १८ ॥
विद्याद्विषस्य दातारमेभिर्लिङ्गैश्च बुद्धिमान् ॥
न ददात्युत्तरं पृष्टो विवक्षन् मोहमेति च ॥ १९ ॥
अपार्थं बहु सङ्कीर्णं भाषते चापि मूढवत् ॥
स्फोटयत्यङ्गुलीर्भूमिमकस्माद्विलिखेद्धसेत् ॥ २० ॥
वेपथुर्जायते तस्य त्रस्तश्चान्योऽन्यमीक्षते ॥
क्षामो विवर्णवक्त्रश्च नखैः किञ्चिच्छिनत्त्यपि ॥२१॥
आलभेतासकृद्दीनः करेण च शिरोरुहान् ॥
निर्यियासुरपद्वारैर्वीक्षते च पुनः पुनः ॥ २२ ॥
वर्तते विपरीतं तु विषदाता विचेतनः ॥

तदधिकृतस्यैव विषदातृज्ञानमुद्दिशन्नाह—इङ्गितज्ञ इत्यादि । इङ्गितज्ञो वैद्यः । एभिर्लिङ्गैर्वक्ष्यमाणैः । विवक्षन् वक्तुमिच्छन् । अपार्थं निरर्थकम् । त्रस्तश्चान्योन्यमीक्षत इति स्वपापकर्मोपलम्भभयेन अन्यमन्यमीक्षत इति । क्षामः क्षीणः । विवर्णो मलिनवर्णः । हस्तेन केशान् आलभेत स्पृशेत् । असकृत् अनेकवारम् । दीनो विलक्षः । निर्यियासुर्निर्यातुमिच्छुः । अपद्वारैरमार्गैः ॥ १८–२२ ॥—

केचिद्भयात् पार्थिवस्य त्वरिता वा तदाज्ञया ॥२३॥
असतामपि सन्तोऽपि चेष्टां कुर्वन्ति मानवाः ॥
तस्मात् परीक्षणं कार्यं भृत्यानामादृतैर्नृपैः ॥ २४ ॥

विषदपरीक्षणे च राज्ञा आदरपरेण भवितव्यमितीममर्थं सहेतुकं प्रतिपादयन्नाह—केचिदित्यादि । असतामपि असाधूनामपि । आदृतैः सादरैरित्यर्थः ॥ २३ ॥ २४ ॥

अन्ने पाने दन्तकाष्ठे तथाऽभ्यङ्गेऽवलेखने ॥
उत्सादने कषाये च परिषेकेऽनुलेपने ॥ २५ ॥
स्रक्षु वस्त्रेषु शय्यासु कवचाभरणेषु च ॥
पादुकापादपीठेषु पृष्ठेषु गजवाजिनाम् ॥ २६ ॥
विषजुष्टेषु चान्येषु नस्यधूमाञ्जनादिषु ॥
लक्षणानि प्रवक्ष्यामि चिकित्सामप्यनन्तरम् ॥२७॥

येष्वधिष्ठानेषु गरविषं प्रयच्छन्ति तान्यदूषितानि रक्षितुं, दूषितेषु चिकित्सार्थं च लक्षणानि निर्देष्टुकामः प्राह—अन्न इत्यादि । दन्तकाष्ठसहचरितं जिह्वानिर्लेखनं मुखशोधनकषायश्च दन्तकाष्ठग्रहणेन गृह्यते । अवलेखने कङ्कतिकादौ केशप्रसाधने । उत्सादने उद्वर्तने । परिषेके स्नाने । कषायोऽत्र रोध्रादिकस्तैलापनयनाय । स्रक्षु पुष्पमालासु । कवचं सन्नाहम् । पादपीठेषु पादाधारेषु । विषजुष्टेषु चान्येष्वित्यनेन शिरोभ्यङ्गशिरस्त्राणादयो गृह्यन्ते ॥ २५–२७ ॥

नृपभक्ताद्बलिं न्यस्तं सविषं भक्षयन्ति ये ॥
तत्रैव ते विनश्यन्ति मक्षिकावायसादयः ॥ २८ ॥

१ 'पाकपरिनिष्ठिततत्त्वज्ञैः' इति पा० ।

१ 'ध्यामः' इति पा० । २ 'ध्यामो मलिनवक्त्रवर्णः' इति पा० ।

हुतभुक् तेन चान्नेन भृशं चटचटायते ॥
मयूरकण्ठप्रतिमो जायते चापि दुःसहः ॥ २९ ॥
भिन्नार्चिस्तीक्ष्णधूमश्च नचिराच्चोपशाम्यति ॥
चकोरस्याक्षिवैराग्यं जायते क्षिप्रमेव तु ॥ ३० ॥
दृष्ट्वाऽन्नं विषसंसृष्टं म्रियन्ते जीवजीवकाः ॥
कोकिलः स्वरवैकृत्यं क्रौञ्चस्तु मदमृच्छति ॥ ३१ ॥
हृष्येन्मयूर उद्विग्नः क्रोशतः शुकसारिके ॥
हंसः क्ष्वेडति चात्यर्थं भृङ्गराजस्तु कूजति ॥ ३२ ॥
पृषतो विसृजत्यश्रुं विष्ठां मुञ्चति मर्कटः ॥
सन्निकृष्टांस्ततः कुर्याद्राजस्तान् मृगपक्षिणः ॥ ३३ ॥
वेश्मनोऽथ विभूषार्थं रक्षार्थं चात्मनः सदा ॥

रसरूपादिभिस्तल्लिङ्गमुद्दिशन्नाह—नृपभक्तादित्यादि । नृपभक्ताद्राजभोजनात् । हुतभुगित्यादि । हुतभुक् वह्निः । तेन सविषेणान्नेन चटचटायत इति शब्देन विषज्ञानं; मयूरकण्ठप्रतिम इति रूपेण विषज्ञानं; तीक्ष्णधूमश्चेति गन्धेन विषज्ञानं; रसेन विषज्ञानं विनश्यन्ति मक्षिकावायसादय इत्यनेनाभिहितम् । एवं शब्दादिभिः पञ्चभि(चतुर्भि)र्विषज्ञानं प्रतिपाद्यापरेणापि प्रकारेण चकोरादिपक्षिमृगचक्षुरादिविकारेण विषज्ञानमुद्दिशति—चकोरस्येत्यादि । अक्षिवैराग्यं रूपग्रहणेऽलसत्वमिति गयी, विगतरागे अक्षिणी भवत इति संग्रहारुणौ । जीवजीवकः पक्षिविशेषः 'कुरिच' इति लोके । मदमृच्छति हर्षं यातीत्यर्थः । हृष्येन्मयूर उद्विग्न इति उद्विग्नश्चलितः सन् मयूरो हृष्येत् तुष्येदित्यर्थः; विजिरिह चलनार्थो न भयार्थः; परस्परविरोधात् । क्रोशतः शुकसारिके इति भयाद्रोदनशब्दं कुरुत इत्यर्थः । हंसः क्ष्वेडति चात्यर्थमिति अतिशयेन शब्दायत इत्यर्थः । भृङ्गराजस्तु कूजतीति भृङ्गराजो भ्रमरको धूम्यादसदृशः पक्षिराज इति लोके, कूजति अव्यक्तं शब्दायते । पृषतश्चित्रबिन्दुः 'चित्तल' इति लोके ॥ २८-३३ ॥—

उपक्षिप्तस्य चान्नस्य बाष्पेणोर्ध्वं प्रसर्पता ॥ ३४ ॥
हृत्पीडा भ्रान्तनेत्रत्वं शिरोदुःखं च जायते ॥
तत्र नस्याञ्जने कुष्ठं लामज्जं नलदं मधु ॥ ३५ ॥
कुर्याच्छिरीषरजनीचन्दनैश्च प्रलेपनम् ।
हृदि चन्दनलेपस्तु तथा सुखमवाप्नुयात् ॥ ३६ ॥

विषदूषितस्यान्नस्य भोक्तुं दत्तस्य बाष्पोष्मणाऽन्तर्गतेन बाह्येन च किं स्यात्तदाह—उपक्षिप्तस्येत्यादि । उपक्षिप्तस्य भोक्तुं दत्तस्यान्नस्य बाष्पेणोर्ध्वं प्रसर्पता गच्छता हृत्पीडादिकं जायते । नलदं मांसी, लामज्जमुशीरभेदः । अन्तःप्रविष्टे बाष्पे नस्याञ्जनयोर्विषयः । कुर्यादित्यादि । चन्दनं रक्तं शुक्लं वा । एतौ लेपौ बाह्येन बाष्पस्पर्शेन जाते हृत्पीडादौ ज्ञेयौ । उपक्षिप्तस्येत्यत्र उखाक्षिप्तस्येति केचित् पठन्ति; उखा स्थाली ॥ ३४-३६ ॥

पाणिप्राप्तं पाणिदाहं नखशातं करोति च ॥
अत्र प्रलेपः श्यामेन्द्रगोपासोमोत्पलानि च ॥ ३७ ॥

पाणिप्राप्तमित्यादि—नखशातं नखपातनम् । श्यामा श्यामालता, प्रियङ्गुरित्यपरे; इन्द्रा इन्द्रवारुणी; गोपा सुगन्धमूला सारिवा; 'इन्द्रगोप' इत्यन्ये पठन्ति, तत्रेन्द्रगोपः कीटविशेषः; सोमा गुडूची, सोमलतेत्यन्ये; उत्पलं नीलोत्पलम् ॥ ३७ ॥

स चेत् प्रमादान्मोहाद्वा तदन्नमुपसेवते ॥
अष्ठीलावत्ततो जिह्वा भवत्यरसवेदिनी ॥ ३८ ॥
तुद्यते दह्यते चापि श्लेष्मा चास्यात् प्रसिच्यते ॥
तत्र बाष्पेरितं कर्म यच्च स्याद्दान्तकाष्ठिकम् ॥ ३९ ॥

स चेदित्यादि । अष्ठीला दीर्घवर्तुलपाषाणविशेषः, अन्ये पुनरष्ठीलवदिति पठन्ति, अष्ठीलशब्दोऽकारान्तोऽप्यस्तीति मन्तव्यम् । बाष्पेरितं कर्मेति यत् सविषबाष्पसंपर्के 'कुर्याच्छिरीषरजनी' इत्यादिभिः प्रोक्तं कर्म; दान्तकाष्ठिकमिति धातकीपुष्पादिभिः प्रतिसारणं[1]; तच्च प्रतिसारणमप्रच्छिते शोफे विधेयम् ॥ ३८ ॥ ३९ ॥

मूर्च्छा छर्दिमतीसारमाध्मानं दाहवेपथू ॥
इन्द्रियाणां च वैकृत्यं कुर्यादामाशयं गतम् ॥ ४० ॥
तत्राशु मदनालाबुबिम्बीकोशातकीफलैः ॥
छर्दनं दध्युदश्विद्भ्यामथवा तण्डुलाम्बुना ॥ ४१ ॥

मूर्च्छामित्यादि । अलाबुस्तिक्तालाबुः; कोशातकी घोषकः घुसेण्डिकेति लोके । उदश्वित् तक्रम् ॥ ४० ॥ ४१ ॥

दाहं मूर्च्छामतीसारं तृष्णामिन्द्रियवैकृतम् ॥
आटोपं पाण्डुतां कार्श्यं कुर्यात् पक्वाशयं गतम् ४२
विरेचनं ससर्पिष्कं तत्रोक्तं नीलिनीफलम् ॥
दध्ना दूषीविषारिश्च पेयो वा मधुसंयुतः ॥ ४३ ॥

दाहमित्यादि । आटोपं वातादीनामप्रवृत्तिम् । तत्रोक्तमिति तत्र विषभेषजकल्पे । नीलिनीफलं नीलाञ्जनिकाफलं, यस्य श्रीफलेति लोके प्रसिद्धिः । पिप्पल्यो ध्यामकमित्यादिदूषीविषारिर्वक्ष्यमाणः; दूषीविषारिश्चाक्षप्रमाणः, दधि पानयोग्यप्रमाणं ज्ञेयं, मधु अष्टमाषकप्रमितं प्रक्षिप्य दध्ना दूषीविषारिः पातव्यः । वाशब्दश्च प्रथमोक्तविरेचनयोगापेक्षया समुच्चये ॥ ४२ ॥ ४३ ॥

द्रवद्रव्येषु सर्वेषु क्षीरमद्योदकादिषु ॥
भवन्ति विविधा राज्यः फेनबुद्बुदजन्म च ॥ ४४ ॥
छायाश्चात्र न दृश्यन्ते दृश्यन्ते यदि वा पुनः ॥
भवन्ति यमलाश्छिद्रास्तन्व्यो वा विकृतास्तथा ४५

द्रवद्रव्येषु क्षीरादिषु यत् स्थूलं लक्षणं तदाह—द्रवद्रव्येष्वित्यादि । विविधा राज्यो नानाप्रकारा लेखाः । विविधा राज्यः श्रीवाग्भटेन व्याख्याताः, तथाच,—"नीला राजी रसे ताम्रा क्षीरे दधनि दृश्यते । श्यावा पीताऽसिता तक्रे घृते पानीयसन्निभा ॥ काली मद्याम्भसोः क्षौद्रे हरित्तैलेऽरुणोपमा" इति । फेनेत्यादि फेनस्य बुद्बुदस्य चोत्पत्तिरित्यर्थः । यमला

१ अस्याग्रे 'दन्तकाष्ठकर्मणः साहचर्यात् प्रतिसारणं कवलगण्डूषौ च' इत्यधिकं पठ्यते क्वचित्पुस्तके ।

युग्माः । छिद्राः सशुषिराः । तन्व्यः सूक्ष्माः । गयी तु तन्व्य इत्यत्र 'अन्या' इति पठित्वा व्याख्याति—अन्यतरेषां पशूनामिव छायाः । विकृताः सौम्यस्यापि रौद्राः, रौद्रस्यापि सौम्याः ॥ ४४ ॥ ४५ ॥

शाकसूपान्नमांसानि क्लिन्नानि विरसानि च ॥
सद्यः पर्युषितानीव विगन्धानि भवन्ति च ॥ ४६ ॥
गन्धवर्णरसैर्हीनाः सर्वे भक्ष्याः फलानि च ॥
पक्वान्याशु विशीर्यन्ते पाकमामानि यान्ति च ॥४७॥

शाकेत्यादि । चकारोऽनुक्तसमुच्चयार्थः; तेन तिक्तानि च भवन्तीत्यर्थः । गन्धवर्णरसैरित्यादि । गन्धवर्णरसैरित्यत्र स्पर्शग्रहणं लुप्तनिर्दिष्टं द्रष्टव्यं, तेन स्पर्शेनापि हीना भवन्तीत्यर्थः । पक्वान्याशु विशीर्यन्त इति पक्वानि फलान्याशु शीघ्रं विशीर्यन्ते पूतिभावं गच्छन्ति ॥ ४६ ॥ ४७ ॥

विशीर्यते कूर्चकस्तु दन्तकाष्ठगते विषे ॥
जिह्वादन्तौष्ठमांसानां श्वयथुश्चोपजायते ॥ ४८ ॥
अथास्य धातकीपुष्पपथ्याजम्बूफलास्थिभिः ॥
सक्षौद्रैः प्रच्छिते शोफे कर्तव्यं प्रतिसारणम् ॥४९॥
अथवाऽङ्कोठमूलानि त्वचः सप्तच्छदस्य वा ॥
शिरीषमाषका वाऽपि सक्षौद्राः प्रतिसारणम् ॥५०॥

विशीर्यत इत्यादि । कूर्चको दन्तकाष्ठस्याग्रिमो भागः । विशीर्यते त्रुट्यति । अथास्य धातकीत्यायेको योगः, प्रतिसारणं घर्षणं; अथवाऽङ्कोठेत्यादिर्द्वितीयो योगः; शिरीषमाषका वाऽपीत्यादिस्तृतीयो योगः; सप्तच्छदत्वचः पृथग्योग इति गयी, तदा चत्वारो योगाः । शिरीषमाषकाः शिरीषबीजानि ॥ ४८–५० ॥

जिह्वानिर्लेखकवलौ दन्तकाष्ठवदादिशेत् ॥

जिह्वेत्यादि । जिह्वानिर्लेखनस्य कवलस्य च विषदूषितस्य लिङ्गानि चिकित्सितं च दन्तकाष्ठस्येव ब्रूयात् ॥—

पिच्छिलो बहुलोऽभ्यङ्गो विवर्णो वा विषान्वितः ५१
स्फोटजन्मरुजास्रावत्वक्पाकः स्वेदनं ज्वरः ॥
दरणं चापि मांसानामभ्यङ्गे विषसंयुते ॥ ५२ ॥
तत्र शीताम्बुसिक्तस्य कर्तव्यमनुलेपनम् ॥
चन्दनं तगरं कुष्ठमुशीरं वेणुपत्रिका ॥ ५३ ॥
सोमवल्ल्यमृता श्वेता पद्मं कालीयकं त्वचम् ॥
कपित्थरसमूत्राभ्यां पानमेतच्च युज्यते ॥ ५४ ॥

पिच्छिल इत्यादि । अभ्यङ्गोऽत्राभ्यञ्जनद्रव्यं तैलादि । बहलो घनः । वेणुपत्रिका वंशपत्राणि; अन्ये वेणुपत्रिकां वंशसदृशपत्रिकां द्रव्यान्तरमाहुः । सोमवल्ली गुडूची । अमृता अमृतासङ्गः खर्परिकातुत्थकं, उत्तरपदलोपात् । श्वेता श्वेतस्यन्दः । कालीयकं दारुहरिद्रा । त्वचं वराङ्गम् । इदमनुलेपनं शीततोयेन । मूत्रं गोमूत्रम् । एतच्चेति चन्दनादिकम् ॥ ५१–५४ ॥

उत्सादने परीषेके कषाये चानुलेपने ॥
शय्यावस्त्रतनुत्रेषु ज्ञेयमभ्यङ्गलक्षणैः ॥ ५५ ॥

उत्सादन इत्यादि । तनुत्रे सन्नाहे । उत्सादनादिषु सप्तसु अभ्यङ्गलक्षणानुवादेन लिङ्गं तथा चिकित्सितमपि तत्रोक्तमेव वेदितव्यम् ॥ ५५ ॥

केशशातः शिरोदुःखं खेभ्यश्च रुधिरागमः ॥
ग्रन्थिजन्मोत्तमाङ्गेषु विषजुष्टेऽवलेखने ॥ ५६ ॥
प्रलेपो बहुशस्तत्र भाविताः कृष्णमृत्तिकाः ॥
ऋष्यपित्तघृतश्यामापालिन्दीतण्डुलीयकैः ॥ ५७ ॥
गोमयस्वरसो वाऽपि हितो वा मालतीरसः ॥
रसो मूषिकपर्ण्या वा धूमो वाऽगारसंभवः ॥ ५८ ॥

केशशात इत्यादि । ऋष्यपित्तघृतश्यामादिस्वरसैः सप्ताहं भावितया कृष्णमृदा बहुशः प्रलेपो हित इत्यर्थः । ऋष्यो नीलाण्डः 'रोरु' इति प्रसिद्धः । कालखण्डलग्ननलिकामध्यगतजलं[1] पित्तम् । श्यामा प्रियङ्गुः, पालिन्दी त्रिवृत्, मूषिकपर्णी द्रवन्ती, द्रव्यान्तरमित्यन्ये । प्रलेपशब्दो गोमयस्य रसो वेत्यत्र हितशब्देन सह संबन्धनीयः; तेन गोमयरसादिप्रलेपो वा हितो भवतीति संबन्धः स्यात् ॥ ५६–५८ ॥

शिरोऽभ्यङ्गः शिरस्त्राणं स्नानमुष्णीषमेव च ॥
स्रजश्च विषसंसृष्टाः साधयेदवलेखनात् ॥ ५९ ॥

इदानीं शिरोगतावलेखनप्रसङ्गेन शिरोगतानामन्येषामपि लिङ्गं चिकित्सितं च दर्शयन्नाह—शिरोऽभ्यङ्ग इत्यादि । अवलेखनादिति अवलेखनोक्तलिङ्गचिकित्सितात् ॥ ५९ ॥

मुखालेपे मुखं श्यावं युक्तमभ्यङ्गलक्षणैः ॥
पद्मिनीकण्टकप्रख्यैः कण्टकैश्चोपचीयते ॥ ६० ॥
तत्र क्षौद्रघृतं पानं प्रलेपश्चन्दनं घृतम् ॥
पयस्या मधुकं फञ्जी बन्धुजीवः पुनर्नवा ॥ ६१ ॥

मुखालेप इत्यादि । पयस्याऽर्कपुष्पी । फञ्जी भार्गी । बन्धुजीवो मध्याह्नपुष्पकः । तत्र मुखालेपे अतुल्ययोर्मधुघृतयोः पानं, श्वेतचन्दनघृतादिभिः पुनर्नवान्तैर्लेपः ॥ ६० ॥ ६१ ॥

अस्वास्थ्यं कुञ्जरादीनां लालास्रावोऽक्षिरक्तता ॥
स्फिक्पायुमेढ्रमुष्केषु यातुश्च स्फोटसंभवः ॥ ६२ ॥
तत्राभ्यङ्गवदेवेष्टा यातृवाहनयोः क्रिया ॥

इदानीं कुञ्जरादीनां विषजुष्टानां लक्षणं चिकित्सितं चोद्दिशन्नाह—अस्वास्थ्यमित्यादि । यातुः आरोहकस्य । यातृवाहनयोः क्रियेति अत्र यातृशब्द आरोहकपर्यायः ॥ ६२ ॥—

शोणितागमनं खेभ्यः शिरोरुक्कफसंस्रवः ॥ ६३ ॥
नस्यधूमगते लिङ्गमिन्द्रियाणां च वैकृतम् ॥
तत्र दुग्धैर्गवादीनां सर्पिः सातिविषैः शृतम् ॥६४॥
पाने नस्ये च सश्वेतं हितं समदयन्तिकम् ॥

शोणितागमनमित्यादि । सश्वेतं वचासहितं; गयी तु श्वेतां कटभीमाह । समदयन्तिकं मल्लिकासहितम् । गवादीनां क्षीरैर-

[1] 'कालखण्डलग्नस्थगिकामध्यगतना(नी)लजलं' इति पाठान्तरम्।

तिविषाकल्कसिद्धं घृतं पाने हितं नस्ये च । मदयन्तिकावचाकल्केन सिद्धं हितमित्यर्थः ॥ ६३ ॥ ६४ ॥—

गन्धहानिर्विवर्णत्वं पुष्पाणां म्लानता भवेत् ॥ ६५ ॥
जिघ्रतश्च शिरोदुःखं वारिपूर्णे च लोचने ॥
तत्र वाष्पेरितं कर्म मुखालेपे च यत् स्मृतम् ॥ ६६ ॥

गन्धहानिरित्यादि ॥ ६५ ॥ ६६ ॥

कर्णतैलगते श्रोत्रवैगुण्यं शोफवेदने ॥
कर्णस्रावश्च तत्राशु कर्तव्यं प्रतिपूरणम् ॥ ६७ ॥
स्वरसो बहुपुत्रायाः सघृतः क्षौद्रसंयुतः ॥
सोमवल्करसश्चापि सुशीतो हित इष्यते ॥ ६८ ॥

कर्णेत्यादि । बहुपुत्रा शतावरी; बहुपत्राया इति केचित् पठन्ति, ते च व्याख्यानयन्ति—बहुपत्रा मयूरशिखा । सोमवल्कः कट्फलः, तद्रसः कर्णपूरणे ॥ ६७ ॥ ६८ ॥

अश्रूपदेहो दाहश्च वेदना दृष्टिविभ्रमः ॥
अञ्जने विषसंसृष्टे भवेदान्ध्यमथापि च ॥ ६९ ॥
तत्र सद्यो घृतं पेयं तर्पणं च समागधम् ॥
अञ्जनं मेषशृङ्गस्य निर्यासो वरुणस्य च ॥ ७० ॥
मुष्ककस्याजकर्णस्य फेनो गोपित्तसंयुतः ॥
कापित्थमेषशृङ्ग्योश्च पुष्पं भल्लातकस्य वा ॥ ७१ ॥
एकैकं कारयेत् पुष्पं बन्धूकाङ्कोटयोरपि ।

अश्रूपदेह इत्यादि । उपदेहो मलवृद्धिः । सद्यो घृतमित्यत्र जेज्जटस्तु सद्य एव घृतं पेयमिति व्याख्यानयति । समागधमिति आवर्तितक्षीरसाधितपिप्पलीकल्कसिद्धं घृतं तर्पणमिति वृद्धवाग्भटः । तर्पणमक्षितर्पणं, तदेव सपिप्पलीकं पेयं पानार्हम् । तथैव मेषशृङ्गीरसेनाञ्जनम् । एवं वरुणादीनां रसेन पृथक् पृथगञ्जनम् । मुष्ककः कालमुष्ककः । अजकर्णः सर्जः पूर्वदेशे प्रसिद्धः । फेनः समुद्रफेनः । गोपित्तं गोरोचना । कपित्थादीनां प्रत्येकं पुष्पमञ्जनं, न समुदितानाम् ॥ ६९–७१ ॥—

शोफः स्रावस्तथा स्वापः पादयोः स्फोटजन्म च ७२
भवन्ति विषजुष्टाभ्यां पादुकाभ्यामसंशयम् ॥
उपानत्पादपीठानि पादुकावत् प्रसाधयेत् ॥ ७३ ॥

शोफ इत्यादि । स्वापः स्पर्शाज्ञानम् । उपानदित्यादि । पादुकावत् प्रसाधयेत् लक्षणतः प्रतीकारतश्च ॥ ७२ ॥ ७३ ॥

भूषणानि हतार्चींषि न विभान्ति यथा पुरा ॥
स्वानि स्थानानि हन्युश्च दाहपाकावदारणैः ॥ ७४ ॥
पादुकाभूषणेषूक्तमभ्यङ्गविधिमाचरेत् ॥

भूषणानीत्यादि । हतार्चींषि तेजोरहितानि ॥ ७४ ॥—

विषोपसर्गो बाष्पादिर्भूषणान्तो य ईरितः ॥ ७५ ॥
समीक्ष्योपद्रवांस्तस्य विदधीत चिकित्सितम् ॥
महासुगन्धिमगदं यं प्रवक्ष्यामि तं भिषक् ॥ ७६ ॥
पानालेपननस्येषु विदधीताञ्जनेषु च ॥
विरेचनानि तीक्ष्णानि कुर्यात् प्रच्छर्दनानि च ॥ ७७ ॥
सिराश्च व्यधयेत् क्षिप्रं प्राप्तं विस्रावणं यदि ॥
मूषिकाऽजरुहा वाऽपि हस्ते बद्धा तु भूपतेः ॥ ७८ ॥
करोति निर्विषं सर्वमन्नं विषसमायुतम् ॥

आवस्थिकीं क्रियां निर्दिशन्नाह—विषोपसर्ग इत्यादि । उपद्रवान् वीक्ष्य चिकित्सितं विदधीतेत्याह—महासुगन्धिमित्यादि । महासुगन्धिस्तु 'चन्दनागरुणी कुष्ठं' इत्यादि यावत् 'महासुगन्धिनामैष पञ्चाशीत्यङ्गसंभवः' इति । विदधीताञ्जनेषु चेति बहुवचनाद्गुडिकाचूर्णरसक्रियारूपेषु; चकारेण परिषेककवलादिष्वपि । आशयानुरोधेन चिकित्सां निर्दिशन्नाह—विरेचनानीत्यादि । प्राप्तं युक्तम् । इदानीं प्रभावकृतं चिकित्सितं निर्दिशन्नाह – मूषिकेत्यादि । अजरुहालक्षणमुशनसा प्रोक्तम्,—"कन्दः श्वेतः सपिण्डको भेदे चाञ्जनसन्निभः । गन्धलेपनपानैस्तु विषं जरयते नृणाम् ॥ दष्टानां विषपीतानां ये चान्ये विषमोहिताः । विषं जरयते तेषां तस्मादजरुहा स्मृता ॥ मूषिका लोमशा कृष्णा भवेत् साऽपि च तद्गुणा"—इति ॥ ७५–७८ ॥—

हृदयावरणं नित्यं कुर्याच्च मित्रमध्यगः ॥ ७९ ॥
पिबेद्धृतमजेयाख्यममृताख्यं च बुद्धिमान् ॥
सर्पिर्दधि पयः क्षौद्रं पिबेद्वा शीतलं जलम् ॥ ८० ॥
मयूरान्नकुलान् गोधाः पृषतान् हरिणानपि ॥
सततं भक्षयेच्चापि रसांस्तेषां पिबेदपि ॥ ८१ ॥

शरीरे विषव्याप्तिप्रतिषेधमभिधायेदानीं चित्ते विषव्याप्तिप्रतिषेधमाह—हृदयावरणमित्यादि । हृदयावरणं हृदयप्रच्छादनं हृदयरक्षाकारिभिर्मूषिकाजरुहामृताजेयपुराणघृतदूषीविषारिमहासुगन्धिशिम्बीयूषतीक्ष्णविषघ्नधारणादिभिः । मधुकं कुष्ठमित्यादिकमजेयाख्यं, अपामार्गस्य बीजानि पिप्पलीरित्याद्यमृतं घृतं, सर्पिरादीनि प्रत्येकं चत्वारि पञ्च वा हृदयावरणानि पिबेदिति ॥ ७९–८१ ॥

गोधानकुलमांसेषु हरिणस्य च बुद्धिमान् ॥
दद्यात् सुपिष्टां पालिन्दीं मधुकं शर्करां तथा ॥ ८२ ॥
शर्करातिविषे देये मायूरे समहौषधे ॥
पार्षते चापि देयाः स्युः पिप्पल्यः समहौषधाः ८३
सक्षौद्रः सघृतश्चैव शिम्बीयूषो हितः सदा ॥
विषघ्नानि च सेवेत भक्ष्यभोज्यानि बुद्धिमान् ॥ ८४ ॥

गोधादिमांसानां संस्कारयौगिकं विशेषं निर्दिशन्नाह—गोधेत्यादि । मधुकमक्षमात्रं दद्यात् । पालिन्दी त्रिवृत् । शर्करेत्यादि । मयूरस्य मांसे तस्य रसे च सुपिष्टे शर्करातिविषे सशुण्ठ्यौ देये । पार्षत इत्यादि । पृषतस्य मांसे रसे च पिप्पल्यः सनागराः सुपिष्टा देयाः । सक्षौद्र इत्यादि । अनुक्तानि चोद्दिशन्नाह—विषघ्नानीत्यादि । विषघ्नानीति विषघ्नैर्द्रव्यैः सह सिद्धानि ॥ ८२–८४ ॥

पिप्पलीमधुकक्षौद्रशर्करेक्षुरसाम्बुभिः ॥
छर्दयेन्नुन्नहृदयो भक्षितं यदि वै विषम् ॥ ८५ ॥

इति सुश्रुतसंहितायां कल्पस्थानेऽन्नपानरक्षाकल्पो नाम प्रथमोऽध्यायः ॥ १ ॥

आवृतगुप्तहृदयस्य पीतविषस्य शेषं निर्दिशन्नाह—पिप्पलीत्यादि । शर्करेक्षुरसाम्बूनि त्रीणि द्रवाणि, पिप्पलीमधुकं कल्कं, क्षौद्रमिति प्रक्षेपः । गुप्तहृदयो विषन्नैः प्रच्छादितहृदयः ॥ ८५ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतटीकायां कल्पस्थाने प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

अथातः स्थावरविषविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अन्ने पाने च प्रायेण स्थावरविषावचारणात्तद्विज्ञानीयारम्भो युज्यत इत्याह—अथात इत्यादि ॥ १ ॥ २ ॥

स्थावरं जङ्गमं चैव द्विविधं विषमुच्यते ॥
दशाधिष्ठानमाद्यं तु द्वितीयं षोडशाश्रयम् ॥ ३ ॥

तत्र विषस्य चिकित्साविशेषार्थं स्वरूपभेदेनाश्रयभेदेन च द्वैविध्यं प्रतिपादयति—स्थावरेत्यादि । आद्यं प्रथमम्; 'अदनीयमाद्यं' इत्यन्ये, तन्नेच्छति गयी ॥ ३ ॥

मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च ॥
निर्यासो धातवश्चैव कन्दश्च दशमः स्मृतः ॥ ४ ॥

तान्येव स्थावरस्य दशाधिष्ठानानि निर्दिशन्नाह—मूलमित्यादि ॥ ४ ॥

तत्र, क्लीतकाश्वमारगुञ्जासुगन्धगर्गरककरघाटविद्युच्छिखाविजयानीत्यष्टौ मूलविषाणि; विषपत्रिकालम्बावरदारुकरम्भमहाकरम्भाणि पञ्च पत्रविषाणि; कुमुद्वतीवेणुकाकरम्भमहाकरम्भककर्कोटकरेणुकखद्योतकचर्मरीभगन्धासर्पघातिनन्दनसारपाकानीति द्वादश फलविषाणि; वेत्रकादम्बवल्लीजकरम्भमहाकरम्भाणि पञ्च पुष्पविषाणि; अन्त्रपाचककर्तरीयसौरीयककरघाटकरम्भनन्दननाराचकानि सप्त त्वक्सारनिर्यासविषाणि; कुमुदघ्नीस्नुहीजालक्षीरीणि त्रीणि क्षीरविषाणि; फेनाश्म(भस्म) हरितालं च द्वे धातुविषे; कालकूटवत्सनाभसर्षपपालककर्दमकवैराटकमुस्तकशृङ्गीविषप्रपुण्डरीकमूलकहालाहलमहाविषकर्कटकानीति त्रयोदश कन्दविषाणि; इत्येवं पञ्चपञ्चाशत् स्थावरविषाणि भवन्ति ॥ ५ ॥

गयी तु गर्गरकस्थाने 'अनन्ता' इति पठति । विषपत्रिकेत्यादि । गयी तु नाराचस्थाने वल्लीजं पठति । कुमुद्वतीत्यादि । गयी तु पालकस्थाने बलाहमिति पठति । मूलादिविषाणां यत्नपरैरपि ज्ञातुमशक्यत्वात्तानि हिमवत्प्रदेशे किरातशबरादिभ्यो ज्ञेयानि ॥ ५ ॥

चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्तिते ॥
षट् चैव सर्षपाण्याहुः शेषाण्येकैकमेव तु ॥ ६ ॥

तेषां कन्दविषाणामवान्तरभेदान् दर्शयन्नाह—चत्वारीत्यादि ॥ ६ ॥—

उद्वेष्टनं मूलविषैः प्रलापो मोह एव च ॥
जृम्भाङ्गोद्वेष्टनश्वासा ज्ञेयाः पत्रविषेण तु ॥ ७ ॥
मुष्कशोफः फलविषैर्दाहोऽन्नद्वेष एव च ॥
भवेत् पुष्पविषैश्छर्दिराध्मानं मोह एव च ॥ ८ ॥
त्वक्सारनिर्यासविषैरुपयुक्तैर्भवन्ति हि ॥
आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंस्रवाः ॥ ९ ॥
फेनागमः क्षीरविषैर्विड्भेदो गुरुजिह्वता ॥
हृत्पीडनं धातुविषैर्मूर्च्छा दाहश्च तालुनि ॥ १० ॥
प्रायेण कालघातीनि विषाण्येतानि निर्दिशेत् ॥

तत्र नवानां मूलाद्यधिष्ठानानां समासेन चिकित्सार्थं सामान्यं लक्षणं निर्दिशन्नाह—उद्वेष्टनमित्यादि । उद्वेष्टनमङ्गमोटनम् । जृम्भाङ्गोद्वेष्टनेत्यादि । उद्वेष्टनं पूर्वं व्याख्यातम् । मुष्कशोफ इत्यादि । एषां नवानां सामान्यं धर्ममुद्दिशन्नाह— प्रायेणेत्यादि । उपयोगदिवसादन्यो दिवसपक्षमासादिः कालः, तेषु घ्नन्तीत्येवंशीलानि कालघातीनि ॥७-१० ॥—

कन्दजानि तु तीक्ष्णानि तेषां वक्ष्यामि विस्तरम् ॥ ११ ॥
स्पर्शाज्ञानं कालकूटे वेपथुः स्तम्भ एव च ॥
ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता ॥ १२ ॥
सर्षपे वातवैगुण्यमानाहो ग्रन्थिजन्म च ॥
ग्रीवादौर्बल्यवाक्सङ्गौ पालकेऽनुमताविह ॥ १३ ॥
प्रसेकः कर्दमाख्येन विड्भेदो नेत्रपीतता ॥
वैराटकेनाङ्गदुःखं शिरोरोगश्च जायते ॥ १४ ॥
गात्रस्तम्भो वेपथुश्च जायते मुस्तकेन तु ॥
शृङ्गीविषेणाङ्गसाददाहोदरविवृद्धयः ॥ १५ ॥
पुण्डरीकेण रक्तत्वमक्ष्णोर्वृद्धिस्तथोदरे ॥
वैवर्ण्यं मूलकैश्छर्दिर्हिक्काशोफप्रमूढताः ॥ १६ ॥
चिरेणोच्छ्वसिति श्यावो नरो हालाहलेन वै ॥
महाविषेण हृदये ग्रन्थिशूलोद्गमौ भृशम् ॥ १७ ॥
कर्कटेनोत्पतत्यूर्ध्वं हसन् दन्तान् दशत्यपि ॥

कन्दजानीत्यादि । तीक्ष्णानि तीक्ष्णविषाणि, अतः सद्यःप्राणहराणि । विस्तरमिति प्रत्येकं लक्षणं कथयामीति तात्पर्यार्थः । स्पर्शाज्ञानमित्यादि । अङ्गसादोऽङ्गग्लानिः । पुण्डरीकेणेत्यादि । प्रमूढता प्रकर्षेणाचैतन्यम् । चिरेणोच्छ्वसितीत्यादि । हासं कुर्वन् पुरुषो दन्तान् खादति ॥ ११-१७ ॥—

कन्दजान्युग्रवीर्याणि प्रत्युक्तानि त्रयोदश ॥ १८ ॥
सर्वाणि कुशलैर्ज्ञेयान्येतानि दशभिर्गुणैः ॥

मूलादिविषेभ्यः कन्दजानां धर्मान्तरेण विशेषं निर्दिशन्नाह—कन्दजानीत्यादि । उग्रवीर्याणि उत्कटशक्तीनि; गयी तु अग्रवीर्याणीति पठति, व्याख्यानयति च—अग्राणि उरूणि वीर्याणि गुणविशेषा येषां तानि तथाविधानि । प्रत्युक्तानि प्रत्येकमुक्तानि ॥ १८ ॥—

रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशुव्यवायि च ॥१९॥
विकाशि विशदं चैव लघ्वपाकि च तत् स्मृतम् ॥
तद्रौक्ष्यात् कोपयेद्वायुमौष्ण्यात् पित्तं सशोणितम् ॥
मतिं च मोहयेत्तैक्ष्ण्यान्मर्मबन्धान् छिनत्ति च ॥
शरीरावयवान् सौक्ष्म्यात् प्रविशेद्विकरोति च ॥२१॥
आशुत्वादाशु तद्धन्ति व्यवायात् प्रकृतिं भजेत् ॥
क्षपयेच्च विकाशित्वाद्दोषान्धातून्मलानपि ॥ २२ ॥
वैशद्यादतिरिच्येत दुश्चिकित्स्यं च लाघवात् ॥
दुर्हरं चाविपाकित्वात्तस्मात् क्लेशयते चिरम् ॥२३॥

तान्येव दशगुणानि निर्दिशन्नाह—रूक्षमित्यादि । तीक्ष्णं राजिकामरिचादिवत् । सूक्ष्मं सूक्ष्ममार्गानुप्रवेशि । आशु शीघ्रं ग्रहणनकारि । व्यवायि सकलं देहं व्याप्य पश्चात् पाकयायि । विकाशि प्रसर्पदपसर्पद्धातुबन्धशैथिल्यकरि । विशदमपिच्छिलम् । लघु लघुगुणयुक्तम् । अपाकीति आहारवदुदरानलेन पक्तुमशक्यम् । तेष्वपि दशसु गुणेषु मध्ये कुतो गुणात् किं करोतीत्याह—तद्रौक्ष्यादित्यादि । विकरोति शरीरावयवान् विकाराकारं नयतीत्यर्थः । व्यवायात् प्रकृतिं भजेदिति व्यवायादखिलदेहव्याप्तिलक्षणात्, प्रकृतिं स्वभावमखिलदेहव्याप्तिरूपं भजेत् । विकाशित्वादिति हिंसनशीलत्वात्; क्षपयेद् विनाशयेत् । कसधातुर्गत्यर्थोऽपि विपूर्वो हिंसार्थः । वैशद्यादतिरिच्येत न सज्जेत क्वचिदपि सक्तं न भवेदित्यर्थः । 'असक्तगति वैशद्यात्' इति केचित् पठन्ति, तत्रापि स एवार्थः । दुश्चिकित्स्यं च लाघवादिति इदं हि लघुत्वादुत्प्लुत्य मनो धावति अस्थिरं च भवति, तस्मात् संशमनभेषजाप्राप्त्या दुश्चिकित्स्यं भवति । संशमनेनासाध्यतां विषस्य निर्दिश्य संशोधनेनाप्याह—दुर्हरं चेति ।—चकारो भिन्नक्रमे, न परं लाघवात् दुर्हरमपाकित्वाच्च; तस्मादेवापाकित्वाच्चिरं क्लेशयति परं यद्विषं द्वित्रिगुणमदशगुणं वा; पूर्णदशगुणं सद्यो व्यापादकमेव ॥ १९–२३ ॥

स्थावरं जङ्गमं यच्च कृत्रिमं चापि यद्विषम् ॥
सद्यो व्यापादयेत्तत्तु ज्ञेयं दशगुणान्वितम् ॥ २४ ॥
यत् स्थावरं जङ्गमकृत्रिमं वा
देहादशेषं यदनिर्गतं तत् ॥

कन्दजमेव दशगुणान्वितं न भवति किन्त्वन्यदपीति दर्शयन्नाह—स्थावरमित्यादि । स्थावरं जङ्गमं कृत्रिमं वा देहादशेषं यदनिर्हृतं सद्यो व्यापादयेत् तद्दशगुणान्वितं ज्ञेयम् । यद्यपि कन्दजानि परित्यज्यान्येषां गुणसामस्त्याभावेन कालघातित्वमुक्तं, तथाऽप्यमीषां मध्ये येषां दशगुणत्वं तान्याशुघातीनि भवन्ति ॥ २४ ॥—

जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितं वा ॥ २५ ॥
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतामुपैति ॥
वीर्याल्पभावान्न निपातयेत्तत्
कफावृतं वर्षगणानुबन्धि ॥ २६ ॥

स्थावरमपि दशगुणमेतैः कारणैर्हतवीर्यं सत् संज्ञान्तरं लभते इत्याह—जीर्णमित्यादि । जीर्णादिभिर्हेतुभिर्गुणविप्रहीनं गुणैर्द्वित्र्यादिभिर्हीनं दशगुणमेवं वा मन्दशक्तिकं दूषीविषतां प्राप्नोति । तामेव गुणहीनतां कार्येण दर्शयन्नाह—वीर्याल्पेत्यादि । न निपातयेन्न मारयेत् सद्यश्चिरेण वा; मन्दीभूतोष्णादिगुणविशेषेण विलीनश्लेष्मणाऽऽवृतत्वाच्च मारयेदित्यर्थः । वर्षगणानुबन्धि चिरकालानुबन्धीत्यर्थः ॥ २५ ॥ २६ ॥

तेनार्दितो भिन्नपुरीषवर्णो
विगन्धवैरस्यमुखः पिपासी ॥
मूर्च्छन् वमन् गद्गदवाग्विषण्णो
भवेच्च दुष्योदरलिङ्गजुष्टः ॥ २७ ॥
आमाशयस्थे कफवातरोगी
पक्वाशयस्थेऽनिलपित्तरोगी ॥
भवेन्नरो ध्वस्तशिरोरुहाङ्गो
विलूनपक्षस्तु यथा विहङ्गः ॥ २८ ॥
स्थितं रसादिष्वथवा यथोक्तान्
करोति धातुप्रभवान् विकारान् ॥
कोपं च शीतानिलदुर्दिनेषु
यात्याशु,

तेन गरेण ये दोषा भवन्ति तान् दर्शयन्नाह—तेनार्दित इत्यादि । केचित् 'वमन्' इत्यत्र 'भ्रमन्' इति पठन्ति । गद्गदवाक्योऽस्पष्टवचनः । एतत् सर्वस्थानगतस्य सामान्यं लक्षणम् । स्थानविशेषेण विशिष्टं निर्दिशन्नाह—आमाशयस्थ इत्यादि । ध्वस्तशिरोरुहाङ्गो ध्वस्तकेशशरीरः । 'भवेत् समुद्धस्तशिरोरुहाङ्ग' इति केचित्; तत्र सम्यक् उद्धस्तशिरोरुहाण्यङ्गानि यस्य स तथा । यथोक्तान् व्याधिसमुद्देशीयोक्तान् । धातुप्रभवान् विकारान् अन्नाश्रद्धारोचकादीन् करोति ॥ २७ ॥ २८ ॥—

पूर्वं शृणु तत्र रूपम् ॥ २९ ॥
निद्रा गुरुत्वं च विजृम्भणं च
विश्लेषहर्षावथवाऽङ्गमर्दः ॥

निद्रेत्यादि । विश्लेषः सन्धीनां प्रसारणादावप्रवृत्तिः । हर्षो रोमहर्षः । अङ्गमर्दो वेदनाविशेषः ॥ २९ ॥—

ततः करोत्यन्नमदाविपाका-
वरोचकं मण्डलकोठमोहान् ॥ ३० ॥
धातुक्षयं पादकरास्यशोफं
दकोदरं छर्दिमथातिसारम् ॥

१ 'भूरीणि' इति पा० ।

वैवर्ण्यमूर्च्छाविषमज्वरान् वा
कुर्यात् प्रवृद्धां प्रबलां तृषां वा ॥ ३१ ॥
उन्मादमन्यज्जनयेत्तथाऽन्य-
दानाहमन्यत् क्षपयेच्च शुक्रम् ॥
गाद्गद्यमन्यज्जनयेच्च कुष्ठं
तांस्तान् विकारांश्च बहुप्रकारान् ॥ ३२ ॥

तत इत्यादि । ततः पूर्वरूपात् परतः । अन्नमदाविपाकाविति अन्नेन भुक्तेन मदो हर्षक्षयोऽन्नमदः, अविपाकः पाकाभावः । तांस्तान् विकारान् पूर्वोक्तान् आमाशये कफवातजान्, पक्वाशये पित्तानिलजान्, रसादिधातुगतांश्च विकारान् जनयेत् ॥ ३०-३२ ॥

दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः ॥
यस्माद्दूषयते धातून् तस्माद्दूषीविषं स्मृतम् ॥ ३३ ॥

दूषीविषनिरुक्तिमुद्दिशन्नाह—दूषितमित्यादि । देश आनूपः प्रभूतानिलशीतवर्षः, कालः शीतानिलदुर्दिनादिः, अन्नं सुरातिलकुलत्थादि, अन्नस्योपलक्षणत्वाद् व्यवायव्यायामक्रोधादिभिरपीत्यर्थः । अभीक्ष्णशः पुनः पुनः ॥ ३३ ॥

स्थावरस्योपयुक्तस्य वेगे तु प्रथमे नृणाम् ॥
श्यावा जिह्वा भवेत्स्तब्धा मूर्च्छा श्वासश्च जायते ३४
द्वितीये वेपथुः सादो दाहः कण्ठरुजस्तथा ॥
विषमामाशयप्राप्तं कुरुते हृदि वेदनाम् ॥ ३५ ॥
तालुशोषं तृतीये तु शूलं चामाशये भृशम् ॥
दुर्वर्णे हरिते शूने जायेते चास्य लोचने ॥ ३६ ॥
पक्वामाशययोस्तोदो हिक्का कासोऽन्त्रकूजनम् ॥
चतुर्थे जायते वेगे शिरसश्चातिगौरवम् ॥ ३७ ॥
कफप्रसेको वैवर्ण्यं पर्वभेदश्च पञ्चमे ॥
सर्वदोषप्रकोपश्च पक्वाधाने च वेदना ॥ ३८ ॥
षष्ठे प्रज्ञाप्रणाशश्च भृशं चाप्यतिसार्यते ॥
स्कन्धपृष्ठकटीभङ्गः सन्निरोधश्च सप्तमे ॥ ३९ ॥

स्थावरस्य प्रथमादिवेगलक्षणं दर्शयन्नाह—स्थावरस्योपयुक्तस्येत्यादि । सन्निरोधः सम्यङ्निरोधः, 'उच्छ्वासस्य' इति शेषः ॥ ३४-३९ ॥

प्रथमे विषवेगे तु वान्तं शीताम्बुसेचितम् ॥
अगदं मधुसर्पिर्भ्यां पाययेत समायुतम् ॥ ४० ॥
द्वितीये पूर्ववद्वान्तं पाययेत्तु विरेचनम् ॥
तृतीयेऽगदपानं तु हितं नस्यं तथाऽञ्जनम् ॥ ४१ ॥
चतुर्थे स्नेहसंमिश्रं पाययेतागदं भिषक् ॥
पञ्चमे क्षौद्रमधुककाथयुक्तं प्रदापयेत् ॥ ४२ ॥
षष्ठेऽतीसारवत् सिद्धिरवपीडश्च सप्तमे ॥
मूर्ध्नि काकपदं कृत्वा सासृग्वा पिशितं क्षिपेत् ४३

तेषामेव यथाक्रमं चिकित्सितमुद्दिशन्नाह—प्रथम इत्यादि । अगदं मधुसर्पिर्भ्यामित्यत्रान्यत्र चाविशेषेणागदश्रुत्या दूषीविषारिरेव प्रयोक्तव्यः । द्वितीय इत्यादि । तच्च विरेचनं घृतमधुशीतविषघ्नौषधिसंपृक्तं; गयी तु वान्तं नरं विरेचनं पाययेत् पूर्ववत्, तेन मधुयुक्तमेवेति व्याख्यानयति । तृतीय इत्यादि । अगदोऽत्र दूषीविषारिर्मधुसर्पिर्युक्तो दातव्यः । नस्यं विषघ्नं संज्ञाप्रबोधनं च । अञ्जनमपि विषघ्नं चक्षुष्यं संज्ञाप्रबोधनं तथा अतीक्ष्णं च । चतुर्थ इत्यादि । अगदोऽत्रापि दूषीविषारिः । स्नेहोऽत्र गव्यं घृतं, विषघ्नत्वात्तस्य; स्नेहग्रहणेन पूर्वप्रस्तुतं मधु निवर्तते । पञ्चम इत्यादि । अगदमिह दूषीविषारिनासाध्याहरणीयम् । षष्ठ इत्यादि । सप्तमे वेगेऽसाध्यरूपेऽपि प्रत्याख्याय प्रतिक्रियां कुर्यात् । चकारोऽयं भिन्नक्रमे, तेन सप्तमे चेति योजनात् षष्ठेऽप्यवपीडः । वाशब्दश्चानुक्तसमुच्चये, तेनानुक्तं सशोणितचर्मदानं शाखाललाटसिराताडनादिजङ्गमविषोक्तं च समुच्चीयते ॥ ४०-४३ ॥

वेगान्तरे त्वन्यतमे कृते कर्मणि शीतलाम् ॥
यवागूं सघृतक्षौद्रामिमां दद्याद्विषापहाम् ॥ ४४ ॥
कोषातक्योऽग्निकः पाठा सूर्यवल्ल्यमृताभयाः ॥
शिरीषः किणिही शेलुर्गिर्याह्वा रजनीद्वयम् ॥ ४५ ॥
पुनर्नवे हरेणुश्च त्रिकटुः सारिवे बला ॥
एषां यवागूर्निःक्काथे कृता हन्ति विषद्वयम् ॥ ४६ ॥

इदानीं वेगान्तरेषु कालघातिनः प्रतीकारविधिमाह—वेगान्तर इत्यादि । प्रकृताद्वेगादन्यो वेगो वेगान्तरम् । अन्यतमे एकतमे । कृते कर्मणि प्रथमादिवेगोक्ते इत्यर्थः । कोशातक्य इत्यादि । क्रोशातकी घोषकः; अग्निकोऽजमोदः, मोरट इत्यन्ये; सूर्यवल्ली पटोलसदृशपत्रा, यस्याः पत्ररसेनाक्तं मांसं स्विन्नमिव भवति, अन्ये सूर्यावर्तमाहुः; किणिही कटभी; शेलुः श्लेष्मातकः; गिर्याह्वा श्वेतस्यन्दः; पुनर्नवे सितपीतपुष्पे; कोशातक्यादीनां क्काथेन षडङ्गकल्पनाकल्पितेन यवागूः कल्पनीया । 'सारिवे बला' इत्यत्र 'सारिवोत्पले' इत्यन्ये पठन्ति ॥ ४४-४६ ॥

मधुकं तगरं कुष्ठं भद्रदारु हरेणवः ॥
पुन्नागैलैलवालूनि नागपुष्पोत्पलं सिता ॥ ४७ ॥
विडङ्गं चन्दनं पत्रं प्रियङ्गुर्ध्यामकं तथा ॥
हरिद्रे द्वे बृहत्यौ च सारिवे च स्थिरा सह ॥ ४८ ॥
कल्कैरेषां घृतं सिद्धमजेयमिति विश्रुतम् ॥
विषाणि हन्ति सर्वाणि शीघ्रमेवाजितं क्वचित् ४९

मधुकमित्यादि । पुन्नागस्तुङ्गः पूर्वदेशे प्रसिद्धः; एलवालुकं स्वनामप्रसिद्धं; नागपुष्पं नागकेशरं; ध्यामकं कत्तृणं; स्थिरा शालपर्णी । मधुकादीनां कल्कं पादिकं, चतुर्गुणं जलं दत्त्वा घृतं साधयेत्, तस्याजेयमिति संज्ञा । सर्वाणि स्थावरजङ्गमकृत्रिमाणि । अजितं क्वचिन्न जितमजितं; क्वचित् कस्मिन्नपि स्थावरादावित्यर्थः ॥ ४७-४९ ॥

दूषीविषार्तं सुस्विन्नमूर्ध्वं चाधश्च शोधितम् ॥
पाययेतागदं नित्यमिमं दूषीविषापहम् ॥ ५० ॥

१ 'अभीक्ष्णं' इति पाठान्तरम् ।

पिप्पल्यो ध्यामकं मांसी शावरः परिपेलवम् ॥
सुवर्चिका ससूक्ष्मैला तोयं कनकगैरिकम् ॥ ५१ ॥
क्षौद्रयुक्तोऽगदो ह्येष दूषीविषमपोहति ॥
नाम्ना दूषीविषारिस्तु न चान्यत्रापि वार्यते ॥ ५२ ॥

धातुदूषकस्य दूषीविषस्य चिकित्सां वक्तुमाह—दूषीविषार्तमित्यादि । दूषीविषस्य विषत्वेऽपि स्वेदो न निषिध्यते; येन मन्दवीर्यतया कफावरणाद्विषवेगेनानुबन्धित्वमस्य, अतः स्वेदेन कफस्यावरकस्योपशान्तावपहार्यं विषं कोष्ठगतं शोधनेन सकलमेव ह्रियते । अन्ये 'दूषीविषार्तं सुस्निग्धं' इति पठन्ति; तेषामपि स्निग्धश्रुत्या स्वेदोऽप्याक्षिप्तः । कथंचिदेवानिर्हृतस्य विषावशेषस्य संशमनार्थमन्यत्रापि स्थावरजङ्गमविषदूषितधातूनां वा प्रसादनार्थं संशमनमुद्दिशन्नाह—पाययेत्यादि । ध्यामकं कत्तृणं; शावरो रोध्रः; परिपेलवं वन्यकः, कैवर्तमुस्तकमन्ये; तोयं वालकं; सुवर्णगैरिकं दक्षिणापथे प्रसिद्धम् । अन्यत्रापि स्थावरजङ्गमयोस्तीक्ष्णयोरपीत्यर्थः; अन्येषु वक्ष्यमाणेषु ज्वरादिष्वपीत्यन्ये ॥ ५०—५२ ॥

ज्वरे दाहे च हिक्कायामानाहे शुक्रसंक्षये ॥
शोफेऽतिसारे मूर्च्छायां हृद्रोगे जठरेऽपि च ॥५३॥
उन्मादे वेपथौ चैव ये चान्ये स्युरुपद्रवाः ॥
यथास्वं तेषु कुर्वीत विषघ्नैरौषधैः क्रियाम् ॥ ५४ ॥

दूषीविषेण ये उपद्रवाः स्युस्तच्चिकित्सितमाह—ज्वर इत्यादि । ये चान्ये उपद्रवास्तज्जाः । यथास्वं यद्यस्य विहितं तदित्यर्थः । तच्च विषघ्नैरौषधैर्युक्तं कर्तव्यम् ॥ ५३ ॥ ५४ ॥

साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितम् ॥
दूषीविषमसाध्यं तु क्षीणस्याहितसेविनः ॥ ५५ ॥
इति सुश्रुतसंहितायां कल्पस्थाने स्थावरविषविज्ञानीयो नाम द्वितीयोऽध्यायः ॥ २ ॥

इदानीं साध्ययाप्यप्रत्याख्येयत्वं दर्शयन्नाह—साध्यमित्यादि ॥ ५५ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायां कल्पस्थाने द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

अथातो जङ्गमविषविज्ञानीयं कल्पं व्याख्यास्यामः ।
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि ॥ १ ॥ २ ॥

जङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोडश ॥
समासेन मया यानि विस्तरस्तेषु वक्ष्यते ॥ ३ ॥
तत्र, दृष्टिनिःश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालार्तवमुखसन्दंशविशर्धिततुण्डास्थिपित्तशूकशवानीति ॥ ४॥

तान्येवाधिष्ठानानि निर्दिशन्नाह—तत्र दृष्टिनिःश्वासेत्यादि । निःश्वासः फूत्कारः, विशर्धितं पायुकृतः कुत्सितशब्दः, शूकं कीटलोम, कीटानां सर्पाणां च विगतप्राणानां देहः शवः । वृद्धवाग्भटस्तु तुण्डविशर्धितस्थाने अल(आर)शोणिते पठति ॥३॥४॥

तत्र, दृष्टिनिःश्वासविषा दिव्याः सर्पाः, भौमास्तु दंष्ट्राविषाः, मार्जारश्ववानरमकरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाकगृहगोधिकाचतुष्पादकीटास्तथाऽन्ये दंष्ट्रानखविषाः, चिपिटपिच्चिटककषायवासिकसर्षपकतोटकवर्चःकीटकौण्डिन्यकाः शकृन्मूत्रविषाः, मूषिकाः शुक्रविषाः, लूता लालामूत्रपुरीषमुखसन्दंशनखशुक्रार्तवविषाः, वृश्चिकविश्वम्भरवरटीराजीवमत्स्योच्चिटिङ्गाः समुद्रवृश्चिकाश्चाल(र)विषाः, चित्रशिरःसरावकुर्दिशतदारुकारिमेदकसारिकामुखा मुखसन्दंशविशर्धितमूत्रपुरीषविषाः, मक्षिकाकणभजलायुका मुखसन्दंशविषाः, विषहतास्थि सर्पकण्टकवरटीमत्स्यास्थि चेत्यस्थिविषाणि, शकुलीमत्स्यरक्तराजिवरकी(टी)मत्स्याश्च पित्तविषाः, सूक्ष्मतुण्डोच्चिटिङ्गवरटीशतपदीशूकवलभिकाशृङ्गिभ्रमराः शूकतुण्डविषाः, कीटसर्पदेहा गतासवः शवविषाः; शेषास्त्वनुक्ता मुखसन्दंशविषेष्वेव गणयितव्याः ॥ ५ ॥

तत्रेत्यादि । दिवि भवा दिव्याः, भूमौ भवा भौमाः; एतच्च प्रायिकं, सर्वेऽपि सर्पा दंशायतनविषाः; तथाहि सावित्रे,—"सर्व एव सर्पा दंशविषा भवन्ति, मैलदशनदंष्ट्राचक्षुर्लालानिःश्वासेन्द्रियमूत्रपुरीषपुच्छैः"(?) इति । मार्जारेत्यादि । अत्र मार्जारोक्त्यैव व्याला व्याघ्रादयोऽभिप्रेताः । मकरो जलजन्तुरित्येके, अन्ये आग्नेयकीटपठितं मकराकारत्वेन मकरं, कर्कटवृश्चिकं मकरमन्ये । पाकमत्स्योऽपि आग्नेयेष्वेव पठितः कीटविशेषः । गोधा पञ्चनखी पवित्रा सौम्यकीटपठिता; कृष्णशब्दस्य लोपात् कृष्णगोधां विदुरन्ये । प्रचलाकं सौम्यकीटपठितं कीटविशेषमाहुः । गृहगोधिका कोष्ठागारी कोष्ठगृहकारिका । चतुष्पदकीटाः प्रतिसूर्यकादयः । तथाऽन्ये मशकमक्षिकादयश्च कीटाः । चिपिटपिच्चिटकेत्यादि एते कीटविशेषा देशान्तरे लोकतो ज्ञेयाः । वृश्चिकेत्यादि । आरशब्देनात्र वृश्चिकलाङ्गूलादिस्थितः कण्टको भण्यते, तस्य च स्थूलशूकरूपत्वाच्छूकग्रहणेनैव ग्रहणं, अत एव दृष्टिनिःश्वासेत्यादिसूत्रे पृथङ्नोदाहृतमा-

१ 'कफावरणाद्वेगणानुबन्धित्वमस्य' इति पा० । २ 'पित्तदूषितधातूनां वा प्रसादनार्थं' इति पा० । ३ 'जङ्गमविषविज्ञानीयमध्यायं' इति पा० ।

१ '०गुदास्थि०' इति पा० । २ 'जङ्गमस्य त्वाश्रयाः षोडश-दृष्टिनिःश्वासस्पर्शदंष्ट्रामुखनखास्थिमूत्रपुरीषशुक्रार्तवलालाशूकपित्तशोणितशवानि' इति । (वृ. वा. उ. स्था. अ. ४०) ३ 'लालानखशुक्रमूत्रपुरीषार्तवमुखसंदंशविषाः' इति पा० । ४ 'मनोदशन०' इति 'मलोदशन०' इति च पा० । ५ 'अलशब्देनात्र' इति पा० ।

रग्रहणम् । गयदासश्चात्र 'आलालविषा' इति पठति, व्याख्यानयति च-आलालं लाला । चित्रशिर इत्यादि । वरकीमत्स्ययोः स्थाने केचिदेकमेव वरटी(की)मत्स्यं पठन्ति । गतासवो गतप्राणाः ॥ ५ ॥

भवन्ति चात्र ।

राज्ञोऽरिदेशे रिपवस्तृणाम्बु-
मार्गान्नधूमश्वसनान् विषेण ॥
संदूषयन्त्येभिरतिप्रदुष्टान्
विज्ञाय लिङ्गैरभिशोधयेत्तान् ॥ ६ ॥

राज्ञ इत्यादि । अरिदेशे प्रविष्टस्य राज्ञोऽपि रिपवः शत्रवस्तृणादीन् सन्दूषयन्ति । अन्नमन्नरक्षायामुक्तमपि देशादिप्रसंगेणात्र पुनरुक्तम् । श्वसनो वायुः । एभिर्लिङ्गैर्वक्ष्यमाणैरित्यर्थः ॥६॥

दुष्टं जलं पिच्छिलमुग्रगन्धि
फेनान्वितं राजिभिरावृतं च ॥
मण्डूकमत्स्यं म्रियते विहङ्गा
मत्ताश्च सानूपचरा भ्रमन्ति ॥ ७ ॥
मज्जन्ति ये चात्र नराश्वनागा-
स्ते छर्दिमोहज्वरदाहशोफान् ॥
ऋ(ग)च्छन्ति तेषामपहृत्य दोषान्
दुष्टं जलं शोधयितुं यतेत ॥ ८ ॥

दुष्टमित्यादि । राजिभिः कृष्णाभिः । विहङ्गा इत्यादि सानूपचरा अनूपचरसहिता विहङ्गाः पक्षिणो विषवेगेन मत्ताः सन्तो भ्रमन्ति । ऋच्छन्ति प्राप्नुवन्ति । यतेत यत्नं कुर्वीत ॥७॥८॥

धवाश्वकर्णासनपारिभद्रान्
सपाटलान् सिद्धकमोक्षकौ च ॥
दग्ध्वा सराजद्रुमसोमवल्कां-
स्तद्भस्म शीतं वितरेत् सरःसु ॥ ९ ॥
भस्माञ्जलिं चापि घटे निधाय
विशोधयेदीप्सितमेवमम्भः ॥

तदेव दुष्टवारिप्रशोधनौषधं दर्शयन्नाह—धवाश्वेत्यादि । अश्वकर्णः पूर्वदेशे प्रसिद्धो गन्धमुण्डोऽश्वत्थसदृशः, असनो बीजकः, पारिभद्रः फलभद्रो रक्तकुसुमः कण्टकी रोहिणीसदृशपत्रः पूर्वदेशे प्रसिद्धः, राजद्रुमः किरमालकः, सोमवल्कः कट्फलः । वितरेत् निःक्षिपेत् । सरःस्विति बहुवचनमवहज्जलोपलक्षणं; वहज्जलानां दूषणमेव दुष्करम् । सामान्यजनार्थं सरसां संशोधनमभिधाय विशिष्टजनार्थमुद्धृतजलस्य शोधनं दर्शयन्नाह—भस्माञ्जलिमित्यादि । अञ्जलिं चतुःपलं, तं च घटे द्रोणप्रमिते जले, निधाय निःक्षिप्य, ईप्सितं वाञ्छितं शोधयेत् । जेजटाचार्यस्तु घटं गर्गरीमाह ॥ ९ ॥—

क्षितिप्रदेशं विषदूषितं तु
शिलातलं तीर्थमथेरिणं वा ॥ १० ॥
स्पृशन्ति गात्रेण तु येन येन
गोवाजिनागोष्ट्रखरा नरा वा ॥
तच्छूनतां यात्यथ दह्यते च
विशीर्यते रोमनखं तथैव ॥ ११ ॥
तत्राप्यनन्तां सह सर्वगन्धैः
पिष्ट्वा सुराभिर्विनियोज्य मार्गम् ॥
सिञ्चेत् पयोभिः सुमृदन्वितैस्तं
विडङ्गपाठाकटभीजलैर्वा ॥ १२ ॥

क्षितिप्रदेशमित्यादि । तीर्थं नद्यादिघट्टम् । ईरिणमूषरम् । अनन्तां सर्वगन्धैः सह संयोज्य सुराभिः पिष्ट्वा मार्गं सिञ्चेदिति संबन्धः । सुराभिरिति बहुवचनान्मधुगुडपिष्टकृताभिः । अनन्ता उत्पलसारिवा । सर्वगन्धैरेलादिपरिपठितैः । पयोभिः क्षीरैः । मृदन्वितैस्तं मार्गं सिञ्चेत्, विडङ्गादिजलैर्वा मार्गं सिञ्चेत् । मृदिह कृष्णा प्राधान्यकल्पनया । अन्ये त्वेवं पठन्ति—"तत्राप्यनन्तां सह सर्वगन्धैर्वचां तु पिष्ट्वा सुरयाऽनुमार्गम् । सिञ्चेत्तथा मृत्सहिताभिरद्भिर्मार्गोऽस्ति नान्यो यदि तेन गच्छेत्" इति । 'पयोभिस्तु मृदन्वितैः' इत्यत्र 'वल्मीकमृदन्विताभिः' इति केचित् पठन्ति, विषघ्नत्वाद्वल्मीकस्य ॥ १०–१२ ॥

तृणेषु भक्तेषु च दूषितेषु
सीदन्ति मूर्च्छन्ति वमन्ति चान्ये ॥
विड्भेदमृच्छन्त्यथवा म्रियन्ते
तेषां चिकित्सां प्रणयेद्यथोक्ताम् ॥ १३ ॥
विषापहैर्वाऽप्यगदैर्विलिप्य
वाद्यानि चित्राण्यपि वादयेत ॥
तारः सुतारः ससुरेन्द्रगोपः
सर्वैश्च तुल्यः कुरुविन्दभागः ॥ १४ ॥
पित्तेन युक्तः कपिलान्वयेन
वाद्यप्रलेपो विहितः प्रशस्तः ॥
वाद्यस्य शब्देन हि यान्ति नाशं
विषाणि घोराण्यपि यानि सन्ति ॥ १५ ॥

तृणेष्वित्यादि । सीदन्ति अङ्गग्लानियुक्ता भवन्ति । प्रणयेदित्यादि । अङ्गसादादिषु यथोक्तां चिकित्सां विषापहैर्द्रव्यैर्युक्तां वितरेत् । अगदैर्वा दुन्दुभिस्वनीयोक्तैः, वाद्यानि भेरीपटहादीनि विलिप्य वादयेत् । अपरमपि वाद्यलेपमाह—तार इत्यादि । तारो रूप्यं, सुतारः पारदः; सुरेन्द्रं सुवर्णं, कुटजमन्ये; गोपा सारिवा; कुरुविन्दो मुस्ता, निशानपाषाण इत्यन्ये, उत्तमलोहितरत्नं कुरुविन्द इत्येके ॥ १३–१५ ॥

धूमेऽनिले वा विषसंप्रयुक्ते
खगाः श्रमार्ताः प्रपतन्ति भूमौ ॥
कासप्रतिश्यायशिरोरुजश्च
भवन्ति तीव्रा नयनामयाश्च ॥ १६ ॥

१ '०मालग्रहणम्' इति पा० । २ 'रोगान्' इति पा० ।
१ 'शिलास्थली' इति पा० । २ 'तत्र' इति पा० ।

लाक्षाहरिद्रातिविषाभयाब्द-
हरेणुकैलादलवक्रकुष्ठम् ॥
प्रियङ्गुकां चाप्यनले निधाय
धूमानिलौ चापि विशोधयेत ॥ १७ ॥

लाक्षेत्यादि । लाक्षादिद्रव्यं वह्नौ निधाय धूमं विशोधयेत्, चूर्णमनिले विकीर्य पुनरनिलमिति । प्रियङ्गुकामित्यत्र मधूलिकां केचित् पठन्ति, गुडूचिकामिति च विवृण्वन्ति ॥ १६ ॥ १७ ॥

प्रजासिमामात्मयोनेर्ब्रह्मणः सृजतः किल ॥
अकरोदसुरो विघ्नं कैटभो नाम दर्पितः ॥ १८ ॥
तस्य क्रुद्धस्य वै वक्त्राद्ब्रह्मणस्तेजसो निधेः ॥
क्रोधो विग्रहवान् भूत्वा निपपाततिदारुणः ॥१९॥
स तं ददाह गर्जन्तमन्तकाभं महाबलम् ॥
ततोऽसुरं घातयित्वा तत्तेजोऽवर्धताद्भुतम् ॥ २० ॥
ततो विषादो देवानामभवत्तं निरीक्ष्य वै ॥
विषादजननत्वाच्च विषमित्यभिधीयते ॥ २१ ॥
ततः सृष्ट्वा प्रजाः शेषं तदा तं क्रोधमीश्वरः ॥
विन्यस्तवान् स भूतेषु स्थावरेषु चरेषु च ॥ २२ ॥

[1]चिकित्सोपयोगि विषस्य मूर्तिस्वरूपमाह—प्रजामित्यादि । आत्मयोनेः आत्मा परमपुरुषो योनिः कारणं यस्य स तथा तस्य; एतेनेश्वरादिकारणं निरस्य स्वयंभूत्वमुक्तम् । किलेत्यागमसंवादे । तत इत्यादि । विग्रहवान् शरीरवान् । निःपपात निःसृतः । स तमित्यादि ।—स क्रोधः पुरुषरूपः, तं कैटभं, ददाह भस्मीकृतवान् । किंविशिष्टं कैटभं? गर्जन्तमित्यादिविशेषणयुक्तम् । तत्तेजः तस्य मूर्तिमतः क्रोधस्य तेज इत्यर्थः । तत इत्यादि । वाक्कायचित्तावसादो विषादः । तत इत्यादि । विन्यस्तवान् विनिःक्षिप्तवान् ॥ १८–२२ ॥

यथाऽव्यक्तरसं तोयमन्तरीक्षान्महीगतम् ॥
तेषु तेषु प्रदेशेषु रसं तं तं नियच्छति ॥ २३ ॥
एवमेव विषं यद्यद्द्रव्यं व्याप्यावतिष्ठते ॥
स्वभावादेव तं तस्य रसं समनुवर्तते ॥ २४ ॥

विषस्य नानावीर्यहेतुभूतमुद्दिशन्नाह—यथाऽव्यक्तरसमित्यादि । यथा जलमेकरसमप्यन्तरीक्षात् पतितं भूमिगतं तेषु तेषु प्रदेशेष्वाकाशगुणभूयिष्ठादिषु रसं तं तं नियच्छति निश्चयेन ददाति, एवमेव विषं यद्यद्द्रव्यं व्याप्यावतिष्ठते स्वभावादेव तस्य तस्य रसं समनुवर्तते ॥ २३ ॥ २४ ॥

विषे यस्माद्गुणाः सर्वे तीक्ष्णाः प्रायेण सन्ति हि ॥
विषं सर्वमतो ज्ञेयं सर्वदोषप्रकोपणम् ॥ २५ ॥
ते तु वृत्तिं प्रकुपिता जहति स्वां विषार्दिताः ॥
नोपयाति विषं पाकमतः प्राणान् रुणद्धि च ॥२६॥
श्लेष्मणाऽऽवृतमार्गत्वादुच्छ्वासोऽस्य निरुध्यते ॥
विसंज्ञः सति जीवेऽपि तस्मात्तिष्ठति मानवः ॥२७॥

विषे यस्मादित्यादि । यस्माद्विषे ये गुणाः सन्ति ते सर्वे स्वभावतः सर्वदेहधातुविरोधेन तीक्ष्णा आशुकारिणः, प्रायेण तेजोरूपक्रोधात्मकत्वाद्विषस्य; अतः सर्वमेव विषं सर्वदोषप्रकोपणम् । ते तु वृत्तिमित्यादि । ते प्रकुपिता वातादयो विषार्दिता विषपीडिताः सन्तः, स्वां वृत्तिं वातः प्रस्पन्दनादिकां, रागपक्त्यादिकां पित्तं, सन्धिसंश्लेषादिकां कफः, त्यजन्ति; तेन च पित्तस्य पक्त्यभावाद्विषं पाकं न याति, अतोऽपक्वं विषं प्राणान् रुणद्धि, विषविलीनेन श्लेष्मणा निरुद्धोच्छ्वासत्वाजीवेऽपि प्राणेऽपि सति विसंज्ञो विगतसम्यग्ज्ञानो मानवस्तिष्ठति ॥ २५–२७ ॥

शुक्रवत् सर्वसर्पाणां विषं सर्वशरीरगम् ॥
क्रुद्धानामेति चाङ्गेभ्यः शुक्रं निर्मन्थनादिव ॥ २८ ॥
तेषां बडिशवद्दंष्ट्रास्तासु सज्जति चागतम् ॥
अनुद्वृत्ता विषं तस्मान्न मुञ्चन्ति च भोगिनः ॥२९॥

शुक्रवदित्यादि । सर्वसर्पाणां विषं सर्वशरीरगम् । क्रुद्धानामित्यादि क्रुद्धानां सर्पाणामङ्गेभ्योऽवयवेभ्यो विषमागच्छति; किमिव? शुक्रं निर्मन्थनादिव, निर्मन्थनं विशिष्टस्त्रीवराङ्गविलोडनहेतुरेव हर्ष उच्यते । तेषामित्यादि । बडिशं मत्स्यबन्धनयन्त्रम् । सजति सङ्गं याति संबद्धं भवतीत्यर्थः । अनुद्वृता अननुयोजिता, अनुच्छलिता इति यावत्; कर्षणकृतपरावृत्त्या हि दंष्ट्राणामधोमुखतेति । भोगिनः सर्पाः ॥ २८ ॥ २९ ॥

यस्मादत्यर्थमुष्णं च तीक्ष्णं च पठितं विषम् ।
अतः सर्वविषेषूक्तः परिषेकस्तु शीतलः ॥ ३० ॥
मन्दं कीटेषु नात्युष्णं बहुवातकफं विषम् ॥
अतः कीटविषे चापि स्वेदो न प्रतिषिध्यते ॥३१॥
कीटैर्दष्टानुग्रविषैः सर्पवत् समुपाचरेत् ॥

यस्मादित्यादि । कीटेषु विषं मन्दं नात्युष्णं बहुवातकफं भवति; अपिशब्दात् कीटेष्वपि केषुचिदुग्रविषेषु न स्वेदः, अपि तु शीतलमेव चिकित्सितम् । तथा च वक्ष्यति,—'कीटैर्दष्टानुग्रविषैः सर्पवत्समुपाचरेत्'—इति ॥ ३० ॥ ३१ ॥—

स्वभावादेव तिष्ठेत्तु प्रहारादंशयोर्विषम् ॥ ३२ ॥
व्याप्य सावयवं देहं दिग्धविद्धाहिदष्टयोः ॥
लौल्याद्विषान्वितं मांसं यः खादेन्मृतमात्रयोः॥३३॥
यथाविषं स रोगेण क्लिश्यते म्रियतेऽपि वा ॥
अतश्चाप्यनयोर्मांसमभक्ष्यं मृतमात्रयोः ॥ ३४ ॥
मुहूर्तात्तदुपादेयं प्रहारादंशवर्जितम् ॥

इदानीं दिग्धविद्धाहिदष्टयोः प्रहारदंशदेशमांसमभक्ष्यं मुहूर्ताच्च तदुपादेयमुद्दिशन्नाह—स्वभावादित्यादि । दिग्धविद्धाहिदष्टयोः 'प्राणिनोः' इति शेषः । अत्र दिग्धविद्धो विषलिप्तकाण्डादिहतः, अहिदष्टः सर्पदष्टः । यथाविषं विषानुसारेणेत्यर्थः ॥ ३२–३४ ॥—

[1] एतत्पूर्वं 'समाधिमन्त्रभेदेन' इत्यधिकं पठ्यते हस्तलिखितपुस्तके ।

[1] 'अननुमोदिता' इति पा० ।

सवातं गृहधूमाभं पुरीषं योऽतिसार्यते ॥ ३५ ॥
आध्मातोऽत्यर्थमुष्णास्रो विवर्णः सादपीडितः।
उद्वमत्यथ फेनं च विषपीतं तमादिशेत् ॥ ३६ ॥
न चास्य हृदयं वह्निर्विषजुष्टं दहत्यपि ॥
तद्धि स्थानं चेतनायाः स्वभावाद्व्याप्य तिष्ठति ३७

इदानीं विषपीतस्य प्राणैः परित्यज्यमानस्य मृतस्य च लक्षणमाह—सवातमित्यादि। अस्रं नयनजलम्। विवर्णोऽत्यर्थं कृष्णश्यामपीतवर्णः। सादोऽङ्गग्लानिः। विवर्ण इति मृतस्य लक्षणं, शेषं सर्वं म्रियमाणस्य लक्षणम्। अस्य विषपानमृतस्य विषजुष्टं हृदयं वह्निरपि न दहति; कुतो हृदयमेव विषजुष्टं? हि यस्मात्तद्विषं चेतनास्थानं हृदयं स्वभावाद्व्याप्य तिष्ठति; अत एव च विषपानमृतस्य हृदयमदाह्यं विषव्याप्तत्वात् ॥३५-३७॥

अश्वत्थदेवायतनश्मशान-
वल्मीकसन्ध्यासु चतुष्पथेषु ॥
याम्ये सपित्र्ये परिवर्जनीया
ऋक्षे नरा मर्मसु ये च दष्टाः ॥ ३८ ॥

इदानीं वर्ज्यप्रहारादंशहृदयप्रसङ्गेन विशिष्टदेशादिद्वारेण वर्जनीयान् दष्टानाह—अश्वत्थेत्यादि। याम्ये भरण्यां, पित्र्ये मघायां, ऋक्षे नक्षत्रे ॥ ३८ ॥

दर्वीकराणां विषमाशुघाति
सर्वाणि चोष्णे द्विगुणीभवन्ति ॥
अजीर्णपित्तातपपीडितेषु
बालप्रमेहिष्वथ गर्भिणीषु ॥ ३९ ॥
वृद्धातुरक्षीणबुभुक्षितेषु
रूक्षेषु भीरुष्वथ दुर्दिनेषु ॥

दर्वीकराणामित्यादि। दर्वीकराणां फणिनां, सर्वाण्यशेषविषाणि, उष्णे उष्णकाले, द्विगुणीभवन्ति द्विगुणशक्तीनि भवन्ति; 'सर्वाणि चोर्ध्वं द्विगुणीभवन्ति' इति केचित् पठन्ति, ऊर्ध्वमूर्ध्वदेशे इत्यर्थः। अजीर्णपित्तादिष्वपि द्विगुणत्वमाह—अजीर्णेत्यादि ॥ ३९ ॥—

शस्त्रक्षते यस्य न रक्तमेति
राज्यो लताभिश्च न संभवन्ति ॥ ४० ॥
शीताभिरद्भिश्च न रोमहर्षो
विषाभिभूतं परिवर्जयेत्तम् ॥
जिह्वा सिता यस्य च केशशातो
नासावभङ्गश्च सकण्ठभङ्गः ॥ ४१ ॥
कृष्णः सरक्तः श्वयथुश्च दंशे
हन्वोः स्थिरत्वं च स वर्जनीयः ॥
वर्तिर्घना यस्य निरेति वक्त्रा-
द्रक्तं स्रवेदूर्ध्वमधश्च यस्य ॥ ४२ ॥
दंष्ट्रानिपाताः सकलाश्च यस्य
तं चापि वैद्यः परिवर्जयेत्तु ॥
उन्मत्तमत्यर्थमुपद्रुतं वा
हीनस्वरं वाऽप्यथवा विवर्णम् ॥ ४३ ॥
सारिष्टमत्यर्थमवेगिनं च
जह्यान्नरं तत्र न कर्म कुर्यात् ॥ ४४ ॥

इति सुश्रुतसंहितायां कल्पस्थाने जङ्गमविषविज्ञानीयो नाम तृतीयोऽध्यायः ॥ ३ ॥

शस्त्रेत्यादि। लताभिरभिहितेऽङ्गे राज्यो रेखा नोच्छलन्ति। जिह्वेत्यादि। सिता श्वेता, असिता कृष्णा वा भवतीत्यर्थः। केशशातः केशच्यवनम्। नासावभङ्गो नासास्रोतोवैगुण्यं, तच्चानुनासिकवाक्यत्वेन ज्ञेयम्। कण्ठभङ्गः स्वरसादः। दंशो भक्षितस्थानम्। हन्वोर्मुखसन्ध्योः। स्थिरत्वमचलनम्। वर्तिरित्यादि वर्तिः कफवर्तिः। उन्मत्तेत्यादि। उन्मत्तं वातुलम्। अत्यर्थमुपद्रुतमुपद्रवबहुलम्। सारिष्टं मरणलक्षणसहितम्। अवेगिनं लहरीवर्जितम्। जह्यात् त्यजेत् ॥ ४०—४४ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायां कल्पस्थाने तृतीयोऽध्यायः।

चतुर्थोऽध्यायः।

अथातः सर्पदष्टविषविज्ञानीयं कल्पं व्याख्यास्यामः॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

जङ्गमविषाश्रयेषु महाविषत्वेन सर्पस्यैवात्र प्राधान्यात्तद्दष्टविज्ञानं प्रतिपादयितुकामः प्राह—अथात इत्यादि ॥ १ ॥ २ ॥

धन्वन्तरिं महाप्राज्ञं सर्वशास्त्रविशारदम् ॥
पादयोरुपसंगृह्य सुश्रुतः परिपृच्छति ॥ ३ ॥

पादयोरुपसंगृह्य पादपतनं कृत्वेत्यर्थः ॥ ३ ॥

सर्पसंख्यां विभागं च दष्टलक्षणमेव च ॥
ज्ञानं च विषवेगानां भगवन् ! वक्तुमर्हसि ॥ ४ ॥

किं परिपृच्छतीत्याह—सर्पसंख्यामित्यादि। संख्या गणना, विभागो विशेषभागः पृथक्करणम्। अर्हसि योग्यो भवसि ॥४॥

तस्य तद्वचनं श्रुत्वा प्राब्रवीद्भिषजां वरः ॥
असंख्या वासुकिश्रेष्ठा[२] विख्यातास्तक्षकादयः ॥ ५॥
महीधराश्च नागेन्द्रा हुताग्निसमतेजसः ॥
ये चाप्यजस्रं गर्जन्ति वर्षन्ति च तपन्ति च ॥ ६ ॥
ससागरगिरिद्वीपा यैरियं धार्यते मही ॥
क्रुद्धा निःश्वासदृष्टिभ्यां ये हन्युरखिलं जगत् ॥७॥
नमस्तेभ्योऽस्ति नो तेषां कार्यं किञ्चिच्चिकित्सया ॥
ये तु दंष्ट्राविषा भौमा ये दशन्ति च मानुषान् ॥८॥
तेषां सङ्ख्यां प्रवक्ष्यामि यथावदनुपूर्वशः ॥

तस्य तद्वचनमित्यादि। वासुकिश्रेष्ठाः वासुकिः श्रेष्ठो येषां ते तथा। अस्ति नो तेषां कार्यं किञ्चिच्चिकित्सयेति तेषां

१ 'अध्यायं' इति पा०। २ 'वासुकिमुखा' इति पा०।

तक्षकादीनां चिकित्सया किंचित् कार्यं नास्ति। ये तु दंष्ट्रे-त्यादि। अनुपूर्वशः अनुक्रमेण॥ ५-८॥—

अशीतिस्त्वेव सर्पाणां भिद्यते पञ्चधा तु सा॥९॥
दर्वीकरा मण्डलिनो राजिमन्तस्तथैव च॥
निर्विषा वैकरञ्जाश्च त्रिविधास्ते पुनः स्मृताः॥१०॥
दर्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः॥
तेषु दर्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः॥११॥
द्वाविंशतिर्मण्डलिनो राजिमन्तस्तथा दश॥
निर्विषा द्वादश ज्ञेया वैकरञ्जास्त्रयस्तथा॥१२॥
वैकरञ्जोद्भवाः सप्त चित्रा मण्डलिराजिलाः॥

अशीतिरित्यादि। सा अशीतिः। दर्वीकराः फणावन्तः, मण्डलिनः फणावर्जिता विविधमण्डलैश्चित्रिताः, राजिमन्तो रेखायुक्ताः फणावार्जिता ईषद्विषा गमालादयः, निर्विषा विषरहिताः दुन्दुभिगौराहिकादयः; केचित् 'निर्'शब्दमीषदर्थे व्याख्यान-यन्ति, तेन निर्विषा ईषद्विषाः; यथा—अनुदरा कन्येति। वैक-रञ्जाः सङ्कीर्णजाताः, पृथग्जातीयसर्पिणीपृथग्जातीयसर्पाभ्यां जाता वैकरञ्जाः। एष्वेव निर्विषवैकरञ्जयोरन्तर्भावात् कथमशीतिः पूर्यत इत्याह—तेष्वित्यादि। चित्रा मण्डलिराजिला वैकरञ्जो-द्भवाः सप्त भवन्ति; तत्र मण्डलिनश्चत्वारः, राजिलास्त्रयः। अत्रायमेव पाठो न्याय्यः, जेज्जटगयदासप्रभृतिभिरङ्गीकृत-त्वात्॥ ९-१२॥—

पादाभिमृष्टा दुष्टा वा क्रुद्धा ग्रासार्थिनोऽपि वा १३
ते दशन्ति महाक्रोधास्त्रिविधं भीमदर्शनाः॥

संक्षेपेण विभागं प्रतिपाद्य दष्टस्य दंशनपूर्वकत्वाद्दंशनल-क्षणं प्रतिपादयितुकामो दंशस्य कारणानि निर्दिशन्नाह—पादाभिमृष्टा इत्यादि। अभिमृष्टा मर्दिताः, दुष्टाः स्वभावदुष्टाः, क्रुद्धाः कुपिताः, अपिशब्दोऽत्रानुक्तसमुच्चये, तेनात्यासन्न-भीतशङ्कितक्रान्तादयो ग्राह्याः। ते दशन्ति महाक्रोधास्त्रिविधं भीमदर्शना इति सर्पा महाक्रोधाः प्रचण्डकोपाः, अत एव भीम-दर्शनाः; त्रिविधं यथा भवत्येवं दशन्ति भक्षयन्ति॥१३॥—

सर्पितं रदितं चापि तृतीयमथ निर्विषम्॥
सर्पाङ्गाभिहतं केचिदिच्छन्ति खलु तद्विदः॥१४॥
पदानि यत्र दन्तानामेकं द्वे वा बहूनि वा॥
निमग्नान्यल्परक्तानि यान्युद्वृत्य करोति हि॥१५॥
चञ्चुमालकयुक्तानि वैकृत्यकरणानि च॥
सङ्क्षिप्तानि सशोफानि विद्यात्तत् सर्पितं भिषक् १६
राज्यः सलोहिता यत्र नीलाः पीताः सितास्तथा॥
विज्ञेयं रदितं तत्तु ज्ञेयमल्पविषं च तत्॥१७॥
अशोफमल्पदुष्टासृक् प्रकृतिस्थस्य देहिनः॥
पदं पदानि वा विद्यादविषं तच्चिकित्सकः॥१८॥
सर्पस्पृष्टस्य भीरोर्हि भयेन कुपितोऽनिलः॥
कस्यचित् कुरुते शोफं सर्पाङ्गाभिहतं तु तत्॥१९॥

एतदेव दंशत्रैविध्यमुद्दिष्टं निर्दिशन्नाह—सर्पितमित्यादि। तेषां लक्षणमाह—पदानीत्यादि। पदानि क्षतानि। एकमि-त्यादि। पदेषु यथोत्तरं विषबाहुल्यम्। निमग्नानि अनुद्गतानि। यान्युद्वृत्य करोति हि यानि पदान्युद्वृत्य उन्मोच्य सर्पः करोति। चञ्चुमालकयुक्तानीति उपरि पिडकासदृशैराचितानीत्यर्थः; गयी तु चञ्चुमालिकाः सर्पदष्टस्थानस्य पार्श्वे वटप्ररोहाग्रतुल्या विषो-त्पन्ना अङ्कुरा भवन्तीति व्याख्यानयति। वैकृत्यकरणानि विका-रभावविधायकानि। संक्षिप्तानीत्यादि। संक्षिप्तानि सूक्ष्माणि। सर्पितमल्पवगाढम्। राज्य इत्यादि। राज्यो रेखाः, रदितं विलिखितमनवगाढम्, अत एवाल्पविषम्। अशोफमित्यादि। प्रकृतिस्थस्येति कायवाक्चित्तेषु स्वेन भावेनावस्थितस्य। पदं पदानि वेति एकं पदं बहूनि वा पदानीत्यर्थः। सर्पस्पृष्टस्ये-त्यादि। तुशब्दश्चार्थे, तेन कण्टकादिविद्धेऽपि शङ्काविषं भवति॥ १४-१९॥

व्याधितोद्विग्नदष्टानि ज्ञेयान्यल्पविषाणि तु॥
तथाऽतिवृद्धबालाभिदष्टमल्पविषं स्मृतम्॥ २०॥
सुपर्णदेवब्रह्मर्षियक्षसिद्धनिषेविते॥
विषघ्नौषधियुक्ते च देशे न क्रमते विषम्॥ २१॥

सर्पावस्थाविशेषतोऽल्पविषत्वमुद्दिशन्नाह—व्याधितेत्यादि। दष्टानि भक्ष्यस्थानानि। विशिष्टदेवसेविते विशिष्टौषधिसेविते च देशेऽविषत्वमुद्दिशन्नाह—सुपर्णेत्यादि। सुपर्णो गरुडः। भूताः स्वनामप्रसिद्धाः॥ २०॥ २१॥

रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः॥
ज्ञेया दर्वीकराः सर्पाः फणिनः शीघ्रगामिनः॥२२॥
मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः॥
ज्ञेया मण्डलिनः सर्पा ज्वलनार्कसमप्रभाः॥ २३॥
स्निग्धा विविधवर्णाभिस्तिर्यगूर्ध्वं च राजिभिः॥
चित्रिता इव ये भान्ति राजिमन्तस्तु ते स्मृताः २४

इदानीं चिकित्सोपयोगिदर्वीकरादिलिङ्गमुद्दिशन्नाह—रथा-ङ्गेत्यादि। रथाङ्गं चक्रं, लाङ्गलं हलं, धारिण इति यतो रथाङ्गादीनामाकृतिं धारयन्ति। मण्डलैरित्यादि। पृथवो विस्तीर्णाः॥ २२-२४॥

मुक्तारूप्यप्रभा ये च कपिला ये च पन्नगाः॥
सुगन्धयः सुवर्णाभास्ते जात्या ब्राह्मणाः स्मृताः २५
क्षत्रियाः स्निग्धवर्णास्तु पन्नगा भृशकोपनाः॥
सूर्यचन्द्राकृतिच्छत्रलक्ष्म तेषां तथाऽम्बुजम्॥२६॥
कृष्णा वज्रनिभा ये च लोहिता वर्णतस्तथा॥
धूम्राः पारावताभाश्च वैश्यास्ते पन्नगाः स्मृताः २७
महिषद्वीपिवर्णाभास्तथैव परुषत्वचः॥
भिन्नवर्णाश्च ये केचिच्छूद्रास्ते परिकीर्तिताः॥ २८॥

१ 'राजिमन्तस्तथैव च' इति पा०। २ 'चित्रमण्डलिराजिलाः' इति पा०। ३ 'व्यतिकरजाः' इति पा०। ४ 'तद्धि त्रिविधमुच्यते' इति पा०। ५ 'त्वक्षु' इति पा०।

१ 'तथाऽतिवृद्धातिबालदष्टं' इति पा०। २ 'ज्वलनार्कसमा विषे' इति पा०। ३ 'वज्रप्रभा' इति पा०।

इदानीं ब्राह्मणादिजातिपरिज्ञानायाह—मुक्तारूप्येत्यादि । सूर्यादिवत्तेषां लक्ष्म चिह्नं, तथा अम्बुजः शङ्खः । तथा च वृद्धवाग्भटः,—"भोगेऽर्धचन्द्रश्रीवत्सशङ्खचक्रहलाङ्किताः—" इति । द्वीपी चित्रकः ॥ २५-२८ ॥

कोपयन्त्यनिलं जन्तोः फणिनः सर्व एव तु ॥
पित्तं मण्डलिनश्चापि कफं चानेकराजयः ॥ २९ ॥
अपत्यमसवर्णाभ्यां द्विदोषकरलक्षणम् ॥
ज्ञेयं दोषैश्च दम्पत्यो-

अपत्यमित्यादि । असमानवर्णाभ्यां सर्पसर्पिणीभ्यां यदपत्यं वैकरञ्जाख्यं, तद्विदोषकरलक्षणं ज्ञेयं; द्विदोषकराणि लक्षणानि यत्र तद्विदोषकरलक्षणं; एतेन वैकरञ्जस्य द्विदोषकर्तृत्वमुक्तम् । अपत्ये यौ द्विदोषौ तौ कयोरित्याह—ज्ञेयाविति ।—ज्ञेयौ ज्ञातव्यौ । दम्पत्योः पितृमात्रोरित्यर्थः ॥ २९ ॥—

विशेषश्चात्र वक्ष्यते ॥ ३० ॥
रजन्याः पश्चिमे यामे सर्पाश्चित्राश्चरन्ति हि ॥
शेषेषूक्ता मण्डलिनो दिवा दर्वीकराः स्मृताः ॥३१॥

एषां मध्ये के कस्मिन् काले विचरन्तीत्याह—विशेष इत्यादि । पश्चिमे यामे चतुर्थे प्रहर इत्यर्थः । चित्रा अत्र राजिमन्तः । शेषेषु प्रहरेषु 'रजन्या एव' इति शेषः ३०।३१

दर्वीकरास्तु तरुणा वृद्धा मण्डलिनस्तथा ॥
राजिमन्तो वयोमध्या जायन्ते मृत्युहेतवः ॥ ३२ ॥

तेषां दर्वीकरादीनामुग्रविषत्वे वयोऽवस्थामुद्दिशन्नाह—दर्वीकरा इत्यादि । दर्वीकरादयो मृत्युहेतवो जायन्ते भवन्तीत्यर्थः ॥ ३२ ॥

नकुलाकुलिता बाला वारिविप्रहताः कृशाः ॥
वृद्धा मुक्तत्वचो भीताः सर्पास्त्वल्पविषाः स्मृताः३३

तेषामेवाल्पविषत्वे हेतुमाह—नकुलाकुलिता इत्यादि । नकुलेन आकुलिताः कदर्थिताः; वारिविप्रहता वारिणा जलेन विशेषेण प्रहता अभिभूताः; मुक्तत्वचो मुक्तकञ्चुकाः, तथा भीताः सर्पा अल्पविषा भवन्ति ॥ ३३ ॥

तत्र, दर्वीकराः—कृष्णसर्पो, महाकृष्णः, कृष्णोदरः श्वेतकपोतो, महाकपोतो, बलाहको, महासर्पः, शङ्खकपालो, लोहिताक्षो, गवेधुकः, परिसर्पः, खण्डफणः, ककुदः, पद्मो, महापद्मो, दर्भपुष्पो, दधिमुखः, पुण्डरीको, भ्रूकुटीमुखो, विष्किरः, पुष्पाभिकीर्णो, गिरिसर्पः, ऋजुसर्पः, श्वेतोदरो, महाशिरा, अलगर्द, आशीविष इति (१);

मण्डलिनस्तु-आदर्शमण्डलः, श्वेतमण्डलो, रक्तमण्डलः, चित्रमण्डलः, पृषतो, रोध्रपुष्पो, मिलिन्दको, गोनसो, वृद्धगोनसः, पनसो, महापनसो, वेणुपत्रकः, शिशुको मदनः, पालिन्दिरः, पिङ्गलः, तन्तुकः पुष्पपाण्डुः, षडङ्गो, अग्निको बभ्रुः, कषायः, कलुषः पारावतो, हस्ताभरणः, चित्रक, एणीपद इति (२);

राजिमन्तस्तु—पुण्डरीको, राजिचित्रो, अङ्गुलराजिः, बिन्दुराजिः, कर्दमकः, तृणशोषकः, सर्षपकः श्वेतहनुः, दर्भपुष्पश्चक्रको, गोधूमकः, किक्किसाद इति (३);

निर्विषास्तु—गलगोली, शूकपत्रो, अजगरो, दिव्यको, वर्षाहिकः, पुष्पशकली, ज्योतीरथः, क्षीरिकापुष्पको, अहिपताको, अन्धाहिको, गौराहिको, वृक्षेशय इति (४);

वैकरञ्जास्तु त्रयाणां दर्वीकरादीनां व्यतिकराज्जाताः, तद्यथा—माकुलिः, पोटगलः, स्निग्धराजिरिति । तत्र, कृष्णसर्पेण गोनस्यां वैपरीत्येन वा जातो माकुलिः; राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः; कृष्णसर्पेण राजिमत्यां वैपरीत्येन वा जातः स्निग्धराजिरिति । तेषामाद्यस्य पितृवद्विषोत्कर्षो, द्वयोर्मातृवदित्येके (५);

तज्जातमेव व्यतिकरं विवृण्वन्नाह—तत्र कृष्णसर्पेणेत्यादि । वैपरीत्येन वेति गोनसेन पुंसा कृष्णसर्पिण्यां स्त्रियामित्यर्थः । राजिलेनेत्यादि । वैपरीत्यं पूर्वव्याख्यावज्ज्ञेयम् । कृष्णसर्पेणत्यादि । एषां मध्ये येऽप्रसिद्धाः सर्पभेदास्ते सर्वे नानादेशवासिभ्यः सर्पहेलिकादिभ्यो ज्ञेयाः । तेषां व्यतिकरजानां समतया द्विविधत्वे प्राप्ते दम्पत्योरेकस्य विषमुत्कर्षं भवतीति दर्शयन्नाह—तेषामित्यादि । आद्यस्य माकुलेः, पितृवत् कृष्णसर्पवत् । द्वयोः पोटगलस्निग्धराजिकयोः; तत्र पोटगलस्य माता गोनसी, स्निग्धराजिकस्य माता राजिमती ॥ (१-५) ॥

त्रयाणां वैकरञ्जानां पुनर्दिव्येलकरोध्रपुष्पकराजिचित्रकपोटगलपुष्पाभिकीर्णदर्भपुष्पवेल्लितकाः सप्त; तेषामाद्यास्त्रयो राजिलवत्, शेषा मण्डलिवत्, एवमेतेषां सर्पाणामशीतिर्व्याख्याता ॥३४॥

वैकरञ्जेभ्यस्त्रिभ्यो जातानां दिव्येलकप्रभृतीनां विषं केषामनुयायि भवतीति दर्शयन्नाह—त्रयाणामित्यादि ॥ ३४ ॥

तत्र महानेत्रजिह्वास्यशिरसः पुमांसः, सूक्ष्मनेत्रजिह्वास्यशिरसः स्त्रियः, उभयलक्षणा मन्दविषा अक्रोधा नपुंसका इति ॥ ३५ ॥

सर्पाणां पुरुषादिलक्षणमुद्दिशन्नाह—तत्रेत्यादि ॥ ३५ ॥

तत्र सर्वेषां सर्पाणां सामान्यत एव दष्टलक्षणं वक्ष्यामः । किं कारणं ? विषं हि निशितनिस्त्रिंशाशनिहुतवहदेश्यमाशुकारि मुहूर्तमप्युपेक्षितमातुरमतिपातयति, न चावकाशोऽस्ति वाक्समूहमु-

१ 'शङ्खकामलो' इति पा० ।

१ 'पिङ्गलतन्तुकः' इति पा० । २ 'विषमुत्कर्षाद्भवति' इति पा० ।

पसर्तु, प्रत्येकमपि दष्टलक्षणेऽभिहिते सर्वत्र त्रैविध्यं भवति, तस्मात् त्रैविध्यमेव वक्ष्यामः; एतद्ध्यातुरहितमसंमोहकरं च, अपि चात्रैव सर्वसर्पव्यञ्जनावरोधः ॥ ३६ ॥

निशितनिस्त्रिंशः तीक्ष्णः खड्गः, अशनिः वज्रं, हुतवहो वह्निः, देश्यं तुल्यं; आशुकारि शीघ्रव्यापकम् । अतिपातयति शीघ्रं मारयतीत्यर्थः । न चावकाश इत्यादि अवकाशः कालविलम्बः । उपसर्तुमनुसर्तुम् । प्रत्येकमपीत्यादि । तस्मात् प्रतिसर्पदष्टलक्षणं न कृतमिति भावः । एतत्त्रैविध्यमसंमोहकरं चेति अभ्रान्तिजनकं, 'वैद्यस्य' इति शेषः; । तदुक्तं,–"मुह्यन्ति विस्तरे मन्दाः" इति ॥ ३६ ॥

तत्र, दर्वीकरविषेण त्वङ्नयननखदशनवदनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जडता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति; मण्डलिविषेण त्वगादीनां पीतत्वं शीताभिलाषः परिधूपनं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्ध्वमधश्च मांसानामवशातनं श्वयथुर्दंशकोथः पीतरूपदर्शनमाशुकोपस्तास्ताश्च पित्तवेदना भवन्ति; राजिमद्विषेण शुक्लत्वं त्वगादीनां शीतज्वरो रोमहर्षः स्तब्धत्वं गात्राणामादंशशोफः सान्द्रकफप्रसेकश्छर्दिरभीक्ष्णमक्ष्णोः कण्डूः कण्ठे श्वयथुर्घुर्घुरक उच्छ्वासनिरोधस्तमःप्रवेशस्तास्ताश्च कफवेदना भवन्ति ॥ ३७ ॥

दर्वीकरादिसर्पगणभेदानां सामान्यलक्षणोपदेशेन विशिष्टलक्षणमवबुध्यते, तत्सामान्यं त्रिविधलक्षणमुद्दिशन्नाह—तत्र दर्वीकरेत्यादि । दर्वीकरविषेण त्वङ्नखादिकृष्णत्वादिलक्षणानि भवन्तीति संबन्धः । स्वरावसादः स्वरभङ्गः, घुर्घुरको मार्जारशब्दानुकारी अव्यक्तो ध्वनिविशेषः, जडता निस्पन्दता, शूलोद्वेष्टनं शूलेन कृत्वाऽङ्गमोटनं; तास्ता वातवेदनास्तोदनभेदनादिकाः । मण्डलीत्यादि । परिधूपनं सर्वाङ्गसन्तापः, मदः पूगफलखादनेनेव मत्तत्वं, मांसानामवशातनं शटितत्वाद्गलनं, दंशकोथः दंशस्य पूतिभावः, पीतरूपदर्शनं सर्वं वस्तु पीताभं पश्यति, तास्ताश्च पित्तवेदना ऊषचोषादिकाः । राजिमद्विषेणेत्यादि । आदंशशोफ आसमन्ततो दंशस्य शोफ इत्यर्थः, प्रसेकः क्षरणं, घुर्घुरकोऽव्यक्तः शब्दविशेषः, तम अन्धकारः; तास्ताः कण्ड्वाद्याः ॥ ३७ ॥

पुरुषाभिदष्ट ऊर्ध्वं प्रेक्षते, अधस्तात् स्त्रिया सिराश्चोत्तिष्ठन्ति ललाटे, नपुंसकाभिदष्टस्तिर्यक्प्रेक्षी भवति, गर्भिण्या पाण्डुमुखो ध्मातश्च, सूतिकया कुक्षिशूलार्तः सरुधिरं मेहत्युपजिह्विका चास्य भवति, ग्रासार्थिनाऽन्नं काङ्क्षति, वृद्धेन चिरान्मन्दाश्च वेगाः, बालेनाशु मृदवश्च, निर्विषेणाविषलिङ्गं, अन्धाहिकेनान्धत्वमित्येके, ग्रसनादजगरः शरीरप्राणहरो न विषात् । तत्र सद्यःप्राणहराहिदष्टः पतति शस्त्राशनिहत इव भूमौ, स्रस्ताङ्गः स्वपिति ॥ ३८ ॥

अधुना पुरुषाद्यभिदष्टलक्षणमाह—पुरुषाभिदष्ट इत्यादि । प्रेक्षते इति पूर्वस्मादधस्तादित्यनेन च संबन्धनीयम् । नपुंसकाभिदष्ट इत्यादि । सूतिका प्रसूता । मेहति मूत्रयति । वृद्धेन दष्टस्य चिरकालेन वेगास्ते च मन्दा भवन्ति । बालेनेत्यादि । अन्धेन अहिना दष्टस्यान्धत्वं च दृश्यते इत्येके, अन्ये पुनरविषप्रकरणादविष एवायमित्याहुः । अन्धाहिः जलबिलशायीति प्रसिद्धः, अपरे पुनरपरमेवान्धाहिमाहुः । ग्रसनादित्यादि । ग्रसनात् गिलनात्; शरीरप्राणहरः शरीरहरः प्राणहरश्च भवति, न विषात् ॥ ३८ ॥

तत्र सर्वेषां सर्पाणां विषस्य सप्त वेगा भवन्ति । तत्र, दर्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति, तत् प्रदुष्टं कृष्णतामुपैति, तेन कार्ष्ण्यं पिपीलिकापरिसर्पणमिव चाङ्गे भवति; द्वितीये मांसं दूषयति, तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति; तृतीये मेदो दूषयति, तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणं च; चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति, तेन तन्द्राप्रसेकसन्धिविश्लेषा भवन्ति; पञ्चमेऽस्थीन्यनुप्रविशति प्राणमग्निं च दूषयति, तेन पर्वभेदो हिक्का दाहश्च भवति; षष्ठे मज्जानमनुप्रविशति ग्रहणीं चात्यर्थं दूषयति, तेन गात्राणां गौरवमतीसारो हृत्पीडा मूर्च्छा च भवति; सप्तमे शुक्रमनुप्रविशति व्यानं चात्यर्थं कोपयति कफं च सूक्ष्मस्रोतोभ्यः प्रच्यावयति, तेन श्लेष्मवर्तिप्रादुर्भावः कटीपृष्ठभङ्गः सर्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति । मण्डलिनां प्रथमे वेगे विषं शोणितं दूषयति, तत् प्रदुष्टं पीततामुपैति, तत्र परिदाहः पीतावभासता चाङ्गानां भवति; द्वितीये मांसं दूषयति, तेनात्यर्थं पीतता परिदाहो दंशे श्वयथुश्च भवति; तृतीये मेदो दूषयति, तेन पूर्ववच्चक्षुर्ग्रहणं तृष्णा दंशक्लेदः स्वेदश्च; चतुर्थे कोष्ठमनुप्रविश्य ज्वरमापादयति; पञ्चमे परिदाहं सर्वगात्रेषु करोति, षष्ठसप्तमयोः पूर्ववत् । राजिमतां प्रथमे वेगे विषं शोणितं दूषयति, तत् प्रदुष्टं पाण्डुतामुपैति, तेन रोमहर्षः शुक्लावभासश्च पुरुषो

१ 'सर्वत्रैविध्यं' इति पा० ।

१ 'जलधिशायि' इति पा० । २ 'शिरोग्रहणं' इति पा० ।

भवति; द्वितीये मांसं दूषयति, तेन पाण्डुताऽत्यर्थं जाड्यं शिरःशोफश्च भवति; तृतीये मेदो दूषयति, तेन चक्षुर्ग्रहणं दंशक्लेदः स्वेदो घ्राणाक्षिस्रावश्च भवति; चतुर्थे कोष्ठमनुप्रविश्य मन्यास्तम्भं शिरोगौरवं चापादयति; पञ्चमे वाक्सङ्गं शीतज्वरं च करोति; षष्ठसप्तमयोः पूर्ववदिति ॥ ३९ ॥

वेगो विषवेगो विषगतिः । तत्र दर्वीकराणामित्यादि । चक्षुर्ग्रहणं दृष्ट्यवरोधः । पञ्चमे इत्यादि । ग्रहणी पित्तधरा कला । पूर्ववदिति दर्वीकरविषस्य षष्ठसप्तमयोर्वेगयोर्यानि लक्षणानि तानि भवन्तीत्यर्थः । एवं राजिमतामपि षष्ठसप्तमवेगयोरतिदेशार्थो बोद्धव्यः ॥ ३९ ॥

भवन्ति चात्र ।

धात्वन्तरेषु याः सप्त कलाः संपरिकीर्तिताः ।
तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम् ॥ ४० ॥

कुतः पुनः सप्तैव वेगा इत्याह—भवन्तीत्यादि । धात्वन्तरेषु धातुमध्येषु, धातुग्रहणमाशयोपलक्षणं, तेनायमर्थः—धात्वाशयान्तरमर्यादा याः कलाः सप्त प्रागुक्ता गर्भव्याकरणे तास्वेकैकामतिक्रम्य सप्तसु धातुषु सप्त वेगा भवन्ति । तद्यथा-रसरक्तयोरन्तरस्थां कलामतिक्रम्य रक्ते प्रथमवेगः, रक्तमांसयोरन्तरस्थां कलामतिक्रम्य द्वितीयः, मांसमेदसोरन्तरस्थां कलामतिक्रम्य तृतीयः, मेदःकफयोरन्तरस्थां कलामतिक्रम्य चतुर्थः, कफपुरीषयोरन्तरस्थां कलामतिक्रम्य पञ्चमः, पुरीषपित्तयोरन्तरस्थां कलामतिक्रम्य षष्ठः, पित्तशुक्रयोरन्तरस्थां कलामतिक्रम्य सप्तम इति । यैव कला पुरीषधरा सैवास्थिधरेति पञ्चमे अस्थन्यनुप्रविशतीत्यविरुद्धं; एवं यैव पित्तधरा सैव मज्जधरेति षष्ठे मज्जानमनुप्रविशतीत्यविरुद्धम् ॥ ४० ॥

येनान्तरेण तु कलां कालकल्पं भिनत्ति हि ॥
समीरणेनोह्यमानं तत्तु वेगान्तरं स्मृतम् ॥ ४१ ॥

वेगमभिधाय वेगान्तरमाह—येनान्तरेणेत्यादि । येनान्तरेण येन कालेन, कलामुक्तलक्षणां, कालकल्पं मृत्युसदृशं विषं, भिनत्ति विदारयति, समीरणेनोह्यमानं वायुना प्रेर्यमाणं, तत्तु वेगान्तरं भूतस्य भविष्यतश्च वेगस्य मध्यभूतः कालस्तावत्प्रमाण इत्यर्थः ॥ ४१ ॥

शूनाङ्गः[१] प्रथमे वेगे पशुर्ध्यायति दुःखितः ॥
लालास्रावो द्वितीये तु कृष्णाङ्गः पीड्यते हृदि ४२
तृतीये च शिरोदुःखं कण्ठग्रीवं च भज्यते ॥
चतुर्थे वेपते मूढः खादन् दन्तान् जहात्यसून् ॥४३॥
केचिद्वेगत्रयं प्राहुरन्तं चैतेषु तद्विदः ॥
ध्यायति प्रथमे वेगे पक्षी मुह्यत्यतः परम् ॥ ४४ ॥
द्वितीये विह्वलः प्रोक्तस्तृतीये मृत्युमृच्छति[३] ॥

१ अस्याग्रे 'फणिमण्डलीविषज्ञानं च पृथगुक्तं त्वगादिकृष्णत्वपीतत्वादिसामान्यलक्षणद्वारेण' इत्यधिकं पठ्यते हस्तलिखितपुस्तके ।
२ 'हृष्टाङ्गः' इति पा० । ३ 'पक्षी कूजन् मरणमृच्छति' इति पा० ।

केचिदेकं विहङ्गेषु विषवेगमुशन्ति हि ॥
मार्जारनकुलादीनां विषं नातिप्रवर्तते[१] ॥ ४५ ॥

इति सुश्रुतसंहितायां कल्पस्थाने सर्पदष्टविषविज्ञानीयं नाम चतुर्थोऽध्यायः ॥ ४ ॥

मनुष्यस्य सप्तविषवेगप्रसङ्गेन पशुपक्षिष्वपि वेगप्रसंख्यामुद्दिशन्नाह—शूनाङ्ग इत्यादि । हृष्टाङ्ग उद्धर्षितशरीरः, केचिद्वेगत्रयमित्याहुः । केचिदाचार्या 'ध्यायति प्रथमे' इत्यादि पाठं न पठन्ति ॥ ४२-४५ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायां कल्पस्थाने चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

अथातः सर्पदष्टविषचिकित्सितं कल्पं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि ॥ १ ॥ २ ॥

सर्वैरेवादितः सर्पैः शाखादष्टस्य देहिनः ॥
दंशस्योपरि बध्नीयादरिष्टाश्चतुरङ्गुले ॥ ३ ॥
प्लोतचर्मान्तवल्कानां मृदुनाऽन्यतमेन वै ॥
न गच्छति विषं देहमरिष्टाभिर्निवारितम् ॥ ४ ॥

सर्पदष्टचिकित्सितं द्विविधं सामान्यं विशिष्टं च; तत्र सामान्यमेव प्रथमं निर्दिशन्नाह—सर्वैरित्यादि । शाखा हस्तपादकम् । अरिष्टा वस्त्रादिभिर्मन्त्रपुरस्कृतैर्बन्धः । प्लोतेत्यादि । प्लोतं वस्त्रं, चर्मान्तं चर्मैकदेशः, वल्कं वृक्षादित्वक्, मृदुना कोमलेन, अन्यतमेन एकतमेन, प्लोतेन चर्मान्तेन वल्कलेन वेत्यर्थः ॥ ३ ॥ ४ ॥

दहेद्दंशमथोत्कृत्य यत्र बन्धो न जायते ॥
आचूषणच्छेददाहाः सर्वत्रैव तु पूजिताः ॥ ५ ॥

अरिष्टामभिधाय दाहमुद्दिशन्नाह—दहेदित्यादि । उत्कृत्य छित्वा । दहेदिति अत्र 'मण्डलिदंशं वर्जयित्वा' इति शेषः । न जायते न संभवति । सर्वत्रैव सर्वस्मिन् देहे । पूजिताः श्लाघिताः । दाहस्य पुनरुपादानमुत्कर्तनमन्तरेणापि दाहविधानार्थम् ॥ ५ ॥

प्रतिपूर्य मुखं वस्त्रैर्हितमाचूषणं भवेत् ॥
स दंष्टव्यो[२]ऽथवा सर्पो लोष्टो वाऽपि हि तत्क्षणम् ६

प्रतिपूर्येत्यादि । वस्त्रैरित्युपलक्षणं, तेन कृष्णवल्मीकमृत्पांशुनाऽपि प्रतिपूर्याचूषणं हितं, विषहरत्वाद्वल्मीकस्य । स दष्टव्य इत्यादि । दष्टेन पुरुषेण हस्ताभ्यामुपसंगृह्य पुच्छे वक्त्रे च सर्पः सम्यग् दष्टव्यः, तदभावे लोष्टो वा दष्टव्यः । तद्भक्षणं तु तत्रैव संक्रमणहेतुरित्यर्थः ॥ ६ ॥

१ 'नातिप्रसर्पति' इति पा० । २ 'संदष्टव्य' इति पा० ।

अथ मण्डलिना दष्टं न कथंचन दाहयेत् ॥
स पित्तबाहुल्यविषाद्दंशो दाहाद्विसर्पते ॥ ७ ॥

केनचिद्दष्टे दाहनिषेधमाह—अथ मण्डलिना दष्टमित्यादि॥७॥

अरिष्टामपि मन्त्रैश्च बध्नीयान्मन्त्रकोविदः ॥
सा तु रज्ज्वादिभिर्बद्धा विषप्रतिकरी मता ॥ ८ ॥

न केवलं प्लोतादिभिः परमरिष्टेत्याह—अरिष्टामित्यादि । मन्त्रकोविदो मन्त्रज्ञः पुरुषः । केवलैरपि मन्त्रैररिष्टां बध्नीयात् । न परं मन्त्रैरेवारिष्टेत्याह—सा त्वित्यादि । सा पुनररिष्टा मन्त्ररहितैरपि रज्ज्वादिभिर्बद्धा विषप्रतिकरी विषप्रतीकारहेतुः । एतेन मन्त्रतन्त्राभ्यां तु विषप्रतीकारः ॥ ८ ॥

देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्यतपोमयाः ॥
भवन्ति नान्यथा क्षिप्रं विषं हन्युः सुदुस्तरम् ॥९॥
विषं तेजोमयैर्मन्त्रैः सत्यब्रह्मतपोमयैः ॥
यथा निवार्यते क्षिप्रं प्रयुक्तैर्न तथौषधैः ॥ १० ॥

मन्त्रस्य शक्तिं दर्शयन्नाह—देवब्रह्मर्षिभिरित्यादि । देवर्षिविहितत्वेन सत्यमयाः, ब्रह्मर्षिविहितत्वेन तपोमयाः । प्रोक्ताः कथिता न तु कृताः, मन्त्राणां नित्यत्वात् । अन्ये तु 'सत्यब्रह्मतपोमया' इति पठित्वा व्याख्यानयन्ति—देवा इन्द्रादयः, ब्रह्मा ख्वनामप्रसिद्धः, ऋषयः देवर्षि-ब्रह्मर्षि-राजर्षयः । तत्र देवकृतत्वेन सत्यप्रत्ययाः, ब्रह्मकृतत्वेन ब्रह्ममयाः, त्रिविधर्षिकृतत्वेन तपोमयाः; मन्त्राः कुरुकुल्लामेरुण्डादयः परतन्त्राभिहिता इह नोपदिष्टाः ॥ ९ ॥ १० ॥

मन्त्राणां ग्रहणं कार्यं स्त्रीमांसमधुवर्जिना ॥
मिताहारेण[२] शुचिना कुशास्तरणशायिना ॥ ११ ॥
गन्धमाल्योपहारैश्च बलिभिश्चापि देवताः ॥
पूजयेन्मन्त्रसिद्ध्यर्थं जपहोमैश्च यत्नतः ॥ १२ ॥

मन्त्रग्रहणविधानमाह—मन्त्राणामित्यादि । अत्र मधु मद्यं क्षौद्रं चोभयमपि वर्जनीयम् । यताहारेण संयताहारेण हविष्यैकाहारेणेत्यर्थः । शुचिना बाह्याभ्यन्तरपवित्रेण । माल्यं माला, उपहारो धूपदीपादिकं पूजोपकरणं, बलिः सपशुनैवेद्यम् । होमैश्चेति चकारेण ध्यानेनापीत्यनुक्तं समुच्चीयते ॥११॥१२॥

मन्त्रास्त्वविधिना प्रोक्ता हीना वा स्वरवर्णतः ॥
यस्मान्न सिद्धिमायान्ति तस्माद्योज्योऽगदक्रमः ॥१३

विधिहीनगृहीतस्य हीनस्वरादेर्वा मन्त्रस्यासिद्धावगदक्रमो योज्य इत्याह—मन्त्रास्त्वित्यादि । अविधिना स्त्रीमांसमधुवर्जनादिविधिं विना; प्रोक्ता 'गुरुणा' इति शेषः ॥ १३ ॥

समन्ततः सिरा दंशाद्विध्येत्तु कुशलो भिषक् ॥
शाखाग्रे वा ललाटे वा व्यध्यास्ता विसृते विषे ॥१४
रक्ते निर्ह्रियमाणे तु कृत्स्नं निर्ह्रियते विषम् ॥
तस्माद्विस्रावयेद्रक्तं सा ह्यस्य परमा क्रिया ॥ १५ ॥
समन्तादगदैर्दंशं प्रच्छयित्वा प्रलेपयेत् ॥
चन्दनोशीरयुक्तेन वारिणा परिषेचयेत् ॥ १६ ॥

यतो रक्तमेव प्राप्य विषं विकारकार्यतस्तदपकर्षणायाह—समन्तत इत्यादि । समन्ततः सर्वत्र । वाशब्दोऽत्र समुच्चयार्थे । विसृते प्रसृते । प्रलेपयेद् रक्तसेचनावशिष्टविषप्रशमाय महागदादिभिः । चन्दनेत्यादि । चन्दनोशीरक्काथेनेत्यर्थः, अन्ये तु चन्दनोशीरकल्कमिश्रितजलेनेत्याहुः ॥ १४-१६ ॥

पाययेतागदांस्तांस्तान् क्षीरक्षौद्रघृतादिभिः ॥
तदलाभे हिता वा स्यात् कृष्णा वल्मीकमृत्तिका१७
कोविदारशिरीषार्ककटभीर्वाऽपि भक्षयेत् ॥

पाययेतेत्यादि । रक्तावसेचनपूर्वं हृदयावरणार्थं तांस्तान् महागदादीनक्षमात्रापरिमितान् क्षीरादिभिर्यथादोषं पातुं प्रयोजयेत् । आदिशब्दाद्दधितक्रयोर्ग्रहणम् । कोविदारः काञ्चनारः । कटभी श्वेतस्यन्दः ॥ १७ ॥—

न पिबेत्तैलकौलत्थमद्यसौवीरकाणि च ॥ १८ ॥
द्रवमन्यत्तु यत्किञ्चित् पीत्वा पीत्वा तदुद्वमेत् ।
प्रायो हि वमनेनैव सुखं निर्ह्रियते विषम् ॥ १९ ॥

विषे कानपि द्रवान् निरस्यन्नाह—न पिबेत्तैलकौलत्थेत्यादि । कुलत्थानामयं कौलत्थो यूषः, सौवीरकं काञ्जिकम् ॥ १८ ॥ १९ ॥

फणिनां विषवेगे तु प्रथमे शोणितं हरेत् ॥
द्वितीये मधुसर्पिर्भ्यां पाययेतागदं भिषक् ॥ २० ॥
नस्यकर्माञ्जने युञ्ज्यात्तृतीये विषनाशने ॥
वान्तं चतुर्थे पूर्वोक्तां यवागूमथ दापयेत्[१] ॥ २१ ॥
शीतोपचारं कृत्वाऽऽदौ भिषक् पञ्चमषष्ठयोः ॥
पाययेच्छोधनं तीक्ष्णं यवागूं चापि कीर्तिताम् ॥२२
सप्तमे त्ववपीडेन शिरस्तीक्ष्णेन शोधयेत् ॥
तीक्ष्णमेवाञ्जनं दद्यात्, तीक्ष्णशस्त्रेण मूर्ध्नि च॥२३॥
कृत्वा काकपदं चर्म सासृग्वा पिशितं[२] क्षिपेत् ॥

अत ऊर्ध्वं दर्वीकरादिवेगविशेषेण वैशेषिकं चिकित्सितमाह—फणिनामित्यादि । शोणितं हरेदिति सिरया प्रच्छन्नेन शृङ्गेण वा । अगदं दर्वीकरविषोदितम् । वान्तं चतुर्थ इत्यादि । वमनमिह सार्वकार्मिकादिभिरगदैः । पूर्वोक्तां यवागूमिति स्थावरविषविषये कृतवमनादिकर्मणां कोशातक्यादिद्रव्यैः कृतामन्नसंसर्जनार्थम् । एवं पञ्चमषष्ठयोः शोधने कृतेऽन्नसंसर्जनार्थं कीर्तितां यवागूम् । सप्तमे तु प्रत्याख्यायावपीडनादिकम् ॥२०-२३॥—

पूर्वे मण्डलिनां वेगे दर्वीकरवदाचरेत् ॥ २४ ॥
अगदं मधुसर्पिर्भ्यां द्वितीये पाययेत च ॥
वामयित्वा यवागूं च पूर्वोक्तामथ दापयेत् ॥ २५ ॥
तृतीये शोधितं तीक्ष्णैर्यवागूं पाययेद्धिताम् ॥
चतुर्थे पञ्चमे चापि दर्वीकरवदाचरेत् ॥ २६ ॥
काकोल्यादिर्हितः षष्ठे पेयश्च मधुरोऽगदः[३] ॥
हितोऽवपीडे त्वगदः सप्तमे विषनाशनः ॥ २७ ॥

१ 'विषप्रतिबन्धहेतुः' इति पा० । २ 'जिताहारेण' इति पा० ।

१ 'दापयेत्' इति पा० । २ 'मांसकं' इति पा० । ३ 'मधुरो गणः' इति पा० ।

पूर्वे मण्डलिनामित्यादि। पूर्वे मण्डलिनां वेगे दर्वीकरवदित्यनेनातिदिष्टं शोणितमोक्षणं जलौकाभिः। अगदं मण्डलिविषोदितमेव। द्वितीये वामयित्वेति वमनद्रव्यक्काथेन। शोधितं विरिक्तं तीक्ष्णैर्विरेचनद्रव्यैः। पेयश्चेत्यत्र चकारेण शोधनं तीक्ष्णमपि समुच्चीयते। मधुरोऽगद इति महागदादिषु योऽतीक्ष्णः स पेयः। सप्तमे वेगे प्रत्याख्याय विषप्रत्यनीकागदावपीडेनोपचरेत्॥ २४-२७॥

पूर्वे राजिमतां वेगेऽलाबुभिः शोणितं हरेत्[१]॥
अगदं मधुसर्पिर्भ्यां संयुक्तं पाययेत च॥ २८॥
वान्तं द्वितीये त्वगदं पाययेद्विषनाशनम्॥
तृतीयादिषु त्रिष्वेवं विधिर्दार्वीकरो हितः॥ २९॥
षष्ठेऽञ्जनं तीक्ष्णतममवपीडश्च सप्तमे॥

अथ राजिमतामित्यादि। अवपीडोऽत्र सार्वकार्मिकागदेन। अवपीडश्चेति चकारेण नष्टसंज्ञविधानं वक्ष्यमाणं सूच्यते। ॥ २८॥ २९॥—

गर्भिणीवालवृद्धानां सिराव्यधनवर्जितम्॥ ३०॥
विषार्तानां यथोद्दिष्टं विधानं शस्यते मृदु॥

चिकित्सितस्य क्वचिदेव कंचिद्विशेषमुद्दिशन्नाह—गर्भिणीत्यादि॥ ३०॥—

रक्तावसेकाञ्जनानि नरतुल्यान्यजाविके॥ ३१॥
त्रिगुणं महिषे सोष्ट्रे गवाश्वे द्विगुणं तु तत्[२]॥
चतुर्गुणं तु नागानां,

सप्तवेगप्रसङ्गेन पशुवेगविशेषस्योक्तत्वाच्चिकित्सिते मात्रायां विशेषमुद्दिशन्नाह—रक्तेत्यादि। रक्तावसेकस्य महती मात्रा प्रस्थप्रमाणा; प्रस्थश्चात्र सार्धत्रयोदशपलप्रमाणः॥ ३१॥—

केवलं सर्वपक्षिणाम्॥ ३२॥
परिषेकान् प्रदेहांश्च सुशीतानवचारयेत्॥
माषकं त्वञ्जनस्येष्टं द्विगुणं नस्यतो हितम्॥
पाने चतुर्गुणं पथ्यं वमनेऽष्टगुणं पुनः॥ ३३॥

पक्षिणां चिकित्सितमुद्दिशन्नाह—केवलमित्यादि। परिषेकप्रदेहौ केवलं नरविषहरद्रव्येण कार्यौ, नतु रक्तावसेकाञ्जनानीत्यर्थः। अञ्जनादीनां प्रमाणमाह—माषकमित्यादि। इदमञ्जनादिप्रमाणं गयदासजेज्जटाभ्यामङ्गीकृतम्। वयं तु वृद्धवाग्भटोक्तसुश्रुतोक्तवाक्यदर्शनादञ्जनादिषु विषविषये महतीं मात्रां मन्यामहे। तथाच तयोर्वाक्यम्,—"गुल्मोदावर्तवीसर्पसर्पदंशाभिपीडितैः। उन्मत्तैः कृच्छ्रमूत्रैश्च महती शीघ्रमेव सा"—इति; सुश्रुते च,—"अहोरात्रादसंदुष्टा या मात्रा परिजीर्यति। सा च कुष्ठविषोन्मादग्रहापस्मारनाशिनी"—इति; तन्त्रान्तरेऽपि—"विषजुष्टहता ये च कासश्वासहताश्च ये। तरुणा बलवन्तश्च वामयेदुत्तमेन तान्"—इति। एतदुद्देशेन कल्कादीनां महत्या मात्रयाऽत्र युक्तिरवसीयते। महत्या मात्रया च कल्कमोदकचूर्णानां पलं मात्राप्रमाणम्। तथा च,—"कल्कमोदकचूर्णानां कर्ष(पल)मद्याच्च लेहतः। कर्षद्वयं पलं वाऽपि वयोरोगाद्यपेक्षया"—इति। क्काथस्य पलचतुष्टयं प्रमाणं; तथाच—"क्काथ्यद्रव्यपले वारि द्विरष्टगुणमिष्यते। चतुर्भागावशेषं तु पेयं पलचतुष्टयम्"—इति। वमनविषये क्काथस्य नव प्रस्थाः प्रमाणं; तथाच, "नव प्रस्था तु ज्येष्ठा स्यान्मध्यमा षट् प्रकीर्तिता। निष्क्काथस्य त्रयः प्रस्था मागधास्तु कनीयसी"—इति। वमनविषये कल्कस्य पलत्रयं प्रमाणम्। तथा च,—"त्रिपलं ज्येष्ठमाख्यातं कनीयस्तु पलं भवेत्। मध्यमं द्वे पले विद्यादिति मे निश्चिता मतिः"—इति। नस्याञ्जनयोश्च मात्रा नस्याञ्जनविधावेव या महती प्रतिपादितेति॥ ३२॥ ३३॥

देशप्रकृतिसात्म्यर्तुविषवेगबलाबलम्॥
प्रधार्य निपुणं बुद्ध्या ततः कर्म समाचरेत्॥ ३४॥

देशेत्यादि। देशो भूमिरातुरश्च; तत्र भूदेशोऽश्वत्थदेवतायतनश्मशानादिकः, आतुरशरीरे च मर्मदेशः; प्रकृतिः कायिकी मानसी च; तत्र कायिकी वातादिकृता, मानसी च सत्त्वादिजा। प्रधार्य आलोच्य, बुद्ध्या निपुणं यथा भवत्येवं कर्म समाचरेत्॥ ३४॥

वेगानुपूर्व्या कर्मोक्तमिदं विषविनाशनम्[१]॥
कर्मावस्थाविशेषेण विषयोरुभयोः शृणु॥ ३५॥

वेगानुपूर्व्येत्यादि। वेगानुपूर्व्या वेगानामनुक्रमेणेत्यर्थः। उभयोः स्थावरजङ्गमयोः॥ ३५॥

विवर्णे कठिने शूने सरुजेऽङ्गे विषान्विते[२]॥
तूर्णं विस्रावणं कार्यमुक्तेन विधिना ततः॥ ३६॥

विवर्णे इत्यादि। तूर्णं त्वरितम्। विस्रावणं रक्तमोक्षणम्॥ ३६॥

क्षुधार्तमनिलप्रायं तद्विषार्तं[३] समाहितः॥
पाययेत रसं सर्पिः शुक्तं[४] क्षौद्रं तथा दधि॥ ३७॥

क्षुधार्तमित्यादि। तद्विषार्तमिति वाताधिकविषवेदनार्तम्। अत्र मांसरसादिपानं विषवेगप्राप्तौ सत्यां सुखेन वमनार्थम्॥ ३७॥

तृड्दाहघर्मसंमोहे पैत्तं पैत्तविषातुरम्[६]॥
शीतैः संवाहनस्नानप्रदेहैः समुपाचरेत्॥ ३८॥

तृड्दाहेत्यादि। घर्मे इत्युष्णकाले, संमोहे मूर्च्छायाम्। पैत्तं पित्तप्रकृतिम्। पैत्तं पित्तजनकं विषम्। संवाहनं सुखकरः स्पर्शः। प्रदेहः प्रलेपः॥ ३८॥

शीते शीतप्रसेकार्तं श्लैष्मिकं कफकृद्विषम्॥
वामयेद्वमनैस्तीक्ष्णैस्तथा मूर्च्छामदान्वितम्॥ ३९॥

१ 'अथ राजिमतां वेगे प्रथमे शोणितं हरेत्' इति पा०। २ 'गवाश्वयोश्च द्विगुणं त्रिगुणं महिषोष्ट्रयोः' इति पा०।

१ 'वेगानुपूर्वमित्येतत् कर्मोक्तं विषनाशनम्' इति पा०। २ 'विषार्दिते' इति पा०। ३ 'तद्विषार्तिसमन्वितम्' इति पा०। ४ 'तक्रं' इति पा०। 'पाययेद्दधि तक्रं वा सर्पिः क्षौद्रं तथा रसम्' इति पा०। ५ 'तद्विषार्तिरिति वाताधिकविषवेदना' इति पा०। ६ 'पैत्ते विषातुरम्' इति पा०।

कफविषातुरस्य चिकित्सामाह—शीते इत्यादि । शीते शीतकाले । श्लैष्मिकं पुरुषम् ॥ ३९ ॥

कोष्ठदाहरुजाध्मानमूत्रसङ्गरुगन्वितम् ॥
विरेचयेच्छकृद्वायुसङ्गपित्तातुरं नरम् ॥४० ॥

आमाशयगतस्य कफस्य वमनमुद्दिश्य पच्यमानपक्वाशयगतयोः पित्तवातयोर्विरेचनशब्देन विरेकवस्ती निर्दिशन्नाह—कोष्ठेत्यादि । कोष्ठदाहादौ तु विरेचनशब्दो विरेचन एव वर्तते ॥ ४० ॥

शूनाक्षिकूटं निद्रार्तं विवर्णाविललोचनम् ॥
विवर्णं चापि पश्यन्तमञ्जनैः समुपाचरेत् ॥ ४१ ॥

शूनाक्षिकूटमित्यादि । अक्षिकूटो भ्रुवोरधोभागः । आविलं दूषिकास्राभ्यां मलिनं, विवर्णं विविधवर्णम् ॥ ४१ ॥

शिरोरुग्गौरवालस्यहनुस्तम्भगलग्रहे ॥
शिरो विरेचयेत् क्षिप्रं मन्यास्तम्भे च दारुणे ॥ ४२ ॥
नष्टसंज्ञं विवृत्ताक्षं भग्नग्रीवं विरेचनैः ॥
चूर्णैः प्रधमनैस्तीक्ष्णैर्विषार्तं समुपाचरेत् ॥ ४३ ॥
ताडयेच्च सिराः क्षिप्रं तस्य शाखाललाटजाः ॥
तास्वप्रसिच्यमानासु मूर्ध्नि शस्त्रेण शस्त्रवित् ॥४४॥
कुर्यात् काकपदाकारं व्रणमेवं स्रवन्ति ताः ॥
सरक्तं चर्म मांसं वा निक्षिपेच्चास्य मूर्धनि ॥ ४५ ॥
चर्मवृक्षकषायं वा कल्कं वा कुशलो भिषक् ॥
वादयेच्चागदैर्लिप्त्वा दुन्दुभींस्तस्य पार्श्वयोः ॥ ४६ ॥
लब्धसंज्ञं पुनश्चैनमूर्ध्वं चाधश्च शोधयेत् ॥
निःशेषं निर्हरेच्चैवं विषं परमदुर्जयम् ॥ ४७ ॥
अल्पमप्यवशिष्टं हि भूयो वेगाय कल्पते ॥
कुर्याद्वा सादवैवर्ण्यज्वरकासशिरोरुजः ॥ ४८ ॥
शोफशोषप्रतिश्यायतिमिरारुचिपीनसान् ॥
तेषु चापि यथादोषं प्रतिकर्म प्रयोजयेत् ॥ ४९ ॥
विषार्तोपद्रवांश्चापि यथास्वं समुपाचरेत् ॥

नष्टसंज्ञमित्यादि । विवृताक्षं व्यावर्तितनेत्रम् । सरक्तमिति । सरक्तं हि मांसादिकं शिरसि निक्षिप्तं विषसंक्रामणं भवति । चर्मवृक्षः पूर्वदेशे नौवृक्षः । कषायोऽत्र निर्यासः । असावपि प्रयोगो विषसंक्रमणहेतुः । दुन्दुभीभिःस्वानान् । एवं च परमदुर्जयं विषं निर्हरेत्; कुत इत्याह—अल्पमित्यादि । भूयः पुनरपि वेगाय कल्पते वेगार्थं भवति । सादोऽङ्गग्लानिः । प्रतिश्यायस्थाने जेज्जटाचार्यः स्तैमित्यं पठति, अत्र स्तैमित्यं निश्चलता ॥ ४२–४९ ॥—

अथारिष्टां विमुच्याशु प्रच्छयित्वाऽङ्कितं तया[3] ॥५०॥
दिह्यात्तत्र विषं स्कन्नं भूयो वेगाय कल्पते ॥

अरिष्टास्थापनबन्धनविषदूषितशोणितस्य चिकित्सां दूष्यविषप्रत्यनीकामुद्दिशन्नाह—अथारिष्टामित्यादि । अथानन्तरम् । तया अङ्कितं देशं प्रच्छयित्वा दिह्यात् 'अगदैः' इति शेषः; अन्यथा तत्र विषं स्कन्नं स्त्यानीभूतं भूयो वेगाय कल्पते पुनर्वेगार्थं प्रादुर्भवतीत्यर्थः ॥ ५० ॥—

एवमौषधिभिर्मन्त्रैः क्रियायोगैश्च यत्नतः ॥ ५१ ॥
विषे हृतगुणे देहाद्यदा दोषः प्रकुप्यति ॥
तदा पवनमुद्वृत्तं स्नेहाद्यैः समुपाचरेत् ॥ ५२ ॥
तैलमत्स्यकुलत्थाम्लवर्ज्यैर्विषहरायुतैः ॥
पित्तज्वरहरैः पित्तं कषायस्नेहवस्तिभिः ॥ ५३ ॥
कफमारग्वधाद्येन सक्षौद्रेण गणेन तु ॥
श्लेष्मघ्नैरगदैश्चैव तिक्तै रूक्षैश्च भोजनैः ॥ ५४ ॥

एवमित्यादि । औषधिभिर्महागदादिनिर्दिष्टाभिः, मन्त्रैः कुरुकुल्लादिनिर्दिष्टैः, क्रियायोगैर्दूष्यभूतशोणितहरबहिःपरिमार्जनसेचनालेपनादिभिः; तथैवान्तःपरिमार्जनैर्वमनविरेचनास्थापनशिरोविरेचनाख्यैः । विषे हृतगुणे अपहृतविषादजननतीक्ष्णादिगुणे । दोषोऽनिलादिः । उद्वृत्तमुच्चलितं परस्थानमिति यावत् । स्नेहाद्यैरिति आद्यशब्दान्मृदुसंशोधनस्वादुभोजनाङ्गविमर्दनादिभिः । पित्तज्वरहरैरित्यादि समुपाचरेदित्यनुवर्तते । कफमारग्वधाद्येनेत्यादि ॥ ५१–५४ ॥

वृक्षप्रपातविषमपतितं मृतमम्भसि ॥
उद्बद्धं च मृतं सद्यश्चिकित्सेन्नष्टसंज्ञवत् ॥ ५५ ॥

वृक्षेत्यादि । प्रपातो नदीतटादिः, विषमो निम्नोन्नतप्रदेशः, वृक्षादिपतितं प्राणिनं; मृतमम्भसि अम्भसि मृतं, उद्बद्धमुल्लम्बितं च मृतं, सद्यो झटिति, नष्टसंज्ञवच्चिकित्सेत् । तत्र मृतशब्दो मृत्युसमीपे वर्तमानो गृह्यते; न पुनर्मृत एव, तस्य निष्फलचिकित्सितत्वात् । केचिदाचार्या अमुं पाठं न मन्यन्ते, ये तु मन्यन्ते तन्मतानुसारेण लिखितोऽयमित्यदोषः ॥ ५५॥

गाढं बद्धेऽरिष्टया प्रच्छिते वा
तीक्ष्णैर्लेपैस्तद्विधैर्वाऽवशिष्टैः[1] ॥
शूने गात्रे क्लिन्नमत्यर्थपूति
ज्ञेयं मांसं तद्विषात् पूति कष्टम्[2] ॥ ५६ ॥

गाढमित्यादि । गाढमरिष्टया बद्धे, अथवा प्रच्छिते, तीक्ष्णैर्लेपैस्तद्विधैः शरीरवर्तिभिः, अवशिष्टैरनुद्धृतैः, ज्ञेयं ज्ञातव्यं, तैन्मांसं, विषात् पूति पूतिसंज्ञकं, कष्टं कृच्छ्रसाध्यम् ॥ ५६ ॥

सद्यो विद्धं निस्रवेत् कृष्णरक्तं
पाकं यायाद्दह्यते चाप्यभीक्ष्णम् ॥
कृष्णीभूतं क्लिन्नमत्यर्थपूति
शीर्णं मांसं यात्यजस्रं क्षताच्च ॥ ५७ ॥
तृष्णा मूर्च्छा भ्रान्तिदाहौ ज्वरश्च
यस्य स्युस्तं दिग्धविद्धं व्यवस्येत् ॥

१ 'चूर्णं' इति पा० । २ 'विमुच्याप्सु' इति पा० । ३ 'तथा' इति पा० ।

१ 'मारुतनाशनैः' इति पा० । २ 'विशेषैः' इति पा० ।
३ 'तन्मांसं विषपूतिसंज्ञकं' इति पा०

सद्यो विद्धमित्यादि । अमीक्ष्णं पुनः पुनः, क्लिन्नमार्द्रीभूतं, अत्यर्थं पूति अतिशयेन दुर्गन्धं, शीर्णं शटितम्, अजस्रमनवरतं, भ्रान्तिः वस्तूनामन्यथा प्रतीतिः, स्युर्भवेयुः, दिग्धविद्धं विषलिप्तबाणताडितं, व्यवस्येत् जानीयात् ॥ ५७ ॥—

पूर्वोद्दिष्टं लक्षणं सर्वमेत-
ज्जुष्टं यस्यालं विषेण व्रणाः स्युः ॥ ५८ ॥
लूतादष्टाः दिग्धविद्धा विषैर्वा
जुष्टा प्रायस्ते व्रणाः पूतिमांसाः[१] ॥

पूर्वोद्दिष्टमित्यादि । यस्य प्राणिनोऽलमत्यर्थं शत्रूणामवचारितेन विषेण जुष्टा व्रणाः स्युर्भवेयुः, तस्य एतत् सर्वं पूर्वोद्दिष्टं लक्षणं भवति; कुत इत्याह—लूतादष्टा इत्यादि । ये व्रणा लूतादष्टदिग्धविद्धादयस्ते प्रायः पूतिमांसा भवन्तीत्यर्थः ॥५८॥—

तेषां युक्त्या पूतिमांसान्यपोह्य
वार्योकोभिः शोणितं चापहृत्य ॥ ५९ ॥
हृत्वा दोषान् क्षिप्रमूर्ध्वं त्वधश्च
सम्यक् सिञ्चेत् क्षीरिणां त्वक्कषायैः ॥
अन्तर्वस्त्रं दापयेच्च प्रदेहान्
शीतैर्द्रव्यैराज्ययुक्तैर्विषघ्नैः ॥ ६० ॥

एषां पूर्वोक्तानां चिकित्सामाह—तेषामित्यादि । वार्योकोभिः जलौकोभिरित्यर्थः । क्षीरिणां न्यग्रोधोदुम्बराश्वत्थप्लक्षगर्दभाण्डानाम् । शीतैरित्यादि । शीतवीर्यस्पर्शैर्विषघ्नैः पित्तविसर्पोक्तैरित्यर्थः । आज्यमिश्रैः शतधौतघृतयुक्तैः ॥ ५९ ॥ ६० ॥—

भिन्ने त्वस्थ्नि दुष्टजातेन कार्यः
पूर्वो मार्गः पैत्तिके यो विषे च ॥

भिन्ने इत्यादि । दुष्टजातेन दुष्टजीवसंभूतेन अस्थिविषाणामस्थ्नेत्यर्थः । अस्थ्ना दुष्टजातेनेत्युपलक्षणं, तेन तत्सदृशशकृन्मूत्रशुक्रस्पर्शपर्दनगुदास्थिशकृशवैः सविषकण्टकैर्वृश्चिककण्टकैश्च कृते व्रणे । पूर्वो मार्गः अनन्तरोक्तः 'तेषां युक्त्या पूतिमांसान्यपोह्य' इत्यादिकः; न परं दुष्टास्थ्यादिभिर्भिन्ने व्रणे पूर्वो मार्गः अनन्तरोक्तोऽपि यो व्रणस्तस्मिन्नपि पूर्वो मार्गः कार्यः ॥—

त्रिवृद्विशल्ये मधुकं हरिद्रे
रक्ता नरेन्द्रो लवणश्च वर्गः ॥ ६१ ॥
कटुत्रिकं चैव सुचूर्णितानि
शृङ्गे निदध्यान्मधुसंयुतानि ॥
एषोऽगदो हन्ति विषं प्रयुक्तः
पानाञ्जनाभ्यञ्जननस्ययोगैः ॥ ६२ ॥
अवार्यवीर्यो विषवेगहन्ता[२]
महागदो नाम महाप्रभावः ॥

इदानीमगदकोशमाह—त्रिवृद्विशल्येत्यादि । विशल्या काष्ठपाटला, रक्ता मञ्जिष्ठा, नरेन्द्रः किरमालकः । अवार्यवीर्योऽप्रतिहतवीर्यः ॥ ६१ ॥ ६२ ॥—

विडङ्गपाठात्रिफलाजमोदा-
हिङ्गूनि वक्रं त्रिकटूनि चैव ॥ ६३ ॥
सर्वश्च वर्गो लवणः सुसूक्ष्मः
सचित्रकः क्षौद्रयुतो निधेयः ॥
शृङ्गे गवां शृङ्गमयेन चैव
प्रच्छादितः पक्षमुपेक्षितश्च ॥ ६४ ॥
एषोऽगदः स्थावरजङ्गमानां
जेता विषाणामजितो हि नाम्ना ॥

विडङ्गपाठेत्यादि । वक्रं तगरम् ॥ ६३ ॥ ६४ ॥—

प्रपौण्डरीकं सुरदारु मुस्ता
कालानुसार्या कटुरोहिणी च ॥ ६५ ॥
स्थौणेयकध्यामकगुग्गुलूनि[२]
पुन्नागतालीशसुवर्चिकाश्च ॥
कुटन्नटैलासितसिन्धुवाराः
शैलेयकुष्ठे तगरं प्रियङ्गुः ॥ ६६ ॥
रोध्रं जलं काञ्चनगैरिकं च
समागधं चन्दनसैन्धवं च ॥
सूक्ष्माणि चूर्णानि समानि कृत्वा
शृङ्गे निदध्यान्मधुसंयुतानि ॥ ६७ ॥
एषोऽगदस्तार्क्ष्य इति प्रदिष्टो
विषं निहन्यादपि तक्षकस्य ॥

प्रपौण्डरीकमित्यादि । कालानुसार्या कालानुसारिवा । ध्यामकं कत्तृणं, कुटन्नटः श्योनाकः, सितसिन्धुवारः श्वेतनिर्गुण्डी ॥ ६५–६७ ॥—

मांसीहरेणुत्रिफलासुरङ्गी-
रक्तालतायष्टिकपद्मकानि ॥ ६८ ॥
विडङ्गतालीशसुगन्धिकैला-
त्वक्कुष्ठपत्राणि सचन्दनानि ॥
भार्गी पटोलं किणिही सपाठा
मृगादनी कर्कटिका पुरश्च ॥ ६९ ॥
पालिन्द्यशोकौ क्रमुकं सुरस्याः
प्रसूनमारुष्करजं च पुष्पम् ॥
सूक्ष्माणि चूर्णानि समानि शृङ्गे
न्यसेत् सपित्तानि समाक्षिकाणि[३] ॥ ७० ॥
वराहगोधाशिखिशल्लकीनां[४]
मार्जारजं पार्षतनाकुले च ॥
यस्यागदोऽयं सुकृतो गृहे स्या-
न्नाम्नर्षभो नाम नरर्षभस्य ॥ ७१ ॥

---

१ 'जुष्टा ये स्युर्ये व्रणाः पूतिमांसाः' इति पा० । २ 'विषवेगहारी' इति पा० ।

१ 'हन्ता' इति पा० । २ 'स्थौणेयकध्यामकपद्मकानि' इति पा० । ३ 'चूर्णान्यथैषां निहितानि शृङ्गे न्यसेच्च पित्तानि समाक्षिकाणि' इति पा० । ४ 'वराहगोधाशिखिशल्यकानां' इति पा० ।

न तत्र सर्पाः कुत एव कीटा-
स्त्यजन्ति वीर्याणि विषाणि चैव ॥
एतेन भेर्यः पटहाश्च दिग्धा
नानद्यमाना विषमाशु हन्युः ॥ ७२ ॥
दिग्धा पताकाश्च निरीक्ष्य सद्यो
विषाभिभूता ह्यविषा भवन्ति ॥

मांसीत्यादि। मुरङ्गी शोभाञ्जनकः, रक्ता लता मञ्जिष्ठा, सुगन्धिका सर्पगन्धिका, किणिही कटभी, मृगादनी कर्कटिका, इन्द्रवारुणीफलमित्यन्ये, पुरः गुग्गुलुः, पालिन्दी त्रिवृत्, कालवल्लीत्यपरे, क्रमुकं पूगफलं, रुबुकमित्यन्ये पठन्ति स चैरण्डः, सुरसायाः प्रसूनं तुलसीपुष्पं, शिखी मयूरः, कुक्कुट इत्यन्ये, पृषतानामिदं पार्षतं, पृषतश्चित्तलः। यस्य नरर्षभस्य नराधिपस्य, गृहेऽयमगदो नाम्ना संज्ञया, ऋषभो नाम ऋषभ इति प्रसिद्धः, सुकृतः स्यात् शोभनो निष्पादितो भवेत् ॥ ६८–७२ ॥—

लाक्षा हरेणुर्नलदं प्रियङ्गुः
शिग्रुद्वयं यष्टिकपृथ्विकाश्च ॥ ७३ ॥
चूर्णीकृतोऽयं रजनीविमिश्रो
सर्पिर्मधुभ्यां सहितो निधेयः।
शृङ्गे गवां पूर्ववदापिधान-
स्ततः प्रयोज्योऽञ्जननस्यपानैः ॥ ७४ ॥
संजीवनो नाम गतासुकल्पा-
नेषोऽगदो जीवयतीह मर्त्यान् ॥

लाक्षेत्यादि। पृथ्विका एला, हिङ्गुपत्रिकेत्यन्ये। पूर्ववदापिधानः गोश्रृङ्गिकापिधानः ॥ ७३ ॥ ७४ ॥—

श्लेष्मातकीकट्फलमातुलुङ्ग्यः
श्वेता गिरिह्वा किणिही सिता च ॥ ७५ ॥
सतण्डुलीयोऽगद एष मुख्यो
विषेषु दर्वीकरराजिलानाम् ॥

श्लेष्मातकीत्यादि। श्लेष्मातकी 'बहुवारः' इति लोके, कट्फलं काश्मरी, मातुलुङ्गो बीजपूरकः, श्वेता गिरिह्वा श्वेतस्यन्दा, किणिही नीलस्यन्दा, सिता शर्करा। अयं दर्वीकरराजिलविषदष्टागदः ॥ ७५ ॥—

द्राक्षा सुगन्धा नगवृत्तिका च
श्वेता समङ्गा समभागयुक्ता ॥ ७६ ॥
देयो द्विभागः सुरसाच्छदस्य
कपित्थबिल्वादपि दाडिमाच्च ॥
तथाऽर्धभागः सितसिन्धुवारा-
दङ्कोठमूलादपि गैरिकाच्च ॥ ७७ ॥
एषोऽगदः क्षौद्रयुतो निहन्ति
विशेषतो मण्डलिनां विषाणि ॥

द्राक्षेत्यादि। सुगन्धा सर्पसुगन्धा नाकुलीति यावत्, नगवृत्तिका शल्लकी, श्वेता श्वेतस्यन्दः। देयो द्विभाग इत्यादि। अर्धभागः अर्धपलं सिन्धुवारादिभ्यः। केचित्तु सुगन्धा नगमृत्तिकेति पठन्ति, तत्रायमर्थः—शोभनगन्धवती पर्वतस्य मृत्तिका, पर्वतमृत्तिकायाः सामान्यतो विषहरत्वात्। सामान्येन सर्वत्र विषहरोऽयमगदः, विशेषतो मण्डलिविषहरो भवति। अयं तु मण्डलिविषहरो नामागदः ॥ ७६ ॥ ७७ ॥—

वंशत्वगार्द्राऽऽमलकं कपित्थं
कटुत्रिकं हैमवती सकुष्ठा ॥ ७८ ॥
करञ्जबीजं तगरं शिरीष-
पुष्पं च गोपित्तयुतं निहन्ति ॥
विषाणि लूतोन्दुरपन्नगानां
कीटं च लेपाञ्जननस्यपानैः ॥ ७९ ॥
पुरीषमूत्रानिलगर्भसङ्गा-
न्निहन्ति वर्त्यञ्जननाभिलेपैः ॥
काचार्मकोथान् पटलांश्च घोरान्
पुष्पं च हन्त्यञ्जननस्ययोगैः ॥ ८० ॥

वंशत्वगार्द्रेत्यादि। वंशत्वगार्द्रा आर्द्रवंशस्य त्वक्, हैमवती वचा। कोथः पूतिभावः क्लिन्नवर्त्मादिषु। अयं तु सार्वकार्मिकोऽगदः ॥ ७८–८० ॥

समूलपुष्पाङ्कुरवल्कबीजात्
क्वाथः शिरीषात् त्रिकटुप्रगाढः ॥
सलावणः क्षौद्रयुतोऽथ पीतो
विशेषतः कीटविषं निहन्ति ॥ ८१ ॥

समूलपुष्पाङ्कुरेत्यादि। अङ्कुरो नवपत्राङ्कुरः प्रबाल इत्यर्थः। सह लावणेन लवणसमूहेन वर्तते इति सलावणः। केचिदीदृशं पठन्ति—'त्वक्पत्रपुष्पाणि फलं समूलं पिष्ट्वा शिरीषस्य कटुत्रिकं च। सलावणं क्षौद्रयुतं विलीढं विशेषतः कीटविषं निहन्ति'। अयमगदः पञ्चशिरीषनामा ॥ ८१ ॥

कुष्ठं त्रिकटुकं दार्वी मधुकं लवणद्वयम्।
मालती नागपुष्पं च सर्वाणि मधुराणि च ॥ ८२ ॥
कपित्थरसपिष्टोऽयं शर्कराक्षौद्रसंयुतः ॥
विषं हन्त्यगदः सर्वं मूषिकाणां विशेषतः ॥ ८३ ॥

कुष्ठं त्रिकटुकमित्यादि। लवणद्वयं सैन्धवं सौवर्चलं च। मालती जाती, नागपुष्पं नागकेशरं, सर्वाणि मधुराणि काकोल्यादीनि। अयमपि सार्वकामिकनामाऽगदः ॥ ८२ ॥ ८३ ॥

सोमराजीफलं पुष्पं कटभी सिन्धुवारकः ॥
चोरको वरुणः कुष्ठं सर्पगन्धा ससप्तला ॥ ८४ ॥
पुनर्नवा शिरीषस्य पुष्पमारग्वधार्कजम् ॥
श्यामाऽम्बष्ठा विडङ्गानि तथाऽश्मान्तकानि च ८५

१ 'वर्गो विधेयो मधुसर्पिषाऽऽक्तः' इति पा०। २ 'श्वेता च पिष्टा पलिकैश्च भागैः' इति पा०। ३ 'तथाऽर्धभागोऽसितसिन्धुवारात्' इति पा०।

१ 'सोमराजीफलं मुख्यं कदली सिन्धुवारकः' इति पा०।

भूमी कुरवकश्चैव गण एकसरः स्मृतः ॥
एकशो द्वित्रिशो वाऽपि प्रयोक्तव्यो विषापहः ॥८६॥

इति सुश्रुतसंहितायां कल्पस्थाने सर्पदष्टविषचिकित्सितं नाम पञ्चमोऽध्यायः ॥ ५ ॥

सोमराजीफलमित्यादि । सोमराजी बाकुची, सिन्धुवारः श्वेतपुष्पा निर्गुण्डी, चोरको ग्रन्थिपर्णानुकारी, सर्पगन्धा नाकुली, सप्तला यवतिक्ताभेदः, श्यामा श्यामलता, प्रियङ्गुरित्यन्ये, अम्बष्ठा पाठा, अश्मन्तको वृक्षोऽम्लोटकानुसारी, भूमिः कृष्णमृत्तिका, कुरवकः स्निग्धपत्रः सितकुसुमः स्वनामप्रसिद्धः । गण एकसरः स्मृत इति अयमौषधगण एकसरः एकसरसंज्ञकः स्मृतः । एकशो द्वित्रिशो वाऽपि प्रयोक्तव्यो विषापह इति स चौषधगण एकैकशः एकमेकं द्वौ द्वौ त्रीन् त्रीन् वा प्रयोक्तव्यः, प्रयुक्तश्च विषापहो भवति ॥ ८४–८६ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायां कल्पस्थाने पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ।

अथातो दुन्दुभिस्वनीयं कल्पं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि । दुन्दुभिस्वनोऽस्मिन्नध्यायेऽस्तीति दुन्दुभिस्वनीयस्तं; दुन्दुभिरत्र निस्वानः ॥ १ ॥ २ ॥

धवाश्वकर्णशिरीषतिनिशपलाशपिचुमर्दपाटलिपारिभद्रकाम्रोदुम्बरकरहाटकार्जुनककुभसर्जकपीतनश्लेष्मातकाङ्कोठामलकप्रग्रहकुटजशमीकपित्थाश्मन्तकार्कचिरबिल्वमहावृक्षारुष्करारलुमधुकमधुशिग्रुशाकगोजीमूर्वाभूर्जतिल्वकेक्षुरकगोपघोण्टारिमेदानां भस्मान्याहृत्य गवां मूत्रेण क्षारकल्पेन परिस्राव्य विपचेत्, दद्याच्चात्र पिप्पलीमूलतण्डुलीयकवराङ्गचोचमञ्जिष्ठाकरञ्जिकाहस्तिपिप्पलीमरिचविडङ्गगृहधूमानन्तासोमसरलाबाह्लीकगुहाकोशाम्रश्वेतसर्षपवरुणलवणप्लक्षनिचुलकवञ्जुलवक्रालवर्धमानपुत्रश्रेणीसप्तपर्णटुण्टुकैलवालुकनागदन्त्यतिविषाभयाभद्रदारुकुष्ठहरिद्रावचाचूर्णानि लोहानां च समभागानि, ततः क्षारवदागतपाकमवतार्य लोहकुम्भे निदध्यात् ॥ ३ ॥

अनेन दुन्दुभिं लिम्पेत् पताकां तोरणानि च ॥
श्रवणाद्दर्शनात् स्पर्शात् विषात् संप्रतिमुच्यते[1] ॥४॥
एष क्षारागदो नाम शर्करास्वश्मरीषु च ॥
अर्शःसु वातगुल्मेषु[2] कासशूलोदरेषु च ॥ ५ ॥
अजीर्णे ग्रहणीदोषे भक्तद्वेषे च दारुणे ॥
शोफे सर्वसरे चापि[1] देयः श्वासे च दारुणे[2] ॥ ६ ॥
सदा सर्वविषार्तानां सर्वथैवोपयुज्यते ॥
एष तक्षकमुख्यानामपि दर्पाङ्कुशोऽगदः ॥ ७ ॥

धवाश्वकर्णतिनिशेत्यादि । अश्वकर्णः पूर्वदेशे प्रसिद्धः, तिनिशः स्यन्दनः, पलाशः किंशुकः, पिचुमर्दो निम्बः, पारिभद्रको रक्तकुसुमः कण्टकी फलभद्राख्यः, अर्जुनः स्वनामप्रसिद्धो वृक्षविशेषः, ककुभः सुगन्धमूलो विटपविशेषः, सर्जकः स्वनामप्रसिद्धो वृक्षविशेषः, कपीतनो गर्दभाण्डः, श्लेष्मातको बहुवारः, प्रग्रहः किरमालकः, महावृक्षः सेहुण्डः, अरुष्करो भल्लातकः, मधुकं यष्टीमधु, मधुशिग्रुः शाकविटपः, रक्तशोभाञ्जनक इत्यपरे, शाको महापत्रः 'श्रीपर्ण' इति लोके, गोजी गोजिह्वा, इक्षुरकः कोकिलाक्षकः, गोपघोण्टा कर्कोटी, अरिमेदो रामकः; एषां धवादीनामरिमेदान्तानां समूलदलकाण्डशाखानां समेन भागेन गृहीतानां भस्मान्याहृत्य गवां मूत्रेण क्षारषड्गुणेन क्षारकल्पेन परिस्राव्य एकविंशतिवारान् गालयित्वेत्यर्थः, विपचेत् साधयेत्, तावद्यावदच्छो रक्तः पिच्छिलश्च भवति । दद्याच्चात्रेत्यादि । मूलं पिप्पलीमूलं, वराङ्गं वनवासिकात्वक्, चोचं द्वितीया स्थूला त्वक् यां शाल्मलकमित्याचक्षते, करञ्जिका नक्तमालः, अनन्ता उत्पलसारिवा, सोमः सोमवल्कः कट्फलाख्यः, बाह्लीकं कुङ्कुमं, गुहा शालपर्णी, प्लक्षः पर्कटी, निचुलको जलवेतसः, वक्रं तगरं, आलं हरितालं, वर्धमान एरण्डः, पुत्रश्रेणी द्रवन्ती, टुण्टुकः श्योनाकः, एलवालुकः स्वनामप्रसिद्धः, नागदन्ती इन्द्रवारुणीभेदः, जेज्जटाचार्यमते तु दन्ती; एषां पिप्पल्यादीनां चूर्णानि लोहानां च सर्वेषां यथालाभं क्षारोदकात् त्रिंशत्तमभागेन, अत्र अस्मिन् क्षारोदके, दद्यान्निक्षिपेदित्यर्थः । तदनु पुनर्विपचेद् यावन्नातिद्रवं नातिसान्द्रं च भवति । गयदासस्तु शिरीषपिचुमर्दककुभारुष्करमधुकेक्षुरकान् परित्यज्य त्रिंशदेव पठति; पिप्पल्यादिष्वावापेषु च मरिचसोमगुहालवणवक्रालान् परित्यज्य त्रिंशद्द्रव्याणि पठति ॥ ३–७ ॥

विडङ्गत्रिफलादन्तीभद्रदारुहरेणवः ।
तालीशपत्रमञ्जिष्ठाकेशरोत्पलपद्मकम् ॥ ८ ॥
दाडिमं मालतीपुष्पं रजन्यौ सारिवे स्थिरे ॥
प्रियङ्गुस्तगरं कुष्ठं बृहत्यौ चैलवालुकम् ॥ ९ ॥
सचन्दनगवाक्षीभिरेतैः सिद्धं विषापहम् ॥
सर्पिः कल्याणकं ह्येतद्ग्रहापस्मारनाशनम् ॥ १० ॥
पाण्ड्वामयगरश्वासमन्दाग्निज्वरकासनुत् ॥
शोषिणामल्पशुक्राणां वन्ध्यानां च प्रशस्यते ॥ ११ ॥

विडङ्गत्रिफलेत्यादि । इदं कल्याणकं घृतं भूतविद्यायां पठितत्वात् केचिन्न पठन्ति ॥ ८–११ ॥

अपामार्गस्य बीजानि शिरीषस्य च माषकान् ॥
श्वेते द्वे काकमाच्यौ च गवां मूत्रेण पेषयेत् ॥ १२ ॥

---

[1] 'अध्यायं' इति पा० । [2] 'विषं तेषां प्रशाम्यति' इति पा० ।
[3] 'अर्शःसु वातशूले च शूलगुल्मोदरेषु च' इति पा० ।

[1] 'शोफे सर्वसरे तथा' इति पा० । [2] 'अरुचिश्वासकासेषु हिक्कापाण्डुगदेषु च' इति पा० ।

सर्पिरेतैस्तु संसिद्धं विषसंशमनं परम् ॥
अमृतं नाम विख्यातमपि संजीवयेन्मृतम् ॥ १३ ॥

अपामार्गस्येत्यादि । शिरीषस्य च माषकानिति माषका इव माषकाः तान्, बीजानीत्यर्थः । श्वेते द्वे इति श्वेता महाश्वेता च कटभीद्वयमित्यर्थः; अन्ये तु श्वेते द्वे श्वेतस्यन्दः श्वेतवचेति भाषन्ते । अत्र श्रुतत्वाद् घृताद् गोमूत्रं चतुर्गुणं देयम् ॥ १२ ॥ १३ ॥

चन्दनागुरुणी कुष्ठं तगरं तिलपर्णिकम् ॥
प्रपौण्डरीकं नलदं सरलं देवदारु च ॥ १४ ॥
भद्रश्रियं यवफलां भार्गीं नीलीं सुगन्धिकाम् ॥
कालेयकं पद्मकं च मधुकं नागरं जटाम् ॥ १५ ॥
पुन्नागैलैलवालूनि गैरिकं ध्यामकं वलाम् ॥
तोयं सर्जरसं मांसीं शतपुष्पां हरेणुकाम् ॥ १६ ॥
तालीशपत्रं क्षुद्रैलां प्रियङ्गुं सकुटन्नटम् ॥
शिलापुष्पं सशैलेयं पत्रं कालानुसारिवाम् ॥ १७ ॥
कटुत्रिकं शीतशिवं काश्मर्यं कटुरोहिणीम् ॥
सोमराजीमतिविषां पृथ्विकामिन्द्रवारुणीम् ॥ १८ ॥
उशीरं वरुणं मुस्तं कुस्तुम्बुरु नखं तथा ॥
श्वेते हरिद्रे स्थौणेयं लाक्षां च लवणानि च ॥ १९ ॥
कुमुदोत्पलपद्मानि पुष्पं चापि तथाऽर्कजम् ॥
चम्पकाशोकसुमनस्तिल्वकप्रसवानि च ॥ २० ॥
पाटलीशाल्मलीशेलुशिरीषाणां तथैव च ॥
कुसुमं तृणमूल्याश्च सुरभीसिन्धुवारजम् ॥ २१ ॥
धवाश्वकर्णपार्थानां पुष्पाणि तिनिशस्य च ॥
गुग्गुलुं कुङ्कुमं बिम्बीं सर्पाक्षीं गन्धनाकुलीम् ॥२२॥
एतत् संभृत्य संभारं सूक्ष्मचूर्णानि कारयेत् ॥
गोपित्तमधुसर्पिर्भिर्युक्तं शृङ्गे निधापयेत् ॥ २३ ॥
भग्नस्कन्धं विवृताक्षं मृत्योर्दंष्ट्रान्तरं गतम् ॥
अनेनागदमुख्येन मनुष्यं पुनराहरेत् ॥ २४ ॥
एषोऽग्निकल्पं दुर्वारं क्रुद्धस्यामिततेजसः ॥
विषं नागपतेर्हन्यात् प्रसभं वासुकेरपि ॥ २५ ॥
महासुगन्धिनामाऽयं पञ्चाशीत्यङ्गसंयुतः ॥
राजाऽगदानां सर्वेषां राज्ञो हस्ते भवेत् सदा ॥२६॥
स्नातानुलिप्तस्तु नृपो भवेत् सर्वजनप्रियः ॥
भ्राजिष्णुतां च लभते शत्रुमध्यगतोऽपि सन् ॥२७॥

चन्दनागुरुणीत्यादि । तिलपर्णिकं 'हुलहुल' इति लोके, गयी तु तैलपर्णिकः सरलरसः नवनीतखोटिरिति प्रसिद्धः, नलदमुशीरभेदः लामज्जकं, भद्रश्रियं श्वेतचन्दनं, यवफला दुग्धिका, नीली नीलाञ्जनिका शारदं फलं, सुगन्धिका सर्पसुगन्धा, कालेयकं पीतचन्दनं, जटा द्वितीया मांसी, पुन्नागः स्वनामप्रसिद्धः, एला स्थूलैला, एलवालुकं स्वनामप्रसिद्धं, ध्यामकं कत्तृणं, तोयं बालकं, हरेणुः रेणुका, क्षुद्रैला सूक्ष्मैला, कुटन्नटः वन्यकः फञ्जीमदनक इति लोके, शिलापुष्पं शिला मनःशिला, पुष्पं पुष्पकासीसं, कालानुसारिवा तगरभेदः, काश्मरी श्रीपर्णी, शीतशिवं कर्पूरं, शमीत्यपरे, सोमराजी बाकुची, पृथ्विका श्यामवर्णः स्थूलजीरकः, हिङ्गुपत्रिकेत्यपरे, श्वेते इति कटभीद्वयं, श्वेतामिति केचित् पठन्ति तत्र श्वेता वचा, स्थौणेयं ग्रन्थिपर्णकं, लवणानि पञ्चैव, प्रसवशब्देनात्र कुसुमानि फलानि च ग्राह्याणि प्रसवस्योभयवाचित्वात्, तृणशून्याः केतक्याः, मल्लिकाया इत्यपरे, सुरसीसिन्धुवाराभ्यां जातं कुसुममित्यर्थः, सिन्धुवारो निर्गुण्डीभेदः, अश्वकर्णः सर्जभेदः, तिनिशः स्यन्दनः, बिम्बी कुन्दुरिका, सर्पाक्षी रक्तपुष्पा पूर्वदेशे प्रसिद्धा, गन्धनाकुली सुगन्धमूला रास्ना, शिलापुष्पमित्यत्र तिलपुष्पमिति केचित् पठन्ति तच्च प्रसिद्धं, तन्मते शृङ्गेणाधारेण पञ्चाशीतिः पूर्यते । अष्टौ लवणानीति जेज्जटाचार्यः, तन्नेच्छति गयी, यतः पञ्चाशीतेरङ्गानामाधिक्यं स्यात् । 'कुमुदोत्पलपद्मानि पुष्पं वाऽपि तथाऽर्कजं' इत्यत्र स्थाने 'पाटलाकाश्मरीशेलुशिरीषप्रसवानि च' इति गयदासाचार्यः पठति । एषोऽग्निकल्पमित्यादि । एषोऽगदः, अग्निकल्पं दुर्वारं विषं वासुकेरपि क्रुद्धस्य अमिततेजसो नागपतेः प्रसभं हठेन हन्यादिति संबन्धः । राजाऽगदानां सर्वेषां राज्ञो हस्ते भवेत् सदेति यतोऽयं सर्वागदानां राजा अत एव राज्ञो हस्ते सदा निबद्धं भवितुमर्हति; तेन हस्तस्थितागदेन पाणिना स्पृष्टमन्नपानं निर्विषं भवति; हस्तस्थापनप्रयोजनमिदम् । स्नातानुलिप्त इत्यादि । स्नानानुलेपनाभ्यां वशीकरणम् ॥ १४-२७ ॥

उष्णवर्ज्यो विधिः कार्यो विषार्तानां विजानता ॥
मुक्त्वा कीटविषं तद्धि शीतेनाभिप्रवर्धते ॥ २८ ॥

विषार्तानां शोधनाङ्गत्वेनापि स्वेदो न क्रियत इत्यर्थमाह— उष्णवर्ज्य इत्यादि ॥ २८ ॥

अन्नपानविधावुक्तमुपधार्य शुभाशुभम् ॥
शुभं देयं विषार्तेभ्यो विरुद्धेभ्यश्च वारयेत् ॥ २९ ॥
फाणितं शिग्रुसौवीरमजीर्णाध्यशनं तथा ॥
वर्जयेच्च समासेन नवधान्यादिकं गणम् ॥ ३० ॥
दिवास्वप्नं व्यवायं च व्यायामं क्रोधमातपम् ॥
सुरातिलकुलत्थांश्च वर्जयेद्धि विषातुरः ॥ ३१ ॥

उपधार्य ज्ञात्वेत्यर्थः, शुभाशुभं हिताहितं, वारयेद्विषार्तानेव । फाणितमित्यादि । कुलत्थांश्चेत्यत्र चकारेण पिण्याकमूलकलसुनकलायकुसुम्भातसीशिशुमारकूर्मनिष्पावजम्ब्वाम्रातकचूतादिकानि च वर्जयेत् ॥ २९-३१ ॥

---

१ 'प्रपौण्डरीकं यष्ट्याह्वं नलदं देवदारु च' इति पा०। २ 'सरलं' इति पा०। ३ 'श्रीपर्णिकां शीतशिवं त्रिकटुं कटुरोहिणीम्' इति पा०। ४ 'इन्द्रजान् यवान्' इति पा०। ५ 'सुरस्यास्तृणशून्याश्च सिन्धुवारस्य यानि च' इति पा०। ६ 'विधिवत्सूक्ष्मचूर्णितम्' इति पा०। ७ 'चिकित्सेद्धि विषातुरम्' इति पा०। ८ 'तेनानुलिप्तस्तु' इति पा०। ९ 'तेजस्वितां समाप्नोति' इति पा०।

प्रसन्नदोषं प्रकृतिस्थधातु-
मन्नाभिकाङ्क्षं समसूत्रजिह्मम् ॥
प्रसन्नवर्णेन्द्रियचित्तचेष्टं
वैद्योऽवगच्छेदविषं मनुष्यम् ॥ ३२ ॥

इति सुश्रुतसंहितायां कल्पस्थाने दुन्दुभिस्वनीयकल्पो नाम षष्ठोऽध्यायः ॥ ६ ॥

अविषश्च कीदृश इत्याह—प्रसन्नदोषमित्यादि । प्रसन्नदोषं स्वभावावस्थितवातादिकं, प्रकृतिस्थधातुं दधतीति धातवो रसादयो मलाश्च । अन्नाभिकाङ्क्षं भोजनाभिलाषिणं, एतेन समाग्नित्वमुक्तम् । समसूत्रजिह्ममिति समसूत्रा जिह्वा यस्य स तथा तम् । एतदुक्तं भवति-निर्विषस्य हि पुरुषस्य चित्तेन सह समसूत्रतया जिह्वा रसवेदिनी भवति, सविषस्य विषप्रभावेण दूषितचित्तत्वाज्जिह्वा रसवेदिनी न भवतीत्यर्थः । अनेन श्लोकेन 'समदोषः समाग्निश्च' इत्यादिश्लोकस्य सर्व एवार्थो निबद्धः । वैद्योऽवगच्छेदविषं मनुष्यमिति उक्तलक्षणः पुरुषोऽविषो भवति, विपरीतलक्षणस्तु विषातुरः । तथाहि,—"प्रवृद्धदोषं विकृतिस्थधातुमनन्नकाङ्क्षं क्षतसूत्रजिह्मम् । विरुद्धवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेत् सविषं मनुष्यम्"—इति । 'सममूत्रविट्कं' इति केचित् पठन्ति, तच्च सुबोधम् । इदं सविषाविषलक्षणं तीक्ष्णतमे स्थावरविषे सर्पदष्टे च द्रष्टव्यं, नतु मन्दविषे चिरेण धातुदूषणकरे मूषिकविषे कीटविषेषु च; अत एवोत्तरत्र मूषिककीटविषकल्पाविति । जेज्जटस्तु मूषिककल्पानन्तरं दुन्दुभिस्वनीयं कल्पं पठति ॥ ३२ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायां कल्पस्थाने षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ।

अथातो मूषिककल्पं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि ॥ १ ॥ २ ॥

पूर्वं शुक्रविषा उक्ता मूषिका ये समासतः ॥
नामलक्षणभैषज्यैरष्टादश निबोध मे[4] ॥ ३ ॥
लालनः पुत्रकः कृष्णो हंसिरश्चिकि(क्कि)रस्तथा ॥
छुच्छुन्दरोऽलसश्चैव कषायदशनोऽपि च ॥ ४ ॥
कुलिङ्गश्चाजितश्चैव चपलः कपिलस्तथा ॥
कोकिलोऽरुणसंज्ञश्च महाकृष्णस्तथोन्दुरः ॥ ५ ॥
श्वेतेन महता सार्धं कपिलेनाखुना तथा ॥
मूषिकश्च कपोताभस्तथैवाष्टादश स्मृताः ॥ ६ ॥

तानेवाष्टादशभेदान् निर्दिशन्नाह—लालन इत्यादि ॥३-६॥

शुक्रं पतति यत्रैषां शुक्रस्पृष्टैः[1] स्पृशन्ति वा ॥
नखदन्तादिभिस्तस्मिन् गात्रे रक्तं प्रदुष्यति ॥ ७ ॥

ननु 'दष्टरूपं समासोक्तं' इति वक्ष्यति तत्कथं शुक्रविषत्वमेवेत्याह—शुक्रमित्यादि । नखदन्तादिभिरित्यादिशब्दात् पुरीषमूत्राभ्यां च; तथा चालम्बायने,—"शुक्रेणाथ पुरीषेण मूत्रेणापि नखैस्तथा । दंष्ट्राभिर्वा क्षिपन्तीह मूषिकाः पञ्चधा विषम्"—इति । कस्मिंश्चित्तन्त्रान्तरे विशेषोऽस्ति; तथाच,—"गर्भिण्या मूषिकया दष्टे अम्लादिदोहदः, ऋतुमत्या दष्टे रक्तमेहनमाध्मानं रतिशीलता च-" इत्यादि ॥ ७ ॥

जायन्ते ग्रन्थयः शोफाः कर्णिका मण्डलानि च ॥
पीडकोपचयश्चोग्रो विसर्पाः किटिभानि च ॥ ८ ॥
पर्वभेदो रुजस्तीव्रा मूर्च्छा[3]ऽङ्गसदनं ज्वरः ॥
दौर्बल्यमरुचिः श्वासो वमथुर्लोमहर्षणम् ॥ ९ ॥
दष्टरूपं समासोक्तमेतद्व्यासमतः शृणु ॥

सामान्यं मूषिकदष्टलक्षणमभिधातुमाह—जायन्ते ग्रन्थय इत्यादि । कर्णिका कमलमध्यबीजकोशाकृतिः । पर्वभेदः सन्धेः स्फोटः । अङ्गसदनमङ्गग्लानिः ॥ ८ ॥ ९ ॥—

लालास्रावो लालनेन हिक्का छर्दिश्च जायते ॥ १० ॥
तण्डुलीयककल्कं तु लिह्यात्तत्र समाक्षिकम् ॥

तेषां विशिष्टं लक्षणं चिकित्सितं च निर्दिशन्नाह—लालास्राव इत्यादि । लालास्रावच्छर्दिहिक्का वातकोपजा भवन्ति । तण्डुलीयककल्कादिकं व्याधिप्रत्यनीकं चिकित्सितं, दोषप्रत्यनीकं तु सामान्यचिकित्सितोक्तं 'तप्तघृतेन दग्ध्वा विस्रावयेद्दंशं' इत्यादिकं; एवमन्यत्रापि व्याधिदोषप्रत्यनीकं चिकित्सितं स्वयमूहनीयं; प्रतिमूषिकोक्तं तु चिकित्सितं प्रायो व्याधिप्रत्यनीकमेव ॥ १० ॥—

पुत्रकेणाङ्गसादश्च पाण्डुवर्णश्च जायते ॥ ११ ॥
चीयते ग्रन्थिभिश्चाङ्गमाखुशावकसन्निभैः ॥
शिरीषेङ्गुदकल्कं तु लिह्यात्तत्र समाक्षिकम् ॥ १२ ॥

पुत्रकेणाङ्गेत्यादि । आखुशावकसन्निभैर्मूषिकपुत्रकतुल्यैर्ग्रन्थिभिरङ्गं चीयते व्याप्यत इत्यर्थः । आखुशावकनिभा ग्रन्थयः सर्वमूषिकदंशेषु जायन्ते विशेषेण पुत्रकदष्टे । नागार्जुनोऽत्राह,—"तेन दर्शयते दष्टो व्यक्तं मूषिकपुत्रकान् । एतत् पुत्रकदष्टस्य व्यक्तं भवति लक्षणम्"—इति । 'शिरीषेङ्गुदचूर्णं तु' इति पठित्वा गयदासः अनयोः पत्रचूर्णमिति व्याख्यानयति; जेज्जटाचार्यस्तु 'शिरीषफलकल्कं तु' इति पठति ॥ ११॥१२ ॥

कृ[6]ष्णेन दंशे शोफोऽसृक्छर्दिः प्रायश्च दुर्दिने ॥
शिरीषफलकुष्ठं तु पिबेत् किंशुकभस्मना ॥ १३ ॥

---

१ 'अन्नाभिकामं' इति पा० । २ 'प्रसन्नकायेन्द्रियवर्णचेष्टं वैद्यस्तु विद्यादविषं मनुष्यम्' इति पा० । ३ 'समस्तचेष्टायां' इति पा० । ४ 'तान्' इति पा० ।

१ 'शुक्रघृष्टैः' इति पा० । २ 'वपन्तीह' इति पा० । ३ 'ज्वरो-मूर्च्छा च दारुणा' इति पा० । ४ '०मेतच्च व्यासतः शृणु' इति पा० । ५ 'छर्दयते' इति पा० । ६ 'कृष्णेनासृक् छर्दयति दुर्दिनेषु विशेषतः' इति पा० ।

कृष्णेनेत्यादि । ग्रन्थ्यादीन्यत्रापि सामान्यमूषिकलक्षणानि विज्ञेयानि; एवं सर्वत्रोन्नेयम् । प्रायश्चेतिवचनादन्यत्राप्यसृक्च्छर्दिः । किंशुकभस्मना किंशुककुसुमभस्मोदकेनेत्यर्थः ॥१३॥

हंसिरेणान्नविद्वेषो जृम्भा रोम्णां च हर्षणम् ॥
पिबेदारग्वधादिं तु सुवान्तस्तत्र मानवः ॥ १४ ॥

हंसिरेणेत्यादि । सुवान्तः सुष्ठु वान्तः ॥ १४ ॥

चिक्कि(क्कि)रेण शिरोदुःखं शोफो हिक्का वमिस्तथा ॥
जालिनीमदनाङ्कोठकषायैर्वामयेत्तु तम् ॥ १५ ॥
यवनालर्षभीक्षारं बृहत्योश्चात्र दापयेत् ॥

चिक्किरेणेत्यादि । जालिनी कोशातकी, ऋषभी कपिकच्छुः, बृहत्योश्चेति चकारेण क्षारमित्यत्रापि संबन्धनीयम् । क्षारश्चात्र क्षारोदकम् । गयदासस्तु 'जालिनीमदनाङ्कोठ' इत्यादिस्थाने 'सुवान्तो जालिनीक्राथैः सारमङ्कोठजं पिबेत्' इति पठति न यवनालादि ॥ १५ ॥—

छुच्छुन्दरेण तृट् छर्दिर्ज्वरो दौर्बल्यमेव च ॥ १६ ॥
ग्रीवास्तम्भः पृष्ठशोफो गन्धाज्ञानं विसूचिका ॥
चव्यं हरीतकी शुण्ठी विडङ्गं पिप्पली मधु ॥ १७ ॥
अङ्कोठबीजं च तथा पिबेदत्र विषापहम् ॥

छुच्छुन्दरेणेत्यादि । छुच्छुन्दरदष्टलक्षणं तच्चिकित्सितं च गयदासोऽन्यथा पठति; यथा—"भ्रमश्छुच्छुन्दरेणोग्रो ग्रीवास्तम्भो विसूचिका । यवनालर्षभीक्षारं बृहत्योश्चात्र दापयेत्" इति ॥ १६ ॥ १७ ॥—

ग्रीवास्तम्भोऽलसेनोर्ध्ववायुर्दंशे रुजा ज्वरः ॥ १८ ॥
महागदं ससर्पिष्कं लिह्यात्तत्र समाक्षिकम् ॥
निद्रा कषायदन्तेन हृच्छोषः कार्श्यमेव च ॥ १९ ॥
क्षौद्रोपेताः शिरीषस्य लिह्यात् सारफलत्वचः ॥
कुलिङ्गेन रुजः शोफो राज्यश्च दंशमण्डले ॥ २० ॥
सहे ससिन्धुवारे च लिह्यात्तत्र समाक्षिके ॥

ग्रीवास्तम्भ इत्यादि । सहे मुद्गपर्णीमाषपर्ण्यौ ॥१८–२०॥—

अजितेनाङ्गकृष्णत्वं छर्दिर्मूर्च्छा च हृद्ग्रहः ॥ २१ ॥
स्नुक्क्षीरपिष्टां पालिन्दीं मञ्जिष्ठां मधुना लिहेत् ॥

अजितेनेत्यादि । पालिन्दी त्रिवृत् ॥ २१ ॥—

चपलेन भवेच्छर्दिर्मूर्च्छा च सह तृष्णया ॥ २२ ॥
क्षौद्रेण त्रिफलां लिह्याद्भद्रकाष्ठजटान्विताम् ॥

चपलेनेत्यादि । भद्रकाष्ठं देवदारु, जटा जटामांसी । 'जटान्वितां' इत्यत्र घनान्वितामिति केचित् ॥ २२ ॥—

कपिलेन व्रणे कोथो ज्वरो ग्रन्थ्युद्गमः सतृट् ॥२३॥
लिह्यान्मधुयुतां श्वेतां श्वेतां चापि पुनर्नवाम् ॥

१ 'छुच्छुन्दरेण विड्भङ्गो ग्रीवास्तम्भो विजृम्भणम् । यवनालर्षभक्षारं बृहत्योश्चात्र दापयेत्' इति पा० । २ 'रुजा स्रावो' इति पा० । ३ 'अजितेन वमिर्मूर्च्छा हृद्ग्रहः कृष्णनेत्रता' इति पा० । ४ 'क्षौद्रेण लिह्यात्रिफलां' इति पा० । ५ 'क्षौद्रेण लिह्यात्रिफलां' इति पा ।

ग्रन्थयः कोकिलेनोग्रा ज्वरो दाहश्च दारुणः ॥ २४ ॥
वर्षाभूनीलिनीक्राथकल्कसिद्धं घृतं पिबेत् ॥

कपिलेनेत्यादि । कोथः पूतिप्रादुर्भावः । श्वेतां श्वेतस्यन्दां, 'श्वेतां' इत्यत्र गयदासः 'श्रेष्ठां' इति पठति ॥ २३ ॥ २४ ॥—

अरुणेनानिलः क्रुद्धो वातजान् कुरुते गदान् ॥२५॥
महाकृष्णेन पित्तं च श्वेतेन कफ एव च ॥
महता कपिलेनासृक् कपोतेन चतुष्टयम् ॥ २६ ॥
भवन्ति चैषां दंशेषु ग्रन्थिमण्डलकर्णिकाः ॥
पिडकोपचयश्चोग्रः शोफश्च भृशदारुणः ॥ २७ ॥
दधिक्षीरघृतप्रस्थास्त्रयः प्रत्येकशो मताः ॥
करञ्जारग्वधव्योषबृहत्यंशुमतीस्थिराः ॥ २८ ॥
निष्क्वाथ्य चैषां क्वाथस्य चतुर्थोऽशः पुनर्भवेत् ॥
त्रिवृद्वोज्यमृतावक्रसर्पगन्धाः समृत्तिकाः ॥ २९ ॥
कपित्थदाडिमत्वक् च श्लक्ष्णपिष्टाः प्रदापयेत् ॥
तत् सर्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत् ॥ ३० ॥
पञ्चानामरुणादीनां विषमेतद्व्यपोहति ॥
काकादनीकाकमाच्योः स्वरसेष्वथवा कृतम् ॥३१॥
सिराश्च स्रावयेत् प्राप्ताः कुर्यात् संशोधनानि च ॥

दध्यादीनि प्रस्थमात्राणि, करञ्जादिद्रव्याणां द्विपलिकं भागं, सलिलाढकेन निष्क्वाथ्य, क्वथितं प्रस्थशेषं, तैस्त्रिभिः प्रस्थैः सह संयोज्य, त्रिवृन्मूलादिकल्कपादं च विपचेत्; पक्वं च घृतं विरेचनं भवति । अंशुमती शालपर्णी, गोजी गोजिह्वा, अमृता गुडूची, वक्रं तगरं, सर्पगन्धा सर्पच्छत्रिका । समृत्तिकाः सकृष्णमृत्तिकाः, 'अहिमृत्तिका' इति केचित् पठन्ति, अत्राहिमृत्तिका वल्मीकमृत्तिका; 'अगवृत्तिका' इति जेजटाचार्यः पठति, तत्रागवृत्तिका शल्लकी । द्वितीयं घृतमाह—काकादनीत्यादि । काकादनी कृष्णश्रीफलिका, कृतं संस्कृतं, घृतमिति शेषः । सिरा इत्यादि । प्राप्ता युक्ता मर्मानाश्रिताः । संशोधनानि वमनादीनि नस्यपर्यन्तानि, तान्यपि प्राप्तानि; तेनावम्याविरेच्ययोरवरोधः । अन्ये तु विषातुरा अवम्या अपि वम्या एव, 'एतेऽप्यजीर्णव्यथिता वाम्या ये च विषातुरा' इति ॥२५–३१॥—

सर्वेषां च विधिः कार्यो मूषिकाणां विषेष्वयम् ॥३२॥

अरुणाद्याश्रितं सिराव्यधादिकं सामान्यतः सर्वत्रातिदिशन्नाह—सर्वेषामित्यादि । अयं विधिः सिराव्यधादिकः कर्तव्य इत्यर्थः ॥ ३२ ॥

दग्ध्वा विस्रावयेद्दंशं प्रच्छितं च प्रलेपयेत् ॥
शिरीषरजनीकुष्ठकुङ्कुमैरमृतायुतैः ॥ ३३ ॥

दग्ध्वेत्यादि । दग्ध्वा 'घृतेनाग्नितप्तेन' इति शेषः । विस्रावयेत् प्रच्छन्नेन प्रच्छितं दंशम् । शिरीषादिभिः कल्कैरालेपयेत् ।

१ 'जायते' इति पा० । २ 'कपोतेनैव तु त्रयम्' इति पा० । ३ 'त्रिवृत्तिक्ताऽमृता' इति पा० । ४ 'सुपिष्टानि प्रयोजयेत्' इति पा० । ५ 'मोक्षयेत्' इति पा० ।

तथैव केचित् प्रच्छितं दंशं विस्रावयेच्छोणितं शिरीषादिकल्कैरालेपयेच्चेत्याहुः ॥ ३३ ॥

छर्दनं जालिनीकाथैः शुकाख्याङ्कोठयोरपि ॥

शोधनं सूत्रितं द्रव्यैर्विवृण्वन्नाह—छर्दनमित्यादि। शुकाख्यश्चर्मकारवटः ॥—

शुकाख्याकोषवत्योश्च मूलं मदन एव च ॥ ३४ ॥
देवदालीफलं चैव दध्ना पीत्वा विषं वमेत् ॥
सर्वमूषिकदष्टानामेष योगः सुखावहः ॥ ३५ ॥
फलं वचा देवदाली कुष्ठं गोमूत्रपेषितम् ॥
पूर्वकल्पेन योज्याः[1] स्युः सर्वोन्दुरुविषच्छिदः ॥ ३६ ॥

अपरावपि वमनयोगावाह—शुकाख्येत्यादि। कोषवती घोषकः। मूलमित्यत्र फलमित्यन्ये। फलमित्यादि। पूर्वकल्पेन दध्ना लेहमित्यर्थः ॥ ३४–३६ ॥

विरेचने त्रिवृद्दन्तीत्रिफलाकल्क इष्यते ॥

विरेचनमाह—विरेचने इत्यादि। दन्तीस्थाने केचिन्नीलीं पठन्ति।

शिरोविरेचने सारः शिरीषस्य फलानि च ॥ ३७ ॥
हितस्त्रिकटुकाढ्यश्च गोमयस्वरसोऽञ्जने ॥

शिरोविरेचने इत्यादि। सारः शिरीषस्य, गयदासस्तु शालतमालमधूकानामाह। फलानि चेति शिरीषस्येति संबन्धः। त्रिकटुकाढ्यस्त्रिकटुकोत्कट इत्यर्थः। एतच्च योगान्तरम् ॥ ३७ ॥—

कपित्थगोमयरसौ[2] लिह्यान्माक्षिकसंयुतौ ॥ ३८ ॥
रसाञ्जनहरिद्रेन्द्रयवकट्वीषु वा कृतम् ॥
प्रातः सातिविषं कल्कं लिह्यान्माक्षिकसंयुतम् ॥ ३९ ॥
तण्डुलीयकमूलेषु सर्पिः सिद्धं पिबेन्नरः ॥
आस्फोतमूलसिद्धं वा पञ्चकापित्थमेव वा ॥ ४० ॥

संशमनयोगानाह—कपित्थेत्यादि। प्रत्येकं कपित्थरसो गोमयरसश्च समधुर्लेहः। रसाञ्जनेत्यादि। कट्वी कटुरोहिणी। तण्डुलीयकेत्यादि। कपित्थफलमूलपुष्पत्वक्पत्रकल्ककषायसिद्धं पञ्चकापित्थं घृतं सर्वमूषिकविषहरम् ॥ ३८–४० ॥

मूषिकाणां विषं प्रायः कुप्यत्यभ्रेषु[3] निर्हृतम् ॥
तत्राप्येष विधिः कार्यो यश्च दूषीविषापहः ॥ ४१ ॥

प्रशान्तकोपस्याप्यवश्यं वमनादिशोधनं करणीयमिति दर्शयन्नाह—मूषिकाणामित्यादि। एष विधिः वमनविरेचनशिरोविरेचननयनाञ्जनादिः। यश्च दूषीविषापहो विधिः सोऽप्यत्र कार्यः; एतेन दूषीविषतुल्यता मूषिकविषस्योक्ता ॥ ४१ ॥

स्थिराणां रुजतां वाऽपि व्रणानां कर्णिकां भिषक् ॥
पाटयित्वा यथादोषं व्रणवच्चापि शोधयेत् ॥ ४२ ॥

इदानीमाखुविषव्रणे कर्णिका भवन्ति तथाऽन्यविषदुष्टव्रणेऽपि, तच्चिकित्सामुद्दिशन्नाह—स्थिराणामित्यादि। स्थैर्येण कफात्मकता, रुजतामित्यनेन वातात्मकता व्रणानामुक्ता। कर्णिकां मांसकर्णीम्। पाटयित्वा विदार्य, पाटयित्वेत्यत्र पाचयित्वेति केचित्, पातयित्वेत्यपरे। लालनपुत्रकादिमूषिकजातिविशेषज्ञानं नानादेशीयलोकेभ्योऽवगन्तव्यम् ॥ ४२ ॥

श्वशृगालतरक्ष्वृक्षव्याघ्रादीनां यदाऽनिलः ॥
श्लेष्मप्रदुष्टो मुष्णाति संज्ञां संज्ञावहाश्रितः ॥ ४३ ॥
तदा प्रस्रस्तलाङ्गूलहनुस्कन्धोऽतिलालवान् ॥
अत्यर्थं[1]बधिरोऽन्धश्च सोऽन्योन्यमभिधावति ॥ ४४ ॥
तेनोन्मत्तेन दष्टस्य दंष्ट्रिणा सविषेण तु ॥
सुप्तता जायते दंशे कृष्णं चातिस्रवत्यसृक् ॥ ४५ ॥
दिग्धविद्धस्य लिङ्गेन प्रायशश्चोपलक्षितः ॥

इदानीं मूषकस्य[2] चतुष्पदजरायुजहिंस्रत्वसामान्याच्छ्वादीनां विषं लक्षणचिकित्सितैरुद्दिशन्नाह—श्वशृगालतरक्ष्वृक्षेत्यादि। श्वा कुक्कुरः, शृगालः प्रसिद्धः, तरक्षुः मृगशत्रुर्व्याघ्रविशेषः 'जरख' इति लोके, ऋक्षो भल्लूकोऽतिलोमशः 'रीच्छ' इति प्रसिद्धः; आदिशब्दाद्वृकचित्रकादयो हिंस्राः पशवो ग्राह्याः। श्वादीनां यदाऽनिलो वायुः श्लेष्मप्रदुष्टः सन्, संज्ञावहाश्रितो संज्ञावहस्रोतोगतः, संज्ञां सम्यग्ज्ञानं, मुष्णाति हरति। सम्यग्ज्ञानहरणाच्च कीदृशो भवतीत्याह—तदेत्यादि। प्रस्रस्तं स्थानच्युतं लाङ्गूलं बालधिर्मेहनं वा हनुः स्कन्धश्च यस्य सः; प्रस्रस्तशब्दो लाङ्गूलादिभिः प्रत्येकं संबन्धनीयः। अतिलालवान् अतिशयेन लालास्रावयुक्तः। अत्यर्थं[3]बधिरोऽन्धश्च अतिशयेन बधिरोऽन्धो वेत्यर्थः। अन्योन्यमभिधावति परस्परं दष्टुमभिधावति। हनुस्कन्धस्थाने 'गर्लस्कन्ध'[4] इति केचित् पठन्ति। 'प्रमूढोऽन्यतमस्तेषां खादन् विपरिधावति' इति अत्र उत्तरार्धं केचित् पठन्ति। एषां मध्येऽन्यतम एकतमः प्रमूढः सन् खादन् विशेषेण परिधावति। तेनोन्मत्तेन दष्टस्येत्यादि। तेन दंष्ट्रिणा सविषेणोन्मत्तेन दष्टस्य पुरुषस्य दंशे सुप्तता बाधिर्यं जायते। उपलक्षितो युक्त इत्यर्थः ॥ ४३–४५ ॥—

येन चापि भवेद्दष्टस्तस्य चेष्टां रुतं नरः ॥ ४६ ॥
बहुशः प्रतिकुर्वाणः क्रियाहीनो विनश्यति ॥

अत्रैवारिष्टमुद्दिशन्नाह—येन चापि भवेदित्यादि। चेष्टा क्रिया, रुतं शब्दः, बहुशोऽनेकवारं, प्रतिकुर्वाणोऽनुकुर्वन्, क्रियाहीनः स्वकीयकायादिव्यापाररहितः ॥ ४६ ॥—

दंष्ट्रिणा येन दष्टश्च तद्रूपं यस्तु पश्यति ॥ ४७ ॥
अप्सु[5] वा यदि वाऽऽदर्शे रिष्टं तस्य विनिर्दिशेत् ॥

इदानीमपरमप्यरिष्टं निर्दिशन्नाह—दंष्ट्रिणा येनेत्यादि। तद्दंष्ट्रिरूपदर्शनमरिष्टं मरणलक्षणम् ॥ ४७ ॥—

१ 'योज्यं स्यात्सर्वोन्दुरविषच्छिदि' इति पा०। २ 'कपित्थगोमयरसः सक्षौद्रो लेह इष्यते' इति पा०। ३ 'अभ्रेषु निर्हतं' इति पा०।

१ 'अव्यक्तबधिरान्धश्च' इति पा०। २ 'मूषकतः' इति पा०। ३ 'अव्यक्तबधिरान्धश्च न व्यक्तो बधिरोऽन्धो वेत्यर्थः' इति पा०। ४ 'स्तनरकन्ध' इति पा०। ५ 'अप्सु वाऽऽदर्शबिम्बे वा तस्य तद्रिष्टमादिशेत्' इति पा०।

त्रस्यत्यकस्माद्योऽभीक्ष्णं दृष्ट्वा स्पृष्ट्वाऽपि वा जलम् ॥४८
जलत्रासं तु विद्यात्तं रिष्टं तदपि कीर्तितम् ॥

पुनरपरमप्यरिष्टं निर्दिशन्नाह—त्रस्यतीत्यादि । अकस्माज्जलत्रासहेतुं विना । अपिशब्दाच्छ्रुत्वाऽपि । जलत्रासं जलत्रासरोगं जानीयात्तस्येति संबन्धः । रिष्टमित्यादि । तदपि जलत्रसनमरिष्टं मरणलक्षणं कीर्तितं; एतच्चारिष्टं दष्टस्य, अदष्टे जलत्रसनारिष्टस्य वक्ष्यमाणत्वात् । अत्रार्थे तन्त्रान्तरम्,—"व्याधितेन श्वादिना दष्टस्य श्लेष्मा प्रकुपितश्चेतोवाहिनीर्धमनीरनुप्रविश्य संज्ञानाशमापादयति सद्यः कालान्तराद्वा"; अवभृते विशेषतः—"ततो नरः स्पृष्ट्वा दृष्ट्वा श्रुत्वा वा जलं त्रसति, तस्यापि तदरिष्टं जानीयात्" इति । गयदासस्तु 'यदि त्रस्यत्यदष्टोऽपि' इत्यादि पठति ॥ ४८ ॥—

अदष्टो वा जलत्रासी न कथञ्चन सिध्यति ॥ ४९ ॥
प्रसुप्तोऽथोत्थितो वाऽपि स्वस्थस्त्रस्तो न सिध्यति ॥

एवमदष्टस्यापि जलत्रासोऽरिष्टमेवेति दर्शयन्नाह—अदष्ट इत्यादि । अस्मिन्नर्थे तन्त्रान्तरम्,—"अदष्टस्यापि जन्तोर्हि जलत्रासो भवेद्यदि । तस्य रिष्टं हि भिषजो ब्रुवते विषचिन्तकाः" इति । जलं विनाऽपि जलत्रासो जायते श्लेष्मसंचयात् । तथा—चोक्तं,—"बुद्धिस्थानं यदा श्लेष्मा केवलं प्रतिपद्यते । तदा बुद्धौ निरुद्धायां श्लेष्मणाऽधिष्ठितो नरः ॥ जाग्रत् सुप्तोऽथवाऽऽत्मानं मज्जन्तमिव मन्यते । सलिले त्रस्यति तदा जलत्रासं तु तं विदुः ॥ श्लेष्मघ्नं तत्र कर्तव्यं शोधनं शमनानि च । आहारस्य विधानेन यावत् स प्रकृतिं व्रजेत्"—इति । अयं जलत्रासः कुपितकफस्य भवतीति रिष्टं न भवति, अत एवात्र चिकित्सोपदेशः, दष्टस्य तु रिष्टमेव । तथा स्वस्थस्य सुप्तस्य जाग्रतो वा जलमन्तरेण त्रासोऽरिष्टमेवेति दर्शयन्नाह—प्रसुप्तोऽथोत्थितो वाऽपीत्यादि ॥ ४९ ॥—

दंशं विस्राव्य तैर्दष्टे सर्पिषा परिदाहितम् ॥ ५० ॥
प्रदिह्यादगदैः, सर्पिः पुराणं पाययेत च ॥
अर्कक्षीरयुतं ह्यस्य दद्याच्चापि विशोधनम् ॥ ५१ ॥
श्वेतां पुनर्नवां चास्य दद्याद्धत्तूरकायुताम् ॥
पललं तिलतैलं च रूपिकायाः पयो गुडः ॥ ५२ ॥
निहन्ति विषमालर्कं मेघवृन्दमिवानिलः ॥

इदानीं चिकित्सावसरः—दंशं विस्राव्येत्यादि । विस्राव्य निष्पीडनेन स्रावयित्वा बीजभूतस्य विषस्य नाशनार्थं, सर्पिषा दाहस्तु तच्छेषनाशनार्थम् । अगदैः महागदादिभिः, प्रदिह्यात् लिम्पेत् । विस्रावितशोणितस्य वातशमनार्थं बाह्यमौषधमुद्दिश्याभ्यन्तरमुद्दिशन्नाह—सर्पिरित्यादि । विशोधनं विशोधनद्रव्यं, तत्र कफाधिक्ये वमनद्रव्ययुतं पित्ताधिक्ये विरेचनद्रव्ययुतमर्कक्षीरं दद्यात् । जेज्जटस्तु 'अर्कक्षीरं घृतं वाऽस्य' इति पठति । अन्ये 'दद्याच्छीर्षविरेचनं' इति पठन्ति । श्वेतामित्यादि ।—श्वेतामिति पुनर्नवाविशेषणम्; अन्ये श्वेतां कटभीमाहुः । धत्तूरकायुतां धत्तूरमूलान्विताम् । गयी तु 'धत्तूरार्धसमायुताम्' इति पठित्वा, धत्तूरमूलस्यार्धेन युतामिति व्याख्यानयति । अन्ये तु धत्तूरफलसंयुतामित्याहुः ॥ ५०—५२ ॥—

मूलस्य शरपुङ्खायाः कर्षं धत्तूरकार्धिकम् ॥ ५३ ॥
तण्डुलोदकमादाय पेषयेत्तण्डुलैः सह ॥
उन्मत्तकस्य पत्रैस्तु संवेष्ट्यापूपकं पचेत् ॥ ५४ ॥
खादेदौषधकाले तमलर्कविषदूषितः ॥
करोति श्वविकारांस्तु तस्मिञ्जीर्यति चौषधे ॥ ५५ ॥
विकाराः शिशिरे याप्या गृहे वारिविवर्जिते ॥
ततः शान्तविकारस्तु स्नात्वा चैवापरेऽहनि ॥ ५६ ॥
शालिषष्टिकयोर्भक्तं क्षीरेणोष्णेन भोजयेत् ॥
दिनत्रये पञ्चमे वा विधिरेषोऽर्धमात्रया ॥ ५७ ॥
कर्तव्यो भिषजाऽवश्यमलर्कविषनाशनः ॥
कुप्येत् स्वयं विषं यस्य न स जीवति मानवः ॥५८॥
तस्मात् प्रकोपयेदाशु स्वयं यावत् प्रकुप्यति ॥

मूलमित्यादि । धत्तूरकार्धिकमिति धत्तूरकजटायाः कर्षार्धं देयम् । उन्मत्तकस्य पत्रैस्त्वित्यादि । धत्तूरकस्य सप्त पर्णानि ग्राह्याणि, तन्त्रान्तरदर्शनात् । तस्य भक्षितस्य जरणकाले योगप्रभवादातुरः कुकुरचेष्टा एव करोति । औषधपरिणतिकाले यांश्च विकारानातुरः करोति तेषु प्रतीकारमाह—विकारा इत्यादि । विकारा उन्मत्तश्वादिदष्टोत्पन्नाः । शिशिरे शीतले वारिविवर्जिते गृहे याप्याः शमनीयाः । तत इत्यादि । क्षीरेणोष्णेन भोजयेदिति अन्नं गव्येनाज्ये(जे)न वा भोजयेदिति गयदासाचार्यः । एष विधिः श्वेतां पुनर्नवामित्यादिकः । अर्धमात्रया प्रागुक्तमात्रातः । कस्मादेष विधिः कार्यो दिनत्रये पञ्चमे वेत्याह —कुप्येदित्यादि ॥ ५३—५८ ॥—

बीजैरत्नौषधीगर्भैः कुम्भैः शीताम्बुपूरितैः ॥ ५९ ॥
स्नापयेत्तं नदीतीरे समन्त्रैर्वा चतुष्पथे ॥
बलिं निवेद्य तत्रापि पिण्याकं पललं दधि ॥ ६० ॥
माल्यानि च विचित्राणि मांसं पक्वामकं तथा ॥
अलकाधिपते यक्ष सारमेयगणाधिप! ॥ ६१ ॥
अलर्कजुष्टमेतन्मे निर्विषं कुरु माचिरात् ॥

इदानीमलर्कविषे भूतानुबन्धो भवतीति तच्चिकित्सार्थं सविधिवैदिकं मन्त्रमुद्दिशन्नाह—बीजरत्नौषधीत्यादि । तमलर्कजुष्टमलर्कविषजुष्टम् । पिण्याकस्तिलखली, पललः सस्नेहस्तिलकल्कः । अलकाया नगर्या अधिपतिर्धनदः, यक्षो देवयोनिः, सारमेयगणाधिपः कुकुरसमूहपतिः, तस्य संबोधने । अलकाधिपतिर्यक्ष एव सारमेयगणाधिपतिः । अलर्क उन्मत्तकुक्कुरः ॥ ५९—६१ ॥—

१ 'श्रुत्वा दृष्ट्वाऽपि' इति पा० । २ 'तमपि कीर्तयेत्' इति पा० । ३ 'केवलः' इति पा० । ४ 'वाऽपि दद्यादाशु' इति पा० ।

१ 'करोत्यन्यान् विकारांस्तु' इति पा० । २ 'यावन्न कुप्यति' इति पा० । ३ 'गमनीयाः' इति पा० । ४ 'क्षिप्रत्नौषधिबीजैः' इति पा० ।

दद्यात् संशोधनं तीक्ष्णमेवं स्नातस्य देहिनः ॥ ६२॥
अशुद्धस्य सुरूढेऽपि व्रणे कुप्यति तद्विषम् ॥

दद्यादित्यादि ॥ ६२ ॥—

श्वादयोऽभिहिता व्याला येऽत्र दंष्ट्राविषा मया ६३
अतः करोति दष्टस्तु तेषां चेष्टां रुतं नरः ॥
बहुशः प्रतिकुर्वाणो न चिरान्म्रियते च सः ॥ ६४ ॥

इदानीमुन्मत्तश्वादिविषं प्रतिपादयितुमुन्मत्तव्यालानामुन्मत्ततासूचकश्वप्रकारेणाभिहितत्वमाह—श्वादयोऽभिहिता व्याला इत्यादि । येऽत्र दंष्ट्राविषा व्यालाः ते श्वादयः श्वप्रकारा उन्मत्तश्वसदृशा मया प्रतिपादिताः, ते तु वातपित्तप्रकोपणदंशांसरूक्ष्णत्वेन पुराणसर्पिःपानेन चानुमिताः ॥ ६३ ॥ ६४ ॥

नखदन्तक्षतं व्यालैर्यत्कृतं तद्विमर्दयेत् ॥
सिञ्चेत्तैलेन कोष्णेन ते हि वातप्रकोपकाः ॥ ६५ ॥

इति सुश्रुतसंहितायां कल्पस्थाने मूषिककल्पोनाम सप्तमोऽध्यायः ॥ ७ ॥

उन्मत्तश्वादिचिकित्सितं सहेतुकं दर्शयन्नाह—नखदन्तक्षतमित्यादि ॥ ६५ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतटीकायां कल्पस्थाने सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

अथातः कीटकल्पं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसंभवाः ॥
वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः ॥३॥
सर्वदोषप्रकृतिभिर्युक्तास्ते परिणामतः ॥
कीटत्वेऽपि सुघोराः स्युः, सर्वे एव चतुर्विधाः ॥४॥

तत्र कीटान् हेतुलक्षणसंख्याकर्मचिकित्सितैर्निर्दिशन्नाह—सर्पाणामित्यादि । सर्पाणां दर्वीकरमण्डलिराजिमतां शुक्रादिपञ्चसंभवा यथासंख्यं वाय्वग्न्यम्बुप्रकृतयः कीटाः । शवो मृतसर्पशरीरं, तस्य पूतिः शटनम् । त्रीन् कीटान् दर्वीकरमण्डलिराजिलसंबन्धेन वाय्वादिप्रकृतिकमान्निर्दिश्य चतुर्थं स्वभावेन कर्मणा च निर्दिशन्नाह—सर्वदोषेत्यादि । सर्वदोषस्वभावैर्युक्ताः; परिणामतः परिणामो नाम भिन्नजातीयैरनेकैरेकीभावेन कार्यस्यारम्भः, स चात्र दर्वीकरादिभिन्नजातीयैर्वैकरञ्जाख्यापत्योत्पादनलक्षणः, तस्मात् । सुघोराः त्रिदोषकोपनाः, वैकरञ्जसर्पजातिशुक्रादिसंभवत्वेन । एकीकृत्य संख्यामाह—सर्वे एवेत्यादि ॥१-४॥

कुम्भीनसस्तुण्डिकेरी शृङ्गी शतकुलीरकः ॥
उच्चिटिङ्गोऽग्निनामा च चिच्चिटिङ्गो मयूरिका ॥ ५ ॥
आवर्तकस्तथोरभ्रः सारिकामुखवैदलौ ॥
शरावकुर्दोऽभीराजिः परुषश्चित्रशीर्षकः ॥ ६ ॥
शतबाहुश्च यश्चापि रक्तराजिश्च कीर्तितः ॥
अष्टादशेति वायव्याः कीटाः पवनकोपनाः ॥ ७ ॥
तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः ॥

तानेव चतुःप्रकारान् वातादिस्वभावैर्निर्दिशन्नाह—कुम्भीनस इत्यादि । एते कीटकभेदा नानादेशीयलोकादवगन्तव्याः, यतः सुवीरनन्दिवराहजेज्जटगयदासादिभिष्टीकाकारैर्न व्याख्याताः । वातनिमित्तजा रोगास्तोदादयो ज्वरादयश्च । वातप्रकोपणानां कुम्भीनसादीनां मध्ये शृङ्गयुच्चिटिङ्गशरावकुर्दचित्रशीर्षकान् वर्जयित्वा शेषाश्चतुर्दश मुखसन्दंशविषाः ॥५-७॥—

कौण्डिन्यकः कणभको वरटी पत्रवृश्चिकः ॥ ८ ॥
विनासिका ब्राह्मणिका बिन्दुलो भ्रमरस्तथा ॥
बाह्यकी पिच्चिटः कुम्भी वर्चःकीटोऽरिमेदकः ॥९॥
पद्मकीटो दुन्दुभिको मकरः शतपादकः ॥
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्दभी ॥१०॥
क्लीतः कृमिसरारी च यश्चाप्युत्क्लेशकस्तथा ॥
एते ह्यग्निप्रकृतयश्चतुर्विंशतिरेव च ॥ ११ ॥
तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः ॥

कौण्डिन्यक इत्यादि । बिन्दुलस्थाने 'विलुट' इति केचित् । पित्तनिमित्तजा दाहादयो ज्वरादयश्च । पित्तप्रकोपणानां मध्ये कौण्डिन्यकवरटीभ्रमरपिच्चिटवर्चःकीटमकरशतपदपञ्चालकपाकमत्स्यकृष्णतुण्डान् विहाय शेषाश्चतुर्दश मुखसन्दंशविषाः ॥ ८-११ ॥—

विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः ॥१२॥
सैरेयकः प्रचलको वलभः किटिभस्तथा ॥
सूचीमुखः कृष्णगोधा यश्च काषायवासिकः ॥ १३ ॥
कीटो गर्दभकश्चैव तथा त्रोटक एव च ॥
त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः १४
तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः ॥

विश्वम्भर इत्यादि । श्लेष्मनिमित्तजा रोगाः कण्ड्वादयो ज्वरादयश्च । श्लेष्मप्रकोपिणां मध्ये विश्वम्भरप्रचलाककृष्णगोधाकाषायवासिकांश्चतुरो वर्जयित्वा नवान्ये मुखसन्दंशविषाः ॥ १२-१४ ॥—

तुङ्गीनासो विचिलकस्तालको वाहकस्तथा ॥ १५ ॥

---

१ 'तीक्ष्णमजस्रं तस्य' इति पा० । २ 'वातपित्तप्रकोपणाः' इति पा० । ३ 'दंशदेशकृष्णत्वेन' इति पा० । ४ 'त्रिविधाः' इति पा० । ५ 'सुघोरास्ते' इति पा० । ६ 'विण्मूत्रादिक्रमान्निर्दिशन्नाह' इति पा० । ७ 'भिन्नजातैः' इति पा० ।

१ 'चित्रमूर्धकः' इति पा० । २ 'अष्टादशैव ज्ञातव्याः' इति पा० । ३ 'वातादिस्वभावान्' इति पा० । ४ 'सूक्ष्मतुण्डोऽथ' इति पा० । ५ 'सूक्ष्मतुण्डान्' इति पा० । ६ 'वलभी कपिलस्तथा । सैरीयकः पञ्चकृष्णः प्रचलाकोऽथ कोटिकः' इति पा० । ७ 'कोटीगर्दभकश्चैव' इति पा० ।

कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः ॥
तुण्ड(ङ्ग)नाभः सर्षपिको वल्गुलिः शम्बुकस्तथा १६
अग्निकीटश्च विज्ञेया द्वादश प्राणनाशनाः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ॥ १७ ॥
तास्ताश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः ॥
क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः ॥ १८ ॥

सर्वदोषप्रकृतिकानाह—तुङ्गीनास इत्यादि । तैः सर्वदोषप्रकृतिकैः प्राणनाशनैः कीटैः । तास्तास्तोददाहकण्ड्वादिका वेदनाः, रोगा ज्वरादयः । दंश इत्यादि । रक्तपीतः पित्तेन, सितः कफेन, अरुणो वातेन । सर्वदोषप्रकृतिकानां मध्ये वाहकसर्षपशम्बूकान् वर्जयित्वा नव मुखसन्दंशविषाः ॥ १५–१८ ॥

ज्वराङ्गमर्दरोमाञ्चवेदनाभिः समन्वितः ॥
छर्द्यतीसारतृष्णाश्च दाहो मूर्च्छा विजृम्भिका ॥१९॥
वेपथुश्वासहिक्काश्च दाहः शीतं च दारुणम् ॥
पिडकोपचयः शोफो ग्रन्थयो मण्डलानि च ॥
दद्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च ॥
तैर्भवन्तीह दष्टानां यथास्वं चाप्युपद्रवाः ॥ २१ ॥
येऽन्ये तेषां विशेषास्तु तूर्णं तेषां समादिशेत् ॥
दूषीविषप्रकोपाच्च तथैव विषलेपनात् ॥ २२ ॥
लिङ्गं तीक्ष्णविषेष्वेत-

इदानीं चतुर्विधानपि तांस्तीक्ष्णमन्दविषभेदेन निर्दिशन्नाह—ज्वराङ्गेत्यादि । शीतं च दारुणमित्यत्र चकाराद्दाहोऽपि दारुण एव । यथास्वं यथाकीटदोषमित्यर्थः । येऽन्ये इत्यादि । तेषां तीक्ष्णविषाणां कीटानामत्रोक्तेभ्यो येऽन्ये विशेषा उपद्रवास्तेषां भेदांस्तूर्णं समादिशेदिति । तेषामिति कर्मणि षष्ठी, तेन तान् क्षिप्रं कथयेत्, कथं ? दूषीविषप्रकोपात् दूषीविषप्रकोपं वीक्ष्य । यपि लुप्ते पञ्चमीयम् । तथैव विषलेपनादिति लेपनमत्राहारस्तेन विषालेपनं विषाहारं वीक्ष्येत्यर्थः ॥१९–२२॥

च्छृणु मन्दविषेष्वतः ॥
प्रसेकारोचकच्छर्दिशिरोगौरवशीतकाः ॥ २३ ॥
पिडकाकोठकण्डूनां जन्म दोषविभागतः ॥

शृणु मन्दविषेष्वित्यादि । शीतको अल्पं शीतं, कोठादीनां जन्म यथा कीटदोषविभागेन ॥ २३ ॥—

योगैर्नानाविधैरेषां चूर्णानि गरमादिशेत् ॥ २४ ॥
दूषीविषप्रकाराणां तथा चाप्यनुलेपनात् ॥

इदानीं कीटदेहचूर्णानां नानौषधयोगात्तथाऽनुलेपनतोऽपि गरत्वमाह—योगैरित्यादि । अथालम्बायनोक्तः कीटानां सामान्यज्ञानोपायो लिख्यते,—"कृष्णाभिर्बिन्दुलेखाभिः पक्षैः पादैर्मुखैर्नखैः । शूकैः कण्टकलाङ्गूलैः संश्लिष्टैः पक्षरोमभिः । स्वनैः प्रमाणैः संस्थानैर्लिङ्गैश्चापि शरीरगैः । विषवीर्यैश्च कीटानां रूपज्ञानं विभाव्यते"—इति । तथा कतिचित् कीटा विशिष्टाकृतिवर्णादिभिस्तदुक्ता एव लिख्यन्ते,—"अजाप्रतिमरूपो यः शूकहीनस्त्वरोमशः । सितः शरकुलीरस्तु क्ष्वेडचूर्णविषः स्मृतः ॥ गैरिकाभो महाकीटः सपक्षो मार्जितोदरः । खेचरो गुदशूकश्च कौण्डिन्य इति स स्मृतः ॥ कुरण्टपुष्पवर्णाभः सपक्षो मार्जितोदरः । तुण्डशूकविषः कीटः कोष्ठागारीति संज्ञितः ॥ लाक्षारुधिरवर्णाभः श्वेतबिन्दुविचित्रितः । क्षुद्रको ह्यग्निसंकाशो भ्राजते निशि चाग्निवत् ॥ कीटः खद्योत इत्युक्तो दष्टस्तेनापि दह्यते । दंष्ट्राविषः श्वेतबिन्दुः सपक्षः षट्पदः खगः ॥ स तु वै शम्बूको नाम कालकः सप्तमण्डलः । चतुष्पादो दीर्घपत्र उल्लाटो बहुप्रजः ॥ वृक्षालयो दन्तविषः कृकलास इति स्मृतः । चन्द्राभः कृकलासोऽन्यस्तद्भेदस्तु त्रिकण्टकः"—इति । तेषां न केवलं नियमेन शूकादिदंशेन विषप्रादुर्भावः, किन्तर्हि अभ्यवहारचूर्णानुलेपनैश्च दूषीविषलिङ्गप्रादुर्भाव इत्याह,—"यश्चैतानत्ति चूर्णैर्वा चूर्ण्यते लिप्यतेऽथवा । मूत्रादिभिस्तस्य दूषीविषलिङ्गं समादिशेत्"—इति । जेज्जटगयदासावत्र आपातनिकापूर्वकं पाठं पठतः, स च वर्तमानपुस्तकेषु न दृश्यते ॥ २४ ॥—

एकजातीनतस्तूर्ध्वं कीटान् वक्ष्यामि भेदतः ॥२५॥
सामान्यतो दष्टलिङ्गैः साध्यासाध्यक्रमेण च ॥
त्रिकण्टः करिणी चापि हस्तिकक्षोऽपराजितः ॥
चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः ॥ २६ ॥

तैर्दष्टस्य श्वयथुरङ्गमर्दो गुरुता गात्राणां दंशः कृष्णश्च भवति ॥ २७ ॥

इदानीं वातपित्तकफसन्निपातप्रकृतीन् कीटान् निर्दिश्य, एकजातीयानप्येकलक्षणचिकित्सार्थं निर्दिशन्नाह—एकजातीनतस्तूर्ध्वमित्यादि । भेदत इति भेदं वीक्ष्य । त्रिकण्टकादयश्चत्वारः कणभाः; कणभत्वमेकजातित्वं, त्रिकण्टकादिस्तु भेदः, कृकण्टक इति केचित् । सर्वे एव कणभाश्चतुष्पदाः कीटाः साध्याश्च ॥ २५–२७ ॥

प्रतिसूर्यकः, पिङ्गाभासो, बहुवर्णो, निरूपमो गोधेरक इति पञ्च गोधेरकाः; तैर्दष्टस्य शोफो दाहरुजौ च भवतः, गोधेरकेणैतदेव ग्रन्थिप्रादुर्भावो ज्वरश्च ॥ २८ ॥

प्रतिसूर्यक इत्यादि । केचित्तु प्रतिसूर्यक इत्यादिस्थाने एवं पठन्ति,—"प्रतिसूर्यः पिङ्गनासो बहुलोमा महाशिराः । तथा निरूपमश्चेति पञ्च गौधेरकाः स्मृताः ॥ तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् । रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः" इति । गौधेरकलक्षणं तन्त्रान्तरे,—"कृष्णसर्पेण

---

१ 'कोठारुपिडकाकण्डूजन्म' इति पा० । २ 'दूषीविषप्रकोपाच्च' इति, 'दूषिविषप्रकाराणां तथैवाप्यनुलेपनात्' इति च पा० । अस्याग्रे हाराणचन्द्रस्तु 'तेन पाण्डुः कृशोऽल्पाग्निः कासश्वासज्वरार्दितः । जठरग्रहणीगरोयक्ष्मगुल्मक्षयैश्च सः । निपीडितो मर्मसु च शूनपादकरोऽलसः । स्वप्ने मार्जरगोमायुव्यालान् स नकुलान् कपीन् ॥ प्रायः पश्यति नद्यादीन् शुष्कांश्च स वनस्पतीन् ।' इत्यधिकं पाठं पठति ।

१ 'संनिभैः' इति पा० । २ 'त्रिकण्टकः कुणी चापि' इति पा० । ३ 'चतुष्पदाः कीटाः प्रतिसूर्यकः' इति पा० । ४ 'विरूपकः' इति पा० । ५ 'इति पञ्च' इति पा० । ६ 'चतुष्पदाः' इति पा० ।

गोधायां भवेद्यस्तु चतुष्पदः। सर्पो गौधेरको नाम तेन दष्टो न जीवति"—इति ॥ २८ ॥

गलगोलिका-श्वेता, कृष्णा, रक्तराजी, रक्तमण्डला, सर्वश्वेता, सर्षपिकेत्येवं षट्; ताभिर्दष्टे सर्षपिकावर्जं दाहशोफक्लेदा भवन्ति, सर्षपिकया हृदयपिडाऽतिसारश्च, तासु मध्ये सर्षपिका प्राणहरी ॥ २९ ॥

शतपद्यस्तु-परुषा, कृष्णा, चित्रा, कपिला, पीतिका, रक्ता, श्वेता, अग्निप्रभा, इत्यष्टौ; ताभिर्दष्टे शोफो वेदना दाहश्च हृदये, श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिडकोत्पत्तिश्च ॥ ३० ॥

मण्डूकाः—कृष्णः, सारः, कुहको, हरितो, रक्तो, यववर्णाभो, भृकुटी, कोटिकश्चेत्यष्टौ; तैर्दष्टस्य दंशे कण्डूर्भवति पीतफेनागमश्च वक्रात्, भृकुटीकोटिकाभ्यामेतदेव दाहश्छर्दिर्मूर्च्छा चातिमात्रम् ॥३१॥

मण्डूका इत्यादि। अत्र भृकुटीकोटिकावसाध्यौ। अथ मण्डूकोत्पत्तिः भृकुटीलक्षणं च तन्त्रान्तरोक्तं पठ्यते,—"वर्षमाणे सृजेच्छुक्रं प्रावृट्काले महोरगः। ततः शरत्प्रतप्तायां भूमौ मण्डो जलस्य हि। तस्मिन् मण्डोदके जाता मण्डूकास्तेन संज्ञिताः॥ मण्डूको गोगतिस्तज्ज्ञैः कोटिकः परिकीर्तितः। तेन दष्टस्य मरणं, नास्ति तस्य प्रतिक्रिया"—इति ॥ २९ ॥ ३१ ॥

विश्वम्भराभिर्दष्टे दंशः सर्षपाकाराभिः पिडकाभिः सरुजाभिश्चीयते, शीतज्वरार्तश्च पुरुषो भवति ॥ ३२ ॥

विश्वम्भराभिर्दष्ट इत्यादि। विश्वम्भराश्च त्रयः ॥ ३२ ॥

अहिण्डुकाभिर्दष्टे तोददाहकण्डुश्वयथवो भवन्ति मोहश्च; कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसारज्वरादिभिरभिहन्यते; शूकवृन्ताभिर्दष्टे कण्डूकोठाः प्रवर्धन्ते शूकं चात्र लक्ष्यते ॥ ३३ ॥

अहिण्डुकाभिर्दष्ट इत्यादि। अहिण्डुकाकण्डूमकशूकवृन्तानां दष्टलक्षणं केचिन्न पठन्ति, विश्वम्भरामेदत्वेन विश्वम्भराग्रहेण ग्रहणात्; अन्ये तु अहिण्डुकादीनां पृथग्दष्टलक्षणं पठन्ति, पृथक्चिकित्सितोपादानात् ॥ ३३ ॥

पिपीलिकाः—स्थूलशीर्षा, संवाहिका, ब्राह्मणिका, अङ्गुलिका, कपिलिका, चित्रवर्णेति षट्; ताभिर्दष्टे[२] दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः ॥३४॥

मक्षिकाः—कान्तारिका, कृष्णा, पिङ्गला, मधूलिका, काषायी, स्थालिकेत्येवं षट्; ताभिर्दष्टस्य कण्डुशोफदाहरुजो भवन्ति, स्थालिकाकाषायीभ्यामेतदेव श्यावपिडकोत्पत्तिरुपद्रवाश्च ज्वरादयो भवन्ति, काषायी स्थालिका च प्राणहरे ॥ ३५ ॥

मशकाः—सामुद्रः, परिमण्डलो, हस्तिमशकः, कृष्णः, पार्वतीय इति पञ्च; तैर्दष्टस्य तीव्रा कण्डूर्दंशशोफश्च, पार्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः ॥ ३६ ॥

नखावकृष्टेऽत्यर्थं पिडकादाहपाका भवन्ति ॥
जलौकसां दष्टलक्षणमुक्तं चिकित्सितं च ॥ ३७ ॥

भवन्ति चात्र।

गोधेरकः स्थालिका च ये च श्वेताग्निसप्रभे ॥
भृकुटी कोटिकश्चैव न सिध्यन्त्येकजातिषु ॥ ३८ ॥

इदानीमिहैकजात्येषु पञ्चस्वसाध्यान् निर्दिशन्नाह—गोधेरक इत्यादि। स्थालिका चेति चकारेण काषायी समुच्चीयते। ये चेति चकारेण गलगोलिकेषु सर्षपिकाऽप्यनुक्ता समुच्चीयते। भृकुटी कोटिकश्चैवेति चकारेणानुक्ता जलौकःखिन्द्रायुधा समुच्चीयते ॥ ३४-३८ ॥

शवमूत्रपुरीषैस्तु सविषैरवमर्शनात् ॥
स्युः कण्डूदाहकोठारुःपिडकातोदवेदनाः ॥ ३९ ॥
प्रक्लेदवांस्तथा स्रावो भृशं संपाचयेत्त्वचम् ॥
दिग्धविद्धक्रियास्तत्र यथावदवचारयेत् ॥ ४० ॥

एषां बहिश्चूर्णावचूर्णनादौ लिङ्गमुद्दिश्य चिकित्सामुद्दिशन्नाह—शवमूत्रपुरीषैरित्यादि। प्रक्लेदवानिति सविषचूर्णावमृष्टप्रदेशे इत्यर्थः ॥ ३९ ॥ ४० ॥

नावसन्नं न चोत्सन्नमतिसंरम्भवेदनम् ॥
दंशादौ विपरीतार्ति कीटदष्टं सुबाधकम् ॥ ४१ ॥

इदानीं कीटदष्टस्य दंशलक्षणेन कृच्छ्रतामुद्दिशन्नाह—नावसन्नमित्यादि। नावसन्नं नातिभिन्नं, नचोत्सन्नं नात्युन्नतम्, इत्थंभूतमपि यदतिसंरम्भवेदनमतिशयव्यर्थं, दंशादौ विपरीतार्ति अनुग्रविषदष्टे तीव्रार्तिर्भवति, उग्रविषदष्टे तु मन्दार्तिरिति विपरीतार्तिः। सुबाधकं कृच्छ्रसाध्यम् ॥ ४१ ॥

दष्टानुग्रविषैः कीटैः सर्पवत् समुपाचरेत् ॥
त्रिविधानां तु पूर्वेषां त्रैविध्येन क्रिया हिताः ॥४२॥

इदानीमुग्रविषकीटानां चिकित्सामुद्दिशन्नाह—कीटैर्दष्टानुग्रेत्यादि। उग्रविषैः प्राणहरैस्त्रिदोषप्रकृतिभिः। सर्पवत् सर्पदष्टानिव, सर्पदष्टस्य सर्पवेगोक्ताभिः क्रियाभिरित्यर्थः। त्रिविधानामिति दर्वीकरमण्डलिराजिलशुक्रादियोनिभेदात्त्रिप्रकाराणाम्। पूर्वेषामाद्युक्तानाम्। त्रैविध्येनेति वातादिभेदेनेत्यर्थः ॥ ४२ ॥

स्वेदमालेपनं सेकं चोष्णमत्रावचारयेत् ॥

१ 'गोगतिः' इति, गलगोली, श्वेतकृष्णा इति च पा०। २ 'दष्टस्य कोठः स्पर्शोऽग्निदग्धवच्च; सर्वा एव साध्याः' इति पा०।

१ 'ताभिर्दष्टस्य दाहशोफौ भवतः, स्थालिकाकाषायीभ्यामेतदेव पिडकाश्च सोपद्रवा भवन्ति' इति हाराणचन्द्रसंमतः पाठः। २ 'सर्पाणां' इति पा०।

अन्यत्र मूर्च्छितादंशात् पाककोथप्रपीडितात् ॥४३॥
विषघ्नं च विधिं सर्वं वंहुशः शोधनानि च ॥

इदानीं सामान्यं चिकित्सितमाह—स्वेदमालेपनमित्यादि । अन्यत्र मूर्च्छितादिति मूर्च्छितं वर्जयित्वा, मूर्च्छिते न कुर्यादित्यर्थः । विषघ्नं च विधिं सर्वमित्यादि । संशमनविधिं पाननस्याभ्यञ्जालेपनपरिषेकाञ्जनादिकं वातादिविषहरद्रव्यकल्पितम् । संशोधनानि चेति वमनविरेकास्थापनानि, 'यथादोषम्' इत्यध्याहारः ॥ ४३ ॥—

शिरीषकटुकाकुष्ठवंचारजनिसैन्धवैः ॥ ४४ ॥
क्षीरमज्जवसासर्पिःशुण्ठीपिप्पलिदारुषु ॥
उत्कारिका स्थिरादौ वा सुकृता स्वेदने हिता ॥४५॥

इदानीं वातादिदोषविषहरस्वेदद्रव्यसूत्रमुद्दिशन्नाह—शिरीष इत्यादि । उत्कारिका लप्सिका । स्थिरादौ शालपर्ण्यादौ । सुकृता शोभना कृता । एतेन क्षीरादिद्रवैः शिरीषादिद्रव्याणां श्लक्ष्णपेषितानां मात्राक्रमेण नातिद्रवो नाल्पद्रवः पाक इति सर्वं बोध्यते ॥ ४४ ॥ ४५ ॥

न स्वेदयेत चादंशं धूमं वक्ष्यामि वृश्चिके ॥

मुक्त्वा कीटविषमित्यनेन हेतुना सर्वेष्वेव कीटेषु स्वेदं प्रसक्तं क्वचिन्निरस्यन्नाह—न स्वेदयेदित्यादि । वृश्चिकविषे दंशं न स्वेदयेत्, आङो व्यवहितस्यापि क्रियापदेन संबन्धात् । तत्रापि किंचिदुष्मस्वेदमाह—धूममित्यादि । धूमश्च शिखिकुक्कुटवर्हाणीत्यादिनाऽग्रे वक्तव्यः । न स्वेदयेत चादंशमित्यत्र चकारो भिन्नक्रमे धूमं चेत्यत्र द्रष्टव्यः; तेन मन्दविषवृश्चिकदष्टस्योत्कारिकास्वेद उक्तो न विरुध्यते ॥—

अगदानेकजातीषु प्रवक्ष्यामि पृथक् पृथक् ॥ ४६ ॥
कुष्ठं वक्रं वचा पाठा विल्वमूलं सुवर्चिका ॥
ग्रहधूमं हरिद्रे द्वे त्रिकण्टकविषे हिताः ॥ ४७ ॥

इदानीं वातादिभेदेन चतुर्विधप्रकृतीनां सप्तषष्टिसंख्योपेतानां चिकित्सितमभिधाय वृश्चिकलूतावर्जं चतुःपञ्चाशतामेकजातीनां चिकित्सितं निर्दिशन्नाह—अगदानेकजातीष्वित्यादि । वक्रं तगरं, सुवर्चिका स्वर्जिकाक्षारः । त्रिकण्टकग्रहणमपरसजातीयानां कणभप्रभृतीनां प्राधान्यादुपलक्षणम् । हित इति अगद इति शेषः ॥ ४६ ॥ ४७ ॥

रजन्यागारधूमश्च वक्रं कुष्ठं पलाशजम् ॥
गलगोलिकदष्टानामगदो विषनाशनः ॥ ४८ ॥

प्रतिसूर्यकादिचिकित्साया वक्ष्यमाणत्वाद्गलगोलिकोपक्रममाह—रजनीत्यादि । पलाशजं 'बीजम्' इत्यध्याहार्यम् ॥४८॥

कुङ्कुमं तगरं शिग्रु पद्मकं रजनीद्वयम् ॥
अगदो जलपिष्टोऽयं शतपद्विषनाशनः ॥ ४९ ॥
मेषशृङ्गी वचा पाठा निचुलो रोहिणी जलम् ॥
सर्वमण्डूकदष्टानामगदोऽयं विषापहः ॥ ५० ॥

निचुलो वेतसः, जलं वालकम् ॥ ४९ ॥ ५० ॥

धवाश्वगन्धातिबलाबलासातिगुहागुहाः ॥
विश्वम्भराभिदष्टानामगदोऽयं विषापहः ॥ ५१ ॥

धवाश्वेत्यादि । विश्वम्भराभिस्तिस्रभिः । अतिबला कङ्कतिका, अतिगुहा शालिपर्णी, गुहा पृश्निपर्णी ॥ ५१ ॥

शिरीषं तगरं कुष्ठं शालिपर्णी सहा निशे ॥
अहिण्डुकाभिर्दष्टानामगदो विषनाशनः ॥ ५२ ॥

शिरीषमित्यादि । सहा मुद्गपर्णी । निशे पिण्डहरिद्रादारुहरिद्रे ॥ ५२ ॥

कण्डूमकाभिर्दष्टानां रात्रौ शीताः क्रिया हिताः ॥
दिवा ते नैव सिध्यन्ति सूर्यरश्मिबलार्दिताः ॥५३॥
वक्रं कुष्ठमपामार्गः शूकवृन्तविषेऽगदः ॥
भृङ्गस्वरसपिष्टा वा कृष्णवल्मीकमृत्तिका ॥ ५४ ॥
पिपीलिकाभिर्दष्टानां मक्षिकामशकैस्तथा ॥
गोमूत्रेण युतो लेपः कृष्णवल्मीकमृत्तिका ॥ ५५ ॥
नखावघृष्टसंजाते शोफे भृङ्गरसो हितः ॥

कण्डूमकाभिरित्यादि । कण्डूमकाभिर्दष्टाः पुरुषाः । सूर्यरश्मिभिर्बलं येषां ते सूर्यरश्मिबला कण्डूमकाः, तैरर्दिताः पीडिताः । पिपीलिकादिभिस्त्रिभिर्दष्टे गोमूत्रयुक्ता कृष्णवल्मीकमृत्तिका । नखेत्यादि नखावकृष्टे नखोद्धृष्टे सति संजातशोफे मार्कवस्य भृङ्गराजस्य रसो लेपे हितः स्यात् । गयदासस्तु भृङ्गस्वरसपिष्टा स्यादित्यादि पठित्वा पिपीलिकादित्रये दष्टे भृङ्गराजपिष्टकृष्णवल्मीकमृत्तिकालेपं प्रतिपादयति; गोमूत्रयुतकृष्णवल्मीकमृत्तिकालेपनं तु नखावकृष्टे तथा मार्कवस्वरसालेपनं च ॥५३–५५॥—

प्रतिसूर्यकदष्टानां सर्पदष्टवदाचरेत् ॥

प्रतिसूर्यकेत्यादि । आचरेत् 'चिकित्सितं' इत्यध्याहारः॥—

त्रिविधा वृश्चिकाः प्रोक्ता मन्दमध्यमहाविषाः ॥५६॥

एवमेकजातीयान् कीटानभिधाय वृश्चिकान्निर्देष्टुमाह—त्रिविधा वृश्चिका इत्यादि । नन्वेकजातिभ्यः पृथग्भूता वृश्चिका लूताश्च कस्मान्निर्दिश्यन्ते इति ? उच्यते—विषचिकित्सितविशेषापेक्षः पृथगारम्भः ॥ ५६ ॥

गोशकृत्कोथजा मन्दा मध्याः काष्ठेष्टिकोद्भवाः ॥
सर्पकोथोद्भवास्तीक्ष्णा ये चान्ये विषसंभवाः ॥५७॥

तानेव त्रीनपि कारणधर्मचिकित्सितभेदैर्भिन्नान् प्रथमं कारणादेवाह—गोशकृदित्यादि । गोशकृदित्यत्र गोशब्दस्यापरपशूपलक्षणत्वाच्छकृच्छब्दस्यापरमलोपलक्षणत्वाद्गोमहिष्यादिशकृन्मूत्रकोथजा मन्दाः । ये चान्ये इत्यादि । अन्येऽपि ये विषसंभवास्तेऽपि तीव्राः । अन्ये त्वेवं पठन्ति,—"सर्पकोथोद्भवास्तीव्रा दिग्धविद्धविषैर्हते । कोथे मध्या गवादीनां शकृत्कोथेऽवराः स्मृताः"—इति ॥ ५७ ॥

१ 'कुर्यात् संशोधनानि च' इति पा० । २ '०निशोग्रासिन्धुसंभवैः' इति पा० ।

१ 'वचाश्वगन्धा' इति पा० । २ 'नखावकृष्टे स्याल्लेपे मार्कवस्वरसो हितः' इति पा० ।

मन्दा द्वादश मध्यास्तु त्रयः पञ्चदशोत्तमाः ॥
दश विंशतिरित्येते संख्यया परिकीर्तिताः ॥ ५८ ॥

इदानीं तेषां पृथक् संख्यामाह—मन्दा द्वादशेत्यादि । गयदासस्तु—"त्रयोदश प्राणहरास्त्रयो मध्यास्तथाऽपरे । मन्दवीर्या दशैकश्च वृश्चिका विषवेदिभिः ॥ सप्तविंशतिरित्येते संख्यया परिकीर्तिताः"—इति पठति ॥ ५८ ॥

कृष्णः श्यावः कर्बुरः पाण्डुवर्णो[1]
गोमूत्राभः कर्कशो मेचकश्च[2] ।
पीतो[3] धूम्रो रोमशः शाद्वलाभो
रक्तः श्वेतेनोदरेणेति मन्दाः[4] ॥ ५९ ॥
युक्ताश्चैते वृश्चिकाः पुच्छदेशे
स्युर्भूयोभिः पर्वभिश्चेतरेभ्यः ।
एभिर्दष्टे वेदना वेपथुश्च
गात्रस्तम्भः कृष्णरक्तागमश्च ॥
शाखादष्टे वेदना चोर्ध्वमेति
दाहस्वेदौ दंशशोफो[5] ज्वरश्च ॥ ६० ॥

इदानीं मन्दविषाणां लक्षणकर्माण्याह—कृष्ण इत्यादि । कृष्णादयो द्वादशापि श्वेतेनोदरेणोपलक्षिताः । वेदना चोर्ध्वमेतीति त्रिविधानामपि वृश्चिकानां सामान्यलक्षणमत्र प्रायोवृत्त्याऽभिहितम् । स्युर्भूयोभिः पर्वभिश्चेतरेभ्य इति इतरेभ्यो वृश्चिकेभ्यो मन्दविषा वृश्चिका भूयोभिर्बहुतरैः पर्वभिरुपलक्षिता भवेयुः ॥ ५९ ॥ ६० ॥—

रक्तः पीतः कापिलेनोदरेण
सर्वे धूम्राः पर्वभिश्च त्रिभिः स्युः ॥ ६१ ॥
एते मूत्रोच्चारपूत्यण्डजाता
मध्या ज्ञेयास्त्रिप्रकारोरगाणाम् ॥
यस्यैतेषामन्वयाद्यः[6] प्रसूतो
दोषोत्पत्तिं तत्स्वरूपां स कुर्यात् ॥ ६२ ॥
जिह्वाशोफो भोजनस्यावरोधो
मूर्च्छा चोग्रा मध्यवीर्याभिर्दष्टे ॥

मध्यविषाणां लक्षणकर्माण्याह—रक्त इत्यादि । कपिलेन सह रक्तः पीतश्चेति त्रयः । एते च त्रयोऽप्युदरेण धूम्राः । पूर्वत्र काष्ठेष्टिकोद्भवत्वमिह तु सर्पमूत्रोच्चारादिसंभवत्वमित्युभयहेतूपादानाद् व्यस्तसमस्तोभयहेतूद्भवत्वं मध्यानां बोद्धव्यम् । दिग्धविद्धसर्पदष्टानां च शरीरकोथे मध्यानां जन्म मतान्तरेण प्रतिपादितमेव । त्रिप्रकारोरगाणामित्यादि दर्वीकरादिभेदेन त्रिप्रकाराणामेतेषां यस्यान्वयायो यादृक् प्रसूतः स तत्स्वरूपां दोषोत्पत्तिं कुर्यात् ॥ ६१ ॥ ६२ ॥—

१ 'काण्डवर्णो' इति पा० । २ 'मेचको रूक्षवर्णः' इति पा० । ३ 'श्वेतो रक्तो' इति पा० । ४ 'रक्तश्चैते मन्दवीर्या मतास्तु' इति पा० । ५ 'रसनस्योपघातो' इति पा० । ६ 'वृश्चिकैर्मध्यमैस्तु' इति पा० ।

श्वेतश्चित्रः श्यामलो लोहिताभो
रक्तः श्वेतो रक्तनीलोदरौ[1] च ॥ ६३ ॥
पीतोऽरक्तो नीलपीतोऽपरस्तु
रक्तो नीलो नीलशुक्लस्तथा च ॥
रक्तो बभ्रुः पूर्ववच्चैकपर्वा
यश्चापर्वा पर्वणी द्वे च यस्य ॥ ६४ ॥
नानारूपा वर्णतश्चापि घोरा
ज्ञेयाश्चैते वृश्चिकाः प्राणचौराः[2] ॥
जन्मैतेषां सर्पकोथात् प्रदिष्टं
देहेभ्यो वा घातितानां विषेण ॥ ६५ ॥
एभिर्दष्टे सर्पवेगप्रवृत्तिः
स्फोटोत्पत्तिर्भ्रान्तिदाहौ ज्वरश्च ॥
खेभ्यः कृष्णं शोणितं याति तीव्रं
तस्मात्[3] प्राणैस्त्यज्यते शीघ्रमेव ॥ ६६ ॥

तीक्ष्णविषाणां लक्षणकर्माण्याह—श्वेतश्चित्र इत्यादि । पूर्ववच्चेति पूर्वे मध्यविषा यथा जिह्वाशोफादिकारकास्तथैवैतेऽपि जिह्वाशोफादि कुर्वन्तीत्यर्थः । एकपर्वेति द्वयोरस्थ्नोः संघातः पर्व, एकं पर्व यस्य स तथा । पर्वणी द्वे च यस्येति चकारेण बहुपर्वाणोऽपि भवन्तीति समुच्चीयते । खेभ्य इति खेभ्यः स्रोतोभ्यः । अरिष्टमिदम् ॥ ६३—६६ ॥

उग्रमध्यविषैर्दष्टं चिकित्सेत् सर्पदष्टवत् ॥
आदंशं स्वेदितं चूर्णैः प्रच्छितं प्रतिसारयेत् ॥ ६७ ॥
रजनीसैन्धवव्योषशिरीषफलपुष्पजैः ॥

इदानीं चिकित्सा प्रस्तूयते—उग्रमध्येत्यादि । मूर्च्छा चोग्रा चेत्यनेन सर्पदष्टषष्ठसप्तमवेगलक्षणस्य वचनान्मध्यविषेऽपि सर्पदष्टचिकित्सा कार्या । इहापरामपि चिकित्सामाह—आदंशमित्यादि । प्रतिसारणं घर्षणं, तच्च दुष्टरक्तप्रवर्तनार्थम् । मातुलुङ्गाम्लेत्यादि । मातुलुङ्गाम्लं बीजपूरकरसः । सुरसाग्रजं तुलसीपल्लवं, मल्लिकाकुसुममिति केचित् । स्वेदे इत्यादि वातकफावजयाय । पाने सर्पिरित्यादि । बहुवातस्य सर्पिःपानं मधुयुतं, बहुपित्तस्य क्षीरं बहुशर्करं चेति योगद्वयम् ॥ ६७ ॥—

मातुलुङ्गाम्लगोमूत्रपिष्टं च सुरसाग्रजम् ॥ ६८ ॥
लेपे, स्वेदे सुखोष्णं च गोमयं हितमिष्यते ॥
पाने क्षौद्रयुतं सर्पिः[5] क्षीरं वा बहुशर्करम् ॥ ६९ ॥
दंशं मन्दविषाणां तु चक्रतैलेन सेचयेत् ॥
विदारीगणसिद्धेन सुखोष्णेनाथवा पुनः ॥ ७० ॥
कुर्याच्चोत्कारिकास्वेदं विषघ्नैरुपनाहयेत्[6] ॥
गुडोदकं वा सुहिमं चातुर्जातकसंयुतम् ॥ ७१ ॥

१ 'लोहितश्च कृष्णः पीतः शुक्लनीलोदरौ च' इति पा० । २ 'अङ्ग्याभासः कापिलो रक्तकोष्ठो यो वा युक्तः कापिलेनोदरेण' इति, 'कृष्णः श्वेतः श्वेतकृष्णो पवित्रो रक्ताङ्ग्याभश्चाप्यथान्योन्यचित्रौ' इति च पा० । ३ 'मृत्युरूपाः' इति पा० । ४ 'पश्चात् प्राणान् मुञ्चति क्षिप्रमेव' इति पा० । ५ 'सर्पिश्च सक्षौद्रं' इति पा० । ६ 'विषघ्नैरुपनाहनैः' इति पा० ।

पानमस्मै प्रदातव्यं क्षीरं वा सगुडं हिमम् ॥
शिखिकुक्कुटबर्हाणि सैन्धवं तैलसर्पिषी ॥ ७२ ॥
धूमो हन्ति प्रयुक्तस्तु शीघ्रं वृश्चिकजं विषम् ॥
कुसुम्भपुष्पं रजनी निशा वा कोद्रवं तृणम् ॥ ७३ ॥
एभिर्घृताक्तैर्धूपस्तु पायुदेशे प्रयोजितः ॥
नाशयेदाशु कीटोत्थं वृश्चिकस्य च यद्विषम् ॥ ७४ ॥

इदानीं मन्दविषाणां चिकित्सामाह—दंशमित्यादि । चक्रतैलं चक्रपीडितं तिलतैलं, अत्र चक्रशब्दोपादानं हस्तादियन्त्रपीडननिषेधार्थम् । विदारिगणसिद्धेनेत्यादिशब्दस्य लोपाद्विदार्यादिगणसिद्धेन, 'तैलेन' इति शेषः । कुर्याच्चोत्कारिकेत्यादि । उत्कारिका लप्सिका । उत्कारिका तु शिरीषादिविषहरद्रव्यैः पूर्वोक्ता पूर्वकल्पिता च । उपनाहयेद् विषघ्नद्रव्यैरुपनाहस्वेदं कुर्यात् । गुडोदकमित्यादि । बर्हाणि पिच्छानि ॥ ७०-७४ ॥

लूताविषं घोरतमं दुर्विज्ञेयतमं च तत् ॥
दुश्चिकित्स्यतमं चापि भिषग्भिर्मन्दबुद्धिभिः ॥७५॥
सविषं निर्विषं चैतदित्येवं परिशङ्किते ॥
विषघ्नमेव कर्तव्यमविरोधि यदौषधम् ॥ ७६ ॥

लूताविषमादिकारणलक्षणचिकित्सितैर्निर्दिशन्नाह—लूतेत्यादि । घोरतमं कष्टसाध्यं, दुर्विज्ञेयतममतिदुःखेन विज्ञातुं शक्यम् । तस्य दुर्विज्ञेयत्वादेव संशये सति विषहरमेव करणीयमित्याह—सविषमित्यादि । अविरोधि धातुभिः सह यन्न विरुध्यतेऽन्नपानं तत्; न पुनरगदकरणं, धातुविरोधात् ॥ ७५ ॥ ७६ ॥

अगदानां हि संयोगो विषजुष्टस्य युज्यते ॥
निर्विषे मानवे युक्तोऽगदः संपद्यतेऽसुखम् ॥ ७७ ॥
तस्मात् सर्वप्रयत्नेन ज्ञातव्यो विषनिश्चयः ॥
अज्ञात्वा विषसद्भावं भिषग्व्यापादयेन्नरम् ॥ ७८ ॥

तमेव धातुविरोधं दर्शयन्नाह—अगदानामित्यादि । असुखं कष्टम् ॥ ७७ ॥ ७८ ॥

प्रोद्भिद्यमानस्तु यथाऽङ्कुरेण
न व्यक्तजातिः प्रविभाति वृक्षः ॥
तद्वद्दुरालक्ष्यतमं हि तासां
विषं शरीरे प्रविकीर्णमात्रम् ॥ ७९ ॥

लूताविषदुर्विज्ञेयतायामुपमानप्रमाणं निर्दिशन्नाह—प्रोद्भिद्यमान इत्यादि । प्रविकीर्णमात्रं प्रथमं विक्षिप्तमात्रमल्पविस्तृतमित्यर्थः ॥ ७९ ॥

ईषत्सकण्डु प्रचलं सकोठ-
मव्यक्तवर्णं प्रथमेऽहनि स्यात् ॥
अन्तेषु शूनं परिनिम्नमध्यं
प्रव्यक्तरूपं च दिने द्वितीये ॥ ८० ॥
त्र्यहेण तद्दर्शयतीह रूपं
विषं चतुर्थेऽहनि कोपमेति ॥
अतोऽधिकेऽह्नि प्रकरोति जन्तो-
र्विषप्रकोपप्रभवान् विकारान् ॥ ८१ ॥
षष्ठे दिने विप्रसृतं तु सर्वान्
मर्मप्रदेशान् भृशमावृणोति ॥
तत् सप्तमेऽत्यर्थपरीतगात्रं
व्यापादयेन्मर्त्यमतिप्रवृद्धम् ॥ ८२ ॥

ईषत्सकण्डु प्रचलमित्यादि । ईषत्सकण्डु किञ्चित्कण्डूयुक्तं, प्रचलं प्रचलनशीलम् । गयदासस्तु प्रबलमिति पठित्वा व्याख्यानयति—प्रबलमीषत् प्रथमदिने, द्वितीयादिषु दिनेषु तु प्रबलतरं क्रमेण प्रबलतमं च; यदाह,—"षष्ठे दिने विप्रसृतं तु सर्वान् मर्मप्रदेशान् भृशमावृणोति"—इति । सकोठं किञ्चित् कोठयुक्तं, कोठश्च वरटीदंशस्थानः । दर्शयतीह रूपमिति रूपं चात्र तन्त्रान्तरोक्तं ज्वररोमहर्षरक्तमण्डलादिकम् । तथाच वृद्धवाग्भटः,—"तृतीये सज्वरो रोमहर्षकृद्रक्तमण्डलः । शरावरूपस्तोदाढ्यो रोमकूपेषु सास्रवः"—इति । कोपमेति उन्मार्गप्रवृत्तं भवति, ततोऽधिके पञ्चमदिने उन्मार्गप्रवृत्तं सत् विषकोपप्रभवान् विकारान् करोति । 'तृड्दाहकण्डूप्रबलं' इति केचित् ॥ ८०-८२ ॥

यास्तीक्ष्णचण्डोग्रविषा हि लूता-
स्ताः सप्तरात्रेण नरं निहन्युः ॥
अतोऽधिकेनापि निहन्युरन्या
यासां विषं मध्यमवीर्यमुक्तम् ॥ ८३ ॥
यासां कनीयो विषवीर्यमुक्तं
ताः पक्षमात्रेण विनाशयन्ति ॥
तस्मात् प्रयत्नं भिषगत्र कुर्या-
दादंशपाताद्विषघातियोगैः ॥ ८४ ॥

तासां तीक्ष्णमध्यमन्दविषाणां कालावधिमाह—यास्तीक्ष्णचण्डोग्रेत्यादि । तीक्ष्णं दाहपाकस्रावकरं, चण्डमतिकोपाटोपकरं; तीक्ष्णचण्डत्वेनोग्रमसह्यं विषं यासां तास्तथा । अतोऽनेनैकादशाहात् परत इति सामर्थ्याद् ग्राह्यम् । तथाचालम्बायनः,—"लूतास्तीक्ष्णविषा हन्युः सप्ताष्टनवभिर्दिनैः । एकादशाहात् परतो विषं यासां तु मध्यमम्"—इति ॥ ८३ ॥ ८४ ॥

विषं तु लालानखमूत्रदंष्ट्रा-
रजःपुरीषैरथ चेन्द्रियेण ॥
सप्तप्रकारं विसृजन्ति लूता-
स्तदुग्रमध्यावरवीर्ययुक्तम् ॥ ८५ ॥
सकण्डुकोठं स्थिरमल्पमूलं
लालाकृतं मन्दरुजं वदन्ति ॥
शोफश्च कण्डूश्च पुलालिका[1] च
धूमायनं चैव नखाग्रदंशे ॥ ८६ ॥
दंशं तु मूत्रेण सकृष्णमध्यं
सरक्तपर्यन्तमवेहि दीर्णम् ॥
दंष्ट्राभिरुग्रं कठिनं विवर्णं
जानीहि दंशं स्थिरमण्डलं च ॥ ८७ ॥

१ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते। २ 'तस्माद्यत्नेन भिषजा' इति० ।

१ 'पुलालिका' इति पा० ।

रजःपुरीषेन्द्रियजं हि विद्धि
स्फोटं विपक्वामलपीलुपाण्डम् ॥

अधिष्ठानविशेषादपि तासां विषं विषे च लिङ्गं दर्शयन्नाह— विषं तु लालेत्यादि । रज आर्तवम्, इन्द्रियं शुक्रम् । सकण्डुकोठमित्यादि । कोठः कोठपिडकाः । शोफ इत्यादि । पुलालिका रोमाञ्चः । धूमायनं धूमोद्वमनमिवाङ्गानाम् । दंशं तु मूत्रेणेत्यादि । रजःप्रभृतिजे 'दंशे' इत्यध्याहारः । विद्धि जानीहि ॥ ८५-८७ ॥—

एतावदेतत् समुदाहृतं तु
वक्ष्यामि लूताप्रभवं पुराणम् ॥ ८८ ॥
सामान्यतो दष्टमसाध्यसाध्यं
चिकित्सितं चापि यथाविशेषम् ॥ ८९ ॥

इदानीमतीतानागतोक्तैः समानतां विशिष्टतां च विभजन्नाह—एतावदेतदित्यादि । इयत्प्रमाणमेतत् प्रथमादिदिवसाश्रयं लालाद्यधिष्ठानाश्रयं च सर्वलूताविषयं समुदाहृतमागमप्रसिद्धमुक्तमित्यर्थः । वक्ष्यामीत्यादि । लूताप्रभवं लूतानामाद्युत्पत्तिकारणं, पुराणं पुराभवं, सामान्यतो वक्ष्यामीति संबन्धः; तथा दष्टं दंशमप्यसाध्यं साध्यं च सामान्यतो वक्ष्यामीति । चिकित्सितं चेत्यादि । चिकित्सितं यथाविशेषं विशेषानतिक्रमेण; चकाराल्लक्षणमपि विशेषानतिक्रमेण वक्ष्यामीति संबन्धः ॥ ८८ ॥ ८९ ॥

विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम् ।
वशिष्ठं कोपयामास गत्वाऽऽश्रमपदं किल ॥ ९० ॥
कुपितस्य मुनेस्तस्य ललाटात् स्वेदबिन्दवः ।
अपतन् दर्शनादेव रवेस्तत्समतेजसः ॥ ९१ ॥
तृणे महर्षिणा लूने धेन्वर्थं संभृतेऽपि च ।
ततो जातास्त्विमा घोरा नानारूपा महाविषाः ॥
अपकाराय वर्तन्ते नृपसाधनवाहने ॥ ९२ ॥
यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदबिन्दवः ।
तस्माल्लूतेति भाष्यन्ते सङ्ख्यया ताश्च षोडश ॥ ९३ ॥

तत्प्रभवमुद्दिशन्नाह—विश्वामित्र इत्यादि । किलेत्यागमसंवादे । तत्समतेजसो रविसमानतेजसो वशिष्ठस्य स्वेदबिन्दवः अपतन् पतिताः । धेन्वर्थं संभृते गवादिचरणार्थं संचिते । मतान्तरेणोत्पत्तिरन्यथा वर्ण्यते,—"अन्ये वदन्ति भुक्तस्य दुष्टस्यान्नस्य मूर्च्छनात् । संभवन्ति विषस्फोटा ये लूताकीटलक्षणम् । यथास्वं धारयन्तस्ते लूताकीटाश्च कीर्तिताः"—इत्यादि ॥ ९०-९३ ॥

कृच्छ्रसाध्यास्तथाऽसाध्या लूतास्तु द्विविधाःस्मृताः
तासामष्टौ कृच्छ्रसाध्या वर्ज्यास्तावत्य एव तु ॥९४॥
त्रिमण्डला तथा श्वेता कपिला पीतिका तथा ।
आलमूत्रविषा रक्ता कसना चाष्टमी स्मृता ॥ ९५ ॥
ताभिर्दष्टे शिरोदुःखं कण्डूर्दंशे च वेदना ।
भवन्ति च विशेषेण गदाः श्लैष्मिकवातिकाः ॥९६॥

सौवर्णिका लाजवर्णा जालिन्येणीपदी तथा ।
कृष्णाऽग्निवर्णा काकाण्डा मालागुणाऽष्टमी तथा ९७
ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च ।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदोषजाः ९८
पिडका विविधाकारा मण्डलानि महान्ति च ।
महान्तो मृदवः शोफा रक्ताः श्यावाश्चलास्तथा ९९
सामान्यं सर्वलूतानामेतदादंशलक्षणम् ॥

आलाविषा मूत्रविषा चेति द्वे ॥ ९४-९९ ॥—

विशेषलक्षणं तासां वक्ष्यामि सचिकित्सितम् १००
त्रिमण्डलाया दंशेऽसृक् कृष्णं स्रवति दीर्यते ।
बाधिर्यं कलुषा दृष्टिस्तथा दाहश्च नेत्रयोः ॥ १०१ ॥
तत्रार्कमूलं रजनी नाकुली पृश्निपर्णिका ।
पानकर्मणि शस्यन्ते नस्यालेपाञ्जनेषु च ॥ १०२ ॥
श्वेतायाः पिडका दंशे श्वेता कण्डूमती भवेत् ।
दाहमूर्छाज्वरवती विसर्पक्लेदरुक्करी ॥ १०३ ॥
तत्र चन्दनरास्नैलाहरेणुनलवञ्जुलाः ।
कुष्ठं लामज्जकं वक्रं नलदं चागदो हितः ॥ १०४ ॥
आदंशे पिडका ताम्रा कपिलायाः स्थिरा भवेत् ।
शिरसो गौरवं दाहस्तिमिरं भ्रम एव च ॥ १०५ ॥
तत्र पद्मककुष्ठैलाकरञ्जककुभत्वचः ।
स्थिरार्कपर्ण्यपामार्गदूर्वाब्राह्म्यो विषापहाः ॥ १०६ ॥
आदंशे पीतिकायास्तु पिडका पीतिका स्थिरा ।
भवेच्छर्दिर्ज्वरः शूलं मूर्ध्नि रक्ते तथाऽक्षिणी ॥१०७
तत्रेष्टाः कुटजोशीरतुङ्गपद्मकवञ्जुलाः ।
शिरीषकिणिहीशेलुकदम्बककुभत्वचः ॥ १०८ ॥
रक्तमण्डनिभे दंशे पिडकाः सर्षपा इव ।
जायन्ते तालुशोषश्च दाहश्चालविषार्दिते ॥ १०९ ॥
तत्र प्रियङ्गुह्रीबेरकुष्ठलामज्जवञ्जुलाः ।
अगदः शतपुष्पा च सपिप्पलवटाङ्कुराः ॥ ११० ॥
पूतिर्मूत्रविषादंशो विसर्पी कृष्णशोणितः ।
कासश्वासवमीमूर्छाज्वरदाहसमन्वितः ॥ १११ ॥
मनःशिलालमधुककुष्ठचन्दनपद्मकैः ।
मधुमिश्रैः सलामज्जैरगदस्तत्र कीर्तितः ॥ ११२ ॥
आपाण्डुपिडको दंशो दाहक्लेदसमन्वितः ।
रक्ताया रक्तपर्यन्तो विज्ञेयो रक्तसंयुतः ॥ ११३ ॥
कार्यस्तत्रागदस्तोयचन्दनोशीरपद्मकैः ।
तथैवार्जुनशेलुभ्यां त्वग्भिराम्रातकस्य च ॥ ११४ ॥
पिच्छिलं कसनादंशाद्रुधिरं शीतलं स्रवेत् ।
कासश्वासौ च तत्रोक्तं रक्तलूताचिकित्सितम् ११५

सामान्यलक्षणमभिधाय तासां विशेषलक्षणं चिकित्सिते च भेदं दर्शयन्नाह—विशेषलक्षणमित्यादि । चकारात् परिषेकेऽपि । श्वेताया इत्यादि । रास्ना गन्धनाकुली । आदंशे इत्यादि । तुङ्गं पद्मकेशरं, पुन्नाग इत्यपरे । वञ्जुलो जलवेतसः, जेजटस्तु कम्बुकेति पठित्वा किणिहीति व्याख्यानयति । रक्तमण्डनिभे ईत्यादि ।

१ 'ह्यधस्तात्तीक्ष्णवर्चसः' इति पा० ।

'रक्तपाया' इति क्वचित्, तत्रापि रक्ताया एव ग्रहणम्। पिच्छिलमित्यादि । रक्तलूताचिकित्सितं तोयचन्दनादिकम् ॥ १००-११५ ॥

पुरीषगन्धिरल्पासृक्क् कृष्णाया दंश एव तु ॥
ज्वरमूर्छावमीदाहकासश्वाससमन्वितः ॥ ११६ ॥
तत्रैलावक्रसर्पाक्षीगन्धनाकुलिचन्दनैः ॥
महासुगन्धिसहितैः प्रत्याख्यायागदः स्मृतः ॥११७॥
दंशे दाहोऽग्निवक्रायाः स्रावोऽत्यर्थं ज्वरस्तथा ॥
चोषकण्डूरोमहर्षा दाहविस्फोटसंयुतः ॥ ११८ ॥
कृष्णाप्रशमनं चात्र प्रत्याख्याय प्रयोजयेत् ॥
सारिवोशीरयष्ट्याह्वचन्दनोत्पलपद्मकम् ॥ ११९ ॥

इदानीं सौवर्णिकादिष्वसाध्येषु द्वयोः कृष्णाग्निवक्रयोः कदाचित्कृच्छ्रसाध्यत्वात् कृच्छ्रसाध्यानन्तरं लक्षणं प्रत्याख्यानपूर्वकं चिकित्सितं चाह—पुरीषगन्धिरित्यादि । सर्पाक्षी लोहितपुष्पा शङ्खपुष्पीभेदः । महासुगन्धिः दुन्दुभिस्वनीयोक्तोऽगदः । दंशे इत्यादि । चोषस्थाने तृष्णेति क्वचित्, संयुत इत्यत्र दंश इति विभक्तिविपरिणामेन योजनीयम् । गयदासस्तु कृष्णाग्निवक्रयोर्नियतासाध्यत्वमङ्गीकुर्वन् सौवर्णिकादिक्रमेणाग्रे लक्षणमात्रमेव पठति ॥ ११६-११९ ॥

सर्वासामेव युञ्जीत विषे श्लेष्मातकत्वचम् ॥
भिषक् सर्वप्रकारेण तथा चाक्षीवपिप्पलम् ॥१२०॥

तासामुक्तानां दशानामपि लूतानां विशिष्टं चिकित्सितमभिधाय सामान्यमप्याह—सर्वासामित्यादि । सर्वप्रकारेण पानाभ्यञ्जनादयः । अक्षीवपिप्पलमिति अक्षीवान्महानिम्बाजातः पिप्पल अक्षीवपिप्पलः, अन्ये शोभाञ्जनाजात इति मन्यन्ते । अन्यत्राप्युक्तं—अक्षीवाजातस्य पिप्पलस्य मणिः सर्वविषापहः । शेलुत्वचो वेति । आलम्बायनोऽप्यत्राह,—"लूताविषेषु सर्वेषु पाननस्याञ्जनादिना । प्रयोज्यः पिप्पलोऽक्षीवजातः शेलुत्वचोऽथवा"—इति ॥ १२० ॥

कृच्छ्रसाध्यविषा ह्यष्टौ प्रोक्ता द्वे च यदृच्छया ॥
अवार्यविषवीर्याणां लक्षणानि निबोध मे ॥ १२१ ॥
ध्यामः सौवर्णिकादंशः सफेनो मत्स्यगन्धकः ॥
श्वासः कासो ज्वरस्तृष्णा मूर्च्छा चात्र सुदारुणा ॥
आदंशे लाजवर्णाया ध्यामं पूति स्रवेदसृक् ॥
दाहो मूर्च्छाऽतिसारश्च शिरोदुःखं च जायते १२३
घोरो दंशस्तु जालिन्या राजिमानवदीर्यते ॥
स्तम्भः श्वासस्तमोवृद्धिस्तालुशोषश्च जायते ॥१२४॥
एणीपद्यास्तथा दंशो भवेत् कृष्णतिलाकृतिः ॥
तृष्णामूर्च्छाज्वरच्छर्दिकासश्वाससमन्वितः ॥१२५॥
दंशः काकाण्डिकादष्टे पाण्डुरक्तोऽतिवेदनः ॥
तृण्मूर्च्छाश्वासहृद्रोगहिक्काकासाः स्युरुच्छ्रिताः १२६

१ 'चोषकण्डूरोमहर्षा विदाहः स्फोटजन्म च' इति पा० । २ 'मूर्च्छा चात्यर्थवेदना' इति पा० । ३ 'तृष्णामूर्च्छाज्वरश्वासदाहकृत् प्राणनाशनः' इति पाठान्तरम् ।

रक्तो मालागुणादंशो धूमगन्धोऽतिवेदनः ॥
बहुधा च विशीर्येत दाहमूर्च्छाज्वरान्वितः ॥१२७॥

इदानीमसाध्यानामपि परिहारार्थं लक्षणमाह—कृच्छ्रसाध्येत्यादि । द्वे च यदृच्छयेति अवार्यविषवीर्याणां मध्ये द्वे यदृच्छया सिध्यतः । शेषाणामवार्यविषवीर्याणां षट्संख्यकानां, निबोध जानीहि । ध्याम इत्यादि । ध्यामो दग्धेष्टकादिवर्णः । घोरो दंश इत्यादि । तमोवृद्धिः पुनः पुनस्तमोदर्शनम् । एणीपद्या इत्यादि । विशीर्येत शटतीत्यर्थः ॥ १२१-१२७ ॥

असाध्यास्वप्यभिहितं प्रत्याख्यायाशु योजयेत् ॥
दोषोच्छ्रायविशेषेण दाहच्छेदविवर्जितम् ॥ १२८ ॥

केचिदसाध्यानामपि चिकित्सितं पठन्ति—असाध्याखित्यादि ॥ १२८ ॥

साध्याभिराभिर्लूताभिर्दष्टमात्रस्य देहिनः ॥
वृद्धिपत्रेण मतिमान् सम्यगादंशमुद्धरेत् ॥ १२९ ॥

इदानीं कृच्छ्रसाध्यानां तात्कालिकं चिकित्सितमाह—साध्याभिराभिरित्यादि । अस्याग्रे केचिदमुं पाठं पठन्ति—'जाम्बवौष्ठेनाग्नितप्तेन देहेदाकरवारणात्'-इति ॥ १२९ ॥

अमर्मणि विधानज्ञो वर्जितस्य ज्वरादिभिः ॥
दंशस्योत्कर्तनं कुर्यादल्पश्वयथुकस्य च ॥ १३० ॥
मधुसैन्धवसंयुक्तैरगदैर्लेपयेत्ततः ॥
प्रियङ्गुरजनीकुष्ठसमङ्गामधुकैस्तथा ॥ १३१ ॥
सारिवां मधुकं द्राक्षां पयस्यां क्षीरमोरटम् ॥
विदारीगोक्षुरक्षौद्रमधुकं पाययेत वा ॥ १३२ ॥
क्षीरिणां त्वक्कषायेण सुशीतेन च सेचयेत् ॥
उपद्रवान् यथादोषं विषघ्नैरेव साधयेत् ॥ १३३ ॥

कीदृशस्य दंशस्य छेदं कुर्यादित्याह—अमर्मणि विधानज्ञ इत्यादि । ज्वरादिभिरसाध्यलूतोक्तैः, 'असाध्यानां भिषक् प्राज्ञो न युञ्जीत चिकित्सितम्' इति । मधुसैन्धवेत्यादि । अगदैर्महासुगन्ध्यादिभिः । तत इति छेदादनन्तरम् । समङ्गा वराहक्रान्ता । तथेति प्रियङ्ग्वादिभिरपि लेपयेदित्यर्थः । सारिवामित्यादि । सारिवा उत्पलसारिवा, पयस्या अर्कपुष्पी, क्षीरमोरटं मोरट एव । एकत्र योगे मधुकद्वयं स्थलजजलजभेदेन । क्षीरिणामित्यादि ॥ १३०-१३३ ॥

नस्याञ्जनाभ्यञ्जनपानधूमं
तथाऽवपीडं कवलग्रहं च ॥
संशोधनं चोभयतः प्रगाढं
कुर्यात्सिरामोक्षणमेव चात्र ॥ १३४ ॥

लूतासु दशविधमुपक्रममाह—नस्याञ्जनाभ्यञ्जनेत्यादि । अभ्यञ्जनस्थाने आलेपनमिति केचित् । संशोधनमुभयतो वमनविरेचनाख्यं कुर्यात् । सिरामोक्षणमित्यत्र 'रक्तं हरेच्चापि जलायुकाभिः' इति केचित् । एतच्च सर्वं विषहरैरेव दशविधमपि ॥ १३४ ॥

१ 'साध्याभिरपि लूताभिः' इति पा० । २ 'दहेदाकरणादिति' इति पा० ।

कीटदष्टव्रणान् सर्वानहिदष्टव्रणानपि ॥
आदाहपाकात्तान् सर्वांश्चिकित्सेदुष्टवद्भिषग् ॥१३५

लूतानामपि कीटत्वात् सामान्येनैव कीटविषोत्थव्रणानां तथा तादृशानामहिदष्टव्रणानामपि दुष्टव्रणवच्चिकित्सामाह—कीटदष्टव्रणानित्यादि । आदाहपाकादिति यावद्दाहपाकौ तिष्ठतः; विनिवृत्तयोश्च दाहपाकयोर्वक्ष्यमाणो विधिर्भविष्यति । क्वचित् 'सदाहपाकान्' इति पाठः । दुष्टवद्दुष्टव्रणवत्, दुष्टव्रणोक्तं च 'दुष्टव्रणेषु कर्तव्यमूर्ध्वं चाधश्च शोधनम्' इत्यादि । तत्र शोधनं विषहरद्रव्यैः, तथा लेपादिकमपि विषहरमेव दुष्टव्रणचिकित्सितेन ॥ १३५ ॥

विनिवृत्ते ततः शोफे कर्णिकापातनं हितम् ॥
निम्बपत्रं त्रिवृद्दन्ती कुसुम्भं कुसुमं मधु ॥ १३६ ॥
गुग्गुलुः सैन्धवं किण्वं वर्चः पारावतस्य च ॥
विषवृद्धिकरं चान्नं हित्वा संभोजनं हितम् ॥१३७॥

निवृत्तदाहादौ व्रणे या विषोत्पन्ना कर्णिका तस्याश्चिकित्सामाह—विनिवृत्ते इत्यादि । कर्णिका मांसकन्दी, पद्मकर्णिकाकारत्वात् कर्णिका भण्यते । तस्याश्च शोणितपित्तोत्थाया मृदुरुजायाः प्रच्छनमन्तरेणैव पातनं सुकरम् । तान्येव पातनद्रव्याण्याह—निम्बपत्रमित्यादि । किण्वं सुराबीजम् । एतन्निम्बपत्रादिकं द्रव्यं लेपनेन कर्णिकापातने हितं, तथा विषवृद्धिकरं तिलकुलत्थाद्यन्नं वर्जयित्वा यदन्यत् पातनं संभोजनं तत् कर्णिकायाः पातने हितम् । गयदासस्तु निम्बपत्रमित्यस्य स्थाने 'शिखीवंशं' इति पठित्वा व्याख्यानयति—शिखी लाङ्गली, वंशो वंशत्वक् । किण्वस्थाने दन्तं पठति, दन्तो गोदन्तो गवां दन्तः ॥ १३६ ॥ १३७ ॥

विषेभ्यः खलु सर्वेभ्यः कर्णिकामरुजां स्थिराम् ॥
प्रच्छयित्वा मधून्मिश्रैः शोधनीयैरुपाचरेत् ॥१३८॥

कफवातोत्थायाः कर्णिकायाश्चिकित्सामाह—विषेभ्य इत्यादि । अरुजामविद्यमानरुजां, स्थिरां कठिनाम् । शोधनीयैः निम्बपत्रत्रिवृतादिभिः, दन्तीमूलमदनफलकल्कादिभिर्वा ॥ १३८ ॥

सप्तषष्टस्य कीटानां शतस्यैतद्विभागशः ॥
दष्टलक्षणमाख्यातं चिकित्सा चाप्यनन्तरम् ॥१३९॥

इदानीं परतन्त्रोदितसंख्याविप्रतिपत्तिनिरासार्थं स्वतन्त्रे व्यासोक्तसंख्याः सुखबोधार्थं च कीटेषु दष्टलक्षणचिकित्सितोपदेशेन परिमाणमुद्दिशन्नाह—सप्तषष्टस्येत्यादि । सप्तषष्टशतस्य कीटानां दष्टलक्षणमाख्यातं कथितं, विभागशः प्रत्येकं दष्टलक्षणादनन्तरं चिकित्सितमपि समाख्यातम् ॥ १३९ ॥

सविंशमध्यायशतमेतदुक्तं विभागशः ॥

इदानीं पूर्वतन्त्रस्याध्यायसंख्यायाः परिमाणं यदुद्दिष्टं तन्निर्दिष्टमिति दर्शयन्नाह—संविशमित्यादि । एतत् सविंशमध्यायशतं, विभागशः सूत्रस्थानादिविभागेनोक्तम् ॥—

इहोद्दिष्टाननिर्दिष्टानर्थान् वक्ष्याम्यथोत्तरे ॥ १४० ॥

शालाक्यकौमारकायचिकित्साभूतविद्यानां नाममात्रेणेहोद्दिष्टानां निर्देशाभावात् कथं ज्ञानमित्याह—इहोद्दिष्टानित्यादि । इह विंशत्यधिकाध्यायशते येऽर्थाः शालाक्यादयो नाममात्रेणोद्दिष्टा नतु प्रपञ्चेन निर्दिष्टाः, तानथानन्तरमुत्तरे वक्ष्यामि १४०

सनातनत्वाद्वेदानामक्षरत्वात्तथैव च ॥
तथा दृष्टफलत्वाच्च हितत्वादपि देहिनाम् ॥ १४१ ॥
वाक्समूहार्थविस्तारात् पूजितत्वाच्च देहिभिः ॥
चिकित्सितात् पुण्यतमं न किंचिदपि शुश्रुमः ॥१४२॥
ऋषेरिन्द्रप्रभावस्यामृतयोनेर्भिषग्गुरोः ॥
धारयित्वा तु विमलं मतं परमसंमतम् ॥
उक्ताहारसमाचार इह प्रेत्य च मोदते ॥ १४३ ॥

इति सुश्रुतसंहितायां कल्पस्थाने कीटकल्पो नामाष्टमोऽध्यायः ॥ ८ ॥

इति भगवता श्रीधन्वन्तरिणोपदिष्टायां तच्छिष्येण महर्षिणा सुश्रुतेन विरचितायां सुश्रुतसंहितायां पञ्चमं कल्पस्थानं समाप्तम् ॥ ५ ॥

चिकित्सितस्योपादेयतामागमप्रत्यक्षफलत्वाभ्यामेव निर्दिशन्नाह—सनातनत्वादित्यादि । चिकित्सितादन्यत् पुण्यतमं न किमपि शुश्रुमः न किमपि अनु गुरुपारम्पर्येण श्रुतवन्तः । कुत इत्याह—सनातनत्वाद्वेदानामिति ।—आयुर्वेदाङ्गानां शल्यादीनां सनातनत्वान्नित्यभवत्वादकृतकत्वादित्यर्थः । एतेनाकृतकत्वाख्यहेतुकेन दोषाभावेण तत्प्रोक्तस्य चिकित्सितस्य पुण्यतमत्वम् । तथा अक्षरत्वादायुर्वेदाङ्गानां शल्यादीनां न क्षरतीत्यक्षरमविचलनात्मकमुच्यते, एतानि चायुर्वेदाङ्गान्यक्षराणि अविचलनात्मकानि याथातथ्यादित्यर्थः, एतस्मादपि चिकित्सितं पुण्यतमम् । आगमप्रमाणमभिधाय प्रत्यक्षं प्रमाणमाह—तथा दृष्टफलत्वाच्चेति । दृष्टफलमपि किंचिदपुण्यतमं यथा स्तेयादीत्याह—हितत्वाचापि देहिनामिति । चिकित्सितादित्यस्य स्वरूपविशेषणमाह—वाक्समूहार्थविस्तारादिति ।—वाक्समूहेऽर्थविस्तारो यस्मिन्; अत एव पूजितत्वाच्च देहिभिरिति देहिनः व्याधिपरिमोक्षं स्वस्थरक्षणमिच्छन्त आयुर्वेदं विशिष्टपदपदार्थरूपं स्वसुखकामाः पूजयन्ति । यतश्चिकित्सितमुक्तैर्हेतुभिः पवित्रतमं; तस्मादिन्द्रप्रभावस्य मुनेरुक्तं वेदमविद्यमानपापलक्षणममलं, परमाणां महतां सम्यज्ज्ञातं पूजितं हृदये धारणात् । उक्ताहारसमाचार उक्तव्याधिपरिमोक्षस्वस्थरक्षणाहाराचारः । इह इहलोके, प्रेत्य परलोकेऽपि, मोदते हृष्यति । गयदासस्तु 'सनातनत्वाद्वेदानामक्षरत्वात्तथैव च' इतीदृशं व्याख्यानयति—सनातनत्वान्नित्यभवत्वादायुषः संतानस्योपकार्यस्य नित्यसद्भावात्तदुपहितकारकोऽप्यायुर्वेदो नित्यः । तत्रायुषः संतानस्यैव सन्ततिनित्यतामुद्दिशन्नाह—अक्षरत्वादिति ।—न क्षरन्तीति अक्षराणि अकारादयः स्वराः कादीनि च व्यञ्जनानि; तद्घटितत्वादायुर्वेदस्यापि नित्यत्वं कारणानुरूपं कार्यमिति कृत्वा ॥ १४१-१४३ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायां कल्पस्थानेऽष्टमोऽध्यायः ॥ ८ ॥

१ 'आदंशपाकं यत्नेन चिकित्सेत् सर्पदष्टवत्' इति पा० ।

१ 'किंचित् पुण्यतमं यथा—अस्तेयादीत्याह' इति पा० ।

निबन्धसंग्रहाख्यव्याख्यासमुल्लसिता

सुश्रुतसंहिता ।

अथ उत्तरतन्त्रम् ।

प्रथमोऽध्यायः ।

अथात औपद्रविकमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

कल्पस्थानानन्तरमुत्तरतन्त्रमारभ्यते, येन कल्पस्थाने विषजस्यागन्तुव्रणस्य विषमुपद्रवकारि निजव्रणस्यापि रिपुभिरवचारितविषमुपद्रवभूतमिति तच्चिकित्सितमभिहितम्, अत उपद्रवचिकित्साधिकारसामान्यात् सर्वोपद्रवचिकित्सार्थमुत्तरतन्त्रारम्भः; अथवा सविंशमध्यायशतं परिसमाप्य परिशिष्टत्वादुत्तरतन्त्रं प्रतिपाद्यं भवति । तस्य च तन्त्रस्योपद्रवानधिकृत्य प्रवृत्तत्वान्निरुक्त्या औपद्रविकत्वं प्राप्तमप्यध्याये व्यवस्थितम् । तदुक्तं सूत्रे—'अधिकृत्य कृतं' इत्यादि । स च निरुक्तिसंपन्नोऽध्यायः प्राक् प्रतिपाद्यो भवतीत्यत आह—अथात इत्यादि । उपद्रवान् रोगानधिकृत्य कृतोऽध्याय औपद्रविकः ॥ १ ॥ २ ॥

अध्यायानां शते विंशे यदुक्तमसकृन्मया ॥
वक्ष्यामि बहुधा सम्यगुत्तरेऽर्थानिमानिति ॥ ३ ॥
इदानीं तत् प्रवक्ष्यामि तन्त्रमुत्तरमुत्तमम् ।

इदानीमारभ्यमाणस्योत्तरतन्त्रस्य संबन्धं दर्शयन्नाह—अध्यायानामित्यादि । यद्यस्मात् कारणाद्विंशत्यधिकेऽध्यायशते पुनः पुनरुक्तं मया; किं तदित्याह—'इमानर्थान् बहुधोत्तरे वक्ष्यामि' इति; तत्तस्मात् कारणादधुनोत्तरतन्त्रं प्रवक्ष्यामीति संबन्धः । केचित् 'यद्विंशत्यधिके प्रोक्तमध्यायानां शते मया' इति पठन्ति; अपरे तु 'शते सविंशेऽध्यायानां' इति पठन्ति ॥ ३ ॥—

निखिलेनोपदिश्यन्ते यत्र रोगाः पृथग्विधाः ॥ ४ ॥
शालाक्यतन्त्राभिहिता विदेहाधिपकीर्तिताः ॥
ये च विस्तरतो दृष्टाः कुमाराबाधहेतवः ॥ ५ ॥
षट्सु कायचिकित्सासु ये चोक्ताः परमर्षिभिः ॥
उपसर्गादयो रोगा ये चाप्यागन्तवः स्मृताः ॥ ६ ॥
त्रिषष्टी रससंसर्गाः स्वस्थवृत्तं तथैव च ॥
युक्तार्था युक्तयश्चैव दोषभेदास्तथैव च ॥ ७ ॥
यत्रोक्ता विविधा अर्था रोगसाधनहेतवः ॥

इदानीमुत्तरतन्त्रस्य निखिलव्याधिनिश्चयचिकित्सालक्षणां स्तुतिं निर्दिशन्नाह—निखिलेनेत्यादि । निखिलेन सामस्त्येन । यत्र यस्मिन्नुत्तरतन्त्रे । पृथग्विधा नानाप्रकाराः । के ते नानाप्रकारा रोगा निखिलेनोत्तरेऽभिधास्यन्ते ? इत्याह—शालाक्यशास्त्राभिहिता इत्यादि । विदेहाधिपकीर्तिता इति निमिप्रणीताः षट्सप्ततिर्नेत्ररोगाः, न करालभद्रशौनकादिप्रणीताः । ये च विस्तरतो दृष्टा इति पार्वतकजीवकबन्धकप्रभृतिभिः; कुमाराबाधहेतवः स्कन्दग्रहप्रभृतयः । षट्सु कायचिकित्सासु अग्निवेशभेडजातूकर्णपराशरहारीतक्षारपाणिप्रोक्तासु । उपसर्गादयो ज्वरादयः । आगन्तवोऽग्न्युन्मादादयः । ननु भूतनिमित्तत्वादुन्मादादीनां कथमागन्तुकत्वं ? यतः प्रहारादिकृता आगन्तवः; सत्यं, बाह्यनिमित्तत्वादुन्मादादीनामागन्तुकत्वम् । गयी तु, उपसर्गादयोऽमानुषोपसर्गादयः, ते चापस्मारोन्मादा भूतविद्याभिहिताः, त एवागन्तव इति व्याख्यानयति । उत्तरतन्त्रे निखिलेन रोगा एव प्रोक्ता उतान्येऽपि प्रोक्ता इति पृष्ट आह—त्रिषष्टी रससंसर्गा इत्यादि । युक्तार्थाः प्रमाणोपपन्नार्थाः । युक्तयस्तन्त्रयुक्तयः । अस्याग्रे केचित् 'विदेहाधिपतिः श्रीमान् जनको नाम विश्रुतः । आलम्भयज्ञप्रवणः सोऽयजद्ब्राह्मणैर्वृतः ॥ तस्य यागप्रवृत्तस्य कुपितो भगवान्रविः ॥ दृष्टिं प्रणाशयामास सोऽनुतेपे महत्तपः ॥ दीप्तांशुस्तपसा तेन तोषितः प्रददौ पुनः ॥ चक्षुर्वेदं प्रसन्नात्मा सर्वभूतानुकम्पया ॥' इति पाठं पठन्ति व्याख्यानयन्ति च । तं च बृहत्पञ्जिकाकारो न पठति, तस्मान्मयाऽपि न पठितो न व्याख्यातश्च ॥ ४–७ ॥—

महतस्तस्य तन्त्रस्य दुर्गाधस्याम्बुधेरिव ॥ ८ ॥
आदावेवोत्तमाङ्गस्थान् रोगानभिदधाम्यहम् ॥
सङ्ख्यया लक्षणैश्चापि साध्यासाध्यक्रमेण च ॥ ९ ॥

इदानीं सर्वेन्द्रियाधिष्ठानत्वेन प्राणाधिष्ठानत्वेन च शिरःप्रधानमतः प्रथमं शिरःस्थान् व्याधीन् कथयामीति निर्दिशन्नाह—महत इत्यादि । तस्योत्तरतन्त्रस्यादावुत्तमाङ्गस्थान् रोगानभिदधामीति संबन्धः । अम्बुधेरिव समुद्रस्येव, महतोऽतिविस्तीर्णस्य, दुर्गाधस्य अगाधस्य । संख्यया षट्सप्तत्या विदेहाधिपप्रोक्तया, लक्षणैर्व्यञ्जनैः, चकारेण हेतुचिकित्साभ्यां; साध्यासाध्यक्रमेण चेति साध्यासाध्यपरिपाट्या; अथवा लक्षणैर्हेतुपूर्वरूपोपशयसंप्राप्तिभिः; चकारेण चिकित्सितमेवानुक्तं समुच्चीयते, केचिच्च क्रमशब्देनैव चिकित्सितं गृह्णन्ति ॥ ८ ॥ ९ ॥

१ 'विषवदुपद्रवकारित्वं' इति पा० । २ 'रिपुभिरवचारितविषस्य विषवदुपद्रवकारित्वम्' इति पा० । ३ 'परिशिष्टभूतमुत्तरतन्त्रं' इति पा० । ४ 'तत्र' इति पा० ।

१ 'याचक' इति पा० ।

विद्याद्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसंमितम् ॥
द्व्यङ्गुलं सर्वतः सार्धं भिषङ्नयनबुद्बुदम् ॥ १० ॥
सुवृत्तं गोस्तनाकारं सर्वभूतगुणोद्भवम् ॥

तत्र सर्वेषूत्तमाङ्गस्थेषु संख्यादिभिर्वाच्येषु नयनगतरोगाभिधानं, सर्वेन्द्रियाणां मध्ये नयनस्य प्रधानत्वात्; तत्रापि नयनस्य पटलव्यधनिमित्तमन्तःप्रवेशायामविस्तारैर्मानमाकारं च दर्शयन्नाह—विद्यादित्यादि । द्व्यङ्गुलबाहुल्यमिदमन्तःप्रवेशप्रमाणं, द्व्यङ्गुलमानमाह—स्वाङ्गुष्ठोदरसंमितं; एतेनैतदुक्तं भवति—स्वाङ्गुष्ठोदरसंमितं यदङ्गुलं तदङ्गुलद्वयप्रमाणं नेत्रबुद्बुदस्यान्तःप्रवेशं विद्यात् । द्व्यङ्गुलं सार्धमित्यर्धतृतीयाङ्गुलमित्यर्थः । सर्वत इति आयामतो विस्तरतश्चेत्यर्थः । नयनबुद्बुदमक्षिगोलकः । सर्वभूतगुणोद्भवं सर्वभूतेभ्यस्तद्गुणेभ्यश्चोद्भवो यस्य तत्तथाविधं; सर्वभूतेभ्यस्तावन्नेत्रबुद्बुदं सिरास्नाय्वस्थिसहितं साश्रुमार्गं चोत्पन्नं, तद्गुणेभ्यश्च रक्तसितकृष्णगुणा उत्पन्नाः; एतेन गुणवद्भूतोत्पन्नमित्यर्थः । केचिद्गुणशब्देन भूतप्रसादं कथयन्ति; तच्च व्याख्यानं जेज्जटाय न रोचते ॥ १० ॥—

पलं भुवोऽग्नितो रक्तं वातात् कृष्णं सितं जलात् ११
आकाशादश्रुमार्गाश्च जायन्ते नेत्रबुद्बुदे ॥

येन भूतेन नेत्रबुद्बुदमारभ्यते येन च रक्तादय इति दर्शयन्नाह—पलमित्यादि । पलं मांसं, भुवः पृथिव्याः; अग्नितो रक्तमिति अग्निगुणाद्रक्तं पित्तरूपं; एवं सितं जलादित्यत्रापि व्याख्येयं; अश्रुमार्गा अश्रुस्रोतांसि ॥ ११ ॥—

दृष्टिं चात्र तथा वक्ष्ये यथा ब्रूयाद्विशारदः ॥ १२ ॥
नेत्रायामत्रिभागं तु कृष्णमण्डलमुच्यते ॥
कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः ॥१३॥

इदानीं तस्मिन्नेत्रबुद्बुदे यद्दृष्टिमण्डलं तस्य प्रमाणं पूर्वाचार्यप्रतिपादितप्रमाणानुरूपं प्रतिपादयितुमाह—दृष्टिं चेत्यादि । विशारदो विदेहः । कृष्णात् सप्तममिति कृष्णमण्डलात् सप्तमं भागं दृष्टिमिच्छन्ति । दृष्टिविशारदाः शालाकिनः । एतत् प्रमाणं परमतमप्यप्रतिषिद्धत्वादनुमतमेव । तस्य सप्तमांशस्य किं प्रमाणं स्यादिति कथनाय मसूरदलमात्रामित्यग्रे निर्देशः; अथवा शालाकिनां परमतमभिधाय मसूरदलमात्रामिति स्वमतमभिधास्यत्याचार्यः । यद्येवं तर्ह्युत्तरोपक्रमणीये 'नवमस्तारकांशो दृष्टिः' इति कथमुक्तवान् ? सत्यं, महापुरुषाणां पूर्णायुषां भिन्नविषयमभिधानमिति न दोषः, अतोऽन्यान्यपि समाधानानि पञ्जिकोक्तानि सन्ति, तानि विस्तरभयान्न लिखितानि । केचिदिमं पाठमन्यथा कृत्वाऽऽपातनिकापूर्वकं पठन्ति, स चाभावान्न लिखितः ॥ १२ ॥ १३ ॥

मण्डलानि च सन्धींश्च पटलानि च लोचने ॥
यथाक्रमं विजानीयात् पञ्च षट् च षडेव च ॥१४॥

इदानीं नयनस्य रोगाधिष्ठानकथनाय मण्डलादिसंख्यामाह—मण्डलानीत्यादि । केचिदेवं पठन्ति—'लोचने मण्डलान्यन्तान् संधींश्च पटलानि च । जानीयात् क्रमशः पञ्च चतुरः षड् षडेव च—' इति । एष पाठो निबन्धकारैर्दूषितः ॥ १४ ॥

पक्ष्मवर्त्मश्वेतकृष्णदृष्टीनां मण्डलानि तु ॥
अनुपूर्वं तु ते मध्याश्चत्वारोऽन्त्या यथोत्तरम् ॥१५॥

तान्येव पञ्चमण्डलान्याह—पक्ष्मवर्त्मेत्यादि । पक्ष्मादीनां पञ्च मण्डलानि । ते तु मण्डला अनुपूर्वं मध्याः, यथोत्तरं चान्त्याः ॥ १५ ॥

पक्ष्मवर्त्मगतः सन्धिर्वर्त्मशुक्लगतोऽपरः ॥
शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः ॥
ततः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः ॥ १६ ॥

सन्धीनाह—पक्ष्मेत्यादि । कनीनकगतो नासासमीपेऽवस्थितः, अपाङ्गगो भ्रूपुच्छान्तःस्थितः ॥ १६ ॥

द्वे वर्त्मपटले विद्याच्चत्वार्यन्यानि चाक्षिणि ॥
जायते तिमिरं येषु व्याधिः परमदारुणः ॥ १७ ॥

पटलान्याह—द्वे इत्यादि । चत्वार्यन्यानि चाक्षिणि अपराण्यपि चत्वारि पटलान्यक्षिणि विद्यात् । येषु चतुर्षु पटलेषु ॥ १७ ॥—

तेजोजलाश्रितं बाह्यं तेष्वन्यत् पिशिताश्रितम् ॥
मेदस्तृतीयं पटलमाश्रितं त्वस्थि चापरम् ॥ १८ ॥
पञ्चमांशसमं दृष्टेस्तेषां बाहुल्यमिष्यते ॥

इदानीं तान्येव तिमिरस्याश्रयभूतानि चत्वारि पटलानि चिकित्सार्थं विभजन्नाह—तेज इत्यादि । अत्र तेजःशब्देनालोचकतेजःसमाश्रयं सिरागतं रक्तं बोद्धव्यम् । जलं त्वग्गतो रसधातुः, बाह्यमक्षिगोलकस्य प्रथमं पटलं; अन्यत् द्वितीयं, बाहुल्यं स्थूलता ॥ १८ ॥—

सिराणां कण्डराणां च मेदसः कालकस्य च ॥१९॥
गुणाः कालात् परः श्लेष्मा बन्धनेऽक्ष्णोः सिरायुतः

तेषामेव धातूनां पटलाश्रयाणामुपधातूनां च कर्मतो नयनेऽस्तित्वं दर्शयन्नाह—सिराणामित्यादि । सिरादीनां कालकास्थिपर्यन्तानां परा गुणा यथोत्तरमुत्कृष्टाः प्रसादा, अक्ष्णोर्बन्धनेऽन्योन्यसंहननेऽधिकृताः । तथा कालकात् परः कालकास्थ्नः सकाशाच्छ्लेष्मा सिरायुतोऽक्ष्णोर्बन्धने पर उत्कृष्टोऽधिकृत इति पिण्डार्थः । सिराणामित्यत्र बहुवचनस्याद्यर्थवाचित्वाद्धमनीनामपि ग्रहणम् । कण्डराणामित्यत्र कण्डराशब्दः स्नायुवाचकः । अन्ये तु सिरादीनां मेदःपर्यन्तानां गुणाः प्रसादाः कालकस्याक्ष्णोः कृष्णभागस्य बन्धनेऽधिकृताः । तथा कालात् परः कृष्णभागाद्यः परः शुक्लो भागस्तस्य बन्धने सिरायुतः श्लेष्मा । केचिदेतदर्थानुकूलेनैवात्र पाठं पठन्ति,—'सिराणां कण्डराणां च

१ 'मानं कारणं च' इति पा० । २ 'अङ्गुलमानमाह—' इति पा० । ३ 'जेज्जटस्य' इति पा० ।

१ 'नासासमीपव्यवस्थितः' इति पा० । २ 'समाश्रितं' इति पा० । ३ 'कार्यत्वेन' इति पा० ।

मेदसः कृष्णबन्धने। गुणाः कालात् परः श्लेष्मा बन्धनेऽक्ष्णोः सिरायुतः'-इति ॥ १९ ॥—

सिरानुसारिभिर्दोषैर्विगुणैरूर्ध्वमागतैः ॥ २० ॥
जायन्ते नेत्रभागेषु रोगाः परमदारुणाः ॥

इदानीं नेत्ररोगाणां सामान्यां संप्राप्तिमाह—सिरानुसारिभिरित्यादि। सिरा अत्र नेत्रगताः। विगुणैः प्रकुपितैः। नेत्रभागेषु नेत्रावयवेषु। नेत्राजिष्विति केचित् पठन्ति; तत्र नेत्राण्येव राजयो नेत्रराजयः। एतेन सर्वनेत्राश्रया अपि लब्धा भवन्ति ॥ २० ॥—

तत्राविलं ससंरम्भमश्रुकण्डूपदेहवत्[१] ॥ २१ ॥
गुरूषातोदरागाद्यैर्जुष्टं[२] चाव्यक्तलक्षणैः ॥
सशूलं वर्त्मकोषेषु शूकपूर्णाभमेव च ॥ २२ ॥
विहन्यमानं रूपे वा क्रियास्वक्षि यथा पुरा ॥
दृष्ट्वैव धीमान् बुध्येत दोषेणाधिष्ठितं तु तत् ॥२३॥

पूर्वरूपमाह—तत्रेत्यादि। आविलमाकुलमश्रुपूर्णमित्यर्थः[३]। ससंरम्भमीषच्छोफयुक्तम्। उपदेहो मलवृद्धिः। गुरूषातोदरागाद्यैर्जुष्टमिति अत्रादिशब्दः प्रत्येकं योज्यः; तेन गुरुत्वादिभिः श्लेष्मलिङ्गैः, ऊषादिभिः पित्तलिङ्गैः, तोदादिभिर्वातलिङ्गैः, रागादिभिः शोणितलिङ्गैः, जुष्टं सेवितम्। ननु यदि गुरुत्वादीनि दोषलिङ्गानि सन्ति तत् कथं पूर्वरूपं? यतो दोषविशेषेणाव्यक्तं लक्षणं पूर्वरूपं; अत आह—अव्यक्तलक्षणैरिति।—गुरुत्वादीनामपि तत्र व्यक्तता नास्तीत्येवेत्यर्थः। सशूलमीषच्छूलमित्यर्थः। विहन्यमानमित्यादि। रूपे नीलपीतादौ येन प्रकारेण पूर्वमासीत्ततः स्वयमेव विहन्यमानं क्रियमाणविघातम्। क्रियासु निमेषोन्मेषादिषु चेति। अन्ये तु 'क्रियास्वक्षि यथा पुरा' इत्यत्र 'क्रियास्वक्ष्यागतक्रमम्' इति पठन्ति। तत्रागतक्रममाप्तक्रमं निर्व्यापारमित्यर्थः ॥ २१-२३ ॥

तत्र संभवमासाद्य यथादोषं भिषग्जितम् ॥
विदध्यान्नेत्रजा रोगा बलवन्तः स्युरन्यथा ॥ २४ ॥

पूर्वरूपे क्रियां निर्दिशन्नाह—तत्रेत्यादि। तत्र नयने, संभवं रोगाणां प्रागुत्पत्तिं, आसाद्य ज्ञात्वा, भिषग्जितमौषधं विदध्यात्। 'तत्र संचयमासाद्य' इति केचित् पठन्ति; तत्र संचयशब्दश्चयप्रकोपप्रसरादिषु वर्तते ॥ २४ ॥

सङ्क्षेपतः क्रियायोगो निदानपरिवर्जनम् ॥
वातादीनां प्रतीघातः प्रोक्तो विस्तरतः पुनः ॥२५॥

किं तद्भिषग्जितं पूर्वरूपे कुर्यादित्याशङ्क्य संक्षेपविस्तराभ्यां तत्र भिषग्जितमाह—संक्षेपत इत्यादि। क्रियाणां संशमनसंशोधनादीनामयमेव सम्यग्योगः। किं तदित्याह—निदानपरिवर्जनमिति।—निदानानां दोषकारकहेतूनां रोगकारकहेतूनां च सर्वतो वर्जनम्। विस्तरेण पुनर्वातादीनां प्रतीघातः क्रियायोगः प्रोक्तः। येनौषधप्रयोगेण वातादीनां कोपः प्रतिहन्यते स उपक्रम उक्त इत्यर्थः ॥ २५ ॥

उष्णाभितप्तस्य जलप्रवेशा-
द्दूरेक्षणात् स्वप्नविपर्ययाच्च ॥
प्रसक्तसंरोदनकोपशोक-
क्लेशाभिघातादतिमैथुनाच्च ॥ २६ ॥
शुक्तारनालाम्लकुलत्थमाष-
निषेवणाद्वेगविनिग्रहाच्च ॥
स्वेदादथो धूमनिषेवणाच्च
छर्देर्विघाताद्वमनातियोगात् ॥
बाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः ॥ २७ ॥

कानि तानि निदानानि यानि परिहर्तव्यानीत्याह—उष्णेत्यादि। अत्र केचित् 'एवं विदाह्यप्रतिकारिणोऽन्नं' इत्यादि यावत् 'अवाक्शिरोत्युच्छ्रितशायितस्य ज्वरोपतापाहतुपर्ययाच्च' इत्यन्तं पठन्ति[१], स च पाठः पुनरुक्तिदूषणभयान्नाङ्गीकृतः ॥ २६ ॥ २७ ॥

वाताद्दश तथा पित्तात् कफाच्चैव त्रयोदश ॥
रक्तात् षोडश विज्ञेयाः सर्वजाः पञ्चविंशतिः ॥२८॥
तथा बाह्यौ पुनर्द्वौ च रोगाः षट्सप्ततिः स्मृताः ॥

इदानीं तानेव विकारान् वातादिसंख्यया निर्दिशन्नाह—वातादित्यादि। तथा पित्तात् पित्तादपि दशैव च। बाह्यौ बहिर्निमित्तभवौ। तौ कौ? एकोऽभिघातोत्पन्नः सनिमित्तः, अन्यः सुरर्षिगन्धर्वादिदर्शनाभिहतशक्तिरनिमित्तः ॥ २८ ॥—

हताधिमन्थो निमिषो दृष्टिर्गम्भीरिका च या ॥२९॥
यच्च वातहतं वर्त्म न ते सिध्यन्ति वातजाः ॥
याप्योऽथ तन्मयः काचः साध्याः स्युः सान्यमारुताः
शुष्काक्षिपाकाधीमन्थस्यन्दमारुतपर्ययाः ॥

इदानीं तेषामेव विकाराणां वातादिभेदेन साध्यासाध्ययाप्यत्वं दर्शयन्नाह—हतेत्यादि। तन्मयः वातमयः। साध्याः स्युः सान्यमारुता इति हताधिमन्थादयश्चत्वारो वातजा असाध्याः, एकश्च याप्यः, शुष्काक्षिपाकादयो रोगाः सान्यमारुता अन्यतोवातरोगेण सहिताः पञ्च साध्याः ॥ २९ ॥ ३० ॥—

असाध्यो ह्रस्वजाड्यो यो जलस्रावश्च पैत्तिकः ॥३१॥
परिम्लायी च नीलश्च याप्यः काचोऽथ तन्मयः ॥
अभिष्यन्दोऽधिमन्थोऽम्लाध्युषितं शुक्तिका च या
दृष्टिः पित्तविदग्धा च धूमदर्शी च सिध्यति ॥

असाध्य इत्यादि। पित्तसंभवौ द्वौ ह्रस्वजाड्यजलस्रावौ साधयितुमशक्यौ, तथा पैत्तिकौ परिम्लायीनीलाख्यौ काचौ यापनार्हौ, अभिष्यन्दादयः षट् साध्याः ॥ ३१ ॥ ३२ ॥—

---

१ '०मश्रुपूर्णोपदेहवत्' इति पा०। २ 'गुरूषाचोपरागाद्यैः' इति पा०। ३ 'मण्डपूर्णमित्येत्यर्थः' इति पा०।

१ 'विदाह्यसात्म्यातिविरुद्धशीतक्षाराम्लतीक्ष्णोष्णगुरुद्रवान्नैः' इत्यादि यावत् 'एवं विदाह्यप्रतिकारिणोऽन्नं विदग्धमप्युद्गिरतो नरस्य। बाष्पग्रहात्सूक्ष्मनिरीक्षणाच नेत्रे विकारान् जनयन्ति दोषाः' इति पठन्ति' इति पा०।

असाध्यः कफजः स्रावो याप्यः काचश्च तन्मयः ३३
अभिष्यन्दोऽधिमन्थश्च बलासग्रथितं च यत् ॥
दृष्टिः श्लेष्मविदग्धा च पोथक्यो लगणश्च यः ॥३४॥
क्रिमिग्रन्थिपरिक्लिन्नवर्त्मशुक्लार्मपिष्टकाः ॥[1]
श्लेष्मोपनाहः साध्यास्तु कथिताः श्लेष्मजेषु तु ३५

असाध्य इत्यादि । तन्मयः श्लेष्मज इत्यर्थः । कफजेष्वेक एवासाध्यः, याप्योऽप्येक एव, अभिष्यन्दादयश्चैकादश साध्याः ॥ ३३-३५ ॥

रक्तस्रावोऽजकाजातं शोणितार्शोव्रणान्वितम् ॥[2]
शुक्रं न साध्यं काचश्च याप्यस्तज्ज्ञः प्रकीर्तितः॥३६॥
मन्थस्यन्दौ क्लिष्टवर्त्म हर्षोत्पातौ तथैव च ॥[3]
सिराजाताऽञ्जनाख्या च सिराजालं च यत् स्मृतम्
पर्वण्यथाव्रणं शुक्रं शोणितार्मार्जुनश्च यः ॥
एते साध्या विकारेषु रक्तजेषु भवन्ति हि ॥ ३८ ॥

रक्तस्राव इत्यादि । रक्तस्रावस्तथाऽजका शोणितार्शः क्षतशुक्रकं च रक्ताज्जातं चतुष्टयमप्यसाध्यं, तज्जो रक्तजः काचो याप्यः, मन्थस्यन्दादय एकादश साध्याः ॥ ३६-३८ ॥

पूयास्रावो नाकुलान्ध्यमक्षिपाकात्ययोऽलजी ॥
असाध्याः सर्वजा याप्यः काचः कोपश्च पक्ष्मणः३९
वर्त्मावबन्धो यो व्याधिः सिरासु पिडका च या ॥
प्रस्तार्यर्माधिमांसार्म स्नाय्वर्मोत्सङ्गिनी च या ॥४०॥
पूयालसश्चार्बुदं च श्यावकर्दमवर्त्मनी ॥
तथाऽर्शोवर्त्म शुष्कार्शः शर्करावर्त्म यच्च वै ॥४१॥
सशोफश्चाप्यशोफश्च पाको बहलवर्त्म च ॥
अक्लिन्नवर्त्म कुम्भीका विसवर्त्म च सिध्यति ॥४२॥

पूयेत्यादि । पूयास्रवादयश्चत्वारोऽसाध्याः, काचपक्ष्मकोपौ याप्यौ, वर्त्मावबन्धादय एकोनविंशतिः साध्याः । केचित्तु 'काचः कोपश्च पक्ष्मण' इत्यत्र 'याप्यो वर्त्मावबन्धश्च काचः कोपश्च पक्ष्मणः । पिल्लाख्यश्चापि यो व्याधिः सिरासु पिडका च या' इति पठन्ति । स च पाठः पञ्जिकया निरस्तः, तस्मादस्माभिरपि परित्यक्तः ॥ ३९-४२ ॥

सनिमित्तोऽनिमित्तश्च द्वावसाध्यौ तु बाह्यजौ ॥

सनिमित्त इत्यादि । तौ द्वावपि सन्निपातनिमित्तौ विवृतौ ॥

षट्सप्ततिर्विकाराणामेषा संग्रहकीर्तिता ॥ ४३ ॥[4]

षडित्यादि । संक्षेपेण कथिता, अथवा संग्रहेण सम्यक् दोषग्रहेण कथिता ॥ ४३ ॥

नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः ॥
शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः ॥ ४४ ॥
सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु ॥
बाह्यजौ द्वौ समाख्यातौ रोगौ परमदारुणौ ॥
भूय एतान् प्रवक्ष्यामि सङ्ख्यारूपचिकित्सितैः ॥४५॥

१ 'क्रिमिग्रन्थिः परिक्लिन्नवर्त्म शुक्लार्म पिष्टकः' इति पा० । २ 'ऽवलम्बितम्' इति पा० । ३ 'क्लिन्नवर्त्म' इति पा० । ४ 'संग्रहकीर्तना' इति पा० ।

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे औपद्रविको नाम प्रथमोऽध्यायः ॥ १ ॥

इदानीं तेषां दोषविशेषेण संग्रहं प्रतिपाद्य सन्ध्याद्याश्रयभेदेनापि संग्रहं प्रतिपादयन्नाह—नवेत्यादि । द्वौ बाह्यजौ सर्वाश्रयत्वेऽपि दृष्ट्याश्रितौ मन्तव्यौ, दृष्टेः प्रधानतमत्वात् ॥ ४४ ॥ ४५ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

अथातः सन्धिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

पूर्वस्मिन्नध्याये सन्ध्यादिक्रमेण नयनगतरोगा अभिहिताः, अत औपद्रविकानन्तरं प्राक् सन्धिगता रोगाः प्रतिपाद्या भवन्तीत्यत आह—अथात इत्यादि । गतशब्द आश्रयवचनः ॥ १ ॥ २ ॥

पूयालसः सोपनाहः स्रावाः पर्वणिकाऽलजी ॥
क्रिमिग्रन्थिश्च विज्ञेया रोगाः सन्धिगता नव ॥ ३ ॥

स्रावाश्चत्वारः पूयास्राव इत्यादयः ॥ ३ ॥

पक्वः शोफः सन्धिजः संस्रवेद्यः
सान्द्रं पूयं पूति पूयालसः सः ॥

इदानीं तेषां नवानामपि प्रत्येकं लक्षणमाह—पक्व इत्यादि । सन्धिजः कनीनसन्धिजः । पूति दुर्गन्धम् । अयं सन्निपातजः साध्यश्च ॥—

ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकः
कण्डूप्रायो नीरुजस्तूपनाहः ॥ ४ ॥

ग्रन्थिरित्यादि । नाल्पो महानित्यर्थः । अपाक ईषत्पाकः । उपनाहः श्लेष्मोपनाहः । कफजोऽयं साध्यश्च ॥ ४ ॥

गत्वा सन्धीनश्रुमार्गेण दोषाः
कुर्युः स्रावान् रुग्विहीनान् कनीनात् ।
तान् वै स्रावान् नेत्रनाडीमथैके
तस्या लिङ्गं कीर्तयिष्ये चतुर्धा ॥ ५ ॥
पाकः सन्धौ संस्रवेद्यश्च पूयं
पूयास्रावो नैकरूपः प्रदिष्टः
श्वेतं सान्द्रं पिच्छिलं संस्रवेद्यः
श्लेष्मास्रावो नीरुजः स प्रदिष्टः ॥ ६ ॥
रक्तास्रावः शोणितोत्थः सरक्त-
मुष्णं नाल्पं संस्रवेन्नातिसान्द्रम् ॥
पीताभासं नीलमुष्णं जलाभं
पित्तास्रावः संस्रवेत् सन्धिमध्यात् ॥ ७ ॥

१ 'तौ' इति पा० ।

सन्धयो नेत्रान्तर्गताश्चत्वारः । अश्रुमार्गशब्देनात्र सिरा अभिप्रेताः । तथाच विदेहः,—"अश्रुस्रावः सिरा गत्वा नेत्रसन्धिषु तिष्ठति । ततः कनीनकं गत्वा चाश्रु कृत्वा कनीनके ॥ ततः स्रवत्यथास्रावं यथादोषमवेदनम्"—इति । अश्रुस्रावशब्देनात्र तत्सहितो दोषोऽभिधीयते । कथं चतुर्धेत्याह—पाक इत्यादि ।—नैकरूप इति अस्य सन्निपातजत्वाद्बहुरूपत्वम् । सन्धिरत्र कनीनकसन्धिः । असाध्योऽयम् । श्वेत इत्यादि ।—अयमप्यसाध्यः । रक्तेत्यादि ।—असावप्यसाध्यः । पीतेत्यादि ।—कनीनकसन्धिमध्यादित्यर्थः । व्याधिस्वभावतो वातास्रावो नास्ति, पित्तजगलगण्डचातुर्थिकवत् । एषोऽप्यसाध्यः ॥५–७॥

ताम्रा तन्वी दाहशूलोपपन्ना
रक्ताज्ज्ञेया पर्वणी वृत्तशोफा ॥
जाता सन्धौ कृष्णशुक्लेऽलजी स्या-
त्तस्मिन्नेव ख्यापिता पूर्वलिङ्गैः ॥ ८ ॥

ताम्रेत्यादि । असाध्योऽयम् । अलजीत्यादि । तस्मिन्नेव कृष्णशुक्लसन्धावेव । पूर्वलिङ्गैः पर्वणीलिङ्गैरित्यर्थः । पर्वण्यलज्योः स्थानस्य लक्षणस्य चैक्येऽपि तनुत्वस्थूलत्वाभ्यां भेदः । तन्वी पर्वणी, ततः स्थूला पुनरलजी । इयं सन्निपातजा असाध्या च ॥ ८ ॥

क्रिमिग्रन्थिर्वर्त्मनः पक्ष्मणश्च
कण्डूं कुर्युः क्रिमयः सन्धिजाताः ॥
नानारूपा वर्त्मशुक्लस्य सन्धौ
चरन्तोऽन्तर्नयनं दूषयन्ति ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे संधिगतरोगविज्ञानीयो नाम द्वितीयोऽध्यायः ॥ २ ॥

कृमीत्यादि । कृमिग्रन्थिर्वर्त्मशुक्लयोः सन्धौ भवति । तत्रैव नानारूपाः कृमयो वर्त्मनः पक्ष्मणश्च सन्धिं प्राप्ताः कण्डूं जनयन्ति, अन्तश्चरन्तो भक्षयन्तो नयनं दूषयन्ति । असौ कफजः साध्यश्च ॥ ९ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

अथातो वर्त्मगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

सन्धिगतरोगानन्तरं 'वर्त्मशुक्लस्य सन्धौ चरन्तोऽन्तर्नयनं दूषयन्ति' इति वर्त्मनोऽनन्तरनिर्दिष्टत्वाद्वर्त्मगतरोगविज्ञानीयारम्भो युक्त इत्यत आह—अथात इत्यादि ॥ १ ॥ २ ॥

पृथग्दोषाः समस्ता वा यदा वर्त्मव्यपाश्रयाः ॥
सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः ॥३॥

१ 'तस्य' इति पा० । २ 'वर्त्मशुक्लान्तसन्धौ' इति पा० ।

विवर्ध्य मांसं रक्तं च तदा वर्त्मव्यपाश्रयान् ॥
विकाराञ्जनयन्त्याशु नामतस्तान्निबोधत ॥ ४ ॥

संप्राप्तिमाह—पृथगित्यादि । यदा पृथक् समस्ता वा अधिकमूर्च्छिता अतिशयप्रकुपिता दोषा वर्त्मव्यपाश्रयाः अपशब्दस्योपसर्गस्य मध्यवचनत्वाद्वर्त्ममध्यगताः सिरा व्याप्य वर्त्मस्ववतिष्ठन्ते, तदा वर्त्मव्यपाश्रयान् विकारान् शीघ्रं जनयन्तीति संबन्धः । अमुं पाठं पञ्जिकाकारो न पठति, जेज्जटपठितत्वादस्माभिरपि पठितः ॥ ३ ॥ ४ ॥

उत्सङ्गिन्यथ कुम्भीका पोथक्यो वर्त्मशर्करा ॥
तथाऽर्शोवर्त्म शुष्कार्शस्तथैवाञ्जननामिका ॥ ५ ॥
वहलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः ॥
क्लिष्टकर्दमवर्त्माख्यौ श्याववर्त्म तथैव च ॥ ६ ॥
प्रक्लिन्नमपरिक्लिन्नं वर्त्म वातहतं तु यत् ॥
अर्बुदं निमिषश्चापि शोणितार्शश्च यत् स्मृतम् ॥७॥
लगणो बिसनामा च पक्ष्मकोपस्तथैव च ॥
एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः ॥ ८ ॥
नामभिस्ते समुद्दिष्टा

ते च वर्त्माश्रया रोगा एकविंशतिरभिहिताः, अतस्तानेव नाम्ना निर्दिशन्नाह—उत्सङ्गिनीत्यादि ॥ ५–८ ॥—

लक्षणैस्तान् प्रचक्ष्महे ॥
अभ्यन्तरमुखी बाह्योत्सङ्गेऽधो वर्त्मनश्च या ॥ ९ ॥
विज्ञेयोत्सङ्गिनी नाम तद्रूपपिडकाचिता ॥

नामतस्तान् समुद्दिश्य लक्षणैराह—लक्षणैरित्यादि । अभ्यन्तरमुखी वर्त्माभ्यन्तरमुखी । बाह्येति बहिर्भवा इव प्रतिभासते, वास्तूत्सेधेन बहिरप्युन्नतत्वात् । उत्सङ्गेऽधो वर्त्मनश्च येति अधोभागे यद्वर्त्म तस्योत्सङ्गे क्रोडे जाता या, तस्या इव रूपं यासां, तद्रूपाभिर्व्याप्ता; इयं सन्निपातजा साध्या च । विदेहोक्तमिहानुक्तं काठिन्यादि चोह्यम् । तथाहि तदुक्तं वचः,–"वर्त्मोत्सङ्गेऽप्यधो जन्तोः सन्निपातात् प्रजायते । अभ्यन्तरमुखी स्थूला बाह्यतश्चापि दृश्यते ॥ पिडका पिडकाभिश्च चिताऽन्याभिः समन्ततः । उत्सङ्गपिडका नाम कठिना मन्दवेदना ॥ सा प्रभिन्ना स्रवेत् स्रावं कुक्कुटाण्डरसोपमम्"—इति ॥९॥—

कुम्भीकबीजप्रतिमाः पिडका यास्तु वर्त्मजाः ॥१०॥
आध्मापयन्ति भिन्ना याः कुम्भीकपिडकास्तु ताः ॥

कुम्भीका दाडिमाकारफला स्थलकुम्भी । वर्त्मजा इति बहुवचनाद् बाह्या एव भवन्ति । एताः सन्निपातजा अपि साध्याः ॥ १० ॥—

स्राविण्यः कण्डुरा गुर्व्यो रक्तसर्षपसन्निभाः ॥
पिडकाश्च रुजावत्यः पोथक्य इति संज्ञिताः ॥११॥

१ 'विबध्य' इति पा० । २ 'पिडकाऽभ्यन्तरमुखी बाह्याऽधोवर्त्मसंश्रया' इति पा० । ३ 'बाह्योत्सेधेन' इति पा० । ४ 'ऽधरे' इति पा० । ५ 'पिडकाः पक्ष्मवर्त्मनोः' इति पा० । ६ 'आध्मायन्ते तु भिन्नाश्च' इति पा० । ७ 'कण्डूस्रावान्विता' इति पा० ।

स्राविण्य इत्यादि । स्राविण्यो बहुस्रावाः । कण्डुरा इति कण्डुयुक्ताः । रुजावत्य इति कफजा अपि वेदनायुक्ता इत्यर्थः । इमाः साध्याः ॥ ११ ॥

पिडकाभिः सुसूक्ष्माभिर्घनाभिरभिसंवृता ॥
पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा ॥१२॥

पिडकाभिरित्यादि । इयं सन्निपातजा साध्या च ॥ १२ ॥

एर्वारुबीजप्रतिमाः पिडका मन्दवेदनाः ॥
सूक्ष्माः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते ॥१३॥

एर्वार्वित्यादि । एर्वारुः ग्रीष्मकर्कटी । वर्त्मस्था वर्त्मनामन्तर्बाह्यतोऽपि तिष्ठति । इदं सन्निपातजमपि साध्यम् ॥ १३ ॥

दीर्घोऽङ्कुरः खरः स्तब्धो दारुणो वर्त्मसंभवः ॥
व्याधिरेष समाख्यातः शुष्कार्श इति संज्ञितः ॥१४॥

दीर्घ इत्यादि । दारुणोऽतिकष्टतरः । वर्त्मसंभवो वर्त्मनामन्तरेव भवति । अयं व्याधिः सन्निपातजोऽपि साध्यः ॥ १४ ॥

दाहतोदवती ताम्रा पिडका वर्त्मसंभवा ॥
मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननामिका ॥१५॥

दाहेत्यादि । रक्तजेयं साध्या च ॥ १५ ॥

वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः ॥
सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म तत् ॥ १६ ॥

वर्त्मेत्यादि । एतदपि सन्निपातजं साध्यं च ॥ १६ ॥

कण्डूमताऽल्पतोदेन वर्त्मशोफेन यो नरः ॥
न समं छादयेदक्षि भवेद्बन्धः स वर्त्मनः ॥ १७ ॥

कण्डूमतेत्यादि । एष सन्निपातजोऽपि साध्यः ॥ १७ ॥

मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च ॥
अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्म तदादिशेत् ॥ १८ ॥

मृद्वित्यादि । 'अकस्माच्च स्रवेद्रक्तं' इति क्वचित् पाठः, तं च पञ्जिकाकारो न मन्यते । अकस्माच्च कारणं विना द्वयमपि वर्त्म रक्तं भवेत् । तथाच विदेहः,—"श्लेष्मदुष्टेन रक्तेन क्लिष्टमांसमिवोभयम् । बन्धुजीवनिभं वर्त्म क्लिष्टवर्त्म तदुच्यते"—इति । एतद्रक्तजं साध्यं च ॥ १८ ॥

क्लिष्टं पुनः पित्तयुतं विदहेच्छोणितं यदा ॥
तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमः ॥ १९ ॥

क्लिष्टमित्यादि । यदा क्लिष्टारम्भकं श्लेष्मदुष्टं शोणितं पित्तयुक्तं विदहेत् विदाहं गच्छेत्तदा क्लिन्नत्वमापन्नं क्लिष्टमेव वर्त्मकर्दम उच्यते, क्लिन्नत्वमापन्नमार्द्रतां प्राप्तम् । एतत् कफपित्तरक्तारब्धत्वात् सन्निपातजं साध्यं च । 'कृष्णत्वमापन्नम्' इति केचित् पठन्ति, तं पाठं पञ्जिकाकारो नाङ्गीकरोति ॥ १९ ॥

यद्वर्त्म बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम् ॥
दाहकण्डूपरिक्लेदि श्याववर्त्मेति तन्मतम् ॥ २० ॥

यद्वर्त्मेत्यादि । एतदपि सन्निपातजं साध्यं च ॥ २० ॥

अरुजं बाह्यतः शूनमन्तः क्लिन्नं स्रवत्यपि ॥
कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म तदुच्यते ॥ २१ ॥

अरुजमित्यादि । अरुजमल्परुजं शूनं च बाह्ये, क्लिन्नं स्रवत्यप्यन्तरेव, कण्डूनिस्तोदबहुलं पुनरन्तरेव । अयं रोगः पिल्लाख्यः केनचित् कथितः, तत् पञ्जिकाकारो न मन्यते । अयं व्याधिः कफजः साध्यश्च ॥ २१ ॥

यस्य धौतानि धौतानि संबध्यन्ते पुनः पुनः ॥
वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्म तत् ॥ २२ ॥

यस्येत्यादि । यस्य रोगस्य स्थानभूतानि वर्त्मान्यसकृत्प्रक्षालितानि पुनः संबद्धानि भवन्ति पिल्लोपदेहेनान्तर्बहिश्च पाकरहितान्यपि, तदक्लिन्नवर्त्म जानीयात् । एतत् सन्निपातजमपि साध्यं पिल्लाख्यं च । तथाच विदेहः,—"प्रक्षालिते तथा मृष्टे आनह्यते पुनः पुनः । अपरिक्लिन्नवर्त्मानं पिल्लाख्यमिति निर्दिशेत्"—इति । अमुं द्वयमपि दृष्टान्तदार्ष्टान्तिकपाठं सूत्रे जेज्जटाचार्यः पठति, तन्नेच्छति गयदासः ॥ २२ ॥

विमुक्तसन्धि निश्चेष्टं वर्त्म यस्य न मील्यते ॥
एतद्वातहतं विद्यात् सरुजं यदि वाऽरुजम् ॥ २३ ॥

विमुक्तेत्यादि । निश्चेष्टं निष्क्रियम् । अत एव न निमील्यते न संकुचतीत्यर्थः । अरुजमल्परुजम् । इदं वातजमसाध्यं च ॥ २३ ॥

वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम् ॥
विज्ञेयमर्बुदं पुंसां सरक्तमवलम्बितम् ॥ २४ ॥

वर्त्मेत्यादि । वर्त्मान्तरस्थमभ्यन्तरस्थमित्यर्थः । विषमं कष्टकारि । ग्रन्थिभूतं ग्रन्थिरिव । सरक्तमवलम्बितमिति किञ्चिद्रक्तता पित्तेन, अवलम्बितत्वमर्बुदत्वेन । अवलम्बि चेति केचित् पठन्ति । सन्निपातजमपीदं साध्यम् ॥ २४ ॥

निमेषणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयाः ॥
चालयत्यति वर्त्मानि निमेषः स गदो मतः ॥ २५ ॥

निमेषणीरित्यादि । वर्त्मसंश्रयाः निमेषिणीः सिरा वायुः प्रविष्टः सन् वर्त्मानि चालयतीति संबन्धः । यद्बलेन निमेषोन्मेषौ स्यातां ता निमेषिण्यः सिराः । 'सोऽगदो मत' इति केचित् पठन्ति, तत्रागद अव्यथ इत्यर्थः । असौ वातजोऽसाध्यश्च ॥ २५ ॥

छिन्नाश्छिन्ना विवर्धन्ते वर्त्मस्था मृदवोऽङ्कुराः ॥
दाहकण्डूरुजोपेतास्तेऽर्शः शोणितसंभवाः ॥ २६ ॥

छिन्ना इत्यादि । ये शोणितसंभवा मृदवो वर्त्मस्था अङ्कुराश्छिन्नाश्छिन्नाः सन्तो विवर्धन्ते तेऽङ्कुरा अर्शः शोणितार्श इति संबन्धः । इदं शोणितार्शो रक्तजमसाध्यं च ॥ २६ ॥

---

१ 'एर्वारुबीजप्रतिमा पिडका मन्दवेदना । सूक्ष्मा खरा च वर्त्मस्था तदर्शोवर्त्म कीर्त्यते' इति पा० । २ 'सकण्डूषापरिक्लेदं' इति पा० ।

१ 'पाकरहितत्वात्' इति पा० । २ 'ऽथवा' इति पा० । ३ 'ग्रन्थिरिवासक्तं' इति पा० । ४ 'चालयेदक्षिवर्त्मानि' इति, 'चालयेदतिवर्त्मानि' इति च पा० । ५ 'शोणितसंभवम्' इति पा० । ६ 'शोणितार्शः इति संबन्धः' इति पा० ।

अपाकः कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः ॥
सकण्डूः पिच्छिलः कोलप्रमाणो लगणस्तु सः ॥२७

अपाक इत्यादि । श्लेष्मजोऽयं साध्यश्च ॥ २७ ॥

शूनं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम् ॥
बिसमन्तर्जल इव बिसवर्त्मेति तन्मतम् ॥ २८ ॥

शूनमित्यादि । यथाऽन्तर्जले बिसं बिशाण्डं तद्वदित्यर्थः । एतत् सर्वजमपि साध्यम् ॥ २८ ॥

दोषाः पक्ष्माशयगतास्तीक्ष्णाग्राणि खराणि च ॥
निर्वर्तयन्ति पक्ष्माणि तैर्घृष्टं चाक्षि दूयते ॥ २९ ॥
उद्धृतैरुद्धृतैः शान्तिः पक्ष्मभिश्चोपजायते ॥
वातातपानलद्वेषी पक्ष्मकोपः स उच्यते ॥ ३० ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे वर्त्मगतरोगविज्ञानीयो नाम तृतीयोऽध्यायः ॥ ३ ॥

दोषा इत्यादि । निर्वर्तयन्ति निष्पादयन्ति । पक्ष्माणि प्रतिबालान् । तैः पक्ष्मभिरक्षि लोचनं दूयते उपतप्यते । उद्धृतैरुद्धृतैरिति उन्मूलितैरुन्मूलितैरित्यर्थः; अत्र वीप्सया तेषां पुनः पुनरुद्भवः ख्याप्यते । अस्य पक्ष्मकोपस्य 'उपपक्ष्ममाला' इति अनुक्ता द्वितीया संज्ञा; लोके 'परिवाल' इति वदन्ति । एष रोगः सर्वजो याप्यश्च ॥ २९ ॥ ३० ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

चतुर्थोऽध्यायः ।

अथातः शुक्लगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

वर्त्मगतरोगविज्ञानीयानन्तरं वर्त्ममण्डलाच्छुक्लमण्डलस्यानन्तर्यात्तद्गतरोगविज्ञानीयारम्भो युक्त इत्यत आह—अथात इत्यादि ॥ १ ॥ २ ॥

प्रस्तारिशुक्लक्षतजाधिमांस-
स्नाय्वर्मसंज्ञाः खलु पञ्च रोगाः ॥
स्युः शुक्तिका चार्जुनपिष्टकौ च
जालं सिराणां पिडकाश्च याः स्युः ॥ ३ ॥
रोगा बलासग्रथितेन सार्धमेकादशाक्ष्णोः खलु शुक्लभागे ॥

तानेव रोगान्नामभिराह—प्रस्तारीत्यादि । अर्मशब्दः प्रस्तार्यादिभिः पञ्चभिः सह संबध्यते । जालं सिराणामिति सिराशब्दो जालपिडकाभ्यां संबध्यते; तेन सिराजालं, सिरापिडकाश्चेत्यर्थः ॥ ३ ॥—

प्रस्तारि प्रथितमिहार्म शुक्लभागे
विस्तीर्णं तनु रुधिरप्रभं सनीलम् ॥ ४ ॥

प्रस्तारीत्यादि । प्रथितं प्रख्यातं, विस्तीर्णं विततं, तनु विरलं, रुधिरप्रभं रक्तनिभं, सनीलमीषन्नीलं, एतेनेषन्नीललोहितमित्यर्थः । जेजटाचार्यस्तु विदेहोक्तं प्रस्तार्यर्मलक्षणं दृष्ट्वा सनीलमित्यत्र वाशब्दो लुप्तो द्रष्टव्यः, तेन रक्तमीषन्नीलं वेत्यर्थं इति प्रतिपादयति । तथा च विदेहवाक्यं,—"समन्ताद्विस्तृतः श्यावो रक्तो वा मांससंचयः । सन्निपातेन दोषाणां प्रस्तार्यर्म तदुच्यते"—इति । त्रिदोषजमिदं साध्यं च ॥ ४ ॥

शुक्लाख्यं मृदु कथयन्ति शुक्लभागे
सश्वेतं सममिह वर्धते चिरेण ॥

शुक्लाख्यमित्यादि । शुक्लाख्यं शुक्लनामार्म । मृदु कोमलं, सश्वेतं किञ्चिच्छ्वेतं; श्लेष्मजमिदं साध्यं च ॥—

यन्मांसं प्रचयमुपैति शुक्लभागे
पद्माभं तदुपदिशन्ति लोहितार्म ॥ ५ ॥

यदित्यादि । प्रचयं वृद्धिं, उपैति गच्छति, पद्माभमरुणपद्मप्रभं, लोहितार्म शोणितार्मेत्यर्थः । एतद्रक्तजं साध्यं च ॥ ५ ॥

विस्तीर्णं मृदु बहलं यकृत्प्रकाशं
श्यावं वा तदधिकमांसजार्म विद्यात् ॥

विस्तीर्णमिति । बहलं स्थूलम् । एतत् सन्निपातजं साध्यं च ॥

शुक्ले यत् पिशितमुपैति वृद्धिमेतत्
स्नाय्वर्मेत्यभिपठितं खरं प्रपाण्डु ॥ ६ ॥

शुक्ले इत्यादि । एतत्त्रिदोषजमपि साध्यम् । खरं खरस्पर्शम् । 'स्नाय्वाभं पिशितांशमुपैति यत्तु स्नाय्वर्म' इत्यपि पाठः । 'खरं च शुक्लं' इति केचित् पठन्ति ॥ ६ ॥

श्यावाः स्युः पिशितनिभाश्च बिन्दवो ये
शुक्त्याभाः सितनयने स शुक्तिसंज्ञः ॥

श्यावा इत्यादि । शुक्त्याभा इति जलशुक्तिरिव किञ्चिद्दीर्घाः शुक्लमण्डले ये बिन्दवः स शुक्तिकाविकार इति संबन्धः । साध्योऽयं पित्तजश्च ॥—

एको यः शशरुधिरोपमस्तु बिन्दुः
शुक्लस्थो भवति तमर्जुनं वदन्ति ॥ ७ ॥

एक इत्यादि । रक्तजोऽयं साध्यश्च ॥ ७ ॥

उत्सन्नः सलिलनिभोऽथ पिष्टशुक्लो
बिन्दुर्यो भवति स पिष्टकः सुवृत्तः ॥

उत्सन्न इत्यादि । पिष्टशुक्लः तण्डुलपिष्टवच्छुक्लः, शुक्लत्वेऽप्यच्छत्वात् सलिलनिभः, पिष्टकः पिष्टकनामा । अयं श्लेष्मिकः साध्यश्च ॥—

जालाभः कठिनसिरो महान् सरक्तः
सन्तानः स्मृत इह जालसंज्ञितस्तु ॥ ८ ॥

जालाभ इत्यादि । अनुलोमविलोमविस्तृतसिरानिचयविरचितत्वाज्जालस्येव आभा यस्य स तथा । रक्तो लोहितो लोहित-

१ 'तैर्जुष्टं' इति पा० । २ 'उत्पाटितैः पुनः' इति पा० ।

१ 'सममभिवर्धते' इति पा० । २ 'साध्येयं रक्तजा च' इति पा० ।

जनितश्च, सन्तानः सिरासन्तानः । एष सिराजालसंज्ञितो रक्तजः साध्यश्च ॥ ८ ॥.

शुक्लस्थाः सितपिडकाः सिरावृता या-
स्ता विद्यादसितसमीपजाः सिराजाः ॥

शुक्लस्था इत्यादि । सिराजाः 'पिडका' इति शेषः । वास्तु-स्थितसिरावृतत्वात् सिराजाः, न तु साक्षात् सिराजाः । एष सन्निपातजः साध्यश्च ॥—

कांस्याभो भवति सितेऽम्बुबिन्दुतुल्यः
स ज्ञेयोऽमृदुररुजो बलासकाख्यः ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे शुक्लगतरोग-
विज्ञानीयो नाम चतुर्थोऽध्यायः ॥ ४ ॥

कांस्याभ इत्यादि । कांस्यस्येव आभा यस्य स तथा, सित इत्यर्थः । अम्बुबिन्दुतुल्यः वारिबिन्दुरिवोद्गतत्वात् । अमृदुः कठिनः । अरुजः अव्यथः । एतद्द्वयमपि कफजनितत्वात् नामान्वयेन बलासनामा विकारो बलासज एव । अत्रैव विदेहः,—"मारुतोत्पीडितः श्लेष्मा शुक्लभागे व्यवस्थितः । जलबिन्दुरिवोच्छूनो मृदुः कफसमुद्भवः"—इति । पुस्तकान्तरे चान्यथा पाठः, यथा—'सन्तानो भवति सिरावृतः सिते यो बिन्दुर्वा स तु निरुजो बलासकाख्यः'—इति । ईदृशस्य पाठस्य टीकाकारा व्याख्यां न कुर्वन्ति । साध्योऽयं श्लेष्मजश्च ॥ ९ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुत-व्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ।

अथातः कृष्णगतरोगविज्ञानीयमध्यायं व्याख्या-स्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

शुक्लगतरोगविज्ञानीयानन्तरं प्रत्यासत्त्या कृष्णमण्डलगता रोगाः प्रतिपाद्या इत्यत आह—अथात इत्यादि ॥ १ ॥ २ ॥

यत् सव्रणं शुक्र(क्र)मथाव्रणं वा
पाकात्ययश्चाप्यजका तथैव ॥
चत्वार एतेऽभिहिता विकाराः
कृष्णाश्रयाः संग्रहतः पुरस्तात् ॥ ३ ॥

तानेव कृष्णगतरोगान्नामभिः प्राह—यदित्यादि । संख्येयनि-र्देशादेव चतुःसंख्यायां लब्धायां चतुःसंख्याकरणं तन्त्रान्तरोद्दि-ष्टातिरिक्तसंख्यानिरासार्थम् । संग्रहतः सम्यगुपादानतः ॥ ३ ॥

निमग्नरूपं हि भवेत्तु कृष्णे
सूच्येव विद्धं प्रतिभाति यद्वै[३] ॥

स्रावं स्रवेदुष्णमतीव रुक् च
तत् सव्रणं शुक्र(क्र)मुदाहरन्ति ॥ ४ ॥

तानेव लक्षणैर्निर्दिशन्नाह—निमग्नेत्यादि । निमग्नरूपमन्तः-प्रविष्टरूपमीषद्दृश्यरूपमित्यर्थः । सूच्येव विद्धमित्यनेन वर्तुलत्वं दर्शितं, रक्तस्याग्नेयत्वादुष्णाश्रुता अत्यर्थं च पीडा भवति । अव्र-णशुक्रे मन्दरुगश्रुता वक्ष्यते, तस्मादस्मिन् सक्षते शुक्रे क्षतयो-गान्नेत्रस्य सुकुमारत्वाच्चातीव वेदना युक्ता । अत्र विदेहः— "रक्तराजीनिभं कृष्णे विद्रुमाभं प्रलक्ष्यते । सूच्यग्रेणेव तच्छु-क्रमुष्णाश्रुस्रावि सव्रणम्—" इति । सव्रणं सक्षतमित्यर्थः । रक्त-जमिदमसाध्यं च ॥ ४ ॥

दृष्टेः समीपे न भवेत्तु यच्च
न चावगाढं न च संस्रवेद्धि ॥
अवेदनावन्न च युग्मशुक्रं
तत्सिद्धिमाप्नोति कदाचिदेव ॥ ५ ॥

इदानीं तस्यैवावस्थाद्वारेण कादाचित्कं साध्यत्वं दर्शयन्नाह— दृष्टेरित्यादि । संस्रवेद्धीत्यत्र संशब्दोऽतिशयार्थः । अवेदनावत् मन्दवेदनम् ॥ ५ ॥

विच्छिन्नमध्यं पिशितावृतं वा
चलं सिरासक्तमदृष्टिकृच्च[१] ॥
द्वित्वग्गतं लोहितमन्ततश्च
चिरोत्थितं चापि विवर्जनीयम् ॥ ६ ॥
उष्णाश्रुपातः पिडका च कृष्णे
यस्मिन् भवेन्मुद्गनिभं च शुक्रम् ॥
तदप्यसाध्यं प्रवदन्ति केचि-
दन्यच्च यत्तित्तिरिपक्षतुल्यम् ॥ ७ ॥

तस्यैव कदाचित्साध्यस्य लक्षणं प्रतिपाद्यासाध्यस्य लक्षणं प्रतिपादयन्नाह—विच्छिन्नेत्यादि । विच्छिन्नमध्यमिति विदीर्ण-मांसत्वान्मध्ये सच्छिद्रमिव । पक्षान्तरमाह—पिशितावृतं वेति; आच्छिन्नमध्यमेवोन्नतमांसेन वेष्टितं वा । चलं सिरासक्तमिति यतः सिरासक्तमत एव चलं, सिरा हि स्वभावत एव चलाः, तदाश्रितं शुक्रमपि चलमेव; अन्ये तु चलं चलदिव न तु साक्षाच्चलमेव । अदृष्टिकृत् दर्शनरोधकृत् । द्वित्वग्गतं द्विप-टलाश्रितम् । लोहितमन्ततश्चेति प्रान्तेषु लोहितमित्यर्थः । इदानीं द्विपटलाश्रितस्य लक्षणं दर्शयन्नाह—उष्णेत्यादि । कस्मिंश्चित् पुस्तके 'पिडका च पीता' इति पाठः, स[२] न सङ्ग-च्छते । तथा च विदेहः—"चोषोष्णस्रावदाहास्तु कृष्णे च पिडिकोद्गमः । व्यक्तमुद्गफलाकारं शुक्रं द्वित्वग्गतं भवेत्" इति । एकीयमतमाह—तदित्यादि । यच्चान्यच्छुक्रं तित्तिरिप-क्षतुल्यं तदप्यसाध्यं केचिद्वदन्तीति संबन्धः । एतत् परमत-मप्यप्रतिषिद्धत्वादनुमतमेव ॥ ६ ॥ ७ ॥

सितं यदा भात्यसितप्रदेशे
स्यन्दात्मकं नातिरुगश्रुयुक्तम् ॥

---

१ 'कांस्याभो भवति सिरावृतः सिते यो बिन्दुर्वा स तु निरुजो बलासकाख्यः' इति पा० । २ 'कफानिलजनितत्वात्' इति पा० । ३ 'यच्च' इति पा० ।

१ 'सिरासूक्ष्मं' इति पा० । २ 'तच्च संगच्छते' इति पा० ।

विहायसीवाच्छघनानुकारि
तदव्रणं साध्यतमं वदन्ति ॥ ८ ॥

इदानीं सव्रणं शुक्रं प्रतिपाद्याव्रणं प्रतिपादयन्नाह—सितमित्यादि । स्यन्दात्मकमभिस्यन्दकारणं, विहायसीव आकाश इव, अच्छघनानुकारि प्रतनुमेघखण्डानुकारीत्यर्थः । रक्तजमिदं साध्यं च ॥ ८ ॥

गम्भीरजातं बहलं च शुक्रं
चिरोत्थितं चापि वदन्ति कृच्छ्रम् ॥

अस्यैवाव्रणस्य शुक्रस्यावस्थाभेदेन कृच्छ्रतां दर्शयन्नाह—गम्भीरेत्यादि । एवंभूतमव्रणमपि शुक्रं कृच्छ्रं वदन्तीति संबन्धः । गम्भीरजातं द्विपटलाश्रितमित्यर्थः । जेज्जटाचार्यस्तु सव्रणाव्रणशुक्रस्य लक्षणं साध्यासाध्यत्वं च विपरीतक्रमेण पठति, मया तु पञ्जिकाकाराभिप्रायेणानेनैव क्रमेण पठितम् ॥—

संच्छाद्यते[2] श्वेतनिभेन सर्वं
दोषेण यस्यासितमण्डलं तु ॥ ९ ॥
तमक्षिपाकात्ययमक्षिकोप-
समुत्थितं[3] तीव्ररुजं वदन्ति ॥

इदानीं पाकात्ययमाह—संच्छाद्यत इत्यादि । अक्षिकोपात् समुत्थितं स्यन्दादुत्पन्नमित्यर्थः । एष त्रिदोषजोऽसाध्यश्च ॥९॥—

अजापुरीषप्रतिमो रुजावान्
सलोहितो लोहितपिच्छिलाश्रुः ॥
विदार्य कृष्णं प्रचयोऽभ्युपैति
तं चाजकाजातमिति व्यवस्येत् ॥ १० ॥
इति सुश्रुतसंहितायामुत्तरतन्त्रे कृष्णगतरोग-
विज्ञानीयो नाम पञ्चमोऽध्यायः ॥ ५ ॥

अजेत्यादि । अजापुरीषप्रतिम इति विशुष्कच्छगलीपुरीषतुल्यः । सलोहित ईषल्लोहितः । लोहितपिच्छिलाश्रुरिति लोहितं पिच्छिलं चाश्रु यस्य सः । प्रचयः सामर्थ्यान्मेदसः । एष श्लेष्मजोऽसाध्यश्च ॥ १० ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ।

अथातः सर्वगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि । सर्वगतरोगविज्ञानीयः सर्वाश्रयरोगविज्ञानीय इत्यर्थः । कृष्णमण्डलप्रत्यासत्त्या दृष्टिगतरोगविज्ञानीयो युज्यते, यश्च दृष्टिगतरोगविज्ञानीयात् पूर्वं सर्वगतरोगविज्ञानीयारम्भः स दृष्टिगतानां तिमिरादीनामभिष्यन्दनिमित्तत्वं न स्यादिति बोधयति, सन्ध्यादिगतानां च स्यन्दकारणत्वं बोधयति ॥ १ ॥ २ ॥

स्यन्दास्तु चत्वार इहोपदिष्टा-
स्तावन्त एवेह तथाऽधिमन्थाः ॥
शोफान्वितोऽशोफयुतश्च पाका-
वित्येवमेते दश संप्रदिष्टाः ॥ ३ ॥
हताधिमन्थोऽनिलपर्ययश्च
शुष्काक्षिपाकोऽन्यत एव वातः ॥
दृष्टिस्तथाऽम्लाध्युषिता सिराणा-
मुत्पातहर्षावपि सर्वभागाः ॥ ४ ॥

सर्वाक्षिगतरोगाणां संख्यामाह—स्यन्दा इत्यादि । तावन्त एव चत्वार एव । प्रथमश्लोकेन दश, द्वितीयश्लोकेन सप्त, एवं सप्तदश सर्वाश्रयाः कथिताः ॥ ३ ॥ ४ ॥

प्रायेण सर्वे नयनामयास्तु
भवन्त्यभिष्यन्दनिमित्तमूलाः ॥
तस्मादभिष्यन्दमुदीर्यमाण-
मुपाचरेदाशु हिताय धीमान् ॥ ५ ॥

सर्वेषां नेत्ररोगाणामभिष्यन्दभवत्वात् तत्प्रतीकारस्याशेषनयनामयप्रतीकारभूतत्वाद्यत्नतः पूर्वरूप एवासौ प्रतीकरणीय इत्याह—प्रायेणेत्यादि । अभिष्यन्दनिमित्तमूला इति अभिष्यन्दाश्च तन्निमित्तानि च तान्येव मूलं येषां ते तथा । निमित्तशब्दाद्दुष्टा दोषा दोषकोपनानि च संगृह्यन्ते । उदीर्यमाणमुत्पद्यमानम् । 'अभिष्यन्दनिमित्तमूला' इत्यत्र 'अभिष्यन्दसमुद्भवा हि' इति केचित् पठन्ति ॥ ५ ॥

निस्तोदनं स्तम्भनरोमहर्ष-
सङ्घर्षपारुष्यशिरोभितापाः ॥
विशुष्कभावः शिशिराश्रुता च
वाताभिपन्ने नयने भवन्ति ॥ ६ ॥

इदानीं वाताभिष्यन्दलक्षणमाह—निस्तोदनमित्यादि । निस्तोदनं सूच्येव व्यधनम् । स्तम्भनं स्तब्धता । संघर्षः करकरिमा । शिरोभितापः शिरोव्यथा । 'विशुष्कभावः शिशिराश्रुता च' इत्यत्र 'शुष्काल्पदूषिकहिमाश्रुता च' इति केचित् पठन्ति । तत्र दूषिका नेत्रमलम् । साध्योऽयम् ॥ ६ ॥

दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं बाष्पसमुच्छ्रयश्च ॥
उष्णाश्रुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥ ७ ॥

पित्ताभिष्यन्दलक्षणमाह—दाहेत्यादि । शिशिराभिनन्दा शीताभिलाषः । धूमायनं धूमस्येवोद्वमनं, बाष्पसमुच्छ्रयोऽश्रुबाहुल्यं, अयमपि साध्यः ॥ ७ ॥

उष्णाभिनन्दा गुरुताऽक्षिशोफः
कण्डूपदेहौ सितताऽतिशैत्यम् ॥

---

१ 'अभ्रदलानुकारि' इति पा० । २ 'श्वेतः समाक्रामति सर्वतो हि' इति पा० । ३ '०मक्षिरोगं सर्वात्मकं वर्जयितव्यमाहुः' इति पा० ।

स्रावो मुहुः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥ ८ ॥

श्लेष्माभिष्यन्दलक्षणमाह—उष्णेत्यादि । उपदेहो मलोपलिप्तता, सितता शुक्लता; एषोऽपि साध्यः ॥ ८ ॥

ताम्राश्रुता लोहितनेत्रता च
राज्यः समन्तादतिलोहिताश्च ॥
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति ॥ ९ ॥

रक्ताभिष्यन्दमाह—ताम्रेत्यादि । असावपि साध्यः ॥ ९ ॥

वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावताम् ॥
तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः ॥ १० ॥

अधिमन्थानामभिष्यन्दरोगकृतत्वं दर्शयन्नाह—वृद्धैरित्यादि । तावन्तश्चत्वार एव । तीव्रवेदना इत्यत्र वेदनाशब्दः सामान्यपीडावचनः । तेन यथास्वं वातादिदोषवेदनायुक्ता इत्यर्थः; एतेनेदमुक्तं भवति—वातिकादभिष्यन्दाद्वातिक एवाधिमन्थस्तीव्रवातिकनिस्तोदादिसकलवेदनो भवति; एवं पैत्तिकः, श्लैष्मिको, रक्तोत्थितश्चेति ॥ १० ॥

उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा ॥
शिरसोऽर्धं च तं विद्यादधिमन्थं स्वलक्षणैः ॥ ११ ॥

अधिमन्थानां सामान्यलक्षणमाह—उत्पाट्यत इत्यादि । नेत्रं निर्मथ्यते तथेति न केवलं नेत्रमेव निर्मथ्यते शिरसोऽर्धं च तथा निर्मथ्यत इति, अर्धशिरसो वेदना च व्याधिस्वभावात् । स्वलक्षणैर्वातादीनां स्वकीयैर्लक्षणैः । केचिदत्राधिमन्थानां सामान्यलक्षणं न पठन्ति, पञ्जिकायां पठितत्वादस्माभिः पठितम् ॥ ११ ॥

नेत्रमुत्पाट्यत इव मथ्यतेऽरणिवच्च यत् ॥
सङ्घर्षतोदनिर्भेदमांससंरब्धमाविलम् ॥ १२ ॥
कुञ्चनास्फोटनाध्मानवेपथुव्यथनैर्युतम् ॥
शिरसोऽर्धं च येन स्यादधिमन्थः स मारुतात् ॥१३॥

अधिमन्थानां सामान्यलक्षणमुक्त्वा विस्तरेण विशेषलक्षणमाह—नेत्रमित्यादि । सङ्घर्षः करकरिमा । अन्ये तु 'संहर्ष' इति पठन्ति, तत्र संहर्षो रोमाञ्चप्रायो वेदनाविशेषः । तोदः सूचीव्यधनमिव वेदना । निर्भेदः शस्त्रेण विदारणमिव । मांससंरब्धं मांसोपचितमित्यर्थः । आविलं समलम् । एष साध्यः ॥ १२ ॥ १३ ॥

रक्तराजिचितं स्रावि वह्निनेवावदह्यते ॥
यकृत्पिण्डोपमं दाहि क्षारेणाक्तमिव क्षतम् ॥ १४ ॥
प्रपक्वोच्छूनवर्त्मान्तं सस्वेदं पीतदर्शनम् ॥
मूर्च्छाशिरोदाहयुतं पित्तेनाक्ष्यधिमन्थितम् ॥ १५ ॥

पित्ताधिमन्थलक्षणमाह—रक्तराजीत्यादि । दाहि क्षारेणाक्तमिव क्षतमिति क्षारलिप्तक्षतमिव दहनशीलम् । एष व्याधिः साध्यः ॥ १४ ॥ १५ ॥

शोफवन्नातिसंरब्धं स्रावकण्डूसमन्वितम् ॥
शैत्यगौरवपैच्छिल्यदूषिकाहर्षणान्वितम् ॥ १६ ॥
रूपं पश्यति दुःखेन पांशुपूर्णमिवाविलम् ॥
नासाध्मानशिरोदुःखयुतं श्लेष्माधिमन्थितम् ॥१७॥

श्लेष्माधिमन्थलक्षणमाह—शोफवदित्यादि । दूषिका नेत्रमलम् । अयमपि रोगः साध्यः ॥ १६ ॥ १७ ॥

बन्धुजीवप्रतीकाशं ताम्यति स्पर्शनाक्षमम् ॥
रक्तास्रावं सनिस्तोदं पश्यत्यग्निनिभा दिशः ॥ १८ ॥
रक्तमग्नारिष्टवच्च कृष्णभागश्च लक्ष्यते ॥
यद्दीप्तं रक्तपर्यन्तं तद्रक्तेनाधिमन्थितम् ॥ १९ ॥

रक्ताधिमन्थलक्षणमाह—बन्धुजीवेत्यादि । बन्धुजीवो मध्याह्नपुष्पकः, अरिष्टकं कृष्णफलं 'अरीठा' इति लोके । असावपि साध्यः ॥ १८ ॥ १९ ॥

हन्याद्दृष्टिं सप्तरात्रात् कफोत्थो-
ऽधीमन्थोऽसृक्संभवः पञ्चरात्रात् ॥
षड्रात्राद्वै मारुतोत्थो निहन्या-
न्मिथ्याचारात् पैत्तिकः सद्य एव ॥ २० ॥

इदानीं वाताद्यधिमन्थानां सम्यगुपचारसाध्यानां वैद्यातुरयोर्यत्नाधानार्थं मिथ्याचाराद्दृष्टिविनाशावधिं यथादोषं निर्दिशन्नाह—हन्यादित्यादि । मिथ्याचारादिति पदं श्लेष्मोद्भवाद्यधिमन्थेषु सर्वेष्वपि संबध्यते । दृष्टिनाशकालावधिरप्यत्र व्याधिस्वभावात् ॥ २० ॥

कण्डूपदेहाश्रुयुतः पक्वोदुम्बरसन्निभः ॥
दाहसंहर्षताम्रत्वशोफनिस्तोदगौरवैः ॥ २१ ॥
जुष्टो मुहुः स्रवेच्चास्रमुष्णशीताम्बु पिच्छिलम् ॥
संरम्भी पच्यते यश्च नेत्रपाकः सशोफजः ॥ २२ ॥

सशोफपाकमाह—कण्डूत्यादि । संरम्भी शोफयुक्तः ॥ २१ ॥ २२ ॥

शोफहीनानि लिङ्गानि नेत्रपाके त्वशोफजे ॥

अशोफपाकमाह—शोफेत्यादि । लिङ्गानि सशोफपाकलिङ्गानीत्यर्थः । उभावपि पाकौ त्रिदोषजौ साध्यौ च ॥—

उपेक्षणादक्षि यदाऽधिमन्थो
वातात्मकः सादयति प्रसह्य ॥
रुजाभिरुग्राभिरसाध्य एष
हताधिमन्थः खलु नाम रोगः ॥ २३ ॥

सकलनयनशोषलक्षणं हताधिमन्थं दर्शयन्नाह—उपेक्षणादित्यादि । सादयति अवसादयति शोषयतीत्यर्थः ॥ २३ ॥

अन्तःसिराणां श्वसनः स्थितो दृष्टिं प्रतिक्षिपन् ॥
हताधिमन्थं जनयेत्तमसाध्यं विदुर्बुधाः ॥ २४ ॥

दृष्टिनिर्गमलक्षणं हताधिमन्थं दर्शयन्नाह—अन्तःसिराणामित्यादि । प्रतिक्षिपन् निष्कासयन्नित्यर्थः । यद्यपि हताधिमन्थलक्षणद्वित्वं ज्ञायते तथाऽप्येक एव, अतो न संख्यातिरेकः ।

जेज्जटाचार्यस्तु नयनशोषलक्षणहताधिमन्थस्य पाठं न पठति, दृष्टिनिर्गमलक्षणस्य हताधिमन्थस्य पाठं पठति; पञ्जिकाकारेण च विदेहोक्तं प्रकारद्वयेन हताधिमन्थलक्षणं दृष्ट्वा न्यूनतादोषभयात् पाठद्वयमपि पठितम् । तथा च विदेहः—"अन्तर्गतः सिराणां तु यदा तिष्ठति मारुतः । स तदा नयनं प्राप्य शीघ्रं दृष्टिं निरस्यति ॥ तस्यां निरस्यमानायां निर्मन्थन्निव मारुतः । नयनं निर्वमत्याशु शूलतोदाधिमन्थनैः ॥ अथवा शोषयेदक्षि क्षीणतेजोबलानलम् । उत्पन्नमिव संशुष्कमवसीदति लोचनम् ॥ हताधिमन्थं तं विद्यादसाध्यं वातकोपतः"—इति २४

पक्ष्मद्वयाक्षिभ्रुवमाश्रितस्तु
यत्रानिलः संचरति प्रदुष्टः ॥
पर्यायशश्चापि रुजः करोति
तं वातपर्यायमुदाहरन्ति ॥ २५ ॥

वातपर्यायमाह—पक्ष्मेत्यादि । अक्षि लोचनं, भ्रूः प्रसिद्धा । पर्यायशश्चापि रुजः करोति कदाचित् पक्ष्मद्वये, कदाचिदक्षिणि, कदाचिद्भ्रुवीति पर्यायशब्दार्थः । साध्योऽयम् ॥ २५ ॥

यत् कूणितं दारुणरूक्षवर्त्म
विलोकने चाविलदर्शनं यत् ॥
सुदारुणं यत् प्रतिबोधने च
शुष्काक्षिपाकोपहतं तदक्षि ॥ २६ ॥

शुष्काक्षिपाकमाह—यदित्यादि । कूणितं निमीलितं, दारुणं कठिनं रुक्षं वर्त्म यस्य तत्तथा । विलोकने चाविलदर्शनमिति यदतिदर्शने आकुलदर्शनमित्यर्थः । सुदारुणं यत् प्रतिबोधने चेति प्रतिबोधने उन्मेषे च यदतिशयेन कठिनं; अन्ये सुदारुणं कृच्छ्रोन्मीलनम् । वातिकोऽयं साध्यश्च ॥ २६ ॥

यस्यावटूकर्णशिरोहनुस्थो
मन्यागतो वाऽप्यनिलोऽन्यतो वा ॥
कुर्याद्रुजोऽति भ्रुवि लोचने वा
तमन्यतोवातमुदाहरन्ति ॥ २७ ॥

अन्यतोवातमाह—यस्येत्यादि । अवटुर्ग्रीवायाः पश्चिमो भागः । मन्या ग्रीवायाः पार्श्वयोः सिराविशेषः । अन्यतो वेति पृष्ठतो वेत्यर्थः । अन्यतोवात इति यथार्थेयं संज्ञा, यतोऽन्यतः स्थितो वायुरन्यतो वेदनां करोति । वातिकोऽयं साध्यश्च ॥२७॥

अम्लेन भुक्तेन विदाहिना च
सञ्छाद्यते सर्वत एव नेत्रम् ॥
शोफान्वितं लोहितकैः सनीलै-
रेतादृगम्लाध्युषितं वदन्ति ॥ २८ ॥

अम्लाध्युषितमाह—अम्लेनेत्यादि । विदाहिना वेति कटुकेन लवणेन वेत्यर्थः । लोहितकै रागैरित्यर्थः । सनीलैरीषन्नीलैः । एतादृगीदृशमित्यर्थः । अम्लाध्युषितमम्लजनितपित्ताध्युषितम् । एष रोगः पैत्तिकः साध्यश्च ॥ २८ ॥

अवेदना वाऽपि सवेदना वा
यस्याक्षिराज्यो हि भवन्ति ताम्राः ॥
मुहुर्विरज्यन्ति च ताः समन्ताद्
व्याधिः सिरोत्पात इति प्रदिष्टः ॥ २९ ॥

सिरोत्पातमाह—अवेदनेत्यादि । विरज्यन्ति विरक्ता भवन्ति प्रकृतवर्णा भवन्तीत्यर्थः[1] । रक्तजोऽयं साध्यश्च ॥ २९ ॥

मोहात् सिरोत्पात उपेक्षितस्तु
जायेत रोगस्तु सिराप्रहर्षः ॥
ताम्राच्छमस्रं[2] स्रवति प्रगाढं
तथा न शक्नोत्यभिवीक्षितुं च ॥ ३० ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे सर्वगतरोगविज्ञानीयो नाम षष्ठोऽध्यायः ॥ ६ ॥

सिराहर्षमाह—मोहादित्यादि । अयमपि रक्तजः साध्यश्च ॥ ३० ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गतशालाक्यतन्त्रे षष्ठोऽध्यायः समाप्तः ।

सप्तमोऽध्यायः ।

अथातो दृष्टिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

सर्वगतरोगविज्ञानीयानन्तरं दृष्टिगतरोगाणां पारिशेष्यादारम्भो युक्त इत्यत आह—अथात इत्यादि ॥ १ ॥ २ ॥

मसूरदलमात्रां तु पञ्चभूतप्रसादजाम् ॥
खद्योतविस्फुलिङ्गाभामिद्धां[3] तेजोभिरव्ययैः ॥ ३ ॥
आवृतां पटलेनाक्ष्णोर्बाह्येन विवराकृतिम् ॥
शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिन्तकाः ॥ ४ ॥

तां च दृष्टिं चिकित्सार्थं प्रमाणाकारस्वलक्षणैर्निर्दिशन्नाह—मसूरेत्यादि । मसूरदलमात्रामिति मसूरदलप्रमाणामित्यर्थः । पञ्चभूतप्रसादजामिति पञ्चभूतानां धामभूतात् साराज्जातामित्यर्थः । पञ्चभूतमध्ये एकस्य प्राधान्यमाह—इद्धां तेजोभिरव्ययैरिति; एतेन तेजोमयी दृष्टिरित्युक्तम् । खद्योतविस्फुलिङ्गाभामिति खद्योतो ज्योतिरिङ्गणः, विस्फुलिङ्गः सूक्ष्मोऽग्निकणः; खद्योतविस्फुलिङ्गौ तैजसावपि यथा न दहतस्तथा दृष्टिरपि न दहति । यदि सा खद्योतादिसदृशी तर्हि दिवाकरप्रकाशाद्रूपग्रहणेन न भवितव्यमित्याह—अव्ययैरिति ।—अव्ययैरुपचयापचयरहितैस्तेजोभिर्विशिष्टा । तस्य दृष्टेः कुतो भास्वरता न दृश्यत इत्याह—आवृतां पटलेनाक्ष्णोर्बाह्येनेति; आवृतामाच्छादितां, बाह्येन तेजोजलाश्रितेन । यद्यपि बाह्यपटलावृतत्वाद्दृष्टे[4] रूपग्रहणसामर्थ्योपघातः प्राप्तः, तथाऽपि पटलस्यात्यन्ताच्छत्वाद्रोमकूपविवरान्तरत्वाच्च[5] तेजःपरमाणूनां बहिश्चरत्वे[6] रूपग्रहणसामर्थ्यं दृष्टेर्नोपह-

---

१ 'विशेषरक्तवर्णा भवन्तीत्यर्थः' इति श्रीकण्ठदत्तः । २ 'ताम्राभमस्रं' इति पा० । ३ 'सिद्धां' इति पा० । ४ 'दृष्टिगतबाह्यपटलावृतत्वात्' इति पा० । ५ 'रोमकूपविवरान्तर्गतत्वाच्च' इति पा० । ६ 'बहिःशरारुत्वे' इति पाठान्तरम् ।

न्यत इत्याह—विवराकृतिमिति।—विवरं छिद्रं तस्येवाकृतिर्यस्याः सा तथा तां, न तु साक्षात्तत्र छिद्रमस्ति। विवराकारवचनेन पुनर्मृदुतैवोक्ता, न पुनः सर्वथा शुषिरत्वं; तथा च सति पटलानां प्रतिपादितानामप्यनुपपत्तिः स्यात्। दृष्टेः पटलचतुष्टयेऽपि रूपग्रहणसामर्थ्यमनुमातव्यं, कालकास्थ्याश्रिताभ्यन्तरपटलमपि गते दोषे रूपग्रहणविकृतिलक्षणस्य तिमिरस्योक्तेः। शीतसात्म्यामिति। ननु शीतेन तेजोऽभिहन्यते तत् कथं शीतेन सात्म्यं? उच्यते—पृथग्व्यवस्थितयोर्जलाग्न्योर्विरोधो, न पुनः सहोत्पन्नयोरेककार्ययोः; प्रभावाद्वा जलान्तर्गतमप्येतत्तेजो नोपहन्यते॥ ३॥ ४॥

रोगांस्तदाश्रयान् घोरान् षट् च षट् च प्रचक्ष्महे॥
पटलानुप्रविष्टस्य तिमिरस्य च लक्षणम्॥ ५॥

प्रमाणादिभिश्चिकित्सोपयोगिभिर्दृष्टिमभिधाय तदाश्रयरोगोपवर्णनार्थं पटलचतुष्टयप्रविष्टतिमिरलक्षणोपदेशार्थं च प्रतिपादयन्नाह—रोगानित्यादि। तदाश्रयान् दृष्ट्याश्रयानित्यर्थः। षट् च षट् चेति द्वादशेत्यर्थः॥ ५॥

सिराभिरभिसंप्राप्य विगुणोऽभ्यन्तरे भृशम्॥
प्रथमे पटले दोषो यस्य दृष्टौ व्यवस्थितः॥ ६॥
अव्यक्तानि स रूपाणि सर्वाण्येव प्रपश्यति॥

प्रथमपटलगतस्य तिमिरारम्भकदोषस्य संप्राप्तिलेशपूर्वकं लक्षणमाह—सिराभिरित्यादि। अभिसंप्राप्य सम्यग्गत्वा। विगुणो दुष्टः। अभ्यन्तरे सर्वाभ्यन्तरे कालकास्थ्याश्रिते प्रथमपटले। स पुरुषः। 'सर्वाण्येव प्रपश्यति' इत्यत्र 'कदाचिदथ पश्यति' इति पञ्जिकाकारः पठति व्याख्यानयति च—कदाचिन्न सर्वकालम्। एतेन स्थानविशेषाद्दोषस्याल्पबलवत्तोक्ता, तदुत्तरेषु क्रमात् बलवत्त्वमिति। तान्यव्यक्तरूपाण्यपि वक्ष्यमाणरूपभ्रमणारुणवर्णादियुक्तानि वातेन, तथा पित्तेनादित्यखद्योतादीनि नीलपीतवर्णानि, एवं कफेन सितवर्णानि, रक्तेन रक्तवर्णानि, सन्निपातेन विचित्राणि। एवं द्वितीयादिपटलेष्वपि व्याख्येयम्॥ ६॥—

दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते॥ ७॥
मक्षिका मशकान् केशाञ्जालकानि च पश्यति॥
मण्डलानि पताकांश्च मरीचीः कुण्डलानि च॥ ८॥
परिप्लवांश्च विविधान् वर्षमभ्रं तमांसि च॥
दूरस्थान्यपि रूपाणि मन्यते च समीपतः॥ ९॥
समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात्॥
यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति॥ १०॥

द्वितीयपटलगतदोषलक्षणमाह—दृष्टिरित्यादि। द्वितीयं पटलं मेदःश्रितम्। भृशमिति यादृशी प्रथमे पटले ततोऽधिकं विह्वलीभवति। विह्वलत्वमाह—मक्षिकामशकानित्यादि। मक्षिकादीनामभावेऽपि तिमिरारम्भकद्वितीयपटलाश्रितदोषप्रभावेण मक्षिकादीनि यथादोषवर्णानि पश्यति। जालकानि जन्तुलालाविरचितजालकाकाराणि, मण्डलानि वर्तुलरूपाणि। पताकाः ध्वजान्। मरीचीः मृगतृष्णाः। कुण्डलानि कर्णकुण्डलानि। परिप्लवांश्चेति नक्षत्रादीनां गतीः। विविधानूर्ध्वाधस्तिर्यग्गमनेन कृष्णपीतशुक्लवर्णदर्शनेन वा नानाप्रकारान्। वर्षं वृष्टिम्। असद्रूपग्रहणे विह्वलत्वं प्रतिपाद्य सद्रूपग्रहणेऽपि देशापरिज्ञाने दृशोर्विह्वलत्वं प्रतिपादयन्नाह—दूरस्थानीत्यादि। गोचरविभ्रमात् इन्द्रियार्थविभ्रमात्॥ ७–१०॥

ऊर्ध्वं पश्यति नाधस्तात्तृतीयं पटलं गते॥
महान्त्यपि च रूपाणि च्छादितानीव वाससा॥ ११॥
कर्णनासाक्षियुक्तानि विपरीतानि वीक्षते॥
यथादोषं च रज्येत दृष्टिर्दोषे बलीयसि॥ १२॥
अधःस्थिते समीपस्थं दूरस्थं चोपरिस्थिते॥
पार्श्वस्थिते तथा दोषे पार्श्वस्थानि न पश्यति॥ १३॥
समन्ततः स्थिते दोषे सङ्कुलानीव पश्यति॥
दृष्टिमध्यगते दोषे स एकं मन्यते द्विधा॥ १४॥
द्विधास्थिते त्रिधा पश्येद्बहुधा चानवस्थिते॥
तिमिराख्यः स वै दोषः

तृतीयपटलगतदोषलक्षणमाह—ऊर्ध्वमित्यादि। तृतीयं पटलं मांसाश्रितम्। ऊर्ध्वं पश्यतीति आलोकसहायत्वेन दृश ऊर्ध्वमुपलम्भो नाधस्तात्। विपरीतानि कर्णादिहीनानि। यथादोषं चेति सामर्थ्यान्मांसस्थितशोणितसहायेन बलवत्तरदोषेण दृष्टौ राग उत्पद्यत इत्यर्थः। अत एव प्रथमद्वितीयपटलयोः शोणिताभावाद्रागाभावः। अधःस्थिते दृष्टिमण्डलाधोभागस्थिते दोषे इत्यर्थः। सङ्कुलानीवेति मिश्रीभूतानीव वस्तुरूपाणि पश्यति। द्विधास्थिते 'दोषे' इति शेषः। अनवस्थिते चञ्चले दोषे। तिमिराख्यः तिमिरसंज्ञः, रागप्राप्तस्य च तिमिरस्य 'काच' इति संज्ञा॥ ११–१४॥—

चतुर्थं पटलं गतः॥ १५॥
रुणद्धि सर्वतो दृष्टिं लिङ्गनाशः स उच्यते॥
तस्मिन्नपि तमोभूते नातिरूढे महागदे॥ १६॥
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः॥
निर्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति॥ १७॥

चतुर्थपटलगतदोषलक्षणमाह—स इत्यादि। स एव तिमिराख्यः, चतुर्थं पटलं तेजोजलाश्रितं प्राप्तो यदा सर्वतो दृष्टिं रुणद्धि तदा लिङ्गनाश उच्यत इति संबन्धः। लिङ्गनाश इति लिङ्गं चक्षुरिन्द्रियशक्तिः, तस्य नाशो यस्मिन् स लिङ्गनाशो दोषः। तत्राप्यल्पेषु दोषेषु केषांचिद्वस्तुविशेषाणामुपलम्भो भवतीति दर्शयन्नाह—तस्मिन्निति। तस्मिन् लिङ्गनाशे। तमोभूते इति अत्र भूतशब्द उपमाने। नातिरूढे नातिवृद्धे।

१ 'तदा हि' इति पा०। २ 'परिपूर्वांश्च' इति पा०।

१ 'चेक्षते' इति पा०। २ 'सङ्कुलानि च' इति पा०। ३ 'मांसस्थितशोणितसहायबलवत्तरे दोषे' इति पा०। ४ 'भ्राजिष्णूनीव पश्यति' पा०।

महागदे प्रधानेन्द्रियतिरोभावकत्वात्। निर्मलानि च तेजांसि अग्न्यादीनि, भ्राजिष्णूनि अन्यान्यपि दीप्तिमन्ति यानि वस्तूनि तानि पश्यतीत्यर्थः ॥ १५-१७ ॥

स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः ॥

तस्यैव लिङ्गनाशस्यापरं संज्ञाद्वयं प्रतिपादयन्नाह—स एवेत्यादि। नीलिकाविशेषिता काचसंज्ञा संजाता यस्य स तथा। काचसंज्ञा च तृतीयेऽपि पटले रागितिमिरस्य रागोत्पत्तिद्वारेण सूचिता। एतेन काचत्वात् पटलद्वयगतयोरपि दोषयोः षट्त्वं न तु द्वादशत्वम्। अस्याग्रे केचित् यन्मयस्तन्मयानीत्यादि पाठमापातनिकापूर्वकं पठन्ति, स चाभावान्न लिखितः ॥

तत्र वातेन रूपाणि भ्रमन्तीव स पश्यति ॥ १८ ॥
आविलान्यरुणाभानि व्याविद्धानि च मानवः ॥

इदानीं तेषु पटलेषु क्रमेण वातादिदोषारब्धस्य तिमिरस्य लिङ्गानि दर्शयन्नाह—वातेनेत्यादि। आविलानि समलानि, अरुणाभानि ईषद्रक्तानि। व्याविद्धानि वक्राणि ॥ १८ ॥—

पित्तेनादित्यखद्योतशक्रचापतडिद्गुणान् ॥ १९ ॥
शिखिबर्हविचित्राणि नीलकृष्णानि पश्यति ॥

पित्तजतिमिरलक्षणमाह—पित्तेनेत्यादि। खद्योतो ज्योतिरिङ्गणः। शक्रचापमिन्द्रधनुः, तडिद्गुणो विद्युल्लता, शिखिबर्हः मयूरपिच्छः ॥ १९ ॥—

कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च ॥२०॥
गौरचामरगौराणि श्वेताभ्रप्रतिमानि च ॥
पश्येदसूक्ष्माण्यत्यर्थं व्यभ्रे चैवाभ्रसंप्लवम् ॥ २१ ॥
सलिलप्लावितानीव परिजाड्यानि मानवः ॥

श्लेष्मजतिमिरलक्षणमाह—कफेनेत्यादि। गौरचामरगौराणीति श्वेतचामरवच्छुक्लानि। सितानि चेति सुधौतशुक्लवस्त्रसदृशानि। असूक्ष्माणि स्थूलानि। व्यभ्रे विगतघने। अभ्रसंप्लवं मेघानां सर्वतो गमनम्। सलिलप्लावितानीव परिजाड्यानीति सर्वतः सलिलप्लवनेनेव शुक्लानि स्तिमितानि च रूपाणि पश्यति ॥ २० ॥ २१ ॥—

तथा रक्तेन रक्तानि तमांसि विविधानि च ॥ २२ ॥
हरितश्यावकृष्णानि धूमधूम्राणि चेक्षते ॥

रक्तजतिमिरलक्षणमाह—तथेत्यादि। धूमधूम्राणि धूमवेष्टितानीव। यद्यपि तिमिरस्य रक्तान्तर्गतदोषजन्यत्वाद्रक्तजसंज्ञा न स्यात्, तथाऽपि रक्तबाहुल्यादुपचाराद्वा रक्तजव्यपदेशः ॥ २२ ॥—

सन्निपातेन चित्राणि विप्लुतानि च पश्यति ॥ २३ ॥
बहुधा वा द्विधा वाऽपि सर्वाण्येव समन्ततः ॥
हीनाधिकाङ्गान्यथवा ज्योतींष्यपि च पश्यति ॥२४॥

सन्निपातजतिमिरलक्षणमाह—सन्निपातेनेत्यादि। चित्राणि नानावर्णानि। विप्लुतानि सर्वतोऽवकीर्णानि। बहुधा बहुत्वं गतानि, द्विधा द्वित्वं गतानि, सर्वाण्येव यावद्द्रष्टव्यानि रूपाणि। हीनाधिकाङ्गानीति न केवलं तृतीये पटले हीनाधिकाङ्गानि पश्यति सन्निपातेन पुनः पटलान्तरेऽपि हीनाधिकाङ्गानि पश्यति। ज्योतींषि तारकाणि ॥ २३ ॥ २४ ॥

पित्तं कुर्यात् परिम्लायि मूर्च्छितं रक्ततेजसा ॥
पीता दिशस्तथोद्यन्तमादित्यमिव पश्यति ॥ २५ ॥
विकीर्यमाणान् खद्योतैर्वृक्षांस्तेजोभिरेव च ॥

ननु वातपित्तकफशोणितसन्निपातैः पञ्चभिः पञ्चतिमिराणां चोत्तरावस्थासु काचलिङ्गनाशसंज्ञे कृते, काचाश्च षट् व्याख्येया इति तेषां षट्त्वोपपत्तिहेतुभूतषष्ठपरिम्लायितिमिरकथनाय, तथा परिम्लायितिमिराक्रान्तस्य पुंसो यादृशं रूपग्रहणं भवति तादृग्रूपकथनाय च प्राह—पित्तमित्यादि। मूर्च्छितं संयुक्तं, रक्ततेजसा रक्तप्रसादेन; अन्ये तु रक्तार्थं तेजो रक्ततेजः, तेन मूर्च्छितं; एतेन रक्तार्थं परिणम्यमानरसेन संयुक्तमित्यर्थः। ईदृशे च व्याख्याने नामान्वयः सङ्गच्छते। यथा परिम्लायी क्षयी कथ्यते तथा च वक्ष्यति,—'दोषक्षयात् कदाचित् स्यात् स्वयं तत्र च दर्शनं' इति, तच्च क्षयित्वं लङ्घनादिभिरुपबृंहकरसक्षयात् पित्तक्षयाच्चोपपद्यते। रक्तजपक्षे रक्तक्षयोपपत्तिर्नास्ति। केचित् 'रक्ततेजसा' इत्यत्र 'भक्ततेजसा' इति पठन्ति, व्याख्यानयन्ति च—भक्ततेजसा आहारप्रसादेन रसाख्येनेत्यर्थः। अत्र सात्यकिप्रभृतीनां मतानुलोमेन रक्तमूर्च्छितं पित्तं ह्यपीत्यवगन्तव्यम्। तथा च रागकथनप्रस्तावे सात्यकिः—"पित्तरक्तोत्थिता पीताश्चित्रिताः सन्निपातजाः"—इति। एक एवासौ परिम्लायी रोगोऽरागप्राप्तः सन् तिमिराख्यः, रागप्राप्तस्तु काचाख्यः, स एव किञ्चिद्दर्शननाशकारी लिङ्गनाशः। सर्वाण्येव तिमिराणि प्रथमद्वितीयपटलगतानि साध्यानि; तृतीयपटलगतानि रागप्राप्त्या काचाख्यानि भवन्ति, तदा याप्यानि ॥ २५ ॥—

वक्ष्यामि षड्विधं रागैर्लिङ्गनाशमतः परम् ॥ २६ ॥

तृतीयरागितिमिरस्य काचाख्यां प्राप्तस्य लिङ्गनाशस्य च रागेणैव संख्याषट्त्वं निर्दिशन्नाह—वक्ष्यामीत्यादि। षड्विधं षड्भेदभिन्नम्। तृतीयपटलगतं काचाख्यां प्राप्तं तिमिरमिति शेषः। रागैर्वक्ष्यमाणैररुणादिभिः। लिङ्गनाशमतः परमिति काचाख्यतिमिरकथनानन्तरं लिङ्गनाशमपि षड्विधं वक्ष्यामि ॥ २६ ॥

रागोऽरुणो मारुतजः प्रदिष्टः
पित्तात् परिम्लाय्यथवाऽपि नीलः ॥
कफात् सितः शोणितजस्तु रक्तः
समस्तदोषोऽथ विचित्ररूपः ॥ २७ ॥

तानेवारुणादिकान् रागानाह—राग इत्यादि। परिम्लायी

१ 'मेघरहिते' इति पा०। २ 'मानवः' इति पा०।

१ 'नामद्वयं' इति पा०। २ 'उपबृंहणकरबलक्षयात् पित्तक्षयाच्चोपपद्यते' इति पाठान्तरम्। ३ 'षड्विधैः' इति पा०। ४ 'समस्तदोषेऽथ विचित्रवर्णः' इति पा०।

पीत इत्यर्थः । अरुणादिरागैः पञ्चभिस्तावत् पञ्च काचा ज्ञेयाः, षष्ठः काचश्च परिम्लायीरोगः परं रागप्राप्तः । अस्य च पीतवर्णता सात्यकिवचनादवगन्तव्या । एवं षट् काचाः कथिताः ॥ २७ ॥

रक्तजं मण्डलं दृष्टौ स्थूलकाचानलप्रभम्[1] ॥
परिम्लायिनि रोगे स्यान्म्लाय्यानीलं च मण्डलम् २८
दोषक्षयात् कदाचित् स्यात्स्वयं तत्र च दर्शनम् ॥

अत्र पित्तात् परिम्लायीत्युक्तं तस्य च लक्षणमनुक्तं वक्तुमाह—रक्तजमित्यादि । रक्तजं रक्तप्रसादाज्जातं, रक्ततेजसा जातं वा । स्थूलकाचानलप्रभमिति बाहुल्येन स्थूलकाचाभं, वर्णेनानलप्रभम् । अन्ये तु 'अरुणं मण्डलं दृष्टौ स्थूलकाचारुणप्रभं' इति पठन्ति व्याख्यानयन्ति च—अरुणमरुणवर्णं, कीदृशमरुणमित्याह—स्थूलकाचारुणप्रभमिति ।—स्थूलकाचस्येवारुणा प्रभा यस्य तत्तथा । एष पाठः पञ्जिकया दूषितः । म्लायि क्षयि । आनीलमिति ईषन्नीलम् । अनलप्रभत्वेन च पीतत्वमुक्तमेव, तस्मात् किञ्चिन्नीलपीतमित्यर्थः । अन्ये तु 'म्लायीनीलम्' इति पठन्ति, व्याख्यानयन्ति च—म्लायीनीलं पीतनीलमित्यर्थः । तत्र पीतं रसमूर्च्छितपित्तजनितं, नीलं पुनः रक्तमूर्च्छितपित्तजम् । अत्र तृतीयपटलस्थे रागे दोषव्याधि(प्ति)वशाद्रागस्य मण्डलाकारतैव, न तु ले(रे)खादिप्रकारत्वमिति नियमार्थं पुनर्मण्डलग्रहणमिति । दोषक्षयादित्यादि कर्मक्षयाद्दोषक्षये सञ्जाते कदाचिदाकस्मिकं तत्र परिम्लायिनि रोगे दर्शनं स्यादित्येके; अन्ये तु पित्तसंमूर्च्छाकररससंक्षयात् क्षीणे दोषे तत्र कदाचिद्दर्शनं स्यादिति व्याख्यां कुर्वन्तीति । अयं याप्यः ॥ २८ ॥—

अरुणं मण्डलं वाताच्चञ्चलं परुषं तथा ॥ २९ ॥
पित्तान्मण्डलमानीलं कांस्याभं पीतमेव वा ॥
श्लेष्मणा बहलं स्निग्धं शङ्खकुन्देन्दुपाण्डुरम् ॥३०॥
चलत्पद्मपलाशस्थः शुक्लो विन्दुरिवाम्भसः ॥
संकुचत्यातपेऽत्यर्थं छायायां विस्तृतो भवेत् ॥३१॥
मृद्यमाने च नयने मण्डलं तद्विसर्पति ॥
प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम् ॥ ३२ ॥
दृष्टिरागो भवेच्चित्रो लिङ्गनाशे त्रिदोषजे ॥
यथास्वं दोषलिङ्गानि सर्वेष्वेव भवन्ति हि ॥ ३३ ॥

इदानीं काचाख्यां प्राप्तस्य तिमिरस्य रागेण षट्त्वं प्रतिपाद्य, षड्विधं लिङ्गनाशमतःपरं वक्ष्यामीति यदुक्तं तदेव षड्विधत्वं मण्डलरागभेदेन विवृण्वन्नाह—अरुणमित्यादि । परुषं खरस्पर्शम् । आनीलमीषन्नीलं, कांस्याभमापाण्डुपीतम् । बहलं स्थूलम् । शुक्लो विन्दुरिवाम्भस इत्यस्याग्रे केचित् 'सङ्कुचत्यातपेऽत्यर्थं छायायां विस्तृतो भवेत्' इति पठन्ति । लिङ्गनाशेऽपि पूर्वोक्तवातादिरूपभ्रमणारुणवर्णादिदोषलिङ्गं ज्ञेयमिति दर्शयितुमाह—यथास्वमित्यादि । यथास्वं दोषलिङ्गानीति पूर्वोक्तवातादितिमिराणां रूपभ्रमणादिलक्षणानीत्यर्थः । एषु लिङ्गनाशेषु केवलश्लेष्मजलिङ्गनाशं विहायान्ये लिङ्गनाशा असाध्याः । अत्र किञ्चिद्दर्शनावस्थां[1] प्राप्तः परिम्लाय्येव रोगः षष्ठो लिङ्गनाशो ज्ञेयः । एवं षड् लिङ्गनाशा उक्ताः ॥ २९-३३ ॥

षड् लिङ्गनाशाः षडिमे च रोगा
दृष्ट्याश्रयाः षट् च षडेव च स्युः ॥
तथा नरः पित्तविदग्धदृष्टिः
कफेन चान्यस्त्वथ धूमदर्शी ॥ ३४ ॥
यो ह्रस्वजाड्यो(त्यो)[2] नकुलान्धता च
गम्भीरसंज्ञा च तथैव दृष्टिः ॥

रागैररुणादिकैः षड्विधं लिङ्गनाशमभिधायापरान् पित्तविदग्धदृष्ट्यादिकान् षडेव निर्दिशन्नाह—षडित्यादि । षड्लिङ्गनाशा इति वक्ष्यामि षड्विधं रागैर्लिङ्गनाशमतः परमित्यनेनैव लिङ्गनाशानां षट्त्वे प्राप्ते पुनः षडिति यत्संख्याकरणं तन्नियमार्थं, तेन तिमिरकाचलिङ्गनाशानां पृथक् संख्याकरणं न गणनीयं; एतेनैतदुक्तं भवति—षड् लिङ्गनाशाः, षडिमे च रोगाः वक्ष्यमाणाः पित्तविदग्धदृष्ट्यादयः, एवं दृष्ट्याश्रया द्वादश । षडिमे च रोगा इति वक्ष्यमाणाः पित्तविदग्धदृष्ट्यादयः । दृष्ट्याश्रयाः षट्च षडेव स्युरिति अत्रापि पूर्वशङ्कया षडेवेति परस्मान्नियमयति; द्वादशैव दृष्ट्याश्रया रोगा भवेयुरित्यर्थः । के ते पित्तविदग्धदृष्ट्यादयः षडित्याह—तथेत्यादि । तथाशब्दो भिन्नक्रमे, कफेन चान्य इत्यत्र संबध्यते; तेन कफेनापि विदग्धदृष्टिरन्य इत्यर्थः ॥ ३४ ॥—

पित्तेन दुष्टेन गतेन दृष्टिं
पीता भवेद्यस्य नरस्य दृष्टिः ॥ ३५ ॥
पीतानि रूपाणि च मन्यते यः
स मानवः पित्तविदग्धदृष्टिः ॥
प्राप्ते तृतीयं पटलं तु दोषे
दिवा न पश्येन्निशि वीक्षते च ॥ ३६ ॥
(रात्रौ स शीतानुगृहीतदृष्टिः
पित्ताल्पभावादपि तानि पश्येत्)[3] ॥

पित्तविदग्धदृष्टेर्लक्षणमाह—पित्तेनेत्यादि । दुष्टेन वृद्धेन[4] । निशि वीक्षते चेति रात्रौ शीतोपकृतदृष्टित्वात् पित्ताभावः, अतो रात्रौ रूपदर्शनम् । साध्योऽयम् ॥ ३५ ॥ ३६ ॥—

तथा नरः श्लेष्मविदग्धदृष्टि-
स्तान्येव शुक्लानि हि मन्यते तु ॥ ३७ ॥
त्रिषु स्थितोऽल्पः पटलेषु दोषो
नक्तान्ध्यमापादयति प्रसह्य ॥
दिवा स सूर्यानुगृहीतचक्षु-
रीक्षेत रूपाणि कफाल्पभावात्[5] ॥ ३८ ॥

---

१ 'स्थूलकाचारुणप्रभम्' इति पा० ।

१ 'दर्शनानाशावस्थां' इति पा० । २ 'यो ह्रस्वजात्यो' इति पा० । ३ अयमर्धश्लोको हस्तलिखितपुस्तके न पठ्यते । ४ 'बद्धेन' इति पा० । ५ 'सूर्यानुगृहीतचक्षुरीक्षेत' इति पा० ।

कफविदग्धदृष्टेर्लक्षणमाह—नर इत्यादि । कफेन दुष्टेन गतेन दृष्टिं सिता भवेद्यस्य नरस्य दृष्टिरिति तथाशब्दार्थः । तान्येव रूपाणि । अयमपि साध्यः ॥ ३८ ॥

शोकज्वरायासशिरोभितापै-
रभ्याहता यस्य नरस्य दृष्टिः ॥
सधूमकान् पश्यति सर्वभावां-
स्तं धूमदर्शीति वदन्ति रोगम् ॥ ३९ ॥

धूमदर्शिनो लक्षणमाह—शोकेत्यादि । शिरोभितापः शिरोव्यथा । अयं पित्तजः साध्यश्च ॥ ३९ ॥

स ह्रस्वजाड्यो दिवसेषु कृच्छ्रा-
द्ध्रस्वानि रूपाणि च येन पश्येत् ॥

ह्रस्वजाड्यलक्षणमाह—स इत्यादि । स पुरुषः । येन विकारेण । अत्र दिवसेषु पश्येदिति वचनाद्रात्रौ न पश्यतीत्यवगम्यते । केचित्तु 'रात्रौ च शीतानुगृहीतदृष्टिः पित्ताल्पभावादपि तानि पश्येत्' इति पठन्ति; तच्चासङ्गतं, अस्य नक्तान्धताजनकत्वात् । तथा च विदेहः,—"नक्तमन्धास्तु चत्वारो ये पुरस्तात् प्रकीर्तिताः । तेषामसाध्यो नकुलो ह्रस्वजाड्य(त्य)स्तथैव च"—इति । अत्र च दृष्टिमध्यगतः पीतो रागो ज्ञेयः । अस्य पटलचतुष्टयाश्रितपित्तप्रभवत्वादसाध्यत्वम् ॥—

विद्योतते येन नरस्य दृष्टि-
र्दोषाभिपन्ना नकुलस्य यद्वत् ॥ ४० ॥
चित्राणि रूपाणि दिवा स पश्येत्
स वै विकारो नकुलान्ध्यसंज्ञः ॥

नकुलान्ध्यलक्षणमाह—विद्योतत इत्यादि । दोषाभिपन्ना दोषैर्व्याप्ता । चित्राणि सर्वदोषवर्णानि । दिवा स पश्येदिति वचनाद्रात्रौ न पश्यतीत्यवगम्यते । सर्वजोऽसाध्यश्च ॥४०॥—

दृष्टिर्विरूपा श्वसनोपसृष्टा
सङ्कुच्यतेऽभ्यन्तरतश्च याति ॥ ४१ ॥
रुजावगाढा च तमक्षिरोगं
गम्भीरिकेति प्रवदन्ति तज्ज्ञाः ॥

गम्भीरिकाया लक्षणमाह—दृष्टिरित्यादि । विरूपा विकृतरूपा । श्वसनोपसृष्टा वातोपद्रुता । रुजावगाढा तीव्रवेदना । इयमप्यसाध्या ॥ ४१ ॥—

बाह्यौ पुनर्द्वाविह संप्रदिष्टौ
निमित्ततश्चाप्यनिमित्ततश्च ॥ ४२ ॥
निमित्ततस्तत्र शिरोभितापा-
ज्ज्ञेयस्त्वभिष्यन्दनिदर्शनैश्च[३] ॥

हेतुभेदेन बाह्यौ निर्दिशन्नाह—बाह्यावित्यादि । बहिर्भवौ बाह्यौ; यद्यपि प्राक्सूत्रे संक्षेपेणोपदिष्टौ तथाऽपि पुनरिह निमित्तानिमित्तभेदद्वयेन सम्यक् प्रकर्षान्निर्दिष्टावित्यर्थः । तत्र सनिमित्तं दर्शयन्नाह—निमित्तत इत्यादि । तत्र तयोर्मध्ये, शिरोभितापाद् विषपुष्पगन्धस्पृष्टपवनसंपर्कजातात्, अभिष्यन्दनिदर्शनैरिति अभिष्यन्दलक्षणैरित्यर्थः । अयमसाध्यः ॥४२॥—

सुरर्षिगन्धर्वमहोरगाणां
सन्दर्शनेनापि च भास्वराणाम् ॥ ४३ ॥
हन्येत दृष्टिर्मनुजस्य यस्य
स लिङ्गनाशस्त्वनिमित्तसंज्ञः ॥
तत्राक्षि विस्पष्टमिवावभाति
वैदूर्यवर्णा विमला च दृष्टिः ॥ ४४ ॥

अनिमित्तं दर्शयन्नाह—सुरर्षीत्यादि । अनिमित्त इति अनुपलभ्यमानविशिष्टसुरादिदर्शननिमित्तः । दृष्टिर्दर्शनम् । लिङ्गनाश इति दर्शननाश इत्यर्थः । अयमप्यसाध्यः । तस्यैवानिमित्तस्य लक्षणमाह—तत्रेत्यादि । तत्र अनिमित्तसंज्ञके । विस्पष्टमिव विशेषेण प्रसन्नमिव । वैदूर्यवर्णा प्रकृतिवर्णेत्यर्थः । विमलेति विगतास्तिमिरकाचादयो मला यस्यां सा तथा । एतौ सनिमित्तानिमित्तौ सर्वगतावपि दर्शननाशकरत्वादनुक्तावपि दृष्ट्याश्रितौ कथितौ, अतो न संख्यातिरेकः ॥ ४३ ॥ ४४ ॥

विदीर्यते सीदति हीयते वा
नृणामभीघातहता तु दृष्टिः ॥ ४५ ॥

आगन्तुप्रस्तावादपरमभिघातजमाह—विदीर्यत इत्यादि । सीदति अवसादं याति । एष बाह्यनिमित्तत्वात् सन्निपातान्तर्भूतः ॥ ४५ ॥

इत्येते नयनगता मया विकाराः
संख्याताः पृथगिह षट् च सप्ततिश्च ॥
एतेषां पृथगिह विस्तरेण सर्वं
वक्ष्येऽहं तदनु चिकित्सितं यथावत् ॥ ४६ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे दृष्टिगतरोगविज्ञानीयो नाम सप्तमोऽध्यायः ॥ ७ ॥

समुदायसंख्यामाह—इत्येत इत्यादि । संख्याताः सम्यगाख्याताः, सम्यग्गणिता वा । इह शालाक्ये । पुनः षट्सप्ततिसंख्याकरणं नियमार्थं; तेन षट्सप्ततिरेव । एतेन करालादिप्रोक्ता संख्या निराकृता ॥ ४६ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गतशालाक्यतन्त्रे सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

अथातश्चिकित्सितप्रविभागविज्ञानीयमध्यायं[१] व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः (सुश्रुताय) ॥ २ ॥

दृष्टिगतरोगविज्ञानीयानन्तरं सर्वथा प्रतिपन्नसकलनयनाम-

१ 'ह्रस्वजात्यो' इति पा० । २ 'ह्रस्वजात्यलक्षणमाह' इति पा० ।
३ 'अभिष्यन्दनिदर्शनश्च' इति पा० ।

१ 'चिकित्सितप्रविभागीयं' इति पा० ।

यस्य भिषजश्चिकित्सा न्याय्येति चिकित्साप्रविभागीयारम्भः— अथात इत्यादि । प्रविभागः प्रकर्षेण विभजनं पृथक्करणमित्यर्थः ॥ १ ॥ २ ॥

षट्सप्ततिर्येऽभिहिता व्याधयो नामलक्षणैः ॥
चिकित्सितमिदं तेषां समासव्यासतः शृणु ॥ ३ ॥

चिकित्सा तु द्विविधा समासाद् व्यासाच्च; तत्र समासेनेहाध्याये विभागं दर्शयन्नाह—षडित्यादि । लक्षणैर्हेतुपूर्वरूपरूपोपशयसंप्राप्तिभिः । समासात् संक्षेपादिहैवाध्याये; विस्तरात् पुनर्वाताभिष्यन्दादिषु ॥ ३ ॥

छेद्यास्तेषु दशैकश्च नव लेख्याः प्रकीर्तिताः ॥
भेद्याः पञ्च विकाराः स्युर्व्यध्याः पञ्चदशैव तु ॥४॥
द्वादशाशस्त्रकृत्याश्च याप्याः सप्त भवन्ति हि ॥
रोगा वर्जयितव्याः स्युर्दश पञ्च च जानता ॥
असाध्यौ वा भवेतां तु याप्यौ चागन्तुसंज्ञितौ ॥५॥

तत्राष्टविधशस्त्रकर्मणां मध्ये नेत्रामयेषु चतुर्विधं कर्म प्रयोज्यम्, अतश्चतुर्विधशस्त्रकर्मार्हान् व्याधीन् समासार्थं वर्गीकृत्य प्राह—छेद्या इत्यादि । द्वादशाशस्त्रकृत्याश्चेति चकाराद् द्वौ बाह्यजावशस्त्रकृत्यौ । याप्या इति स्नेहादिक्रियया याप्यत्वं, न तु छेद्यादिक्रियया । याप्यसाध्यत्वे च द्वयोरवस्थावशात् । वर्जयितव्या असाध्या इत्यर्थः ॥ ४ ॥ ५ ॥

अर्शोऽन्वितं भवति वर्त्म तु यत्तथाऽर्शः
शुष्कं तथाऽर्बुदमथो पिडकाः सिराजाः ॥
जालं सिराजमपि पञ्चविधं तथाऽर्म
छेद्या भवन्ति सह पर्वणिकामयेन ॥ ६ ॥

तानेव छेद्यान् रोगान्नामभिः प्राह—अर्शोऽन्वितमित्यादि । पञ्चविधमर्मेति प्रस्तार्यर्म, शुष्कार्म, रक्तार्म, अधिमांसार्म, स्नाय्वर्मेत्येवं पञ्चविधम् ॥ ६ ॥

उत्सङ्गिनी बहलकर्दमवर्त्मनी च
श्यावं च यच्च पठितं त्विह बद्धवर्त्म ॥
क्लिष्टं च पोथकियुतं खलु यच्च वर्त्म
कुम्भीकिनी च सह शर्करया च लेख्याः ॥७॥

लेख्यान्नामभिः प्राह—उत्सङ्गिनीत्यादि । बहलकर्दमवर्त्मनीत्यत्र वर्त्मेति पदं बहलकर्दमाभ्यां प्रत्येकं संबध्यते ॥ ७ ॥

श्लेष्मोपनाहलगणौ च बिसं च भेद्या
ग्रन्थिश्च यः कृमिकृतोऽञ्जननामिका च ॥

भेद्यान्नामभिः प्राह—श्लेष्मेत्यादि । बिसं बिसवर्त्म ॥—

आदौ सिरा निगदितास्तु ययोः प्रयोगे
पाकौ च यौ नयनयोः पवनोऽन्यतश्च ॥ ८ ॥
पूयालसानिलविपर्ययमन्थसंज्ञाः
स्यन्दास्तु यान्त्युपशमं हि सिराव्यधेन ॥

व्यध्यान्नामभिः प्राह—आदावित्यादि । आदौ सिरा निगदितेत्यादि ययोर्विकारयोः प्रयोगे आदौ सिरा निगदितास्तौ व्यध्यौ, कौ तौ? सिरोत्पातसिराहर्षौ । पवनोऽन्यतः अन्यतोवातः । मन्थसंज्ञा अधिमन्थाश्चत्वारः; स्यन्दा अभिष्यन्दास्तावन्त एव ॥ ८ ॥—

१ 'समासाद्व्यासतः' इति पा० ।

शुष्काक्षिपाककफपित्तविदग्धदृष्टि-
ष्वम्लाख्यशुक्रसहितार्जुनपिष्टकेषु ॥ ९ ॥
अक्लिन्नवर्त्महुतभुग्ध्वजदर्शिशुक्ति-
प्रक्लिन्नवर्त्मसु तथैव बलाससंज्ञे ॥
आगन्तुनाऽऽमययुगेन च दूषितायां
दृष्टौ न शस्त्रपतनं प्रवदन्ति तज्ज्ञाः ॥ १० ॥

अशस्त्रकृत्यानाह—शुष्केत्यादि । हुतभुग्ध्वजदर्शी धूमदर्शीत्यर्थः ॥ ९ ॥ १० ॥

संपश्यतः षडपि येऽभिहितास्तु काचा-
स्ते पक्ष्मकोपसहितास्तु भवन्ति याप्याः ॥

याप्यानाह—संपश्यत इत्यादि । षडपि ये काचा अभिहितास्ते संपश्यतः पुरुषस्य याप्या भवन्तीति संबन्धः ॥—

चत्वार एव पवनप्रभवास्त्वसाध्या
द्वौ पित्तजौ कफनिमित्तज एक एव ॥
अष्टार्धका रुधिरजाश्च गदास्त्रिदोषा-
स्तावन्त एव गदितावपि बाह्यजौ द्वौ ॥ ११ ॥
इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे चिकित्सितप्रविभागविज्ञानीयो नामाष्टमोऽध्यायः ॥ ८ ॥

असाध्यानाह—चत्वार इत्यादि । चत्वार एवेति हताधिमन्थनिमिषगम्भीरदृष्टिवातहतवर्त्माख्याश्चत्वारः । द्वाविति ह्रस्वजाड्य(त्य)जलधिस्रावाख्यौ । एक एव कफस्रावाख्यः । अष्टार्धका इति चत्वार इत्यर्थः । के ते चत्वारः? रक्तस्रावाजकाजातशोणितार्शोव्रणान्वितशुक्राख्याः । तावन्त एवेति चत्वार एवेत्यर्थः । के ते चत्वारः? पूयास्रावनकुलान्ध्याक्षिपाकात्यालज्याख्याः । बाह्यजौ आगन्तुजौ ॥ ११ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रेऽष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ।

अथातो वाताभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

चिकित्सितप्रविभागीयानन्तरं सर्वेषां नयनामयानामभिष्यन्दमूलत्वात्, तत्रापि पित्तादीनां वातस्यैवावरणत्वेन निदानभूतत्वादादौ वाताभिष्यन्दप्रतिषेधो युक्त इत्यत आह—अथात इत्यादि । अत्रादिशब्दो लुप्तो द्रष्टव्यः, तेन वाताभिष्यन्दादिप्रतिषेधं व्याख्यास्याम इत्यर्थः; प्रतिषेधश्चिकित्सितं; एवं पित्ताभिष्यन्दप्रतिषेधादिष्वादिशब्दो द्रष्टव्यः ॥ १ ॥ २ ॥

पुराणसर्पिषा स्निग्धौ स्यन्दाधीमन्थपीडितौ ॥
स्वेदयित्वा यथान्यायं सिरामोक्षेण योजयेत् ॥ ३ ॥
संपादयेद्वस्तिभिस्तु सम्यक् स्नेहविरेचितौ ॥
तर्पणैः पुटपाकैश्च धूमैराश्च्योतनैस्तथा ॥ ४ ॥
नस्यस्नेहपरीषेकैः शिरोबस्तिभिरेव च ॥

तत्र सिराव्यधसाध्येषु पञ्चदशस्वभिष्यन्दाधिमन्थौ पठितौ, सिराव्यधसाध्यानां चाक्षिरोगाणां शोणितमूलत्वान्मूलोच्छेदार्थं पूर्वं दूष्यनिर्हरणं दर्शयन्नाह—पुराणेत्यादि । पुराणं सर्पिः संवत्सरोषितं घृतम्; अन्ये दशवर्षस्थितं घृतं पुराणं कथयन्ति । यथान्यायं यथाशास्त्रमित्यर्थः । तेन दृष्टेः समीपमुत्तमाङ्गमल्पं स्वेदयेत्, दृष्टिरस्वेद्या । यथान्यायमिति पदं स्नेहपानसिरामोक्षाभ्यां सह योजयेत् । तेन स्नेहोपयौगिकोक्तो विधिः 'प्राक् पाचितामदोषाय'इत्यादिकोऽवधारणीयः । तेनात्रापि दोषव्याधिनिरामतायामेव सर्पिःपानादयो विधेयाः । तथा च तन्त्रान्तरं,—"स्वेदः प्रलेपस्तिक्तान्नं धूमो दिनचतुष्टयम् । लङ्घनं चाक्षिरोगाणामामानां पाचनानि षट् ॥ अञ्जनं सर्पिषः पानं कषायं गुरुभोजनम् । नेत्ररोगेषु सामेषु स्नानं च परिवर्जयेत्"—इति । विदेहेऽपि,—"प्रागेवाक्ष्यामये भक्तं त्रिरात्रमगुरु स्मृतम् । उपवासस्त्र्यहं वा स्यान्नक्तं वाऽप्यशनं हितम् ॥ ततश्चतुर्थे दिवसे व्याधौ संजातलक्षणे । यथोक्तास्तु क्रियाः कार्या नस्यसेकाञ्जनादिकाः"—इति । सिरोमोक्षेणेत्यत्र सिरा उपनासिका लालाट्या वा आपाङ्ग्या वा । दूष्यहरणं प्रतिपाद्य दोषचिकित्सितमाह—संपादयेदित्यादि । संपादयेत् योजयेत् । वस्तिभिः स्नेहवस्तिभिर्निरूहैर्वा । सम्यगिति हीनमिथ्यातियोगरहितैः । स्नेहविरेचिताविति स्नेहविरेचनं तु पित्तस्यानुगते पित्तासृगनुगते वा वायौ बलवतो बहुदोषस्य चेति । दुर्बलस्याल्पदोषस्य च पुरुषस्य स्वस्थानगतो मलावृतः स्वतन्त्रो वा बस्तिभिरेवावजेतव्यः । बस्तिरपि मलावृते वाते नैरूहिकः, धातुक्षयजे स्नैहिकः । सम्यक्शब्दो बस्त्यादिषु शिरोबस्त्यन्तेषु संबध्यते । तर्पणादिविधानं क्रियाकल्पे भविष्यति । तत्र सेकः सुखोष्णः, आश्च्योतनं च शीतमेव ॥ ३ ॥ ४ ॥—

वातघ्नानूपजलजमांसाम्लक्काथसेचनैः ॥ ५ ॥
स्नेहैश्चतुर्भिरुष्णैश्च तत्पीताम्बरधारणैः ॥
पयोभिर्वेसवारैश्च शाल्वणैः पायसैस्तथा ॥ ६ ॥
भिषक् संपादयेदेतावुपनाहैश्च पूजितैः ॥

पूर्वं स्वेदयित्वेत्युक्तं, तत्र द्रवादिस्वेदानुपपादयन्नाह—वातघ्नेत्यादि । वातघ्नानि भद्रदार्वादीनि । उष्णैः सुखोष्णैः । उष्णैरिति पदं वातघ्नादिभिः संबध्यते । तत्पीताम्बरधारणैरिति चतुःस्नेहमितवस्त्रधारणैरित्यर्थः । साल्वणैरिति साल्वणस्यैकत्वात् कथं बहुवचनं ? सत्यं, यौगिकैरन्यैरपि द्रव्यैः स्वेदः कार्य इति बोधनार्थं बहुवचनं, स्वेदयित्वा सिरामोक्षेण योजयेदित्युक्तम्॥—

ग्राम्यानूपौदकरसैः स्निग्धैः फलरसान्वितैः ॥ ७ ॥
सुसंस्कृतैः पयोभिश्च तयोराहार इष्यते ॥

न चाभुक्तवतः शस्त्रकर्म कुर्यादित्याशङ्क्याहारमाह—ग्राम्येत्यादि । फलरसान्वितैरिति दाडिमामलकरससंयुक्तैः । सुसंस्कृतैः पयोभिरिति शतावरीशृङ्गवेरप्रभृतिद्रव्यसंस्कृतैरित्यर्थः । तयोः स्यन्दाधिमन्थयोः ॥ ७ ॥—

तथा चोपरिभक्तस्य सर्पिःपानं(ने)प्रशस्यते ॥ ८ ॥
त्रिफलाक्काथसंसिद्धं केवलं जीर्णमेव वा ॥
सिद्धं वातहरैः क्षीरं प्रथमेन गणेन वा ॥ ९ ॥
स्नेहास्तैलाद्विना सिद्धा वातघ्नैस्तर्पणे हिताः ॥

पुराणसर्पिषा स्निग्धावित्युक्तं तस्य च घृतस्यावचारणकालं नियमयन्नाह—तथेत्यादि । केवलमसंस्कृतम् । वातहरैर्भद्रदार्वादिभिः । जेज्जटाचार्यस्तु काकोल्यादिभिर्वातहरैरित्याह । उपरिपानं पिबेदिति शेषः । प्रथमेन गणेन विदारिगन्धादिना । गयदासाचार्यस्तु सर्वत्रापि घृतं मन्यते । तथाच तद्व्याख्यानम्—"त्रिफलाघृतं व्याधिप्रत्यनीकं, वातहरदेवदार्वादिसिद्धं तु दोषप्रत्यनीकं, वातस्यैव पित्तानुबन्धे सति विदारिगन्धादिसिद्धं;" ईदृशे च व्याख्याने 'सिद्धं वातहरैर्वाऽपि प्रथमेन गणेन वा' इति पाठः ॥ ८ ॥ ९ ॥—

स्नैहिकः पुटपाकश्च धूमो नस्यं च तद्विधम् ॥ १० ॥
नस्यादिषु स्थिराक्षीरमधुरैस्तैलमिष्यते ॥

पूर्वं तर्पणैरित्युक्तं, तत्र तर्पणद्रव्याण्याह—स्नैहिक इत्यादि । स्नैहिकः पुटपाकः क्रियाकल्पे वक्ष्यमाणः । तद्विधं स्नैहिकमित्यर्थः ॥ १० ॥—

एरण्डपल्लवे मूले त्वचि वाऽऽजं पयः शृतम् ॥ ११ ॥
कण्टकार्याश्च मूलेषु सुखोष्णं सेचने हितम् ॥

आन्तरमुपक्रममभिधाय बाह्यमाह—एरण्डेत्यादि । सेचने इत्यत्र चकारो लुप्तो द्रष्टव्यः; तेन न केवलं सेके आश्चोतने चेत्यर्थः । तत्र सेके सुखोष्णं, आश्चोतने च शीतमेवेत्यर्थः ॥ ११ ॥—

सैन्धवोदीच्ययष्ट्याह्वपिप्पलीभिः शृतं पयः ॥ १२ ॥
हितमर्धोदकं सेके तथाऽऽश्च्योतनमेव च ॥

सैन्धवेत्यादि । अर्धोदकमिति अर्धमुदकं यस्मिन् क्षीरे तत् क्षीरं सेके हितं तथा आश्च्योतने च; न पुनः पानादौ । सैन्धवादिप्रमाणं तु क्षीरादष्टमांशमेव ॥ १२ ॥—

ह्रीवेरवक्रमञ्जिष्ठोदुम्बरत्वक्षु साधितम् ॥ १३ ॥
साम्भश्छागं पयो वाऽपि शूलाश्च्योतनमुत्तमम् ॥

ह्रीबेरमित्यादि । ह्रीबेरं बालकम् । वक्रं तगरम् । साम्भ इति चतुर्गुणोदकं, अर्धोदकमिति केचित् । आश्च्योतनमक्षिपूरणम् ॥ १३ ॥—

मधुकं रजनीं पथ्यां देवदारु च पेषयेत् ॥ १४ ॥
आजेन पयसा श्रेष्ठमभिष्यन्दे तदञ्जनम् ॥

मधुकमित्यादि । केचिदमुं पाठं न पठन्ति ॥ १४ ॥—

१ 'भक्तस्योपरि सर्पिस्तौ पिबेतां चापि मानवौ' इति पा० ।

गैरिकं सैन्धवं कृष्णां नागरं च यथोत्तरम् ॥ १५ ॥
द्विगुणं पिष्टमद्भिस्तु गुटिकाञ्जनमिष्यते ॥

गैरिकमित्यादि । यथोत्तरं द्विगुणमिति गैरिकाद्द्विगुणं सैन्धवं, सैन्धवाद्द्विगुणा कृष्णा, ततोऽपि द्विगुणं नागरम् । गुटिकाञ्जनमिष्यते इति स्नैहिकपुटपाकादिजनितकफानुबन्धस्य गुटिकाञ्जनम् । केचिदत्राप्याजेन पयसेति संबध्नन्ति; तेनाजपयसा पिष्टमद्भिर्वा । 'नागरं च यथोत्तरं' इत्यत्र 'गोदन्तं च यथोत्तरं' इति पठन्ति; स च पाठो जेज्जटाचार्येण दूषितः ॥ १५ ॥—

स्नेहाञ्जनं हितं चात्र वक्ष्यते तद्यथाविधि ॥ १६ ॥

स्नेहेत्यादि । यथाविधीति विधिमनतिक्रम्य, एतेनापतर्पणसिराव्यधकुपितवातेऽभिष्यन्दे स्नेहाञ्जनं हितमित्यर्थः । अत्रैके 'ताम्रपात्रस्थितं मांसं सर्पिःसैन्धवसंयुतं' इति स्नेहाञ्जनमाहुः । अन्ये तु 'वसा चानूपजलजा सैन्धवेन समायुता' इत्यादिना वक्ष्यमाणं स्नेहाञ्जनं कथयन्ति ॥ १६ ॥

रोगो यश्चान्यतोवातो यश्च मारुतपर्ययः ॥
अनेनैव विधानेन भिषक् तावपि साधयेत् ॥ १७ ॥

वाताभिष्यन्दक्रियामन्यस्मिन्नपि वातजेऽक्षिरोगेऽतिदिशन्नाह—रोग इत्यादि ॥ १७ ॥

पूर्वभक्तं हितं सर्पिः क्षीरं वाऽप्यथ भोजने ॥
वृक्षादन्यां कपित्थे च पञ्चमूले महत्यपि ॥ १८ ॥
सक्षीरं कर्कटरसे सिद्धं चात्र घृतं पिबेत् ॥
सिद्धं वा हितमत्राहुः पत्तूरार्तगलाग्निकैः ॥ १९ ॥
सक्षीरं मेषशृङ्ग्या वा सर्पिर्वीरतरेण वा ॥

अन्यतोवातमारुतपर्यययोः सामान्यां चिकित्सामभिधाय विशेषचिकित्सामाह—पूर्वभक्तमित्यादि । तदेव घृतमाह—वृक्षादन्यामित्यादि । वृक्षादनी बन्दाकः, वृक्षकलम्बुकेत्यन्ये । वृक्षादन्यादीनां सप्तद्रव्याणामत्र कषायः । अगर्भं घृतमिदम् । सिद्धमित्यादि । पत्तूरः सितिवारः सिरिवालीति लोके प्रसिद्धा । आर्तगलः कण्टकफलो जलमुक्तदेशजः, 'ककुभ' इत्यन्ये । अग्निकोऽजमोदा । पत्तूरादीनां कषाये क्षीरे च साधितं सर्पिः मेषशृङ्गीकाथे वा सक्षीरे साधितम् । वीरतरः शरः वेल्लन्तरो वा, तस्य क्वाथे वा सक्षीरे साधितं सर्पिरन्यतोवातमारुतपर्यययोर्हितम् । इदमपि घृतत्रयमगर्भम् ॥ १८ ॥ १९ ॥—

सैन्धवं दारु शुण्ठी च मातुलुङ्गरसो घृतम् ॥ २० ॥
स्तन्योदकाभ्यां कर्तव्यं शुष्कपाके तदञ्जनम् ॥
पूजितं सर्पिषश्चात्र पानमक्ष्णोश्च तर्पणम् ॥ २१ ॥
घृतेन जीवनीयेन नस्यं तैलेन चाणुना ॥
परिषेके हितं चात्र पयः शीतंससैन्धवम् ॥ २२ ॥
रजनीदारुसिद्धं वा सैन्धवेन समायुतम् ॥
सर्पिर्युतं स्तन्यघृष्टमञ्जनं वा महौषधम् ॥ २३ ॥

१ 'विधेरनतिक्रमात्' इति पा० । २ 'मासं सर्पिः सैन्धवसंयुतम्' इति पा० ।

वसा वाऽऽनूपजलजा सैन्धवेन समायुता ॥
नागरोन्मिश्रिता किञ्चिच्छुष्कपाके तदञ्जनम् ॥२४॥

सैन्धवमित्यादि । सैन्धवादिद्रव्यत्रयाणां कल्केन मातुलुङ्गादिद्रव्यचतुष्केण रसक्रियां निष्पाद्य शुष्कपाकेऽञ्जनं कार्य; यतो रसक्रियाञ्जनमिदम् । पूजितमित्यादि । सर्पिषो 'जीवनीयसिद्धस्य' इति शेषः । अत्र शुष्कपाके नस्यं जीवनीयेन घृतेनैव; अणुना तैलेन वा नस्यं पूजितम् । अणुतैलं तु शालाक्यतन्त्रोक्तं, न पुनर्वातव्याध्युदितम् । परिषेके इत्यादि । शीतमिति शृतशीतमित्यर्थः । ससैन्धवमिति सशब्द ईषदर्थः । रजनीदारुसिद्धं वेत्यत्र क्षीरमिति संबध्यते । सैन्धवेन समायुतमल्पसैन्धवयुक्तमित्यर्थः । सर्पिरित्यादि ।—महौषधं वा घृतस्त्रीस्तन्ययुक्तं पाषाणघृष्टमित्यर्थः, अञ्जनं वा । वसेत्यादि ।—आनूपजलजा वा वसा स्तोकसैन्धवयुक्ता किञ्चिच्छुण्ठीयुक्ता पाषाणघृष्टा सती शुष्कपाकेऽञ्जनमिति संबन्धः ॥ २०—२४ ॥

पवनप्रभवा रोगा ये केचिद्दृष्टिनाशनाः ॥
बीजेनानेन मतिमान् तेषु कर्म प्रयोजयेत् ॥ २५ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे वाताभिष्यन्दप्रतिषेधो नाम नवमोऽध्यायः ॥ ९ ॥

इदानीं वातजेषु तिमिरकाचादिष्वेषैव क्रिया कर्तव्येति दर्शयन्नाह—पवनेत्यादि । दृष्टिनाशनाः तिमिरकाचादयः । बीजेन बीजभूतेन । अनेन वाताभिष्यन्दोक्तकर्मणा । मतिमान् ऊहापोहवित् ॥ २५ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ।

अथातः पित्ताभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

वाताभिष्यन्दप्रतिषेधानन्तरं वातादृश तथा पित्तादिति वचनात् पित्ताभिष्यन्दप्रतिषेधारम्भः—अथात इत्यादि ॥१॥२॥

पित्तस्यन्दे पैत्तिके चाधिमन्थे
रक्तास्रावः स्रंसनं चापि कार्यम् ॥
अक्ष्णोः सेकालेपनस्याञ्जनानि
पैत्ते च स्याद्विसर्पे विधानम् ॥ ३ ॥

पित्तेत्यादि । स्रंसनं विरेकः । पित्तविसर्पविधानं 'उशीरलामज्जकचन्दनानि' इत्यादिप्रलेपाः । पूर्ववदत्राप्यपतर्पणादिभिः कृतामपाचनस्य स्नेहपूर्वकः सिरामोक्षः ॥ ३ ॥

गुन्द्रां शालिं शैवलं शैलभेदं
दार्वीमेलामुत्पलं रोध्रमभ्रम् ॥
पद्मात्पत्रं शर्करा दर्भमिक्षुं
तालं रोध्रं वेतसं पद्मकं च ॥ ४ ॥

द्राक्षां क्षौद्रं चन्दनं यष्टिकाह्वं
योषित्क्षीरं रात्र्यनन्ते च पिष्ट्वा ॥
सर्पिःसिद्धं तर्पणे सेकनस्ये
शस्तं क्षीरं सिद्धमेतेषु चाजम् ॥ ५ ॥
योज्यो वर्गो व्यस्त एषोऽन्यथा वा
सम्यङ्नस्येऽष्टार्धसंख्येऽपि नित्यम् ॥

इदानीं पित्तस्याभिष्यन्दयौगिकद्रव्याण्याह—गुन्द्रामित्यादि । गुन्द्रा एरकाभेदः, गवेधुकेत्यन्ये, शैवलं दूर्वा, शैलभेदः पाषाणभेदः, चन्दनं रक्तचन्दनं, रात्रिर्हरिद्रा, अनन्ता उत्पलसारिवा, योषित्क्षीरं स्त्रीस्तन्यं, शर्करादेः साहचर्यात् कल्कद्रव्ये इक्षुरिति इक्षुरसेन द्रवकार्यम् । व्यस्तोऽसमस्तः, अन्यथा वा समस्त इत्यर्थः । यद्यपि वर्गत्वात् 'समस्तं वर्गमर्धं वा यथालाभमथापि वा' इति शल्यतन्त्रोक्तपरिभाषयैव समस्तव्यस्तता प्राप्ता, तथाऽपि शालाक्यतन्त्रत्वादत्र पुनरुक्ता । नस्ये अष्टार्धसंख्ये चतुःसंख्ये प्रतिमर्षावपीडनस्यशिरोविरेचनाख्ये ॥४॥ ॥ ५ ॥—

क्रियाः सर्वाः पित्तहर्यः प्रशस्ता-
स्त्र्यहाच्चोर्ध्वं क्षीरसर्पिश्च नस्यम् ॥ ६ ॥

क्रिया इत्यादि । क्षीरसर्पिश्चेति 'भोजने' इति शेषः । नस्यमित्युपलक्षणं, तेनाश्च्योतनसेकाञ्जनादि गृह्यते । यद्यपि 'पैत्ते च स्याद्विसर्पे विधानं' इत्यनेनैव पित्तहरी क्रिया कथिता, तथाऽपि तत्र व्याधिप्रत्यनीकतयोक्ता, अत्र तु दोषप्रत्यनीकत्वेनेति न दोषः ॥ ६ ॥

पालाशं स्याच्छोणितं चाञ्जनार्थे
शल्लक्या वा शर्कराक्षौद्रयुक्तम् ॥

रक्तपित्तप्रसादकाञ्जनानां रसक्रिया प्रथमा, अतस्तामाह—पालाशमित्यादि । पालाशं शोणितं किंशुकरसः; अन्ये पलाशखपुरमाहुः ॥—

रसक्रियां शर्कराक्षौद्रयुक्तां
पालिन्द्यां वा मधुके वाऽपि कुर्यात् ॥ ७ ॥

अपरामपि रसक्रियामाह—रसक्रियामित्यादि । रसक्रिया फाणिताकृतिः । तथा चोक्तम्—"गृहीत्वा क्वाथकल्पेन क्वाथं पूतं पुनः पुनः । क्वाथयेत् फाणिताकारमेषा प्रोक्ता रसक्रिया" इति । पालिन्दी श्यामा त्रिवृत्, सारिवामन्ये ॥ ७ ॥

मुस्ता फेनः सागरस्योत्पलं च
कृमिघ्नैलाधात्रिबीजाद्रसश्च ॥

अपरमपि रसक्रियाञ्जनमाह—मुस्तेत्यादि । कृमिघ्ना विडङ्गाः, धात्री आमलकं, बीजः पीतसारः 'बीजक' इति यावत्, मुस्तादीनां रसे रसक्रिया कार्या ॥—

तालीशैलागैरिकोशीरशङ्खै-
रेवं युञ्ज्यादञ्जनं स्तन्यपिष्टैः ॥ ८ ॥

वर्त्यञ्जनमाह—तालीशेत्यादि । काशीशैलेति केचित् पठन्ति ॥ ८ ॥

चूर्णं कुर्यादञ्जनार्थे रसो वा
स्तन्योपेतो धातकीस्यन्दनाभ्याम् ॥

चूर्णाञ्जनमाह—चूर्णमित्यादि । रसो वेति रसक्रिया वेत्यर्थः । स्यन्दनोऽनेनैव नाम्ना प्रसिद्धः । केचित् चन्दनाभ्यामिति पठन्ति ॥—

योषित्स्तन्यं शातकुम्भं विघृष्टं
क्षौद्रोपेतं कैंशुकं चापि पुष्पम् ॥ ९ ॥

योषिदित्यादि । शातकुम्भं सुवर्णं, तच्च योषित्स्तन्येन घृष्टमञ्जनम् । क्षौद्रयुक्तं वा किंशुकपुष्पं घृष्टं ताम्रपात्रादावञ्जनम् ॥ ९ ॥

रोध्रं द्राक्षां शर्करामुत्पलं च
नार्याः क्षीरे यष्टिकाह्वं वचां च ॥
पिष्ट्वा क्षीरे वर्णकस्य त्वचं च
तोयोन्मिश्रे चन्दनोदुम्बरे च ॥ १० ॥

रोध्रमित्यादि । रोध्रादिवचान्तं नारीक्षीरे पिष्टमेकमञ्जनम् । वर्णको रोचनिका; तस्यास्त्वक् नारीक्षीरेण पिष्टा द्वितीयमञ्जनम् । अन्ये वर्णकत्वक्शब्देन कर्णिकारवृक्षस्य वल्कलं कथयन्ति, तन्नेच्छति गयी । तोयोन्मिश्रे चन्दनोदुम्बरे चेति तृतीयाञ्जनं, तोयोन्मिश्रे वालकयुक्ते, चन्दनं कुचन्दनं; पञ्जिकाकारस्तु चन्दनोदुम्बरं भृशतरं चूर्णितं वस्त्रबद्धं तोयप्लुतमाश्च्योतनाञ्जनमाह ॥ १० ॥

कार्यः फेनः सागरस्याञ्जनार्थे
नारीस्तन्ये माक्षिके चापि घृष्टः ॥
योषित्स्तन्ये स्थापितं यष्टिकाह्वं
रोध्रं द्राक्षां शर्करामुत्पलं च ॥ ११ ॥
क्षौमावद्धं पथ्यमाश्च्योतने वा
सर्पिर्घृष्टं यष्टिकाह्वं सरोध्रम् ॥
तोयोन्मिश्राः काश्मरीधात्रिपथ्या-
स्तद्वच्चाहुः कट्फलं चाम्बुनैव ॥ १२ ॥

कार्य इत्यादि । अपरमाश्च्योतनमाह—नारीत्यादि । यष्टिमधुकादिद्रव्यमतीव चूर्णितं स्त्रीस्तन्यस्थापितं क्षौमवस्त्रावबद्धमाश्च्योतने हितमित्यर्थः । यष्टिकाह्वं सरोध्रमिति यष्टिमधुकरोध्रे वा घृतेघृष्टे पूर्ववदाश्च्योतनम् ॥ ११ ॥ १२ ॥

एषोऽम्लाख्येऽनुक्रमश्चापि शुक्तौ
कार्यः सर्वः स्यात्सिरामोक्षवर्ज्यः ॥ १३ ॥

इदानीमम्लाध्युषितशुक्त्योः सामान्यचिकित्सामाह—एष इत्यादि । केचिदम्लाध्युषितशुक्त्योरशस्त्रकृत्यत्वादेव सिरामोक्षवर्जनं सिद्धम्, अतः 'शिरामोक्षवर्ज्य' इति पाठं न पठन्ति ॥ १३ ॥

---

१ 'नावने च' इति पा० । २ 'शस्ताऽशेषा पित्तहन्त्री क्रिया च त्र्यहादूर्ध्वं क्षीरसर्पिश्च नस्यम्' इति पा० ।

१ 'सर्पिर्भृष्टं' इति पा० । २ 'घृतभृष्टे' इति पा० ।

सर्पिः पेयं त्रैफलं तैल्वकं वा
पेयं वा स्यात् केवलं यत् पुराणम् ॥

अम्लाध्युषिते विशेषचिकित्सितमाह—सर्पिरित्यादि । आद्यं घृतद्वयं संशोधनं, पुराणघृतं तु संशमनम् ॥—

दोषेऽधस्ताच्छुक्तिकायामपास्ते
शीतैर्द्रव्यैरञ्जनं कार्यमाशु ॥ १४ ॥

शुक्तिकायां विशेषचिकित्सितमाह—दोषे इत्यादि । अधस्तादपास्ते दोषे 'विरेचनेन' इति शेषः ॥ १४ ॥

वैदूर्यं यत् स्फाटिकं वैद्रुमं च
मौक्तं शाङ्खं राजतं शातकुम्भम् ॥
चूर्णं सूक्ष्मं शर्कराक्षौद्रयुक्तं
शुक्तिं हन्यादञ्जनं चैतदाशु ॥ १५ ॥

तान्येव शीतद्रव्याण्याह–वैदूर्यमित्यादि ॥ १५ ॥

युञ्ज्यात् सर्पिर्धूमदर्शी नरस्तु
शेषं कुर्याद्रक्तपित्ते विधानम् ॥
यच्चैवान्यत् पित्तहृच्चापि सर्वं
यद्वीसर्पे पैत्तिके वै विधानम् ॥ १६ ॥
इति श्रीसुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे पित्ताभिष्यन्दप्रतिषेधो नाम दशमोऽध्यायः ॥ १० ॥

धूमदर्शिनश्चिकित्सितमाह—युञ्ज्यादित्यादि । रक्तपित्ते विधानमिति रक्ताभिष्यन्दे पित्ताभिष्यन्दे च चिकित्सितं यदुक्तं तदित्यर्थः । अन्यत् पित्तहृदिति पित्तविदग्धदृष्टेर्यद्विधानं तदत्र योजयेत् । यद्वीसर्पे पैत्तिके वै विधानमिति पित्तविसर्पोक्तं विधानं योजयेदिति संबन्धः ॥ १६ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः ।

अथातः श्लेष्माभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

पित्ताभिष्यन्दानन्तरं दोषक्रमेण कफाभिष्यन्दप्रतिषेधारम्भः—अथात इत्यादि ॥ १ ॥ २ ॥

स्यन्दाधिमन्थौ कफजौ प्रवृद्धौ
जयेत् सिराणामथ मोक्षणेन ॥
स्वेदावपीडाञ्जनधूमसेक-
प्रलेपयोगैः कवलग्रहैश्च ॥ ३ ॥
रूक्षैस्तथाऽऽश्च्योतनसंविधानै-
स्तथैव रूक्षैः पुटपाकयोगैः ॥
त्र्यहात्त्र्यहाच्चाप्यपतर्पणान्ते
प्रातस्तयोस्तिक्तघृतं प्रशस्तम् ॥ ४ ॥
तदन्नपानं च समाचरेद्धि
यच्छ्लेष्मणो नैव करोति वृद्धिम् ॥

सिराणामथमोक्षणेनेत्यत्राथशब्दादयमभिप्रायः—कृतस्नेहादिपूर्वक्रमस्य प्रवृद्धावस्थायां सिरामोक्षः । पूर्वक्रममाह—स्वेदावपीडेत्यादि । त्र्यहात् त्र्यहादिति अतर्पणप्रेरितदिनचतुष्टयस्य तिक्तद्रव्यसाधितं प्रातः प्रशस्तं घृतं, तेन स्निग्धस्य त्र्यहात् सिरामोक्षः । 'प्रातस्तयोस्तिक्तघृतं प्रशस्तं' इत्यत्र 'तौ प्रातरेवानु घृतं पिबेतां' इति केचित् पठन्ति । 'तदन्नपानं च समाचरेद्धि' इत्यत्र 'तत् प्रातरन्नं च समाचरेद्धि' इति केचित् पठन्ति; प्रातर्ग्रहणं द्विरन्नकालनिषेधार्थमिति व्याख्यानयन्ति ॥ ३ ॥ ४ ॥—

कुटन्नटास्फोटफणिज्झबिल्व-
पत्तूरपिल्वर्ककपित्थभङ्गैः ॥ ५ ॥
स्वेदं विदध्यात्

स्वेदद्रव्याण्याह—कुटन्नटेत्यादि । कुटन्नटं तगरं; फणिज्झकस्तीक्ष्णगन्धः स्वनाम्नैव प्रसिद्धः, अन्ये निर्गुण्डीमाहुः; पत्तूरः शरवालिकः; भङ्गैः पत्रभङ्गैः, अन्ये भङ्गशब्देन पल्लवानाहुः ॥—

अथवाऽनुलेपं
बर्हिष्ठशुण्ठीसुरकाष्ठकुष्ठैः ॥

अनुलेपद्रव्याण्याह—अथवेत्यादि । बर्हिष्ठं बालकम् ॥५॥—

सिन्धूत्थहिङ्गुत्रिफलामधूक-
प्रपौण्डरीकाञ्जनतुत्थताम्रैः ॥ ६ ॥
पिष्टैर्जलेनाञ्जनवर्तयः स्युः
पथ्याहरिद्रामधुकाञ्जनैर्वा ॥
त्रीण्यूषणानि त्रिफला हरिद्रा
विडङ्गसारश्च समानि च स्युः ॥ ७ ॥
बर्हिष्ठकुष्ठामरकाष्ठशङ्ख-
पाठामलव्योषमनःशिलाश्च ॥
पिष्ट्वाऽम्बुना वा कुसुमानि जाति-
करञ्जशोभाञ्जनजानि युञ्ज्यात् ॥ ८ ॥
फलं प्रकीर्यादथवाऽपि शिग्रोः
पुष्पं च तुल्यं बृहतीद्वयस्य ॥
रसाञ्जनं सैन्धवचन्दनं च
मनःशिलाले लशुनं च तुल्यम् ॥ ९ ॥
पिष्ट्वाऽञ्जनार्थे कफजेषु धीमान्
वर्तीर्विदध्यान्नयनामयेषु ॥

वर्त्यञ्जनद्रव्याण्याह—सिन्धूत्थेत्यादि । त्रीण्यूषणानीति त्रिकटुकमित्यर्थः । बर्हिष्ठं बालकम् । अमरकाष्ठं देवदारु । प्रकीर्यः कण्टकिकरञ्जः । केचित् पुष्पमपि प्रकीर्यादेवेति कथयन्ति । तथा बृहतीद्वयस्य पुष्पं फलं च । आलं हरितालम् । एता

१ 'पश्चात्' इति पा० । २ 'पाठानखव्योषमनःशिलाश्च' इति पा० । ३ 'तुत्थं' इति पा० ।

वर्त्योऽर्धश्लोकसमापनाः पञ्च त्र्यूषणादिद्रव्यैर्ज्ञेयाः । पञ्जिकायां तु 'व्योषमनःशिलाश्च' इत्यनन्तरं 'मूर्वा च जातीमुकुलानि चापि पिष्ट्वाऽम्बुनैतान् वितरेत्तथैव' इति पठ्यते; व्याख्यानं च—त्र्यूषणाद्यष्टाङ्गमञ्जनं, बर्हिष्ठादि द्वादशाङ्गं, अथवेत्यनेन विकल्पवाचिना कण्टकिकरञ्जफलतुल्यांशैर्वक्ष्यमाणैरौषधैरेकमञ्जनं, शिग्रुफलतुल्यांशैर्वक्ष्यमाणैर्द्वितीयमञ्जनम् । 'सिन्धूत्थहिङ्गु' इत्यत्र केचित् 'सिन्धुप्रसूतं' इति पठन्ति ॥ ६–९ ॥—

रोगे बलासग्रथितेऽञ्जनं ज्ञैः
कर्तव्यमेतत् सुविशुद्धकाये ॥ १० ॥
नीलान् यवान् गव्यपयोऽनुपीतान्
शलाकिनः शुष्कतनून् विदह्य ॥
तथाऽर्जकास्फोतकपित्थबिल्व-
निर्गुण्डिजातीकुसुमानि चैव ॥ ११ ॥
तत्क्षारवत्सैन्धवतुत्थरोचनं
पक्वं विदध्यादथ लोहनाड्याम् ॥
एतद्बलासग्रथितेऽञ्जनं स्या-
देषोऽनुकल्पस्तु फणिज्झकादौ ॥ १२ ॥

रोगे इत्यादि । ज्ञैरिति कुशलैर्वैद्यैरित्यर्थः । एतद् वक्ष्यमाणं क्षाराञ्जनम् । सुविशुद्धकाये इति सिराव्यधविरेकशिरोविरेकैरित्यर्थः । तदेव क्षाराञ्जनं व्युत्पादयन्नाह—नीलानित्यादि । नीलानपक्वान् । गव्यपयोऽनुपीतान् कृष्णगोदुग्धभावितान्, पीतानिति वक्तव्ये अनुपीतानिति यत् कृतं तत् सप्ताहं सप्ताहद्वयं वा भावना कार्येति बोधयति । शलाकिनः शूकयुक्तान् । तदिति भस्मेत्यर्थः । नीलयवादिभस्मप्रस्थं, उष्णोदकाढकेन सह मेलयित्वा पुनः पुनरास्रावयेत्, यावत् क्षारोदकं तीक्ष्णं पिच्छिलं रक्तं च स्यात्, तदा भस्म विहाय तत्र क्षारोदके सैन्धवतुत्थरोचनमावापं क्षारोदकाद्द्वात्रिंशद्भागं दत्त्वा पचेत् । केचित् सैन्धवादिद्रव्याणि भस्मार्थं नत्वावापार्थमिति वदन्ति, तन्मतेऽप्रतिवापमेव पक्तव्यम् । फणिज्झकादावित्यत्रादिशब्दात् कुसुमादयो गृह्यन्ते ॥ ११–१२ ॥

महौषधं मागधिकां च मुस्तां
ससैन्धवं यन्मरिचं च शुक्लम् ॥
तन्मातुलुङ्गस्वरसेन पिष्टं
नेत्राञ्जनं पिष्टकमाशु हन्यात् ॥ १३ ॥

पिष्टकरोगेऽञ्जनमाह—महौषधमित्यादि । मरिचं शुक्लं शोभाञ्जनबीजम् ॥ १३ ॥

फले बृहत्या मगधोद्भवानां
निधाय कल्कं फलपाककाले ॥
स्रोतोजयुक्तं च तदुद्धृतं स्या-
त्तद्वत्तु पिष्टे

अपरमप्यञ्जनमाह—फले इत्यादि । फलपाककाले कण्टकारिफलमुद्धृतबीजं सौवीराञ्जनसमभागेन पिप्पलीकल्केन पूरयेत्, तत्कल्कं सप्तरात्रादनन्तरमुद्धृतं महौषधाद्यञ्जनवत् पिष्टकरोगे हितं पथ्यमित्यर्थः ॥—

विधिरेष चापि ॥ १४ ॥
वार्ताकशिग्र्विन्द्रसुरापटोल-
किराततिक्तामलकीफलेषु ॥

कण्टकारिफलविधिमन्यत्रापि फलेऽतिदिशन्नाह—विधिरित्यादि । इन्द्रसुरा इन्द्रवारुणी ॥ १४ ॥—

कासीससामुद्ररसाञ्जनानि
जात्यास्तथा क्षा(को)रकमेव चापि ॥ १५ ॥
प्रक्लिन्नवर्त्मन्युपदिश्यते तु
योगाञ्जनं तन्मधुनाऽवघृष्टम् ॥

प्रक्लिन्नवर्त्मनि रोगे योगाञ्जनमाह—कासीसेत्यादि । जात्याः कोरकं जातीकलिका ॥ १५ ॥—

नादेयमग्र्यं मरिचं च शुक्लं
नेपालजाता च समप्रमाणा ॥ १६ ॥
समातुलुङ्गद्रव एष योगः
कण्डूं निहन्यात् सकृदञ्जनेन ॥

सर्वेषां कफजाक्षिरोगाणामुपद्रवभूतायाः कण्ड्वाश्चिकित्सामाह—नादेयमित्यादि । नादेयमिति सैन्धवमित्यर्थः । मरिचं च शुक्लमिति शोभाञ्जनबीजमित्यर्थः; अन्ये शुक्लमेव मरिचं कथयन्ति । नेपालजाता मनःशिला ॥ १६ ॥—

सशृङ्गवेरं सुरदारु मुस्तं
सिन्धुप्रभू(सू)तं मुकुलानि जात्याः ॥ १७ ॥
सुराप्रपिष्टं विदमञ्जनं हि
कण्ड्वां च शोफे च हितं वदन्ति ॥

कण्ड्वामपरमप्यञ्जनमाह—सेत्यादि ॥ १७ ॥—

स्यन्दाधिमन्थक्रममाचरेच्च
सर्वेषु चैतेषु सदाऽप्रमत्तः ॥ १८ ॥
(विशेषतो नावनमेव कार्यं
संसर्जनं चापि यथोपदिष्टम्[१] ॥)

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे कफाभिष्यन्दप्रतिषेधो नामैकादशोऽध्यायः ॥ ११ ॥

इदानीं बलासग्रथितपिष्टकप्रक्लिन्नवर्त्मसु विशेषचिकित्सामभिधाय सामान्यचिकित्सामाह—स्यन्देत्यादि । एतेषु बलासग्रथितपिष्टकप्रक्लिन्नवर्त्मसु । चकारादन्येष्वपि कफजाक्षिरोगेषु । अप्रमत्तः सावधानः ॥ १८ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे एकादशोऽध्यायः ॥ ११ ॥

---

१ 'नीलान् पक्वान्' इति पा० । २ 'मुख्यां' इति पा० । ३ 'फलं बृहत्या मगधोद्भवानामादाय' इति पा० । ४ 'स्रोतोजयुक्तं खलु सप्तरात्रात्तदुद्धृतं स्यात्तु तथैव पथ्यम्' इति पा० ।

१ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते ।

द्वादशोऽध्यायः।

अथातो रक्ताभिष्यन्दप्रतिषेधं व्याख्यास्यामः॥ १॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

वातपित्तकफकृतानभिष्यन्दान् प्रतिपाद्य परिशिष्टं रक्ताभिष्यन्दप्रतिषेधमाह—अथात इत्यादि॥ १॥ २॥

मन्थं स्यन्दं सिरोत्पातं सिराहर्षं च रक्तजम्॥
एकेनैव विधानेन चिकित्सेच्चतुरो गदान्॥ ३॥

मन्थमित्यादि। अत्र मन्थस्य प्रागुपादानं स्यन्दाद्गरीयस्त्वख्यापनार्थम्॥ ३॥

व्याध्यार्तांश्चतुरोऽप्येतान् स्निग्धान्कौम्भेन सर्पिषा॥
रसैरुदारैरथवा सिरामोक्षेण योजयेत्॥ ४॥

तदेव विधानमाह—व्याध्यार्तानित्यादि। व्याधिभिरार्ताः पीडिता व्याध्यार्ताः। कौम्भेन शतवर्षस्थितेनेत्यर्थः। रसैरुदारैरथवेति मांसरसैरधिकस्नेहैर्वा स्निग्धानित्यर्थः। दूष्यहरणं प्रतिपादयन्नाह—सिरेत्यादि॥ ४॥

विरिक्तानां प्रकामं च शिरांस्येषां विशोधयेत्॥
वैरेचनिकसिद्धेन सितायुक्तेन सर्पिषा॥ ५॥
(मज्ज्ञा वा तद्विमिश्रेण मेदसा तच्छृतेन वा)

दूष्यहरणं प्रतिपाद्य दोषहरणं प्रतिपादयन्नाह—विरिक्तानामित्यादि। शिरांसीति बहुवचनं प्रतिरोगापेक्षया दूष्येऽपहृते विरेचनेन दोषहरणं, ततः शिरोविरेचनं; तदपि सर्पिषा नतु तैलेन, घृतस्य चक्षुष्यत्वात्, रक्ताविरुद्धत्वाच्च। तच्च संस्कारमाह—वैरेचनिकसिद्धेनेति; शिरोविरेचनद्रव्यसिद्धेन, केचित् त्रिवृतादिद्रव्यसिद्धेनेत्याहुः। केचिदत्र मज्ज्ञा वा तद्विपक्वेनेत्यादिपाठं पठन्ति, स चानार्षः॥ ५॥

ततः प्रदेहाः परिषेचनानि
नस्यानि धूमाश्च यथास्वमेव॥
आश्च्योतनाभ्यञ्जनतर्पणानि
स्निग्धाश्च कार्याः पुटपाकयोगाः॥ ६॥

अन्तःशुद्धिकरं क्रियाक्रममुक्त्वा बहिःशुद्धिकरं क्रियाक्रमसंग्रहमुद्दिशन्नाह—तत इत्यादि। धूमाश्च यथास्वमात्मीयानतिक्रमेण, रक्तस्य दूष्यस्य कफानुबन्धे कफहरद्रव्यवर्तिकृताः, वातानुबन्धे तु स्नैहिकाः; एवमन्यत्रापि यथास्वमिति संबन्धनीयम्। अभ्यञ्जनमञ्जनं; तच्च प्रसादनं रक्तपित्ते, सव्रणशुक्रादौ तु रोपणं; अन्ये पुनरभ्यञ्जनमेव शतधौतघृतादिनेच्छन्ति॥ ६॥

नीलोत्पलोशीरकटङ्कटेरी-
कालीययष्टीमधुमुस्तरोध्रैः॥
सपद्मकैर्धौतघृतप्रदिग्धै-
रक्ष्णोः प्रलेपं परितः प्रकुर्यात्॥ ७॥

इदानीं प्रलेपद्रव्याण्याह—नीलोत्पलेत्यादि। कटङ्कटेरी दारुहरिद्रा। कालीयकं दारुहरिद्रानुकारि प्रसिद्धम्। धौतघृतप्रदिग्धैर्मिश्रैरित्यर्थः॥ ७॥

रुजायां चाप्यतिभृशं स्वेदाश्च मृदवो हिताः॥
अक्ष्णोः समन्ततः कार्यं पातनं च जलौकसाम्॥८॥
घृतस्य महती मात्रा पीता चार्तिं नियच्छति॥
पित्ताभिष्यन्दशमनो विधिश्चाप्युपपादितः॥ ९॥

परिषेचनाद्युद्दिष्टं यदनिर्दिष्टं तत्पित्ताभिष्यन्दनिर्दिष्टद्रव्यैरतिदिशन् क्रियाक्रमेऽनिर्दिष्टं च निर्दिशन्नाह—रुजायामित्यादि। रुजो हि भवन्ति सिराव्यधादिकृतवातानुबन्धात्, वातावृताद्रक्ताद्वा; तत्र वातजायां तीव्ररुजायां मृदवः स्वेदाः, दूष्यरक्तावरोधाद्बहुशोणितजायां जलौकःपातनं; वातजायामेवान्तरमौषधं घृतस्य महत्या मात्रया पानम्; अल्पशोणितजायां पित्ताभिष्यन्दशमनो विधिः। नियच्छति निवारयति॥ ८॥ ९॥

कशेरुमधुकाभ्यां वा चूर्णमम्बरसंवृतम्॥
न्यस्तमप्स्वान्तरिक्षासु हितमाश्च्योतनं भवेत्॥१०॥

आश्च्योतनमाह—कसेर्वित्यादि। अम्बरसंवृतं वस्त्रवेष्टितं, न्यस्तं क्षिप्तं, आन्तरीक्षोदकालाभे आकाशगुणभूयिष्ठं भूमिस्थमुदकं गृह्यते। केचित् परिषेकमप्यनेनेवेच्छन्ति॥ १०॥

पाटल्यर्जुनश्रीपर्णीधातकीधात्रिबिल्वतः॥
पुष्पाण्यथ बृहत्योश्च बिम्बीलोटाच्च तुल्यशः॥११॥
समञ्जिष्ठानि मधुना पिष्टानीक्षुरसेन वा॥
रक्ताभिष्यन्दशान्त्यर्थमेतदञ्जनमिष्यते॥ १२॥

रक्ताभिष्यन्देऽञ्जनमाह—पाटलीत्यादि। श्रीपर्णी काश्मरी। धात्री आमलकी, बिम्बीलोटो भिल्लोटो हिमाद्रिजो वृक्षः। विरेचनादिभिर्विशुद्धदोषस्य पुरुषस्य शेषदोषोपशान्त्यर्थमञ्जनं योज्यं, न पुनरशुद्धदोषस्येति॥ ११॥ १२॥

चन्दनं कुमुदं पत्रं शिलाजतु सकुङ्कुमम्॥
अयस्ताम्ररजस्तुत्थं निम्बनिर्यासमञ्जनम्[1]॥ १३॥
त्रपु कांस्यमलं चापि पिष्ट्वा पुष्परसेन तु॥
विपुला याः कृता वर्त्यः पूजितास्त्वाञ्जने सदा॥१४॥

चन्दनमित्यादि। पत्रं पत्रकम्। अञ्जनं रसाञ्जनम्। पुष्परसेनेति मधुनेत्यर्थः। विपुला यास्ता एव मन्थादिषु चतुर्षु लेखनादिकर्मणि सामर्थ्यात् पूजिता वर्तयः। तदुक्तं,—"हरेणुमात्रा वर्तिः स्याल्लेखनस्य प्रमाणतः। प्रसादनस्य चाध्यर्धा द्विगुणा रोपणस्य तु"—इति॥ ११—१४॥

स्यादञ्जनं घृतं क्षौद्रं सिरोत्पातस्य भेषजम्॥
तद्वत्सैन्धवकासीसं स्तन्यघृष्टं च पूजितम्॥ १५॥
मधुना शङ्खनैपालीतुत्थदार्व्यः ससैन्धवाः॥
रसः शिरीषपुष्पाच्च सुरामरिचमाक्षिकैः॥ १६॥
युक्तं तु मधुना वाऽपि गैरिकं हितमञ्जने॥

मन्थादीनां चतुर्णां सामान्यचिकित्सितमुक्त्वा सिरोत्पाते विशेषचिकित्सितमाह—स्यादञ्जनमित्यादि। अञ्जनं रसाञ्जनं, घृतं गव्यघृतम्। नेपाली मनःशिला। मरिचं प्रसिद्धं, केचित्

---

१ 'सौवीराजनं' इति पा०।

मरिचशब्देन सितमरिचं शोभाञ्जनफलापरपर्यायं वदन्ति । गैरिकं स्वर्णगैरिकम् । एतान्यञ्जनान्यर्धश्लोकिकान्यप्युक्तानि ॥ १५ ॥ १६ ॥—

सिराहर्षेऽञ्जनं कुर्यात् फाणितं मधुसंयुतम् ॥ १७ ॥
मधुना तार्क्ष्यजं वाऽपि कासीसं वा ससैन्धवम् ॥
वेत्राम्लस्तन्यसंयुक्तं फाणितं च ससैन्धवम् ॥ १८ ॥

सिराहर्ष इत्यादि । फाणितं मधुयुक्तमेकमञ्जनमिति; मधुयुक्तं तार्क्ष्यजं द्वितीयमञ्जनं, तत्र तार्क्ष्यजं रसाञ्जनं; कासीसं ससैन्धवं मधुयुक्तं तृतीयमञ्जनं; वेत्राम्लस्तन्यसंयुक्तं फाणितं चतुर्थमञ्जनं; तत्र वेत्राम्लमम्लवेतसं, अन्ये तु वेत्रं वेत्रकरीरं, अम्लमम्लवेतसमम्लीका वेति व्याख्यानयन्ति; तत्तु जेज्जटाचार्येण दूषितम् ॥ १७ ॥ १८ ॥

पैत्तं विधिमशेषेण कुर्यादर्जुनशान्तये ॥
इक्षुक्षौद्रसितास्तन्यदार्वीमधुकसैन्धवैः ॥ १९ ॥
सेकाञ्जनं चात्र हितमम्लैराश्च्योतनं तथा ॥
सितामधुककट्वङ्गमस्तुक्षौद्राम्लसैन्धवैः ॥ २० ॥
बीजपूरककोलाम्लदाडिमाम्लैश्च युक्तितः ॥
एकशो वा द्विशो वाऽपि योजितं वा त्रिभिस्त्रिभिः
स्फटिकं विद्रुमं शङ्खो मधुकं मधु चैव हि ॥
शङ्खक्षौद्रसितायुक्तः सामुद्रः फेन एव वा ॥ २२ ॥
द्वाविमौ विहितौ योगावञ्जनेऽर्जुननाशनौ ॥
सैन्धवक्षौद्रकतकाः सक्षौद्रं वा रसाञ्जनम् ॥ २३ ॥
कासीसं मधुना वाऽपि योज्यमत्राञ्जने सदा ॥

रक्तार्जुनचिकित्सामाह—पैत्तमित्यादि । पैत्तं पित्ताभिष्यन्दोदितम् । अत्रार्जुने । अम्लैर्धान्याम्लादिभिः । तत्रेक्षुक्षौद्रादिभिः सेकाञ्जने कर्तव्ये, अम्लैः पुनराश्च्योतनमेव कर्तव्यम् । अर्जुनेऽपरमप्याश्च्योतनमाह—सितेत्यादि । एतैः सितादिभिर्दाडिमाम्लपर्यन्तैर्व्यस्तैः समस्तैर्वा युक्तितो दोषबलापेक्षयाऽऽश्च्योतनं कार्यमिति पिण्डार्थः । अर्जुनेऽञ्जनमाह—स्फटिकमित्यादि । विद्रुमः प्रवालः । अर्जुनेऽपरमप्यञ्जनमाह—सैन्धवेत्यादि । सैन्धवक्षौद्रकतका इत्येकमञ्जनं, सक्षौद्रं वा रसाञ्जनमित्यपरं, कासीसं मधुना वाऽपीति तृतीयमञ्जनम् । अत्रार्जुने ॥ १९—॥ २३ ॥—

लोहचूर्णानि सर्वाणि धातवो लवणानि च ॥ २४ ॥
रत्नानि दन्ताः शृङ्गाणि गणश्चाप्यवसादनः ॥
कुक्कुटाण्डकपालानि लशुनं कटुकत्रयम् ॥ २५ ॥
करञ्जबीजमेला च लेख्याञ्जनमिदं स्मृतम् ॥
पुटपाकावसानेन रक्तविस्रावणादिना ॥ २६ ॥
संपादितस्य विधिना कृत्स्नेन स्पन्दघातिना ॥

लेख्याञ्जनमाह—लोहेत्यादि । सर्वाणि सुवर्णत्रपुसीसताम्ररजतकृष्णलोहादिजातानि । धातवो मनःशिलागैरिकादयः । लवणानि सैन्धवादीनि पञ्च । रत्नानि वैदूर्यमरकतप्रभृतीनि । दन्ता गवादीनामश्वादीनां च । शृङ्गाणि गवादीनामेव । अवसादनो मिश्रकोक्तः कासीसादिः । एतदनिर्दिष्टनामपि लेख्याञ्जनसंज्ञकं ज्ञेयम् । अपरमपि लेख्याञ्जनमाह—कुक्कुटाण्डेत्यादि । लेख्याञ्जनं कीदृग्विधस्यातुरस्य प्रयोज्यमित्याह—पुटपाकावसानेनेत्यादि । रक्तविस्रावणादिना पुटपाकावसानेन, स्पन्दघातिना अभिष्यन्दहननशीलेन, कृत्स्नेन सकलेन विधिना, संपादितस्य सम्यग्योजितस्य; स पुनर्विधिः सिराव्यधविरेचनशिरोविरेचनान्यन्तःपरिमार्जनानि; तथाहि,—"ततः प्रदेहान् परिषेचनानि नस्यानि धूमाश्च यथास्वमेव । आश्च्योतनाभ्यञ्जनतर्पणानि तथैवं कार्याः पुटपाकयोगाः"—इति; लेख्याञ्जनं प्रयोजनीयमिति पिण्डार्थः । 'पुटपाकावसादेन' इति केचित् पठन्ति, पुटपाक एवावसादोऽवधिर्यस्य स तथा तेनेति व्याख्यानयन्ति ॥ २४—२६ ॥—

अनेनापहरेच्छुक्रमव्रणं कुशलो भिषक् ॥ २७ ॥

इमां चिकित्सामव्रणे शुक्रेऽप्यतिदिशन्नाह—अनेनेत्यादि । अनेन लेख्याञ्जनेन पूर्वोक्तेन रक्तविस्रावणाद्युपक्रमेण संपादितस्यास्यातुरस्याव्रणं शुक्रमपहरेदिति वाक्यार्थः ॥ २७ ॥

उत्तानमवगाढं वा कर्कशं वाऽपि सव्रणम् ॥
शिरीषबीजमरिचपिप्पलीसैन्धवैरपि ॥ २८ ॥
शुक्रस्य घर्षणं कार्यमथवा सैन्धवेन तु ॥
कुर्यात्ताम्ररजःशङ्खशिलामरिचसैन्धवैः ॥ २९ ॥
अन्त्याद्द्विगुणितैरेभिरञ्जनं शुक्रनाशनम् ॥
कुर्यादञ्जनयोगौ वा सम्यक् श्लोकार्धिकाविमौ ॥३०
शङ्खकोलास्थिकतकद्राक्षामधुकमाक्षिकैः ॥
क्षौद्रदन्तार्णवमलशिरीषकुसुमैरपि ॥ ३१ ॥
क्षाराञ्जनं वा वितरेद्बलाग्रथितापहम् ॥
मुद्गान् वा निस्तुषान् भृष्टान् शङ्खक्षौद्रसितायुतान्
मधूकसारं मधुना योजयेच्चाञ्जने सदा ॥
बिभीतकास्थिमज्जा वा सक्षौद्रः शुक्रनाशनः ॥३३॥
शङ्खशुक्तिमधुद्राक्षामधुकं कतकानि च ॥
द्वित्वग्गते सशूले वा वातघ्नं तर्पणं हितम् ॥ ३४ ॥
वंशजारुष्करौ तालं नारिकेलं च दाहयेत् ॥
विस्राव्य क्षारवच्चूर्णं भावयेत्करभास्थिजम् ॥ ३५ ॥
बहुशोऽञ्जनमेतत्स्याच्छुक्रवैवर्ण्यनाशनम् ॥

इदानीमव्रणशुक्रचिकित्सितमभिधाय सव्रणेऽपि पूर्वं चिकित्सितमुद्दिशन्नाह—उत्तानमित्यादि । सव्रणमपि शुक्रमुत्तानमेकपटलगतम्, अवगाढं वा द्वित्र्यादिपटलगतं, रक्तस्रावणेत्यादिना पूर्वोक्तेन विधिनोपपाद्य, लेखयेदिति समुदायार्थः । ननु सव्रणस्य सन्तर्पणसाध्यत्वात् कथं सव्रणे लेखनमुपयुज्यते ? सत्यं, कर्कशावस्थायां पूर्वं लेखनं प्रयुज्यते पश्चात् सन्तर्पणमिति न दोषः । 'कर्कशं वापि सव्रणं' इत्यत्र 'कर्षयेच्चापि

१ 'शीतांश्च कुर्यात्पुटपाकयोगान्' इति पा० ।

सव्रणं' इति केचित् पठन्ति । एतदवस्थे एव शुक्रे घर्षणमाह—शिरीषबीजेत्यादि । शिला मनःशिला । कुर्यादित्यादि । कौ तौ श्लोकार्धिकौ द्वौ योगावित्याह—शङ्खकोलास्थीत्यादि । कोलास्थि बदरास्थि, कतकं शशपुरीषानुकार्यम्बुप्रसादनं फलं, मधुकं यष्टिमधु, दन्तो गोदन्तः, अर्णवमलं समुद्रफेनम् । क्षाराञ्जनमित्यादि । क्षाराञ्जनं 'नीलान् यवान् गव्यपयोऽनुपीतान्' इत्यादिना श्लेष्माभिष्यन्दोक्तम् । मुद्गानित्यादि । मुद्गान् शङ्खक्षौद्रसितायुतानित्येको योगः, मधूकसारं मधुनेति द्वितीयो योगः । बिभीतकेत्यादि । बिभीतकास्थिमज्जा मधुनेत्येको योगः; शङ्खादिकतकपर्यन्तं मधुनेति द्वितीयो योगः, मधुकं यष्टीमधु । केचित् शङ्खशुक्तीत्यत्र शङ्खाश्मन्तेति पठन्ति । द्वित्वग्गत इत्यादि । द्वित्वग्गते द्विपटलाश्रिते शुक्र इत्यर्थः । केचिदमुं पाठं न पठन्ति, जेज्जटेन पठितत्वादस्माभिः पठितः । वंशजेत्यादि । वंशजो वंशकरीरः, वंशाङ्कुर इति यावत् । अरुष्करादीनां परिपक्वास्थि, अन्ये जटामाहुः । एतेषां वंशजादीनां तिलनालदीपितानां भस्म, तच्च करभास्थिचूर्णसमं प्रत्यहमाकृष्य, षड्गुणोदकेनाष्टगुणोदकेन वा निष्क्वाथ्य, पादशेषं बहुशो विस्राव्य, स्वस्थेन तेन सप्ताहं करभास्थिचूर्णं भावयित्वाऽऽतपे शोषयेत्, तच्चूर्णं पुनश्च चूर्णितं कृत्वा, मध्याक्तेनाङ्गुल्यग्रेण शलाकया वा संगृह्य शुक्रदेशमात्रं घर्षयेत्, ततस्त्रिफलोदकेनाक्षि प्रक्षालयेत् । शुक्रवैवर्ण्यनाशनमिति शुक्रस्य वैवर्ण्यं विनाशयति न तु शुक्रं, एतेन शुक्रस्य कृष्णतामुत्पादयतीत्यर्थः ॥ २८—३५ ॥—

अजकां पार्श्वतो विद्धां सूच्या विस्राव्य चोदकम् ३६
व्रणं गोमांसचूर्णेन पूरयेत् सर्पिषा सह ॥
बहुशोऽवलिखेच्चापि वर्त्मास्योपगतं यदि ॥ ३७ ॥

असाध्यशुक्रवैवर्ण्यनाशनप्रसङ्गेनासाध्याजकाजातस्य वैकृतनाशनार्थं चिकित्सामाह—अजकामित्यादि । केचिदमुं पाठं न पठन्ति, जेज्जटपठितत्वादस्माभिः पठितः । अत्राजकायामवस्थायां लेखनमपि कर्मातिदिशन्नाह—बहुशोऽवलिखेदित्यादि । अस्याजकाजातस्य, वर्त्म तुण्डं, उपगतं यद्युच्चतां प्राप्तं, तदा तं बहुशोऽवलिखेत् ॥ ३६ ॥ ३७ ॥

सशोफश्चाप्यशोफश्च द्वौ पाकौ यौ प्रकीर्तितौ ॥
स्नेहस्वेदोपपन्नस्य तत्र विद्ध्वा सिरां भिषक् ॥ ३८ ॥
सेकाश्च्योतननस्यानि पुटपाकांश्च कारयेत् ॥

इदानीं वातपित्तकफशोणितानां पृथगभिष्यन्दप्रतिषेधमभिधाय सान्निपातिकानामप्युपदेष्टुमाह—सशोफ इत्यादि । तत्रेति तयोः पाकयोः । सिराश्चात्र आपाङ्ग्या औपनासिका लालाट्या वा । आश्च्योतनमक्षिपूरणम् ॥ ३८ ॥—

सर्वतश्चापि शुद्धस्य कर्तव्यमिदमञ्जनम् ॥ ३९ ॥
ताम्रपात्रस्थितं मांसं सर्पिः सैन्धवसंयुतम्[३] ॥

मैरेयं वाऽपि दध्येवं दध्युत्तरकमेव वा ॥ ४० ॥
घृतं कांस्यमलोपेतं स्तन्यं वाऽपि ससैन्धवम् ॥
मधूकसारं मधुना तुल्यांशं गैरिकेण वा ॥ ४१ ॥
सर्पिःसैन्धवताम्राणि योषित्स्तन्ययुतानि वा ॥

तयोरञ्जनावस्थामुद्दिशन्नाह—सर्वत इत्यादि । सर्वतश्चापि शुद्धस्येति अन्तःपरिमार्जनबहिःपरिमार्जनाभ्यां शुद्धस्येत्यर्थः । इदं वक्ष्यमाणम् । तदेवाञ्जनमाह—ताम्रपात्रस्थितमित्यादि । मैरेयं सुरासवयोरेकत्र सन्धानं, दधि प्रसिद्धं, एवमिति पूर्ववत् ताम्रपात्रस्थितं सैन्धवचूर्णयुक्तमित्यर्थः, दध्युत्तरकं दध्नः सरः । स्नेहाञ्जनं रक्तापकर्षणादिना विरूक्षिताक्षस्य योज्यं; वातोल्वणपाकस्य वा मैरेयं दधि च ताम्रपात्रस्थितं सैन्धवयुक्तं, पित्तोल्वणे नातिविरूक्षिते दध्युत्तरकं च, सशोफस्य च रक्ताम्लादिसंपादितस्य घृतं कांस्यमलयुक्तमञ्जनं स्तन्यं वा सैन्धवयुक्तमञ्जनं, मधूकसारं वा गैरिकेण तुल्यांशं मधुनाऽञ्जनं, घृतादीनि त्रीणि स्तन्येनाञ्जनं, एतानि सावशेषरक्तयोः पाकयोर्योज्यानि ॥ ३९—४१ ॥—

दाडिमारेवताश्मन्तकोलाम्लैश्च ससैन्धवाम् ॥
रसक्रियां वा वितरेत्सस्यक्पाकजिघांसया ॥ ४२ ॥

रसक्रियामाह—दाडिमेत्यादि । आरेवतः कृतमालकः; 'ऐरावत' इति केचित् पठन्ति, तत्र ऐरावतो नारङ्गम् । ससैन्धवामल्पसैन्धवां, न समसैन्धवामित्यर्थः । रसक्रिया फाणिताकृतिः, तस्याश्च कल्पना पित्ताभिष्यन्दप्रतिषेधे व्याख्याता । 'कोलाम्लैश्च ससैन्धवाम्' इत्यत्र 'कोलाम्लमधुसैन्धवैः' इति केचित् पठन्ति ॥ ४२ ॥

मांसं[१] सैन्धवसंयुक्तं स्थितं सर्पिषि नागरम् ॥
आश्च्योतनाञ्जनं योज्यमबलाक्षीरसंयुतम् ॥ ४३ ॥

आश्च्योतनमाह—मांसमित्यादि । अबलाक्षीरं स्त्रीस्तन्यं, तच्च पेषणे बोद्धव्यम् । एतच्चाश्च्योतनं सशोफे पाके कफोल्वणे ॥ ४३ ॥

जात्याः पुष्पं सैन्धवं शृङ्गवेरं
कृष्णाबीजं कीटशत्रोश्च सारम् ॥
एतत् पिष्टं नेत्रपाकेऽञ्जनार्थं
क्षौद्रोपेतं निर्विशङ्कं[२] प्रयोज्यम् ॥ ४४ ॥

जात्या इत्यादि । कृष्णाबीजं पिप्पलीतण्डुलः । कीटशत्रुः विडङ्गः । निर्विशङ्कं प्रयोज्यमिति पाकयोरञ्जनावस्थायां देयं तदञ्जनमिति तात्पर्यार्थः ॥ ४४ ॥

पूयालसे शोणितमोक्षणं च
हितं तथैवाप्युपनाहनं च ॥
कृत्स्नो विधिश्चेक्षणपाकघाती
यथाविधानं भिषजा प्रयोज्यः ॥ ४५ ॥

१ 'एतदवस्थायामेव शुक्रघर्षणमाह' इति पा० । २ 'ओष्ठः' इति पा० । ३ 'मांसं सर्पिःसैन्धवसंयुतम्' इति पा० ।

१ 'मांसं' इति पा० । २ 'निर्विशङ्कैः' इति पा० ।

पूयालसे सन्निपातजे क्रियामाह—पूयालसे इत्यादि । शोणितमोक्षणं च स्नेहस्वेदपूर्वकमेव । उपनाहनमिति यथादोषहरव्रणशोधनचक्षुष्यद्रव्यकृतः प्रलेपो बन्धनं वा । कृत्स्नो विधिरिति अन्तःशुद्धिकरो बहिःशुद्धिकरश्चेत्यर्थः । यथाविधानमिति हितानतिक्रमेणेत्यर्थः ॥ ४५ ॥

कासीससिन्धुप्रभवार्द्रकैस्तु
हितं भवेदञ्जनमेव चात्र ॥
क्षौद्रान्वितैरेभिरथोपयुञ्ज्या-
दन्यत्तु ताम्रायसचूर्णयुक्तैः ॥ ४६ ॥

कासीसादिरसक्रियाञ्जनमाह—कासीसेत्यादि । चकारात् पाकयोरुक्तमञ्जनं समुच्चीयते । अत्र पूयालसे । क्षौद्रान्वितैरित्यादि । एभिरेव कासीसादिभिर्मधुना पिष्टैस्ताम्रायसचूर्णयुक्तैरन्यदञ्जनमिति पिण्डार्थः । 'क्षौद्रान्वितैरेभिरथोपयुञ्ज्यात्' इत्यत्र 'क्षौद्रान्वितैरेभिरवान्तरोक्तैः' इति केचित् पठन्ति ॥ ४६ ॥

स्नेहादिभिः सम्यगपास्य दोषां-
स्तृप्तिं विधायाथ यथास्वमेव ॥
प्रक्लिन्नवर्त्मानमुपक्रमेत
सेकाञ्जनाश्च्योतननस्यधूमैः ॥ ४७ ॥

इदानीं प्रक्लिन्नवर्त्मनः पिल्लाख्यस्य चिकित्सामुद्दिशन्नाह—स्नेहादिभिरित्यादि । स्नेहादिभिरिति स्नेहसिराव्यधविरेचनशिरोविरेचनास्थापनैः । अपास्य निर्हृत्य । तृप्तिस्तर्पणम् । यथास्वं यथात्मीयम् ॥ ४७ ॥

मुस्ताहरिद्रामधुकप्रियङ्गु-
सिद्धार्थरोध्रोत्पलसारिवाभिः ॥
क्षुण्णाभिराश्च्योतनमेव कार्य-
मत्राञ्जनं चाञ्जनमाक्षिकं स्यात् ॥ ४८ ॥

सेकाश्च्योतनयोर्द्रव्याण्याह—मुस्तेत्यादि । क्षुण्णाभिरिति अन्तरीक्षोदके तद्गुणे वाऽन्यस्मिन् न्यस्ताभिरित्यर्थः । आश्च्योतनमेव कार्यमिति अत्रानुक्तोऽपि सेकः कार्यः । अन्ये एतैराश्च्योतनमेकमेवेच्छन्ति । अत्राञ्जनमित्यादि । अत्राक्लिन्नवर्त्मनि रसाञ्जनमाक्षिकमञ्जनं स्यात् । 'रोध्रोत्पलसारिवाभिः' इत्यत्र केचित् 'लोध्रासितसारिवाभिः' इति पठन्ति, असितसारिवा श्यामालता; असितं रसाञ्जनमित्यन्ये व्याख्यानयन्ति ॥ ४८ ॥

पत्रं फलं चामलकस्य पक्त्वा
क्रियां विदध्यादथवाऽञ्जनार्थे ॥
वंशस्य मूलेन रसक्रियां वा
वर्तीकृतां ताम्रकपालपक्वाम् ॥ ४९ ॥
रसक्रियां वा त्रिफलाविपक्वां
पलाशपुष्पैः खरमञ्जरेर्वा ॥

रसक्रियाञ्जनमाह—पत्रमित्यादि । पक्त्वेति कषायकल्पेन विपाच्येत्यर्थः । क्रियां रसक्रियां, वंशस्य मूलरसेन वा रसक्रियां, तामेव वा रसक्रियामतिशोषणेन वर्तीकृताम् । ताम्रकपालं ताम्रकटाहः । त्रिफलाया अन्या रसक्रिया, पलाशपुष्पैरन्या, खरमञ्जरेरपामार्गस्यान्या रसक्रियेति ॥ ४९ ॥—

पिष्ट्वा छगल्याः पयसा मलं वा
कांसस्य दग्ध्वा सह तान्तवेन ॥ ५० ॥
प्रत्यञ्जनं तन्मरिचैरुपेतं
चूर्णेन ताम्रस्य सहोपयोज्यम् ॥

इदानीं तीक्ष्णाञ्जनदुर्बलस्य नयनस्य प्रत्याश्वासनार्थं प्रत्यञ्जनमाह—पिष्ट्वेत्यादि । कांसस्य मलं कार्पासवस्त्रेण सह दग्ध्वा सितमरिचताम्ररजोयुक्तं छगलीदुग्धेन पिष्ट्वा प्रत्यञ्जनं योज्यमिति पिण्डार्थः । पश्चात् प्रशान्तदोषे यदञ्जनं क्रियते तत् प्रत्यञ्जनशब्दवाच्यम् ॥ ५० ॥—

समुद्रफेनं लवणोत्तमं च
शङ्खोऽथ मुद्गो मरिचं च शुक्लम् ॥ ५१ ॥
चूर्णाञ्जनं जाड्यमथापि कण्डू-
मक्लिन्नवर्त्मान्युपहन्ति शीघ्रम् ॥

चूर्णाञ्जनमाह—समुद्रफेनमित्यादि । लवणोत्तमं सैन्धवम् ॥ ५१ ॥—

प्रक्लिन्नवर्त्मन्यपि चैत एव
योगाः प्रयोज्याश्च समीक्ष्य दोषम् ॥५२॥

सर्वानप्यक्लिन्नवर्त्मोक्तान् प्रक्लिन्नवर्त्मन्यतिदिशन्नाह—प्रक्लिन्नेत्यादि । एत एवेति पूर्वोक्ताः । समीक्ष्य दोषमिति प्रक्लिन्नवर्त्मनः कफजत्वादेषु मध्ये ये कफहरा योगास्ते प्रयोज्या इत्यर्थः ॥ ५२ ॥

सकज्जलं ताम्रघटे च घृष्टं
सर्पिर्युतं तुत्थकमञ्जनं च ॥ ५३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे रक्ताभिष्यन्दप्रतिषेधो नाम द्वादशोऽध्यायः ॥ १२ ॥

प्रक्लिन्नवर्त्मनः सामान्यचिकित्सामुक्त्वा विशेषचिकित्सामाह—सकज्जलमित्यादि । तुत्थकं कज्जलतुल्यभागं ताम्रपात्रे घृष्टं सर्पिर्युतमञ्जनमिति ॥ ५३ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे द्वादशोऽध्यायः समाप्तः ॥ १२ ॥

त्रयोदशोऽध्यायः ।

अथातो लेख्यरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

रक्ताभिष्यन्दानन्तरमौषधसाध्यान् गदांश्चतुर्ष्वभिष्यन्देष्वभिधाय शस्त्रसाध्यान् प्रतिपादयितुकामो लेख्याञ्जनप्रसङ्गेन

१ 'पिष्टाभिः' इति पा० ।

१ 'योज्यमथापि' इति पा० ।

प्रथमं लेख्यरोगप्रतिषेधमाह—अथात इत्यादि । यद्यपि चिकित्साप्रविभागीयोद्दिष्टात् 'छेद्यास्तेषु दशैकश्च' इत्यादिवचनात् पूर्वं छेद्यरोगाणामुपादानं प्राप्नोति, तथाऽपि लेख्याञ्जनप्रसङ्गाच्छेद्यादिष्वल्पावस्थायां लेखनोपयोगाच्च लेख्यानां प्रागुपादानम् ॥ १ ॥ २ ॥

नव येऽभिहिता लेख्याः सामान्यस्तेष्वयं विधिः ॥
स्निग्धवान्तविरिक्तस्य निवातातपसद्मनि ॥ ३ ॥
(आसैर्दृढं गृहीतस्य वेश्मन्युत्तानशायिनः ॥)
सुखोदकप्रतप्तेन वाससा सुसमाहितः ॥
स्वेदयेद्वर्त्म निर्भुज्य वामाङ्गुष्ठाङ्गुलिस्थितम् ॥ ४ ॥
अङ्गुल्यङ्गुष्ठकाभ्यां तु निर्भुग्नं वर्त्म यत्नतः ॥
प्लोतान्तराभ्यां न यथा चलति स्रंसतेऽपि वा ॥५॥
ततः प्रमृज्य प्लोतेन वर्त्म शस्त्रपदाङ्कितम् ॥
लिखेच्छस्त्रेण पत्रैर्वा, ततो रक्ते स्थिते पुनः ॥ ६ ॥
खिन्नं मनोह्वाकासीसव्योषैर्द्राञ्जनसैन्धवैः ॥
श्लक्ष्णपिष्टैः समाक्षीकैः प्रतिसार्योष्णवारिणा ॥७॥
प्रक्षाल्य हविषा सिक्तं व्रणवत् समुपाचरेत् ॥
स्वेदावपीडप्रभृतींस्त्र्यहादूर्ध्वं प्रयोजयेत् ॥ ८ ॥
व्यासतस्ते समुद्दिष्टं विधानं लेख्यकर्मणि ॥

तान् सर्वान् संख्ययाऽभिधाय संक्षेपार्थं तेष्वभिन्नविधिमुपदिशन्नाह—नवेत्यादि । तमेव सामान्यविधिमाह—स्निग्धेत्यादि ।—स्निग्धवान्तविरिक्तस्येत्यत्रानुक्तोऽपि स्नेहानन्तरं स्वेदः कार्यः । सुसमाहित इत्यनेन यथा दृशोः पीडा न स्यात्तथा स्वेदयेदिति द्योत्यते । निर्भुज्य परिवर्त्य उत्तानीकृत्येत्यर्थः । निर्भुग्नमुत्तानीकृतम् । प्लोतान्तराभ्यां वस्त्रवेष्टिताभ्यामङ्गुल्यङ्गुष्ठाभ्यां यथा न चलति न कम्पते, न वा स्रंसते नाधः पतति, तथा वर्त्म निर्भुज्येत्यर्थः । शस्त्रपदाङ्कितमिति प्रच्छयितव्ये प्रच्छितं, भेदयितव्ये च भिन्नं, छेदनीये च छिन्नमित्यर्थः । वातकफव्याधिकठिनं दारुणं वर्त्म शस्त्रेण लिखेत्, पित्तरक्तगदाक्रान्तं मृदुवर्त्म पुनः शेफालिकादीनां पत्रैर्लिखेत् । पश्चात्कर्माह—तत इत्यादि । खिन्नं स्वेदितम् । मनोह्वा मनःशिला । आर्द्राञ्जनं रसाञ्जनम् । माक्षीकं सुवर्णमाक्षीकम् । प्रतिसार्य अवघृष्य । हविषा घृतेन । व्रणवत् सद्योव्रणवत् सप्ताहं यावत्, तदूर्ध्वं शारीरव्रणवत्; तच्च पर्णबन्धादिना क्रमेण । स्वेदावपीडेत्यादि । त्र्यहादूर्ध्वं पुनर्व्रणवदेव स्वेदावपीडप्रभृतीन् प्रयोजयेदिति तात्पर्यार्थः । स्वेदावपीडादिकं समासेनाभिधाय विस्तरेणातिदिशन्नाह—व्यासत इत्यादि । विधानं स्वेदावपीडादिकम् । लेख्यकर्मणीति सकललेखनार्हगदकर्मणीत्यर्थः ॥ ३–८ ॥—

असृगास्रावरहितं कण्डूशोफविवर्जितम् ॥ ९ ॥
समं नखनिभं वर्त्म लिखितं सम्यगिष्यते ॥

इदानीं सम्यग्लिखितस्य वर्त्मनो लक्षणमाह—असृगास्रावरहितमित्यादि । समं निम्नोन्नतत्वरहितम् । नखनिभं नखस्येव निभा यस्य तत्तथा । तदेव व्रणवदुपचरणीयम् ॥ ९ ॥—

रक्तमक्षि स्रवेत् स्कन्नं क्षताच्छस्त्रकृताद्ध्रुवम् ॥१०॥
रागशोफपरिस्रावास्तिमिरं व्याध्यनिर्जयः ॥
वर्त्म श्यावं गुरु स्तब्धं कण्डूहर्षोपदेहवत् ॥ ११ ॥
नेत्रपाकमुदीर्णं वा कुर्वीताप्रतिकारिणः ॥
एतद्दुर्लिखितं ज्ञेयं स्नेहयित्वा पुनर्लिखेत् ॥ १२ ॥

दुर्लिखितस्य वर्त्मनो लक्षणमाह—रक्तमित्यादि । स्कन्नं स्त्यानम् । व्याध्यनिर्जय इति लेखनसाध्यस्य व्याधेरनुपशमः । अप्रतिकारिण इति तस्य प्रतिक्रियामकुर्वत इत्यर्थः । तत्र चिकित्सामाह—स्नेहयित्वेत्यादि । केचित् 'स्वेदयित्वा' इति पठन्ति ॥ १०–१२ ॥

व्यावर्तते यदा वर्त्म पक्ष्म चापि विमुह्यति ॥
स्यात् सरुक् स्रावबहुलं तदतिस्रावितं विदुः ॥१३॥
स्नेहस्वेदादिरिष्टः स्यात् क्रमस्तत्रानिलापहः ॥

अतिलिखितवर्त्मनो लक्षणमाह—व्यावर्तत इत्यादि । तच्चिकित्सितमाह—स्नेहस्वेदादिरित्यादि । अनिलापहः क्रमोऽन्योऽपि परिषेकादिर्बाह्य आभ्यन्तरो वाऽऽहारादिकः । अनिलापहेन वायुं जित्वा पश्चाद्व्रणवदुपचरणीयम् ॥ १३ ॥—

वर्त्मावबन्धं क्लिष्टं च बहलं यच्च कीर्तितम् ॥ १४ ॥
पोथकीश्चाप्यवलिखेत् प्रच्छयित्वाऽग्रतः शनैः ॥

इदानीं रोगविशेषे क्वचिदेव प्रच्छन्नेन रक्तहरणमृदुकरणपूर्वकं लेखनमतिदिशन्नाह—वर्त्मेत्यादि । अवलिखेत् शस्त्रेण, न तु पत्रादिभिः ॥ १४ ॥—

समं लिखेत्तु मेधावी श्यावकर्दमवर्त्मनी ॥ १५ ॥

क्वचित् पुनर्लेखनमात्रमेव कर्तव्यं न पुनश्छेदभेदप्रच्छन्नानीति दर्शयन्नाह—सममित्यादि । सममेककालमित्यर्थः; अन्ये तु नात्यवगाढं नात्युत्तानमिति सममाहुः ॥ १५ ॥

कुम्भीकिनीं शर्करां च तथैवोत्सङ्गिनीमपि ॥
कल्पयित्वा तु शस्त्रेण लिखेत् पश्चादतन्द्रितः ॥१६

कुत्रचिच्छेदपूर्वकं लेखनमाह—कुम्भीकिनीमित्यादि । कल्पयित्वा छित्त्वेत्यर्थः । अतन्द्रितोऽनलसः ॥ १६ ॥

भवेयुर्वर्त्मसु च याः पिडकाः कठिना भृशम् ॥
ह्रस्वास्ताम्राश्च ताः पक्का भिन्द्याद्भिन्ना लिखेदपि१७

कस्मिंश्चिच्छेदपूर्वकं लेखनमाह—भवेयुरित्यादि ॥ १७ ॥

तरुणीश्चाल्पसंरम्भा पिडका बाह्यवर्त्मजाः ॥
विदित्वैताः प्रशमयेत् स्वेदालेपनशोधनैः ॥ १८ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे लेख्यरोगप्रतिषेधो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

---

१ 'लेखनप्रसंगात्' इति पा० । २ 'प्लोतान्तरीकृतं नैव' इति पा० । ३ 'व्योषाञ्जनकसैन्धवैः' इति पा० ।

१ 'विमुञ्चति' इति पा० । २ 'कर्तयित्वा' इति पा० ।

कुत्रापि वर्त्मरोगे न पूर्वं छेदभेदप्रच्छन्नानि, न चोत्तरकालं लेखनमिति दर्शयन्नाह—तरुणीश्चाल्पेत्यादि ॥ १८ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गतशालाक्यतन्त्रे त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ।

अथातो भेद्यरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

लेख्यप्रतिषेधानन्तरं भित्त्वा लिखेदिति वचनाद्भेद्यरोगप्रतिषेधारम्भः—अथात इत्यादि ॥ १ ॥ २ ॥

स्वेदयित्वा बिसग्रन्थिं छिद्राण्यस्य निराशयम् ॥
पक्वं भित्त्वा तु शस्त्रेण सैन्धवेनावचूर्णयेत् ॥ ३ ॥
कासीसमागधीपुष्पनेपाल्येलायुतेन तु ॥
ततः क्षौद्रघृतं दत्त्वा सम्यग्बन्धमथाचरेत् ॥ ४ ॥

स्वेदयित्वेत्यादि । बिसग्रन्थिं पक्वं स्वेदयित्वा, अनन्तरमस्य पक्वस्य बिसग्रन्थेः खिन्नस्य छिद्राणि निराशयं भित्त्वा, सैन्धवेन कासीसादियुक्तेनावचूर्णयेत् । निराशयमिति आशयस्य उत्सङ्गस्याभावो यथा स्यात्तथा भित्त्वेत्यर्थः । पुष्पं पुष्पाञ्जनं, नेपाली मनःशिला । ततः प्रतिसारणादनन्तरं सन्धानार्थं क्षौद्रघृतदानम् । केचित् 'सम्यग्बन्धमथाचरेत्' इत्यत्र 'बन्धेनोक्तेन योजयेत्' इति पठन्ति । सम्यक्शब्देन शिथिलता बन्धस्य ख्याप्यते ॥ ३ ॥ ४ ॥

रोचनाक्षारतुत्थानि पिप्पल्यः क्षौद्रमेव च ॥
प्रतिसारणमेकैकं भिन्ने लगण इष्यते ॥ ५ ॥
महत्यपि च युञ्जीत क्षाराग्नी विधिकोविदः ॥

लगणस्य चिकित्सामाह—रोचनेत्यादि । रोचना गोरचना, क्षारो यवक्षारः । एतानि प्रतिसारणान्यल्पे लगणे भिन्ने सति योज्यानि । एकैकमिति वचनेन गोरोचनादिभिरेकैकशः प्रतिसारणं विधेयमित्यर्थः । अल्पलगणचिकित्सामभिधाय महालगणचिकित्सामाह—महत्यपि च युञ्जीतेत्यादि । महति गुरुतरे इति । युञ्जीतेति भिन्ने सति लगणे क्षाराग्नी प्रयुञ्जीत; तदनन्तरं तत्कालमेव क्षाराग्निदग्धव्रणवच्चिकित्सा, पश्चात् सामान्यव्रणवत् । कोविदः पण्डितः ॥ ५ ॥—

खिन्नां भिन्नां विनिष्पीड्य भिषगञ्जननामिकाम् ॥६॥
शिलैलानतसिन्धूत्थैः सक्षौद्रैः प्रतिसारयेत् ॥

स्वयं भिन्नाया अञ्जननामिकायाश्चिकित्सामाह—खिन्नामित्यादि । भिन्नां स्वयंभिन्नाम् । विनिष्पीड्येति स्नेहस्वेदपूर्वकं निष्पीडनं कृत्वा, शिला मनःशिला, एला सूक्ष्मैला, नतं तगरं, सिन्धूत्थं सैन्धवम् । प्रतिसारयेद्घर्षयेत् ॥ ६ ॥—

रसाञ्जनमधुभ्यां तु भित्त्वा वा शस्त्रकर्मवित् ॥ ७ ॥
प्रतिसार्याञ्जनैर्युञ्ज्यादुष्णैर्दीपशिखोद्भवैः ॥

अभिन्नाञ्जननामिकाचिकित्सामाह—रसाञ्जनेत्यादि । स्वयमभिन्नामञ्जननामिकां पूर्वं खिन्नां शस्त्रकर्मविद्भित्त्वा रसाञ्जनमधुभ्यां प्रतिसार्य तदुत्तरकालं दीपशिखोद्भवैः कज्जलाख्यैरञ्जनैर्योजयेदिति पिण्डार्थः ॥ ७ ॥—

सम्यक्खिन्ने कृमिग्रन्थौ भिन्ने स्यात् प्रतिसारणम् ॥ ८ ॥
त्रिफलातुत्थकासीससैन्धवैश्च रसक्रिया ॥

क्रिमिग्रन्थिचिकित्सामाह—सम्यगित्यादि । सम्यक्खिन्ने इति लोचनोचितस्वेदखिन्ने, अनन्तरं भेदिते प्रतिसारणमिति; अनुक्तमप्यञ्जननामिकोद्दिष्टमञ्जनमधुभ्यां प्रतिसारणं, तदनन्तरं त्रिफलाक्काथेन तुत्थकासीससैन्धवावापेन रसक्रिया ॥ ८ ॥—

भित्त्वोपनाहं कफजं पिप्पलीमधुसैन्धवैः ॥ ९ ॥
लेखयेन्मण्डलाग्रेण समन्तात् प्रच्छयेदपि ॥

श्लेष्मोपनाहचिकित्सामाह—भित्त्वेत्यादि । श्लेष्मोपनाहो भेद्यः, महान्नीरुजश्च लेख्यः, रक्तानुबन्धश्च प्रच्छनीयः; श्लेष्मोपनाहे भिन्ने लिखिते प्रच्छितेऽपि च पिप्पल्यादिभिरेकमेव प्रतिसारणम् ॥ ९ ॥—

संस्नेह्य पत्रभङ्गैश्च स्वेदयित्वा यथासुखम् ॥ १० ॥
आपाकाद्विधिनोक्तेन पञ्चभेद्यानुपाचरेत् ॥
सर्वेष्वेतेषु विहितं विधानं स्नेहपूर्वकम् ॥
संपक्के प्रयतो भूत्वा कुर्वीत व्रणरोपणम् ॥ ११ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे भेद्यरोगप्रतिषेधो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

एषां पञ्चानामपि भेद्यानां बिसग्रन्थ्यादीनमामानामादौ संशमनं निर्दिशन्नाह—संस्नेह्येत्यादि । पत्रभङ्गैः पत्रखण्डैः; अन्ये पत्रभङ्गशब्देन पल्लवमाहुः । विधिना अपतर्पणादिना सामान्यशोथप्रतीकारेण । स्नेहपूर्वकं विधानमिति स्नेहस्वेदरक्तस्रावविरेचनादि, नयनबुद्बुदजादन्यत्र वमनं च ॥ १० ॥ ११ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ।

अथातश्छेद्यरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

भेद्यरोगप्रतिषेधानन्तरं पारिशेष्याच्छेद्यरोगप्रतिषेधारम्भो युज्यत इत्याह—अथात इत्यादि ॥ १ ॥ २ ॥

---

१ 'निराश्रयं' इति पा० ।

१ 'पूर्ववत्' इति पा० । २ 'रसक्रियाम्' इति पा० ।

स्निग्धं भुक्तवतो ह्यन्नमुपविष्टस्य यन्नतः ॥
संरोषयेत्तु नयनं भिषक् चूर्णैस्तु लावणैः ॥ ३ ॥

तत्रैकादशसु छेद्येषु प्रथमं पञ्चानामर्मणामेकमेव प्रकारमुपदर्शयिष्यन् प्रथमं तत्प्राक्कर्मैव निर्दिशन्नाह—स्निग्धमित्यादि । स्निग्धं भुक्तवत इति संशुद्धदेहस्य कृतसंसर्जनस्य विचारणाप्रकारेण वा स्निग्धं भुक्तवतः । यन्नत इति यथा नातिपीडा स्यात् । संरोषयेत् अर्मशिथिलीकरणाय संक्षोभयेत् । लावणैः सैन्धवोत्थैः ॥ ३ ॥

ततः संरोषितं तूर्णं सुस्विन्नं परिघट्टितम् ॥
अर्म यत्र वलीजातं तत्रैतल्लगयेद्भिषक् ॥ ४ ॥
अपाङ्गं प्रेक्षमाणस्य बडिशेन समाहितः ॥
मुचुण्ड्याऽऽदाय मेधावी सूचीसूत्रेण वा पुनः ॥५॥
न चोत्थापयता क्षिप्रं कार्यमभ्युन्नतं तु तत् ॥
शस्त्रावाधभयाच्चास्य वर्त्मनी ग्राहयेद्दृढम् ॥ ६ ॥
ततः प्रशिथिलीभूतं त्रिभिरेव विलम्बितम् ॥
उल्लिखन्मण्डलाग्रेण तीक्ष्णेन परिशोधयेत् ॥ ७ ॥
विमुक्तं सर्वतश्चापि कृष्णाच्छुक्लाच्च मण्डलात् ॥
नीत्वा कनीनकोपान्तं छिन्द्यान्नातिकनीनकम् ॥८॥
चतुर्भागस्थिते मांसे नाक्षि व्यापत्तिमृच्छति ॥
कनीनकवधादस्रं नाडी वाऽप्युपजायते ॥ ९ ॥
हीनच्छेदात् पुनर्वृद्धिं शीघ्रमेवाधिगच्छति ॥

इदानीं यादृशमर्म बडिशेन ग्राह्यं तादृशं निर्दिशन्नाह—तत इत्यादि । परिघट्टितं चालितम् । अर्म यत्र वलीजातमित्यादि । यत्र यस्मिन् प्रदेशे अर्म जातवलीकं स्यात्तत्र प्रदेशे एतदर्म बडिशेन लगयेत् संयोजयेत् ग्राहयेदित्यर्थः । मुचुण्ड्येत्यादि ।—तदनन्तरं बडिशं मुचुण्ड्या तर्जन्यङ्गुष्ठसन्दंशेनादाय गृहीत्वा सम्यग्योगेनोत्क्षेपयेत् । सूचीसूत्रेण वा पुनरिति मुचुण्ड्या बडिशोत्क्षेपादनन्तरं प्रणिहितंससूत्रसूचीसूत्रेण तदर्म उत्क्षिपेत् । न चोत्थापयतेत्यादि ।—उत्थापयता वैद्येन क्षिप्रं सहसा तदर्मात्युन्नतं न कार्यं, त्रुटनभयात् । वर्त्मनी ग्राहयेदिति ऊर्ध्वं स्थितं वर्त्म ऊर्ध्वमाकृष्य ग्राहयेत्, अधःस्थितमध एवाकृष्य ग्राहयेदित्यर्थः । ततः प्रशिथिलीभूतमित्यादि ।—प्रशिथिलीभूतं विमुक्तनयनगोलकाश्लेषम् । त्रिभिर्बडिशादिभिर्नत्वेकेन, त्रुटनभयात्; विलम्बितं विशेषेण लम्बितं धृतमित्यर्थः । उल्लिखन्नित्यादि—उल्लिखन् ऊर्ध्वमेवाधःस्थितं कुर्वन् । परिशोधयेत् सर्वत उन्मूलयेत् 'अर्मसन्तानं' इति शेषः । कनीनकोपान्तं कनीनकसमीपं, कनीनकश्च नासासमीपस्थोऽक्षिसन्धिः । छिन्द्यादिति क्रियासौकर्यार्थं बडिशमपकृष्य प्रणिहितसूचीसूत्रेणावलम्ब्यार्मं छिन्द्यादित्यर्थः । नातिकनीनकमिति अतिक्रान्तकनीनकं यथा न स्यात्तथा छिन्द्यादित्यर्थः । चतुर्भागस्थिते इति अक्षिगोलकस्योपरितने मांसे चतुर्भागेन स्थिते इत्यर्थः, नान्तिके । व्यापत्तिं व्यापदम्; ऋच्छति प्राप्नोतीत्यर्थः । कनीनकवधादित्यादि अतिच्छेदात् कनीनकवधः । अस्रं रक्तम् । नाडीति नाडीव्रणः । अपिशब्दाद्वेदना च । हीनच्छेदात् किं स्यादित्याह—वृद्धिमधिगच्छति; 'अर्म' इति शेषः ॥४॥९॥—

अर्म यज्जालवद्व्यापि तदप्युन्माज्र्य लम्बितम् ॥१०॥
छिन्द्याद्वक्रेण शस्त्रेण वर्त्मशुक्लान्तमाश्रितम् ॥

यत्र पुनः प्रस्तार्यर्मणि विस्तरत्वादर्मणो वर्त्मद्वयसमीपशुक्लावयवव्यापिनो वलीभावो नास्ति तत्र किं करणीयमिति दर्शयन्नाह—अर्मेत्यादि । यदर्म जालवन्मत्स्यबन्धनजालसदृशं व्यापि व्यापनशीलं तदपि सैन्धवचूर्णेन सहोर्ध्वघृष्टं शिथिलीभूतं वक्रशस्त्रेण बडिशेन लम्बितं मण्डलाग्रेण छिन्द्यादित्यर्थः । वर्त्मशुक्लान्तमाश्रितमिति अत्र वर्त्मनोऽन्तशब्दः समीपवाची, शुक्ले पुनरवयववाची । केचित् 'अर्मवज्जालकं व्यापि' इति पठन्ति; जालकं स्याच्चर्म, तच्च वक्रेण शस्त्रेण लम्बितमर्मवच्छिन्द्यात्, वर्त्मशुक्लान्तमाश्रितं पुनरर्म उल्लेखप्रकारेण छिन्द्यादिति च व्याख्यानयन्ति ॥ १० ॥—

प्रतिसारणमक्ष्णोस्तु ततः कार्यमनन्तरम् ॥ ११ ॥
यावनालस्य चूर्णेन त्रिकटोर्लवणस्य च ॥
स्वेदयित्वा ततः पश्चाद्बध्नीयात् कुशलो भिषक् १२
दोषर्तुबलकालज्ञः स्नेहं दत्त्वा यथाहितम् ॥
व्रणवत् संविधानं तु तस्य कुर्यादतः परम् ॥ १३ ॥
त्र्यहान्मुक्त्वा करस्वेदं दत्त्वा शोधनमाचरेत् ॥

छेदानन्तरं प्रतिसारणं निर्दिशन्नाह—प्रतिसारणमित्यादि । तत इति कर्मणः । यावनालस्य यवक्षारस्य, लवणस्य सैन्धवस्य । स्वेदयित्वेत्यादि । स्वेदयित्वा 'करेण' इति शेषः । कुशलो बन्धादिवेत्ता । 'दोषर्तुबलकालज्ञ' इति दोषाणां चयादिमुखेन बलकालज्ञः, ऋतूनामादिमध्यावसानेन; अथवा दोषा वातादयः, ऋतवो हेमन्तादयः, बलं क्रियासु सामर्थ्यं, कालश्चावस्थिकः, तान् जानाति यः स तादृशः । स्नेहं दत्त्वा यथाहितमिति सन्धानार्थं घृतादीनां मध्ये यो यस्मै हितस्तं दत्त्वेत्यर्थः । तथाऽनुक्तमपि चक्षुष्यं सद्योव्रणहितं त्रिफलालोध्रचन्दनादिकषायद्रवकल्कपिण्डं दत्त्वा बध्नीयात्, तेनैव च प्रक्षालनम् । व्रणवदित्यादि व्रणवत् संविधानं शोधनरोपणादिकम् । तदेव शोधनविधानं दर्शयन्नाह—त्र्यहादित्यादि ॥ ११—१३ ॥—

करञ्जबीजामलकमधुकैः साधितं पयः ॥ १४ ॥

---

१ 'कार्यमत्युन्नतं' इति पा० । २ 'शस्त्रपातभयाच्चास्य' इति पा० । ३ मुचुण्डी संदंशयन्त्रविशेषः; तल्लक्षणं वाग्भटे प्रोक्तं, यथा—"मुचुण्डी सूक्ष्मदन्तर्ज्मूले रुचकभूषणा । गम्भीरव्रणमांसानामर्मणः शेषितस्य च" इति । ४ 'नयनगोलकश्लेष्माणं' इति पा० ।

१ 'नान्तिके' इति हस्तलिखितपुस्तके नोपलभ्यते । २ 'तदेप्योन्माज्र्य' इति पा० । ३ 'अर्मैवं जालकं व्यापि' इति पा० ।

हितमाश्च्योतनं शूले द्विरह्नः क्षौद्रसंयुतम् ॥
मधुकोत्पलकिञ्जल्कदूर्वाकल्कैश्च मूर्धनि ॥ १५ ॥
प्रलेपः सघृतः शीतः क्षीरपिष्टः प्रशस्यते ॥

इदानीमावस्थिकशूलस्य चिकित्सामाह—करञ्जबीजेत्यादि । आश्च्योतनमक्षिपूरणम् । द्विरह्न इति दिवसस्य कालद्वयम् । तस्मिन्नेव शूले शिरोलेपं दर्शयन्नाह—मधुकोत्पलकिञ्जल्केत्यादि । उत्पलं नीलोत्पलं, किञ्जल्कः पद्मकेशरम् ॥ १४ ॥ १५ ॥—

लेख्याञ्जनैरपहरेदर्मशेषं भवेद्यदि ॥ १६ ॥

शस्त्रकर्मावशिष्टस्यार्मणो लेख्याञ्जनैरेवापहरणं निर्दिशन्नाह—लेख्याञ्जनैरित्यादि । लेख्याञ्जनैरिति 'लोहचूर्णानि सर्वाणि धातवो लवणानि च' इत्यादिना शुक्रनिर्दिष्टैः ॥ १६ ॥

अर्म चाल्पं दधिनिभं नीलं रक्तमथापि वा ॥
धूसरं तनु यच्चापि शुक्रवत्तदुपाचरेत् ॥ १७ ॥

इदानीं लेख्याञ्जनप्रसङ्गेन यादृशं लेखनसाध्यमर्म तादृशं दर्शयन्नाह—अर्म चाल्पमित्यादि । अल्पं विस्तारेण, दधिनिभं शुक्लार्म, नीलं प्रस्तारि, रक्तं लोहितार्म, धूसरं पाण्डुरं, तनु स्नाय्वर्म, तनु यच्चापीत्यत्र चकारापिशब्दाभ्यां मांसार्मापि यकृत्प्रकाशं श्यावं वा; एतत् पञ्चविधमप्यर्म विस्तीर्णं तनु वा शुक्रवदेव लेख्याञ्जनैरेवोपचरणीयम् ॥ १७ ॥

चर्माभं बहलं यत्तु स्नायुमांसघनावृतम् ॥
छेद्यमेव तदर्म स्यात् कृष्णमण्डलगं च यत् ॥ १८ ॥

इदानीं यादृशं छेद्यमर्म तादृशं दर्शयन्नाह—चर्माभमित्यादि । चर्मवदाभासते यत्तत्तथा चर्मखण्डवदित्यर्थः । बहलं स्थूलम् । स्नायुमांसघनं स्नायुमांसाभ्यां घनं यथा स्यादेवमावृतं; 'स्नायुमांससिरावृतं' इति केचित् पठन्ति । कृष्णमण्डलगमिति दृष्टिमार्गावरणकारीत्यर्थः ॥ १८ ॥

विशुद्धवर्णमक्लिष्टं क्रियास्वक्षि गतक्लमम् ॥
छिन्नेऽर्मणि भवेत् सम्यग्यथास्वमनुपद्रवम् ॥ १९ ॥

सम्यक्छिन्नस्यार्मणो लक्षणमाह—विशुद्धवर्णमित्यादि । विशुद्धवर्णमर्मापनयनात् प्रकृतिवर्णमक्षि भवेत् । अक्लिष्टं क्रियास्विति निमेषोन्मेषादिषु न क्लेशवत् । गतक्लममनायासक्लेशरहितम् । केचिदक्लिष्टं निर्दोषं, क्रियास्वक्षि गतक्लमं क्रियासून्मेषादिष्वक्षि निराबाधं स्यादिति व्याख्यानयन्ति । यथास्वमनुपद्रवमिति हीनातिच्छेदयोर्ये प्रत्येकमुपद्रवास्ते न विद्यमाना यस्य तत्तथेत्यर्थः ॥ १९ ॥

सिराजाले सिरा यास्तु कठिनास्ताश्च बुद्धिमान् ॥
उल्लिखेन्मण्डलाग्रेण बडिशेनावलम्बिताः ॥ २० ॥

अर्मच्छेदं प्रतिपाद्य सिराजालच्छेदं प्रतिपादयन्नाह—सिराजाले इत्यादि । पूर्ववदेव स्निग्धस्विन्नसंरोषितनयनस्य बडिशेनावलम्बिताः कठिनसिरा मण्डलाग्रेणोर्ध्वं लिखेत् ऊर्ध्वं छिन्द्यादिति पिण्डार्थः । कठिनसिराग्रहणान्मृदूनां सिराणां लेख्याञ्जनं योज्यमिति ज्ञेयम् ॥ २० ॥

सिरासु पिडका जाता या न सिध्यन्ति भेषजैः ॥
अर्मवन्मण्डलाग्रेण तासां छेदनमिष्यते ॥ २१ ॥

सिराजपिडकासु भेषजैरसिध्यमानासु छेदं दर्शयन्नाह—सिरास्वित्यादि । अर्मवच्छेदनमिति अर्मोक्तं पूर्वकर्मादिकं कृत्वा छेदः कार्यः ॥ २१ ॥

रोगयोश्चैतयोः कार्यमर्मोक्तं प्रतिसारणम् ॥
विधिश्चापि यथादोषं लेखनद्रव्यसंभृतः ॥ २२ ॥

रोगयोरित्यादि । एतयोः सिराजालसिरापिडकयोः । अर्मोक्तं प्रतिसारणमिति 'यावनालस्य चूर्णेन' इत्याद्युक्तम् । यथादोषं यो विधिर्वाताभिष्यन्दनादिषु निर्दिष्टः स च कार्यो लेखनैर्द्रव्यैः संपादित इत्यर्थः ॥ २२ ॥

सन्धौ संस्वेद्य शस्त्रेण पर्वणीकां विचक्षणः ॥
उत्तरे च त्रिभागे च बडिशेनावलम्बिताम् ॥ २३ ॥
छिन्द्यात्ततोऽर्धमग्रे, स्यादश्रुनाडी ह्यतोऽन्यथा ॥
प्रतिसारणमत्रापि सैन्धवक्षौद्रमिष्यते ॥ २४ ॥
लेखनीयानि चूर्णानि व्याधिशेषस्य भेषजम् ॥

पर्वणिकापिडकाच्छेदनमाह—सन्धावित्यादि । सन्धौ कृष्णशुक्लसन्धौ, संस्वेद्य सम्यक् स्वेदयित्वा, परं यथा दृशोः पीडा न स्यात्, उत्तरे त्रिभागे बडिशेनावलम्बितां विद्धां[1] गृहीतां, छिन्द्यात्ततोऽर्धमग्रे इति तदनन्तरमग्रेऽर्धं छिन्द्यात् मूलाग्रयोर्मित्वा[2] मध्ये तां छिन्द्यादित्यर्थः । तस्यां छिन्नायां प्रतिसारणमाह—प्रतिसारणमित्यादि । शस्त्रकर्मावशिष्टस्य पर्वणीशेषस्य चिकित्सामाह—लेखनीयानीत्यादि ॥ २३ ॥ २४ ॥—

शङ्खं समुद्रफेनं च मण्डूकीं च समुद्रजाम् ॥ २५ ॥
स्फटिकं कुरुविन्दं च प्रवालाश्मन्तकं तथा ॥
वैदूर्यं पुलकं मुक्तामयस्ताम्ररजांसि च ॥ २६ ॥
समभागानि संपिष्य सार्धं स्रोतोञ्जनेन तु ॥
चूर्णाञ्जनं कारयित्वा भाजने मेषशृङ्गजे ॥ २७ ॥
संस्थाप्योभयतः कालमञ्जयेत् सततं बुधः ॥
अर्माणि पिडकां हन्यात् सिराजालानि तेन वै ॥२८॥

तान्येव लेखनीयचूर्णान्याह—शङ्खमित्यादि । मण्डूकीं च समुद्रजामिति समुद्रजा मण्डूकी मुक्तानां शुक्तिः । कुरुविन्दः पद्मरागः, 'निशानोपल' इत्यन्ये, अश्मन्तकं सलौपमं (?) मणिविशेषः । वैदूर्यमिति विदूरगिरिसंभवमल्पच्छमानीलं, पुलकं स्फटिकमेव पाकाद्वर्णान्तरमापन्नं; केचित् 'वैदूर्योपलकं'[3] इति पठन्ति, तत्र वैदूर्योपलकं वेरुडिकेति व्याख्यानयन्ति । मेषशृङ्गं इङ्गुदीभेदः; केचित् मेषविषाणरचितभाजनं मन्यन्ते ॥ २५—२८॥

अर्शस्तथा यच्च नाम्ना शुष्कार्शोऽर्बुदमेव च ॥
अभ्यन्तरं वर्त्मशया विधानं तेषु वक्ष्यते ॥ २९ ॥

अर्श इत्यादि । अभ्यन्तरं वर्त्मशया इति वर्त्माभ्यन्तराश्रया इत्यर्थः ॥ २९ ॥

---

१ 'विद्धगृहीतां' इति पा० । २ 'मूलाग्रयोर्भित्त्वा' इति पा० ।
३ 'वैदूर्योपलकं' इति पा० ।

वर्त्मोपस्वेद्य निर्भुज्य सूच्योत्क्षिप्य प्रयत्नतः ॥
मण्डलाग्रेण तीक्ष्णेन मूले भिन्द्याद्भिषग्वरः ॥ ३० ॥
ततः सैन्धवकासीसकृष्णाभिः प्रतिसारयेत् ॥
स्थिते च रुधिरे वर्त्म दहेत् सम्यक् शलाकया ॥३१॥
क्षारेणावलिखेच्चापि व्याधिशेषो भवेद्यदि ॥
तीक्ष्णैरुभयतो भागैस्ततो दोषमधिक्षिपेत् ॥ ३२ ॥
वितरेच्च यथादोषमभिष्यन्दक्रियाविधिम् ॥

तदेव विधानमाह—वर्त्मेत्यादि । निर्भुज्य परिवर्त्य, उत्तानं कृत्वेत्यर्थः । केचिदमुमेव पाठमन्यथा कृत्वा पठन्ति, स च वर्तमानपुस्तकेषु न दृश्यते, अतो न लिखितः । तेषां कर्मणि कृते प्रतिसारणमाह—तत इत्यादि । प्रतिसारयेद् घर्षयेत् । शस्त्रकर्मावशिष्टानामर्शआदीनां चिकित्सामाह—स्थित इत्यादि । सम्यग् योगेन, शलाकयेति वस्त्राच्छादितां दृष्टिं कृत्वा अग्नितप्तशलाकया व्याधिशेषं दहेत्, क्षारेणावलिखेच्च । सर्वेष्वेवोक्तेषु छेद्यरोगेष्वनिर्दिष्टं भेषजं निर्दिशन्नाह—तीक्ष्णैरित्यादि । उभयतोभागैर्वामनीयविरेचनद्रव्यैः । दोषं व्रणगतां दोषदुष्टिं; एतेनैतदुक्तं भवति—वामनीयविरेचनीयद्रव्याणां कल्ककषायादिना व्रणशुद्धिः कर्तव्येत्यर्थः । केचिद्वमनविरेचनैरेव कफादिकं दोषं निर्हरेदिति मन्यन्ते; एतच्च पञ्जिकाकारेण दूषितम् ॥ ३०–३२ ॥—

शस्त्रकर्मण्युपरते मासं च स्यात् सुयन्त्रितः ॥ ३३॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे छेद्यरोगप्रतिषेधो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

इदानीं छेद्यादिषु परिहार्यपरिहारावधिं दर्शयन्नाह—शस्त्रकर्मणीत्यादि ॥ ३३ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः ।

अथातः पक्ष्मकोपप्रतिषेधं[1] व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

छेद्यरोगप्रतिषेधानन्तरं पक्ष्मकोपे च्छेद्यकर्मसमवायात् पक्ष्मगतरोगप्रतिषेधारम्भो युक्तोऽत आह—अथात इत्यादि । पक्ष्म वर्त्मगतरोममालिका; केचित् पक्ष्मशब्देन पक्ष्माश्रयं वर्त्म कथयन्ति ॥ १ ॥ २ ॥

याप्यस्तु यो वर्त्मभवो विकारः
पक्ष्मप्रकोपोऽभिहितः पुरस्तात् ॥
तत्रोपविष्टस्य नरस्य चर्म
वर्त्मोपरिष्टादनुतिर्यगेव ॥ ३ ॥

भ्रुवोरधस्तात् परिमुच्य भागौ
पक्ष्माश्रितं चैकमतोऽवकृन्तेत् ॥
कनीनकापाङ्गसमं समन्ता-
द्यवाकृति स्निग्धतनोर्नरस्य ॥ ४ ॥
उत्कृत्य शस्त्रेण यवप्रमाणं
बालेन सीव्येद्भिषगप्रमत्तः ॥
दत्त्वा च सर्पिर्मधुनाऽवशेषं
कुर्याद्विधानं विहितं व्रणे यत् ॥ ५ ॥[1]
ललाटदेशे च निबद्धपट्टं[2]
प्राक्स्यूतमत्राप्यपरं च बद्ध्वा ॥
स्थैर्यं गते चाप्यथ शस्त्रमार्गे
बालान् विमुञ्चेत् कुशलोऽभिवीक्ष्य ॥ ६ ॥[3]

पक्ष्मकोपे शस्त्रमग्निः क्षारो भेषजमिति चतुर्विधं कर्म; तत्रादौ शस्त्रकर्म निर्दिशन्नाह—याप्य इत्यादि । पुरस्ताद्वर्त्मरोगविज्ञानीये । तत्र पक्ष्मप्रकोपे । स्निग्धदेहस्योपविष्टस्य नरस्य, भ्रुवोरधस्ताद्द्वौ भागौ, तत्र पक्ष्माश्रितमेकं भागं विमुच्य कनीनकापाङ्गयोः समं प्रदेशमनुलक्षीकृत्य, समन्तात् सर्वतः न तु क्वचिदेव, एतेनोपपक्ष्ममालाप्रमाणेन वर्त्मोपरिष्टाद्यवाकृति चर्म तिर्यक् शस्त्रेण निकृन्तेत्, चर्म निकृत्य तदश्वादीनां बालेन सीव्येत् । ततः सन्धानार्थं मधु घृतं च दत्त्वा, प्राक्स्यूतं यत्तत् अपरं यत् स्यूत्वोद्धृतं तत् एतद्बालाञ्चलद्वयेन ललाटे पट्टं बद्ध्वा व्रणोक्तं विधिं कुर्यादिति पिण्डार्थः । स्थैर्यं गते कठिनीभूते संरूढे इत्यर्थः । शस्त्रमार्गे व्रणे, बालान् सेवनबालान्, विमुञ्चेत् स्यूतरन्ध्रात् क्रमेणापकर्षेदित्यर्थः । केचित् 'विमुञ्चेत्' इत्यत्र 'प्रकल्पयेत्' इति पठन्ति, प्रकल्पयेत् कर्तर्या च्छिन्द्यादिति च व्याख्यानयन्ति ॥ ३—६ ॥

एवं न चेच्छाम्यति तस्य वर्त्म
निर्भुज्य दोषोपहतां वलिं च ॥
ततोऽग्निना वा प्रतिसारयेत्तां
क्षारेण वा सम्यगवेक्ष्य धीरः ॥ ७ ॥

एवमप्यशाम्यति पक्ष्मकोपे उपपक्ष्ममालापरपर्याये कर्मान्तरमाह—एवमित्यादि । निर्भुज्य उत्तानीकृत्वेत्यर्थः । अवेक्ष्य 'शास्त्रम्' इति शेषः ॥ ७ ॥

छित्त्वा समं वाऽप्युपपक्ष्ममालां
सम्यग्गृहीत्वा बडिशैस्त्रिभिस्तु ॥
पथ्याफलेन प्रतिसारयेत्तु
घृष्टेन वा तौवरकेण सम्यक् ॥ ८ ॥

क्षाराग्निभ्यामप्यप्रशाम्यन्त्यामुपपक्ष्ममालायां विध्यन्तरमाह—छित्त्वा सममित्यादि । छित्त्वा द्विधा भावं नीत्वा उत्पाट्येत्यर्थः । सममेककालम् । उपपक्ष्ममालां 'दोषाः पक्ष्माशय-

---

[1] 'पक्ष्मगतरोगप्रतिषेधं' इति पा० ।

[1] 'कुर्याद्विधिं योऽभिहितो व्रणे तम्' इति पा० । [2] 'निबध्य-पट्टं' इति पा० । [3] 'शस्त्रमार्गव्रणाद्बालान् विमुञ्चेत्' पा० ।

गतास्तीक्ष्णाग्राणि खराणि च' इत्याद्युक्तलक्षणाम् । पथ्याफलेन जलघृष्टेन प्रतिसारयेत् । केचित् 'पिष्टेन' इति पठन्ति ॥ ८ ॥

चत्वार एते विधयो विहन्तुं
पक्ष्मोपरोधं पृथगेव शस्ताः ॥
विरेचनाश्च्योतनधूमनस्य-
लेपाञ्जनस्नेहरसक्रियाश्च ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे पक्ष्मगतरोगप्रतिषेधो नाम षोडशोऽध्यायः ॥ १६ ॥

उक्तमेवोपसंहरन्नाह—चत्वार इत्यादि । चत्वार एत इति शस्त्राग्निक्षारभेषजानि । पक्ष्मोपरोधं पक्ष्मप्रकोपम् । विहन्तुं विघट्टयितुं न पुनः सर्वथा शमयितुं, तस्य याप्यत्वात् । तथाऽभिष्यन्दोक्ता विरेचनादयो यथावस्थमुपयुक्ताः पृथगेव पक्ष्मोपरोधं विहन्तुं समर्थाः । रसक्रियाश्चेत्यत्र चकारादुपपक्ष्मोत्पाटनम् ॥ ९ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे षोडशोऽध्यायः ॥१६॥

सप्तदशोऽध्यायः ।

अथातो दृष्टिगतरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

पक्ष्मकोपप्रतिषेधानन्तरं दृष्टिगतानामेव रोगाणामवशिष्टत्वात्तत्प्रतिषेधो युक्त इत्याह—अथात इत्यादि । दृष्टिगतरोगेत्यत्र दृष्टिशब्देन दृष्ट्याश्रयं मण्डलमभिप्रेतम् ॥ १ ॥ २ ॥

त्रयः साध्यास्त्रयोऽसाध्या याप्याः षट् च भवन्ति हि

दृष्टिगतद्वादशरोगाणां मध्ये साध्यानां साधनार्थं, याप्यानां यापनार्थमसाध्यानां परिहारार्थमाह—त्रय इत्यादि । धूमदर्शिपित्तविदग्धदृष्टिश्लेष्मविदग्धदृष्टयस्त्रयः साध्याः । त्रयोऽसाध्या इति ह्रस्वजाड्य(त्य)नाकुलान्ध्यगम्भीरिकाख्याः । याप्याः षट् चेति अरुणादयो विचित्रवर्णान्ताः षट् काचाः । चकारोऽत्र भिन्नक्रमे; तेन याप्यशब्दानन्तरमुपात्तेन चशब्देन साध्यासाध्यत्वं समुच्चीयते; तेन षण्णां रोगाणामवस्थाविशेषेण साध्यत्वयाप्यत्वासाध्यत्वानि; तथा च ते प्रागवस्थायां साध्याः, उत्तरावस्थायामसाध्याः, परं श्लैष्मिकं लिङ्गनाशं विहाय ॥—

तत्रैकस्य प्रतीकारः कीर्तितो धूमदर्शिनः ॥ ३ ॥

तत्र साध्येषु त्रिषु मध्ये धूमदर्शिनः प्रागुक्तमेव प्रतीकारं निर्दिशन्नाह—तत्रेत्यादि । प्रतीकारः हेतुव्याधिविपरीता क्रिया । कीर्तितः पित्ताभिष्यन्दप्रतिषेधे ॥ ३ ॥

दृष्टौ पित्तविदग्धायां विदग्धायां कफेन च ॥
पित्तश्लेष्महरं कुर्याद्विधिं शस्त्रक्षतादृते ॥ ४ ॥

१ 'अरुणादिविचित्रा वर्णतः' इति पा० ।

नस्यसेकाञ्जनालेपपुटपाकैः सतर्पणैः ॥
आद्ये तु त्रैफलं पेयं सर्पिस्त्रैवृतमुत्तरे ॥ ५ ॥
तैल्वकं चोभयोः पथ्यं केवलं जीर्णमेव वा ॥

इदानीं पित्तकफविदग्धदृशोरपि हेतुव्याधिविपरीतं चिकित्सितमाह—दृष्टौ पित्तविदग्धायामित्यादि । पित्तश्लेष्महरं पित्तश्लेष्माभिष्यन्दहरं; तेन पित्तविदग्धदृष्टौ पित्ताभिष्यन्दहरो विधिः, कफविदग्धदृष्टौ तु कफाभिष्यन्दहरो विधिः । शस्त्रक्षतादृते सिराव्यधं वर्जयित्वा । तमेव पित्तश्लेष्माभिष्यन्दहरं विधिमाह—नस्यसेकेत्यादि । तत्र कफविदग्धदृष्ट्यां कफाभिष्यन्दहरं नस्यादि, पित्तविदग्धदृष्ट्यां तु पित्ताभिष्यन्दहरं नस्यादि । पित्तकफविदग्धदृष्ट्यां वैशेषिकं सामान्यं च स्नेहोपक्रममाह—आद्ये तु त्रैफलमित्यादि । आद्ये पित्तविदग्धदृष्ट्याख्ये, त्रैफलं त्रिफलाक्वाथकल्काभ्यां संस्कृतं घृतं; केचित् 'त्रिफलाया रसप्रस्थं' इत्यादिकं विदेहोक्तं त्रैफलमामनन्ति, तन्नेच्छति गयी । त्रैवृतं त्रिवृतासंस्कृतं, न पुनरपतानकोक्तम् । उत्तरे श्लेष्मविदग्धदृष्ट्याख्ये इति । तिल्वकः पट्टिकारोध्रस्तेन संस्कृतं तैल्वकम् । केवलमसंस्कृतम् । जीर्णं पुराणम् । अनुक्तमपि स्नेहादनन्तरं वमनादि कर्तव्यं, तन्त्रान्तरदर्शनात् ॥ ४ ॥ ५ ॥—

गैरिकं सैन्धवं कृष्णा गोदन्तस्य मसी तथा ॥ ६ ॥
गोमांसं मरिचं बीजं शिरीषस्य मनःशिला ॥
वृन्तं कपित्थान्मधुना स्वयङ्गुप्ताफलानि च ॥ ७ ॥
चत्वार एते योगाः स्युरुभयोरञ्जने हिताः ॥

इदानीं बहिःपरिमार्जनार्थमञ्जनयोगांश्चतुरो निर्दिशन्नाह—गैरिकमित्यादि । तत्र गैरिकमादौ कृत्वा गोदन्तमषीं यावदेको योगः, गोमांसादिको मनःशिलां यावद्द्वितीयो योगः, वृन्तं कपित्थान्मधुनेति तृतीयो योगः, स्वयङ्गुप्ताफलानि मधुनेति चतुर्थो योगः, इति योगचतुष्टयं प्रभावात् पित्तकफविदग्धदृष्ट्योर्हितमित्यर्थः । केचिदत्र पित्तविदग्धदृष्टौ रात्रावञ्जनं, कफविदग्धदृष्टौ दिवेति कालविभागं मन्यन्ते ॥ ६ ॥ ७ ॥—

कुब्जकाशोकशालाम्रप्रियङ्गुनलिनोत्पलैः ॥ ८ ॥
पुष्पैर्हरेणुकृष्णाह्वापथ्यामलकसंयुतैः ॥
सर्पिर्मधुयुतैश्चूर्णैर्वेणुनाड्यामवस्थितैः ॥ ९ ॥
अञ्जयेद् द्वावपि भिषक् पित्तश्लेष्मविभावितौ ॥

अधुना द्वयोरपि पुष्पाञ्जनमाह—कुब्जकाशोकेत्यादि । कुब्जकाशोकौ स्वनामप्रसिद्धौ, शालः सर्जभेदः, नलिनमीषद्रक्तं पद्मं, उत्पलं नीलोत्पलं, हरेणुः रेणुका, कृष्णाह्वा पिप्पली, वेणुनाड्यामवस्थानं शक्त्युत्कर्षार्थम् । पित्तश्लेष्मविभाविताविति पित्तश्लेष्मविदग्धदृष्टी इत्यर्थः ॥ ८ ॥ ९ ॥—

आम्रजम्बूद्भवं पुष्पं तद्रसेन हरेणुकाम् ॥ १० ॥
पिष्ट्वा क्षौद्राज्यसंयुक्तं प्रयोज्यमथवाऽञ्जनम् ॥
नलिनोत्पलकिञ्जल्कगैरिकैर्गोशकृद्रसैः ॥ ११ ॥
गुडिकाञ्जनमेतद्वा दिनरात्र्यन्धयोर्हितम् ॥

१ 'कालविभागौ' इति पा० ।

इदानीं दिनराञ्यन्धाञ्जनद्वयमाह—आम्रेत्यादि । आम्रजम्बूद्भवं यत् पुष्पं तद्रसेन रसचतुर्थांशं हरेणुकाचूर्णं पिष्ट्वा रसक्रियापाकेन विपाच्य मधुघृतयुक्तं दिनराञ्यन्धयोः पित्तकफविदग्धदृष्ट्यपरपर्याययोर्द्वाञ्जनं योज्यम् । तथा नलिनादिभिर्गोशकृद्रसपिष्टैर्गुटिकाञ्जनं हितं; नलिनमीषद्रक्तं पद्मं, उत्पलं नीलोत्पलं, किञ्जल्कः केशरः, स च नलिनोत्पलयोरेव । केचित् गोयकृद्रसैरिति पठन्ति; गोशब्दस्य पशुवाचित्वादजादयो गृह्यन्ते; यकृद्रसः कालखण्डरस इति व्याख्यानयन्ति ॥ १० ॥ ११ ॥—

रसाञ्जनरसक्षौद्रतालीशस्वर्णगैरिकम् ॥ १२ ॥
गोशकृद्रससंयुक्तं पित्तोपहतदृष्टये ॥

अधुना दिवान्ध्ये वैशेषिकं चूर्णाञ्जनमाह—रसाञ्जनेत्यादि । रस इति जातीपत्ररस इत्यर्थः, आमलकीपत्ररस इत्यन्ये । अत्र द्रवद्रव्यैः कठिनद्रव्यभावनां विधाय चूर्णाञ्जनं कर्तव्यम् । पित्तोपहतदृष्टये पित्तविदग्धदृष्टये ॥ १२ ॥—

शीतं सौवीरकं वाऽपि पिष्ट्वाऽथ रसभावितम् १३
कूर्मपित्तेन मतिमान् भावयेद्रौहितेन वा ॥
चूर्णाञ्जनमिदं नित्यं प्रयोज्यं पित्तशान्तये ॥ १४ ॥

अपरमपि चूर्णाञ्जनमाह—शीतेत्यादि । शीतं रसाञ्जनं, कर्पूरमन्ये । सौवीरकं सौवीराञ्जनम् । रसभावितमिति चतुष्पदमृगपक्षिमांसरसभावितमित्यर्थः । केचिद्रस इति सामान्योक्त्या रसाञ्जनसौवीराञ्जनयोरेव रसं संगृह्णन्ति, तदभावे च तयोरेव चूर्णाढकमुदकाढके प्रक्षिप्य अहोरात्रपर्युषितं प्रातर्मर्दितं पूतं खरसवत् प्रयोज्यमित्यर्थः । केचिच्च प्रस्तुतत्वाद्रसशब्देन गोशकृद्रसं गृह्णन्ति ॥ १३ ॥ १४ ॥

काश्मरीपुष्पमधुकदार्वीरोध्ररसाञ्जनैः ॥
सक्षौद्रमञ्जनं तद्धितमत्रामये सदा ॥ १५ ॥

दिवान्ध्ये कल्काञ्जनमाह—काश्मरीपुष्पेत्यादि । अत्रेति पित्तविदग्धदृष्टौ । केचित् काश्मीरपुष्पादिरसक्रियाञ्जनमेतदाहुः ॥ १५ ॥

स्रोतोजं सैन्धवं कृष्णां रेणुकां चापि पेषयेत् ॥
अजामूत्रेण ता वर्त्यः क्षणदान्ध्याञ्जने हिताः ॥ १६ ॥

रात्र्यान्ध्ये कफविदग्धदृष्ट्यपरपर्याये वर्त्यञ्जनमाह—स्रोतोजमित्यादि ॥ १६ ॥

कालानुसारिवां कृष्णां नागरं मधुकं तथा ॥
तालीशपत्रं क्षणदे गाङ्गेयं च यकृद्रसे ॥ १७ ॥
कृतास्ता वर्तयः पिष्टाश्छायाशुष्काः सुखावहाः ॥

अपरमपि नक्तान्ध्ये वर्त्यञ्जनमाह—कालानुसारिवामित्यादि । कालानुसारिवा तगरं, क्षणदे द्वे हरिद्रे, गाङ्गेयं मुस्ता । यकृद्रसे छागल्यादिकालखण्डरसे; अन्ये 'शकृद्रसे' इति पठन्ति, शकृद्रसे गोमयरसे इति व्याख्यानयन्ति ॥ १७ ॥—

मनःशिलाभयाव्योषबलाकालानुसारिवाः ॥ १८ ॥
सफेना वर्तयः पिष्टाश्छागक्षीरसमन्विताः ॥

अन्यदपि राञ्यान्ध्ये वर्त्यञ्जनमाह—मनःशिलेत्यादि ॥ १८ ॥—

गोमूत्रपित्तमदिरायकृद्धात्रीरसे पचेत् ॥ १९ ॥
क्षुद्राञ्जनं रसेनान्यद्यकृतस्त्रैफलेऽपि वा ॥
गोमूत्राज्यार्णवमलपिप्पलीक्षौद्रकट्फलैः ॥ २० ॥
सैन्धवोपहितं युञ्ज्यान्निहितं वेणुगह्वरे ॥

इदानीं रसक्रियाञ्जनत्रितयमाह—गोमूत्रेत्यादि । अत्र मूत्रपित्तयकृत्स्वजादीनामेव । मदिरा पिष्टसुरा । गोमूत्रादिरसेन क्षुद्राञ्जनं विपचेदित्येको योगः, क्षुद्राञ्जनं रसक्रियाञ्जनमित्यर्थः; रसेन यकृत इति द्वितीयो योगः; त्रैफलेऽपि वेति तृतीयो योगः । गोमूत्राज्यार्णवमलेत्यादि । एतद्रसक्रियाञ्जनत्रितयमप्येकैकं गोमूत्राज्यादिभिः संयुक्तं वेणुगह्वरे वंशनलिकाभ्यन्तरे व्यवस्थितमञ्जनं रात्र्यन्धे युञ्ज्यादित्यर्थः ॥ १९ ॥ २० ॥—

मेदो यकृद्धृतं चाजं पिप्पल्यः सैन्धवं मधु ॥ २१ ॥
रसमामलकाच्चापि पक्वं सम्यङ्निधापयेत् ॥
कोशे खदिरनिर्माणे तद्वत् क्षुद्राञ्जनं हितम् ॥ २२ ॥

श्लेष्मविदग्धदृष्ट्यामपरमपि रसक्रियाञ्जनमाह—मेदो यकृद्धृतं चाजमित्यादि । मेदो यकृद्धृतं चेति त्रयमेतच्छगलीनाम् । मेदोयकृति सर्वमेकीकृत्य रसक्रियापाकेन पक्वं खदिरतरुसारनिर्मितभाजने सूक्ष्ममुखे बृहन्मध्यकुहरे निक्षिप्तं क्षुद्राञ्जनं रसक्रियाञ्जनापरपर्यायं हितमित्यर्थः ॥ २१ ॥ २२ ॥

हरेणुमगधाजास्थिमज्जैलायकृदन्वितम् ॥
यकृद्रसेनाञ्जनं वा श्लेष्मोपहतदृष्टये ॥ २३ ॥

अन्यदपि कफविदग्धदृष्टावञ्जनमाह—हरेण्वित्यादि । हरेणुः हरेणुका, मगधाजास्थिमज्जेति पिप्पलीवितुषबीजानि । एतद् हरेण्वादि यकृद्द्रवेण पिष्टमञ्जनं श्लेष्मोपहतदृष्टये नक्तान्धाय हितमित्यर्थः । इदमञ्जनमेकीयमताभिप्रायेण गयदासाचार्येण पठितं व्याख्यातं च ॥ २३ ॥

विपाच्य गोधायकृदर्धपाटितं
सुपूरितं मागधिकाभिरग्निना ॥
निषेवितं तद्यकृदञ्जनेन
निहन्ति नक्तान्ध्यमसंशयं खलु ॥ २४ ॥

इदानीं नक्तान्ध्ये कफविदग्धदृष्ट्यपरपर्याये प्रयोगमाह—विपाच्येत्यादि । गोधायकृदर्धपाटितं कृत्वा पिप्पलीभिः पूरितं शुचिमृदा लिप्तमग्निना विपाच्य त्र्यहं भक्षितं सत्, तथा तदन्तःखिन्ना पिप्पली मधुनाऽञ्जनेन निःसन्देहं नक्तान्ध्यं निहन्तीत्यर्थः ॥ २४ ॥

तथा यकृच्छागभवं हुताशने
विपाच्य सम्यङ्मगधासमन्वितम् ॥
प्रयोजितं पूर्ववदाश्वसंशयं

१ 'पीतमृदितं' इति पा० ।

१ 'वेणुभाजने' इति पा० ।

जयेत् क्षपान्ध्यं सकृदञ्जनान्नृणाम् ॥ २५ ॥

नक्तान्ध्येऽपरमपि प्रयोगमाह—तथा यकृच्छागभवमित्यादि । प्रयोजितं पूर्ववदिति यकृद्भक्षणविधिना प्रयोजितं, पिप्पली पुनरञ्जनविधिनेत्यर्थः ॥ २५ ॥

प्लीहा यकृच्चाप्युपभक्षिते[1] उभे
प्रकल्प्य शूल्ये घृततैलसंयुते ॥
ते सार्षपस्नेहसमायुतेऽञ्जनं
नक्तान्ध्यमाश्वेव हतः प्रयोजिते ॥ २६ ॥

अपरमपि नक्तान्ध्ययोगमाह—प्लीहेत्यादि । प्लीहा उदरवामपार्श्वस्थं मांसखण्डं, यकृत् दक्षिणपार्श्वस्थं कालखण्डापरपर्यायं, ते उभे अपि प्रस्तुतत्वाद् गोधाच्छागयोरेव ग्राह्ये । प्रकल्प्य खण्डशः कल्पयित्वा । शूल्ये शूलपाकपक्के ॥ २६ ॥

नदीजशिम्बीत्रिकटून्यथाञ्जनं
मनःशिला द्वे च निशे य(श)कृद्गवाम् ॥
सचन्दनेयं गुटिकाऽथवाऽञ्जनं
प्रशस्यते वै दिवसेष्वपश्यताम् ॥ २७ ॥

इदानीं दिवान्ध्ये पित्तविदग्धदृष्ट्यपरपर्यायेऽञ्जनमाह—नदीजेत्यादि । नदीजं सैन्धवं; शिम्बीशब्देनात्र हरितमुद्गाः, चक्षुष्यत्वात्; अन्ये शिम्बीस्थाने शिम्बेति पठन्ति, तत्रापि स एवार्थः; अञ्जनं सौवीराञ्जनम् । गवां छागादीनाम् । चन्दनं रक्तचन्दनम् । गुटिका वटीकृत्याञ्जनं; अथवाऽञ्जनमिति चूर्णाञ्जनमथवेत्यर्थः । विपाच्य गोधायकृदर्धपाटितमित्यादिकं सचन्दनेयं गुटिकाऽथवाऽञ्जनमिति पर्यन्तं योगचतुष्टयं निबन्धकारैरनार्षांकृतं, तैरेव सुभाषितत्वादुपयोगार्हत्वाच्च व्याख्यातं; तस्मान्मयाऽपि पठितं व्याख्यातं च ॥ २७ ॥

भवन्ति याप्याः खलु ये षडामया
हरेदसृक्तेषु सिराविमोक्षणैः ॥
विरेचयेच्चापि पुराणसर्पिषा
विरेचनाङ्गोपहितेन सर्वदा ॥ २८ ॥

इदानीं साध्यानां चिकित्सितमभिधाय याप्यानां चिकित्सितमाह—भवन्तीत्यादि । भवन्ति याप्या इति अत्र 'उपेक्ष्यमाणा' इति शेषः, एतेन तेषां प्रागवस्थायां साध्यत्वम् । याप्याः षडामया इति । ननु श्लैष्मिककाचस्य साध्यत्वात् कथं षड् याप्याः? सत्यं, याप्यबाहुल्यादेतद्यपदेशः । तेष्विति प्रथमद्वितीयपटलप्राप्तेषु तिमिरावस्थेषु काचेष्वित्यर्थः, न तु रागप्राप्तेषु, यतस्तत्र सिराव्यधनिषेधः; तथाचोक्तं—'तिमिरे रागिणि भिषक् सिरामोक्षं विवर्जयेत्'—इति । सिराविमोक्षणैरित्यनेनैव स्नेहस्वेदौ पूर्वकर्मसंज्ञकावाक्षिप्तौ मन्तव्यौ । विरेचनाङ्गोपहितेनेति विरेचनद्रव्यसंस्कृतेनेत्यर्थः ॥ २८ ॥

पयोविमिश्रं पवनोद्भवे हितं
वदन्ति पञ्चाङ्गुलतैलमेव तु ॥
भवेद्घृतं त्रैफलमेव शोधनं
विशेषतः शोणितपित्तरोगयोः ॥ २९ ॥
त्रिवृद्विरेकः कफजे प्रशस्यते
त्रिदोषजे तैलमुशन्ति तत्कृतम् ॥

सर्वतिमिराणां सामान्यं शोधनमभिधाय विशेषशोधनमाह—पयोविमिश्रमित्यादि । पञ्चाङ्गुलतैलमेरण्डतैलम् । विशेषतः शोणितपित्तरोगयोरिति त्रैफलं घृतं सर्वतिमिरेषु हितं, अनयोर्विशेषत इत्यर्थः । त्रिवृद्विरेक इति त्रिवृता सिद्धघृतेन विरेक इत्यर्थः । तत्कृतमिति त्रिवृता संस्कृतमित्यर्थः; अन्ये तु तैर्वातपित्तकफघ्नैर्द्रव्यैः संस्कृतं तत्कृतं वदन्ति । द्वन्द्वजेषु तिमिरेषु त्वनुक्तमपि संशोधनं व्यासिश्रं कर्तव्यम् ॥ २९ ॥—

पुराणसर्पिस्तिमिरेषु सर्वशो
हितं भवेदायसभाजनस्थितम् ॥ ३० ॥
हितं च विद्यात्त्रिफलाघृतं सदा
कृतं च यन्मेषविषाणनामभिः ॥

संशोधनमभिधाय सामान्यं संशमनमाह—पुराणसर्पिरित्यादि । सर्पेत इति पानाभ्यञ्जननस्यादिषु, सर्वेष्वेव वातादिजन्यनयनविकारेष्वित्यन्ये । त्रिफलाघृतं त्रिफलाक्वाथकल्कपक्वं घृतम् । कृतं संस्कृतं 'घृतं' इति शेषः । मेषविषाणनामभिः मेषशृङ्गीफलैरित्यर्थः ॥ ३० ॥—

सदाऽवलिह्यात्त्रिफलां सुचूर्णितां
घृतप्रगाढां तिमिरेऽथ पित्तजे ॥ ३१ ॥
समीरजे तैलयुतां कफात्मके
मधुप्रगाढां विदधीत युक्तितः ॥

सामान्यं संशमनमभिधाय विशेषसंशमनमाह—सदेत्यादि । सदेति नित्यगे आवस्थिके च काले इत्यर्थः । पित्तजे इत्यत्रानुक्तमपि रक्तजं तिमिरं बोद्धव्यं, तत्रापि घृतेन त्रिफलाप्रयोगः । केचित् "सदाऽवलिह्यात्त्रिफलां सुचूर्णितां घृतप्रगाढां तिमिरातुरो नरः । कफाभिभूतः खलु तैलसंयुतां मधुप्रगाढामपि वा प्रयोजयेत्" ईदृशं पाठं पठन्ति; स च जेज्जटाचार्येण दूषितः; तस्मात् पूर्वपाठ एव न्याय्यः ॥ ३१ ॥—

गवां शकृत्क्वाथविपक्वमुत्तमं
हितं तु तैलं तिमिरेषु नावनम् ॥ ३२ ॥

इदानीं श्लेष्मतिमिरे नस्यमाह—गवां शकृदित्यादि । सामान्यस्नेहपाकपरिभाषया गोशकृत्क्वाथेन तैलमकल्कं पक्तव्यं, एतत्तैलं तन्त्रान्तरदर्शनात् कफजे तिमिरे बोद्धव्यं; अन्ये तु तिमिरेष्विति बहुवचनात् सर्वतिमिरेषु बोद्धव्यमिति वदन्ति ३२

हितं घृतं केवल एव पैत्तिके
ह्यजाविकं यन्मधुरैर्विपाचितम् ॥

पित्तजे तिमिरे नस्यमाह—हितमित्यादि । केवल एव पैत्तिके नान्यदोषसंपृक्ते तिमिरे इत्यर्थः । मधुरैर्विपाचितमिति काकोल्यादिक्वाथकल्कविपक्वमित्यर्थः । 'केवल एव' इत्यत्र 'केवलमेव' इति केचित् पठन्ति, तत्र केवलमसंस्कृतमित्यर्थः, अजाविकं घृतमिति च व्याख्यानयन्ति ॥—

[1] 'उपलक्षिते' इति पा० ।

तैलं स्थिरादौ मधुरे च यद्गणे
तथाऽणुतैलं पवनासृगुत्थयोः ॥ ३३ ॥

वातरक्तजयोस्तिमिरयोर्नस्यमाह—तैलमित्यादि । स्थिरादौ विदारिगन्धादौ, सिद्धमिति शेषः । तथा मधुरे गणे काकोल्यादिके यत् सिद्धं, तथाऽणुतैलं वातव्याधिचिकित्सितोक्तम् ॥ ३३ ॥

सहाश्वगन्धातिबलावरीशृतं
हितं च नस्ये त्रिवृतं यदीरितम् ॥
जलोद्भवानूपजमांससंस्कृता-
द्धृतं विधेयं पयसो यदुत्थितम् ॥ ३४ ॥

केवलवातजे तिमिरे नस्यमाह—सहेत्यादि । सहा मुद्गपर्णी, माषपर्णीत्यन्ये । वरी शतावरी । एतैर्विपक्वं तैलं वातारब्धे तिमिरे नस्ये हितम् । त्रिवृतं यदीरितमिति महावातव्याधिचिकित्सिते त्रिभिः सर्पिर्वसामज्जभिर्वृतं त्रिवृतं तैलं यदीरितं तदत्र हितं; केचिदेतैरेव मुद्गपर्ण्यादिभिर्द्रव्यैस्त्रिवृतं तैलं सिद्धं वातारब्धतिमिरे नस्ये हितमिति वदन्ति । वातारब्धतिमिरे द्वितीयं नस्यमाह—जलोद्भवेत्यादि । जलोद्भवा मत्स्यादयः, आनूपाः कूलचराः, तेषां मांसेन क्षीरपाककल्पेन संस्कृताद्दुग्धान्मथ्यमानाद् यद्धृतमुद्धृतं तत् सहाश्वगन्धादिभिरनन्तरोक्तैर्विपक्वं वातारब्धतिमिरे नस्यं विधेयम् । केचिज्जलोद्भवशब्देन पद्मादीनि गृह्णन्ति, तन्नेच्छन्ति निबन्धकाराः ॥ ३४ ॥

ससैन्धवः क्रव्यभुगेणमांसयो-
र्हितः ससर्पिः समधुः पुटाह्वयः ॥

नस्यमभिधाय पुटपाकमाह—ससैन्धव इत्यादि । क्रव्यभुजो गृध्रादयः, एणः कृष्णसारः । पुटाह्वयः पुटपाकः । तस्य विधानं क्रियाकल्पे वक्ष्यति ॥—

वसाऽथ गृध्रोरगताम्रचूडजा
सदा प्रशस्ता मधुकान्विताऽञ्जने ॥ ३५ ॥

वातजतिमिरे पुटपाकमभिधायाञ्जनमाह—वसेत्यादि । उरगः कृष्णसर्पः, ताम्रचूडः कुकुटः, मधुकान्विता यष्टीमधुकसंयुता; एता गृध्रादिजास्तिस्रो वसा यष्टीमधुकचूर्णान्विता एकशो द्विशः समस्ता वाऽञ्जने हिताः ॥ ३५ ॥

प्रत्यञ्जनं स्रोतसि यत्समुत्थितं
क्रमाद्रसक्षीरघृतेषु भावितम् ॥

इदानीं वातजतिमिरे स्नेहाञ्जनेन जडीभूतस्य चक्षुष उपकारार्थं प्रत्यञ्जनमाह—प्रत्यञ्जनमित्यादि । यदञ्जनस्यानु प्रयुज्यते तत् प्रत्यञ्जनम् । तत्र तीक्ष्णाञ्जनस्य मृद्वञ्जनमनु प्रयुज्यते, मृद्वञ्जनस्य तीक्ष्णाञ्जनम् । स्रोतसि यत् समुत्थितं सिन्धुस्रोतसि वर्णसार्पणसयोः स्रोतसि वा यत् समुत्थितं स्रोतोञ्जनं, सौवीराञ्जनमित्यन्ये । रसश्च चक्षुष्यमृगपक्षिमांसरसः । पृथक् पृथक् सप्ताहं रसक्षीरघृतेषु भावितं चूर्णाञ्जनं प्रयोज्यम् ॥—

१ 'तैलमाह-' इति पा० ।

स्थितं दशाहत्रयमेतदञ्जनं
कृष्णोरगास्ये कुशसंप्रवेष्टिते ॥ ३६ ॥
तन्मालतीकोरकसैन्धवायुतं
सदाऽञ्जनं स्यात्तिमिरेऽथ रागिणि ॥
सुभावितं वा पयसा दिनत्रयं
काचापहं शास्त्रविदः प्रचक्षते ॥ ३७ ॥

अरागितिमिरचिकित्सितं प्रतिपाद्य वातजरागितिमिरचिकित्सितं प्रतिपादयन्नाह—स्थितमित्यादि । दशाहत्रयं मासमेकमित्यर्थः । एतदञ्जनं स्रोतोञ्जनं, सौवीराञ्जनमित्यन्ये । ततः स्रोतोञ्जनं कृष्णसर्पमुखे यथोदितप्रकारेण निवासितं पश्चान्मालतीकोरकसैन्धवेन समुदायसमभागेन युतमञ्जनं कार्यं; मालतीकोरकाः जातीकुसुमानि । तिमिरेऽथ रागिणि वातकाचे इत्यर्थः । वातकाचेऽपरमप्यञ्जनमाह—सुभावितमित्यादि । अन्ये तु जातीकोरकयुक्तत्वात् वातपित्तकाचापहं वदन्ति, तन्नेच्छति गयी ॥ ३६ ॥ ३७ ॥

हविर्हितं क्षीरभवं तु पैत्तिके
वदन्ति नस्ये मधुरौषधैः कृतम् ॥
तत्तर्पणे चैव हितं प्रयोजितं
सजाङ्गलस्तेषु च यः पुटाह्वयः ॥ ३८ ॥

पित्ततिमिररोगचिकित्सितमाह—हविरित्यादि । हविर्घृतं, क्षीरभवं क्षीरमथनोद्धृतं, पैत्तिके 'तिमिरे' इति शेषः । मधुरौषधैः काकोल्यादिभिः, कृतं संस्कृतं; अन्ये तु क्षीरमपि काकोल्यादिभिः साधितं मन्यन्ते, तेन काकोल्यादिसाधितात् क्षीरान्मथ्यमानादुत्थितं घृतं काकोल्यादिभिरेव साधितं पित्तजतिमिरे हितमिति वदन्ति । केचिदिह कृतमित्यस्य स्थाने शृतमिति पठन्ति, तत्र शृतं पक्वम् । तत्तर्पण इत्यादि । न केवलं तद्धृतं नस्ये हितं, किं तर्हि तर्पणेऽक्षिपूरणपर्याये प्रयोजितं हितम् । तथा तेषु मधुरौषधेषु यो जाङ्गलमांसयुक्तः पुटपाकः स पित्ततिमिरे स्नेहार्थं हितः ॥ ३८ ॥

रसाञ्जनक्षौद्रसितामनःशिलाः
क्षुद्राञ्जनं तन्मधुकेन संयुतम् ॥

पित्ततिमिरे रसक्रियाञ्जनमाह—रसाञ्जनमित्यादि । रसाञ्जनादिकृतं क्षुद्राञ्जनं फाणिताकृति पित्ततिमिरे हितम् । क्षुद्राञ्जनमित्यत्र केचिद्रसाञ्जनमिति पठन्ति, तत्रापि स एवार्थः ॥—

समाञ्जनं वा कनकाकरोद्भवं
सुचूर्णितं श्रेष्ठमुशन्ति तद्विदः ॥ ३९ ॥

इदानीं पित्ततिमिरे प्रत्यञ्जनमाह—समाञ्जनमित्यादि । समाञ्जनं तुल्यसौवीराञ्जनं, कनकाकरोद्भवं तुत्थकं, श्रेष्ठमुत्तमं, उशन्ति इच्छन्ति, प्रत्यञ्जनमित्यध्याहार्यम् । तद्विदः शालाकिनः । केचित् समाञ्जनमित्यत्र रसाञ्जनमिति पठन्ति ॥ ३९ ॥

भिल्लोटगन्धोदकसेकसेचितं
प्रत्यञ्जने चात्र हितं तु तुत्थकम् ॥

१ 'सालवयुक्तत्वात्' इति पा० ।

पित्ततिमिरेऽपरमपि प्रत्यञ्जनमाह—भिल्लोटेत्यादि । भिल्लोटको हिमवदासन्नभूमिजः ककुभानुकारिफलो वृक्षविशेषः, गन्धा एलादिगणोक्ताः, उदकमत्र कषायः, तत्सेकसेचितं तुत्थकं प्रत्यञ्जने हितम् । अन्ये भिल्लोटकस्याभाविकगन्धोदकसेकसेचितमाहुः । केचिदमुं प्रत्यञ्जनं न पठन्ति ॥—

समेषशृङ्गाञ्जनभागसंमितं
जलोद्भवं काचमलं व्यपोहति ॥ ४० ॥

पित्तजे तिमिरे रागप्राप्ते चिकित्सामाह—समेषेत्यादि । मेषशृङ्गः पुत्रजीवानुकारी वृक्षः, अञ्जनं सौवीराञ्जनं, एतयोर्भागेन अंशेन संमितं तुल्यभागं जलोद्भवं स्रोतोञ्जनं, अञ्जनेन काचमलं पित्तकाचं व्यपोहति । अन्ये जलोद्भवं शङ्खं वदन्ति ॥ ४० ॥

पलाशरोहीतमधूकजा रसाः
क्षौद्रेण युक्ता मदिराग्रसिश्रिताः[1] ॥

पैत्तिके काचे रसक्रियाञ्जनमाह—पलाशरोहीतेत्यादि । पलाशः किंशुकः, रोहितो दाडिमपुष्पतुल्यपुष्पः, मधूकः स्वनामप्रसिद्धो वृक्षविशेषः, एतेषां रसाः; मदिराग्रं मदिराया उपर्यच्छो भागः । किंशुकादिरसक्षौद्रमदिराग्राणि समभागानि आहृत्य रसक्रिया कार्या, सा चाञ्जनात्पित्तकाचमलं व्यपोहति ॥—

उशीरलोध्रत्रिफलाप्रियङ्गुभिः
पचेत्तु नस्यं कफरोगशान्तये ॥ ४१ ॥

इदानीं कफतिमिरे नस्यमाह—उशीरलोध्रेत्यादि । उशीरादिभिर्द्रव्यैः कल्कीकृतैः सामान्यस्नेहपाकपरिभाषयाऽनुक्तमपि तिलतैलं पाचनीयं, विदेहदर्शनात् ॥ ४१ ॥

विडङ्गपाठाकिणिहीङ्गुदीत्वचः
प्रयोजयेद्धूममुशीरसंयुताः ॥

कफतिमिरे धूममाह—विडङ्गेत्यादि । किणिही अपामार्गः । ननु तिमिरे धूमो निषिद्धः, कथमत्रोच्यते ? सत्यं, पित्ततिमिरे एव धूमो निषिद्धो न कफजे, अतो न दोषः ॥—

वनस्पतिक्काथविपाचितं घृतं
हितं हरिद्रानलदे च तर्पणम् ॥ ४२ ॥

कफतिमिरे तर्पणमाह—वनस्पतिक्काथेत्यादि । वनस्पतयः क्षीरवृक्षाः, तत्कृतक्काथे चतुर्गुणे हरिद्रानलदकल्कचतुर्थांशं घृतं पक्कं कफतिमिरे तर्पणे अक्षिपूरणापरपर्याये हितम् । नलदमुशीरम् ॥ ४२ ॥

समागधो माक्षिकसैन्धवाढ्यः
सजाङ्गलः स्यात् पुटपाक एव च ॥

कफतिमिरे पुटपाकमाह—समागध इत्यादि । मागधी पिप्पली । आढ्य उत्कटः । सजाङ्गलः जाङ्गलमृगपक्षिमांसकृतः । केचित् 'आढ्यः' इत्यत्र 'आज्य' इति पठन्ति । तत्राज्यं घृतम् । केचिदमुं पुटपाकं रागिणि कफतिमिरे वदन्ति, तन्नेच्छति गयी ॥—

[1] 'मदिराग्रपेषिताः' इति पा० ।

मनःशिलात्र्यूषणशङ्खमाक्षिकैः
ससिन्धुकासीसरसाञ्जनैः क्रियाः ॥ ४३ ॥

कफतिमिरे रसक्रियाञ्जनमाह—मनःशिलेत्यादि । मनःशिलादिभिः कासीसरसाञ्जनान्तैश्चूर्णीकृतैः सलिलचतुर्थांशनिक्षिप्तैरग्निपाकात् फाणिताकृतीकृतैः रसक्रिया । माक्षिकं मधु ॥ ४३ ॥

हिते च कासीसरसाञ्जने तथा
वदन्ति पथ्ये गुडनागरैर्युते ॥

कफतिमिरेऽपरमपि रसक्रियाञ्जनमाह—हिते इत्यादि । तथेति रसक्रियाञ्जनप्रकारेणेत्यर्थः । पथ्ये इति पथोऽनपेते इत्यर्थः । कफकाचस्य शलाकाकर्मसाध्यत्वात्तत्राञ्जनादिकं न निर्दिष्टम् ॥—

यदञ्जनं वा बहुशो निषेचितं
समूत्रवर्गे त्रिफलोदके शृते ॥ ४४ ॥
निशाचरास्थिस्थितमेतदञ्जनं
क्षिपेच्च मासं सलिलेऽस्थिरे पुनः ॥
मेषस्य पुष्पैर्मधुकेन संयुतं
तदञ्जनं सर्वकृते प्रयोजयेत् ॥ ४५ ॥

सर्वजकाचचिकित्सामाह—यदञ्जनमित्यादि । अञ्जनं स्रोतोञ्जनम् । बहुशो बहून् वारान् निषेचितमित्यत्र 'ध्मातं सत्' इत्यध्याहार्यम् । मूत्रवर्गेऽष्टस्वपि मूत्रेषु । शृते क्काथीकृते । निशाचरास्थिस्थितमित्यादि निशाचराणां गृध्रादीनां नलके विगतमज्जनि मूत्रवर्गादिसेचितं तदञ्जनं निक्षिप्य पश्चान्नलकमुखं पिधाय वहति सरिज्जले निखातकीलकोपरि सूत्रेण बद्ध्वा मासं यावत् स्थापयेत्, ततस्तदुद्धृत्य शोषयित्वा मेषशृङ्गपुष्पयष्टीमधुकचूर्णसमांशं तदञ्जनं सर्वकृते रागितिमिरे प्रयोजयेत् । 'मेषस्य पुष्पैर्मधुकेन संयुतं' इत्यत्र केचिद् 'युतं तु पुष्पैर्मधुशिग्रुकोद्भवैः' इति पठन्ति । तत्र मधुर्मधूकस्तस्य सारः, शिग्रुः शोभाञ्जनकस्तस्य पुष्पाणि ॥ ४४ ॥ ४५ ॥

क्रियाश्च सर्वाः, क्षतजोद्भवे हितः
क्रमः परिम्लायिनि चापि[1] पित्तहृत् ॥

सान्निपातिकरागितिमिरस्य चिकित्सामाह—क्रियाश्चेत्यादि । क्रिया अत्र तर्पणपुटपाकादिकाः, सर्वा वातपित्तकफतिमिरोक्ताः; अन्ये तु क्रियाश्च सर्वा वातपित्तकफतिमिरोक्ता रसक्रिया इत्याहुः । रक्ततिमिरे तथा परिम्लायिनि तिमिरे च कः क्रम इत्याह—क्षतजोद्भव इत्यादि । पित्तहृत् क्रमः पित्ततिमिरापहनस्यतर्पणादिक्रम इत्यर्थः । एष एव क्रमोऽरागिणि रक्ततिमिरे, रागिणि पुनः पित्तकाचापहो विधिः ।—

क्रमो हितः स्यन्दहरः प्रयोजितः
समीक्ष्य दोषेषु यथास्वमेव च ॥ ४६ ॥

इदानीं वातादिजेषु तिमिरेषु रागारागप्राप्तेषु वातादिजनिताभिष्यन्दचिकित्सितमतिदिशन्नाह—क्रम इत्यादि । यथास्वमिति

[1] 'रोगे च' इति पा० ।

यो यस्यात्मीय इत्यर्थः । तेन वाततिमिरे वाताभिष्यन्दक्रमः, पित्ततिमिरे पित्ताभिष्यन्दोक्तः, एवं शेषेषु ॥ ४६ ॥

दोषोदये नैव च विप्लुतिंगते
द्रव्याणि नस्यादिषु योजयेद्बुधः ॥

स एव वाताभिष्यन्दादिक्रमो वातादितिमिरेषु कदा कर्तव्य इति दर्शयन्नाह—दोषोदय इत्यादि । दोषोदय इति दोषोदयमात्रे तावद्वातस्यन्दाद्युक्तक्रमो न कर्तव्यः । तथा विप्लुतिंगते कोऽर्थः? समस्तनयनव्याप्तिपरे स्यन्दोक्तक्रमो न कर्तव्यः । एतेन लङ्घनविरेचननिरूहानुवासनशिरोविरेचनादिना त्र्यहमतिक्रम्य पश्चाद्वातस्यन्दाद्युक्तनस्यादिद्रव्याणि वातादिजनिततिमिरेषु (नस्यतर्पणादिषु) योजयेदित्यर्थः । अन्ये 'विप्लुतिंगते' इत्यत्र 'विप्लुते गदे' इति पठन्ति; तत्र विशब्दो विविधार्थः, तेन विविधतांगते गद इत्यर्थः ॥—

पुनश्च कल्पेऽञ्जनविस्तरः शुभः
प्रवक्ष्यतेऽन्यस्तमपीह योजयेत् ॥ ४७ ॥

इदानीं क्रियाकल्पे वक्ष्यमाणमञ्जनविस्तरमत्रोपदिशन्नाह—पुनश्चेत्यादि । कल्पे क्रियाकल्पे इत्यर्थः । अन्योऽपरः । तमिति अञ्जनविस्तरमित्यर्थः ॥ ४७ ॥

घृतं पुराणं त्रिफलां शतावरीं
पटोलमुद्गामलकं यवानपि ॥
निषेवमाणस्य नरस्य यत्नतो
भयं सुघोरात्तिमिरान्न विद्यते ॥ ४८ ॥

इदानीं बहिराश्रयं चिकित्सितं प्रतिपाद्यान्तराश्रयं प्रतिपादयन्नाह—घृतमित्यादि ॥ ४८ ॥

शतावरीपायस एव केवल-
स्तथा कृतो वाऽऽमलकेषु पायसः ॥
प्रभूतसर्पिस्त्रिफलोदकोत्तरो
यवौदनो वा तिमिरं व्यपोहति ॥ ४९ ॥

आहारविशेषमाह—शतावरीत्यादि । शतावरीपायस इति शतावरीमूलशृतेन पयसा कृतः शतावरीपायसः, आमलकेषु पायस इति आमलकशृतपयसा कृतः पायस इत्यर्थः । अन्ये तु शतावरीस्वरससिद्धा यवागूः शतावरीपायसः, आमलकस्वरससिद्धा यवागूश्चामलकपायसः । प्रभूतसर्पिरित्यादि प्रचुरघृतो यवौदनो वीव्यसंज्ञकः गृञ्जासंज्ञको वा, त्रिफलोदके प्रचुरे साधित इत्यर्थः ॥ ४९ ॥

जीवन्तिशाकं सुनिषण्णकं च
सतण्डुलीयं वरवास्तुकं च ॥
चिल्ली तथा मूलकपोतिका च
दृष्टेर्हितं शाकुनजाङ्गलं च ॥ ५० ॥
पटोलकर्कोटककारवेल्ल-
वार्ताकुतर्कारिकरीरजानि ॥
शाकानि शिग्र्वार्तगलानि चैव
हितानि दृष्टेर्घृतसाधितानि ॥ ५१ ॥

आहारोपयोगिचक्षुष्यशाकानाह—जीवन्तिशाकमित्यादि । जीवन्ती डोडिका, सुनिषण्णकं चतुष्पत्री, अन्ये शिरवालिकामाहुः, वरवास्तुकं टङ्कवास्तुकं, चिल्ली क्षेत्रवास्तुकः, मूलकपोतिका बालमूलकं, शाकुनं लावादिकं, जाङ्गलमेणादिजातं, तर्कारी अरणिका, करीरो गूढपत्रः, शिग्रुः शोभाञ्जनकः, आर्तगलो नीलसहचरः ॥ ५० ॥ ५१ ॥

विवर्जयेत्सिरामोक्षं तिमिरे रागमागते ॥
यन्त्रेणोत्पीडितो दोषो निहन्यादाशु दर्शनम् ॥५२॥

सेव्यमुद्दिश्य परिहार्यमाह—विवर्जयेदित्यादि ॥ ५२ ॥

अरागि तिमिरं साध्यमाद्यं पटलमाश्रितम् ॥
कृच्छ्रं द्वितीये रागि स्यात्तृतीये याप्यमुच्यते ॥५३॥

इदानीं सन्दधियां सुखस्मरणाय साध्यादिभेदमाह—अरागीत्यादि ॥ ५३ ॥

रागप्राप्तेष्वपि हितास्तिमिरेषु तथा क्रियाः ॥
यापनार्थं यथोद्दिष्टाः सेव्याश्चापि जलौकसः ॥५४॥

रागप्राप्तेषु विध्यन्तरं यापनार्थं पूर्वमुक्तमप्यनुवदन्नाह—रागप्राप्तेष्वित्यादि । तृतीयपटलप्राप्तरागितिमिरेषु यापनार्थं तथा क्रिया हिता यथोद्दिष्टा इत्यर्थः । तत्र सिरामोक्षस्य निषिद्धत्वादवश्याकर्षणीयशोणिते उपायान्तरमाह—सेव्या इत्यादि ॥ ५४ ॥

श्लैष्मिके लिङ्गनाशे तु कर्म वक्ष्यामि सिद्धये ॥
न चेदर्धेन्दुघर्माम्बुबिन्दुमुक्ताकृतिः स्थिरः ॥ ५५ ॥
विषमो वा तनुर्मध्ये राजिमान् वा बहुप्रभः ॥
दृष्टिस्थो लक्ष्यते दोषः सरुजो वा सलोहितः ॥५६॥

अनौषधसाध्ये श्लैष्मिके लिङ्गनाशेऽर्धेन्द्वाद्याकृतिविशिष्टो दृष्टिस्थो दोषो न चेल्लक्ष्यते तदा साधनार्थं शस्त्रकर्म वक्ष्यामीति निर्दिशन्नाह—श्लैष्मिक इत्यादि । लिङ्गनाशो दृष्टिनाशः । कर्म शस्त्रकर्म । घर्माम्बुबिन्दुः प्रस्वेदबिन्दुः । आकृतिशब्दोऽर्धेन्द्वादिभिः प्रत्येकं संबन्धनीयः । स्थिरः कठिनः । विषमो वा तनुर्मध्ये इति यतो मध्ये तनुरत एव विषमो निम्नोन्नत इत्यर्थः ॥

स्निग्धस्विन्नस्य तस्याथ काले नात्युष्णशीतले ॥
यन्त्रितस्योपविष्टस्य स्वां नासां पश्यतः समम् ॥५७॥
मतिमान् शुक्लभागौ द्वौ कृष्णान्मुक्त्वा त्वपाङ्गतः ॥
उन्मील्य नयने सम्यक् सिराजालविवर्जिते ॥ ५८ ॥
नाधो नोर्ध्वं न पार्श्वाभ्यां छिद्रे दैवकृते ततः ॥
शलाकया प्रयत्नेन विश्वस्तं यववक्त्रया ॥ ५९ ॥
मध्यप्रदेशिन्यङ्गुष्ठस्थिरहस्तगृहीतया ॥
दक्षिणेन भिषक् सव्यं विध्येत् सव्येन चेतरत् ६०
वारिबिन्द्वागमः सम्यग् भवेच्छब्दस्तथा व्यधे ॥

तदेव शस्त्रकर्म निर्दिशन्नाह—स्निग्धस्विन्नस्येत्यादि । नात्युष्णशीते साधारणे मार्गशीर्षे चैत्रे वा । शुक्लभागौ द्वावपि द्वौ शुक्लतारकांशावित्यर्थः । कृष्णात् कृष्णतारकान्तात्, मुक्त्वा परित्यज्य, अपाङ्गतोऽपाङ्गसमीपे विध्येदित्यर्थः । सम्यगिति नातिप्रसारितं नातिसङ्कुचितं यथा स्यादित्यर्थः । दैवकृते छिद्रे

१ 'वाढीसंज्ञकः' इति पा० ।

इति छिद्रमिव छिद्रं न परमार्थतश्छिद्रमस्ति । विश्वस्तं असंत्रस्तं यथा स्यात् । सव्यं वामनेत्रं, सव्येन वामहस्तेन, इतरत् दक्षिणनयनम् । सम्यग्विद्धलक्षणमाह—वारिबिन्द्वागम इत्यादि । सम्यगिति पदं व्यध इत्यत्र संबध्यते । असम्यग्व्यधे च रक्तनिर्गमनमशब्दता च ॥ ५७–६० ॥—

संसिच्य विद्धमात्रं तु योषित्स्तन्येन कोविदः ॥६१॥
स्थिरे दोषे चले वाऽपि स्वेदयेदक्षि बाह्यतः ॥
सम्यक् शलाकां संस्थाप्य भङ्गैरनिलनाशनैः ॥६२॥
शलाकाग्रेण तु ततो निर्लिखेद्दृष्टिमण्डलम् ॥
विध्यतो योऽन्यपार्श्वेऽक्षणस्तं रुद्ध्वा नासिकापुटम् ॥
उच्छिङ्घनेन हर्तव्यो दृष्टिमण्डलगः कफः ॥

सम्यग्विद्धे नेत्रे सति किं कार्यमित्याह—संसिच्येत्यादि । योषित्स्तन्येन नारीक्षीरेण । कोविदो धीमान् वैद्यः । स्थिरे अचले । शलाकां संस्थाप्य निश्चलीकृत्य । भङ्गैः पल्लवैः । स्वेदानन्तरं किं कर्तव्यमित्याह—शलाकाग्रेणेत्यादि । ततः स्वेदानन्तरं, दृष्टिमण्डलं निर्लिखेत् श्लेष्मसंहतिविश्लेषार्थम् । शलाकाग्रविनिर्लेखनाद्विश्लिष्टकफस्य निर्हरणोपायमाह—विध्यत इत्यादि । विध्यतोऽक्ष्णोऽन्यपार्श्वे यो नासापुटस्तं नासापुटं रुद्ध्वा दृष्टिमण्डलगः कफ उच्छिङ्घनेन हर्तव्य इति पिण्डार्थः ॥ ६१–६३ ॥—

निरभ्र इव घर्मांशुर्यदा दृष्टिः प्रकाशते ॥ ६४ ॥
तदाऽसौ लिखिता सम्यग् ज्ञेया या चापि निर्व्यथा
(एवं त्वशक्ये निर्हर्तुं दोषे प्रत्यागतेऽपि वा ॥ ६५ ॥
स्नेहाद्यैरुपपन्नस्य व्यधो भूयो विधीयते)
ततो दृष्टेषु रूपेषु शलाकामाहरेच्छनैः ॥ ६६ ॥
घृतेनाभ्यज्य नयनं वस्त्रपट्टेन वेष्टयेत् ॥
ततो गृहे निराबाधे शयीतोत्तान एव च ॥ ६७ ॥
उद्गारकासक्षवथुष्ठीवनोत्कम्पनानि च[१] ॥
तत्कालं नाचरेदूर्ध्वं यन्त्रणा स्नेहपीतवत् ॥ ६८ ॥

सम्यग्लिखितलक्षणमाह—निरभ्र इत्यादि । निरभ्रो निर्मेघः, घर्मांशुरादित्यः । ततो दृष्टेष्वित्यादि । शलाकामाहृत्य किं कुर्यादित्याह—घृतेनाभ्यज्येत्यादि । निराबाधे धूलिधूमवातातपादिरहिते । उत्तानशयनमृजूकरणार्थम् । उद्गारेत्यादि । क्षवथुः छिक्का । तत्कालमिति यावच्छलाका नेत्रे तिष्ठति । तत ऊर्ध्वं यन्त्रणा आहारादीनां नियमः, स्नेहपीतवत् स्नेहपानोक्तः कार्यः ॥ ६४–६८ ॥

त्र्यहात् त्र्यहाच्च धावेत कषायैरनिलापहैः ॥
वायोर्भयात् त्र्यहादूर्ध्वं स्वेदयेदक्षि पूर्ववत् ॥ ६९ ॥

त्र्यहादित्यादि । धावेत प्रक्षालयेत् । अनिलापहैरेरण्डमूलादिवातापहचक्षुष्यद्रव्यैः क्षीराम्बुसाधितैः । प्रक्षालनानन्तरं किं कर्तव्यमित्याह—वायोर्भयादित्यादि । पूर्ववदिति बाह्यतो मृदु स्वेदयेदित्यर्थः ॥ ६९ ॥

दशाहमेवं संयम्य हितं दृष्टिप्रसादनम् ॥
पश्चात्कर्म च सेवेत लघ्वन्नं चापि मात्रया ॥ ७० ॥

दशाहमेवमित्यादि । एवमुत्तानशयनादिना दशाहं नियम्य तदनन्तरं पश्चात्कर्म नस्यतर्पणशिरोबस्त्यादिकं यद्दृष्टिप्रसादनं दृष्टेर्नैर्मल्यजननं तत् सेवेतेति पिण्डार्थः ॥ ७० ॥

सिराव्यधविधौ पूर्वं नरा ये च विवर्जिताः ॥
न तेषां नीलिकां विध्येदन्यत्राभिहिताद्भिषक् ॥७१॥

इदानीं श्लेष्मिकेऽपि लिङ्गनाशे केषांचित् पुरुषाणां शस्त्रनिषेधं दर्शयन्नाह—सिराव्यधविधौ पूर्वमित्यादि । नरा ये च विवर्जिता इति सिराव्यधविधौ ये नरा बालस्थविरादयो विवर्जितास्तेषां नीलिकां लिङ्गनाशापरपर्यायां न विध्येत् । अन्यत्राभिहितादिति तथाऽभिहितात् कथिताद्दैवकृतच्छिद्रादन्यत्र न विध्येत् । चकारस्तु सिराविद्धैः पुरुषैर्ये क्रोधादयो विवर्जनीयास्तेऽपि नीलिकायां वर्जनीया इति ज्ञापयति ॥ ७१ ॥

पूर्यते शोणितेनाक्षि सिरावेधाद्विसर्पता ॥
तत्र स्त्रीस्तन्ययष्ट्याह्वपक्वं सेके हितं घृतम् ॥ ७२ ॥

दैवकृतच्छिद्रादन्यत्र कस्मान्न नीलिकां विध्येदित्याह—पूर्यत इत्यादि । विसर्पता शोणितेनाक्षि पूर्यत इत्यर्थः । प्रमादाद्दैवकृतच्छिद्रादन्यत्रापि विद्धे सति व्यापदुपशमनार्थं चिकित्सितमाह—तत्रेत्यादि ॥ ७२ ॥

अपाङ्गासन्नविद्धे तु शोफशूलाश्रुरक्तताः[१] ॥
तत्रोपनाहं भ्रूमध्ये कुर्याच्चोष्णाज्यसेचनम् ॥ ७३ ॥
व्यधेनासन्नकृष्णेन रागः कृष्णं च पीड्यते ॥
तत्राधःशोधनं सेकः सर्पिषा रक्तमोक्षणम् ॥७४॥
अथाप्युपरि विद्धे तु कष्टा रुक् संप्रवर्तते ॥
तत्र कोष्णेन हविषा परिषेकः प्रशस्यते ॥ ७५ ॥
शूलाश्रुरागास्त्वत्यर्थमधोवेधेन पिच्छिलः ॥
शलाकामनु चास्रावस्तत्र पूर्वचिकित्सितम्[२] ॥ ७६ ॥
रागाश्रुवेदनास्तम्भहर्षाश्चातिविघट्टिते ॥
स्नेहस्वेदौ हितौ तत्र हितं चाप्यनुवासनम् ॥ ७७ ॥
दोषस्त्वधोऽपकृष्टोऽपि तरुणः पुनरूर्ध्वगः ॥
कुर्याच्छुक्लारुणं नेत्रं तीव्ररुङ्दृष्टदर्शनम् ॥ ७८ ॥
मधुरैस्तत्र सिद्धेन घृतेनाक्ष्णः प्रसेचनम् ॥
शिरोबस्तिं च तेनैव दद्यान्मांसैश्च भोजनम् ॥७९॥

इदानीमस्थानवेधात् संक्षेपेण व्यापदमभिधाय विस्तरेणापि व्यापदो निर्दिशन्नाह—अपाङ्गेत्यादि । तत्र चिकित्सामाह—तत्रोपनाहमित्यादि । चिकित्सामाह—तत्राध इत्यादि । अधः-

१ 'छीवनोज्जृम्भणानि' इति पा० ।

१ 'अधोविद्धे भवन्ति हि' इति पा० । २ 'विदधीत भिषक् तत्र' इति पा० ।

शोधनं विरेकः, रक्तमोक्षणमत्र जलौकोभिः । अथेत्यादि । कष्टा तीव्रा । चिकित्सामाह—तत्र कोष्णेनेत्यादि । शूलेत्यादि । अनु शलाकां शलाकाया अनन्तरमेवेत्यर्थः । चिकित्सामाह—तत्रेत्यादि । पूर्वचिकित्सितं स्त्रीस्तन्ययष्ट्याह्वेत्यादिकम् । हर्षो रोमाञ्चप्रायो वेदनाविशेषः, अतिविघट्टिते अतिचालिते । चिकित्सामाह—स्नेहस्वेदावित्यादि । तरुणो लिङ्गनाशमप्राप्तः । चिकित्सामाह—मधुरैरित्यादि । मधुरैर्यष्टीमधुकादिभिः । तेनैव यष्टीमधुकादिसिद्धेनैव ॥ ७३-७९ ॥

दोषस्तु संजातवलो घनः संपूर्णमण्डलः ॥
प्राप्य नश्येच्छलाकाग्रं तन्वभ्रमिव मारुतम् ॥८०॥

दोषस्तु सञ्जात इत्यादि ॥ ८० ॥

मूर्धाभिघातव्यायामव्यवायवमिमूर्च्छनैः ॥
दोषः प्रत्येति कोपाच्च विद्धोऽतितरुणश्च यः ॥८१॥

निर्लिखितस्यापि दोषस्य पुनरावृत्तिकारणान्याह—मूर्धाभिघातेत्यादि । प्रत्येति आगच्छति । तरुणो लिङ्गनाशमप्राप्तः ॥ ८१ ॥

शलाका कर्कशा शूलं, खरा दोषपरिस्रुतिम् ॥
व्रणं विशालं स्थूलाग्रा, तीक्ष्णा हिंस्यादनेकधा ॥८२
जलास्रावं तु विषमा, क्रियासङ्गमथास्थिरा ।
करोति

दुष्टशलाकाजनितव्यापदमाह—शलाकेत्यादि । दोषपरिस्रुतिः दोषस्य समन्तादागमनम् । हिंस्यादनेकधेति अनेकप्रकारं क्षतं करोतीत्यर्थः । विषमा कृशस्थूला । अस्थिरा वृद्धा मुग्धा । 'करोति' इति पदमन्ते निर्दिष्टत्वात् सर्वत्र संवध्यते ॥८२॥—

वर्जिता दोषैस्तस्मादेभिर्हिता भवेत् ॥ ८३ ॥
अष्टाङ्गुलायता मध्ये सूत्रेण परिवेष्टिता ॥
अङ्गुष्ठपर्वसमिता वक्त्रयोर्मुकुलाकृतिः ॥ ८४ ॥
ताम्रायसी शातकुम्भी शलाका स्यादनिन्दिता ॥

वर्जितेत्यादि । एभिर्दोषैरनन्तरोक्तैः कर्कशादिभिर्विरहिता । हिता कार्यकारिणी । शातकुम्भी सुवर्णमयी ॥८३॥८४॥—

रागः शोफोऽर्बुदं चोषो बुद्बुदं शूकराक्षिता ॥ ८५ ॥
अधिमन्थादयश्चान्ये रोगाः स्युर्व्यधदोषजाः ॥
अहिताचारतो वाऽपि यथास्वं तानुपाचरेत् ॥ ८६ ॥

इदानीं दुष्टव्यधाहाराचारजान् रोगानाह—राग इत्यादि । चोष आचूष्यत इव वेदनाविशेषः । बुद्बुदं बुद्बुदाकारो मांसनिर्गमः । शूकराक्षिता अधोदृष्टित्वम् । तत्र चिकित्सितमाह—यथास्वमित्यादि । यथास्वं यथात्मीयं यथादोषमित्यर्थः ॥ ८५ ॥ ८६ ॥

रुजायामक्षिरागे वा योगान् भूयो निबोध मे ॥
गैरिकं सारिवा दूर्वा यवपिष्टं घृतं पयः ॥ ८७ ॥
सुखालेपः प्रयोज्योऽयं वेदनारागशान्तये ॥
मृदुभ्रष्टैस्तिलैर्वाऽपि सिद्धार्थकसमायुतैः ॥ ८८ ॥
मातुलुङ्गरसोपेतैः सुखालेपस्तदर्थकृत् ॥
पयस्यासारिवापत्रमञ्जिष्ठामधुकैरपि ॥ ८९ ॥
अजाक्षीरान्वितैर्लेपः सुखोष्णः पथ्य उच्यते ॥
दारुपद्मकशुण्ठीभिरेवमेव कृतोऽपि वा ॥ ९० ॥
द्राक्षामधुककुष्ठैर्वा तद्वत् सैन्धवसंयुतैः ॥
रोध्रसैन्धवमृद्वीकामधुकैर्वाऽप्यजापयः ॥ ९१ ॥
शृतं सेके प्रयोक्तव्यं रुजारागनिवारणम् ॥
मधुकोत्पलकुष्ठैर्वा द्राक्षालाक्षासितायुतैः ॥
ससैन्धवैः शृतं क्षीरं रुजारागनिबर्हणम् ॥ ९२ ॥
शतावरीपृथक्पर्णीमुस्तामलकपद्मकैः ॥
साजक्षीरैः शृतं सर्पिर्दाहशूलनिबर्हणम् ॥ ९३ ॥
वातघ्नसिद्धे पयसि सिद्धं सर्पिश्चतुर्गुणे ॥
काकोल्यादिप्रतीवापं तद्युञ्ज्यात् सर्वकर्मसु ॥ ९४ ॥

इदानीं कर्कशशलाकाजनिते शूले तथा दुष्टव्यधजे च रोगे चिकित्सामुद्दिशन्नाह—रुजायामित्यादि । निबोध जानीहि । सारिवा उत्पलसारिवा । मृदुभ्रष्टैरित्यादि । सिद्धार्थकः सर्षपः । तदर्थकृद्वेदनारागनाशकृत् । पयस्येत्यादि । पयस्या अर्कपुष्पी, क्षीरकाकोलीत्यन्ये । पत्रं पत्रकम् । दारुपद्मकेत्यादि । एवमेवेति अजाक्षीरान्वितैर्दारुपद्मकादिभिर्लेपः कार्यः; तद्वद्द्राक्षादिभिरपि । रोध्रसैन्धवेत्यादि । वातघ्नानि भद्रदार्वादीनि । सर्वकर्मसु नस्यालेपनादिषु ॥ ८७-९४ ॥

शाम्यत्येवं न चेच्छूलं स्निग्धस्विन्नस्य मोक्षयेत् ॥
ततः सिरां दहेद्वाऽपि मतिमान् कीर्तितं यथा ॥९५

एवमप्यशाम्यति शूले किं कुर्यादित्याह—शाम्यत्येवमित्यादि । सिराऽत्र औपनासिका आपाङ्ग्या लालाट्या वा । न केवलं सिरां मोक्षयेत् दहेद्वा । कीर्तितं यथेति 'भ्रूललाटशङ्खप्रदेशेषु दहेत्' इत्यादिवाक्येन ॥ ९५ ॥

दृष्टेरतः प्रसादार्थमञ्जने शृणु मे शुभे ॥
मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि ॥ ९६ ॥
सुमनायाश्च पुष्पाणि मुक्ता वैदूर्यमेव च ॥
अजाक्षीरेण संपिष्य ताम्रे सप्ताहमावपेत् ॥ ९७ ॥
प्रविधाय च तद्वर्तीर्योजयेच्चाञ्जने भिषक् ॥
स्रोतोजं विद्रुमं फेनं सागरस्य मनःशिलाम् ॥९८॥
मरिचानि च तद्वर्तीः कारयेच्चापि पूर्ववत् ॥
दृष्टिस्थैर्यार्थमेतत्तु विदध्यादञ्जने हितम् ॥ ९९ ॥

सिराव्यधेनाप्यवशिष्टदोषकलुषिताया दृष्टेः प्रसादनार्थमञ्जने आह—दृष्टेरत इत्यादि । सुमना जाती । आवपेत् प्रतिक्षिपेत् ।

१ 'वृद्धः' इति पा० । २ 'मृद्वी' इति पा० ।

१-२ 'मुखालेपः' इति पा० । ३ 'मधुकपद्मकैः' इति पा० । ४ 'तुल्यानि' इति पा० ।

स्रोतोजं सौवीराञ्जनं, विद्रुमं प्रवालम् । मेषशृङ्गस्येत्याद्येकं, स्रोतोजमित्यादि द्वितीयम् ॥ ९६-९९ ॥

भूयो वक्ष्यामि मुख्यानि विस्तरेणाञ्जनानि च ॥
कल्पे नानाप्रकाराणि तान्यपीह प्रयोजयेत् ॥१००॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे दृष्टिगतरोगविज्ञानीयो नाम सप्तदशोऽध्यायः ॥ १७ ॥

भूय इत्यादि । कल्पे क्रियाकल्पे ॥ १०० ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ।

अथातः क्रियाकल्पं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

प्रागुक्ताध्यायेषु चिकित्सितान्यभिहितानि, तेषु चिकित्सितेषु सर्वत्र तर्पणादेः क्रियाया अभिहितत्वात् संक्षेपार्थमेकत्र तर्पणादिकल्पनविस्तराय क्रियाकल्पः प्रतिपाद्यो भवतीत्याह— अथात इत्यादि । क्रियाणां तर्पणपुटपाकादीनां कल्पनं करणं क्रियाकल्पः ॥ १ ॥ २ ॥

सर्वशास्त्रार्थतत्त्वज्ञस्तपोदृष्टिरुदारधीः ॥
वैश्वामित्रं शशासाथ शिष्यं काशिपतिर्मुनिः ॥ ३ ॥

क्रियाकल्पविषयेऽपि प्राङ्निर्दिष्टं यत् तर्पणादि तत्पूर्वकर्मप्रधानकर्महीनयोगातियोगोत्तरकर्मभिनिर्दिदिक्षुराह—सर्वशास्त्रार्थेत्यादि । सर्वशास्त्रार्थतत्त्वज्ञादिगुणयुक्तः काशिपतिर्मुनिर्वैश्वामित्रं शिष्यं शशासेति पिण्डार्थः । तपसा दृष्टिर्दर्शनं विशेषज्ञानोदयो यस्यासौ तपोदृष्टिः । उदारा महती धीर्यस्य स उदारधीः । विश्वामित्रस्यापत्यं वैश्वामित्रः सुश्रुतस्तम् । शशास शिक्षितवानित्यर्थः । अथशब्दो मङ्गलार्थः । काशिपतिर्मुनिरिति राजर्षिर्धन्वन्तरिरित्यर्थः ॥ ३ ॥

तर्पणं पुटपाकश्च सेक आश्च्योतनाञ्जने ॥
तत्र तत्रोपदिष्टानि तेषां व्यासं निबोध मे ॥ ४ ॥

कास्ताः क्रिया यासां कल्पनमित्याह—तर्पणमित्यादि । यानि तर्पणपुटपाकादीनि तत्र तत्र वाताभिष्यन्दादावुपदिष्टानि संक्षेपतः कथितानि तेषां विस्तरं मत्सकाशान्निबोध जानीहीति पिण्डार्थः । शिरोबस्तिः सर्वेन्द्रियतर्पणात् तर्पणोक्तैरेवोक्तो मन्तव्यः, पुटपाकसेकाश्च्योतनान्यपि स्नेहयुक्तानि तर्पणरूपत्वात् तर्पण एवान्तर्भवन्ति, यत् पुनरुपादानं पुटपाकादीनां तद्रूक्षाणां पुटपाकादीनां ग्रहणाय कृतमित्यर्थः ॥ ४ ॥

संशुद्धदेहशिरसो जीर्णान्नस्य शुभे दिने ॥
पूर्वाह्णे वाऽपराह्णे वा कार्यमक्ष्णोस्तु तर्पणम् ॥ ५ ॥
वातातपरजोहीने वेश्मन्युत्तानशायिनः ॥
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डलौ ॥ ६ ॥
समौ दृढावसंबाधौ कर्तव्यौ नेत्रकोशयोः ॥
पूरयेद्घृतमण्डस्य विलीनस्य सुखोदके ॥ ७ ॥
आपक्ष्माग्रात्ततः स्थाप्यं पञ्च तद्वाक्शतानि तु ॥
स्वस्थे, कफे षट्, पित्तेऽष्टौ, दश वाते तदुत्तमम् ॥८॥
रोगस्थानविशेषेण केचित् कालं प्रचक्षते ॥
यथाक्रमोपदिष्टेषु त्रीण्येकं पञ्च सप्त च ॥ ९ ॥
दश दृष्ट्यामथाष्टौ च वाक्शतानि विभावयेत् ॥
ततश्चापाङ्गतः स्नेहं स्रावयित्वाऽक्षि शोधयेत् ॥१०
स्विन्नेन यवपिष्टेन, स्नेहवीर्येरितं ततः ॥
यथास्वं धूमपानेन कफमस्य विशोधयेत् ॥ ११ ॥

तर्पणं कथं कार्यमित्याह—संशुद्धेत्यादि । संशुद्धदेहशिरस इति सिरामोक्षणविरेचननिरूहशिरोविरेचनैः सम्यक्शुद्धकायमस्तकस्येत्यर्थः । वेश्मनि गृहे । आधारौ पाली इत्यर्थः । क्लिन्नेन पानीयालोडितेन । परिमण्डलौ वर्तुलौ, द्वावपि नेत्रकोशौ परिवार्य स्थिताविल्यर्थः । एतेन तिर्यक्पूरणे घृतस्य मात्रोक्ता । समौ अनिम्नोन्नतौ, दृढौ अच्छिद्रौ, असंबाधौ असङ्कटौ । नेत्रकोशयोरित्यत्र 'परितः' इति शेषः । घृतमण्डो घृतस्योपर्यच्छो भागः । सुखोदके उष्णोदके । आपक्ष्माग्रादित्यत्र पूरयेदिति संबन्धनीयम् । आपक्ष्माग्राद्वर्त्मलोमपर्यन्तमित्यर्थः । एतेनोर्ध्वं पूरणे घृतस्य मात्रोक्ता भवति । तर्पणं कियत्कालं स्थाप्यमिति दर्शयन्नाह—तत इत्यादि । तच्च प्रमाणमुत्तमं, दोषबलापेक्षया पुनर्ह्रासोऽपि कर्तव्यः । इदानीं स्वमतं प्रदर्श्य परमतमपि दर्शयन्नाह—रोगेत्यादि । रोगस्थानविशेषेणेति सन्धिवर्त्मशुक्लादिभेदेनेत्यर्थः । कथं रोगस्थानविशेषेण कालं प्रचक्षते इत्याह— यथाक्रमोपदिष्टेष्वित्यादि । यथाक्रमकथितेषु सन्ध्यादिरोगस्थानेष्वित्यर्थः । तत्र त्रीणि वाक्शतानि सन्धौ, वर्त्मन्येकं, शुक्ले पञ्च, कृष्णे सप्त, सर्वत्र दश, दृष्टावपि दश अष्टौ वा । तत इत्यादि । अपाङ्गतोऽपाङ्गात् भ्रूपुच्छान्तप्रदेशादित्यर्थः । स्नेहं स्रावयित्वा शलाकाकृतद्वारेण । स्नेहवीर्येरितमित्यादि । स्नेहवीर्येरितं स्नेहशक्त्या प्रेरितम् । ततः स्नेहापनयनानन्तरम् । यथास्वं धूमपानेनेति कफप्रत्यनीकेन शिरोविरेचनधूमपानेनेत्यर्थः ॥ ५-११ ॥

एकाहं वा त्र्यहं वाऽपि पञ्चाहं चेष्यते परम् ॥

कति दिनानि तर्पणप्रयोगस्तदाह—एकाहमित्यादि । एकाहं वाते, त्र्यहं पित्ते, पञ्चाहं कफे इति गयी; एकाहं न्यूनदोषे, त्र्यहं मध्यदोषे, पञ्चाहमधिकदोषे इति जेज्जटाचार्यः । परमित्युत्कृष्टप्रमाणं यथा स्यात्; एतेनातः परं तर्पणं न योज्यम् । तच्च तर्पणं विदेहानुमतेन निरन्तरं दिनान्तरं द्व्यन्तरं त्र्यन्तरं वा योज्यम् । तथा च विदेहः,—"स्वस्थवृत्ते विधातव्यं द्व्यन्तरं तर्पणं भवेत् । अहन्यहनि वातोत्थे, रक्तपित्ते दिनान्तरम् ॥ तर्पणं सन्निपातोत्थे द्व्यन्तरं, त्र्यन्तरं कफे"—इति ॥—

१ 'तपोनिधिः' इति पा० । २ 'सेकयुक्तानि' इति पा० ।

तर्पणे तृप्तिलिङ्गानि नेत्रस्येमानि लक्षयेत् ॥ १२ ॥
सुखस्वप्नावबोधत्वं वैशद्यं वर्णपाटवम् ॥
निर्वृतिर्व्याधिविध्वंसः क्रियालाघवमेव च ॥ १३ ॥

तर्पणे इत्यादि । वैशद्यं मलाभावः । वर्णपाटवं श्वेतत्वादेर्वर्णस्य यथार्थग्रहणं; अन्ये तु नेत्रगतस्यैव शुक्लकृष्णादेर्वर्णस्य वैमल्यमाहुः । निर्वृतिस्तात्कालिकं सुखमुत्पन्नम् । क्रियालाघवमिति क्रियाणां निमेषोन्मेषादीनां शीघ्रता; अन्ये तु क्रिया निमेषोन्मेषणादिकाः, लाघवं नेत्रयोरेव लघुतेत्याहुः ॥१२॥१३॥

गुर्वाविलमतिस्निग्धमश्रुकण्डूपदेहवत् ॥
ज्ञेयं दोषसमुत्क्लिष्टं नेत्रमत्यर्थतर्पितम् ॥ १४ ॥

अतितर्पितस्य नेत्रस्य लक्षणमाह—गुर्वाविलमित्यादि । आविलमाकुलं, दोषसमुत्क्लिष्टं दोषव्याप्तम् ॥ १४ ॥

रूक्षमाविलमस्राढ्यमसहं रूपदर्शने ॥
व्याधिवृद्धिश्च तज्ज्ञेयं हीनतर्पितमक्षि च ॥ १५ ॥

हीनतर्पितस्य नयनस्य लक्षणमाह—रूक्षमित्यादि । अस्राढ्यमश्रुबहुलम् ॥ १५ ॥

अनयोर्दोषबाहुल्यात् प्रयतेत चिकित्सिते ॥
धूमनस्याञ्जनैः सेकै रूक्षैः स्निग्धैश्च योगवित् ॥१६॥

इदानीमतितृप्तातृप्तयोश्चिकित्सामुद्दिशन्नाह—अनयोरित्यादि । एतैर्धूमनस्याञ्जनसेकै रूक्षैः पित्तश्लेष्मभूयिष्ठे, वातभूयिष्ठे तु स्निग्धैरिति । योगवित् शास्त्रविद्वैद्यः ॥ १६ ॥

ताम्यत्यतिविशुष्कं यद्रूक्षं यच्चातिदारुणम् ॥
शीर्णपक्ष्माविलं जिह्मं रोगक्लिष्टं च यद्भृशम् ॥१७॥
तदक्षि तर्पणादेव लभेतोर्जामसंशयम् ॥

तर्पणविषयं निर्दिशन्नाह—ताम्यतीत्यादि । ताम्यति अन्धकारमिव पश्यति । अतिविशुष्कमश्रुरहितम् । रूक्षमस्निग्धच्छवि । दारुणं कठिनवर्त्म । जिह्मं रूपक्रियासु जडम् । ऊर्जा बलम् ॥ १७ ॥—

दुर्दिनात्युष्णशीतेषु चिन्तायासभ्रमेषु च ॥ १८ ॥
अशान्तोपद्रवे चाक्ष्णि तर्पणं न प्रशस्यते ॥

तर्पणाविषयमाह—दुर्दिनेत्यादि । अशान्तोपद्रवे चेति अशान्ता अस्वल्पीभूता उदीर्णवेदनादय उपद्रवा यत्र तस्मिन् ॥ १८ ॥—

पुटपाकस्तथैतेषु, नस्यं येषु च गर्हितम् ॥ १९ ॥
तर्पणार्हा न ये प्रोक्ताः स्नेहपानाक्षमाश्च ये ॥

इदानीं पुटपाकस्य विषयाविषयमाह—पुटपाक इत्यादि । पुटपाकस्तथैतेष्विति एतेषु पूर्वोक्तेषु तर्पणार्हेषु पुटपाकस्तथाऽर्हतीत्यर्थः । अयं पुटपाकस्य विषयः, अविषयस्तु नस्यं येषु च गर्हितमित्यादिकः । नस्यं येषु च गर्हितमिति येषु नस्यं गर्हितं तेषु पुटपाकोऽपि गर्हितः । तर्पणार्हा न ये प्रोक्ता इति ये चिन्ताश्रमगृहीतादयस्तर्पणं नार्हन्ति ते पुटपाकमपि नार्हन्ति । स्नेहपानाक्षमाश्च ये दुर्बलारोचकिप्रभृतयः स्नेहपानं न क्षमन्ते ते पुटपाकमपि न क्षमन्ते इत्यर्थः ॥ १९ ॥—

ततः प्रशान्तदोषेषु पुटपाकक्षमेषु च ॥ २० ॥
पुटपाकः प्रयोक्तव्यो नेत्रेषु भिषजा भवेत् ॥
स्नेहनो लेखनीयश्च रोपणीयश्च स त्रिधा ॥ २१ ॥

इदानीं पुटपाकस्यावस्थिकं कालमुद्दिशन्नाह—तत इत्यादि । एवंभूतेषु नेत्रेषु भिषजा पुटपाकः प्रयोक्तव्यो भवेदिति पिण्डार्थः । प्रशान्तदोषेष्विति प्रशब्दोऽयमादिकर्मणि, तेन प्रथमकर्मशान्तावस्थदोषेष्वित्यर्थः । पुटपाकक्षमेषु चेति तर्पणनस्यस्नेहपानार्हेष्वित्यर्थः; तर्पणाद्यनर्हाणि पुनः पुटपाकं न क्षमन्ते । स्नेहन इत्यादि ॥ २० ॥ २१ ॥

हितः स्निग्धोऽतिरूक्षस्य स्निग्धस्यापि च लेखनः ॥
दृष्टेर्बलार्थमपरः पित्तासृग्व्रणवातनुत् ॥ २२ ॥

तेषां त्रिविधानामपि विषयमाह—हित इत्यादि । अपर इति रोपणीयः पुटपाक इत्यर्थः । 'हितः स्निग्धोऽतिरूक्षस्य' इत्यत्र 'त्रिविधः स हितो रूक्षे' इति केचित् पठन्ति । 'पित्तासृग्व्रणवातनुत्' इत्यत्र 'पित्तासृग्व्रणनाशन' इति पठन्ति ॥ २२ ॥

स्नेहमांसवसामज्जमेदःस्वाद्वौषधैः कृतः ॥
स्नेहनः पुटपाकस्तु धार्यो द्वे वाक्शते तु सः ॥२३॥

स्नेहनपुटपाकमाह—स्नेहेत्यादि । स्नेहमांसमिति स्नेहप्रधानं मांसमानूपमित्यर्थः, 'सर्पिर्मांस' इति केचित् पठन्ति । स्वाद्वौषधैः काकोल्यादिभिः, कृतः संस्कृतः ॥ २३ ॥

जाङ्गलानां यकृन्मांसैर्लेखनद्रव्यसंभृतैः ॥
कृष्णलोहरजस्ताम्रशङ्खविद्रुमसिन्धुजैः ॥ २४ ॥
समुद्रफेनकासीसस्रोतोजदधिमस्तुभिः ॥
लेखनो वाक्शतं तस्य परं धारणमुच्यते ॥ २५ ॥

लेखनपुटपाकमाह—जाङ्गलानामित्यादि । जाङ्गला एणादयः । यकृत् कालखण्डानि, मांसानि च कालखण्डासन्नान्येव । विद्रुमः प्रवालः, सिन्धुजं सैन्धवम् ॥ २४ ॥ २५ ॥

स्तन्यजाङ्गलमध्वाज्यतिक्तद्रव्यविपाचितः ॥
लेखनात्त्रिगुणं धार्यः पुटपाकस्तु रोपणः ॥ २६ ॥

रोपणपुटपाकमाह—स्तन्यजाङ्गलेत्यादि । स्तन्यं स्त्रीस्तन्यं, जाङ्गलेत्यत्र मांसमिति शेषः; 'मध्वाज्य' इत्यत्र 'मेध्याज्य' इति केचित् पठन्ति, मेध्याज्यं गव्यं घृतमिति व्याख्यानयन्ति २६

वितरेत्तर्पणोक्तं तु धूमं हित्वा तु रोपणम् ॥
स्नेहस्वेदौ द्वयोः कार्यौ, कार्यो नैव च रोपणे ॥२७॥

इदानीं स्नेहनलेखनयोः पूर्वकर्माह—वितरेदित्यादि । रोपणं पुटपाकं परित्यज्य तर्पणोक्तं धूमं द्वयोर्वितरेत् कुर्यात्, तथा स्नेहस्वेदौ द्वयोरेव कार्याविति पिण्डार्थः ॥ २७ ॥

एकाहं वा द्व्यहं वाऽपि त्र्यहं वाऽप्यवचारणम् ॥

एकाहमित्यादि । एकाहं श्लैष्मिके नेत्ररोगे पुटपाकस्यावचा-

१ 'आमताभूता' ।

रणं, द्व्यहं पैत्तिके, त्र्यहं वातिके; अन्ये तु एकाहं लेखनीयस्यावचारणं, द्व्यहं स्नेहनस्य, त्र्यहं रोपणीयस्येति ॥—

यन्त्रणा तु क्रियाकालाद्द्विगुणं कालमिष्यते ॥ २८ ॥

तर्पणपुटपाकयोरेकत्र परिहार्यकालमुद्दिशन्नाह—यन्त्रणा तु क्रियाकालाद्द्विगुणमित्यादि । क्रियाकालात् स्नेहपानादेरारभ्य यः कालस्तस्माद् द्विगुणः कालः; न पुनस्तर्पणकालात्, तस्याल्पत्वात् ॥ २८ ॥

तेजांस्यनिलमाकाशमादर्शं भास्वराणि च ॥
नेक्षेत तर्पिते नेत्रे पुटपाककृते तथा ॥ २९ ॥

परिहार्याण्याह—तेजांस्यनिलमित्यादि । तेजांसि दीपज्वालाप्रभृतीनि, अनिलं संमुखवायुं, भास्वराणि आदित्यादीनि ॥ २९ ॥

मिथ्योपचारादनयोर्यो व्याधिरुपजायते ॥
अञ्जनाश्च्योतनस्वेदैर्यथास्वं तमुपाचरेत् ॥ ३० ॥

अधुना तयोर्व्यापच्चिकित्साबीजमुद्दिशन्नाह—मिथ्योपचारादित्यादि । अनयोस्तर्पणपुटपाकयोः ॥ ३० ॥

प्रसन्नवर्णं विशदं वातातपसहं लघु ॥
सुखस्वप्नावबोध्यक्षि पुटपाकगुणान्वितम् ॥ ३१ ॥

पुटपाकस्य सम्यग्योगमाह—प्रसन्नवर्णमित्यादि ॥ ३१ ॥

अतियोगाद्रुजः शोफः पिडकास्तिमिरोद्गमः ॥

पुटपाकस्यातियोगमाह—अतियोगाद्रुज इत्यादि ॥—

पाकोऽश्रु हर्षणं चापि हीने दोषोद्गमस्तथा ॥ ३२ ॥

पुटपाकस्य हीनयोगमाह—पाक इत्यादि । हर्षो वेदनाविशेषोऽन्तःशीतकरः ॥ ३२ ॥

अत ऊर्ध्वं प्रवक्ष्यामि पुटपाकप्रसाधनम् ॥
द्वौ बिल्वमात्रौ श्लक्ष्णस्य पिण्डौ मांसस्य पेषितौ ३३
द्रव्याणां बिल्वमात्रं तु द्रवाणां कुडवो मतः ॥
तदैकध्यं समालोड्य पत्रैः सुपरिवेष्टितम् ॥ ३४ ॥
(काश्मरीकुमुदैरण्डपद्मिनीकदलीभवैः ॥)[१]
मृदावलिप्तमङ्गारैः खादिरैरवकूलयेत् ॥ ३५ ॥
कतकाश्मन्तकैरण्डपाटलावृषबादरैः ॥
सक्षीरद्रुमकाष्ठैर्वा गोमयैर्वाऽपि युक्तितः ॥ ३६ ॥
स्विन्नमुद्धृत्य निष्पीड्य रसमादाय तं नृणाम् ॥
तर्पणोक्तेन विधिना यथावदवचारयेत् ॥ ३७ ॥
कनीनके निषेच्यः स्यान्नित्यमुत्तानशायिनः ॥
रक्ते पित्ते च तौ शीतौ कोष्णौ वातकफापहौ ॥३८॥

अत ऊर्ध्वमित्यादि । श्लक्ष्णस्य मांसस्य द्वौ पिण्डौ बिल्वमात्रौ प्रत्येकं पलप्रमाणौ कार्यावित्यर्थः । द्रव्याणां बिल्वमात्रमिति स्नेहनलेखनरोपणेषु पुटपाकेषु यथाक्रमं मधुरौषधलेखनद्रव्यतिक्तद्रव्याणां पलप्रमाणमित्यर्थः । द्रवाणां कुडव इति अष्टौ पलानि; केचिच्चत्वारि पलानि, कस्मात्? कुडवादूर्ध्वं द्विगुणपरिभाषा । तत्र स्नेहनपुटपाकस्य पेषणालोडनार्थं मांसरसमधुरौषधकषायक्षीराणि, लेखनस्य मधुमस्तुत्रिफलोदकानि, रोपणस्य तिक्तकषाय इति । अवकूलयेत् विपचेत् । क्षीरद्रुमा वटादयः । युक्तित इति पदमवकूलयेदित्यत्र संबन्धनीयम् । युक्तिस्तु 'पुटपाकस्य पाकोऽयं बहिराररक्तवर्णता' इति । इदानीं तर्पणपुटपाकयोर्दोषोपयोगिधर्मान्तरं निर्दिशन्नाह—रक्ते इत्यादि ॥ ३३-३८ ॥

अत्युष्णतीक्ष्णौ सततं दाहपाककरौ स्मृतौ ॥
अम्लुतौ शीतलौ चाश्रुस्तम्भरुग्घर्षकारकौ ॥ ३९ ॥
अतिमात्रौ कषायत्वसङ्कोचस्फुरणावहौ ॥
हीनप्रमाणौ दोषाणामुत्क्लेशजननौ भृशम् ॥ ४० ॥

तर्पणपुटपाकयोर्विरुद्धगुणमात्रयोर्व्यापदो निर्दिशन्नाह—अत्युष्णेत्यादि । अम्लुतौ मन्दम्लुतौ ॥ ३९-४० ॥

युक्तौ कृतौ दाहशोफरुग्घर्षस्रावनाशनौ ॥
कण्डूपदेहदूषीकारक्तराजिविनाशनौ ॥ ४१ ॥
तस्मात् परिहरन् दोषान् विदध्यात्तौ सुखावहौ ॥

युक्तौ कृतावित्यादि । दूषिका नेत्रमलः, दोषानत्युष्णतीक्ष्णादिकान् ॥ ४१ ॥—

व्यापदश्च यथादोषं नस्यधूमाञ्जनैर्जयेत् ॥ ४२ ॥

इदानीं व्यापच्चिकित्सामाह—व्यापदश्च यथादोषमित्यादि । व्यापदो दाहपाकादिकाः, यथादोषं दोषानतिक्रमेण ॥ ४२ ॥

आद्यन्तयोश्चाप्यनयोः स्वेद उष्णाम्बुचैलिकः ॥
तथा हितोऽवसाने च धूमः श्लेष्मसमुच्छ्रितौ ॥४३॥

इदानीं तर्पणपुटपाकयोः पूर्वकर्म पश्चात्कर्म चाह—आद्यन्तयोश्चाप्यनयोरित्यादि । अनयोः तर्पणपुटपाकयोः । स्वेद उष्णाम्बुचैलिक इति उष्णाम्बुसिक्तेन कर्पटेन स्वेद इत्यर्थः । 'तथा हितोऽवसाने च धूमः श्लेष्मसमुत्थितौ' इति केचित् पठन्ति ॥ ४३ ॥

यथादोषोपयुक्तं तु नातिप्रबलमोजसा ॥
रोगमाश्च्योतनं हन्ति सेकस्तु बलवत्तरम् ॥ ४४ ॥

इदानीमाश्च्योतनसेकावाह—यथादोषोपयुक्तमित्यादि । यथादोषोपयुक्तमिति वातादिजे नेत्ररोगे वातादिहरद्रव्यसिद्धमाश्च्योतनमित्यर्थः । नातिप्रबलं नात्युत्कटं रोगम् । ओजसा शक्त्या । सेकस्तु बलवत्तरमिति यथादोषोपयुक्तः परिषेकः पुनर्बलवत्तरमिति प्रबलं रोगं हन्ति । तौ चाश्च्योतनसेकौ चतुर्थेऽहन्यागतरोगलक्षणे[१] प्रयोक्तव्यौ । तथा च विदेहः—"प्रागेवाश्च्यामये कार्यं त्रिरात्रं लघुभोजनम् । उपवासस्त्र्यहं वा स्यान्नक्तं वाऽप्यशनं त्र्यहम् ॥ ततश्चतुर्थे दिवसे व्याधिं संजातलक्षणम् । समीक्ष्याश्च्योतनैः सेकैर्यथास्वमुपपादयेत्"—इति ॥ ४४ ॥

तौ त्रिधैवोपयुज्येते रोगेषु पुटपाकवत् ॥

ताविलादि । तौ आश्च्योतनसेकौ । त्रिधैवेति स्नेहनलेखन-

१ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते ।

१ 'चतुर्थेऽहनि गतवेगेऽक्षिण' इति पा० ।

रोपणभेदेन पुटपाकवत्रिप्रकाराविलर्थः । तयोश्च पेषणालोडनार्थं द्रवाणि पुटपाकोक्तान्येव । तयोरेव सम्यग्योगो हीनयोगो मिथ्यायोगश्च पुटपाकवत् । आश्च्योतनस्य धारणकालः पुटपाकवत् । परिषेकस्य पुनरिहैवाग्रे धारणकालं कथयिष्यामः । केचिदाश्च्योतनसेकयोः पुटपाकाद् द्विगुणं कालं मन्यन्ते । तन्न, 'सेकस्य द्विगुणः कालः पुटपाकात् परो मत' इत्यत्रोक्तेन सह विरोधापत्तेः ॥—

लेखने सप्त चाष्टौ वा बिन्दवः स्नैहिके दश ॥ ४५ ॥
आश्च्योतने प्रयोक्तव्या द्वादशैव तु रोपणे ॥

लेखनादीनामाश्च्योतनानां बिन्दुसंख्यामाह—लेखने सप्त चाष्टौ वेत्यादि । लेखने लेखनाश्च्योतने सप्ताष्टौ वा बिन्दवः ॥ ४५ ॥—

सेकस्य द्विगुणः कालः पुटपाकात् परो मतः ॥४६॥

इदानीं परिषेकस्य धारणकालमाह—सेकस्येत्यादि । तत्र लेखनपरिषेकस्य वाक्शतद्वयं धारणकालः, स्नेहनस्य वाक्शतचतुष्टयं, रोपणस्य षड्वाक्शतानि ॥ ४६ ॥

अथवा कार्यनिर्वृत्तेरुपयोगो यथाक्रमम् ॥

पक्षान्तरमाह—अथवेत्यादि । कार्यनिर्वृत्तिर्व्याधेरुपशमः प्रकृतिवर्णोपपत्तिः क्रियापाटवं वेदनोपशमश्च कार्यं, तस्य निष्पत्तिः कार्यनिर्वृत्तिः । यथाक्रमं शनैः शनैरित्यर्थः । अयं कार्यनिर्वृत्तिलक्षणो धारणकाल आश्च्योतनसेकयोः । अन्ये तु सर्वेषां तर्पणादीनामयं धारणकाल इति वदन्ति । अपरे तु पुटपाकसेकयोरयं कालः; तत्र पुटपाकसेकयोर्द्रव्यभेदतो भेदः ॥—

पूर्वापराह्णे मध्याह्ने रुजाकालेषु चोभयोः ॥ ४७ ॥

इदानीमाश्च्योतनसेकयोर्यथादोषं प्रयोगकालमाह—पूर्वापराह्ण इत्यादि । कफजे व्याधौ पूर्वाह्णे लेखनावाश्च्योतनसेकौ प्रयोज्यौ, वातजेऽपराह्णे स्नेहनौ, रक्तपित्तजे मध्याह्ने रोपणौ। रुजाकालेषु चेत्यावस्थिकः कालः, तेन यदैव रुगुत्पद्यते तदैव सेकाश्च्योतनौ प्रयोज्यौ । उभयोराश्च्योतनसेकयोः । केचित् परिषेकस्यैवायं प्रयोगकाल इति कथयन्ति ॥ ४७ ॥

योगायोगान् स्नेहसेके तर्पणोक्तान् प्रचक्षते ॥

इदानीं परिषेकस्य द्रव्यविशेषकृतस्य संक्षेपार्थं योगायोगलक्षणमाह—योगायोगानित्यादि । योगः सम्यग्योगः, अयोगः सम्यग्योगाभावः । तेनायोगशब्देन हीनमिथ्यातियोगाः प्राप्यन्ते, अतः पृथङ्नोक्ताः । अन्ये तु, अयोगे इत्यत्र नशब्देनैव हीनयोगमिथ्यायोगावाक्षिप्तौ, अतियोगस्य तु मात्राकालाभ्यामेव पर्युदासः कृत इति । स्नैहिके केवलघृतपरिषेके । तर्पणोक्तान् सुखस्वप्नावबोधित्वमित्यादीन् । इदं योगायोगलक्षणं केवलं स्नेहपरिषेकस्यैव बोद्धव्यं, क्षीरेक्षुरसादिकृतस्य स्नेहनीयाख्यपरिषेकस्य योगायोगलक्षणं पुटपाकवत् कथितम् ॥—

रोगाञ्छिरसि संभूतान् हत्वाऽतिप्रबलान् गुणान् ४८
करोति शिरसो बस्तिरुक्ता ये मूर्धतैलिकाः ॥
शुद्धदेहस्य सायाह्ने यथाव्याध्यशितस्य तु ॥ ४९ ॥
ऋज्वासीनस्य बध्नीयाद्बस्तिकोशं ततो दृढम् ॥
यथाव्याधिशृतस्नेहपूर्णं संयम्य धारयेत् ॥ ५० ॥
तर्पणोक्तं दशगुणं यथादोषं विधानवित् ॥

शिरोबस्तिमाह—रोगानित्यादि । अतिप्रबलान् शिरसि संभूतान् रोगान् शिरोभितापादीन् हत्वा शिरोबस्तिर्ये मूर्धतैलिका गुणा उक्तास्तान् करोतीति संबन्धः । शिरोऽत्र ग्रीवापर्यन्तं ग्राह्यं, नतु षडङ्गुलोत्सेधम् । मूर्धतैलिका गुणा शिरोगतांस्तथा रोगानित्यादयः शिरसः प्रतिपूरणपर्यन्ता अनागताबाधप्रतिषेधोक्ताः । शुद्धदेहस्य वमनादिभिर्निर्मलशरीरस्य; अथवा शुद्धदेहस्य नस्यादिभिर्विशुद्धमस्तकस्य, देहावयवेऽपि देहोपचारात्; अथवा शिरःशुद्धावपि देहस्य शुद्धिरिति । सायाह्ने दिनावसाने । यथाव्याध्यशितस्येति व्याधिप्रत्यनीकं भुक्तवत इत्यर्थः । ऋज्विति ऋजु यथा स्यादेवं बस्तिकोशं बध्नीयात्, 'केशान्त' इति शेषः । अथवा ऋज्विति आसीनस्य विशेषणम् । बस्तिकोशमित्युक्तेनैव पट्टचेलिकामाषचूर्णादिकमाक्षिप्तम् । यथाव्याधिशृतस्नेहपूर्णं यथाव्याधिदोषदूष्यहितद्रव्यसिद्धस्नेहपूर्णम् । संयम्य धारयेत् यावत् केशभूमेरुपरि व्यङ्गुलं बद्ध्वा धारयेत् । कियत्कालं शिरोबस्तिं धारयेदित्याह—तर्पणोक्तमित्यादि । तर्पणोक्तमक्षितर्पणकथितकालं दशगुणं शिरोबस्तिरवचार्यः । यथादोषमिति तत्र षण्मात्रासहस्राणि श्लेष्मणि, अष्टौ सहस्राणि पित्ते, दशसहस्राणि वाते इति; अपरं च वातरोगचिकित्सिते शिरोगतवातप्रस्तावे व्याख्यातम् । केचिदमुं पाठमन्यथा पठन्ति, स चाभावान्न लिखितः ॥ ४८–५० ॥—

व्यक्तरूपेषु दोषेषु शुद्धकायस्य केवले ॥ ५१ ॥
नेत्र एव स्थिते दोषे प्राप्तमञ्जनमाचरेत् ॥
लेखनं रोपणं चापि प्रसादनमथापि वा ॥ ५२ ॥

इदानीमञ्जनस्यावस्थिकं कालमुद्दिशन्नाह—व्यक्तरूपेष्वित्यादि । व्यक्तरूपेषु सामतापगमेन व्यक्तात्मरूपप्राप्तेषु । शुद्धकायस्य सिराव्यधविरेचननिरूहशिरोविरेचनैर्हृतमलदेहस्य । केवलेऽन्यदोषासंसृष्टे । नेत्रे एव स्थिते अक्षिगोलकवर्त्मात्रस्थिते, न पुनः पक्ष्माद्याश्रिते । प्राप्तं युक्तम् । केचित् 'दोषेषु' इत्यत्र 'रोगेषु' इति पठन्ति; रोगशब्दो दोषेष्वपि वर्तते इति व्याख्यानयन्ति । इदानीमञ्जनभेदं निर्दिशन्नाह—लेखनमित्यादि ॥ ५१ ॥ ५२ ॥

तत्र पञ्च रसान् व्यस्तानाद्यैकरसवर्जितान् ॥
पञ्चधा लेखनं युञ्ज्याद्यथादोषमतन्द्रितः ॥ ५३ ॥

लेखनमाह—तत्रेत्यादि । पञ्चरसान् पञ्चरसद्रव्याणीत्यर्थः । आद्यैकरसवर्जितान् मधुररसवर्जितान् । पञ्चधेति वातपित्तश्लेष्मरक्तसन्निपातभेदेन । यथादोषं दोषानतिक्रमेण । तत्र वाते अम्ललवणौ, पित्ते तिक्तकषायौ, श्लेष्मणि कटुतिक्तकषायाः,

१ 'द्रव्याणि' इति पा० । २ 'त्रिगुणं' इति पा० ।

रक्ते पित्तवत्, सन्निपाते रसद्वयं त्रयं वा । सन्निपातेनैव संसर्गोऽवरुद्धः, अतोऽत्र पृथङ्नोक्तः । लेखनं दोषस्रावणान्नयनस्य रिक्तीकरणम् ॥ ५३ ॥

नेत्रवर्त्मसिराकोशस्रोतःशृङ्गाटकाश्रितम् ।
मुखनासाक्षिभिर्दोषमोजसा स्रावयेत्तु तत् ॥ ५४ ॥

लेखनं यथा दोषस्य स्रावणं कुरुते तथा दर्शयन्नाह—नेत्रेत्यादि । नेत्रवर्त्मनोर्याः सिरा यश्च कोशो यानि च स्रोतांसि तत्र स्थितं दोषं, तथा शृङ्गाटकमर्माश्रितं च दोषं तल्लेखनाञ्जनं मुखादिभिरोजसा प्रभावेण स्रावयेदिति पिण्डार्थः ॥ ५४ ॥

कषायं तिक्तकं वाऽपि सस्नेहं रोपणं मतम् ॥
तत्स्नेहशैत्याद्वर्ण्यं स्याद्दृष्टेश्च बलवर्धनम् ॥ ५५ ॥

रोपणमाह—कषायेत्यादि । सस्नेहमीषद्घृतयुक्तम् ॥ ५५ ॥

मधुरं स्नेहसंपन्नमञ्जनं तु प्रसादनम् ॥
दृष्टिदोषप्रसादार्थं स्नेहनार्थं च तद्धितम् ॥ ५६ ॥

प्रसादनमाह—मधुरमित्यादि । दृष्टिदोषप्रसादार्थं दृष्टिस्थदोषप्रसादार्थमित्यर्थः ॥ ५६ ॥

यथादोषं प्रयोज्यानि तानि रोगविशारदैः ॥
अञ्जनानि यथोक्तानि प्राह्णसायाह्नरात्रिषु ॥ ५७ ॥

यथेत्यादि । तानि यथोक्तानि लेखनादीन्यञ्जनानि रोगविशारदैर्वैद्यैर्यथादोषं प्राह्णसायाह्नरात्रिषु प्रयोज्यानीति पिण्डार्थः । तत्र पूर्वाह्णे श्लेष्मरोगे लेखनाञ्जनं, सायाह्ने वातजे, रात्रौ पित्तजे । अन्ये तु आदौ शोधनाञ्जनं, ततो रोपणं; अपरे तु प्रसादनमिति वदन्ति । अपरमपि ऋतुभेदादर्थान्तरमस्ति, तच्च विस्तरभयान्न लिखितम् ॥ ५७ ॥

गुटिकारसचूर्णानि त्रिविधान्यञ्जनानि तु ॥
यथापूर्वं बलं तेषां श्रेष्ठमाहुर्मनीषिणः ॥ ५८ ॥

इदानीमप्येकैकमञ्जनं गुटिकादिभेदात्त्रिप्रकारमिति दर्शयन्नाह—गुटिकारसेत्यादि । रसोऽत्र घनरसो रसक्रियेत्यर्थः । यथापूर्वं बलं तेषामिति एतेनैतदुक्तं भवति—महाबलानां रोगाणां गुटिकाञ्जनं, मध्यानां रसक्रियाञ्जनं, हीनानां चूर्णाञ्जनम् ॥ ५८ ॥

हरेणुमात्रा वर्तिः स्याल्लेखनस्य प्रमाणतः ॥
प्रसादनस्य चाध्यर्धा द्विगुणा रोपणस्य च ॥ ५९ ॥

इदानीं प्रमाणावसरः—हरेणुमात्रा वर्तिरित्यादि । हरेणुर्वर्तुलकलायः, अध्यर्धा सार्धकलायप्रमाणेत्यर्थः, द्विगुणा द्विकलायप्रमाणेत्यर्थः ॥ ५९ ॥

रसाञ्जनस्य मात्रा तु यथावर्तिमिता मता ॥

गुटिकाञ्जनप्रमाणमभिधाय रसक्रियाञ्जनप्रमाणमाह—रसाञ्जनस्येत्यादि । रसाञ्जनस्य रसक्रियाञ्जनस्य, 'रसाञ्जनद्रव्यस्य' इत्येके, तन्मते रसक्रियाञ्जनप्रमाणमन्यत्रान्वेषणीयम् । यथावर्तिमिता मता इति यथास्ववर्तिप्रमाणमात्रेत्यर्थः । तत्र लेखनरसक्रियाञ्जनस्य लेखनवर्तिवत् प्रमाणं, रोपणस्य रोपणवर्तिवत्, प्रसादनस्य प्रसादनवर्तिवत् ॥—

द्वित्रिचतुःशलाकाश्च चूर्णस्याप्यनुपूर्वशः ॥ ६० ॥

चूर्णाञ्जनप्रमाणमाह—द्वित्रिचतुरित्यादि । अनुपूर्वशो लेखनादीनामञ्जनानामानुपूर्व्येणेत्यर्थः । तत्र शलाकाद्वयं लेखनचूर्णस्य, तिस्रो रोपणस्य, चतस्रः प्रसादनस्य ॥ ६० ॥

तेषां तुल्यगुणान्येव विदध्याद्भाजनान्यपि ॥
सौवर्णं राजतं शार्ङ्गं ताम्रं वैडूर्यकांस्यजम् ॥ ६१ ॥
आयसानि च योज्यानि शलाकाश्च यथाक्रमम् ॥

इदानीमञ्जनानि किंगुणे किंमये पात्रे स्थापयितव्यानि, तथा किंगुणानि किंमयशलाकानीत्याह—तेषामित्यादि । तुल्यगुणानीति सौवर्णे मधुरं, राजते अम्लं, शार्ङ्गे मेषशृङ्गमये लवणं, ताम्रे लोहमये वा कषायं, वैडूर्ये कटुकं, कांस्ये तिक्तं, शीताञ्जनं तु नलादिमये, एवं समानगुणानि भाजनानि विदध्यात् कुर्यात् । शलाकाश्चैषां भाजनद्रव्यगुणेन यथाक्रममेव व्याख्याताः ॥ ६१ ॥—

वक्त्रयोर्मुकुलाकारा कलायपरिमण्डला ॥ ६२ ॥
अष्टाङ्गुला तनुर्मध्ये सुकृता साधुनिग्रहा ॥

तासां शलाकानामाकारमुद्दिशन्नाह—वक्त्रयोर्मुकुलाकारेत्यादि । मुकुलाकारा मल्लिकादिमुकुलस्येव निर्गच्छतो यद्वन्मुखं तदाकारा; कलायपरिमण्डलत्वेन तीक्ष्णाग्रत्वनिषेधः; सुकृता कर्कशादिदोषरहिता; साधुनिग्रहा सुखग्रहेत्यर्थः ॥ ६२ ॥—

औदुम्बर्यश्मजा वाऽपि शारीरी वा हिता भवेत् ६३

इदानीं ताम्रादिजानां शलाकानां हितत्वं प्रतिपादयन्नाह—औदुम्बरीत्यादि । औदुम्बरी ताम्रमयी, अश्मजा वैडूर्यादिपाषाणजा, शारीरी शृङ्गादिजा, अपिशब्दात् सुवर्णादिजाऽपि हितेत्यर्थः । तथाच तन्त्रान्तरे,—"आयसी रोपणे, ताम्रा लेख्ये, हैमी प्रसादने । शेषा अपि यथादोषं प्रयोज्या रसकोविदैः"—इति । केचित् शारीरीशब्देन अङ्गुलिमाचक्षते, तन्नेच्छति गयी ॥ ६३ ॥

वामेनाक्षि विनिर्भुज्य हस्तेन सुसमाहितः ॥
शलाकया दक्षिणेन क्षिपेत् कानीनमञ्जनम् ॥ ६४ ॥
आपाङ्ग्यं वा यथायोगं कुर्याच्चापि गतागतम् ॥
वर्त्मोपलेपि वा यत्तदङ्गुल्यैव प्रयोजयेत् ॥ ६५ ॥

वामेनेत्यादि । निर्भुज्य वक्रीकृत्य । कनीन्यां नासासमीपे नेत्रावयवे अञ्जनं कानीनं, तच्चाञ्जनं कनीनकप्रदेशादपाङ्गं नयेत्; आपाङ्ग्यं चेति अपाङ्गे नेत्रान्ते भवमापाङ्ग्यं, तच्चापाङ्गप्रदेशात् कनीनकप्रदेशं नयेत् । परं यथायोगं यथाऽतियोगहीनयोगौ न भवत इत्यर्थः । एवं गतागतमपि कुर्यात् । एतच्छलाकया अन्तर्नयनमञ्जनप्रणिधानं बोद्धव्यम् । अन्तर्नयनप्रणिधानमभिधाय बहिरञ्जनप्रणिधानमाह—वर्त्मेत्यादि । वर्त्मोपलेपि वर्त्मोपलेपनयोग्यम् ॥ ६४ ॥ ६५ ॥

१ 'तत्स्नेहशैत्याद्वर्ण्यं' इति पा० । २ 'पिष्टा वर्तिमिता' इति पा० ।

अक्षि नात्यन्तयोरञ्ज्याद्बाधमानोऽपि वा भिषक् ॥

अक्षीत्यादि । अन्तयोः कनीनकापाङ्गयोः । नात्यञ्ज्यादीषदञ्ज्यात्, क्षतभयात् । बाधमानोऽपि वेति बाधां कुर्वन् वैद्यो वा नाञ्ज्यादित्यर्थः । 'अक्षि नात्यन्तयोरञ्ज्यात्' इत्यत्र 'नात्यन्तमञ्जयेदक्षि' इति केचित् पठन्ति; तत्र च पाठे सर्वत्राप्यत्यन्ताञ्जननिषेधः कृतो भवति ॥—

न चानिर्वान्तदोषेऽक्षिण धावनं संप्रयोजयेत् ॥६६॥
दोषः प्रतिनिवृत्तः सन् हन्याद् दृष्टेर्बलं तथा ॥

इदानीमकाले प्रक्षालननिषेधमाह—न चेत्यादि । न चानिर्वान्तदोषे इति निश्चयेन सम्यग्योगेन न वान्तोऽश्रुदूषिकादिरूपो दोषो येन तस्मिन्नित्यर्थः । धावनं न संप्रयोजयेत् प्रक्षालनं न प्रयोजयेत्, दोषप्रत्यावृत्तिहेतुत्वात् । अकालप्रक्षालनात् किं स्यादित्याह—दोष इत्यादि । प्रतिनिवृत्तः पुनरावृत्तः । तथेत्यकालप्रक्षालनप्रकारेणेत्यर्थः ॥ ६६ ॥—

गतदोषमपेताश्रु पश्येयत् सम्यगम्भसा ॥ ६७ ॥
प्रक्षाल्याक्षि यथादोषं कार्यं प्रत्यञ्जनं ततः ॥

कीदृशं पुनश्चक्षुः प्रक्षाल्यमित्याह—गतदोषमित्यादि । प्रत्यञ्जनं तीक्ष्णाञ्जनेन कटूभूतनयनस्य यदञ्जनं शीतं, तथा शीतेन जडीभूतनयनस्य यत्तीक्ष्णमञ्जनमित्यर्थः । केचिदमुं पाठं न पठन्ति, तन्नेच्छति गयी ॥ ६७ ॥—

श्रमोदावर्तरुदितमद्यक्रोधभयज्वरैः ॥ ६८ ॥
वेगाघातशिरोदोषैश्चार्तानां नेष्यतेऽञ्जनम् ॥
रागरुक्तिमिरास्रावशूलसंरम्भसंभवात् ॥ ६९ ॥

इदानीमञ्जनस्य पूर्वाह्लादिकान् कालान् सामान्येन स्वस्थातुरयोः प्रतिपाद्य, आवस्थिकेषु कालेष्वञ्जननिषेधमाह—श्रमोदावर्तेत्यादि । श्रमादिभिरार्तानां पुरुषाणामञ्जनं नेष्यत इति संबन्धः । केचिदत्र 'शान्ते भीते प्ररुदिते मद्यपीते नवज्वरे । उष्णे वेगाभिघाते च नाञ्जनं संप्रशस्यते' इति पठन्ति, तत्रापि स एवार्थः । कस्माच्छ्रमादिभिरार्तानामञ्जनं नेष्यत इत्याह—रागरुगित्यादि । संरम्भः श्वयथुः ॥ ६८ ॥ ६९ ॥

निद्राक्षये क्रियाशक्तिं, प्रवाते दृग्बलक्षयम् ॥
रजोधूमहते रागस्रावाधीमन्थसंभवम् ॥ ७० ॥
संरम्भशूलौ नस्यान्ते, शिरोरुजि शिरोरुजम् ॥
शिरःस्नातेऽतिशीते च रवावनुदितेऽपि च ॥ ७१ ॥
दोषस्थैर्यादपार्थं स्याद्दोषोत्क्लेशं करोति च ॥
अजीर्णेऽप्येवमेव स्यात् स्रोतोमार्गावरोधनात् ॥७२
दोषवेगोदये दत्तं कुर्यात्तांस्तानुपद्रवान् ॥
तस्मात् परिहरन् दोषानञ्जनं साधु योजयेत् ॥७३॥

इदानीं सामान्येनाञ्जनवैगुण्येन व्यापदः प्रदर्श्य प्रतिवैगुण्यं व्यापद आह—निद्राक्षये इत्यादि । क्रियाशक्तिं निमेषोन्मेषणादीनामशक्तिम् 'अञ्जनं करोति' इत्यध्याहार्यम् । केचित् क्रियासङ्गमिति पठन्ति । प्रवाते इत्यादि । दृग्बलं दृष्टेर्बलमित्यर्थः । संरम्भः श्वयथुः । अपार्थमकिंचित्करम् । एतदुक्तं भवति—एतैः स्नानादिभिः स्थिरीकृतस्य दोषस्य निर्हरणं कर्तुमञ्जनं न शक्नोतीत्यर्थः । एवमेवेत्यपार्थकमञ्जनं स्यात् दोषोत्क्लेशं च करोतीत्यर्थः । उपद्रवान् रागशोफादिकान् । साधु योजयेदिति देशकालावस्थापेक्षमित्यर्थः ॥ ७०–७३ ॥

लेखनस्य विशेषेण काल एष प्रकीर्तितः ॥

लेखनस्येत्यादि । लेखनस्य लेखनाञ्जनस्यैष पूर्वोक्तः प्रतिषेधकालः ॥—

व्यापदश्च जयेदेताः सेकाश्च्योतनलेपनैः ॥ ७४ ॥
यथास्वं धूमकवलैर्नस्यैश्चापि समुत्थिताः ॥

अकालाञ्जनकृतानां व्यापदां चिकित्सितमाह—व्यापद इत्यादि । एता रागरुजाद्याः समुत्थिता व्यापदो यथास्वं सेकादिभिर्जयेदिति संबन्धः ॥ ७४ ॥—

विशदं लघ्वनास्रावि क्रियापटु सुनिर्मलम् ॥ ७५ ॥
संशान्तोपद्रवं नेत्रं विरिक्तं सम्यगादिशेत् ॥

इदानीं लेखनाञ्जनस्य सम्यग्योगलक्षणमाह—विशदमित्यादि ॥ ७५ ॥—

जिह्मं दारुणदुर्वर्णं स्रस्तं रूक्षमतीव च ॥ ७६ ॥
नेत्रं विरेकातियोगे स्यन्दते चातिमात्रशः ॥

लेखनाञ्जनस्यातियोगलक्षणमाह—जिह्ममित्यादि । जिह्मं वक्रं, दारुणं कठिनं, स्यन्दते स्रवति ॥ ७६ ॥—

तत्र संतर्पणं कार्यं विधानं चानिलापहम् ॥ ७७ ॥

लेखनाञ्जनातियोगप्रतीकारमाह—तत्रेत्यादि । तत्रेति लेखनाञ्जनातियोगे इत्यर्थः ॥ ७७ ॥

अक्षि मन्दविरिक्तं स्यादुदग्रतरदोषवत् ॥

लेखनाञ्जनस्य हीनयोगमाह—अक्षि मन्दविरिक्तमित्यादि । उदग्रतरदोषवत् उत्कटतरदोषयुक्तम् ॥—

धूमनस्याञ्जनैस्तत्र हितं दोषावसेचनम् ॥ ७८ ॥

हीनयोगप्रतीकारमाह—धूमनस्याञ्जनैरित्यादि । केचिदत्र 'नस्यधूमाञ्जनालेपैर्जयेच्छ्लेष्माणमीरितम्' इति पाठं पठति, तत्रापि स एवार्थः ॥ ७८ ॥

स्नेहवर्णबलोपेतं प्रसन्नं दोषवर्जितम् ॥
ज्ञेयं प्रसादने सम्यगुपयुक्तेऽक्षि निर्वृतम् ॥ ७९ ॥

प्रसादनाञ्जनस्य सम्यग्योगमाह—स्नेहेत्यादि । निर्वृतं सर्वक्रियाक्षमम्, उपशान्तोपद्रवमिति यावत् ॥ ७९ ॥

किञ्चिद्धीनविकारं स्यात्तर्पणाद्धि कृतादति ॥

प्रसादनाञ्जनातियोगमाह—किञ्चिदित्यादि । तर्पणादतिकृतात् सकृदतिकृते प्रसादनाञ्जने किञ्चिद्धीनविकारं चक्षुः स्यादिति तात्पर्यार्थः ॥—

तत्र दोषहरं रूक्षं भेषजं शस्यते मृदु ॥ ८० ॥

प्रसादनाञ्जनातियोगचिकित्सामाह—तत्रेत्यादि । दोषहरं

कफहरमित्यर्थः। मृदु मृदुवीर्यं शीतवीर्यमित्यर्थः; उष्णेन हि नयनं दुष्यति न तु प्रसाद्यते॥ ८०॥

साधारणमपि ज्ञेयमेवं रोपणलक्षणम्॥
प्रसादनवदाचष्टे तस्मिन् युक्तेऽतिभेषजम्॥ ८१॥

इदानीं रोपणाञ्जनस्य सम्यग्योगमतियोगं चातिदेशेनाह—साधारणमित्यादि। एवं रोपणलक्षणमिति प्रसादनाञ्जनस्य सम्यग्योगातियोगप्रकारेण रोपणाञ्जनस्य सम्यग्योगातियोगलक्षणं ज्ञेयम्। परं साधारणं नातिस्निग्धरूक्षमिति यावत्। अन्ये तु रोपणलक्षणमेवं प्रसादनाञ्जनव्यञ्जनेन साधारणं समानं ज्ञेयमिति व्याख्यानयन्ति। रोपणाञ्जनातियोगे चिकित्सामाह—प्रसादनवदित्यादि। तस्मिन् रोपणाञ्जनेऽतिप्रयुक्ते प्रसादनवत् प्रसादनाञ्जनातियोगवद्भेषजमाचष्टे ब्रूयादिति पिण्डार्थः॥८१॥

स्नेहनं रोपणं वाऽपि हीनयुक्तमपार्थकम्॥

इदानीं प्रसादनरोपणयोर्हीनयोगमाह—स्नेहनमित्यादि। स्नेहनं प्रसादनाञ्जनम्। अपार्थकमकिञ्चित्करम्॥—

कर्तव्यं मात्रया तस्मादञ्जनं सिद्धिमिच्छता॥ ८२॥

कर्तव्यमित्यादि। मात्रयेति यथा हीनातियोगौ न भवतः। सिद्धिं विकारनिवृत्तिम्। अस्याग्रे विद्यमानपुस्तकेषु 'धूमैर्नस्याञ्जनैर्वाऽपि दोषशेषं शमं नयेत्' इति पाठो विद्यते, स जेज्जटादिभिर्न पठितः, तस्मान्न पठितव्यः॥ ८२॥

पुटपाकक्रियाद्यासु क्रियास्वेषै(कै)व कल्पना॥
सहस्रशश्चाञ्जनेषु बीजेनोक्तेन पूजिताः॥ ८३॥

इदानीमञ्जनोक्तेन मधुररसवर्जपञ्चरसेन लेखनाञ्जनकल्पनाबीजेन, तथा तिक्तकषायेण सस्नेहेन रोपणाञ्जनकल्पनाबीजेन, तथा मधुररसेन स्नेहसंपन्नेन प्रसादनाञ्जनकल्पनाबीजेन, पुटपाकाद्यासु क्रियास्वञ्जनेष्वपि लेखनरोपणप्रसादनकल्पनाः सहस्रप्रकाराः कल्पनीया इत्याह—पुटपाकेत्यादि। अञ्जनेषूक्तेन लेखनरोपणप्रसादनाख्येन बीजेन पुटपाकक्रियाद्यासु क्रियासु तथाऽनुक्तेष्वञ्जनेष्वप्यौषधकल्पनाः लेखनरोपणप्रसादनाख्याः सहस्रशः पूजिता इति पिण्डार्थः। पुटपाकक्रियाद्यास्वित्यत्र आदिशब्दात् सेकाश्च्योतनादयो गृह्यन्ते। अन्ये त्वञ्जनोक्तेन हीनयोगातियोगचिकित्साबीजेन पुटपाकादिहीनातियोगचिकित्सितं व्याचक्षते, तन्नेच्छति गयी॥ ८३॥

दृष्टेर्बलविवृद्ध्यर्थं याप्यरोगक्षयाय च॥
राजार्हाण्यञ्जनाग्र्याणि निबोधेमान्यतः परम्॥८४॥

इदानीं रोगापहरणप्रयोगाण्यञ्जनान्यभिधाय स्वस्थातुरहितान्यञ्जनान्याह—दृष्टेर्बलविवृद्ध्यर्थमित्यादि। दृष्टिर्मसुरदलमात्रा तच्छक्तिबलाधानार्थं स्वस्थेन प्रसादाञ्जनं कार्यम्, आतुरेण याप्यरोगप्रसादनाञ्जनं कार्यं; याप्यरोगाश्च 'संपश्यतः षडपि येऽभिहितास्तु काचा' इत्यादिप्रोक्ताः। केचित्पाप्मरोगक्षयाय चेति पठन्ति, पाप्मशब्देन च स्रावणं कथयन्ति॥ ८४॥

अष्टौ भागानञ्जनस्य नीलोत्पलसमत्विषः॥
औदुम्बरं शातकुम्भं राजतं च समासतः॥ ८५॥
एकादशैतान् भागांस्तु योजयेत् कुशलो भिषक्॥
मूषाक्षिप्तं तदाध्मातमावृतं जातवेदसि॥ ८६॥
खदिराश्मन्तकाङ्गारैर्गोशकृद्भिरथापि वा॥
गवां शकृद्रसे मूत्रे दध्नि सर्पिषि माक्षिके॥ ८७॥
तैलमद्यवसामज्जसर्वगन्धोदकेषु च॥
द्राक्षारसेक्षुत्रिफलारसेषु सुहिमेषु च॥ ८८॥
सारिवादिकषाये च कषाये चोत्पलादिके॥
निषेचयेत् पृथक् चैनं ध्मातं ध्मातं पुनः पुनः॥८९॥
ततोऽन्तरीक्षे सप्ताहं प्लोतबद्धं स्थितं जले॥
विशोष्य चूर्णयेन्मुक्तां स्फटिकं विद्रुमं तथा॥९०॥
कालानुसारिवां चापि शुचिरावाप्य योगतः॥
एतच्चूर्णाञ्जनं श्रेष्ठं निहितं भाजने शुभे॥ ९१॥
दन्तस्फटिकवैदूर्यशङ्खशैलासनोद्भवे॥
शातकुम्भेऽथ शार्ङ्गे वा राजते वा सुसंस्कृते॥
सहस्रपाकवत् पूजां कृत्वा राज्ञः प्रयोजयेत्॥९२॥
तेनाञ्जिताक्षो नृपतिर्भवेत् सर्वजनप्रियः॥
अधृष्यः सर्वभूतानां दृष्टिरोगविवर्जितः॥ ९३॥

तान्यञ्जनानि दर्शयन्नाह—अष्टावित्यादि। अञ्जनस्य सौवीराञ्जनस्य, स्रोतोजरसाञ्जनस्येत्यन्ये; नीलोत्पलसमत्विषः नीलोत्पलवर्णस्येत्यर्थः; 'नीलोत्पलसुगन्धिनः' इति केचित् पठन्ति। औदुम्बरं ताम्रभागं, शातकुम्भं सुवर्णभागं, राजतं रूप्यभागम्, एतेन ताम्रादीनां प्रत्येकमेकैकं भागं, एवमेकादश भागाः पूर्यन्ते। मूषा मृत्कल्पिता; सा तु धातुवादिनां गृहे प्रसिद्धा। आवृतं विलीनं, जातवेदसि अग्नौ, अङ्गारैर्दग्धनिर्वापितकृष्णवर्णकाष्ठखण्डैः, गोशकृद्भिः शुष्कैर्गोपुरीषैः, गवामिति पदं शकृद्रसादिषु सर्पिःपर्यन्तेषु संबध्यते। माक्षिके मधुनि, वसा शुद्धमांसस्नेहः। अन्तरीक्षे तथा जले पानीये। प्लोतबद्धं कर्पटबद्धम्। केचिच्छिक्यारोपितं पानीयमान्तरीक्षं कथयन्ति। विशोष्य सप्तरात्रादनन्तरं तदञ्जनं शोषयित्वेत्यर्थः। मुक्ता मौक्तिकं, विद्रुमं प्रवालं, कालानुसारिवा तगरमूलं, जेज्जटस्तु द्वितीयसारिवामाह। शुचिरिति वैद्यविशेषणम्। आवाप्य प्रक्षिप्य, योगतोऽल्पमात्रया। अन्ये तु सौवीराञ्जनादीनां चतुर्थांशेन मुक्तादिचूर्णं प्रक्षिप्येति व्याख्यानयन्ति। निहितं निक्षिप्तम्। असनो बीजकः, शातकुम्भे सुवर्णमये, शार्ङ्गे मेषशृङ्गमये। केचिदत्र स्फटिकवैदूर्यादिभाजनपाठं न पठन्ति; ते चात्र पात्राणां ताम्ररजतसुवर्णानां शुभभाजनं गृह्णन्ति। सहस्रपाकवत् शङ्खदुन्दुभिनिर्घोषादिना, पूज्यं पूजनीयम्। कृत्वेति पदं निहितमित्यत्र संबन्धनीयम्। केचित् सहस्रपाकवत् पूजां कृत्वेति पठन्ति। अधृष्यः अगम्यः। सर्वभूतानां देवासुरगन्धर्वयक्षरक्षःपितृपिशाचनागानामष्टानाम्। 'दृष्टिरोगविवर्जितं'

इति केचित् पठन्ति, रागशब्देन 'संपश्यतः षडपि येऽभिहितास्तु काचा' इति व्याख्यानयन्ति ॥ ८५-९३ ॥

कुष्ठं चन्दनमेलाश्च पत्रं मधुकमञ्जनम् ॥
मेषशृङ्गस्य पुष्पाणि वक्रं रत्नानि सप्त च ॥ ९४ ॥
उत्पलस्य बृहत्योश्च पद्मस्यापि च केशरम् ॥
नागपुष्पमुशीराणि पिप्पली तुत्थमुत्तमम् ॥ ९५ ॥
कुक्कुटाण्डकपालानि दार्वी पथ्यां सरोचनाम् ॥
मरिचान्यक्षमज्ञानं तुल्यां च गृहगोपिकाम् ॥९६॥
कृत्वा सूक्ष्मं ततश्चूर्णं न्यसेदभ्यर्च्य पूर्ववत् ॥
एतद्भद्रोदयं नाम सदैवार्हति भूमिपः ॥ ९७ ॥

कुष्ठमित्यादि । वक्रं तगरं, रत्नानि सप्त पद्मरागमरकतनीलवैदूर्यमुक्ताप्रवालहेमानि । उत्पलस्य नीलोत्पलस्य, पुष्पाणि कुसुमानि, बृहत्योः कण्टकारीद्वयस्यापि कुसुमानि, तुत्थमुत्तमं मयूरग्रीवाख्यं, केचित् तुत्थं खर्परिकातुत्थं, उत्तमं मयूरग्रीवाख्यतुत्थमिति व्याख्यानयन्ति, गृहगोपिका गृहगोधिका, गृहकारिकेत्यन्ये । न्यसेत् शुभे भाजने प्रक्षिपेत् । अभ्यर्च्य शङ्खदुन्दुभिनिर्घोषादिना पूजां कृत्वा । पूर्ववत् यादृग्गुणं पूर्वाञ्जनं तादृग्गुणमेतदपि स्यादित्यर्थः । अन्ये तु पूर्ववत् शङ्खदुन्दुभिनिर्घोषादिनाऽभ्यर्च्येत्याहुः । भद्रोदयं भद्रस्य कल्याणस्य उदयो लाभो यस्मात्तत्तथा; अन्ये तु भद्र उदयो यस्येत्याहुः ॥ ९४-९७ ॥

वक्रं समरिचं चैव मांसीं शैलेयमेव च ॥
तुल्यांशानि समानैस्तैः समग्रैश्च मनःशिला ॥ ९८ ॥
पत्रस्य भागाश्चत्वारो द्विगुणं सर्वतोऽञ्जनम् ॥
तावच्च यष्टीमधुकं पूर्ववच्चैतदञ्जनम् ॥ ९९ ॥

वक्रमित्यादि । समानैस्तैः समग्रैश्च मनःशिलेति समभागैः सर्वद्रव्यैः समा मनःशिलेत्यर्थः । पत्रस्य भागाश्चत्वार इति आद्यद्रव्यात् पत्रकस्य चत्वारो भागाः । द्विगुणं सर्वतोऽञ्जनं सर्वस्मादेव समुदिताञ्जनचूर्णाद्द्विगुणं सौवीराञ्जनम्; अन्ये तु अञ्जनशब्देन स्रोतोजरसाञ्जनमाहुः । तावच्च यष्टीमधुकं सौवीराञ्जनप्रमाणं यष्टीमधुकमित्यर्थः । अन्ये तु सर्वद्रव्यसमं यष्टीमधुकमिच्छन्ति । पूर्ववत् पूर्वमष्टौ भागानञ्जनस्येति यदुक्तमञ्जनं तत्तुल्यमेतदप्यञ्जनं फलश्रुत्या शङ्खादिध्वनिपूजनेन भाजनस्थापनेन च । अस्याग्रे केचिदुशीराद्यञ्जनं पठन्ति, तच्चाभावान्न लिखितम् ॥ ९८ ॥ ९९ ॥

मनःशिलां देवकाष्ठं रजन्यौ त्रिफलोषणम् ॥
लाक्षालशुनमञ्जिष्ठासैन्धवैलाः समाक्षिकाः ॥१००॥
रोध्रं सावरकं चूर्णमायसं ताम्रमेव च ॥
कालानुसारिवां चैव कुक्कुटाण्डदलानि च ॥ १०१ ॥
तुल्यानि पयसा पिष्ट्वा गुटिकां कारयेद्बुधः ॥
कण्डूतिमिरशुक्लार्मरक्तराज्युपशान्तये ॥ १०२ ॥

मनःशिलेत्यादि । ऊषणं मरिचम् ॥ १००-१०२ ॥

कांस्यापमार्जनमसी मधुकं सैन्धवं तथा ॥
एरण्डमूलं च समं बृहत्यंशद्वयान्वितम् ॥ १०३ ॥
आजेन पयसा पिष्ट्वा ताम्रपात्रे प्रलेपयेत् ॥
सप्तकृत्वस्तु ता वर्त्यश्छायाशुष्का रुजापहाः॥१०४॥

कांस्यापमार्जनमसीत्यादि । कांस्यापमार्जनमसी कांस्यापमार्जनस्योल्लेखननीलिका, नतं तगरमूलं, बृहत्यंशद्वयान्वितं बृहतीफलयोर्बृहतीमूलयोर्वा आद्यद्रव्याद्यदंशद्वयं तेन समन्वितम् ॥ १०३ ॥ १०४ ॥

पथ्यातुत्थकयष्ट्याह्वैस्तुल्यैर्मरिचषोडशा ॥
पथ्या सर्वविकारेषु वर्तिः शीताम्बुपेषिता ॥१०५॥

पथ्यातुत्थकेत्यादि । मरिचस्य षोडशभागो यस्याः सा मरिचषोडशा वर्तिः । पथ्या हिता ॥ १०५ ॥

रसक्रियाविधानेन यथोक्तविधिकोविदः ॥
पिण्डाञ्जनानि कुर्वीत यथायोगमतन्द्रितः ॥ १०६ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे क्रियाकल्पो नामाष्टादशोऽध्यायः ॥ १८ ॥

सा पुनः शुष्का वर्तिरञ्जनेऽवचार्यमाणा नयने क्षतादिजननीत्याशङ्क्य तस्याः प्रयोगमाह—रसक्रियाविधानेनेत्यादि । रसक्रियाविधानेन रसक्रियाया यद्विधानं नातितनु नातिघनं शलाकोपलेपक्ष्मसमङ्गुल्युपलेपक्ष्मं वा तेनेत्यर्थः । पिण्डाञ्जनानि वर्त्यञ्जनानि शिलापट्टकघृष्टानि पिष्टानि वा । एतेनैतदुक्तं—न कदाचिदपि शुष्कवर्त्या नयनमञ्ज्यादिति तात्पर्यार्थः । यथायोगमिति यथा नयने क्षतादयो न भवेयुरित्यर्थः । अतन्द्रितोऽनलसः । केचिदमुं श्लोकमन्यथा व्याख्यानयन्ति, तच्च विस्तरभयान्न लिखितम् ॥ १०६ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रेऽष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशतितमोऽध्यायः ।

अथातो नयनाभिघातप्रतिषेधं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

क्रियाकल्पानन्तरं शारीरदोषनिमित्तानां नयनामयानामुक्तत्वादागन्तुनिमित्तस्यावशिष्टत्वाच्चिकित्सार्थं नयनाभिघातप्रतिषेधाध्यायारम्भो युक्त इत्यत आह—अथात इत्यादि । अभिघातशब्देनात्राभिघातजनिता वेदनादयः, तेषां प्रतिषेधश्चिकित्सितम् । स चाभिघातो मूर्तेन दण्डादिना अमूर्तेन भयशोकादिना वा ॥ १ ॥ २ ॥

अभ्याहते तु नयने बहुधा नराणां
संरम्भरागतुमुलासु रुजासु धीमान् ॥
नस्यास्यलेपपरिषेचनतर्पणाद्य-
मुक्तं पुनः क्षतजपित्तजशूलपथ्यम् ॥ ३ ॥

दृष्टिप्रसादजननं विधिमाशु कुर्यात्
स्निग्धैर्हिमैश्च मधुरैश्च तथा प्रयोगैः ॥

तमेवाभिघातं मूर्तदण्डादिजं चिकित्साभेदयोगिनं दर्शयन्नाह—अभ्याहते इत्यादि। नराणां बहुधा अभ्याहते नयने सति संरम्भरागतुमुलासु रुजासु नस्यास्यलेपाद्यं कर्म क्षतजपित्तजशूलपथ्यं यदुक्तं तथा स्निग्धादिभिर्दृष्टिप्रसादजननं विधिं धीमानाशु कुर्यादिति पिण्डार्थः। बहुधा बहुप्रकारम्। तथा च विदेहः,—"तीक्ष्णाञ्जनातिपरिक्लिष्टेषु नेत्रेषु वातातपधूमरजव्यापारकीटमक्षिकामशकस्पर्शादिभिरभिहतेषु सलिलक्रीडाजागरणलङ्घनाप्लुताभिद्रुतेषु श्रान्तक्लान्तेषु भयार्दितेषु दिवाकराग्निचन्द्रग्रहनक्षत्रक्रमणकर्मविविधरूपप्रेक्षणाद्यभिहतेषु दुर्बलेषु नेत्रेषु रागदाहतोदशोफपाकघर्षादिवेदनासु"—इति। संरम्भरागाभ्यां तुमुलाः सङ्कुलाः संरम्भरागतुमुलास्तासु। अन्ये तु संरम्भश्च रागश्च तुमुलश्च संरम्भरागतुमुलास्तासु; तुमुलः प्रचण्डाः, संरम्भः श्वयथुः, इत्यर्थं वदन्ति। क्षतजपित्तजशूलपथ्यमिति रक्ताभिष्यन्दहितं पित्ताभिष्यन्दहितं चेत्यर्थः। अन्ये तु अभिघातजो हि वायुः शोणितपित्तं दूषयन् ताभ्यामेवावृतः शूलं करोतीति तद्धितमिति व्याख्यानयन्ति। दृष्टिप्रसादनं नयनगोलकप्रसादनम्॥ ३ ॥—

स्वेदाग्निधूमभयशोकरुजाभिघातै-
रभ्याहतामपि तथैव भिषक् चिकित्सेत् ॥४॥

अभ्याहते तु नयने बहुधा नराणामित्यत्र मूर्तानां दण्डादीनामभिघाते यच्चिकित्सितमभिहितं तदेव चिकित्सितममूर्तानामपि स्वेदादीनामभिघातेऽतिदिशन्नाह—स्वेदाग्निधूमभयेत्यादि। तथैव चिकित्सेत् पूर्वोक्तप्रकारेण चिकित्सेत्। एवं सप्ताहादर्वागेव। 'अभ्याहते तु नयने' इत्यत्र पूर्ववाक्ये बहुधात्वं मूर्तदण्डाद्यभिघातस्य बोध्यम्, इहामूर्ताभिघातचिकित्सितमभिधीयते॥ ४ ॥

सद्योहते नयन एष विधिस्तदूर्ध्वं
स्यन्देरितो भवति दोषमवेक्ष्य कार्यः ॥

इदानीं पूर्वोक्तो विधिः सप्ताहादर्वागेव कार्यस्तदूर्ध्वमन्यो विधिरित्याह—सद्योहत इत्यादि। सद्योहते सप्ताहादर्वागेवेत्यर्थः। एष विधिः पूर्वोक्तो विधिः। तदूर्ध्वं सप्ताहादूर्ध्वम्। स्यन्देरितो वाताभिष्यन्दोक्तो विधिः॥—

अभ्याहतं नयनमीषदथास्यबाष्प-
संस्वेदितं भवति तन्निरुजं क्षणेन ॥ ५ ॥

इदानीं किञ्चिदभ्याहतनयने विशेषचिकित्सितमाह—अभ्याहतमित्यादि। आस्यबाष्पं मुखफूत्कारजनितोष्मा॥ ५ ॥

साध्यं क्षतं पटलमेकमुभे तु कृच्छ्रे
त्रीणि क्षतानि पटलानि विवर्जयेत्तु ॥
स्यात् पिच्चितं च नयनं ह्यति चावसन्नं
स्रस्तं च्युतं च हतदृक् च भवेत्तु याप्यम् ॥६॥

विस्तीर्णदृष्टितनुरागमसत्प्रदर्शि,
साध्यं यथास्थितमनाविलदर्शनं च ॥

इदानीं पटलावगाहनविशेषेणाभिघातस्य साध्यकृच्छ्रसाध्यासाध्यविशेषमाह—साध्यं क्षतमित्यादि। केचिदमुं पाठं न पठन्ति। यादृङ्नयनं याप्यं तादृगाह—स्यात् पिच्चितमित्यादि। अवसन्नमन्तःप्रविष्टं, स्रस्तं शिथिलं, च्युतमवलम्बितं, विस्तीर्णमण्डलं तथा तनुरागं च यदसत्प्रदर्शि स्यात् तदपि याप्यम्। साध्यमाह—साध्यमित्यादि॥ ६ ॥—

प्राणोपरोधवमनक्षुतकण्ठरोधै-
रुन्नम्यमाशु नयनं यदतिप्रविष्टम् ॥ ७ ॥

अतिप्रविष्टनेत्रे चिकित्सितमाह—प्राणोपरोधेत्यादि। प्राणायामेन वमनेन छिक्काप्रवर्तनेन तथा कण्ठनिरोधनेन वा उन्नम्यमुन्नमनीयम्॥ ७ ॥

नेत्रे विलम्बिनि विधिर्विहितः पुरस्ता-
दुच्छिङ्घनं शिरसि वार्यवसेचनं च ॥

अतिनिर्गतनयनस्य चिकित्सितमाह—नेत्र इत्यादि। विलम्बिनि अतिनिर्गते, विधिर्विहितः पुरस्तादिति 'भिन्नं नेत्रकर्मण्यमभिन्नं लम्बते तु यत्' इत्यादिना प्रोक्तः। उच्छिङ्घनं नासिकया वायोरन्तःप्रवेशनम्। वार्यवसेचनं शीतोदकपरिषेकः॥—

षट्सप्ततिर्नयनजा य इमे प्रदिष्टा
रोगा भवन्त्यमहतां महतां च तेभ्यः ॥ ८ ॥
स्तन्यप्रकोपकफमारुतपित्तरक्तै-
र्बालाक्षिवर्त्मभव एव कुकूणकोऽन्यः ॥

इदानीं वक्ष्यमाणकुकूणकेन षट्सप्ततेः संख्याधिक्यमित्याशङ्क्यमानमाह—षट्सप्ततिरित्यादि। य इमे नयनजा रोगाः षट्सप्ततिः प्रदिष्टास्तेऽमहतां बालानां तथा महतां च भवन्ति। तेभ्यः षट्सप्ततिविकारेभ्यः स्तन्यप्रकोपादिभिर्बालाक्षिवर्त्मभव एव अन्यः कुकूणक इति समुदायार्थः। बालाक्षिवर्त्मभव एव न महतामक्षिवर्त्मनि, अन्योऽपरः। योऽसौ कुकूणको बालानामेव भवति, स कफाभिष्यन्दे अवरुद्धोऽतो न संख्यातिरेकः। 'स्तन्यप्रकोपकफमारुतपित्तरक्तैः' इत्यत्र 'स्तन्यप्रकोपजनितैः पिशितोदयाद्वा' इत्यन्ये पठन्ति; अपरे तु 'पिशितोच्छ्रयात्' इति पठन्ति; तौ च नेच्छति जेज्जटः॥ ८ ॥—

मृद्नाति नेत्रमतिकण्डुमथाक्षिकूटं
नासाललाटमपि तेन शिशुः स नित्यम् ॥९॥
सूर्यप्रभां न सहते स्रवति प्रवद्धं,
तस्याहरेद्रुधिरमाशु विनिर्लिखेच्च ॥
क्षौद्रादियुतैश्च कटुभिः प्रतिसारयेत्तु
मातुः शिशोरभिहितं च विधिं विदध्यात् ॥१०

इदानीं तस्य कुकूणकस्य लक्षणमाह—मृद्नातीत्यादि। नासाललाटमपि मृद्नाति। प्रवद्धं निरन्तरम्। कुकूणकस्य साधन-

माह—तस्याहरेद्रुधिरमित्यादि । आहरेद्रुधिरं जलौकोभिः, विनिर्लिखेत् शेफालिकापत्रैः । कटुभिस्त्रिकटुकादिभिः । इदानीं बालस्यौषधाक्षमत्वान्मातुरेवौषधमाह—मातुरित्यादि । यः स्तन्यरोगचिकित्सिते 'स्तन्ये गते विकृतिमाशु भिषक्' इत्यादिविधिरभिहितः, तं शिशोर्या जननी तस्या विदध्यादिति पिण्डार्थः । अन्ये तु द्वयोरेवाभिहितं विधिमिच्छन्ति ॥ ९ ॥ १० ॥

तं वामयेत्तु मधुसैन्धवसंप्रयुक्तैः
पीतं पयः खलु फलैः खरमञ्जरीणाम् ॥ ११ ॥
स्यात्पिप्पलीलवणमाक्षिकसंयुतैर्वा

इदानीं क्षीरपस्य बालस्य स्तन्यसात्म्यत्वात् स्तन्ययुक्तमेव वमनं निर्दिशन्नाह—तं वामयेदित्यादि । मधुसैन्धवसंयुतैः खरमञ्जरीणां फलैः सह पयः स्तन्यं पीतं तं बालं वामयेदिति संबन्धः । खरमञ्जरीणां फलैरपामार्गफलचूर्णैः । स्यादित्यादि । पिप्पलीसैन्धवादियुतैर्वा खरमञ्जरीणां फलचूर्णैः सह स्तन्यं पीतं वमनकृद्भवेदित्यर्थः ॥ ११ ॥—

नैनं वमन्तमपि वामयितुं यतेत ॥

इदानीमुत्क्लिष्टदोषत्वात् स्वयं वमन्तं बालकं वमनयोगं दत्त्वा न वामयेदित्याह—नैनमित्यादि । एनमुत्क्लिष्टदोषत्वात्स्वयमेव वमन्तं वामयितुमन्यप्रकारेण वामयितुं न यतेत यत्नं न कुर्वीत, वमनातियोगभयात् ॥—

दत्त्वा वचामशनदुग्धभुजे प्रयोज्य-
मूर्ध्वं ततः फलयुतं वमनं विधिज्ञैः ॥ १२ ॥

क्षीरान्नादस्य तथाऽन्नादस्य च वमनमाह—दत्त्वा वचामित्यादि । अशनदुग्धभुजे क्षीरान्नादाय पूर्वोक्तमेव वमनं वचां दत्त्वा प्रयोज्यम् । अत ऊर्ध्वं क्षीरान्नावस्थातोऽनन्तरमन्नादस्य मदनफलयुतं पूर्वोक्तमेव वमनं सक्षीरमक्षीरं वा योज्यम् ॥१२॥

जम्ब्वाम्रधात्र्यणुदलैः परिधावनार्थं
कार्यं कषायमवसेचनमेव चापि ॥

इदानीं कुकूणके वर्त्मनः प्रक्षालनपरिषेकार्थं कषायमाह—जम्ब्वाम्रधात्र्यणुदलैरित्यादि । धात्री आमलकी, अणुः अश्मन्तकः, परिधावनार्थं प्रक्षालनार्थं, परिषेचनं परिषेक इत्यर्थः ॥—

आश्च्योतने च हितमत्र घृतं गुडूची-
सिद्धं तथाऽऽढ्ढुरपि च त्रिफलाविपक्वम् ॥१३॥

प्रक्षालनपरिषेकावभिधाय पूरणार्थमकल्कघृतद्वयमाह—आश्च्योतने इत्यादि । आश्च्योतनेऽक्षिपूरणे । अत्र कुकूणके गुडूचीस्वरसेन घृतचतुर्गुणेन पक्वं, इदमेकमञ्जनं; त्रिफलाक्काथेन पक्वं, एतच्च द्वितीयम् ॥ १३ ॥

नेपालजामरिचशङ्खरसाञ्जनानि
सिन्धुप्रसूतगुडमाक्षिकसंयुतानि ॥
स्यादञ्जनं, मधुरसामधुकाम्रकैर्वा

अधुना कुकूणकेऽञ्जनमाह—नेपालजेत्यादि । नेपालजा मनःशिला । सिन्धुप्रसूतं सैन्धवम् । अपरमञ्जनमाह—स्यादञ्जनमित्यादि । मधुरसा मूर्वा । एतैर्मूर्वादिभिस्त्रिभिर्वाऽञ्जनं स्यात् ॥—

कृष्णायसं घृतपयो मधु वाऽपि दग्धम् ॥१४॥

चूर्णाञ्जनमाह—कृष्णायसमित्यादि । कृष्णायसं कृष्णलोहचूर्णम् । एतत् कृष्णलोहादिकं चान्तर्धूमदग्धं चूर्णाञ्जनं भवेत् । तथा च विदेहः,—'लौहचूर्णं च सर्पिश्च मधु क्षीरं च दाहयेत् ॥ एतच्चूर्णाञ्जनं पिष्टं कुमाराणां कुकूणके''—इति ॥ १४ ॥

व्योषं पलाण्डु मधुकं लवणोत्तमं च
लाक्षां च गैरिकयुतां गुटिकाञ्जनं वा ॥
निम्बच्छदं मधुकदार्वि सताम्रलोध्र-
मिच्छन्ति चात्र भिषजोऽञ्जनमंशतुल्यम् ॥१५॥

गुटिकाञ्जनमाह—व्योषमित्यादि । पलाण्डुर्लशुनभेदः, मधुकं यष्टीमधु, लवणोत्तमं सैन्धवम् । गुटिकाञ्जनं वर्त्यञ्जनम् । अपरमपि वर्त्यञ्जनमाह—निम्बच्छदमित्यादि । दार्वी हरिद्राद्वयं; विदेहदर्शनात् । अत्र कुकूणके अञ्जनमित्यत्र गुटिकाशब्दो लुप्तो द्रष्टव्यः; तेन गुटिकाञ्जनमित्यर्थः । अंशतुल्यं निम्बच्छदादिकं समभागमित्यर्थः ॥ १५ ॥

स्रोतोजशङ्खदधिसैन्धवमर्धपक्षं
शुक्रं शिशोर्नुदति भावितमञ्जनेन ॥
स्यन्दे कफादभिहितं क्रममाचरेच्च
बालस्य रोगकुशलोऽक्षिगदं जिघांसुः ॥ १६ ॥

इदानीं कुकूणकप्रसङ्गेन बालानां शुक्रलेखनार्थमञ्जनमाह—स्रोतोजेत्यादि । अस्याञ्जनस्य कल्पनां विदेहदर्शनेन वृद्धवैद्या आहुः । तद्यथा—गव्येन दध्ना पिष्टाभ्यां शङ्खसैन्धवाभ्यां स्रोतोजं रसाञ्जनमर्धपक्षं सार्धसप्तरात्रमसकृल्लेपयेत्; ततोऽनन्तरं तत्स्रोतोजं रसाञ्जनं पिष्ट्वा वर्तिः कार्या, साऽञ्जनेन शिशोः शुक्रं नुदति स्फोटयतीत्यर्थः । केचित् स्रोतोञ्जनशब्देन सौवीराञ्जनमाहुः । केचित् 'शुक्रं शिशोर्नुदति भावितमञ्जनेन' इत्यत्र 'आभावितं शिशुकरोगनुदञ्जनेन' इति पठन्ति । अन्ये तु 'ब्राह्मीरसेन परिभावितमञ्जनार्थं' इति पठन्ति, तन्नेच्छति गयी । पूर्वोक्तमेवौषधं शुक्रेऽतिदिशन्नाह—स्यन्दे कफादभिहितमित्यादि । कफायः स्यन्दस्तत्र स्यन्दे यः क्रमोऽभिहितस्तं क्रमं बालस्याक्षिगदं जिघांसुर्योगकुशलो वैद्य आचरेत् कुर्यादिति संबन्धः; जिघांसुर्हन्तुमिच्छुः । केचित् 'स्यन्दे कफादभिहितं क्रमं' इत्यत्र 'स्यन्दक्रमं कफविनाशनमाचरेच्च' इति पठन्ति । बालस्य कफाधिक्यात् कफस्यन्दक्रमं विदध्यात् । आचरेच्चेति चकारो भिन्नक्रमे, स च कफविनाशनमित्यत्र द्रष्टव्यः; ततोऽन्यमप्यवस्थाकुपितं वातं पित्तं रक्तं चानुबन्धभूतमिहोक्तमवेक्ष्य वातपित्तस्यन्दानुक्रमं रक्ताभिष्यन्दक्रमं चावेक्ष्य यथादोषं योगमुपयोजयेदिति व्याख्यानयन्ति ॥ १६ ॥

समुद्र इव गम्भीरं नैव शक्यं चिकित्सितम् ॥
वक्तुं निरवशेषेण श्लोकानामयुतैरपि ॥ १७ ॥

१ 'तेन' इति पा०।

सहस्रैरपि वा, प्रोक्तमर्थमल्पमतिर्नरः ॥
तर्कग्रन्थार्थरहितो नैव गृह्णात्यपण्डितः ॥ १८ ॥

कुतः पुनः स क्रमोऽवस्थाविशेषेण स्वग्रन्थे आचार्येण न निबद्ध इत्याह—समुद्र इव गम्भीरमित्यादि । समुद्र इव गम्भीरं चिकित्सितं श्लोकानां सहस्रैरप्ययुतैर्निरवशेषेण वक्तुं नैव शक्यमित्यर्थः; श्लोकानां सहस्रैरप्ययुतैः श्लोककोट्याऽपीत्यर्थः । यदि श्लोककोट्या वक्तुं न शक्यते तर्हि किं ग्रन्थकर्तुरशक्तिरित्याशङ्कमानमाह—प्रोक्तमित्यादि । अल्पमतिरपण्डितो नरो यतस्तर्कग्रन्थार्थरहितोऽतः श्लोककोट्योक्तमप्यर्थं नैव गृह्णातीति संबन्धः; तर्कग्रन्थार्थरहितस्तर्केणोहेन यो ग्रन्थार्थः शास्त्रार्थस्तेन रहित इत्यर्थः ॥ १७ ॥ १८ ॥

तदिदं बहुगूढार्थं चिकित्साबीजमीरितम् ॥
कुशलेनाभिपन्नं तद्बहुधाऽभिप्ररोहति ॥ १९ ॥
तस्मान्मतिमता नित्यं नानाशास्त्रार्थदर्शिना ॥
सर्वमूह्यमगाधार्थं शास्त्रमागमबुद्धिना ॥ २० ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे नयनाभिघातचिकित्सितं नामैकोनविंशोऽध्यायः ॥ १९ ॥

तदिदमित्यादि । यस्मान्निरवशेषेण रोगावस्थानन्त्याच्चिकित्सितस्य वक्तुमशक्यत्वं, शक्यत्वे वा निरूपणस्य निष्फलता, तस्मात् कारणादिदं बहुगूढार्थं चिकित्साया बीजमीरितमिति समुदायार्थः । तदेव चिकित्साबीजं कुशलेन ज्ञातमनेकधा प्ररोहतीत्याह—कुशलेनेत्यादि । कुशलेनावस्थाविदा वैद्येनाभिपन्नमधिगतं तद्बहुधाऽभिप्ररोहति । चिकित्साबीजमिति बीजमिव बीजं, यथैकं बीजं सुभूमौ निक्षिप्तं मूलकाण्डशाखापल्लवादिनाऽनेकधा प्ररोहति तथेदमपीति चिकित्साबीजमित्यर्थः । यस्मात् कुशलेनाधिगतं चिकित्साबीजमनेकधा प्ररोहति तस्मात् कारणान्मतिमता नित्यं नानाशास्त्रार्थदर्शिना आगमबुद्धिना वैद्येन सर्वमगाधार्थं शास्त्रं नित्यमूह्यमिति संबन्धः । नानाशास्त्राणि शालाक्यानि । आगमः आप्तानां शास्त्रं; तथा चोक्तं,—"सिद्धं सिद्धैः प्रमाणैस्तु हितं चात्र परत्र च । आगमः शास्त्रमाप्तानामाप्तास्तत्त्वार्थदर्शिनः"—इति ॥ १९ ॥ २० ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे एकोनविंशोऽध्यायः ॥ १९ ॥

विंशतितमोऽध्यायः ।

अथातः कर्णगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

इन्द्रियगतरोगसामान्याच्छ्रवणगतरोगविज्ञानीयारम्भो युक्त इत्यत आह—अथात इत्यादि । गतशब्द आश्रितपर्यायः ॥ १ ॥ २ ॥

कर्णशूलं प्रणादश्च बाधिर्यं क्ष्वेड एव च ॥
कर्णस्रावः कर्णकण्डूः कर्णवर्चस्तथैव च ॥ ३ ॥
कृमिकर्णप्रतिनाहौ विद्रधिर्द्विविधस्तथा ॥
कर्णपाकः पूतिकर्णस्तथैवार्शश्चतुर्विधम् ॥ ४ ॥
कर्णार्बुदं सप्तविधं शोफश्चापि चतुर्विधः ॥
एते कर्णगता रोगा अष्टाविंशतिरीरिताः ॥ ५ ॥

तानेव कर्णगतरोगान्नामभिः संख्यया चाह—कर्णशूलमित्यादि । कर्णशूलस्य कष्टसाध्यत्वात् प्रागेव निर्देशः । विद्रधिर्द्विविधः दोषविद्रधिः क्षतविद्रधिश्च; अर्शश्चतुर्विधं वातपित्तकफसन्निपातैः; अर्बुदं सप्तविधं वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा च, सप्तमं शालाक्यतन्त्रे; शोफश्चतुर्विधो वातपित्तकफसंनिपातैः । संख्येयनिर्देशादेव संख्यायां लब्धायामष्टाविंशतिरिति भूयः संख्याकरणं नियमार्थं, तेन च विदेहसंख्यया अधिकत्वं माभूदित्यर्थः ॥ ३—५ ॥

समीरणः श्रोत्रगतोऽन्यथाचरः
समन्ततः शूलमतीव कर्णयोः ॥
करोति दोषैश्च यथास्वमावृतः
स कर्णशूलः कथितो दुराचरः ॥ ६ ॥

कर्णशूलमाह—समीरण इत्यादि । अन्यथाचर इति विमार्गगः । समन्ततः शूलमतीव कर्णयोः करोतीति संबन्धनीयम् । दोषैः कफपित्तरक्तैः, अन्ये तु वायोरेव वाय्वन्तरावरणाद्बहुवचनं समर्थयन्ति । स्वस्य स्वस्य दोषस्य अनतिक्रमेण यथास्वम् । दुराचरो दुःखेनोपचर्यत इत्यर्थः । अन्ये 'दुरासद' इति पठन्ति, दुर्वार इति व्याख्यानयन्ति । यद्यपि शूलबाधिर्यविद्रध्यर्शोर्बुदशोफाः प्राङ्निर्दिष्टास्तथाऽपि कर्णरोगसंग्रहार्थं साध्यासाध्यविभागार्थं च पुनर्निर्दिष्टाः; शूलस्तु वातव्याधिनिदाने केवलवातज उक्तः, अत्र पुनर्दोषैरावृत इति न पौनरुक्त्यम् ॥ ६ ॥

यदा तु नाडीषु विमार्गमागतः
स एव शब्दाभिवहासु तिष्ठति ॥
शृणोति शब्दान् विविधांस्तदा नरः
प्रणादमेनं कथयन्ति चामयम् ॥ ७ ॥

कर्णनादमाह—यदा तु नाडीष्वित्यादि । विमार्गमागतः विरुद्धमार्गं प्राप्तः, विमार्गोऽत्र शिर एव, विमार्गगः तिर्यग्गो यदा तिष्ठति, (स एवेत्येवशब्देन कफाद्यावरणावृतः । अन्ये तु शब्दवहासु नाडीषु स एव वायुर्विमार्गगो यदा निरुद्धयति) तदा विविधान् शब्दान् नरः शृणोतीति व्याख्यानयन्ति । अस्य रोगस्यापीडाकरत्वादरोगत्वं माभूदिति द्योतनार्थमामयवचनम् ॥ ७ ॥

स एव शब्दानुवहा यदा सिराः
कफानुयातो व्यनुसृत्य तिष्ठति ॥

---

१ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते ।

तदा नरस्याप्रतिकारसेविनो
भवेत्तु बाधिर्यमसंशयं खलु ॥ ८ ॥

बाधिर्यमाह—स एव शब्दाभिवहाखिल्यादि । स एव शुद्धो वायुः कफानुयातः कफानुगतः । स एवेत्यत्रापिशब्दो लुप्तो द्रष्टव्यः, तेन न केवलं शुद्धो वायुः श्लेष्मान्वितोऽपि वेत्यर्थः । व्यनुसृत्य विविधमार्गमावृत्य । अप्रतिकारसेविनः चिकित्सामकुर्वतः ॥ ८ ॥

श्रमात् क्षयाद्रूक्षकषायभोजनात्
समीरणः शब्दपथे प्रतिष्ठितः ॥
विरिक्तशीर्षस्य च शीतसेविनः
करोति हि क्ष्वेडमतीव कर्णयोः ॥ ९ ॥

कर्णक्ष्वेडमाह—श्रमादित्यादि । क्षयो धातुक्षयः । क्ष्वेडः शब्दः । कर्णनादः केवलवातारब्धो नानाविधशब्दान्वितः, कर्णक्ष्वेडस्तु दोषसंसृष्टवातारब्धो वंशघोषानुकारिशब्दान्वितः । तथाच विदेहः,—"मारुतः कफवाताभ्यां संसृष्टः शोणितेन च । कर्णक्ष्वेडं संजनयेत् क्ष्वेडनं वेणुघोषवत्"—इति; एष कर्णनादक्ष्वेडयोर्भेदः ॥ ९ ॥

शिरोभिघातादथवा निमज्जतो
जले प्रपाकादथवाऽपि विद्रधेः ॥
स्रवेत्तु पूयं श्रवणोऽनिलावृतः
स कर्णसंस्राव इति प्रकीर्तितः ॥ १० ॥

कर्णस्रावमाह—शिरोभिघातादित्यादि । विद्रधेः कर्णविद्रधेः ॥ १० ॥

कफेन कण्डूः प्रचितेन कर्णयो-
र्भृशं भवेत् स्रोतसि कर्णसंज्ञिते ।

कर्णकण्डूमाह—कफेनेत्यादि । कर्णयोः प्रचितेन संचितेन श्लेष्मणा कर्णस्रोतसि भृशमत्यर्थं कण्डूर्भवेदिति संबन्धः ॥—

विशोषिते श्लेष्मणि पित्ततेजसा
नृणां भवेत् स्रोतसि कर्णगूथकः ॥ ११ ॥

कर्णगूथकमाह—विशोषित इत्यादि । स्रोतसि संचिते श्लेष्मणि पित्ततेजसा विशोषिते सति कर्णगूथको भवेदिति संबन्धः ॥ ११ ॥

स कर्णविट्को द्रवतां यदा गतो
विलायितो घ्राणमुखं प्रपद्यते ॥
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद्विकारः शिरसोऽभितापनः ॥ १२ ॥

कर्णप्रतिनाहमाह—स कर्णेत्यादि । विलयनं पुनः स्नेहस्वेदाभ्याम् । कफमारुताभ्यां सन्निपातेन वा, विदेहोक्तत्वात् । शिरसोऽभितापनः सकलशिरोविकारकारीत्यर्थः ॥ १२ ॥

यदा तु मूर्च्छन्त्यथवाऽपि जन्तवः
सृजन्त्यपत्यान्यथवाऽपि मक्षिकाः ॥
तदञ्जनत्वाच्छ्रवणो निरुच्यते
भिषग्भिराद्यैः कृमिकर्णको गदः ॥ १३ ॥

कृमिकर्णमाह—यदेत्यादि । मूर्च्छन्ति पतन्ति । जन्तवो मांसकोथजाः कृमयः । अपत्यानि सूक्ष्मकृमीन् । मक्षिका मम्भणाख्या नीलमक्षिकाः । तदञ्जनत्वादित्यादि । आद्यैर्भिषग्भिस्तदञ्जनत्वाच्छ्रवणः कृमिकर्णको निरुक्त इति संबन्धः । तदञ्जनत्वात् कृमिलक्षणत्वात् । आद्यैर्भिषग्भिर्विदेहादिभिः । अयं रोगः सान्निपातिकः, विदेहप्रोक्तत्वात् ॥ १३ ॥

क्षताभिघातप्रभवस्तु विद्रधि-
र्भवेत्तथा दोषकृतोऽपरः पुनः ॥
सरक्तपीतारुणमस्रमास्रवेत्
प्रतोदधूमायनदाहचोषवान् ॥ १४ ॥

कर्णविद्रधिमाह—क्षताभिघातप्रभव इत्यादि । क्षताभिघातप्रभवस्तु विद्रधिर्भवेदिति छेदः । एतेन क्षतविद्रधिर्दर्शितः । दोषकृतोऽपरः दोषजनितो द्वितीयो विद्रधिः । एतेन दोषजो दर्शितः । स चतुर्विधः । क्षतविद्रधेर्लक्षणमाह—सरक्तपीतारुणमित्यादि । अस्रं रक्तम् । धूमायनं धूमोद्गमनमिव वेदनाविशेषः । चोषवान् आचूष्यत इव । दोषविद्रधेर्लक्षणं दोषलिङ्गैरेव ज्ञातव्यम् । सरक्तपित्तारुणेत्यादिना कर्णपाकलक्षणमुक्तमिति केचित् कथयन्ति; तच्च मह्यं न रोचते, यतो जेज्जटादीनामीदृशोऽभिप्रायो नास्ति ॥ १४ ॥

भवेत् प्रपाकः खलु पित्तकोपतो
विकोथविक्लेदकरश्च कर्णयोः ॥

कर्णपाकलक्षणमाह—भवेत् प्रपाक इत्यादि ॥—

स्थिते कफे स्रोतसि पित्ततेजसा
विलाय्यमाने भृशसंप्रतापवान् ॥ १५ ॥
अवेदनो वाऽप्यथवा सवेदनो
घनं स्रवेत् पूति च पूतिकर्णकः ॥

पूतिकर्णमाह—स्थित इत्यादि । घनं निरन्तरं वारंवारमित्यर्थः । अन्ये घनमिति पूयस्य विशेषणमाहुः । पूति पूयम् ॥ १५ ॥—

प्रदिष्टलिङ्गान्यर्शांसि तत्त्वत-
स्तथैव शोफार्बुदलिङ्गमीरितम् ॥
मया पुरस्तात् प्रसमीक्ष्य योजये-
दिहैव तावत् प्रयतो भिषग्वरः ॥ १६ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे कर्णगतरोगविज्ञानीयो नाम विंशतितमोऽध्यायः ॥ २० ॥

अर्शःशोफार्बुदान्याह—प्रदिष्टेत्यादि । शोफार्बुदलिङ्गं शोफस्य अर्बुदस्य च लक्षणमित्यर्थः । तत्त्वतः परमार्थतः । प्रसमीक्ष्य ज्ञात्वा । प्रयोगज्ञो वेद्यः ॥ १६ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे विंशोऽध्यायः ॥ २० ॥

एकविंशतितमोऽध्यायः ।

अथातः कर्णगतरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि । प्रतिषेधश्चिकित्सितम् ॥ १ ॥ २ ॥

सामान्यं कर्णरोगेषु घृतपानं रसायनम् ॥
अव्यायामोऽशिरःस्नानं ब्रह्मचर्यमकत्थनम् ॥ ३ ॥

कर्णरोगाणां सामान्यं चिकित्सितमाह—सामान्यमित्यादि । घृतपानमत्रोर्ध्वभक्तिकम् । अशिरःस्नानं न शिरःस्नानमित्यर्थः । अकत्थनमभाषणम् । रसायनमित्यत्र 'रसाशनम्' इति केचित् पठन्ति, मांसरसेन सह भोजनमिति व्याख्यानयन्ति ॥ ३ ॥

कर्णशूले प्रणादे च बाधिर्यक्ष्वेडयोरपि ॥
चतुर्णामपि रोगाणां सामान्यं भेषजं विदुः ॥ ४ ॥

वातजानां चतुर्णां कर्णशूलादीनामेकहेतुत्वादेकामेव चिकित्सामाह—कर्णशूल इत्यादि ॥ ४ ॥

स्निग्धं वातहरैः स्वेदैर्नरं स्नेहविरेचितम् ॥
नाडीस्वेदैरुपचरेत्पिण्डस्वेदैस्तथैव च ॥ ५ ॥

किं तत् सामान्यं चिकित्सितमित्याह—स्निग्धमित्यादि । स्निग्धं स्नेहपानेनाभ्यङ्गेन च । स्नेहविरेचितमेरण्डतैलादिभिः । स्वेदाध्याये व्यामार्धमात्रेत्यादिना नाडीस्वेदः प्रोक्तः; पिण्डस्वेदः कृशरापायसादिभिः ॥ ५ ॥

बिल्वैरण्डार्कवर्षाभूदधित्थोन्मत्तशिग्रुभिः ॥
वस्तगन्धाश्वगन्धाभ्यां तर्कारीयववेणुभिः ॥ ६ ॥
आरनालशृतैरेभिर्नाडीस्वेदः प्रयोजितः ॥
कफवातसमुत्थानं कर्णशूलं निरस्यति ॥ ७ ॥

नाडीस्वेदोपयोगिद्रव्याण्याह—बिल्वेत्यादि । वर्षाभूः श्वेतपुनर्नवा, दधित्थः कपित्थः, उन्मत्तो धत्तूरकः, शिग्रुः शोभाञ्जनकः, विटपशाकमन्ये । वस्तगन्धा बोबयिका । तर्कारी अरणिका, यववेणुभिरिति वेणुयवोऽन्नजातिः । बिल्वैरण्डादिभिरारनालसिद्धैः केवलवातारब्धे कफावृतवातारब्धे च कर्णशूले स्वेदः प्रयोज्यः; परं केवलवातजे शूले स्नेहपूर्वः स्वेदः, कफावृते पुनः रूक्षः स्वेद इति ॥ ६ ॥ ७ ॥

मीनकुक्कुटलावानां मांसजैः पयसाऽपि वा ॥
पिण्डैः स्वेदं च कुर्वीत कर्णशूलनिवारणम् ॥ ८ ॥

पिण्डस्वेदोपयोगिद्रव्याण्याह—मीनकुक्कुटलावानामित्यादि । पयसाऽपि वेति घनीभूतक्षीरपिण्डेनेत्यर्थः । एतैर्मीनादिभिर्मांसपिण्डैः पृथक् समस्तैर्वा स्वेदः कार्यः ॥ ८ ॥

अश्वत्थपत्रखल्लं वा विधाय बहुपत्रकम् ॥
तदङ्गारैः सुसंपूर्णं निदध्याच्छ्रवणोपरि ॥ ९ ॥
यत्तैलं च्यवते तस्मात् खल्लादङ्गारतापितात् ॥
तत् प्राप्तं श्रवणस्रोतः सद्यो गृह्णाति वेदनाम् ॥ १० ॥

शुद्धवातजे शूले स्नेहविशेषस्वेदमुद्दिशन्नाह—अश्वत्थपत्रेत्यादि । खल्लमिति द्विकर्णिकाकारमित्यर्थः । अभ्यज्य तैलेन घृतेन वा, सात्यकिविदेहप्रोक्तत्वात् ॥ ९ ॥ १० ॥

क्षौमगुग्गुल्वगुरुभिः सघृतैर्धूपयेच्च तम् ॥
भक्तोपरि हितं सर्पिर्बस्तिकर्म च पूजितम् ॥ ११ ॥

कर्णस्वेदस्य पश्चात्कर्माह—क्षौमेत्यादि । क्षौममतसीवस्त्रं, बस्तिरत्र शिरोबस्तिः ॥ ११ ॥

निरन्नो निशि तत्सर्पिः पीत्वोपरि पिबेत् पयः ॥
मूर्धबस्तिषु नस्ये च मस्तिष्के परिषेचने ॥ १२ ॥
शतपाकं बलातैलं प्रशस्तं चापि भोजने ॥

इदानीं निरन्नस्य सायमेव कोष्णं पयो निर्दिशन्नाह—निरन्न इत्यादि । निरन्नः पुरुषः । निशि कोष्णं पयोऽनुपानं च सर्पिः पिबेत् । मूर्धेत्यादि । मस्तिष्कः शिरोबस्तिविशेषः, स च स्नेहपिचुल्लोतादिनाऽवचार्यते । शतपाकं वातव्याधिपठितम् । बलातैलं मूढगर्भोक्तं, अन्ये तु बलातैलमेव शतपाकं कृत्वोपयुज्यत इति व्याख्यानयन्ति ॥ १२ ॥—

कण्टकारीमजाक्षीरे पक्त्वा क्षीरेण तेन च ॥ १३ ॥
विपचेत् कुक्कुटवसां कर्णयोस्तत्प्रपूरणम् ॥

कण्टकारीमित्यादि । कण्टकारी चतुष्पलप्रमाणा, तदष्टगुणं क्षीरं, क्षीराच्चतुर्गुणमुदकं दत्त्वा विपचेत्, तेन क्षीरेण कुक्कुटवसां कुडवप्रमाणां पचेत्, तत्कर्णयोः प्रपूरणम् ॥ १३ ॥—

तण्डुलीयकमूलानि फलमङ्कोलजं तथा ॥ १४ ॥
अहिंस्राकेन्दुकान्मूलं सरलं देवदारु च ॥
लशुनं शृङ्गवेरं च तथा वंशावलेखनम् ॥ १५ ॥
कल्कैरेषां तथाऽम्लैश्च पचेत् स्नेहं चतुर्विधम् ॥
वेदनायाः प्रशान्त्यर्थं हितं तत्कर्णपूरणम् ॥ १६ ॥

अपरमपि पूरणमाह—तण्डुलीयकेत्यादि । वंशावलेखनं वंशाच्छोलनम् । कल्को दृषदि पेषितः, स चाद्रवः, स चाष्टपलप्रमाणः, अम्लैः दधितक्रसुराचुक्रमातुलुङ्गरसैः प्रत्येकमष्टाविंशत्यधिकशतप्रमाणैः, स्नेहश्चतुर्विधः सर्पिस्तैलवसामज्जसंज्ञो द्वात्रिंशत्पलप्रमाणः ॥ १४–१६ ॥

लशुनार्द्रकशिग्रूणां मुरङ्ग्या मूलकस्य च ॥
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥ १७ ॥
शृङ्गवेररसः क्षौद्रं सैन्धवं तैलमेव च ॥
कदुष्णं कर्णयोर्देयमेतद्वा वेदनापहम् ॥ १८ ॥

लशुनार्द्रकेत्यादि । शिग्रुः मधुशिग्रुः, मुरङ्गी द्वितीयः शोभाञ्जनकः, कदुष्ण ईषदुष्णः । एतेषां लशुनादीनां षण्णां स्वरसा व्यस्ताः समस्ता वा कर्णपूरणे देयाः ॥ १७ ॥ १८ ॥

वंशावलेखनायुक्ते मूत्रे चाजाविके भिषक् ॥
सर्पिः पचेत्तेन कर्णं पूरयेत् कर्णशूलिनः ॥ १९ ॥

१ अस्याग्रे 'कोष्णं पयोनुपानं च तैलमप्यादिशन्ति हि',—'पूर्वे शिरोबस्तिकर्म च पूजितमित्युक्तं' इत्यधिकः पाठ उपलभ्यते हस्तलिखितपुस्तके ।

पर्येत्यादि । मूत्रे चाजाविके भिषगित्यत्र तन्त्रान्तरदर्शनाद्विपर्ययेण सर्पिःपाकः कर्तव्यः; तेन पूर्वमाविके मूत्रे सर्पिः पक्तव्यं, पश्चादाज इति । अन्ये तु पूर्वमाविकमूत्रपक्केन सर्पिषा कर्णपूरणं, पश्चादाजेन मूत्रेणेति विपर्ययं व्याख्यानयन्ति । केचित् सर्पिः पचेदित्यत्र तैलं पचेदिति पठन्ति; तन्न, सर्वनिबन्धैः परिहृतत्वात् ॥ १९ ॥

महतः पञ्चमूलस्य काण्डमष्टादशाङ्गुलम् ॥
क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत्ततः ॥ २० ॥
यत्तैलं च्यवते तेभ्यो धृतेभ्यो भाजनोपरि ॥
ज्ञेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनाम् ॥ २१ ॥

दीपिकातैलमाह—महत इत्यादि । काण्डं खण्डं, क्षौमेण अतसीवस्त्रेण, आवेष्ट्य 'त्रिभागम्' इति शेषः । धृतेभ्यो अधोमुखम्' इति शेषः । गृह्णाति अपहरति ॥ २० ॥ २१ ॥

कुर्यादेवं भद्रकाष्ठे कुष्ठे काष्ठे च सारले ॥
मतिमान् दीपिकातैलं कर्णशूलनिवर्हणम् ॥ २२ ॥

कुर्यादेवमित्यादि । चकारादगुर्वैरण्डाग्निमन्थकाष्ठानि गृह्यन्ते ॥ २२ ॥

अर्काङ्कुरानम्लपिष्टांस्तैलाक्तान् लवणान्वितान् ॥
सन्निदध्यात् स्नुहीकाण्डे कोरिते तच्छदावृते ॥२३॥
पुटपाकक्रमस्विन्नान् पीडयेदारसागमात् ॥
सुखोष्णं तद्रसं कर्णे दापयेच्छूलशान्तये ॥ २४ ॥
कपित्थमातुलुङ्गाम्लशृङ्गवेररसैः शुभैः ॥
सुखोष्णैः पूरयेत् कर्णं तच्छूलविनिवृत्तये ॥ २५ ॥
कर्णं कोष्णेन चुक्रेण पूरयेत् कर्णशूलिनः ॥
समुद्रफेनचूर्णेन युक्त्या चाप्यवचूर्णयेत् ॥ २६ ॥

अर्काङ्कुरानित्यादि । अयं पाठः सर्वनिबन्धकारैरनार्षाङ्कितस्तस्मान्न व्याख्यातः ॥ २३–२६ ॥

अष्टानामिह मूत्राणां मूत्रेणान्यतमेन तु ॥
कोष्णेन पूरयेत् कर्णं कर्णशूलोपशान्तये ॥ २७ ॥

अष्टानामित्यादि । अष्टानां मूत्राणामन्यतमेनैकतमेन ॥ २७ ॥

मूत्रेष्वम्लेषु वातघ्ने गणे च क्वथिते भिषक् ॥
पचेच्चतुर्विधं स्नेहं पूरणं तच्च कर्णयोः ॥ २८ ॥

मूत्रेष्वित्यादि । मूत्राणि गवादीनामष्टानाम् । अम्लानि सुरामस्त्वारनालबीजपूरचुक्राणि । वातघ्नो गणो विदारिगन्धादिः ॥ २८ ॥

एता एव क्रियाः कुर्यात् पित्तघ्नैः पित्तसंयुते ॥

वातजकर्णरोगे क्रियामभिधाय पित्तजकर्णशूलचिकित्सामाह—एता इत्यादि । एता एव दीपिकादयः क्रियाः । तत्र दीपिका अश्वत्थपत्रखल्लस्नेहसर्पिषा कर्णपूरणं; काञ्जिकेनापि, तस्य स्पर्शने पित्तहरत्वात् । पित्तसंयुते कर्णशूले इत्यर्थः ॥—

काकोल्यादौ दशक्षीरं तिक्तं चात्र हितं हविः ॥२९॥
क्षीरवृक्षप्रवालेषु मधुके चन्दने तथा ॥
कल्कक्काथे परं पक्वं शर्करामधुकैः सरैः ॥ ३० ॥

पित्तजकर्णशूले सामान्यचिकित्सामभिधाय विशेषचिकित्सामाह—काकोल्यादावित्यादि । काकोल्यादिकल्केन दशगुणक्षीरं घृतं सिद्धं हितं, तथा तिक्तं तिक्तद्रव्यसंस्कृतम्; अन्ये तु तिक्तं कुष्ठचिकित्सितोक्तं घृतं कथयन्ति । क्षीरवृक्षा न्यग्रोधोदुम्बराश्वत्थप्लक्षगर्दभाण्डाः, तेषां पल्लवक्काथेन काकोल्यादिकल्केन सिद्धं घृतं हितम् । मधुके चन्दने तथेति प्रत्येकं यष्टीमधुकचन्दनक्काथकल्काभ्यां सिद्धम् । शर्करामधुकैरित्यत्र यष्टीमधुकद्वितयं, अत एव बहुत्वम् । सरैर्विरेचनद्रव्यैरित्यर्थः । जेजटाचार्यस्तु क्षीरवृक्षप्रवालेष्वित्येकं योगं कथयति, बिम्बीक्काथ इति द्वितीयं; तौ च योगावनार्षौ कथयन्ति ॥ २९ ॥ ३० ॥

इङ्गुदीसर्षपस्नेहौ सकफे पूरणे हितौ ॥
तिक्तौषधानां यूषाश्च स्वेदाश्च कफनाशनाः ॥ ३१ ॥

श्लेष्मजशूलस्य चिकित्सामाह—इङ्गुदीसर्षपेत्यादि । सकफे 'कर्णशूले' इत्यध्याहारः । तिक्तेत्यादि । स्वेदाश्च कफनाशना इति तापोष्मस्वेदा रूक्षाः ॥ ३१ ॥

सुरसादौ कृतं तैलं पञ्चमूले महत्यपि ॥
मातुलुङ्गरसः शुक्तं लशुनार्द्रकयो रसः ॥ ३२ ॥
एकैकः पूरणे पथ्यस्तैलं तेष्वपि वा कृतम् ॥
तीक्ष्णा मूर्धविरेकाश्च कवलाश्चात्र पूजिताः ॥ ३३ ॥

सुरसादौ कृतमित्यादि । तैलद्वितयमेतत् । मातुलुङ्गरस इत्यादि । मातुलुङ्गरसादिना एकैकेनैव सिद्धं तैलं पूरणे पथ्यमित्यर्थः । तीक्ष्णा इत्यादि । तीक्ष्णा मूर्धविरेका इति अपामार्गबीजादिभिः । तीक्ष्णाः कवलाः पिप्पल्यादिभिः ॥ ३२ ॥ ३३ ॥

कर्णशूलविधिः कृत्स्नः पित्तघ्नः शोणितावृते ॥

शोणितशूलस्य चिकित्सामाह—कर्णेत्यादि । केचिदमुं पाठं न पठन्ति ॥—

शूलप्रणादबाधिर्यक्ष्वेडानां तु प्रकीर्तितम् ॥ ३४ ॥
सामान्यतो, विशेषेण बाधिर्ये पूरणं शृणु ॥
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ॥३५॥
सजलं च सदुग्धं च बाधिर्ये कर्णपूरणम् ॥

शूलेत्यादि । पञ्जिकाकारस्तु 'सजलं च सदुग्धं च' इत्यत्र 'पादिकं जलदुग्धाभ्यां' इति पठति ॥ ३४ ॥ ३५ ॥—

सितामधुकबिम्बीभिः सिद्धं वाऽऽजे पयस्यपि ३६
बिम्बीक्काथे विमथ्योष्णं शीतीभूतं तदुद्धृतम् ॥
पुनः पचेद्दशक्षीरं सितामधुकचन्दनैः ॥ ३७ ॥
बिल्वाम्बुगाढं तत्तैलं बाधिर्ये कर्णपूरणम् ॥

सितामधुकेत्यादि । सितामधुकबिम्बीभिः कल्किताभिश्छागीक्षीरे चतुर्गुणे पक्वं तिलतैलमुष्णमेव बिम्बीक्काथे मथित्वा शीतीभूतं पाणिनाऽऽदाय पुनरपि बिल्वफलक्काथे विलोडितं

१ 'विशेषस्तु' इति पा० ।

सितशर्करायष्टीमधुरक्तचन्दनैः कल्कीकृतैर्दशगुणे क्षीरे विपचेत् । केचिद् 'बिल्वाम्बुगाढं' इत्यत्र 'बिम्ब्यम्बुगाढं' इति पठन्ति ॥ ३६ ॥ ३७ ॥—

वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ३८

इदानीं बाधिर्ये कफानुबन्धोऽप्यस्तीत्यनागतावेक्षणेन संक्षेपार्थमतिदेशेन चिकित्सामाह—वक्ष्यते य इत्यादि । सोऽप्यत्र पूजित इति 'नवं प्रतिश्यायमपास्य सर्वमुपाचरेत् सर्पिष एव पानैः' इत्यादिनोक्तः ॥ ३८ ॥

वातव्याधिषु यश्चोक्तो विधिः स च हितो भवेत् ॥

शुद्धवातकृते पुनरतीतावेक्षणेन संक्षेपार्थमतिदेशेन निर्दिशन्नाह—वातव्याधिष्वित्यादि । वातव्याध्युक्तो विधिः निवातब्रह्मचर्यादिकः ॥—

कर्णस्रावे पूतिकर्णे तथैव कृमिकर्णके ॥ ३९ ॥
समानं कर्म कुर्वीत योगान् वैशेषिकानपि ॥

कर्म चिकित्साम् ॥ ३९ ॥—

शिरोविरेचनं चैव धूपनं पूरणं तथा ॥ ४० ॥
प्रमार्जनं धावनं च वीक्ष्य वीक्ष्यावचारयेत् ॥
राजवृक्षादितोयेन सुरसादिगणेन वा ॥ ४१ ॥

किं तत् समानं कर्मेत्याह—शिरोविरेचनमित्यादि । प्रमार्जनं पिचुकूर्चिकया कर्णप्रोञ्छनं, धावनं प्रक्षालनम् । वीक्ष्य वीक्ष्येति प्रत्येकं कर्णप्रस्रावादिषु दोषदूष्यादिमलविशेषं दृष्ट्वा दृष्ट्वेत्यर्थः । राजवृक्षादितोयेनेत्यादि । राजवृक्षादिरारग्वधादिः ॥ ४० ॥ ४१ ॥

कर्णप्रक्षालनं कार्यं चूर्णैरेषां च पूरणम् ॥
क्वाथं पञ्चकषायं तु कपित्थरसयोजितम् ॥ ४२ ॥
कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह ॥
सर्जत्वक्चूर्णसंयुक्तः कार्पासीफलजो रसः ॥ ४३ ॥
योजितो मधुना वाऽपि कर्णस्रावे प्रशस्यते ॥
लाक्षा रसाञ्जनं सर्जश्चूर्णितं कर्णपूरणम् ॥ ४४ ॥
सशैवलं महावृक्षजम्ब्वाम्रप्रसवायुतम् ॥
कुलीरक्षौद्रमण्डूकीसिद्धं तैलं च पूजितम् ॥ ४५ ॥

समानं कर्माभिधाय वैशेषिकान् योगानाह—कर्णेत्यादि । पञ्चकषायमस्मिन्नेवाध्याये 'तिन्दुकान्यभया रोध्रं समङ्गाऽऽमलकं' इत्यादिना पठिष्यति, अन्ये तु आरग्वधशिरीषजम्बुसर्जाश्वकर्णजं पञ्चकषायचूर्णं कथयन्ति, तच्च टीकापञ्जिकाभ्यां नाङ्गीकृतम् । सर्जत्वगित्यादि । कार्पासी वनकार्पासी । शैवलं दूर्वा, हठमित्यन्ये । महावृक्षः सेहुण्डः, प्रसवाः पल्लवाः । कुलीरः कर्कटश्शृङ्गी, मण्डूकी ब्राह्मीभेदः । शैवलादिकं प्रसवपर्यन्तं कषायद्रव्यं, कुलीरादिकं च कल्कद्रव्यम् । पूजितं 'कर्णस्रावे कर्णपूरणम्' इत्यध्याहार्यम् ॥ ४२—४५ ॥

तिन्दुकान्यभया रोध्रं समङ्गाऽऽमलकं मधु ॥
पूरणं चात्र[2] पथ्यं स्यात्कपित्थरसयोजितम् ॥ ४६ ॥

तिन्दुकान्यभया रोध्रमित्यादि । समङ्गा अञ्जलिकारिका, 'वराहक्रान्ता' इत्यपरे । इदं पञ्चकषायचूर्णम् ॥ ४६ ॥

रसमाम्रकपित्थानां मधूकधवशालजम् ॥
पूरणार्थं प्रशंसन्ति तैलं वा तैर्विपाचितम् ॥ ४७ ॥
प्रियङ्गुमधुकाम्बष्ठाधातकीशिलपर्णिभिः ॥
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन वा ॥ ४८ ॥
पचेत्तैलं तदास्रावमवगृह्णाति पूरणात् ॥

रसमाम्रेत्यादि । आम्रादिपल्लवानां रसः स्वरस एव एकैकः समस्तो वा कर्णपूरणम्, तैर्विपक्वं वा तिलतैलं पूयस्रावे पूरणम् । प्रियङ्गुमधुकाम्बष्ठेत्यादि । प्रियङ्ग्वादिकल्कैः कपित्थपल्लवरसेन चतुर्गुणेन तिलतैलं सिद्धं कर्णस्रावापहम् । अम्बष्ठा सांकुरडा, शिला मनःशिला, पर्णी शालपर्णी ॥ ४७ ॥ ४८ ॥—

घृष्टं रसाञ्जनं नार्याः क्षीरेण मधुसंयुतम् ॥ ४९ ॥
तत्प्रशस्तं चिरोत्थेऽपि सास्रावे पूतिकर्णके ॥
निर्गुण्डीस्वरसस्तैलं सिन्धुधूमरजो गुडः ॥ ५० ॥
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः ॥

इदानीं पूतिकर्णस्य विशेषचिकित्सां योगद्वयेनाह—घृष्टमित्यादि ॥ ४९ ॥ ५० ॥—

कृमिकर्णकनाशार्थं कृमिघ्नं योजयेद्विधिम् ॥ ५१ ॥

कृमिकर्णे वैशेषिकमाह—कृमिकर्णकनाशार्थमित्यादि । कृमिघ्नो विधिः क्रिमिप्रतिषेधे[1] वक्ष्यमाणः ॥ ५१ ॥

वार्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥

अपरमपि विशेषचिकित्सितमाह—वार्ताकुधूम इत्यादि । परिणतशुष्कवार्ताकुधूमस्य पानं कर्णधूपनं च, सार्षपस्नेहेन कर्णपूरणं, तन्त्रान्तरोक्तत्वात् ॥—

कृमिघ्नं हरितालेन गवां मूत्रयुतेन च ॥ ५२ ॥
गुग्गुलोः कर्णदौर्गन्ध्ये धूपनं श्रेष्ठमुच्यते ॥
छर्दनं धूमपानं च कवलस्य च धारणम् ॥ ५३ ॥

कृमिकृतदौर्गन्ध्यचिकित्सामाह—कृमिघ्नमित्यादि । कृमिघ्नं विडङ्गसारचूर्णं, तच्च हरितालचूर्णेन युतं गोमूत्रेण पूरणं, गुग्गुलुना धूपनम् । छर्दनमित्यादि । केचिच्छर्दनादिकं क्रियात्रितयं त्रयाणामास्रावादीनां हितमाहुः; तन्न, यतः कृमिकृतदौर्गन्ध्यसान्निध्याद्विदेहादिष्व[2]स्य दर्शनाद् दौर्गन्ध्य एव छर्दनादित्रितयं हितम् ॥ ५२ ॥ ५३ ॥

कर्णक्ष्वेडे हितं तैलं सार्षपं चैव पूरणम् ॥
विद्रधौ चापि कुर्वीत विद्रध्युक्तं चिकित्सितम् ५४

कर्णक्ष्वेडे हितमित्यादि । कर्णक्ष्वेडे यत् सार्षपं तैलं पूरणे उक्तं तद्विद्रधावपि कुर्वीत; न केवलं तदेव कुर्वीत विद्रध्युक्तं चिकित्सितमपि कुर्वीतेत्यर्थः । वातजे आमे सवेदने विद्रधौ तिलतैलेन सेकः, कफजे पुनः सार्षपतैलेनेति ॥ ५४ ॥

प्रक्लेद्य धीमांस्तैलेन स्वेदेन प्रविलाय्य च ॥
शोधयेत्कर्णविट्कं तु भिषक् सम्यक् शलाकया ॥

कर्णगूथचिकित्सामाह—प्रक्लेद्येत्यादि ॥ ५५ ॥

१ 'दोषदूष्यादिवलविशेषं' इति पा० । २ 'चातिपथ्यं स्यात्' इति पा० ।

१ 'कर्णप्रतिषेधे' इति पा० । २ 'विदेहादिष्वप्यदर्शनात्' इति पा० ।

नाडीस्वेदोऽथ वमनं धूमो मूर्धविरेचनम् ॥
विधिश्च कफहृत्सर्वैः कर्णकण्डूमपोहति ॥ ५६ ॥

कर्णकण्डूचिकित्सामाह—नाडीस्वेद इत्यादि । वमनं सस्वेदवमनं, धूमोऽत्र वैरेचनिकः ॥ ५६ ॥

अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत् ॥
ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत् ॥५७॥

कर्णप्रतीनाहे चिकित्सामाह—अथेत्यादि । क्रियां स्नेहस्वेदनस्यादिकां, प्राप्तां युक्ताम् ॥ ५७ ॥

कर्णपाकस्य भैषज्यं कुर्यात्पित्तविसर्पवत् ॥

कर्णपाके चिकित्सामाह—कर्णपाकस्येत्यादि । शीतालेपनपरिषेकादींश्च तच्चिकित्सितोक्तान् कुर्यात् ॥—

कर्णच्छिद्रे वर्तमानं कीटं क्लेदमलादि वा ॥ ५८ ॥
शृङ्गेणापहरेद्धीमानथवाऽपि शलाकया ॥

शारीरदोषभवकर्णगूथप्रत्याकर्षणचिकित्साप्रसङ्गेनागन्तुकीटमलादीनामाकर्षणचिकित्सामाह—कर्णच्छिद्र इत्यादि । शृङ्गेणापहरेत् 'आचूष्य' इति शेषः ॥ ५८ ॥—

शेषाणां तु विकाराणां प्राक् चिकित्सितमीरितम् ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे कर्णगतरोगप्रतिषेधो नामैकविंशोऽध्यायः ॥ २१ ॥

इदानीं शालाक्यसिद्धान्तेन चतुर्विधानामर्शसां सप्तविधानामर्बुदानां चतुर्विधानां शोफानां किं चिकित्सितमिति पृष्टः शालाक्यतन्त्रस्य न्यूनतादोषं परिजिहीर्षुराह—शेषाणामित्यादि । शेषाणां चतुर्विधानामर्शसां, सप्तविधानामर्बुदानां, चतुर्विधानां शोफानां चेत्यर्थः । प्रागिति अर्शआदिचिकित्सिते । ईरितं प्रतिदोषं प्रत्यवस्थं सर्वमुक्तमित्यर्थः ॥ ५९ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशतितमोऽध्यायः ।

अथातो नासागतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि । गतशब्द आश्रयवचनः, तेन नासाश्रितरोगविज्ञानमधिकृत्य कृतोऽध्यायो नासागतरोगविज्ञानीयाध्यायः ॥ १ ॥ २ ॥

अपीनसः पूतिनस्यं[1] नासापाकस्तथैव च ॥
तथा शोणितपित्तं च पूयशोणितमेव च ॥ ३ ॥
क्षवथुर्भ्रंशथुर्दीप्तो नासानाहः परिस्रवः ॥
नासाशोषेण सहिता दशैकाश्चेरिता गदाः ॥ ४ ॥
चत्वार्यर्शांसि चत्वारः शोफाः सप्तार्बुदानि च ॥
प्रतिश्यायाश्च ये पञ्च वक्ष्यन्ते सचिकित्सिताः ॥
एकत्रिंशन्मितास्ते[1] तु नासारोगाः प्रकीर्तिताः ॥ ५ ॥

नासारोगान् नामभिः संख्यया चाह—अपीनस इत्यादि । संख्येयनिर्देशादेव संख्यायां लब्धायां भूयः संख्याकरणं नियमार्थं; तेन विदेहोक्तसंख्यया अधिकत्वं माभूत् । 'अपीनसः पूतिपाकौ पित्तासृक् पूयशोणितम्' इति केचित् पठन्ति ॥ ३–५ ॥

आनह्यते यस्य विधूप्यते च
प्रक्लिद्यते शुष्यति[2] चापि नासा ॥
न वेत्ति यो गन्धरसांश्च जन्तु-
र्जुष्टं व्यवस्येत्तमपीनसेन ॥ ६ ॥
तं चानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम् ॥

अपीनसलक्षणमाह—आनह्यत इत्यादि । आनह्यते कफेन पित्तशोषितेन आनह्यत इव । विधूप्यते धूमायत इव, पित्तात्; प्रक्लिद्यते आर्द्रीभवति कफात्; शुष्यति पित्तात् । गन्धरसान् गन्धान् रसांश्चेत्यर्थः; अन्ये तु गन्धस्य रसा गन्धरसाः, रसतेर्गत्यर्थत्वात्; याथातथ्येन गन्धं न जानातीत्यर्थः । व्यवस्येत् जानीयात् । केचिदमुं पाठमन्यथा पठन्ति, स चादर्शनान्न लिखितः ॥ ६ ॥—

दोषैर्विदग्धैर्गलतालुमूले
संवासितो यस्य समीरणस्तु ॥ ७ ॥
निरेति पूतिर्मुखनासिकाभ्यां
तं पूतिनासं प्रवदन्ति रोगम् ॥

पूतिनासस्य लक्षणमाह—दोषैरित्यादि । रक्तमपि दोषत्वेन विवक्षितं, तेन दोषैरिति बहुवचनम् । विदग्धैर्मूर्च्छितैः, स्वरूपप्रच्युतैर्वा । संवासितः पित्तश्लेष्मरक्तैरात्मविकृतिगन्धेन मिश्रीकृतः । निरेति निर्गच्छति, पूतिः शटितगन्धो वायुः ॥ ७ ॥—

घ्राणाश्रितं पित्तमरूंषि कुर्या-
द्यस्मिन् विकारे बलवांश्च पाकः ॥ ८ ॥
तं नासिकापाकमिति व्यवस्ये-
द्विक्लेदकोथावपि यत्र दृष्टौ ॥

नासापाकस्य लक्षणमाह—घ्राणाश्रितमित्यादि । अरूंषि व्रणान् । विक्लेद आर्द्रभावः, कोथः पूतिभावः, एतौ यत्र यस्मिन् विकारे, दृष्टौ दर्शनं गतौ ॥ ८ ॥—

चतुर्विधं द्विप्रभवं द्विमार्गं
वक्ष्यामि भूयः खलु रक्तपित्तम् ॥ ९ ॥

रक्तपित्तलक्षणमनागतावेक्षणेन निर्दिशन्नाह—चतुर्विधमित्यादि । चतुर्विधं वातपित्तकफसन्निपातात्मकम् । द्विप्रभवं द्वौ प्रभवौ यकृत्प्लीहानौ यस्य तं तथा; अन्ये तु स्निग्धरूक्षोष्णभेदेन द्विरुत्पत्तिकारणं मन्यन्ते; अपरे तु द्विप्रभवमामाशयपक्वाशयप्रभवमाहुः । द्विमार्गमधरोत्तरमार्गद्वयम् ॥ ९ ॥

१ 'पूतिनासः' इति पा० ।

१ 'एकत्रिंशत्सहितेस्तैस्तु' इति पा० । २ 'पापच्यते क्लिद्यति' इति पा० ।

दोषैर्विदग्धैरथवाऽपि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तु ॥
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम् ॥ १० ॥

पूयरक्तं दोषागन्तुनिमित्तं दर्शयन्नाह—दोषैरित्यादि । विदग्धैः पित्तरक्ताधिक्याद्विरुद्धां परिणतिं प्राप्तैः । ललाटाभिघातोऽपि विरुद्धपाकं प्राप्तो मन्तव्यः ॥ १० ॥—

घ्राणाश्रिते मर्मणि संप्रदुष्टे[1]
यस्यानिलो नासिकया निरेति ॥ ११ ॥
कफानुयातो बहुशः सशब्द-
स्तं रोगमाहुः क्षवथुं विधिज्ञाः ॥

क्षवथुरपि दोषजश्चागन्तुजश्च, तत्र पूर्वं दोषजमेव निर्दिशन्नाह—घ्राणेत्यादि । घ्राणाश्रिते मर्मणि शृङ्गाटकाख्ये; 'घ्राणाश्रिते मर्मणि' इत्यत्र 'घ्राणाश्रिते श्लेष्मणि' इति केचित् पठन्ति ॥ ११ ॥—

तीक्ष्णोपयोगादतिजिघ्रतो वा
भावान् कटूनर्कनिरीक्षणाद्वा ॥ १२ ॥
सूत्रादिभिर्वा तरुणास्थिमर्म-
ण्युद्घाटितेऽन्यः क्षवथुर्निरेति ॥

आगन्तुजं क्षवथुमाह—तीक्ष्णोपयोगादित्यादि । अतिजिघ्रतः आघ्रायतः । भावान् द्रव्याणि । तरुणास्थिमर्म नासावंशास्थिमर्म शृङ्गाटकसंज्ञम् । उद्घाटिते ऊर्ध्वं चालिते ॥ १२ ॥—

प्रभ्रश्यते नासिकयैव यश्च
सान्द्रो विदग्धो लवणः कफस्तु ॥ १३ ॥
प्राक् संचितो मूर्धनि पित्ततप्त-
स्तं भ्रंशथुं व्याधिमुदाहरन्ति ॥

भ्रंशथोर्लक्षणमाह—प्रभ्रश्यत इत्यादि । प्रभ्रश्यतेऽत्यर्थमधः पतति नासिकयैव, न मुखेन ॥ १३ ॥—

घ्राणे भृशं दाहसमन्विते तु
विनिःसरेद्धूम इवेह वायुः ॥ १४ ॥
नासा प्रदीप्तेव च यस्य[2] जन्तो-
र्व्याधिं तु तं दीप्तमुदाहरन्ति ॥

दीप्तलक्षणमाह—घ्राणे भृशमित्यादि । विनिःसरेन्निर्याति । वायुर्निश्वासः । प्रदीप्तेव ज्वलितेव नासा स्यात् ॥ १४ ॥—

कफावृतो वायुरुदानसंज्ञो
यदा स्वमार्गे विगुणः स्थितः स्यात् ॥ १५ ॥
घ्राणं वृणोतीव तदा स रोगो
नासाप्रतीनाह इति प्रदिष्टः ॥

नासाप्रतीनाहलक्षणमाह—कफावृत इत्यादि । नासा प्रतिनह्यते बध्यत इव वातेनेति नासाप्रतीनाहः ॥ १५ ॥—

अजस्रमच्छं सलिलप्रकाशं
यस्याविवर्णं स्रवतीह नासा ॥ १६ ॥

१ 'संप्रदुष्टः' इति पा० ।　२ 'यस्य' इति पा० ।

रात्रौ विशेषेण हि तं विकारं
नासापरिस्रावमिति व्यवस्येत् ॥

नासापरिस्रावमाह—अजस्रमच्छमित्यादि । अजस्रमनवरतम् । अविवर्णमविशिष्टवर्णम् । अत्र रोगे स्रावः शृङ्गाटकाख्यस्रोतसि प्रविलायितात् कफात् । व्यवस्येत् जानीयात् ॥ १६ ॥—

घ्राणाश्रिते श्लेष्मणि मारुतेन
पित्तेन गाढं परिशोषिते च ॥ १७ ॥
समुच्छ्वसित्यूर्ध्वमधश्च कृच्छ्रा-
द्यस्तस्य नासापरिशोष उक्तः ॥

नासाशोषलक्षणमाह—घ्राणाश्रिते इत्यादि । गाढमतिशयेन ॥ १७ ॥—

दोषैस्त्रिभिस्तैः पृथगेकशश्च
ब्रूयात्तथाऽर्शांसि तथैव शोफान् ॥ १८ ॥
शालाक्यसिद्धान्तमवेक्ष्य चापि
सर्वात्मकं सप्तममर्बुदं तु ॥

इदानीमुक्तानामर्शआदीनां सामान्येन लक्षणमाह—दोषैरित्यादि । पृथग्दोषैस्त्रीण्यर्शांसि, सन्निपातेनैकं, एवं चत्वार्यर्शांसि । तथैव शोफानिति शोफा अपि चत्वार इत्यर्थः । शालाक्यसिद्धान्तमवेक्ष्येति 'वातेन पित्तेन कफेन चापि' इत्यादिना निदानस्थाने षडर्बुदानि निर्दिष्टानि, सप्तमं सर्वात्मकं शालाक्यतन्त्रे ॥ १८ ॥—

रोगः प्रतिश्याय इहोपदिष्टः
स वक्ष्यते पञ्चविधः पुरस्तात् ॥ १९ ॥

प्रतिश्यायस्यानागतावेक्षणेन संक्षेपार्थं लक्षणं निर्दिशन्नाह—रोग इत्यादि ॥ १९ ॥

(नासास्रोतोगता रोगास्त्रिंशदेकश्च कीर्तिताः ।

ननु, सर्वाङ्गगतानां कुष्ठादीनामप्यत्र नासायां संभवोऽस्तीति नासारोगाणां सङ्ख्यातिरेकमाशङ्क्याह—नासास्रोतोगता रोगा इत्यादि । नासास्रोतसि गता एव ये रोगास्त एव मयैकत्रिंशदुक्ताः, न पुनरत्र नासायां ये भवन्ति ॥—

स्रोतःपथे यद्विपुलं कोशवच्चार्बुदं भवेत् ॥ २० ॥)[1]

नासागतशोफान् नासार्बुदलक्षणेन पृथक्कुर्वन्नाह—स्रोत इत्यादि । कोशोऽन्तःपूरणवस्तु, यादृशमस्यान्तःपूरणवस्तु तादृशमन्तःपूरणकरं वस्तु शोथस्य नास्तीत्यर्थः ॥ २० ॥

शोफास्तु शोफविज्ञाना नासास्रोतोव्यवस्थिताः ।
निदानेऽर्शांसि निर्दिष्टान्येवं तानि विभावयेत् ॥ २१

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे नासागतरोगविज्ञानीयो नाम द्वाविंशोऽध्यायः ॥ २२ ॥

शोफाः पुनः कीदृशा इत्याह—शोफा इत्यादि । शोफो विज्ञानं येषां ते शोफविज्ञानाः; अथवा प्रागुक्तशोफानामिव

१ अयं श्लोको हाराणचन्द्रेण न पठितः ।

विज्ञानं येषामिति । निदानेऽर्शांसीत्यादि । एष पाठो द्विरुक्तिभयान्निबन्धकारैर्न पठितः ॥ २१ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशतितमोऽध्यायः ।

अथातो नासागतरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि ॥ १ ॥ २ ॥

पूर्वोद्दिष्टे पूतिनस्ये च जन्तोः
स्नेहस्वेदौ छर्दनं स्रंसनं च ॥
युक्तं भक्तं तीक्ष्णमल्पं लघु स्या-
दुष्णं तोयं धूमपानं च काले ॥ ३ ॥

अपीनसपूतिनस्ययोश्चिकित्सामाह—पूर्वोद्दिष्टे इत्यादि । पूर्वोद्दिष्टे अपीनसे इत्यर्थः । छर्दनं वमनं, स्रंसनं विरेकः । कृतशुद्धेरन्तःसंसर्गं नियमयन्नाह—युक्तमित्यादि । तोयस्य पानं नियमयन्नाह—उष्णं तोयमित्यादि । काले धूमपानकाले ॥ ३ ॥

हिङ्गु व्योषं वत्सकाख्यं शिवाटी
लाक्षा बीजं सौरभं कट्फलं च ॥
उग्रा कुष्ठं तीक्ष्णगन्धा विडङ्गं
श्रेष्ठं नित्यं चावपीडे करञ्जम् ॥ ४ ॥

तयोरेवावपीडमुद्दिशन्नाह—हिङ्गु व्योषमित्यादि । व्योषं त्रिकटुकम् । शिवाटी श्वेतपुनर्नवा, शेफालिकेत्यन्ये । उग्रा वचा, तीक्ष्णगन्धा शोभाञ्जनकः । अवपीड्य दीयत इत्यवपीडः । केचिदमुमेव पाठमन्यथा पठन्ति, स चादर्शनान्न लिखितः ॥४॥

एतैर्द्रव्यैः सार्षपं मूत्रयुक्तं
तैलं धीमान्नस्यहेतोः पचेत ॥

अपीनसपूतिनस्ययोरेतैरेवावपीडनद्रव्यैर्नस्यार्थं तैलसाधनमाह—एतैर्द्रव्यैरित्यादि । केचित् 'अस्मिन् तैले युक्तितः संपचेत मञ्जिष्ठां वै स्रोतसि म्रक्षणार्थं' इति पठन्ति, स चाचार्यैरनार्षीकृतः ॥—

नासापाके पित्तहृत्संविधानं
कार्यं सर्वं बाह्यमाभ्यन्तरं च ॥ ५ ॥
हृत्वा रक्तं क्षीरवृक्षत्वचश्च
साज्याः सेका योजनीयाश्च लेपाः ॥

नासापाके भेषजमाह—नासापाके इत्यादि । बाह्यं लेपाभ्यङ्गपरिषेकादि, आभ्यन्तरं पुनराहारस्नेहपानविरेचनादि । साज्याः सघृताः ॥ ५ ॥—

वक्ष्याम्यूर्ध्वं रक्तपित्तोपशान्तिं

रक्तपित्तस्यानागतावेक्षणेन संक्षेपार्थं चिकित्सितमाह—वक्ष्याम्यूर्ध्वमित्यादि । ऊर्ध्वं रक्तपित्तप्रतिषेधे । उपशान्तिं चिकित्सितं 'नासाप्रवृत्ते जलमाशु देयं सशर्करं नासिकया पयो वा' इत्यादिकम् ॥—

नाडीवत्स्यात् पूयरक्ते चिकित्सा ॥ ६ ॥

पूयरक्तस्य विधानमाह—नाडीवदित्यादि । पूयरक्ते नाडीवत् नाडीतुल्या चिकित्सा, या विसर्पनाडीस्तनरोगचिकित्सिते व्याख्याता ॥ ६ ॥

वान्ते सम्यक् चावपीडं वदन्ति
तीक्ष्णं धूमं शोधनं चात्र नस्यम् ॥

पूयरक्ते सामान्यां चिकित्सामभिधाय विशेषचिकित्सामाह—वान्ते इत्यादि । अत्र पूयरक्ते; अन्ये तु 'अत्रेति नासापाके' इति व्याख्यानयन्ति । केचिद्वान्ते सम्यगित्यादिकं क्षवथौ भ्रंशथौ च योजयन्ति ।—

क्षेप्यं नस्यं मूर्धवैरेचनीयै-
र्नाड्या चूर्णं क्षवथौ भ्रंशथौ च ॥ ७ ॥
कुर्यात् स्वेदान् मूर्ध्नि वातामयघ्नान्
स्निग्धान् धूमान् यद्यदन्यद्धितं च ॥

क्षवथौ भ्रंशथौ च चिकित्सामाह—क्षेप्यमित्यादि । नस्यमिति प्रधमनमित्यर्थः, पञ्चविधत्वाच्चस्यस्य । मूर्धवैरेचनीयैः शिरोविरेचनद्रव्यैः । प्रधमनेन क्षीणे कफे वाते च वृद्धे सति अनिलघ्नान् स्निग्धानित्यर्थः । अन्यदिति शिरोबस्तिमस्तिष्कादिकम् ॥ ७ ॥—

दीप्ते रोगे पैत्तिकं संविधानं
कुर्यात् सर्वं स्वादु यच्छीतलं च ॥ ८ ॥

दीप्तरोगस्य चिकित्सामाह—दीप्ते इत्यादि । संविधानं कर्मेत्यर्थः, सर्वं बाह्याभ्यन्तरम् ॥ ८ ॥

नासानाहे स्नेहपानं प्रधानं
स्निग्धा धूमा मूर्धबस्तिश्च नित्यम् ॥
बलातैलं सर्वथैवोपयोज्यं
वातव्याधावन्यदुक्तं च यद्यत् ॥ ९ ॥

नासानाहचिकित्सामाह—नासानाहे स्नेहपानमित्यादि । स्नेहपानमुत्तरभक्तकम् । मूर्धबस्तिश्चेति चकारात् शाल्वणोपनाहादयो गृह्यन्ते । सर्वथैवेति पानाभ्यञ्जनानुवासनशिरोबस्तिमस्तिष्कादिभिः सर्वैरेव प्रकारैः । अन्यदणुतैलादिकम् ॥ ९ ॥

नासास्रावे घ्राणतश्चूर्णमुक्तं
नाड्या देयं योऽवपीडश्च तीक्ष्णः ॥
तीक्ष्णं धूमं देवदार्वग्निकाभ्यां
मांसं वाऽऽजं युक्तमत्रादिशन्ति ॥ १० ॥

नासास्रावचिकित्सामाह—नासास्रावे इत्यादि । उक्तं चूर्णं शिरोविरेचनद्रव्यकृतम् । तीक्ष्णोऽवपीडो 'हिङ्गु व्योषं वत्सकाख्यं' इत्यादिना इहैवाध्याये प्रोक्तः । अग्निकश्चित्रकः, अजमोदामन्ये । आजं मांसं 'भोजने' इति शेषः ॥ १० ॥

नासाशोषे क्षीरसर्पिः प्रधानं
सिद्धं तैलं चाणुकल्पेन नस्यम् ॥

सर्पिःपानं भोजनं जाङ्गलैश्च
स्नेहः स्वेदः स्नैहिकश्चापि धूमः ॥ ११ ॥

नासाशोषे चिकित्सामाह—नासाशोषे क्षीरसर्पिरित्यादि । क्षीरसर्पिरादित उक्तम् । प्रधानं श्रेष्ठम् । नस्ये नस्यविषये । अणुकल्पेनाणुतैलविधानेन वातव्याध्युक्तेन । सर्पिःपानमन्तभक्तकम् । जाङ्गलैरेणादिमांसैः स्नेहः स्वेद इत्यर्थः । स्नैहिको धूमो मधूच्छिष्टादिभिः ॥ ११ ॥

शेषान् रोगान् घ्राणजान् सन्नियच्छे-
दुक्तं तेषां यद्यथा संविधानम् ॥ १२ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे नासागतरोगप्रतिषेधो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

अर्शःप्रभृतीनां चिकित्सामाह—शेषानित्यादि । शेषान् रोगानर्शःशोफादीन्, सन्नियच्छेत् चिकित्सेत् । उक्तं संविधानं स्वे स्वे चिकित्सिते ॥ १२ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां श्रुसुतव्याख्यायामुत्तरतन्त्रान्तर्गतशालाक्यतन्त्रे त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशतितमोऽध्यायः ।

अथातः प्रतिश्यायप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि । वातं प्रति अभिमुखं श्यायो गमनं कफादीनां यत्र स प्रतिश्यायः । प्रतिषेधश्चिकित्सितम् ॥ १ ॥ २ ॥

नारीप्रसङ्गः शिरसोऽभितापो
धूमो रजः शीतमतिप्रतापः ॥
संधारणं मूत्रपुरीषयोश्च
सद्यः प्रतिश्यायनिदानमुक्तम् ॥ ३ ॥

तच्च चिकित्सितमलक्षितानां व्याधीनां न संभवति, अतः प्रतिश्यायलक्षणार्थं पूर्वं सद्योजनकमेव निदानं निर्दिशन्नाह—नारीप्रसङ्ग इत्यादि । नारीप्रसङ्गो नारीष्वतिशयेन प्रवृत्तिः । शिरोऽभितप्यते येन स शिरोऽभितापः । (शिरोऽभितापो धूमादिः, रजोधूमचयाश्च नासाप्रविष्टा हेतवः ।) केचिदमुं पाठं न पठन्ति; तन्न, यतः सर्वनिबन्धकारैरङ्गीकृतोऽयं पाठः ॥ ३ ॥

चयंगता मूर्धनि मारुतादयः
पृथक् समस्ताश्च तथैव शोणितम् ॥
प्रकोप्यमाणा विविधैः प्रकोपणै-
र्नृणां प्रतिश्यायकरा भवन्ति हि ॥ ४ ॥

सद्योजनकं निदानमभिधाय चयादिक्रमेण कालान्तरजनकमपि निदानमाह—चयमित्यादि । चयं गताः अर्थात् स्वे स्वे स्थाने संचयं प्राप्ताः । मूर्धनीति मूर्धनि प्रतिश्यायकरा भवन्तीति योजनीयम् । यदि स्वे स्वे स्थाने चितास्तत् कथं मूर्धनि प्रतिश्यायकरा इत्याह—प्रकोप्यमाणा इत्यादि । विविधैः प्रकोपणैः बलवद्विग्रहादिभिः क्रोधादिभिर्दिवास्वप्नादिभिश्च । अन्ये तु मूर्धनि संचयं प्राप्ता दोषा इति व्याख्यानयन्ति । ननु स्वस्थानवृद्धिः संचयः, वातपित्तकफरक्तानां शिरसि स्थानं नास्ति, तत्कथं मूर्धनि वातादीनां संचयः? सत्यं, 'यो वायुर्वक्रसंचारी' इत्यादिना वायोः शिरसि स्थानमुक्तं, पित्तस्य त्वग्दृष्टिश्चेति शिरसि स्थानद्वयं, श्लेष्मणः स्थानं शिरसि प्रसिद्धमेव, सिराणां सर्वगत्वाद्रक्तस्यापि शिरसि स्थानं, तस्मात् शिरसि संचयं गता इति युक्तम् ॥ ४ ॥

शिरोगुरुत्वं क्षवथोः प्रवर्तनं
तथाऽङ्गमर्दः परिहृष्टरोमता ॥
उपद्रवाश्चाप्यपरे पृथग्विधा
नृणां प्रतिश्यायपुरःसराः स्मृताः ॥ ५ ॥

प्रतिश्यायस्य पूर्वरूपमाह—शिरोगुरुत्वमित्यादि । क्षवथोः प्रवर्तनं छिक्कायाः प्रवृत्तिः । अङ्गमर्दो वेदनाविशेषः । परिहृष्टरोमता उच्छूनरोमता, उद्धर्षितरोमाञ्च इति यावत् । पृथग्विधा उपद्रवा ज्वरारोचकादयः । पुरःसरा अग्रगामिनः पूर्वरूपाणीत्यर्थः ॥ ५ ॥

आनद्धा पिहिता नासा तनुस्रावप्रवर्तिनी ॥
गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा ॥ ६ ॥
स्वरोपघातश्च भवेत् प्रतिश्यायेऽनिलात्मके ॥

वातजप्रतिश्यायस्य लक्षणमाह—आनद्धा पिहितेत्यादि । आनद्धा आध्माता पूरितेव । पिहिता रजःशूकपूर्णेव ॥ ६ ॥—

उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके ॥७॥
कृशोऽतिपाण्डुः सन्तप्तो भवेत्तृष्णानि(भि)पीडितः ।
सधूमं सहसा वह्निं वमतीव च मानवः ॥ ८ ॥

पित्तप्रतिश्यायस्य लक्षणमाह—उष्ण इत्यादि । सपीतक ईषत्पीत इत्यर्थः । सधूममिति सधूममिव वह्निं नासया वमतीत्यर्थः । सहसा अकस्मात् ॥ ७ ॥ ८ ॥

कफः कफकृते घ्राणाच्छुक्लः शीतः स्रवेन्मुहुः ।
शुक्लावभासः शूनाक्षो भवेद्गुरुशिरोमुखः ॥ ९ ॥
शिरोगलौष्ठतालूनां कण्डूयनमतीव च ॥

कफकृतप्रतिश्यायलिङ्गमाह—कफ इत्यादि । कफकृते प्रतिश्याये कफः स्रवेदिति संबन्धनीयम् ॥ ९ ॥—

भूत्वा भूत्वा प्रतीश्यायो योऽकस्माद्विनिवर्तते ॥१०॥
संपक्वो वाऽप्यपक्वो वा स सर्वप्रभवः स्मृतः ॥
लिङ्गानि.चैव सर्वेषां पीनसानां च सर्वजे ॥ ११ ॥

सान्निपातिकस्य लिङ्गं निर्दिशन्नाह—भूत्वेत्यादि । अकस्मात् कारणं विना । सर्वजे प्रतिश्याये सर्वेषां वातादिजानां प्रतिश्यायानां पीनसानां लिङ्गानि भवन्तीति योज्यम् । सान्निपातिकप्रतिश्यायोऽसाध्यः, विदेहोक्तत्वात् ॥ १० ॥ ११ ॥

---

१ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते।

१ 'सर्वसरत्वात्' इति पा० ।

रक्तजे तु प्रतिश्याये रक्तास्रावः प्रवर्तते ।
ताम्राक्षश्च भवेज्जन्तुरुरोघातप्रपीडितः ॥ १२ ॥
दुर्गन्धोच्छ्वासवदनस्तथा गन्धान्न वेत्ति च ।
मूर्च्छन्ति चात्र कृमयः श्वेताः स्निग्धास्तथाऽणवः ॥
कृमिमूर्धविकारेण समानं चास्य लक्षणम् ।

रक्तजप्रतिश्यायस्य लक्षणमाह—रक्तजे इत्यादि । उरोघातस्तन्त्रान्तरोक्तलक्षणस्तेन प्रकर्षेण पीडितः । तदेव तन्त्रान्तरोक्तलक्षणं दर्शयति,—"उरः क्षतं गुरु स्तब्धं पूतिपूर्णकफोरसः । सकासः सज्वरो ज्ञेय उरोघातः सपीनसः"—इति । मूर्च्छन्ति पतन्ति । अत्र रक्तजप्रतिश्याये । कृमयः सूक्ष्माः । कृमिमूर्धविकारेणेत्यादि । कृमिजस्य शिरोरोगस्य यल्लक्षणं तेन समानमस्य लक्षणमित्यर्थः । केचित् 'मूर्च्छन्ति चात्र कृमयः श्वेताः स्निग्धास्तथाऽणवः' इति पाठं रक्तजप्रतिश्यायलक्षणभिन्नं पठन्ति, व्याख्यानयन्ति च—अत्रेति एषु सर्वेष्वेव प्रतिश्यायेषु ॥ १२ ॥ १३ ॥—

प्रक्लिद्यति पुनर्नासा पुनश्च परिशुष्यति ॥ १४ ॥
मुहुरानह्यते चापि मुहुर्विव्रियते तथा ।
निःश्वासोच्छ्वासदौर्गन्ध्यं तथा गन्धान्न वेत्ति च १५
एवं दुष्टप्रतिश्यायं जानीयात् कृच्छ्रसाधनम् ।

इदानीमेकदोषजेऽपि प्रतिश्याये दुरुपचारतो दोषान्तरप्रकोपाद्दुष्टिंगतस्य लिङ्गमाह—प्रक्लिद्यतीत्यादि ॥ १४ ॥ १५ ॥—

सर्वे एव प्रतिश्याया नरस्याप्रतिकारिणः ॥ १६ ॥
कालेन रोगजनना जायन्ते दुष्टपीनसाः ।
बाधिर्यमान्ध्यमघ्राणं घोरांश्च नयनामयान् ।
कासाग्निसादशोफांश्च वृद्धाः कुर्वन्ति पीनसाः १७

इदानीं सर्वेषामेव प्रतिश्यायानामुपेक्षया मिथ्याहाराचारिणो नरस्य कालान्तरेण रोगान्तरारम्भकत्वं निर्दिशन्नाह—सर्व इत्यादि । सर्वे एव प्रतिश्यायाः कालेन रोगजनना भवन्ति, तथा त एव प्रतिश्यायाः क्रमेण दुष्टपीनसा जायन्ते । के ते रोगा इत्याह—बाधिर्यमित्यादि । वृद्धाः प्रतिश्याया बाधिर्यादीन् कुर्वन्तीति पिण्डार्थः । प्रतिश्यायानां पक्वता 'पक्वं घनं चाप्यवलम्बमानं' इत्यादिना ज्ञेया; एतद्विपर्ययेण चामता । केचिद्वृद्धसुश्रुतोक्तम्,—"अरुचिर्विरसं वक्त्रं नासास्रावो रुजाऽरतिः । शिरोगुरुत्वं क्षवथुर्ज्वरश्चामस्य लक्षणम् ॥ तनुत्वमामलिङ्गानां शिरोनासास्यलाघवम् । घनपीतकफत्वं च पक्वपीनसलक्षणम्"—इति प्रतिश्यायानामामपक्वलक्षणं पठन्ति ॥ १६ ॥ १७ ॥

नवं प्रतिश्यायमपास्य सर्वे-
मुपाचरेत् सर्पिष एव पानैः ।
स्वेदैर्विचित्रैर्वमनैश्च युक्तैः[1]
कालोपपन्नैरवपीडनैश्च ॥ १८ ॥

इदानीं प्रतिश्यायानां सामान्यं चिकित्सितमाह—नवं प्रतिश्यायमित्यादि । अपास्य परित्यज्य । सर्वेषां प्रतिश्यायानां वातात्मकत्वात् सर्वेषामेव सर्पिःपानम् । कालोपपन्नैरावस्थिककालयोग्यैः । अवपीडनैर्नस्यभेदैः । केचिदत्र, 'पीनसानां च सर्वेषां हेतुर्यस्मात् समीरणः । कफपित्ताधिकेऽप्यस्मात् मारुतं समुपक्रमेत् ॥ तस्मादभिष्यन्दमुदीर्यमाणमुपाचरेदादित एव धीमान् । घृतैः सहिङ्ग्वम्लकटूष्णसिद्धैः स्वेदैर्विचित्रैर्वमनैश्च तीक्ष्णैः ॥ कटुत्रिकं चित्रकतिन्तिडीकं तालीशपत्रं चविकाम्लसंज्ञम् । विचूर्णितं जीरकचूर्णयुक्तमेलाच्छदत्वक्सुरभीकृतं च ॥ मिश्रं पुराणेन गुडेन दद्यात्तत् पीनसानां परिपाचनार्थम् । पक्वं गुडं चापि कटुत्रिकेण घृतप्रगाढं प्रलिहेत् सुखोष्णम् ॥ सर्पिर्गुडाभ्यां कटुकैश्च पक्वान् खादेच्च शक्तूनपि नातिशीतान् । गुडाधिकं चार्द्रकमादिशन्ति युक्तोषितं तत् परिपाचनार्थम् ॥ शिरोविरेकं वमनं च केचिदामे न दातव्यमिति ब्रुवन्ति"—इति पठन्ति । स च पाठो जेजटाचार्येण नाङ्गीकृतः ॥ १८ ॥

अपच्यमानस्य हि पाचनार्थं
स्वेदो हितोऽम्लैरहिमं च भोज्यम् ।
निषेव्यमाणं पयसाऽऽर्द्रकं वा
संपाचयेदिक्षुविकारयोगैः ॥ १९ ॥

नवप्रतिश्यायस्य पाकार्थं चिकित्सामाह—अपच्यमानस्येत्यादि । अहिममुष्णं, भोज्यं भोजनम् । अपरमपि पाकार्थं योगमाह—निषेव्यमाणमित्यादि । आर्द्रकं पयसा पाययेदिक्षुविकारयोगैर्वा । इक्षुविकारा गुडादयः । केचित् 'निषेव्यमाणं पयसाऽऽर्द्रकं वा संपाचयेत् तत् कटुकोपयोगैः'—इति पठन्ति, व्याख्यानयन्ति च—दुग्धेन सहार्द्रकरसः पेयः, अन्ये तु दुग्धेन सह नागरचूर्णं पेयमिति मन्यन्ते; कटुकोपयोगैः कटुद्रव्योपयोगैः । अस्याग्रे केचित् 'ग्राम्याणि मांसानि दधीनि मद्यं माषान् कुलत्थान् लवणं कटूनि । अम्लं तथा चामकमूलकं च तथा घनत्वं तरुणः प्रयाति'—इति पठन्ति; सच न पठनीयः, सर्वनिबन्धकारैः परिहृतत्वात् ॥ १९ ॥

पक्वं घनं चाप्यवलम्बमानं
शिरोविरेकैरपकर्षयेत्तम् ।
विरेचनास्थापनधूमपानै-
रवेक्ष्य दोषान् कवलग्रहैश्च ॥ २० ॥

पक्वप्रतिश्यायस्य निबर्हणमाह—पक्वमित्यादि ॥ २० ॥

निवातशय्यासनचेष्टनानि
मूर्ध्नो गुरूष्णं च तथैव वासः ।[2]
तीक्ष्णा विरेकाः शिरसः सधूमा
रूक्षं यवान्नं[3] **विजया च सेव्या ॥ २१ ॥**

पक्वप्रतिश्याये सेव्यमाह—निवातेत्यादि । आसनमुपवेशनं, चेष्टनं क्रीडनम् । मूर्ध्नो मस्तकस्य । वासो वस्त्रम् । विजया हरीतकी ॥ २१ ॥

---

१ 'कृष्णाः' इति पा०

१ 'युक्तोषितं' इति पा० । २ 'तथा(ऽ)तनुत्वं' इति पा० । ३ 'पलान्नं' इति पा० ।

शीताम्बुयोषिच्छिशिरावगाह-
चिन्तातिरूक्षाशनवेगरोधान्।
शोकं च मद्यानि नवानि चैव
विवर्जयेत् पीनसरोगजुष्टः ॥ २२ ॥

सेव्यमुद्दिश्य परिहार्यमाह—शीतेत्यादि ॥ २२ ॥

छर्द्यङ्गसादज्वरगौरवार्त-
मरोचकारत्यतिसारयुक्तम्।
विलङ्घनैः पाचनदीपनीयै-
रुपाचरेत् पीनसिनं यथावत् ॥ २३ ॥

इदानीं सोपद्रवस्य पक्वप्रतिश्यायस्यावस्थिकं चिकित्सासूत्रमाह—छर्दीत्यादि। अरतिर्न क्वचिदवस्थितिश्चेतसः ॥ २३ ॥

बहुद्रवैर्वातकफोपसृष्टं
प्रच्छर्दयेत् पीनसिनं वयःस्थम्।
उपद्रवांश्चापि यथोपदेशं
स्वैर्भेषजैर्भोजनसंविधानैः।
जयेद्विदित्वा मृदुतां गतेषु
प्राग्लक्षणेषूक्तमथादिशेच्च ॥ २४ ॥

पक्वप्रतिश्याये वमनावस्थां निर्दिशन्नाह—बहुद्रवैरित्यादि। वातकफोपसृष्टं पीनसिनं बहुद्रवैर्वामयेदिति पिण्डार्थः। वयःस्थं तरुणम्। वान्ते सति किं कुर्यादित्याह—उपद्रवानित्यादि। यथोपदेशं यथाकथितम्। वक्ष्यमाणचिकित्सायाः कालमुद्दिशन्नाह—मृदुतामित्यादि। मृदुतां गतेष्वल्पीभूतेषु, प्राग्लक्षणेषु आमप्रतिश्यायलक्षणेषु, उक्तं वक्ष्यमाणं 'वातिके तु प्रतिश्याये पिबेत्' इत्यादिकं विधानमित्यर्थः। केचित् 'विदित्वा मृदुतां तु तेषां प्राग्लक्षणानां विधिमादिशेच्च' इति पठन्ति ॥ २४ ॥

वातिके तु प्रतिश्याये पिबेत् सर्पिर्यथाक्रमम्।
पञ्चभिर्लवणैः सिद्धं प्रथमेन गणेन च ॥ २५ ॥
नस्यादिषु विधिं कृत्स्नमवेक्षेतार्दितेरितम्।

वातिकप्रतिश्यायस्य चिकित्सामाह—वातिक इत्यादि। यथाक्रमं स्नेहपानक्रमेणेत्यर्थः। प्रथमो गणो विदारिगन्धादिः। कृत्स्नं समस्तम्। अर्दितेरितं अर्दितचिकित्सितोक्तम् ॥ २५ ॥—

पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः शृतम् ॥ २६ ॥
परिषेकान् प्रदेहांश्च कुर्यादपि च शीतलान्।
श्रीसर्जरसपत्तङ्गप्रियङ्गुमधुशर्कराः ॥ २७ ॥
द्राक्षामधूलिकागोजीश्रीपर्णीमधुकैस्तथा।
युज्यन्ते कवलाश्चात्र विरेको मधुरैरपि ॥ २८ ॥

पित्तरक्तकृतयोः प्रतिश्याययोश्चिकित्सामाह—पित्तरक्तोत्थयोरित्यादि। मधुरकैः काकोल्यादिभिः। केचित् 'पित्तरक्तोत्थयोस्तिक्तैः कषायमधुरैर्घृतम्' इति पठन्ति, व्याख्यानयन्ति च—तिक्तानि पटोलादीनि। परिषेकानित्यादि। प्रदेहाः प्रलेपाः। श्रीरिति श्रीवेष्टकः नवनीतधूपः 'गुग्गुली' इति लोके, सर्जरसो राला, पत्तङ्गं रक्तचन्दनं; मधुलिका गुडूची, मर्कटतृणमपरे, गोजी गोजिह्विका, श्रीपर्णी काश्मरी। कवला गण्डूषभेदाः। अत्रेति पित्तरक्तोत्थयोः प्रतिश्याययोरित्यर्थः। मधुरैर्द्राक्षारग्वधमधुशर्करादिभिः ॥ २६–२८ ॥

धवत्वक्त्रिफलाश्यामातिल्वकैर्मधुकेन च।
श्रीपर्णीरजनीमिश्रैः क्षीरे दशगुणे पचेत् ॥ २९ ॥
तैलं कालोपपन्नं तन्नस्यं स्यादनयोर्हितम्।

पित्तरक्तकृतयोः प्रतिश्याययोर्नस्यार्थं तैलमाह—धवेत्यादि। धवत्वगादिकल्कैस्तैलचतुर्थांशैर्दशगुणे क्षीरे तैलं पचनीयम्। श्यामा त्रिवृत्, तिल्वकः पट्टिकारोध्रः। कालोपपन्नं निरामताकालयोग्यम्। अनयोः पित्तरक्तोत्थयोः प्रतिश्याययोः ॥ २९ ॥—

कफजे सर्पिषा स्निग्धं तिलमाषविपक्वया ॥ ३० ॥
यवाग्वा वामयेद्वान्तः कफघ्नं क्रममाचरेत्।
उभे बले बृहत्यौ च विडङ्गं सत्रिकण्टकम् ॥ ३१ ॥
श्वेतामूलं सदाभद्रां[1] वर्षाभूं चात्र संहरेत्।
तैलमेभिर्विपक्वं तु नस्यमस्योपकल्पयेत् ॥ ३२ ॥
सरलाकिणिहीदारुनिकुम्भेङ्गुदिभिः कृताः।
वर्तयश्चोपयोज्याः स्युर्धूमपाने यथाविधि ॥ ३३ ॥

कफजप्रतिश्यायचिकित्सामाह—कफजे इत्यादि। तिलमाषविपक्वया यवाग्वा कृसरया वामनीयद्रव्यसिद्धया वामयेत्। वान्तश्च कफघ्नं क्रममन्नसंसर्जनाख्यमाचरेत्। उभे इत्यादि। द्विबलादिभिः कल्कीकृतैस्तैलं सिद्धं नस्ये हितम्। त्रिकण्टको गोक्षुरकः। श्वेता श्वेतस्यन्दः। सदाभद्रा काश्मरी। सरलेत्यादि। सरला त्रिवृत्, किणिही कटभी, दारु देवदारु, निकुम्भा दन्ती ॥ ३०–३३ ॥

सर्पींषि कटुतिक्तानि तीक्ष्णधूमाः कटूनि च।
भेषजान्युपयुक्तानि हन्युः सर्वप्रकोपजम् ॥ ३४ ॥
रसाञ्जने सातिविषे मुस्तायां भद्रदारुणि।
तैलं विपक्वं नस्यार्थं विदध्याच्चात्र बुद्धिमान् ॥ ३५ ॥

सान्निपातिकप्रतिश्यायचिकित्सामाह—सर्पींषीत्यादि। सर्पींषि घृतानि। कटुतिक्तानि कटुतिक्तद्रव्यसिद्धानीत्यर्थः। कटूनि चेति चकारेण प्रत्येकवातादियुक्ता क्रियाऽप्युक्ता समुच्चीयते। रसाञ्जने इत्यादि। अत्रेति सान्निपातिकप्रतिश्याये इत्यर्थः ॥ ३४ ॥ ३५ ॥

मुस्ता तेजोवती पाठा कट्फलं कटुका वचा।
सर्षपाः पिप्पलीमूलं पिप्पल्यः सैन्धवाग्निकौ ॥ ३६ ॥
तुत्थं करञ्जबीजं च लवणं भद्रदारु च।
एतैः कृतं कषायं तु कवले संप्रयोजयेत् ॥ ३७ ॥
हितं मूर्धविरेके च तैलमेभिर्विपाचितम्।

मुस्तेत्यादि। तेजोवती काकमर्दनिका, अग्निकोऽजमोदा। मुस्तादिभिः कृतः कषायः सान्निपातिके प्रतिश्याये हितः; सर्वेषु प्रतिश्यायेषु हित इत्यन्ये ॥ ३६ ॥ ३७ ॥—

क्षीरमर्धजले क्वाथ्यं जाङ्गलैर्मृगपक्षिभिः ॥ ३८ ॥

[1] 'सहां भद्रां' इति पा०।

पुष्पैर्विमिश्रं जलजैर्वातघ्नैरौषधैरपि ।
हिमे क्षीरावशिष्टेऽस्मिन् घृतमुत्पाद्य यत्नतः ॥३९॥
सर्वगन्धसितानन्तामधुकं चन्दनं तथा ।
आवाप्य विपचेद्भूयो दशक्षीरं तु तद्घृतम् ॥ ४० ॥
नस्ये प्रयुक्तमुद्रिक्तान् प्रतिश्यायान् व्यपोहति ।
यथास्वं दोषशमनैस्तैलं कुर्याच्च यत्नतः ॥ ४१ ॥

क्षीरमित्यादि । क्षीरं जाङ्गलमांसादिभ्योऽष्टगुणं, अर्धजले क्षीरादर्धं जलं, जाङ्गलैर्मृगपक्षिभिः एणादिभिर्लावादिभिश्च, जलजैः पुष्पैः नीलोत्पलादिभिः, वातघ्नैः विदारीगन्धादिभिः, घृतमुत्पाद्य 'तद्दुग्धं मथित्वा' इति वाक्यशेषः । सर्वगन्धा एलादिपरिपठिताः । सिता शर्करा, अनन्ता उत्पलसारिवा, चन्दनं रक्तचन्दनं, आवाप्य प्रक्षिप्य । तद्घृतं क्षीरमथनाद्युत्पन्नं घृतं, प्रतिश्यायान् सर्वानपोहति स्फोटयति । दोषशमनैर्वातपित्तश्लेष्महरद्रव्यगणैः । यथास्वं यथात्मीयम् । इदमेव तैलं सर्वेषामेव प्रतिश्यायानाम् ॥ ३८–४१ ॥

समूत्रपित्ताश्चोद्दिष्टाः क्रियाः कृमिषु योजयेत् ।
यापनार्थं कृमिघ्नानि भेषजानि च बुद्धिमान् ॥४२॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे प्रतिश्यायप्रतिषेधो नाम चतुर्विंशतितमोऽध्यायः ॥ २४ ॥

रक्तप्रतिश्याये कृमिसंभवो दर्शितः, अतस्तेषामेव कृमीणां यापनार्थं चिकित्सामाह—समूत्रेत्यादि । कृमिघ्ना याः क्रिया उद्दिष्टास्ता गोमूत्रपित्तयुक्ता यापनार्थं कर्तव्याः; तथा कृमिघ्नानि भेषजानि सुरसादीनि च कर्तव्यानि । बुद्धिमानूहापोहवान् वैद्यः । ये तु सर्वेषामेव प्रतिश्यायानां कृमिसंभवत्वं मन्यन्ते तेऽमुं श्लोकमीदृशं व्याख्यानयन्ति—प्रत्येकं वातादिप्रतिश्याये याः क्रिया उद्दिष्टास्ता एव गोमूत्रपित्तयुक्ता यथास्वं कृमिषु योजयेत् ॥ ४२ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशतितमोऽध्यायः ।

अथातः शिरोरोगविज्ञानीयमध्यायं व्याख्यास्यामः॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥
शिरो रुजति मर्त्यानां वातपित्तकफैस्त्रिभिः ॥
सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥ ३ ॥
सूर्यावर्तानन्तवातार्धावभेदकशङ्खकैः ॥
एकादशप्रकारस्यं लक्षणं संप्रवक्ष्यते ॥ ४ ॥

तानेव शिरोरोगान् संख्यया आह—शिरो रुजतीत्यादि । त्रिभिरिति पृथगर्थद्योतनार्थम् । 'शिरो रुजति मर्त्यानाम्' इत्यत्र केचित् 'शिरोरोगा मनुष्याणाम्' इति पठन्ति । रोगशब्दो यद्यपि सामान्यव्याधिवाचकस्तथाऽपि ये पीडाकरा व्याधयस्तेऽत्र गृह्यन्ते, तेन खालित्यादीनामत्रानुपादानमिति व्याख्यानयन्ति । एकादशप्रकारस्येत्यादि । एकादशैवात्र शिरोरोगाः । अन्यतोवातशब्देन अनन्तवातस्य सर्वगतनयनरोगविज्ञानीये प्रोक्तत्वात् । ब्रह्मदेवस्तु विदेहादिषु अनन्तवातस्य पृथक् पाठात् पृथगेवात्र पठनीयः, तेन चैकादश शिरोरोगा इति ब्रूते । अत्र केचिद्विदेहदर्शनात् सूर्यावर्तकविपर्ययमपि पठन्ति । तथाच तद्वचः,—"तत्र वातानुगं पित्तं चितं शिरसि तिष्ठति । मध्याह्ने तेजसाऽर्कस्य तद्विवृद्धं शिरोरुजम् ॥ करोति पैत्तिकीं घोरां संशाम्यति दिनक्षये । अस्तं गते प्रभाहीने सूर्ये वायुर्विवर्धते ॥ पित्तं शान्तिमवाप्नोति ततः शाम्यति वेदना । एष पित्तानिलकृतः सूर्यावर्तविपर्ययः"—इति । केचित्सुश्रुताध्यायिनोऽनेन पाठेन सूर्यावर्तकविपर्ययं पठन्ति,—"वातपित्तात् पुरोजाता रुजाऽपैत्यपराह्णतः । सूर्यावर्तः स तु प्रोक्तो विपरीते विपर्ययः" –इति । असौ सूर्यावर्तविपर्ययश्चातुर्थिकविपर्ययवदसूत्रितोऽपि गृह्यते । अत्र केचित् "आलुड्यते कम्पति चापि मूर्धा सर्पन्ति मध्ये च पिपीलिका वा । स्कन्धः शिरश्चाप्यवघूर्णते च मूर्च्छा प्रलापश्च तथैव निद्रा ॥ संज्ञाप्रणाशं जनयेद्विनिद्रां प्रातस्ततः पश्यति चातिचित्रम् । गृह्णाति मन्ये हृदयं च रूपैः सर्वैरमीभिः समभिद्रुतस्तु ॥ तिस्रो हि रात्रीर्न स जातु जीवेत्तं शीर्षकं संप्रवदन्ति रोगम्"—इति पठन्ति । स च निबन्धकारैर्नाङ्गीकृतः ॥ १–४ ॥

यस्यानिमित्तं शिरसो रुजश्च
भवन्ति तीव्रा निशि चातिमात्रम् ।
बन्धोपतापैश्च भवेद्विशेषः
शिरोऽभितापः स समीरणेन ॥ ५ ॥

इदानीं वातिकशिरोरोगलक्षणमाह—यस्येत्यादि । अनिमित्तमीषत्कारणम् । तीव्रवचनात् पित्ते मध्याः रुजो, मन्दाः कफे इति बुध्यते । विशेष उपशमः । शिरोभितापः शिरोरोगः ॥५॥

यस्योष्णमङ्गारचितं यथैव
दह्येत धूप्येत शिरोऽक्षिनासम् ।
शीतेन रात्रौ च भवेद्विशेषः
शिरोऽभितापः स तु पित्तकोपात् ॥ ६ ॥

पैत्तिकशिरोरोगलक्षणमाह—यस्येत्यादि ॥ ६ ॥

शिरोगलं यस्य कफोपदिग्धं
गुरु प्रतिष्टब्धमथो हिमं च ।
शूनाक्षिकूटं वदनं च यस्य
शिरोभितापः स कफप्रकोपात् ॥ ७ ॥

कफजशिरोरोगलक्षणमाह—शिरोगलमित्यादि । उपदिग्धमुपलिप्तं, गुरु भारिकं, प्रतिष्टब्धमप्रचलितरूपमिव, हिमं शीतपूर्णमिव । शिरोभितापः शिरोरोगः । अत्रानुक्तोऽपि विपर्ययसे-

---

१ 'सर्वगन्धाः सिताऽनन्तामधुकं' इति पा० । २ 'सूर्यावर्तावभेदाभ्यां शङ्खकेन तथैव । दशप्रकारस्याप्यस्य' इति पा० । डल्हणव्याख्यानमप्येतपाठान्तरानुसारेणैव ज्ञेयम् ।

१ 'भवेच्छिरो धूमवती च नासा' इति पा० ।

वयोपशमो गृह्यते । 'शिरोगलं' इत्यत्र 'शिरोभवं' इति केचित् पठन्ति ॥ ७ ॥

शिरोऽभितापे त्रितयप्रवृत्ते
सर्वाणि लिङ्गानि समुद्भवन्ति ।

सान्निपातिकशिरोगलक्षणमाह—शिरोऽभितापे इत्यादि ॥

रक्तात्मकः पित्तसमानलिङ्गः
स्पर्शासहत्वं शिरसो भवेच्च ॥ ८ ॥

रक्तजशिरोरोगलक्षणमाह—रक्तात्मक इत्यादि । पित्तजशिरोरोगाद्रक्तजे स्पर्शासहत्वमधिकम् ॥ ८ ॥

वसावलासक्षतसंभवानां
शिरोगतानामिह संक्षयेण ।
क्षयप्रवृत्तः शिरसोऽभितापः
कष्टो भवेदुग्ररुजोऽतिमात्रम् ॥ ९ ॥
संस्वेदनच्छर्दनधूमनस्यै-
रसृग्विमोक्षैश्च विवृद्धिमेति ।

क्षयजशिरोरोगस्य लिङ्गमाह—वसेत्यादि । वसाशब्द उपलक्षणार्थः; तेन देहस्नेहमस्तिष्कमेदोमज्जाशुक्राणि गृह्यन्ते । 'वसावलासक्षतसंभवानां' इत्यत्र केचित् 'असृग्वसाश्लेष्मसमीरणानां' इति पठन्ति; तन्नेच्छति गयी ॥ ९ ॥—

निस्तुद्यते यस्य शिरोऽतिमात्रं
संभक्ष्यमाणं स्फुटतीव चान्तः ॥ १० ॥
घ्राणाच्च गच्छेत्सलिलं सरक्तं
शिरोभितापः कृमिभिः स घोरः ।

कृमिकृतशिरोरोगलक्षणमाह—निस्तुद्यते इत्यादि । निस्तुद्यते शूल्यते व्यथ्यत इत्यर्थः । स्फुटतीव शीर्यत इव ॥ १० ॥—

सूर्योदयं या प्रति मन्दमन्द-
मक्षिभ्रुवं रुक् समुपैति गाढम् ॥ ११ ॥
विवर्धते चांशुमता सहैव
सूर्यापवृत्तौ विनिवर्तते च ।
शीतेन शान्तिं लभते कदाचि-
दुष्णेन जन्तुः सुखमाप्नुयाच्च ॥ १२ ॥
तं भास्करावर्तमुदाहरन्ति
सर्वात्मकं कष्टतमं विकारम् ।

सूर्यावर्तमाह—सूर्योदयमित्यादि । सूर्यापवृत्तौ सूर्यास्तसमये । कस्मात्प्रवृत्तिनिवृत्ती भवत इति प्रतिपादयन्निमिराह,—"खभावशीता तमसोभिमूला रात्रिस्त्वयोद्धूतकफेन मार्गे । रुद्धे मरुत्कोपमियात् प्रभाते रुजं करोत्यत्र शिरोभितापे ॥ मध्याह्नसूर्यातपतापयोगात् कफे विलीने मरुति प्रपन्ने । खमार्गमायाति तदा दिनान्ते प्रशान्तिमावर्त इहार्कपूर्वे" इति । सूर्यातपविलीनमस्तुलुङ्गकारणोत्पन्नसूर्यावर्त इति दृढबलाचार्यः । उष्णेन जन्तुः सुखमाप्नुयाच्चेति पाठात्सूर्यावर्तविपर्ययः कथितो बोद्धव्यः । केचिदत्र 'आवर्तसंज्ञः स च सूर्यपूर्वो व्याधिर्मतः पित्तसमीरणाभ्याम्' इति पठन्ति ॥ ११ ॥ १२ ॥—

दोषास्तु दुष्टास्त्रय एव मन्यां
संपीड्य घाटासु रुजां सुतीव्राम् ॥ १३ ॥
कुर्वन्ति साक्षिभ्रुवि शङ्खदेशे
स्थितिं करोत्याशु विशेषतस्तु ।
गण्डस्य पार्श्वे तु करोति कम्पं
हनुग्रहं लोचनजांश्च रोगान् ॥ १४ ॥
अनन्तवातं तमुदाहरन्ति
दोषत्रयोत्थं शिरसो विकारम् ।

अनन्तवातमाह—दोषास्तु दुष्टास्त्रय इत्यादि । सात्यकिप्रभृतिभिस्तु शिरःकम्परोगोऽसाध्यः पठितः; अस्मिंस्तु शास्त्रे सान्निपातिकशिरोरोगोऽनन्तवात एवान्तर्भवति ॥ १३ ॥ १४ ॥—

यस्योत्तमाङ्गार्धमतीव जन्तोः
संभेदतोदभ्रमशूलजुष्टम् ॥ १५ ॥
पक्षाद्दशाहादथवाऽप्यकस्मा-
त्तस्यार्धभेदं त्रितयाद्व्यवस्येत् ।

अर्धावभेदमाह—यस्योत्तमेत्यादि । 'तस्यार्धभेदं पवनात् सपित्तात्' इति केचित् 'त्रितयाद्व्यवस्येत्' इत्यत्र 'द्वितयात्' इति वा पाठः ॥ १५ ॥—

शङ्खाश्रितो वायुरुदीर्णवेगः
कृतानुयात्रः कफपित्तरक्तैः ॥ १६ ॥
रुजः सुतीव्राः प्रतनोति मूर्ध्नि
विशेषतश्चापि हि शङ्खयोस्तु ।
सुकष्टमेनं खलु शङ्खकाख्यं
महर्षयो वेदविदः पुराणाः ॥ १७ ॥
व्याधिं वदन्त्युद्गतमृत्युकल्पं
भिषक्सहस्रैरपि दुर्निवारम् ॥ १८ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे शिरोरोगविज्ञानीयो नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

शङ्खकलक्षणमाह—शङ्खाश्रित इत्यादि । कृतानुयात्रः कृतानुगमः । उद्गतमृत्युकल्पः उपस्थितमृत्युसमः । एष व्याधिस्तु त्र्यहान्मारयति, त्र्यहादनन्तरं कुशलेनोपक्रान्तः सिध्यति ॥ १६-१८ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे पञ्चविंशोऽध्यायः ॥ २५ ॥

---

१ 'मुहुर्भवन्ति' इति पा० । २ 'स्फुरतीव चान्तः' इति पा० ।

षड्विंशतितमोऽध्यायः ।

अथातः शिरोरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥
वातव्याधिविधिः कार्यः शिरोरोगेऽनिलात्मके ॥
पयोनुपानं सेवेत घृतं तैलमथापि वा ॥ ३ ॥

वातव्याधिविधिरिति समस्तो वातव्याधिविधिर्बाह्य आभ्यन्तरोऽपि कर्तव्यः; तत्र बाह्यः स्नेहस्वेदाभ्यङ्गपरिषेकोपनाहशिरोबस्तिनस्यादिः, आभ्यन्तरस्तु स्नेहपानानुवासननिरूहादिः । पयोनुपानमिति वातस्य पित्तानुबन्धस्य घृतं, कफानुबन्धस्य तैलम् । यद्यपि वातव्याधिचिकित्सितातिदेशेनैव घृततैलयोः पानं प्राप्तं, तथाऽपि नियमार्थमेतद्वचनं; अथवा पयोनुपानप्राप्त्यर्थं; अथवा स्नेहादिप्रयोगपरिसमाप्तौ प्रायोगिकमेतद्विधानम् ॥ १-३ ॥

मुद्गान् कुलत्थान्माषांश्च खादेच्च निशि केवलान् ॥
कदूष्णांश्च ससर्पिष्कानुष्णं चानु पयः पिबेत् ॥४॥
पिबेद्वा पयसा तैलं तत्कल्कं वाऽपि मानवः ॥

मुद्गानित्यादि । मुद्गानां वातकरत्वेऽपि माषाणां श्लेष्मकरत्वेऽपि व्याधिप्रत्यनीकत्वाद्योगशक्तेरचिन्त्यत्वाच्चोपयोगः । कदूष्णानिति कदूष्णद्रव्यसंस्कृतान्, ससर्पिष्कान् सघृतान् । तैलं तिलतैलम् । तत्कल्कं मुद्गादिकल्कं; अन्ये तिलकल्कमाहुः, तन्नेच्छति गयी जेज्जटश्च ॥ ४ ॥—

वातघ्नसिद्धैः क्षीरैश्च सुखोष्णैः सेकमाचरेत् ॥ ५ ॥
तत्सिद्धैः पायसैर्वाऽपि सुखोष्णैर्लेपयेच्छिरः ॥
स्विन्नैर्वा मत्स्यपिशितैः कृशरैर्वा ससैन्धवैः ॥ ६ ॥
चन्दनोत्पलकुष्ठैर्वा सुश्लक्ष्णैर्सगधायुतैः ॥
स्निग्धस्य तैलं नस्यं स्यात् कुलीररससाधितम् ॥७॥
वरुणादौ गणे क्षुण्णे क्षीरमर्धोदकं पचेत् ॥
क्षीरशेषं च तन्मथ्यं शीतं सारमुपाहरेत् ॥ ८ ॥
ततो मधुरकैः सिद्धं नस्ये तत् पूजितं हविः ॥
तस्मिन् विपक्वे क्षीरे तु पेयं सर्पिः सशर्करम् ॥ ९ ॥
धूमं चास्य यथाकालं स्नैहिकं योजयेद्भिषक् ॥

आभ्यन्तरविधिं प्रतिपाद्य बाह्यविधिमाह—वातघ्नसिद्धैरित्यादि । वातघ्नानि भद्रदार्वादीनि । सेको धारासेकः । तत्सिद्धैः पायसैः वातहरद्रव्यसिद्धगोक्षीरपायसैरित्यर्थः । लेपयेदुपनाहयेत् । स्विन्नैर्वा मत्स्यपिशितैरिति मत्स्यमांसैः स्विन्नैर्वा शिरस्युपनाहः । कृशरैर्वेति तिलतण्डुलमाषकृतयवागूवोपनाहः; कृशरशब्दोऽकारान्तोऽप्यस्ति । चन्दनादिभिर्वा श्लक्ष्णपिष्टैरुपनाहः । स्निग्धस्येत्यादि । स्निग्धस्य कुलीररसचतुर्गुणे साधितं तैलं नस्यं स्यादिति पिण्डार्थः । वरुणादावित्यादि । क्षुण्णे जर्जरीकृते । तस्मिन् विपक्वे क्षीरे त्विति वरुणादिगणसिद्धे क्षीरे चतुर्गुणे साधितं काकोल्यादिप्रतिवापं यत् सर्पिस्तच्छर्कराप्रक्षेपं पेयमिति तात्पर्यार्थः । अन्ये तु 'तस्मिन् विपक्वं क्षीरे च' इति पठन्ति; तस्मिन् वरुणादिक्वाथे क्षीरे च साधितं सर्पिः सशर्करं पिबेदिति च व्याख्यानयन्ति । धूमं चास्येत्यादि । यथाकालं यथावस्थं, मधूच्छिष्टप्रभृतिभिः स्नेहमिश्रैः कृतो धूमः स्नैहिकः ॥५-९॥—

पानाभ्यञ्जननस्येषु वस्तिकर्मणि सेचने ॥ १० ॥
विदध्यात्त्रैवृतं धीमान् बलातैलमथापि वा ॥

पानाभ्यञ्जनेत्यादि । त्रैवृतमपतानकचिकित्सितोक्तं, बलातैलं मूढगर्भचिकित्सितोक्तम् ॥ १० ॥—

भोजयेच्च रसैः स्निग्धैः पयोभिर्वा सुसंस्कृतैः ॥११॥

भोजयेदित्यादि । रसैः मांसरसैः । सुसंस्कृतैर्वातहरद्रव्यसाधितैः ॥ ११ ॥

पित्तरक्तसमुत्थानौ शिरोरोगौ निवारयेत् ॥
शिरोलेपैः ससर्पिष्कैः परिषेकैश्च शीतलैः ॥ १२ ॥
क्षीरेक्षुरसधान्याम्लमस्तुक्षौद्रसिताजलैः ॥

इदानीं पित्तजरक्तजयोस्तुल्यचिकित्सितत्वात् संक्षेपार्थमुभयोरेकं चिकित्सितमाह—पित्तरक्तेत्यादि । शिरोलेपैर्मधुरकादिद्रव्यकृतैः, परिषेकैश्च शीतलैः क्षीरेक्षुरसादिकृतैः । तान्येव परिषेकद्रव्याण्याह—क्षीरेक्ष्वित्यादि । सिताजलं शर्करोदकम् ॥ १२ ॥—

नलवञ्जुलकह्लारचन्दनोत्पलपद्मकैः ॥ १३ ॥
वंशशैवलयष्ट्याह्वमुस्ताम्भोरुहसंयुतैः ॥
शिरःप्रलेपैः सघृतैर्वैसर्पैश्च तथाविधैः ॥ १४ ॥
मधुरैश्च मुखालेपैर्नस्यकर्मभिरेव च ॥

शिरोलेपद्रव्याण्याह—नलेत्यादि । नलः शुषिरपर्वा स्वनामख्यातः, वञ्जुलो वेतसः, कह्लारं रक्तोत्पलं, चन्दनं रक्तचन्दनं, उत्पलं नीलोत्पलं, शैवलं दूर्वा, अम्भोरुहं पद्मम् । वैसर्पैश्च तथाविधैरिति विसर्पचिकित्सितोक्तैः प्रलेपैः; तानि तु उशीरलामज्जकचन्दनस्रोतोजमुक्तामणिगैरिकाणि । तथाविधैरिति वचनाद्रक्तपित्तविसर्पप्रलेपप्रकारैर्न तु कफवातविसर्पलेपद्रव्यप्रकारैरित्यर्थः । मधुरैः काकोल्यादिभिः । नस्यमत्र मधुरद्रव्यसंस्कृतेन स्नेहेन कृतम् । पित्तरक्तसमुत्थानौ शिरोरोगौ निवारयेदित्यत्रापि संबन्धनीयम् ॥ १३ ॥ १४ ॥—

आस्थापनैर्विरेकैश्च पथ्यैश्च स्नेहवस्तिभिः ॥ १५ ॥
क्षीरसर्पिर्हितं नस्यं वसा वा जाङ्गला शुभा ॥

इदानीं रक्तजे पित्तजे च शिरोरोगे वमनं विहाय कर्मचतुष्टयं निर्दिशन्नाह—आस्थापनैरित्यादि । आस्थापनादिभिः पित्तरक्तसमुत्थितौ शिरोरोगौ निवारयेदिति संबन्धः । पथ्यशब्द आस्थापनादिभिस्त्रिभिः संबन्धनीयः । पथ्यैर्हितैः । तेन वक्ष्यमाणोत्पलादिनाऽऽस्थापनं विरेचनं च मधुरद्रव्यकृतं, स्नेहबस्तयस्तु मधुरकन्दक्षीरघृतादिकृताः । क्षीरसर्पिरत्र मथ्यमानक्षीरोत्पन्ननवनीतजातम् ॥ १५ ॥—

---

१ 'कदूष्णान् समसर्पिष्कान्' इति पा० । २-३-४ 'स्निग्धैः' इति पा० ।

१ 'शङ्खशैवलयष्ट्याह्व०' इति पा० ।

उत्पलादिविपक्वेन क्षीरेणास्थापनं हितम् ॥ १६ ॥
भोजनं जाङ्गलरसैः सर्पिषा चानुवासनम् ॥
मधुरैः क्षीरसर्पिस्तु स्नेहने च सशर्करम् ॥ १७ ॥

आस्थापनोपयोगिद्रव्याण्याह—उत्पलेत्यादि। सर्पिषा चानुवासनमित्युक्तं तदेव निर्दिशन्नाह—मधुरैरित्यादि। मधुरैः काकोल्यादिभिः, पक्वमिति शेषः। क्षीरसर्पिः क्षीरमथनादुत्थितं, स्नेहने स्नेहवस्तौ, सशर्करं सितशर्कराचूर्णप्रक्षेपम्। अन्ये तु 'मधुरैः क्षीरसर्पिस्तु पक्वं पाने सशर्करम्' इति पठन्ति, तन्नेच्छति गयी ॥ १६ ॥ १७ ॥

पित्तरक्तघ्नमुद्दिष्टं यच्चान्यदपि तद्धितम् ॥

इदानीं संक्षेपार्थमतिदेशेनापरमपि चिकित्सितमाह—पित्तरक्तघ्नमित्यादि। अन्यदपि पानालेपनस्यादि रक्तपित्तघ्नं यदुद्दिष्टं तदत्रापि हितमिति पिण्डार्थः ॥—

कफोत्थितं शिरोरोगं जयेत् कफनिवारणैः ॥ १८ ॥
शिरोविरेकैर्वमनैस्तीक्ष्णैर्गण्डूषधारणैः ॥
अच्छं च पाययेत्सर्पिः स्वेदयेच्चाप्यभीक्ष्णशः ॥१९॥
शिरो मधूकसारेण स्निग्धं चापि विरेचयेत् ॥
इङ्गुदस्य त्वचा वाऽपि मेषशृङ्गस्य वा भिषक् ॥२०॥

इदानीं कफजशिरोरोगचिकित्सामाह—कफोत्थितमित्यादि। कफोत्थितं शिरोरोगं कफनिवारणैर्जयेदिति संबन्धः; तानि च कफनिवारणानि शिरोविरेचनादीनि। अच्छं चेति अच्छं केवलं, वमननिर्जितकफस्य प्रकुपितवातविजयार्थं सर्पिःपानं, अथवा सर्पिःपानं वमनस्य प्राक्कर्म। अभीक्ष्णशः पुनः पुनः ॥ १८–२० ॥

आभ्यामेव कृतां वर्तिं धूमपाने प्रयोजयेत् ॥
घ्रेयं कट्फलचूर्णं च कवलाश्च कफापहाः ॥ २१ ॥
सरलाकुष्ठशार्ङ्गेष्टादेवकाष्ठैः सरोहिषैः ॥
क्षारपिष्टैः सलवणैः सुखोष्णैर्लेपयेच्छिरः ॥ २२ ॥

शिरोविरेचनावशेषितकफस्योपशमनार्थं धूममाह—आभ्यामित्यादि। आभ्यामिङ्गुदीमेषशृङ्गीत्वग्भ्याम्। कट्फलचूर्णं घ्रेयं घ्रातव्यं, प्रधमनविशेषोऽयम्। कफापहाः कफहरद्रव्यकृताः। सरलेत्यादि। क्षारपिष्टैः क्षारोदकपिष्टैः, सलवणैरीषल्लवणैः ॥ २१ ॥ २२ ॥

यवषष्टिकयोश्चान्नं व्योषक्षारसमायुतम् ॥
पटोलमुद्गकौलत्थैर्मात्रावद्भोजयेद्रसैः ॥ २३ ॥

आहारमाह—यवेत्यादि। व्योषं त्रिकटुकं, क्षारो यवाक्षरः, यवषष्टिकयोश्चान्नं त्रिकटुकेन कटूकृतं, यवक्षारेण लवणितं, पटोलादीनां यूषैः सह मात्रावद्भोजयेदिति संबन्धः ॥ २३ ॥

शिरोरोगे त्रिदोषोत्थे त्रिदोषघ्नो विधिर्हितः ॥

अधुना त्रिदोषजशिरोरोगस्य सामान्यां चिकित्सामाह—शिरोरोगे इत्यादि। त्रिदोषघ्नो विधिरनन्तरोक्तवातादिजशिरोरोगघ्नो विधिः ॥—

सर्पिःपानं विशेषेण पुराणं वा दिशन्ति हि ॥ २४ ॥

सामान्यचिकित्सितमभिधाय विशेषचिकित्सितमाह—सर्पिःपानमिति। अत्र निबन्धकारैर्बहूक्तं, तच्च विस्तरभयान्न लिखितम् ॥ २४ ॥

क्षयजे क्षयमासाद्य कर्तव्यो बृंहणो विधिः ॥
पाने नस्ये च सर्पिः स्याद्वातघ्नमधुरैः शृतम् ॥२५॥
क्षयकासापहं चात्र सर्पिः पथ्यतमं विदुः ॥

क्षयजचिकित्सामाह—क्षयज इत्यादि। क्षयमासाद्य रक्तादिक्षयेष्वन्यतमं क्षयमवधार्य, शोणितादिक्रियानतिक्रमेण चिकित्सितमित्यर्थः; अन्ये तु क्षयार्थं शोषप्रतिषेधमध्यायमासाद्य यो बृंहणो विधिराहारौषधाख्यः स कार्यः। पाने नस्ये चेत्यत्र चकारो भिन्नक्रमे सर्पिश्चेत्यत्र द्रष्टव्यः, तेन तैलमपि मधुरद्रव्यसंस्कृतं समुच्चीयते। क्षयकासापहं सर्पिः "कुलीरशुक्तिचटकैणलावान् निष्क्वाथ्य वर्गं मधुरं च कृत्स्नम्" इत्यादिना प्रोक्तम् ॥ २५ ॥—

कृमिभिर्भक्ष्यमाणस्य वक्ष्यते शिरसः क्रिया ॥२६॥
नस्ये हि शोणितं दद्यात्तेन मूर्च्छन्ति जन्तवः ॥
मत्ताः शोणितगन्धेन समायान्ति यतस्ततः ॥२७॥

इदानीं क्रिमिजशिरोरोगावसरे सुदूरविस्तृतबहुक्रिमीणामुत्क्लेशनेनाहरणोपायमुद्दिशन्नाह—कृमिभिरित्यादि। क्रिमिभिर्भक्ष्यमाणस्येव, भक्षितस्य दुःशक्यत्वात्; शिरसः क्रिया वक्ष्यते इति संबन्धः। शोणितनस्यं कृमीणामुत्क्लेशनार्थं, स्रोतोमुखगमनार्थं च। मूर्च्छन्ति मूर्च्छिता भवन्ति मदयुक्ता भवन्ति। समायान्ति समागच्छन्ति। यतस्ततो नासास्रोतःप्रभृतिभिः तत्र चागतानां कृमीणां कूर्चकादिभिर्निर्हरणं कर्तव्यम् ॥२६॥२७॥

तेषां निर्हरणं कार्यं ततो मूर्धविरेचनैः ॥
ह्रस्वशिग्रुकबीजैर्वा कांस्यनीलीसमायुतैः ॥ २८ ॥
कृमिघ्नैरवपीडैश्च मूत्रपिष्टैरुपाचरेत् ॥
पूतिमत्स्ययुतान् धूमान् कृमिघ्नांश्च प्रयोजयेत् २९

इदानीं कूर्चकादिभिरगम्यानां क्रिमीणां निर्हरणार्थं चिकित्सितमाह—तेषामित्यादि। मूर्धविरेचनैर्विडङ्गमरिचापामार्गशिग्रुबीजादिभिः; गयी तु वक्ष्यमाणानि ह्रस्वशिग्रुकबीजानि शिरोविरेचनद्रव्याणि मन्यते। ह्रस्वशिग्रुकबीजैरित्यादि। कृमिघ्नैर्विडङ्गादिभिः ॥ २८ ॥ २९ ॥

भोजनानि कृमिघ्नानि पानानि विविधानि च ॥

आहारमाह—भोजनानीत्यादि। क्रिमिघ्नानि कृमिप्रतिषेधपठितानि धान्याम्लप्रभृतीनि सुरसादिसंस्कृतानि ॥—

सूर्यावर्ते विधातव्यं नस्यकर्मादिभेषजम् ॥ ३० ॥

सूर्यावर्तकचिकित्सामाह—सूर्यावर्ते इत्यादि। नस्यकर्मादीत्यादिशब्दाल्लेपपरिषेककवलग्रहशिरोवस्त्यादयः। अन्ये तु

१ 'मेषशृङ्ग्या च' इति पा०। २ 'अत्र क्षारः पानीयः' इति पा०।

नस्यकर्म आदौ यस्य तन्नस्यकर्मादि, तच्च वमनं विहाय विरेकादिकर्मचतुष्टयम् । ये तु सूर्यावर्तविपर्ययं पठन्ति तत्रापीदमेव चिकित्सितम् ॥ ३० ॥

भोजनं जाङ्गलप्रायं क्षीरान्नविकृतिर्घृतम् ॥

आहारं नियमयन्नाह—भोजनेत्यादि ॥—

तथाऽर्धभेदके व्याधौ प्राप्तमन्यच्च यद्भवेत् ॥ ३१ ॥
शिरीषमूलकफलैरवपीडोऽनयोर्हितः ॥
वंशमूलककर्पूरैरवपीडं प्रयोजयेत् ॥ ३२ ॥
अवपीडो हितश्चात्र वचामागधिकायुतः ॥
मधुकेनावपीडो वा मधुना सह संयुतः ॥ ३३ ॥
मनःशिलावपीडो वा मधुना चन्दनेन वा ॥

अर्धावभेदकचिकित्सितमाह—तथाऽर्धभेदके इत्यादि । न केवलं सूर्यावर्ते नस्यकर्मादिभेषजं जाङ्गलप्रायं भोजनं क्षीरान्नविकृतिर्घृतं प्रयोजयेत् तथाऽर्धावभेदकेऽपि । प्राप्तमन्यच्च यद्भवेदिति अन्यदपि स्नेहसिराव्यधावपीडकर्णशूलोक्तदीपिकातैलादि यत् प्राप्तं युक्तं भवेत् तत् कर्तव्यम् । गयी तु अन्यच्छब्देन वक्ष्यमाणं शिरीषमूलकफलैरित्यादिकमिच्छति । शिरीषेत्यादि । अनयोः सूर्यावर्तार्धभेदकयोः । अवपीड्य दीयत इत्यवपीडो नस्यभेद इत्यर्थः । वंशेत्यादि । अत्रेति अनयोः सूर्यावर्तार्धभेदकयोः । मधुकं यष्टिमधुकं, मनःशिलावपीडो मधुनेत्येको योगः, चन्दनेन चेति द्वितीयः । केचिदत्र चन्दनशब्देन मधूकसारं व्याख्यानयन्ति ॥ ३१-३३ ॥—

तेषामन्ते हितं नस्यं सर्पिर्मधुरसान्वितम् ॥ ३४ ॥

अवपीडैर्निर्जितकफस्य पश्चात्कर्माह—तेषामित्यादि । तेषामवपीडानाम्, अन्तेऽवसाने, मधुरकान्वितं काकोल्यादिगणकल्कशृतं घृतं नस्ये प्रयोज्यम् । अन्ये मधुरसां मूर्वा मन्यन्ते । केचित्तेषामित्यत्र तयोरिति पठन्ति, व्याख्यानयन्ति च—अन्तेऽवपीडानामवसाने मधुरसान्वितसर्पिस्तयोः सूर्यावर्तार्धभेदकयोर्नस्ये हितं, वातपित्तोत्तरावस्थायां घृतनस्यम् ॥ ३४ ॥

सारिवोत्पलकुष्ठानि मधुकं चाम्लपेषितम् ॥
सर्पिस्तैलयुतो लेपो द्वयोरपि सुखावहः ॥ ३५ ॥
एष एव प्रयोक्तव्यः शिरोरोगे कफात्मके ॥

इदानीं शिरोलेपमाह—सारिवेत्यादि । सारिवा प्रसिद्धा, उत्पलं नीलोत्पलम् । अम्लपेषितं काञ्जिकपेषितम् । द्वयोः सूर्यावर्तार्धावभेदकयोः । अयमपि शिरोलेपो वातपित्तोत्तरावस्थायां प्रयोक्तव्यः । एष इत्यादि एष एवेति शिरीषफलाद्यवपीडः कफनिमित्ते शिरोरोगे प्रयोक्तव्यः । यद्यपि कफशिरोरोगस्य चिकित्सोक्ता तथाऽप्यवसरप्राप्तत्वात् पुनरुक्ता । अन्ये 'शिरोरोगे कफात्मके' इत्यत्र 'क्षयात्मके' इति पठन्ति । तन्नेच्छति जेज्जटाचार्यः । अपरे तु 'एभिरेव प्रयोक्तव्यः शिरोरोगेऽनिलात्मके' इति पठन्ति । एभिरेवेति अनन्तरोक्तसारिवोत्पलकुष्ठादिभिः ॥ ३५ ॥—

अनन्तवाते कर्तव्यः सूर्यावर्तहरो विधिः ॥ ३६ ॥
सिराव्यधश्च कर्तव्योऽनन्तवातप्रशान्तये ॥
आहारश्च विधातव्यो वातपित्तविनाशनः ॥ ३७ ॥
मधुमस्तकसंयावघृतपूरैश्च भोजनम् ॥

केचिदत्रानन्तवातचिकित्सितं पठन्ति; तदाह—अनन्तवाते इत्यादि । मधुमस्तकाः रवजुकाः, संयावः कण्डकघृतैश्चातुर्जातकर्पूरसुगन्धः लप्सिकेति लोके, घृतपूरः घेवर इति प्रसिद्धः ॥ ३६ ॥ ३७ ॥—

क्षीरसर्पिः प्रशंसन्ति नस्ये पाने च शङ्खके ॥ ३८ ॥
जाङ्गलानां रसैः स्निग्धैराहारश्चात्र शस्यते ॥

शङ्खकचिकित्सामाह—क्षीरेत्यादि । क्षीरसर्पिरिति अर्दितचिकित्सितेऽक्षितर्पणार्थं यदुक्तम् । जाङ्गलानामित्यत्र केचिदौदकानामिति पठन्ति, तन्नेच्छति गयी ॥ ३८ ॥—

शतावरीं तिलान् कृष्णान् मधुकं नीलमुत्पलम् ३९
दूर्वां पुनर्नवां चैव लेपे साध्ववचारयेत् ॥
महासुगन्धामथवा पालिन्दीं चाम्लपेषिताम् ॥४०॥

शिरोलेपमाह—शतावरीमित्यादि । शतावर्यादिभिः क्षीरपिष्टैः शिरोलेपः । महासुगन्धामित्यादि । महासुगन्धा उत्पलसारिवा, सर्पसुगन्धामपरे । पालिन्दी कालवल्ली । अम्लं काञ्जिकम् ॥ ३९ ॥ ४० ॥

शीतांश्चात्र परीषेकान् प्रदेहांश्च प्रयोजयेत् ॥

अनुक्तानप्यत्र परिषेकप्रदेहान्निर्दिशन्नाह—शीतानित्यादि । शीतपरिषेकान् शीतवीर्यविदारिगन्धादिकाकोल्याद्युत्पलादिकषायकृतान्, शीतप्रदेहानेतेषामेव कल्कैरम्लपिष्टैः कृतान् ॥—

अवपीडश्च देयोऽत्र सूर्यावर्तनिवारणः ॥ ४१ ॥

अवपीडश्चेत्यादि । सूर्यावर्तनिवारणोऽवपीडः 'शिरीषमूलकफलैरवपीडोऽनयोर्हित' इत्याद्युक्तः ॥ ४१ ॥

कृमिक्षयकृतौ हित्वा शिरोरोगेषु बुद्धिमान् ॥
मधुतैलसमायुक्तैः शिरांस्यतिविरेचयेत् ॥ ४२ ॥
पश्चात्सर्षपतैलेन ततो नस्यं प्रयोजयेत् ॥

इदानीं शिरोरोगाणां सामान्यचिकित्सामाह—कृमीत्यादि । कृमिक्षयकृतौ शिरोरोगौ परित्यज्यान्येषु शिरोरोगेषु मधुतैलसमायुक्तैः शिरोविरेचनद्रव्यैर्बुद्धिमान् वैद्यः शिरांसि अतिविरेचयेत्, नस्यं दद्यादित्यर्थः । मूलानिलोन्मूलनत्वात् स्त्यानभूतकफविनाशनत्वाच्च सर्षपतैलेन नस्यम् । अन्ये तु 'पश्चात् सर्पिः सुखोष्णं तु नस्यतस्तु प्रशस्यते' इति पठन्ति; तेषामयमभिप्रायः—शिरोविरेचनेन कफे विजिते सति वातपित्तजयार्थं सर्पिर्नस्यम् ॥ ४२ ॥—

न चेच्छान्तिं व्रजन्त्येवं स्निग्धस्विन्नांस्ततो भिषक् ४३
पश्चादुपाचरेत्सम्यक् सिराणामथ मोक्षणैः ॥

१ 'सूर्यावर्तेरितः' इति पा० ।

इदानीमेतैरप्युपायैर्यदा शान्तिं शिरोरोगा न यान्ति तदा किं कर्तव्यमित्याह—न चेच्छान्तिमित्यादि ॥ ४३ ॥—

षट्सप्ततिर्नेत्ररोगा दशाष्टादश कर्णजाः ॥ ४४ ॥
एकत्रिंशद् घ्राणगताः शिरस्येकादशैव तु ॥
इति विस्तरतो द्द(दि)ष्टाः सलक्षणचिकित्सिताः ४५
संहितायामभिहिताः सप्तषष्टिर्मुखामयाः ॥
एतावन्तो यथास्थूलमुत्तमाङ्गगता गदाः ॥
अस्मिञ्छास्त्रे निगदिताः सङ्ख्यारूपचिकित्सितैः ४६

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे शिरोरोगप्रतिषेधो नाम षड्विंशोऽध्यायः ॥ २६ ॥

इति श्रीभगवता धन्वन्तरिणोपदिष्टायां महर्षिणा सुश्रुताचार्येण विरचितायां सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गतं शालाक्यतन्त्रं समाप्तम् ॥

इदानीं शालाक्यतन्त्रस्यार्थपिण्डमुक्तमुपसंहरन्नाह—षट्सप्ततिरित्यादि । दशाष्टादश अष्टाविंशतिरित्यर्थः । इति शब्द उक्तस्मरणे । ये विस्तरतो द्द(दि)ष्टाः विस्तरेण विदेहादौ भाषिताः । यथास्थूलं स्थूलानतिक्रमेण, अणुशो भिद्यमानाः पुनरसंख्येयाः । अस्मिन्निति शालाक्यशास्त्रे ॥ ४४–४६ ॥

सद्बुद्धेः प्रसवः पदं सुयशसः सद्वैद्यवन्द्यः श्रिया-
मावासः सुकृती क्रियासु निपुणः श्रीडल्हणाख्यो भिषक् ।
श्रीभादानकनाथसाहलनृपस्यातीव यो वल्लभः
शास्त्रं तस्य निबन्धसंग्रह इति ख्यातं धरित्रीतले ।

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते शालाक्यतन्त्रे षड्विंशोऽध्यायः समाप्तः ॥ २६ ॥

सप्तविंशतितमोऽध्यायः ।

अथातो नवग्रहाकृतिविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

शालाक्यतन्त्रानन्तरं कौमारतन्त्रं प्रारभ्यते—अथात इत्यादि । बालशब्दोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः । तत्र ग्रहा बालानां नव, अष्टौ पुनरबालानां भूतविद्यायां निर्देष्टव्याः । आकृतिराकारो लिङ्गं कार्यभूतं, नतु स्वभावाख्यम् ॥ १ ॥ २ ॥

बालग्रहाणां विज्ञानं साधनं चाप्यनन्तरम् ॥
उत्पत्तिं कारणं चैव सुश्रुतैकमनाः शृणु ॥ ३ ॥

तत्र प्रथमं कुमारतन्त्रस्यार्थपिण्डमुद्दिशन्नाह—बालग्रहाणामित्यादि । विज्ञानं विशिष्टज्ञानम् । साधनं चिकित्सितम् । उत्पत्तिः प्रभवः । कारणं हेतुः ॥ ३ ॥

स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च ॥
शकुनी रेवती चैव पूतना चान्धपूतना ॥ ४ ॥
पूतना शीतनामा च तथैव मुखमण्डिका ।
नवमो नैगमेषश्च यः पितृग्रहसंज्ञितः ॥ ५ ॥

इदानीं तेषां नवग्रहाणां नामान्याह—स्कन्दग्रह इत्यादि । प्रथमः प्रधानमादिर्वा । नवमो नैगमेष इति संख्यानिर्देशादेव संख्यायां लब्धायां भूयो नवम इति संख्याकरणं काश्यपादितन्त्रान्तरोक्ताधिकसंख्यानिराकरणार्थम् । पितृग्रहसंज्ञित इति बालस्यान्यग्रहेभ्यो रक्षकत्वात्पितेव ग्रहः सैव संज्ञा संजाता यस्य स तथा । (नैतु भूतविद्यावत् पितृलोकाभिहितग्रह इति) ॥ ४ ॥ ५ ॥

धात्रीमात्रोः प्राक्प्रदिष्टापचारा-
च्छौचभ्रष्टान्मङ्गलाचारहीनान् ॥
त्रस्तान् हृष्टांस्तर्जितान् ताडितान् वा
पूजाहेतोर्हिंस्युरेते कुमारान् ॥ ६ ॥

कस्माद्ग्रहा बालान् विशन्तीत्याह—धात्रीत्यादि । धात्री स्तनपायिनी पोषयित्रीत्यर्थः, माता प्रसवित्री । प्राक्प्रदिष्टापचारादिति प्राक् शारीरस्थाने प्रदिष्टोऽपचारोऽकृत्यविधिः, मांससुरादीनां लौल्यादाचरणं वा । शौचं मूत्रपुरीषादिप्रक्षालनं, मङ्गलं स्वस्तिकस्रग्दामदूर्वावचासर्षपादिस्पर्शनं, आचारः पापविरोधी, त्रस्तान् उद्विग्नान्, हृष्टान् मुदितान्, तर्जितान् अन्येन केनचिद्विभीषितान्, ताडितान् अभिहतान् । कथं पूजा जायते? कुसुमादिना भोजनादिना च । अतो हेतोः धात्रीमात्रोरपचाराद्दूषणाद्यन्वितान् बालान् । पूजा चात्रोपलक्षणं; तेन रतिहेतोरपि हिंस्युरिति । ननु, धात्रीमात्रोरपचाराद्बालानामनपराधित्वात् कथं ग्रहहिंसनं? अत्रोच्यते—बालानां प्राक्तनकर्मयोगत एवापचारं कुरुतः । कुमारानित्युपलक्षणं; तेन कुमारिका अपि हिंस्युः । एते ग्रहा इत्यर्थः ॥ ६ ॥

ऐश्वर्यस्थास्ते न शक्या विशन्तो
देहं द्रष्टुं मानुषैर्विश्वरूपाः ॥
आप्तं वाक्यं तत्समीक्ष्याभिधास्ये
लिङ्गान्येषां यानि देहे भवन्ति ॥ ७ ॥

कस्मात्ते ग्रहा देहं विशन्तो नोपलभ्यन्ते इत्याह[3]—ऐश्वर्येत्यादि । एषां ग्रहाणां यानि लिङ्गानि भवन्ति तानि आप्तं वाक्यं समीक्ष्याभिधास्ये कथयिष्ये इति पिण्डार्थः । आप्तं वाक्यमाप्तैरुक्तं वाक्यम्; आप्ताश्च यथार्थवादिनः[4] ॥ ७ ॥

शूनाक्षः[5] क्षतजसगन्धिकः स्तनद्विड्
वक्रास्यो हतचलितैकपक्ष्मनेत्रः ॥
उद्विग्नः सुलुलितचक्षुरल्परोदी
स्कन्दार्तो भवति च गाढमुष्टिवर्चाः ॥ ८ ॥

---

१ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते । २ 'येन केनचित्' इति पा० । ३ 'ननु प्रत्यक्षाविषयत्वात् कृतावेशानां ग्रहाणां केन ज्ञानं भविष्यतीत्याह—' इति पा० । ४ 'तत्त्वार्थवेदिनः' इति पा० । ५ 'स्तब्धाक्षः' इति पा० ।

स्कन्दग्रहार्तलक्षणमाह—शूनाक्ष इत्यादि । क्षतजसगन्धिकः रुधिरसमानगन्धिकः, विस्रगन्ध इत्यर्थः; अन्ये तु क्षतजं रक्तं तत्सगन्धिक ईषद्रुधिरगन्धिक इत्यर्थः । स्तनद्विट् स्तनद्वेषी । वक्रास्यः वक्रमुखः । हतचलितैकपक्ष्मनेत्र इति हतं चलितं चैकपक्ष्म नेत्रे यस्य स तथा । उद्विग्नः उद्विग्नचित्तः । सुललितचक्षुः किंचिन्मिलितलोचनः । स्कन्दार्त इति स्कन्दविनोदनार्थं रुद्रेण सृष्टो ग्रहस्तेनार्तः, स्कन्दोऽत्र न पुनर्भगवान् कार्तिकेयः । गाढे मुष्टिवर्चसी यस्य स तथा । गयदासस्तु 'स्तब्धाङ्गः क्षतजसगन्धिकः स्तनद्विट् वक्रास्यो हतचरणैकपक्ष्मनेत्रः' इति पठित्वा 'स्तब्धमङ्गं यस्य सं तथा, हतानि एकपादैकपक्ष्मार्धनयनानि यस्य स तथा' इति व्याख्यानयति ॥ ८ ॥

निःसंज्ञो भवति पुनर्भवेत्ससंज्ञः
संरब्धः करचरणैश्च नृत्यतीव ॥
विण्मूत्रे सृजति विनद्य जृम्भमाणः
फेनं च प्रसृजति तत्सखाभिपन्नः ॥ ९ ॥

स्कन्दापस्मारार्तलक्षणमाह—निःसंज्ञ इत्यादि । संरब्धः सम्यक् कलितः सन्, करचरणाभ्यां हस्तपादाभ्यां, नृत्यतीव नर्तनमिव करोति । विनद्य शब्दं कृत्वा; क्वचित् 'विनम्य' इति पाठः, तत्र गात्रविनमनं कृत्वा; विण्मूत्रे मुञ्चतीति व्याख्यानम् । तत्सखाभिपन्नः तच्छब्देन स्कन्दः कथ्यते, तस्य सखा स्कन्दापस्मारः, तेनाक्रान्तः ॥ ९ ॥

स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः
संस्रावित्रणपरिपीडितः समन्तात् ॥
स्फोटैश्च प्रचिततनुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥१०॥

शकुनिग्रहार्तलक्षणमाह—स्रस्ताङ्ग इत्यादि । स्रस्ताङ्गः शिथिलाङ्गः । भयचकितो भीतः । विहङ्गा अत्र मांसादा जलचराश्च । संस्रावित्रणपरिपीडितः पूयास्राविव्रणपरिपीडितः । समन्तात् सर्वतः । अत्रोक्तव्रणस्फोटयोर्विदीर्णाविदीर्णत्वेन भेदः । क्षतोऽभिभूतः ॥ १० ॥

रक्तास्यो हरितमलोऽतिपाण्डुदेहः ॥
श्यावो वा ज्वरमुखपाकवेदनार्तः ॥
रेवत्या व्यथिततनुश्च कर्णनासं
मृद्नाति ध्रुवमभिपीडितः कुमारः ॥ ११ ॥

रेवतीग्रहार्तस्य लक्षणमाह—रक्तास्य इत्यादि । हरितमल इति मलोऽत्र विष्ठा मूत्रं च । ज्वरमुखपाकवेदनार्तः ज्वरार्तो मुखपाकवेदनार्तश्च । व्यथिततनुरिति सरुजशरीरः । अभिपीडितो रेवत्या इति संबन्धः ॥ ११ ॥

स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ
विड् भिन्नं सृजति च काकतुल्यगन्धिः ॥
छर्द्याऽऽर्तो हृषिततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनागृहीतः ॥ १२ ॥

पूतनाग्रहार्तलक्षणमाह—स्रस्ताङ्ग इत्यादि । न दिवा सुखं स्वपिति न च रात्रौ सुखं स्वपिति । सृजति मुञ्चति । 'स्रस्ताङ्ग' इत्यत्र केचित् 'स्वस्थाङ्ग' इति पठन्ति, स्वस्थाङ्गोऽपि न दिवा न रात्रौ स्वपितीति व्याख्यानयन्ति ॥ १२ ॥

यो द्वेष्टि स्तनमतिसारकासहिक्का-
च्छर्दीभिर्ज्वरसहिताभिरर्द्यमानः ॥
दुर्वर्णः सततमधःशयोऽम्लगन्धि-
स्तं ब्रूयुर्भिषज इहान्धपूतनार्तम् ॥ १३ ॥

अन्धपूतनार्तलक्षणमाह—य इत्यादि । अधःशयोऽधोमुखशायी । अम्लगन्धिः काञ्जिकाद्यम्लद्रव्यगन्धिः ॥ १३ ॥

उद्विग्नो भृशमतिवेपते प्ररुद्यात्
संलीनः स्वपिति च यस्य चान्त्रकूजः ॥
विस्राङ्गो भृशमतिसार्यते च यस्तं
जानीयाद्भिषगिह शीतपूतनार्तम् ॥ १४ ॥

शीतपूतनार्तलक्षणमाह—उद्विग्न इत्यादि । संलीनः सम्यग्लीनः, शय्यैकदेशे लग्न इत्यर्थः । विस्राङ्गो विस्रगन्धाङ्गः । 'उद्विग्नो भृशमति' इत्यत्र केचित् 'आक्रन्दत्यतिचकितः' इति पठन्ति ॥ १४ ॥

म्लानाङ्गः सुरुचिरपाणिपादवक्त्रो
बह्वाशी कलुषसिरावृतोदरो यः ॥
सोद्वेगो भवति च मूत्रतुल्यगन्धिः
स ज्ञेयः शिशुरिह वक्रमण्डिकार्तः ॥ १५ ॥

मुखमण्डिकाग्रहार्तलक्षणमाह—म्लानाङ्ग इत्यादि । म्लानाङ्गो दुर्बलमध्यशरीरः । सुचिरपाणिपादवक्त्र इति सुष्ठु रुचिरं शोभनं हस्तपादवक्त्रं यस्य सः । वक्रमण्डिकार्तो मुखमण्डिकार्त इत्यर्थः ॥ १५ ॥

यः फेनं वमति विनम्यते च मध्ये
सोद्वेगं विलपति चोर्ध्वमीक्षमाणः ॥
ज्वर्येत प्रततमथो वसासगन्धि-
र्निःसंज्ञो भवति हि नैगमेषजुष्टः ॥ १६ ॥

नैगमेषग्रहार्तलक्षणमाह—य इत्यादि । मध्ये मध्याङ्गे । सोद्वेगं सत्रासं, विलपति अतिशयेन शब्दं करोति, ऊर्ध्वमीक्षमाणः ऊर्ध्वं पश्यन् । 'विलपति' इत्यत्र केचित् 'विहसति' इति पठन्ति । ज्वर्यते प्रततं सततम् । वसासगन्धिः वसया तुल्यगन्धिः । निःसंज्ञः निर्गतसम्यग्ज्ञानः ॥ १६ ॥

प्रस्तब्धो यः स्तनद्वेषी मुह्यते चाविशन्मुहुः ॥
तं बालमचिराद्धन्ति ग्रहः संपूर्णलक्षणः ॥ १७ ॥

सांप्रतमसाध्यग्रहार्तलक्षणमाह—प्रस्तब्ध इत्यादि । प्रस्तब्धोऽत्यर्थं स्तब्धाङ्गः । मुह्यते मोहं याति । आविशन् आवेशं कुर्वन् । मुहुर्वारंवारम् ॥ १७ ॥

विपरीतमतः साध्यं चिकित्सेदचिरार्दितम् ।

साध्यग्रहार्तलक्षणमाह—विपरीतमित्यादि । विपरीतं प्रस्तब्ध-

स्तनद्वेषादिलक्षणैरनुपहतम् । अचिरार्दितमल्पकालपीडितम् ।—

गृहे पुराणहविषाऽभ्यज्य बालं शुचौ शुचिः ॥ १८ ॥
सर्षपान् प्रकिरेत्तेषां तैलैर्दीपं च कारयेत् ॥
सदा सन्निहितं चापि जुहुयाद्धव्यवाहनम् ॥ १९ ॥
सर्वगन्धौषधीबीजैर्गन्धमाल्यैरलङ्कृतम् ॥
अग्नये कृत्तिकाभ्यश्च स्वाहा स्वाहेति संततम् ॥ २० ॥

साध्यस्य चिकित्सामाह—गृहे इत्यादि । पुराणहविषा जीर्णघृतेन, अभ्यज्य बालं चुपाटित्वा । शुचौ पवित्रदेशे, शुचिः 'भिषग्' इति शेषः । तेषां तैलैः सर्षपाणां तैलैः, दीपं कारयेत् दीपं प्रज्वालयेदित्यर्थः । सदेत्यादि । जुहुयात् होमं कुर्यादित्यर्थः । हव्यवाहनमग्निम् । कैर्जुहुयात्? सर्वगन्धौषधीबीजैरिति; सर्वगन्धा एलादिपरिपठिताः, ओषधीबीजानि यवधान्यतिलादीनि, तैर्जुहुयात् । गन्धमाल्यैरलङ्कृतमग्निं बालं वा, सततं वारंवारं न सकृत् । अयं विधिः सर्वग्रहाणां सामान्यः । अग्नय इत्यादि । अग्निं हुत्वा ततो मध्याह्ने बलिं दद्यात् ॥ १८—२० ॥

नमः स्कन्दाय देवाय ग्रहाधिपतये नमः ॥
शिरसा त्वाऽभिवन्देऽहं प्रतिगृह्णीष्व मे बलिम् ॥
नीरुजो निर्विकारश्च शिशुर्मे जायतां द्रुतम् ॥ २१ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे नवग्रहाकृतिविज्ञानीयो नाम (प्रथमोऽध्यायः, आदितः) सप्तविंशोऽध्यायः ॥ २७ ॥

तत्र यं मन्त्रमुच्चरेत्तमाह—नम इत्यादि ॥ २१ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे नवग्रहाकृतिविज्ञानीयो नाम सप्तविंशतितमोऽध्यायः ॥ २७ ॥

अष्टाविंशतितमोऽध्यायः ।

अथातः स्कन्दग्रहप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

नवग्रहाकृतिविज्ञानीयानन्तरं विज्ञातनवग्रहाकृतेश्चिकित्सितमुचितं; तत्रापि स्कन्दग्रहस्य प्रथमत्वात्तत्प्रतिषेधाध्याय आरभ्यते—अथात इत्यादि ॥ १ ॥ २ ॥

स्कन्दग्रहोपसृष्टानां कुमाराणां प्रशस्यते ॥
वातघ्नद्रुमपत्राणां निष्क्वाथः परिषेचने ॥ ३ ॥

स्कन्देत्यादि । उपसृष्टानां गृहीतानाम् । द्रुमग्रहणं विटपनिषेधार्थम् । स्कन्दग्रहप्रभावेण तेनाविष्टे बाले वायुः कुप्यतीति वातहरैः सेकादयः कार्याः; अथवा वातघ्नद्रुमाः स्वप्रभावेण ग्रहावेशमपि निवर्तयन्ति, अचिन्त्यशक्तित्वात् ॥ ३ ॥

तेषां मूलेषु सिद्धं च तैलमभ्यञ्जने हितम् ॥
सर्वगन्धसुरामण्डकैडर्यावापमिष्यते ॥ ४ ॥

तेषामित्यादि । तेषां वातघ्नद्रुमाणां बिल्वादीनाम् । सर्वगन्धा एलादिपठिताः, सुरामण्डः सुराया उपर्यच्छो भागः, कैडर्यो महानिम्बः । एतेन बिल्वादिमूलक्वाथेन एलादीनां कल्केन सिद्धं तैलमभ्यञ्जने हितमिष्यत इति सिद्धम् ॥ ४ ॥

देवदारुणि रास्नायां मधुरेषु द्रुमेषु च ॥
सिद्धं सर्पिश्च सक्षीरं पानमस्मै प्रयोजयेत् ॥ ५ ॥

देवदार्वित्यादि । मधुरद्रुमा मधुरवृक्षाः, मधु(धू)कराजादनादयः । पानमन्नादस्य बालस्य ॥ ५ ॥

सर्षपाः सर्पनिर्मोको वचा काकादनी घृतम् ॥
उष्ट्राजाविगवां चैव रोमाण्युद्धूपनं शिशोः ॥ ६ ॥

काकादनी काकजङ्घा ॥ ६ ॥

सोमवल्लीमिन्द्रवल्लीं शमीं बिल्वस्य कण्टकान् ॥
मृगादन्याश्च मूलानि ग्रथितान्येव धारयेत् ॥ ७ ॥

सोमवल्लीत्यादि । सोमवल्ली गुडूची, इन्द्रवल्ली मत्स्यांडकेः गण्डदूर्वेति लोके, मृगादनी इन्द्रवारुणी ॥ ७ ॥

रक्तानि माल्यानि तथा पताका
रक्ताश्च गन्धा विविधाश्च भक्ष्याः ॥
घण्टा च देवाय बलिर्निवेद्यः
सकुक्कुटः स्कन्दग्रहे हिताय ॥ ८ ॥

बलिं निर्दिशन्नाह—रक्तानीत्यादि । तथा पताका रक्तेत्यर्थः । रक्ताश्च गन्धाः कुङ्कुमादिकाः । भक्ष्याः स्वस्तिकमोदकादयः । देवाय स्कन्दनाम्ने, स्कन्दग्रहे वक्ष्यमाणे चत्वराख्ये । हिताय हितार्थं बालकस्य । बलिश्च शुचिना वैद्येन कृतस्नानेन शस्त्रहस्तेन रात्रौ दातव्यः ॥ ८ ॥

स्नानं त्रिरात्रं निशि चत्वरेषु
कुर्यात् पुरं शालियवैर्नवैस्तु ॥
अद्भिश्च गायत्र्यभिमन्त्रिताभिः
प्रज्वालनं व्याहृतिभिश्च वह्नेः ॥ ९ ॥

स्नानमित्यादि । चत्वरेषु चतुष्पथेषु, अपरे चत्वरशब्देन त्रिपथं कथास्थानं चेत्याहुः । पुरं मण्डलम् । अद्भिश्च गायत्र्यभिमन्त्रिताभिः स्नानमिति संबन्धनीयम् । व्याहृतिभिस्तिसृभिः सप्तभिर्दशभिर्वा स्वाहान्ताभिः । स्कन्दग्रहे चत्वराख्ये शालियवैर्विरचितमण्डलाभ्यन्तरसद्मनि पुराभिधाने, त्रिरात्रं रात्रौ बलिस्नानहोमाः कार्याः ॥ ९ ॥

रक्षामतः प्रवक्ष्यामि बालानां पापनाशिनीम् ॥
अहन्यहनि कर्तव्या या भिषग्भिरतन्द्रितैः ॥ १० ॥
तपसां तेजसां चैव यशसां वपुषां तथा ॥
निधानं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु ॥ ११ ॥
ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ॥
देवसेनारिपुहरः पातु त्वां भगवान् गुहः ॥ १२ ॥
देवदेवस्य महतः पावकस्य च यः सुतः ॥
गङ्गोमाकृत्तिकानां च स ते शर्म प्रयच्छतु ॥ १३ ॥

---

१ 'तैले दीपं' इति पा० ।

१ 'मत्स्याण्डकः' इति पा० ।

रक्तमाल्याम्बरः श्रीमान् रक्तचन्दनभूषितः ॥
रक्तदिव्यवपुर्देवः पातु त्वां क्रौञ्चसूदनः ॥ १४ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे स्कन्दप्रतिषेधो नामा (द्वितीयोऽध्यायः, आदितोऽ)ष्टाविंशोऽध्यायः ॥ २८ ॥

रक्षामित्यादि । रक्षा स्वस्त्ययनं; मन्त्राणामचिन्त्यशक्तित्वान्मन्त्रमयी रक्षा पापनाशिनी । तपसामित्यादि । वपुषामिति वपुषां निधानं स्थानमित्यनेन कामरूपत्वमुक्तम् । अव्ययो नित्यः । ग्रहाः स्कन्दग्रहादिकाः, तेषां सेना तस्याः पतिः देवसेनापतिः । देवसेनारिपवो दैत्याः । देवदेवस्य रुद्रस्य, उमा पार्वती, कृत्तिकाः षट्संख्योपेताः सप्तर्षिभार्याः । शर्म सुखम् । क्रौञ्चनामा पर्वतः तं सूदयति निहन्तीति क्रौञ्चसूदनः ॥ १०-१४ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे स्कन्दग्रहप्रतिषेधो नामाऽष्टाविंशतितमोऽध्यायः ॥२८॥

एकोनत्रिंशत्तमोऽध्यायः ।

अथातः स्कन्दापस्मारप्रतिषेधं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥
विल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ॥
परिषेके प्रयोक्तव्यः स्कन्दापस्मारशान्तये ॥ ३ ॥

स्कन्दप्रतिषेधानन्तरं प्रत्यासत्त्या स्कन्दापस्मारप्रतिषेधारम्भो युज्यत इत्याह—विल्व इत्यादि । गोलोमी दूर्वा ॥ १-३ ॥

सर्वगन्धविपक्कं तु तैलमभ्यञ्जने हितम् ॥
क्षीरवृक्षकषाये च काकोल्यादौ गणे तथा ॥ ४ ॥
विपक्तव्यं घृतं चापि पानीयं पयसा सह ॥

सर्वेत्यादि । सर्वगन्धा एलादिकाः, यथालाभमेलादिकल्केन विल्वशिरीषादीनां क्वाथेन तैलं पक्तव्यम् । अन्ये तु 'गन्धमूत्रविपक्कम्' इति पठन्ति; गन्धाः सर्वगन्धाः पूर्वोक्ताः, मूत्रं गोमूत्रम् । क्षीरेत्यादि । क्षीरवृक्षकषाये चतुर्गुणे, पयसा दुग्धेन चतुर्गुणेन, काकोल्यादौ गणे कल्कीकृते स्नेहचतुर्थांशे घृतं विपक्तव्यम् । तद्भृतं किं कार्यमित्याह,—पानीयं पातव्यम्, 'अन्नादेन इति शेषः । अन्ये तु पानीयं चतुर्गुणं दत्त्वा घृतं पक्तव्यमिति मन्यन्ते, शेषं पूर्ववत् ॥ ४ ॥—

उत्सादनं वचाहिङ्गुयुक्तं स्कन्दग्रहे हितम् ॥ ५ ॥
गृध्रोलूकपुरीषाणि केशा हस्तिनखा घृतम् ॥
वृषभस्य च रोमाणि योज्यान्युद्धूपनेऽपि च ॥ ६ ॥

उत्सादनमित्यादि । उत्सादनमुद्वर्तनम् । स्कन्दग्रहे हितमित्यत्र चकारो लुप्तो ज्ञेयः, तेन स्कन्दग्रहे स्कन्दापस्मारे च हितम् । ('एतदुद्वर्तनं हितम्' इत्यत्रान्ये 'एतदुद्वर्तनेरितम्' इति पठन्ति; तन्न, उत्सादनस्यानुक्तत्वात्) ॥ ५ ॥ ६ ॥

अनन्तां कुक्कुटीं बिम्बीं मर्कटीं चापि धारयेत् ॥

अनन्तेत्यादि । अनन्ता उत्पलसारिवा, कुक्कुटी कुक्कुटीशरीरवत् कुसुमचित्रा वल्ली स्फटिकरचितकुक्कुटाण्डतुल्यकन्दा, मर्कटी कपिकच्छुः । धारयेत् शरीरे इति बोद्धव्यम् ॥—

पक्कापक्कानि मांसानि प्रसन्ना रुधिरं पयः ॥ ७ ॥
भूतौदनो निवेद्यश्च स्कन्दापस्मारिणेऽवटे ॥

पक्केत्यादि । प्रसन्ना सुरा, रुधिरं छागलस्य, पयो दुग्धम् । भूतौदनः भूतानामोदनः सोपहारो बलिः, उत्स्विन्ना माषविकृतिर्बलिरित्यन्ये । अवटे गर्तायाम् ॥ ७ ॥—

चतुष्पथे च कर्तव्यं स्नानमस्य यतात्मना ॥ ८ ॥

चतुष्पथे इत्यादि । अस्य बालकस्य । यतात्मना उपवासादियुतेन । 'यतात्मना' इत्यत्र केचित् 'यथाविधि' इति पठन्ति; स्कन्दप्रतिषेधोक्तस्नानविधानेनेति च व्याख्यानयन्ति ॥ ८ ॥

स्कन्दापस्मारसंज्ञो यः स्कन्दस्य दयितः सखा ॥
विशाखसंज्ञश्च शिशोः शिवोऽस्तु विकृताननः ॥९॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे स्कन्दापस्मारप्रतिषेधो नाम (तृतीयोऽध्यायः, आदितः) एकोनत्रिंशोऽध्यायः॥ २९ ॥

रक्षामन्त्रमाह—स्कन्देत्यादि । स्कन्दस्य कार्तिकेयस्य, दयितोऽभीष्टः, सखा मित्रं, विशाखसंज्ञ इति स्कन्दापस्मारस्य द्वितीयं नाम । शिशोर्बालकस्य, शिवोऽस्तु कल्याणकृद्भवतु, विकृताननो विकृतमुखः । 'विशाखसंज्ञस्य' इति केचित् पठन्ति, तत्र स्कन्दस्य विशेषणम् ॥ ९ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे स्कन्दापस्मारप्रतिषेधो नामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

त्रिंशत्तमोऽध्यायः ।

अथातः शकुनीप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

स्कन्दापस्मारप्रतिषेधानन्तरं शकुनीप्रतिषेधारम्भः, स्कन्दादिग्रहप्रतिपादकसूत्रेऽस्या एवानन्तरोक्तत्वादित्याह—अथात इत्यादि ॥ १ ॥ २ ॥

शकुन्यभिपरीतस्य कार्यो वैद्येन जानता ॥
वेतसाम्रकपित्थानां निष्क्वाथः परिषेचने ॥ ३ ॥

शकुनीत्यादि । अभिपरीतस्य व्याप्तस्य, 'बालस्य' इति शेषः । जानता बुद्धिमता । निष्क्वाथः परिषेचने कार्य इति संबन्धः ॥ ३ ॥

कषायमधुरैस्तैलं कार्यमभ्यञ्जने शिशोः ॥

कषायेत्यादि । कषाया वटादयः, मधुराणि काकोल्यादीनि; तत्र वटादीनां कषायः, काकोल्यादीनां च कल्कः, ताभ्यां तैलं

साध्यं; प्रत्येकं वटादीनां काकोल्यादीनां च कल्ककषायौ कल्पनीयावित्यन्ये ॥—

मधुकोशीरह्रीवेरसारिवोत्पलपद्मकैः ॥ ४ ॥
रोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिहेच्छिशुम् ॥

मधुकेत्यादि । उत्पलं नीलोत्पलम् । प्रदिहेत् लिम्पेत् ॥ ४ ॥—

व्रणेषूक्तानि चूर्णानि पथ्यानि विविधानि च ॥ ५ ॥

व्रणेष्वित्यादि । व्रणेषु शकुनीजुष्टबालकव्रणेषु । उक्तानि चूर्णानि द्विव्रणीयाध्याये कीर्तितानि मिश्रकोक्तानि च शोधनरोपणानि । पथ्यानि व्रणितोपासनीयोक्तानि शालिमुद्गदाडिमसैन्धवयवपटोलादीनि; अन्ये तु पथ्यानीति चूर्णानीत्यस्य विशेषणं कुर्वन्ति, तत्र शकुनीजुष्टबालकव्रणानां सदाहपाकरक्तस्रावहराणि चूर्णानि प्रयोक्तव्यानीति संबन्धनीयम् ॥ ५ ॥

स्कन्दग्रहे धूपनानि तानीहापि प्रयोजयेत् ॥

स्कन्देत्यादि । धूपनानि सर्षपा इत्यादीनि स्कन्दग्रहोक्तानि, तानीहापि शकुन्यामपि प्रयोजयेत् ॥—

शतावरीमृगैर्वारुनागदन्तीनिदिग्धिकाः ॥ ६ ॥
लक्ष्मणां सहदेवां च बृहतीं चापि धारयेत् ॥

शतावरीत्यादि । मृगैर्वारुरिन्द्रवारुणी, नागदन्ती दन्तिनी, सहदेवा पीतपुष्पा बला, बृहती स्थूलफला ॥ ६ ॥—

तिलतण्डुलकं माल्यं हरितालं मनःशिला ॥ ७ ॥
बलिरेष करञ्जेषु निवेद्यो नियतात्मना ॥

तिलेत्यादि । एष तिलतण्डुलमित्यादिको बलिः । करञ्जेषु नक्तमालेषु । नियतात्मना संयतेन्द्रियेण । 'करञ्जेषु' इत्यत्रान्ये 'निकुञ्जेषु' इति पठन्ति, निकुञ्जेषु वनेषु ॥ ७ ॥—

निष्कुटे च प्रयोक्तव्यं स्नानमस्य यथाविधि ॥ ८ ॥

निष्कुटे इत्यादि । निष्कुटे गृहोपवने, अन्ये निष्कुटं वनगहनमाहुः । यथाविधीति स्कन्दग्रहोक्तो विधिः; तेन शालियवरचितमण्डले गायत्र्यभिमन्त्रितेन जलेन स्नानमिति लभ्यते ॥८॥

स्कन्दापस्मारशमनं घृतं चापीह पूजितम् ॥

स्कन्देत्यादि । घृतं देवदारुणि रास्नायामित्यादिकं, चकारोऽत्र सोमवल्ल्यादीनामपि धारणं समुच्चिनोति । जेज्जटस्तु स्कन्दग्रहे धूपनानीत्यादिकधूपनपाठान्ते इदं घृतं पठति ॥—

कुर्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः ॥९॥

कुर्यादित्यादि । कुसुमैः शुभैरिति जातीपुष्पनीलोत्पलादिभिः ॥ ९ ॥

अन्तरीक्षचरा देवी सर्वालङ्कारभूषिता ॥
अयोमुखी तीक्ष्णतुण्डा शकुनी ते प्रसीदतु ॥ १० ॥
दुर्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा ॥
लम्बोदरी शङ्कुकर्णी[1] शकुनी ते प्रसीदतु ॥ ११ ॥

१ 'शङ्खवर्णा' इति पा० ।

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे शकुनीप्रतिषेधो नाम (चतुर्थोऽध्यायः, आदितः) त्रिंशोऽध्यायः ॥ ३० ॥

बालकरक्षामाह—अन्तरीक्षेत्यादि ॥ १० ॥ ११ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे शकुनीप्रतिषेधो नाम त्रिंशत्तमोऽध्यायः ॥३०॥

एकत्रिंशत्तमोऽध्यायः ।

अथातो रेवतीप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

शकुनीप्रतिषेधानन्तरं रेवत्यामपि मुखपाकवचनात् सव्रणत्वेनैकधर्मत्वाच्च रेवतीप्रतिषेधाध्यायो युज्यत इत्याह—अथात इत्यादि ॥ १ ॥ २ ॥

अश्वगन्धा च शृङ्गी च सारिवा सपुनर्नवा ॥
सहे तथा विदारी च कषायाः सेचने हिताः ॥ ३ ॥

अश्वगन्धेत्यादि । अजशृङ्गी कर्कटशृङ्गी, उत्तमारणीत्यन्ये । सहे मुद्गमाषपर्ण्यौ । सेचने हिताः प्रत्येकं समुदिताश्च ॥ ३ ॥

तैलमभ्यञ्जने कार्यं कुष्ठे सर्जरसेऽपि च ॥
पलङ्कषायां नलदे तथा गिरिकदम्बके ॥ ४ ॥

तैलमित्यादि । सर्जरसो रालः पलङ्कषा गुग्गुलुः, नलदं जटामांसी, गिरिः गिरिकर्णिका; अन्ये गिरिकदम्बो महाकदम्बः स्वनामख्यातः; एतैः कुष्ठादिभिः कल्कीकृतैस्तैलं कार्यम् ॥ ४ ॥

धवाश्वकर्णककुभधातकीतिन्दुकीषु च ॥
काकोल्यादिगणे चैव पानीयं सर्पिरिष्यते[1] ॥ ५ ॥

धवेत्यादि । अश्वकर्णो गर्दभाण्डः, ककुभोऽर्जुनः । तत्र धवादिकषाये काकोल्यादिकल्के च पानीयं सर्पिः पातव्यं घृतमिष्यते । अन्ये तु काकोल्यादिगणेनैव पानीयं घृतमिच्छन्ति, धवाश्वकर्णादीनि पश्चात्तैले संबध्नन्ति ॥ ५ ॥

कुलत्थाः शङ्खचूर्णं च प्रदेहः सार्वगन्धिकः ॥
गृध्रोलूकपुरीषाणि यवा यवफलो घृतम् ॥ ६ ॥
सन्ध्ययोरुभयोः कार्यमेतदुद्धूपनं शिशोः ॥
वरुणारिष्टकमयं रुचकं सैन्दुकं तथा ॥ ७ ॥
सततं धारयेच्चापि कृतं वा पौत्रजीविकम् ॥
शुक्लाः सुमनसो लाजाः पयः शाल्योदनं तथा ॥८॥
बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ॥

कुलत्था इत्यादि । शङ्खचूर्णं सुदग्धशङ्खचूर्णम् । सर्वगन्धा एलादिकाः, तैः कृतो लेपः सार्वगन्धिकः । गृध्रेत्यादि । यवाः प्रसिद्धाः, यवफलो वंशः, अन्ये यवफला दुग्धिकेत्याहुः ।

१ 'संक्षुद्य तैले संयच्छन्ति' इति पा० ।

वरुणारिष्टकमयं वरुणनिम्बकाष्ठघटितं, रुचकं ग्रीवाभरणं मणिकसंज्ञं धारयेत्। ब्रह्मदेवस्त्वरिष्टं फेनिलमाह । सैन्दुकमिति सिन्दुको निर्गुण्डी, तत्काष्ठकृतं रुचकं; तत्फलकृतमित्यन्ये। पुत्रञ्जीवो मध्यवर्तुलतीक्ष्णाग्रफलो जम्बीरपत्रो वृक्षस्तत्काष्ठकृतं रुचकं, तत्फलकृतमित्यन्ये। केचिदत्रारग्वधं पठन्ति । शुक्लेत्यादि शुक्लाः सुमनसः श्वेतकुसुमानि। निवेद्यो दातव्यः। गोतीर्थे सलिलगोपथे। प्रयतात्मना उपवासादिपवित्रेण । तदुक्तं,— "सोपवासः शुचिर्नक्तं सशस्त्रो निर्हरेद्बलिम्" इति ॥६-८॥—

सङ्गमे च भिषक् स्नानं कुर्याद्धात्रीकुमारयोः ॥ ९ ॥
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ॥
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु ॥ १० ॥
उपासते यां सततं देव्यो विविधभूषणाः ॥
लम्बा कराला विनता तथैव बहुपुत्रिका ॥
रेवती शुष्कनामा या सा ते देवी प्रसीदतु ॥ ११ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे रेवतीप्रतिषेधो नाम (पञ्चमोऽध्यायः, आदितः) एकत्रिंशोऽध्यायः ॥ ३१ ॥

संगम इत्यादि । संगमे नदीद्वयमेलके । रक्षामन्त्रमाह— नानेत्यादि । अपरा देव्यो विविधभूषणा यां रेवतीमुपासते सेवन्ते सा देवी भो बालक ते तव प्रसादं करोतु लोके प्रसादकरा भवतु । रेवती शुष्कनामा शुष्करेवतीार्थः ॥ ९-११ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे रेवतीप्रतिषेधो नामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

द्वात्रिंशत्तमोऽध्यायः ।

अथातः पूतनाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

रेवतीप्रतिषेधानन्तरं स्त्रीग्रहसामान्यात् पूतनाप्रतिषेधारम्भो युज्यत इत्याह—अथात इत्यादि ॥ १ ॥ २ ॥

कपोतवङ्काऽरलुको वरुणः पारिभद्रकः ॥
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ॥३॥
वचा वयःस्था गोलोमी हरितालं मनःशिला ॥
कुष्ठं सर्जरसश्चैव तैलार्थे वर्ग इष्यते ॥ ४ ॥

कपोतवङ्केत्यादि । कपोतवङ्का कबडवङ्केति लोके प्रसिद्धा ब्रह्मसुवर्चलापरपर्याया। आस्फोता सारिवा । वयस्था ब्राह्मी, अन्ये गुडूचीमाहुः। गोलोमी दूर्वा । वर्ग इष्यते इति वर्गग्रहणं यथालाभं प्रक्षेपार्थम् । वचादीनां कल्ककषायाभ्यां तैल साध्यम् ॥ ३ ॥ ४ ॥

हितं घृतं तुगाक्षीर्यां सिद्धं मधुरकेषु च ॥
कुष्ठतालीशखदिरचन्दनस्यन्दने तथा ॥ ५ ॥
देवदारुवचाहिङ्गुकुष्ठं गिरिकदम्बकः ॥
एला हरेणवश्चापि योज्या उद्धूपने सदा ॥ ६ ॥
गन्धनाकुलिकुम्भीके मज्जानो बदरस्य च ॥
कर्कटास्थि घृतं चापि धूपनं सर्षपैः सह ॥ ७ ॥

हितमित्यादि । तुगाक्षीरी वंशलोचना, मधुरकेषु काकोल्यादिषु; काकोल्यादिपाठात्तुगाक्षीरी प्राप्ता, पृथक्पाठो भागद्वयार्थं कुष्ठतालीशादीनां यथालाभनिषेधार्थो वा, ये तुगाक्षीरीं वंशरोचनानुकारिपार्थिवद्रव्यं मन्यन्ते तन्मते द्विरुक्तिर्नास्ति । कल्ककषायाभ्यां सिद्धं घृतं हितमिति संबन्धः । गिरिकदम्बको महाकदम्बः। गन्धनाकुली सुगन्धा रास्ना। कुम्भिका जलजा। जेज्जटाचार्यस्तु न पठत्येतद्देवदार्वादियोगद्वयमपि, गयी तु पठति ॥ ५-७ ॥

काकादनीं चित्रफलां बिम्बीं गुञ्जां च धारयेत् ॥
मत्स्यौदनं च कुर्वीत कृशरां पललं तथा ॥
शरावसंपुटे कृत्वा बलिं शून्यगृहे हरेत् ॥ ८ ॥

काकादनीत्यादि। काकादनी काकतिन्दुकः, 'काला' इत्यन्ये; चित्रफला इन्द्रवारुणी, चित्राण्डिकेत्यन्ये। मत्स्यौदनं मत्स्यभक्तं; पललं तिलपिष्टम्। 'शून्यगृहे हरेत्' इत्यत्र 'शून्यगृहेतरे' इत्यन्ये, तत्रेतरे खण्डगृहे । केचिदत्रेदशं पठन्ति 'हरेद्बलिं चोत्कुरटे' इत्यादि; तत्रोत्कुरटः शून्यागारः, शून्याराम इत्यन्ये ॥८॥

उच्छिष्टेनाभिषेकेण शिशोः स्नपनमिष्यते ॥
पूज्या च पूतना देवी बलिभिः सोपहारकैः ॥ ९ ॥
मलिनाम्बरसंवीता मलिना रूक्षमूर्धजा ॥
शून्यागाराश्रिता[1] देवी दारकं पातु पूतना ॥ १० ॥
दुर्दर्शना सुदुर्गन्धा कराला मेघकालिका ॥
भिन्नगाराश्रया देवी दारकं पातु पूतना ॥ ११ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे (षष्ठोऽध्यायः, आदितः) द्वात्रिंशोऽध्यायः ॥ ३२ ॥

उच्छिष्टेनेत्यादि । उच्छिष्टेनाभिषेकेण आचमनोदकेनेत्यर्थः। पूर्वकल्पेन स्नानम् । रक्षामन्त्रः—मलिनेत्यादि ॥ ९-११ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे पूतनाप्रतिषेधो नाम द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशत्तमोऽध्यायः ।

अथातोऽन्धपूतनाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

पूतनाप्रतिषेधानन्तरं पूतनासामान्यादन्धपूतनाप्रतिषेधारम्भो युज्यत इत्याह—अथात इत्यादि ॥ १ ॥ २ ॥

---

१ 'शून्यारामाश्रिता' इति पा० ।

तिक्तकद्रुमपत्राणां कार्यः क्वाथोऽवसेचने ॥

तिक्तकेत्यादि । तिक्तकद्रुमा निम्बादयः, तत्पत्रक्वाथेन परिषेकः कार्यः ॥—

सुरा सौवीरकं कुष्ठं हरितालं मनःशिला ॥ ३ ॥
तथा सर्जरसश्चैव तैलार्थमुपदिश्यते ॥
पिप्पल्यः पिप्पलीमूलं वर्गो मधुरको मधु ॥ ४ ॥
शालपर्णी बृहत्यौ च घृतार्थमुपदिश्यते ॥

सुरेत्यादि । सौवीरकं विरेचनाध्यायोपदिष्टकाञ्जिकप्रकारः । अत्र तैले सुरासौवीरके तैलात् प्रत्येकं चतुर्गुणे, कुष्ठादीनि कल्कद्रव्याणि चतुर्थांशानि । पिप्पल्य इत्यादि । वर्गो मधुरकः काकोल्यादिः, वर्गग्रहणं यथालाभनिषेधार्थं, पिप्पल्यादीनां कल्कक्वाथाभ्यां घृतं विपाच्य शीतीभूते घृते मधु क्षिपेत् । इदं घृतं पानाय ॥ ३ ॥ ४ ॥—

सर्वगन्धैः प्रदेहश्च गात्रेष्वक्ष्णोश्च शीतलैः ॥ ५ ॥

सर्वेत्यादि । प्रदेहो लेपः । शीतलैरन्यैरपि द्रव्यैः ॥ ५ ॥

पुरीषं कौक्कुटं केशांश्चर्म सर्पत्वचं तथा ॥
जीर्णां च भिक्षुसंघाटीं धूमनायोपकल्पयेत् ॥ ६ ॥

पुरीषं कौक्कुटमिति कुक्कुटपुरीषं, केशांश्चर्म च कुक्कुटस्य, केशाश्चर्म च मानुषस्येत्येके; केचित् चर्मेति सर्पस्य वदन्ति, तेन चर्म त्वक् कञ्चुलिका सर्पस्य । जीर्णां च भिक्षुसङ्घाटीमिति भिक्षुरत्र शाक्यभिक्षुर्बौद्धाख्यः परिव्राजकश्च, तयोर्जीर्णसङ्घाटी जीर्णवस्त्रं; तदेकदेशो गृह्यते, एकदेशेऽपि समुदायप्रवृत्तेः; भिक्षुरत्र शाक्यभिक्षुरेवेति जेज्जटः ॥ ६ ॥

कुक्कुटीं मर्कटीं शिम्बीमनन्तां चापि धारयेत् ॥
मांसमामं तथा पक्वं शोणितं च चतुष्पथे ॥ ७ ॥
निवेद्यमन्तश्च गृहे शिशो रक्षानिमित्ततः ॥
शिशोश्च स्नपनं कुर्यात् सर्वगन्धोदकैः शुभैः ॥ ८ ॥
कराला पिङ्गला मुण्डा कषायाम्बरवासिनी ॥
देवी बालमिमं प्रीता संरक्षत्वन्धपूतना ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रेऽन्धपूतनाप्रतिषेधो नाम (सप्तमोऽध्यायः, आदितः) त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

कुक्कुटीमित्यादि । कुक्कुटी स्फटिकरचितकुक्कुटाण्डसदृशकन्दा कुक्कुटीशरीरवत् कुसुमचित्रा वल्ली । मर्कटी कपिकच्छुः, मर्कटमूलीत्यन्ये, शुकशिम्बीत्यपरे । अनन्ता सारिवा । अन्तश्च खण्डगृहाभ्यन्तरे । शिशोश्चेति चकारात् धात्र्याश्च स्नपनम् । सर्वगन्धा एलादिकाः । देवी प्रीता सतीमं बालं रक्षत्विति संबन्धः ॥ ७–९ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रेऽन्धपूतनाप्रतिषेधो नाम त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशत्तमोऽध्यायः ।

अथातः शीतपूतनाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अन्धपूतनाप्रतिषेधानन्तरं पूतनासामान्याच्छीतपूतनाप्रतिषेधारम्भो युज्यत इत्याह—अथात इत्यादि ॥ १ ॥ २ ॥

कपित्थं सुवहां बिम्बीं तथा बिल्वं प्रचीबलम् ॥
नन्दीं भल्लातकं चापि परिषेके प्रयोजयेत् ॥ ३ ॥
वस्तमूत्रं गवां मूत्रं मुस्तं च सुरदारु च ॥
कुष्ठं च सर्वगन्धांश्च तैलार्थमवचारयेत् ॥ ४ ॥
रोहिणीसर्जखदिरपलाशककुभत्वचः ॥
निष्क्वाथ्य तस्मिन्निष्क्वाथे सक्षीरं विपचेद्घृतम् ॥५॥
गृध्रोलूकपुरीषाणि वस्तगन्धामहेस्त्वचः ॥
निम्बपत्राणि मधुकं धूपनार्थं प्रयोजयेत् ॥ ६ ॥
धारयेदपि लम्बां च गुञ्जां काकादनीं तथा ॥

कपित्थमित्यादि । सुवहा गोधापदी । प्रचीबलो मत्स्याक्षकः, काकजङ्घेत्यन्ये । नदीभल्लातकं नदीपिप्पलिका गण्डोपलीति पर्याया । सर्वगन्धा एलादिकाः । अत्र तैले कुष्ठद्वयस्य पाठो भागद्वयार्थः । रोहिणी कट्फलः । रोहिण्यादिक्वाथे त्रिगुणे क्षीरैकभागे घृतं पचेत् । वस्तगन्धा बोधयिका । अहेस्त्वचः सर्पस्य कञ्चुकाः । लम्बा तिक्तालाबूः । काकादनी काकतिन्दुका ॥३–६॥—

नद्यां मुद्गकृतैश्चान्नैस्तर्पयेच्छीतपूतनाम् ॥ ७ ॥
देव्यै देयश्चोपहारो वारुणी रुधिरं तथा ॥
जलाशयान्ते बालस्य स्नपनं चोपदिश्यते ॥ ८ ॥

नद्यामित्यादि । मुद्गकृतैरन्नैः मुद्गकृतैर्भक्ष्यैः, मुद्गोदनेनेति गयी । उपहारो बलिः । जलाशयान्ते नद्याः समीपे ॥७॥८॥

मुद्गौदनाशना देवी सुराशोणितपायिनी ॥
जलाशयालया देवी पातु त्वां शीतपूतना ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे शीतपूतनाप्रतिषेधो नाम (अष्टमोऽध्यायः, आदितः) चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

रक्षामाह–मुद्गेत्यादि ॥ ९ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे शीतपूतनाप्रतिषेधाध्यायश्चतुस्त्रिंशत्तमः ॥ ३४ ॥

पञ्चत्रिंशत्तमोऽध्यायः ।

अथातो मुखमण्डिकाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

शीतपूतनाप्रतिषेधानन्तरं स्त्रीग्रहसामान्यान्मुखमण्डिकाप्रतिषेधारम्भो युज्यत इत्याह—अथात इत्यादि ॥ १ ॥ २ ॥

कपित्थबिल्वतर्कारीवांशीगन्धर्वहस्तकाः ॥
कुबेराक्षी च योज्याः स्युर्बालानां परिषेचने ॥ ३ ॥

कपित्थेत्यादि । तर्कारी अरणिका, वांशी वंशलोचना, कुबेराक्षी काष्टपाटला, पेटिकेत्यन्ये ॥ ३ ॥

स्वरसैर्भृङ्गवृक्षाणां तथाऽजहरिगन्धयोः ।
तैलं वसां च संयोज्य पचेदभ्यञ्जने शिशोः ॥ ४ ॥

भृङ्गवृक्षाणामिति वातहरबिल्वादिकानां भृङ्गाः पत्रभङ्गाः, तदुपयोगिका वृक्षाः । अजहरिगन्धयोरिति वस्तगन्धाश्वगन्धयोः, अजाश्वगन्धाचतुर्गुणरसेन तैलं वसां च संयोज्य यमकं पचेदिति मन्यन्ते; 'अजहरिगन्धयोः' इत्यत्र च 'तथैव हरिगन्धया' इति पठन्ति ॥ ४ ॥

मधूलिकायां पयसि तुगाक्षीर्यां गणे तथा ॥
मधुरे पञ्चमूले च कनीयसि घृतं पचेत् ॥ ५ ॥

मधूलिकायामित्यादि । मधूलिका मर्कटहस्ततृणम् । पयसि गोक्षीरे । अत्र गयी पयःस्विनीति पठति, तत्र क्षीरविदारीगणे; तथा मधुरे काकोल्यादिके, पञ्चमूले कनीयसि शालपर्ण्यादिके । मधूलिकादिकल्कक्काथाभ्यां घृतं पचेत् ॥ ५ ॥

वचा सर्जरसः कुष्ठं सर्पिश्चोद्धूपनं हितम् ॥
धारयेदपि जिह्वाश्च चापचीरल्लिसर्पजाः ॥ ६ ॥
वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा ॥
मनःशिलां चोपहरेद्गोष्ठमध्ये वलिं तथा ॥ ७ ॥
पायसं सपुरोडाशं बल्यर्थमुपसंहरेत् ॥
मन्त्रपूताभिरद्भिश्च तत्रैव स्नपनं हितम् ॥ ८ ॥

वचेत्यादि । चाषः कर्णायसः, चीरल्लिः 'चिल्ल' इति लोके, चाषादिजिह्वां धारयेत् । वर्णको रोचनिका कम्पिल्लक इत्यर्थः, कङ्कुष्ठमित्यन्ये । माल्यं पुष्पम् । अञ्जनं रसाञ्जनं, सौवीराञ्जनमित्यन्ये । पारदं शम्भुरेतः । पूर्वकल्पेन शाल्यादिकृतमण्डले गोष्ठमध्ये वर्णकादिबलिमुपहरेत्, अन्ये तु वर्णकादिद्रव्याणि मण्डलार्थं मन्यन्ते । पायसं क्षीरसंसिद्धास्तण्डुलाः, पुरोडाशः अष्टाकपालः पिष्टमयः कपालोपरि पक्वस्तृणाग्निना । मन्त्रेत्यादि मन्त्रपूताभिः गायत्र्या अभिमन्त्रिताभिः । तत्रैव गोष्ठमध्ये ॥६–८॥

अलङ्कृता रूपवती सुभगा कामरूपिणी ॥
गोष्ठमध्यालयरता पातु त्वां मुखमण्डिका ॥ ९ ॥

रक्षामाह—अलङ्कृतेत्यादि ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे मुखमण्डिकाप्रतिषेधो नाम (नवमोऽध्यायः,-आदितः) पञ्चत्रिंशत्तमोऽध्यायः ॥ ३५ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे मुखमण्डिकाप्रतिषेधाध्यायः पञ्चत्रिंशत्तमः ॥ ३५ ॥

---

१ 'भृङ्गवृक्षो भृङ्गराज' इति हाराणचन्द्रः ।

षट्त्रिंशत्तमोऽध्यायः ।

अथातो नैगमेषप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

मुखमण्डिकाप्रतिषेधानन्तरं परिशिष्टत्वान्नैगमेषप्रतिषेधारम्भो युक्त इत्याह—अथातो नैगमेषप्रतिषेधमित्यादि ॥१॥२॥

बिल्वाग्निमन्थपूतीकाः कार्याः स्युः परिषेचने ॥
सुरा सबीजं धान्याम्लं परिषेके च शस्यते ॥ ३ ॥
प्रियङ्गुसरलानन्ताशतपुष्पाकुटन्नटैः ॥
पचेत्तैलं सगोमूत्रैर्दधिमस्त्वम्लकाञ्जिकैः ॥ ४ ॥

बिल्वाग्निमन्थेत्यादि । पूतीकश्चिरबिल्वः । 'सुरा सबीजं धान्याम्लं' इत्यत्रान्ये 'सुरासबीजधान्याम्लैः' इति पठन्ति; तथा पाठे सबीजं धान्याम्लं बीजेन सह काञ्जिकमिति । अन्ये तु सुरास्थाने तथेति पठन्ति । सबीजमप्यत्र सौवीरमिति केचित् । प्रियङ्गुसरलेत्यादि । सरला शुक्ला त्रिवृत्, अनन्ता उत्पलसारिवा, कुटन्नटं तगरं; तत्र प्रियङ्ग्वादिकल्कं चतुर्थांशं, दध्यादिद्रव्यैश्चतुर्भिः प्रत्येकं समं तैलं पचेदिति क्रमः ॥ ३ ॥ ४ ॥

पञ्चमूलद्वयक्वाथे क्षीरे मधुरकेषु च ॥
पचेद्धृतं च मेधावी खर्जूरीमस्तकेऽपि वा ॥ ५ ॥

पञ्चमूलद्वयक्काथे इति पञ्चमूलद्वयक्काथे दशमूलक्काथे त्रिगुणे, क्षीरे घृतसमे, काकोल्यादिकल्कचतुर्थांशं, खर्जूरीमज्जचतुर्थांशं वा घृतं पानार्थं पचेदित्यर्थः ॥ ५ ॥

वचां वयःस्थां गोलोमीं जटिलां चापि धारयेत् ॥
उत्सादनं हितं चात्र स्कन्दापस्मारनाशनम् ॥ ६ ॥

वचामित्यादि । वयःस्था गुडूची, ब्राह्मीत्यन्ये, गोलोमी दूर्वा, जटिला मांसी । उत्सादनमुद्वर्तनम् ॥ ६ ॥

सिद्धार्थकवचाहिङ्गुकुष्ठं चैवाक्षतैः सह ॥
भल्लातकाजमोदाश्च हितमुद्धूपनं शिशोः ॥ ७ ॥

सिद्धार्थकेत्यादि । अक्षता यवाः ॥ ७ ॥

मर्कटोलूकगृध्राणां पुरीषाणि नवग्रहे ॥
धूपः सुप्ते जने कार्यो बालस्य हितमिच्छता ॥ ८ ॥

मर्कटेत्यादि । मर्कटादिपुरीषेण रात्रौ सुप्ते लोके बालस्य धूपनम् ॥ ८ ॥

तिलतण्डुलकं माल्यं भक्ष्यांश्च विविधानपि ॥
कुमारपितृमेषाय वृक्षमूले निवेदयेत् ॥ ९ ॥

तिलेत्यादि । विविधान् स्वस्तिकमोदकादीन् । कुमारपितृमेषायेति कुमाराणां पिता रक्षणात्मकत्वात्, मेषो नैगमेषः, तस्मै नैगमेषाय । वृक्षमूले क्षीरवृक्षमूले । निवेदयेत्तिलादिकं बलिम् ॥ ९ ॥

कुधस्ताद्वटवृक्षस्य स्नपनं चोपदिश्यते ॥
बलिं न्यग्रोधवृक्षेषु तिथौ षष्ठ्यां निवेदयेत् ॥ १० ॥

अजाननश्चलाक्षिभ्रूः कामरूपी महायशाः ॥
बालं बालपिता देवो नैगमेषोऽभिरक्षतु ॥ ११ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे नैगमेषप्रतिषेधो नाम (दशमोऽध्यायः; आदितः) षट्त्रिंशोऽध्यायः ॥ ३६ ॥

रक्षामाह—अधस्तादित्यादि । स्नपनं गायत्र्यभिमन्त्रिताभिरद्भिः । बलिमपि तिलतण्डुलमित्यादिकं वटमूले षष्ठ्यां निवेदयेत् ॥ १० ॥ ११ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे नैगमेषप्रतिषेधाध्यायः षट्त्रिंशत्तमः ॥ ३६ ॥

सप्तत्रिंशत्तमोऽध्यायः।

अथातो ग्रहोत्पत्तिमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

नवग्रहाकृतिविज्ञानं चिकित्सितं चाभिधाय बालग्रहाणामुत्पत्तिं कारणं चाभिधातुं ग्रहोत्पत्त्यध्यायारम्भो युज्यत इत्याह—अथात इत्यादि । ग्रहाणां स्कन्दादीनां, उत्पत्तिरागतिः प्राप्तिः; एतेन क्रीडनार्थं नियोजनमत्रोत्पत्तिः, नाभूतप्रादुर्भावः; कुतः ? तेषां नित्यत्वात् ॥ १ ॥ २ ॥

नव स्कन्दादयः प्रोक्ता बालानां य इमे ग्रहाः ॥
श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः ॥ ३ ॥

नवेत्यादि । विग्रहः शरीरं; तत्र च स्कन्दस्कन्दापस्मारनैगमेषाः पुरुषशरीराः, शेषाः स्त्रीशरीराः ॥ ३ ॥

एते गुहस्य रक्षार्थं कृत्तिकोमाग्निशूलिभिः ॥
सृष्टाः शरवणस्थस्य रक्षितस्यात्मतेजसा ॥ ४ ॥

एते इत्यादि । शरवणस्थस्य आत्मतेजसा रक्षितस्यापि रक्षार्थं कृत्तिकादिभिरेते स्कन्दादयो ग्रहाः सृष्टा नियोजिता इत्यर्थः; गुहस्य कार्तिकेयस्य, आत्मतेजसा स्वशक्त्या । ननु स्वभावरक्षितस्य गुहस्य रक्षकैः किं ? उच्यते—यथा स्वशक्त्या अनभिभवनीयस्यापि इन्द्रस्य अन्ये देवा रक्षकाः, प्रभुधर्मत्वात्; तद्वद्गुहस्यापि अन्ये ग्रहा रक्षकाः, प्रभुधर्मत्वात् ॥ ४ ॥

स्त्रीविग्रहा ग्रहा ये तु नानारूपा मयेरिताः ॥
गङ्गोमाकृत्तिकानां ते भागा राजसतामसाः ॥ ५ ॥

स्त्रीत्यादि । स्त्रीविग्रहा नारीशरीराः, नानारूपा मेषादिमुखाः, मया धन्वन्तरिणा, ईरिताः कथिताः । ते स्त्रीविग्रहाः । भागा अंशाः, राजसतामसा मता रजस्तमोमयाः स्मृताः । यद्यपि सर्वग्रहाणां रजस्तमोमयत्वं, तथाऽपि स्त्रीविग्रहाणामेवात्यर्थं रजस्तमोगुणभूयिष्ठत्वं; तद्भूयिष्ठत्वाच्चातिशयेन हिंसात्मकत्वमिति तेभ्यो बालको रक्षितव्यः ॥ ५ ॥

नैगमेषस्तु पार्वत्या सृष्टो मेषाननो ग्रहः ॥
कुमारधारी देवस्य गुहस्यात्मसमः सखा ॥ ६ ॥

नैगमेष इत्यादि । नैगमेषः पुंग्रहः, मेषानन एडकमुखः, बालकौतुकाय सृष्टः । कुमारधारी कुमारपालयिता; 'कुमारहारी' इत्यन्ये पठन्ति, तत्र कुमारान् हरतीत्यर्थः । आत्मसम आत्मतुल्यः, सखा मित्रम् । 'आत्मसम' इत्यत्रान्ये 'आत्मोद्भव' इति पठन्ति, तत्रात्मोद्भवः पुत्रः ॥ ६ ॥

स्कन्दापस्मारसंज्ञो यः सोऽग्निनाऽग्निसमद्युतिः ॥
स च स्कन्दसखा नाम विशाख इति चोच्यते ॥७॥

स्कन्देत्यादि । अपस्मारविकारलिङ्गलिङ्गितविकारित्वेन स्कन्दापस्मार इत्युच्यते । सोऽग्निना सृष्ट इति संबध्यते । विशाख इति स्कन्दापस्मारस्यापरं नाम ॥ ७ ॥

स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा ॥
बिभर्ति चापरां संज्ञां कुमार इति स ग्रहः ॥ ८ ॥

स्कन्द इत्यादि । त्रिपुरारिणा रुद्रेण सृष्टः ॥ ८ ॥

बाललीलाधरो योऽयं देवो रुद्राग्निसंभवः ॥
मिथ्याचारेषु[1] भगवान् स्वयं नैष प्रवर्तते ॥ ९ ॥

गुहस्य स्कन्दादिभ्यो भेदमाह—बाललीलाधर इत्यादि । लीला चेष्टा, रुद्राग्निसंभव इति रुद्रसंभवोऽग्निसंभवश्च । मिथ्याचारेषु बालेष्वित्यर्थः । स्वयं न प्रवर्तते तदनुचरास्तु प्रवर्तन्ते, कुतः ? यतोऽस्य देवत्वाद्यागादिभिरेव तृप्तिः । 'बाललीलाधर' इत्यत्र 'बाललीलाटन' इत्यन्ये पठन्ति ॥ ९ ॥

कुमारः स्कन्दसामान्यादत्र केचिदपण्डिताः ॥
गृह्णातीत्यल्पविज्ञाना ब्रुवते देहचिन्तकाः ॥ १० ॥

कुमार इत्यादि । कुमारः कार्तिकेयः, स्कन्दसामान्यात् स्कन्दग्रहनामतुल्यत्वाद्बालं गृह्णातीति ये केचिदपण्डिता देहचिन्तका वैद्या ब्रुवते तेऽल्पविज्ञाना अपण्डिताः ॥ १० ॥

ततो भगवति स्कन्दे सुरसेनापतौ कृते ॥
उपतस्थुर्ग्रहाः सर्वे दीप्तशक्तिधरं गुहम् ॥ ११ ॥
ऊचुः प्राञ्जलयश्चैनं वृत्तिं नः संविधत्स्व वै ॥
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत् ॥ १२ ॥
ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत् ॥
तिर्यग्योनिं मानुषं च दैवं च त्रितयं जगत् ॥ १३ ॥
परस्परोपकारेण वर्तते धार्यतेऽपि च ॥
देवा मनुष्यान् प्रीणन्ति तैर्यग्योनींस्तथैव च ॥१४॥
वर्तमानैर्यथाकालं शीतवर्षोष्णमारुतैः ॥
इज्याञ्जलिनमस्कारजपहोमव्रतादिभिः ॥ १५ ॥
नराः सम्यक् प्रयुक्तैश्च प्रीणन्ति त्रिदिवेश्वरान् ॥
भागधेयं विभक्तं च शेषं किञ्चिन्न विद्यते ॥ १६ ॥
तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति ॥
कुलेषु येषु नेज्यन्ते देवाः पितर एव च ॥ १७ ॥

---

१ 'मिथ्या बालेषु' इति पा०।

ब्राह्मणाः साधवश्चैव गुरवोऽतिथयस्तथा ॥
निवृत्ताचारशौचेषु परपाकोपजीविषु ॥ १८ ॥
उत्सन्नवलिभिक्षेषु भिन्नकांस्योपभोजिषु ॥
गृहेषु तेषु ये बालास्तान् गृह्णीध्वमशङ्किताः ॥१९॥
तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति ॥
एवं ग्रहाः समुत्पन्ना बालान् गृह्णन्ति चाप्यतः ॥२०॥
ग्रहोपसृष्टा बालास्तु दुश्चिकित्स्यतमा मताः ॥

के तर्हि बालान् गृह्णन्तीति पृष्ट आह—तत इत्यादि । ततो गुहरक्षार्थं नवग्रहेषु सृष्टेषु सत्सु, अनन्तरं सुरा देवास्तेषां सेना तस्याः पतौ स्वामिनि गुहे कृते सति, उपतस्थुः आगताः । शक्तिरायुधविशेषः । ऊचुः उक्तवन्तः । प्राञ्जलयः संयोजितहस्ताः । एनं गुहं प्रति; एनमित्यत्र अन्ये देवेति गुहसंबोधनं पठन्ति । किमूचुः? वृत्तिं वर्तनं, नोऽस्माकं, संविधत्स्व कुरु, वै स्फुटम् । आत्मवृत्त्यर्थमुपस्थितानां ग्रहाणां कार्तिकेयेन किं कृतमित्याह—तेषामित्यादि । ततः स्कन्दः शिवं देवमचोदयत्तेषां ग्रहाणामर्थे, ततो ग्रहवृत्तिप्रार्थनादनन्तरं, स्कन्दः कार्तिकेयः, अचोदयत् प्रार्थितवान् । एवं ग्रहार्थे प्रार्थितः शङ्करः किं कृतवानित्याह—तत इत्यादि । ततः प्रार्थनानन्तरं तान् ग्रहान् प्रति भगवान् भगनेत्रहृत् भगलोचनहारी रुद्र उक्तवान् । किमुक्तवानित्याह—तिर्यगित्यादि । तिर्यग्योनिमानुषदेवानां त्रितयं जगच्छब्दवाच्यं, एतत्रितयं परस्परमन्योन्योपकारेण वर्तते, धार्यतेऽपि चेति चकारात् क्रियते च । तत्र तिर्यग्योनयो गवादयः, ते मनुष्यानुपकुर्वन्ति वहनादिना; मानुषाश्च माषादिदानेन तिर्यग्योनीनुपकुर्वन्ति । देवमानुषयोः परस्परोपकारमाह—देवा इत्यादि । यथाकालं शीतोष्णवर्षादीन् कृत्वा मानुषान् तिर्यग्योनींश्च प्रीणयन्तीति संवन्धः । देवेषु मानुषोपकारमाह—इज्येत्यादि । इज्या यागः, अञ्जलिः करद्वययोजनं, नमस्कारः प्रणामः, जप ओङ्कारपूर्वकं गायत्र्याद्यावर्तनं, होमो लक्षादिसंख्याहुतिभिर्वह्नौ हवनं, व्रतं प्रसिद्धं, सम्यक्प्रयुक्तैर्वेदोक्तविधानेन प्रयुक्तैः; इज्याञ्जलिप्रभृतिभिः सम्यक् प्रयुक्तैर्नरास्त्रिदिवेश्वरान् देवान् प्रीणयन्तीति संबन्धः । भागधेयमित्यादि । भागधेयंशसमूहः, विभक्तं देवादित्रितयेन सर्वमेव विभज्य गृहीतं, शेषमवशिष्टं, किञ्चिन्नास्ति यतस्तत्तस्माद्बालग्रहरक्षार्थं सृष्टत्वाद्युष्माकं वृत्तिरपि भो ग्रहा बालेष्वेव भविष्यतीति । अनपराधेषु बालेषु वृत्तिं कल्पयन् शम्भुरपि दोषभाक् स्यादतः सापराधेषु वृत्तिमाह—कुलेष्वित्यादि । नेज्यन्ते न पूज्यन्ते, उत्सन्ने नष्टे वलिभिक्षे येषु तानि तथा, तेषु वृत्तिरिति । अत्र हिंसनमेव वृत्तिः । पूजा चैवेति पुष्पादिना भोजनादिना चेत्यर्थः ॥ ११-२० ॥—

वैकल्यं मरणं चापि ध्रुवं स्कन्दग्रहे मतम् ॥ २१ ॥
स्कन्दग्रहोऽत्युग्रतमः सर्वेष्वेव यतः स्मृतः ॥
अन्यो वा सर्वरूपस्तु न साध्यो ग्रह उच्यते ॥ २२ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे ग्रहोत्पत्त्यध्यायो नाम (एकादशोऽध्यायः, आदितः) सप्तत्रिंशत्तमोऽध्यायः ॥ ३७ ॥

एवमित्यादि । वैकल्यं विकलाङ्गता । ध्रुवं निश्चितम् । स्कन्देत्यादि । सर्वेष्वेव ग्रहेषु मध्ये स्कन्दग्रहो यतोऽत्युग्रतमः, अत एव तद्गृहीतस्य ध्रुवं मरणं, अथ कथंचिज्जीवति तदा वैकल्यमिति । अन्य इत्यादि । अन्यो वा स्कन्दापस्मारादिकः ॥२१॥२२॥

इति श्रीडल्हणाचार्यविरचितायां निवन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे ग्रहोत्पत्त्यध्यायः सप्तत्रिंशत्तमः ॥ ३७ ॥

अष्टात्रिंशत्तमोऽध्यायः ।

अथातो योनिव्यापत्प्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

ग्रहोत्पत्त्यध्यायानन्तरं तिर्यग्योनिं मानुषं चेति वचनेन योनेर्नामसंकीर्तनात् कुमारजन्मविकारकारणत्वाच्च योनेर्व्यापचिकित्सितार्थं योनिव्यापत्प्रतिषेधाध्यायारम्भो युज्यत इत्याह—अथात इत्यादि । योनिव्यापदो योनिरोगाः, तेषां प्रतिषेधश्चिकित्सितमिति ॥ १ ॥ २ ॥

प्रवृद्धलिङ्गं पुरुषं याऽत्यर्थमुपसेवते ॥
रूक्षदुर्वलवाला या तस्या वायुः प्रकुप्यति ॥ ३ ॥
स दुष्टो योनिमासाद्य योनिरोगाय कल्पते ॥

प्रवृद्धेत्यादि । रुक्षदुर्वलबाला या स्त्री प्रवृद्धलिङ्गमतिप्रलम्बमेहनं पुरुषमतिशयेन सेवते । तस्या वायुः प्रकोपमापद्यते, स वायुः प्रकुपितः सन् पित्तश्लेष्माणौ कोपयति, अथवा वातः पित्तश्लेष्माणौ स्वहेतुभिः कुपितौ गृहीत्वा योनिरोगाय कल्पते समर्थो भवति ॥ ३ ॥—

त्रयाणामपि दोषाणां यथास्वं लक्षणेन तु ॥ ४ ॥
विंशतिर्व्यापदो योनेर्निर्दिष्टा रोगसंग्रहे ।
मिथ्याचारेण याः स्त्रीणां प्रदुष्टेनार्तवेन च ॥ ५ ॥
जायन्ते बीजदोषाच्च दैवाच्च शृणु ताः पृथक् ।

तेषां योनिरोगाणां सामान्यज्ञानोपायमाह—त्रयाणामित्यादि । यथास्वं लक्षणेन योनिरोगं जानीयादित्यर्थः ॥ ४ ॥ ५ ॥—

उदावर्ता तथा वन्ध्या विप्लुता च परिप्लुता ॥ ६ ॥
वातला चेति वातोत्थाः, पित्तोत्था रुधिरक्षरा ।
वामिनी स्रंसिनी चापि पुत्रघ्नी पित्तला च या ॥७॥
अत्यानन्दा च या योनिः कर्णिनी चरणाद्वयम् ।
श्लेष्मला च कफाज्ज्ञेया, षण्डाख्या फलिनी तथा ८
महती सूचिवक्त्रा च सर्वजेति त्रिदोषजा ।

---

१ 'वृत्तिजीवनं' इति पा० । २ 'शीतोष्णवर्षादिभिः' इति पा० । ३ 'उत्सन्नवलिभिक्षेषु नष्टपूजाभिक्षेषु' इति पा० ।

१ 'चरणीद्वयम्' इति पा० । २ 'श्लैष्मिकी सकफा ज्ञेया' इति पा० । ३ 'मेहनी' इति पा० ।

वातजाः पञ्च योनिव्यापद आह—उदावर्तेत्यादि । उदावर्ता, वन्ध्या, विप्लुता, परिप्लुता, वातला, इति पञ्च वातोत्थाः । पित्तजाः पञ्चाह—रुधिरक्षरा, वामिनी, स्रंसिनी, पुत्रघ्नी, पित्तला, इति पञ्च पित्तोत्थाः । कफजाः पञ्चोच्यन्ते—अत्यानन्दा, कर्णिनी, चरणाद्वयं, श्लेष्मला, इति पञ्च कफोत्थाः । सन्निपातजाः पञ्चोच्यन्ते—षण्डी, फलिनी, महती, सूचिवक्त्रा, सर्वजा, इति पञ्च सन्निपातजाः ॥ ६–८॥—

सफेनिलमुदावर्ता रजः कृच्छ्रेण मुञ्चति ॥ ९ ॥
वन्ध्यां नष्टार्तवां विद्याद्विप्लुतां नित्यवेदनाम् ।
परिप्लुतायां भवति ग्राम्यधर्मे रुजा भृशम् ॥ १० ॥
वातला कर्कशा स्तब्धा शूलनिस्तोदपीडिता ।
चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः ॥ ११ ॥

वातजानां योनिव्यापदां पृथग्लक्षणमाह—सफेनिलमित्यादि । या उदावर्ता योनिः सा फेनिलं फेनसहितं रज आर्तवं कच्छ्रेण दुःखेन मुञ्चति । विप्लुता नित्यं रुजावती, परिप्लुता पुनर्व्यवाय एव पीडावतीत्यनयोर्भेदः । वातलेत्यादि । स्तब्धा तनटितेव । शूलं वातशूलं, निस्तोदः सूचीभिरिव व्यधनम् । किं वातलायामेवानिलवेदना भवन्ति उतान्यास्वपीत्याह—चतसृष्वित्यादि । आद्यासु उदावर्तादिष्वपीत्यर्थः ॥ ९–११ ॥

सदाहं प्रक्षरत्यस्रं यस्यां सा लोहितक्षरा ।
सवातमुद्गिरेद्बीजं वामिनी रजसा युतम् ॥ १२ ॥
प्रस्रंसिनी स्यन्दते तु क्षोभिता दुःप्रसूश्च या ।
स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात् ॥१३॥
अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता ।
चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत् ॥१४॥

सदाहमित्यादि । अस्रमार्तवं, 'सदाहं क्षीयते रक्तं यस्यां सा लोहितक्षया' इति केचित् पठन्ति । बीजं शुक्रम् । उद्गिरेत् वमेत् । रजसा युतमार्तवमिश्रम् । स्यन्दते स्रवति, क्षोभिता संचालिता, दुःप्रसूः दुःखेन प्रसूयते, या एवंविधा योनिः सा प्रस्रंसिनीति संबन्धः । दुःप्रसूश्चेत्यत्रान्ये 'दुःप्रजायना' इति पठन्ति, दुष्टीभूतापत्यमार्गेति व्याख्यानयन्ति । स्थितमित्यादि । स्थितं स्थितं गर्भं हन्ति नोत्पन्नमात्रम् । चतसृषु आद्यासु लोहितक्षरादिषु । पित्तलिङ्गोच्छ्रायः ओषचोषादिका वेदनाः ॥ १२–१४ ॥

अत्यानन्दा न सन्तोषं ग्राम्यधर्मेण गच्छति ।
कर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते १५
मैथुनेऽचरणा पूर्वं पुरुषादतिरिच्यते ।
बहुशश्चातिचरणादन्या बीजं न विन्दति ॥ १६ ॥
श्लेष्मला पिच्छिला योनिः कण्डूयुक्ताऽतिशीतला ।
चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रितिर्भवेत् ॥१७॥

अत्यानन्देत्यादि । ग्राम्यधर्मेण मैथुनेन । कर्णिका मांसकन्दी । मैथुनेत्यादि । पूर्वा चरणी अतिरिच्यते मैथुनाचरणेऽधिका भवति; अन्ये 'मैथुनेऽचरणा पूर्वं' इति पठन्ति, शेषं समम् । पुरुषात् पूर्वमतिरिच्यते, अत्यर्थं कण्डूयत इत्यर्थः । बहुशो अतिचरणात् मैथुनात्, अन्या अतिचरणा, बीजं गर्भाङ्कुरजननं, न विन्दति न प्राप्नोति । 'बहुशश्चातिचरणी तयोर्बीजं न तिष्ठति' इति केचित् पठन्ति, अतिचरणा बहुशो मैथुनं व्रजति, तयोश्चरणातिचरणयोर्बीजं न तिष्ठति स्थितिं न करोतीत्यर्थः । श्लेष्मलेत्यादि । आद्यासु अत्यानन्दादिषु श्लेष्मलिङ्गोच्छ्रितिः पैच्छिल्यकण्ड्वादिकाः ॥ १५–१७ ॥

अनार्तवस्तना षण्डी खरस्पर्शा च मैथुने ।
अतिकायगृहीतायास्तरुण्याः फलिनी भवेत् ॥ १८ ॥
विवृताऽतिमहायोनिः सूचीवक्त्राऽतिसंवृता ।
सर्वलिङ्गसमुत्थाना सर्वदोषप्रकोपजा ॥ १९ ॥
चतसृष्वपि चाद्यासु सर्वलिङ्गोच्छ्रितिर्भवेत् ।
पञ्चासाध्या भवन्तीमा योनयः सर्वदोषजाः ॥ २० ॥

सान्निपातिकाः पञ्चोच्यन्ते । वन्ध्याषण्ड्योः सस्तनत्वनिस्तनत्वे विशेषतः । खरस्पर्शा चेति चकारान्मैथुनद्वेषनिषेधः । अतिकायो बृहत्साधनो नरस्तेन गृहीताया फलिनीति संज्ञा, 'अफलिनी' इत्यन्ये पठन्ति, तत्र अतिकायगृहीता या तरुणी सा अफलिनी अप्रजा इति व्याख्या । अतिविवृता महायोनिरुच्यते । सूचीवक्त्राऽतिसंवृता अत्यर्थसङ्कुचितमुखी, सङ्कुचितमुखेत्युच्यते । सर्वलिङ्गा सर्वचिह्ना, सर्वसमुत्थाना सर्वकारणा, या सा सर्वजा कथ्यते । चतसृष्वित्यादि । चतसृष्वपि चाद्यासु षण्डीप्रभृतिषु; सर्वलिङ्गोच्छ्रितिरिति रौक्ष्यतोदादिका वातलिङ्गोच्छ्रितयः, चोषादिकाः पित्तलिङ्गोच्छ्रितयः, स्नेहकण्ड्वादिकाः श्लेष्मलिङ्गोच्छ्रितयश्च ॥ १८–२० ॥

प्रतिदोषं तु साध्यासु स्नेहादिक्रम इष्यते ।
दद्यादुत्तरवस्तींश्च विशेषेण यथोदितान् ॥ २१ ॥

प्रतीत्यादि । साध्यासु योनिव्यापत्सु प्रतिदोषं यः स्नेहादिक्रमः स इष्यत इत्यर्थः । एतेन यस्य दोषस्य यः प्रत्यनीकः स्नेहस्तेन स्नेहेन संस्नेह्य संस्वेद्य ततो वमनादीन् साध्यास्ववचारयेदिर्थः । यथोदितानिति वातादिभेदेनेत्यर्थः ॥ २१ ॥

कर्कशां शीतलां स्तब्धामल्पस्पर्शां च मैथुने ।
कुम्भीस्वेदैरुपचरेत् सानूपौदकसंयुतैः ॥ २२ ॥
मधुरौषधसंयुक्तान् वेशवारांश्च योनिषु ।
निक्षिपेद्धारयेच्चापि पिचुतैलमतन्द्रितः ॥ २३ ॥
धावनानि च पथ्यानि कुर्वीतापूरणानि च ।

कर्कशामित्यादि । अल्पस्पर्शामिति अतिव्यवायकुद्धवातजनितसुप्तित्वात् । 'शीतलां' इत्यत्रान्ये तु 'तुमूलाम्' इति पठन्ति, तत्र शूलतोदवेदनासङ्कुलामिति व्याख्या । कुम्भीस्वेदैः आनू-

१ 'मैथुनेऽचरणी' इति पा० ।

१ 'तयोश्चरण्यतिचरण्योः' इति पा० । २ 'सशूलां' इति पा० ।

पौदकमांसवातघ्नद्रव्यक्काथपूर्णां कुम्भीं कृत्वा भूमौ निखन्य तदुपरि शय्यां संस्थाप्याग्निसन्तप्तलौहपाषाणगुडकान् क्काथे निक्षिप्य तदुत्थितैर्बाष्पस्वेदैर्योनिप्रदेशमात्रगामिभिरुपचरेत्; अन्ये तु कुम्भीं वातहरद्रव्यानूपौदकमांसपूर्णां सजलां कृत्वा प्रवृत्तोष्माणं गृह्णीयादिति व्याख्यानयन्ति। उपनाहविशेषमाह—मधुरेत्यादि। मधुराणि काकोल्यादीनि कल्कीकृतानि, तैर्युक्तान् वेशवारान् कृतान्नवर्गोक्तान् योनिषु निक्षिपेत्, पिचुतैलं पिचुना तुलकेन तैलं वातघ्नद्रव्यक्काथसिद्धं योनिषु धारयेत्। अतन्द्रितो निरन्तरैकारीत्यर्थः[1]। पिचुतैलं बलाशृतमित्यन्ये। धावनानि प्रक्षालनानि। पथ्यानि वातहरौषधसिद्धानीत्यर्थः ॥ २२ ॥ २३ ॥—

ओषचोषान्वितासूक्तं कुर्याच्छीतं विधिं भिषक् २४

शीतं विधिं रक्तपित्तहरम् ॥ २४ ॥

दुर्गन्धां पिच्छिलां चापि चूर्णैः पञ्चकषायजैः ।
पूरयेद्राजवृक्षादिकषायैश्चापि धावनम् ॥ २५ ॥

दुर्गन्धां पित्तेन, पिच्छिलां कफेन । पञ्च कषाया न्यग्रोधोदुम्बरप्लक्षाश्वत्थगर्दभाण्डाः । तच्चूर्णेन योनिं पूरयेत् । राजवृक्षादिरारग्वधादिः ॥ २५ ॥

योन्यां तु पूयस्राविण्यां शोधनद्रव्यसंभृतैः ।
सगोमूत्रैः सलवणैः शोधनं हितमिष्यते[2] ॥ २६ ॥

शोधनद्रव्याणि मिश्रकोक्तानि ॥ २६ ॥

बृहतीफलकल्कस्य द्विहरिद्रायुतस्य च ।
कण्डूमतीमल्पस्पर्शां पूरयेद्धूपयेत्तथा ॥ २७ ॥
वर्तिं प्रदद्यात् कर्णिन्यां शोधनद्रव्यसंभृताम् ॥
प्रस्रंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत् ॥ २८ ॥
पिधाय वेशवारेण ततो बन्धं समाचरेत् ।
प्रतिदोषं विदध्याच्च सुरारिष्टासवान् भिषक् ॥२९॥
प्रातः प्रातर्निषेवेत रसोनादुद्धृतं रसम् ।
क्षीरमांसरसप्रायमाहारं विदधीत च ॥ ३० ॥

तथाशब्दाद्धूपनमपि बृहतीफलादिभिरेव ॥ २७—३० ॥

शुक्रार्तवादयो दोषाः स्तनरोगाश्च कीर्तिताः ।
क्लैव्यं[3]स्थानानि मूढस्य गर्भस्य विधिरेव च ॥ ३१ ॥
गर्भिणीप्रतिरोगेषु चिकित्सा चाप्युदाहृता ।
सर्वथा तां प्रयुञ्जीत योनिव्यापत्सु बुद्धिमान् ॥
अपप्रजातारोगांश्च चिकित्सेदुत्तराद्भिषक् ॥ ३२ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कुमारतन्त्रे योनिव्यापत्प्रतिषेधो नाम (द्वादशोऽध्यायः, आदितोऽ)ष्टत्रिंशत्तमोऽध्यायः ॥ ३८ ॥

शुक्रेत्यादि । शुक्रार्तवादयो दोषाः शुक्रशोणितशुद्धिशारीरे सलक्षणचिकित्सिता उक्ताः; आदिशब्दाद्धात्रीस्तन्यदोषाश्च । स्तनरोगा विसर्पनाडीस्तनरोगनिदाने, तच्चिकित्सिते तच्चिकित्सा उक्ता । क्लैव्यस्थाना[4]नि क्लैव्यकारणानि क्षीणबलीयवाजिकरणोदितानि । मूढगर्भस्येति स्थानानीत्यत्रापि संबध्यते, तेन मूढगर्भस्य स्थानानि कारणानि, विधिरेव च क्रिया चेत्यर्थः । एतद्द्वयं मूढगर्भनिदाने तच्चिकित्सिते चोक्तम् । गर्भिणीप्रतिरोगेष्विति गर्भिणीप्रतिरोगेषु गर्भिण्या मासानुमासं प्रतिरोगेषु रक्तस्रावादिषु चिकित्सोक्ता । चिकित्सा चेति चकाराद्गर्भिण्याः स्वस्थाया अपि चिकित्सा उदाहृता गर्भिणीव्याकरणशारीरे । केचित् 'गर्भिणीप्रतिरोगेषु' इत्यत्र 'गर्भिणीप्रतिमासेषु' इति पठन्ति । तां चिकित्सां योनिव्यापत्स्वपि सर्वथा प्रयुञ्जीतेत्यर्थः । अपप्रजाता अकालप्रसूता, तस्या रोगान् ज्वरादिकान् । तानुत्तरादुत्तरतन्त्रोक्तज्वरादिचिकित्सितात् । रोगांश्चेति चकार उत्तरतन्त्रादित्यत्र योजनीयः । तेनापप्रजातारोगानुत्तरादुत्तरतन्त्रोक्ताच्चिकित्सेत्, चकारादपतानकादीन् संहितोक्तेन विधिना चिकित्सेदित्यर्थः । अन्ये तु 'उत्तरान्' इति पठन्ति, उत्तरकालभाविनोऽपतानकादीन् भिषक् चिकित्सेत्, 'स्वैश्चिकित्सितैः' इति शेषः ॥ ३१ ॥ ३२ ॥

१ 'निस्तन्द्र इत्यर्थः' इति पा० । २ 'पिण्डेरापूरणं हितम्' इति पा० । ३-४ 'क्लैव्योत्थानानि' इति पा० ।

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कौमारभृत्यतन्त्रे योनिव्यापत्प्रतिषेधाध्यायोऽष्टत्रिंशत्तमः ॥ ३८ ॥
उत्तरतन्त्रे द्वितीयं कौमारतन्त्रं समाप्तम् ॥ २ ॥

एकोनचत्वारिंशत्तमोऽध्यायः ।

अथातो ज्वरप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

कुमारतन्त्रानन्तरं कायचिकित्सारम्भः; यतः कुमारतन्त्रावसाने 'अपप्रजातारोगांश्च चिकित्सेदुत्तराद्भिषक्' इति वाक्ये उत्तरादित्यनेन कायचिकित्सितस्य सूचितत्वात्, अथवा कुमाराणामपि ज्वराद्युत्पत्तौ सत्यां कायचिकित्सितस्योपयोगित्वात् । अत्र कायशब्देन दोषधातुमलसंघात उच्यते, तेन कायस्थितानां[1] ज्वरादीनां चिकित्सा कायचिकित्सा, मञ्चाः क्रोशन्तीतिवत् । अन्ये कायशब्देन कायाग्निं वदन्ति, यतोऽग्निं व्याप्य वै[2] ज्वरादयो भवन्ति । अपरे दुष्टकायः कायः, तस्य चिकित्सा कायचिकित्सेत्याहुः । तस्यामपि कायचिकित्सायां बहुषूपद्रवेषु रुद्रकोपसंभवतया ज्वरस्य गरीयस्त्वात् पूर्वं ज्वरप्रतिषेधारम्भ इत्याह—अथात इत्यादि । अथशब्दोऽनन्तरार्थः । कुतोऽनन्तरमित्याह—अत इति; अस्मात्पूर्वाध्यायादित्यर्थः, अतःशब्दो हेतौ वा, यतोऽयं ज्वरो रुद्रकोपसंभवतया गरीयानतो हेतोरित्यर्थः । प्रतिषेधश्चिकित्सा । विर्विशेषे विविधप्रकारे च; आङ् अभिव्याप्तौ, आभिमुख्ये वा; व्याख्यास्यामः प्रकर्षेण कथयिष्यामः ॥ १ ॥ २ ॥

येनामृतमपां मध्यादुद्धृतं पूर्वजन्मनि ।
यतोऽमरत्वं संप्राप्तास्त्रिदशास्त्रिदिवेश्वरात् ॥ ३ ॥

१ 'तत्रस्थितानां' इति पा० । २ 'यतोऽग्निर्व्याप्यैव' इति पा० ।

**शिष्यास्तं देवमासीनं पप्रच्छुः सुश्रुतादयः ।
व्रणस्योपद्रवाः प्रोक्ताः व्रणिनामप्यतः परम् ॥ ४ ॥
समासाद् व्यासतश्चैव ब्रूहि नो भिषजां वर ! ।**

इदानीं ज्वरप्रतिषेधरूपां धन्वन्तरिस्तुतिं प्रतिपादयन् ज्वरप्रतिपादनहेतुकं धन्वन्तरिं गुरुं प्रति शिष्याणां प्रश्नमाह—येनामृतमपामित्यादि । येन धन्वन्तरिणा । अपां मध्यात् क्षीरार्णवमध्यात् । उद्धृतमानीतम् । पूर्वजन्मनि देवत्वे सति । यतो यस्मात् । त्रिदशेश्वरात् धन्वन्तरेः । अमरत्वं संप्राप्ताः अमृतदानेन; त्रिदशा देवा अमृतप्राप्त्या अमरत्वं संप्राप्ताः । तं देवं धन्वन्तरिनामानम् । आसीनमुपविष्टम् । पप्रच्छुः पृष्टवन्तः । जेज्जटाचार्यस्तु 'त्रिदशास्त्रिदशेश्वरा' इति पठित्वा यतो यस्मात् धन्वन्तरेस्त्रिदशा देवा अमृतप्राप्त्या अमरत्वं संप्राप्ताः सन्तः त्रिदशेश्वराः सञ्जाता इति व्याख्यानयन्ति । अत्र येनामृतमित्यादिश्लोके अमृतामरयोर्नाम ज्वरप्रतिषेधादौ मङ्गलार्थमुक्तम् । यद्यपि प्राक् सुश्रुतस्य प्रश्नकर्तृत्वेन प्राधान्यं, तथाऽप्यत्र सर्वेषामनुग्रहाय प्रश्नेऽधिकारः । किं पप्रच्छुरित्याह—व्रणस्योपद्रवा इत्यादि । व्रणस्योपद्रवा वेदनावर्णास्रावादयः । प्रोक्ता व्रणास्रावविज्ञानीयादिषु । व्रणिनामिति व्रणिनः पुरुषाः, तेषामुपद्रवा ज्वरातीसारादयः, तान् समासात् संक्षेपतः, व्यासतो विस्तारात्; हे भिषजांवर नोऽस्माकं ब्रूहि । अन्ये तु व्रणस्योपद्रवा वर्णास्राववेदनादयः प्रोक्ताः, व्रणिनामपि समासात् प्रोक्ताः; तथा च—"विसर्पः पक्षघातश्च सिरास्तम्भोऽपतानकः । मोहोन्मादौ व्रणरुजा ज्वरस्तृष्णा हनुग्रहः ॥ कासश्छर्दिरतीसारो हिक्का श्वासः सवेपथुः । षोडशोपद्रवाः प्रोक्ता व्रणिनां व्रणचिन्तकैः"—इति; व्यासतश्चातः परं ब्रूहीति व्याख्यानयन्ति ॥ ३ ॥ ४ ॥—

**उपद्रवेण जुष्टस्य व्रणः कृच्छ्रेण सिध्यति ॥ ५ ॥
उपद्रवास्तु व्रणिनः कृच्छ्रसाध्याः प्रकीर्तिताः ।
प्रक्षीणबलमांसस्य शेषधातुपरिक्षयात् ॥ ६ ॥
तस्मादुपद्रवान् कृत्स्नान् ब्रूहि नः सचिकित्सितान् ।
सर्वकायचिकित्सासु ये दृष्टाः परमर्षिणा ॥ ७ ॥**

न परं व्रणितोपद्रवाणामनभिहितत्वात् तान् प्रति प्रश्नः, किन्तर्हि सोपद्रवस्य कृच्छ्रेण व्रणप्रशान्तिः व्रणितोपद्रवाणां च कृच्छ्रसाध्यत्वमिति हेतुद्वयेन पुनः शिष्याणां प्रश्नमाह—उपद्रवेण जुष्टस्येत्यादि । उपद्रवेण ज्वरादिना युक्तस्य पुरुषस्य; अन्ये तु 'उपद्रवेण जुष्टस्तु' इति व्रणविशेषणं पठन्ति, तन्मते उपद्रवेण व्रणवेदनादिना[1], जुष्टो व्याप्तः । कृच्छ्रेण कष्टेन । व्रणिन उपद्रवा ज्वरादिकाः, विसर्पादिका इत्यन्ये । कीदृशस्य व्रणिन उपद्रवाः कृच्छ्रसाध्याः इत्याह—प्रक्षीणबलमांसस्येत्यादि । बलमुत्साहलक्षणं, मांसमुपचयलक्षणम् । शेषधातवो मेदःप्रभृतयः, तेषां परिक्षयात्; रक्तस्य तु मांसाश्रयत्वान्मांसग्रहणेनैव ग्रहणम् । तस्मादिति यस्मादुपद्रवजुष्टस्यातिकृच्छ्रत्वं तस्मात् कृत्स्नान् समस्तानुपद्रवान् सचिकित्सितान् नोऽस्माकं ब्रूहीति संबन्धः । सर्वकायचिकित्सास्विति- सर्वस्मिन् काये चिकित्सा तासु । ये दृष्टा उपद्रवा ज्वरादयः । परमर्षिणा धन्वन्तरिणा । अत्र चिकित्साशब्देन प्रतिकार उच्यते; अन्ये त्वत्र चिकित्साशब्देन चिकित्साशास्त्रमभिधाय मूलतन्त्राणामौपधेनवौरभ्रादीनां चिकित्साशास्त्राणामवरोधं मन्यन्ते; अपरे 'षट्सु कायचिकित्सासु' इति पठन्ति, तेषां मते षट्शब्देन अग्निवेशभेडजातूकर्णहारीतक्षारपाणिपराशरप्रोक्ताः षट् चिकित्सा लभ्यन्ते; अत्र पक्षे 'परमर्षिणा' इत्यत्र 'परमर्षिभिः' इति पाठः ॥ ५–७ ॥

**तेषां तद्वचनं श्रुत्वा प्राब्रवीद्भिषजांवरः ।
ज्वरमादौ प्रवक्ष्यामि स रोगानीकराट् स्मृतः ॥८॥
रुद्रकोपाग्निसंभूतः सर्वभूतप्रतापनः ।
तैस्तैर्नामभिरन्येषां सत्त्वानां परिकीर्त्यते ॥ ९ ॥**

तेषामित्यादि । तेषां शिष्याणाम् । भिषजांवरो धन्वन्तरिः । ज्वरमादावित्यादि । स इति ज्वरः । रोगानीकराडिति रोगसमूहस्य राजा । तैस्तैर्नामभिः पाकलाभितापखोरकभ्रमरकादिभिः । अन्येषां सत्त्वानां गजाश्वादीनाम् ॥ ८ ॥ ९ ॥

**जन्मादौ निधने चैव प्रायो विशति देहिनम्[1] ।
अतः सर्वविकाराणामयं राजा प्रकीर्तितः ॥ १० ॥**

इदानीमुक्तमेव रोगसमूहराट्त्वं सहेतुकं कृत्वा प्रतिपादयति—जन्मेत्यादि । प्रायो विशेषेण ॥ १० ॥

**ऋते देवमनुष्येभ्यो नान्यो विषहते तु तम् ।
कर्मणा लभते यस्माद्देवत्वं मानुषादपि ॥ ११ ॥
पुनश्चैव च्युतः स्वर्गान्मानुष्यमनुवर्तते ।
तस्मात्ते देवभावेन सहन्ते मानुषा ज्वरम् ॥ १२ ॥
शेषाः सर्वे विपद्यन्ते तैर्यग्योना ज्वरार्दिताः ।**

तिर्यग्योनयस्तेन पीडिता विपद्यन्त एवेति प्रतिपादयितुं ज्वरप्रभावमाह—ऋते इत्यादि । ऋते विना । नान्यो विषहते नान्यः सोढुं शक्नोति । देवाः स्वतपोमाहात्म्यात् सहन्ते; मनुष्याः कथं सोढुं समर्थाः ? उच्यते—कर्मणेत्यादि; एनं पाठं केचिन्न पठन्ति, ईदृशे क्रमे निश्चयो नास्ति यत्स्वर्गाच्च्युतो मानुष एव भवति ॥ ११ ॥ १२ ॥—

**स्वेदावरोधः[2] सन्तापः सर्वाङ्गग्रहणं तथा ॥ १३ ॥
विकारा युगपद्यस्मिन् ज्वरः स परिकीर्तितः ।**

इदानीं ज्वरस्य स्वरूपमाह—स्वेदावरोध इत्यादि । स्वेदावरोधः[3] स्वेदानिर्गमः; एतच्च प्रायिकं लक्षणं, पैत्तिके स्वेदनिर्गमात् । सन्ताप इति सन्तापयतीति संज्ञशब्दान्मानसोऽपि तापोऽभिप्रेतः; तथा चोक्तं,—'सन्तापो देहमानस' इति । सर्वाङ्गग्रहणं वेदनया । युगपदिति एककाले । 'स्वेदावरोध'[4] इत्यत्र 'वेगोपरोधः' इत्यन्ये पठन्ति; वेगोपरोधो वातमूत्रपुरीषादीनामनिर्गमः ॥ १३ ॥—

१ 'वर्णवेदनादिना' इति पा० ।

१ 'देहिनः' इति 'देहिनाम्' इति च पा० । २-३-४ 'स्वेदोपरोधः' इति पा० ।

दोषैः पृथक् समस्तैश्च द्वन्द्वैरागन्तुरेव च ॥ १४ ॥
अनेककारणोत्पन्नः स्मृतस्त्वष्टविधो ज्वरः ।

अतः परं हेतुभेदाज्ज्वरस्यानेकत्वमाह—दोषैरित्यादि । पृथक् त्रयः, समस्तैर्दोषैरेकः, द्वन्द्वजास्त्रयः, आगन्तुरेकः, एवमनेककारणोत्पन्नोऽपि ज्वरोऽष्टविधत्वं न त्यजति ॥ १४ ॥—

दोषाः प्रकुपिताः स्वेषु कालेषु स्वैः प्रकोपणैः ॥१५॥
व्याप्य देहमशेषेण ज्वरमापादयन्ति हि ।
दुष्टाः स्वहेतुभिर्दोषाः प्राप्यामाशयमूष्मणा ॥ १६ ॥
सहिता रसमागत्य रसस्वेदप्रवाहिणाम् ।
स्रोतसां मार्गमावृत्य मन्दीकृत्य हुताशनम् ॥ १७ ॥
निरस्य बहिरूष्माणं पक्तिस्थानाच्च केवलम् ।
शरीरं समभिव्याप्य स्वकालेषु ज्वरागमम् ॥ १८ ॥
जनयन्त्यथ वृद्धिं वा स्ववर्णं च त्वगादिषु ।

ज्वरस्य संप्राप्तिमाह—दोषाः प्रकुपिता इत्यादि । दोषाः प्रकुपिताश्चयानुपूर्व्या; स्वेषु कालेषु प्रावृट्शरद्वसन्तेषु अहोरात्रिकेषु च; एतेन प्राकृतो ज्वर उक्तः । स्वैः प्रकोपणैरिति बलवद्विग्रहादिक्रोधादिदिवास्वापादिभिर्व्रणप्रश्नोक्तैः । अनेन च वैकृतः । ब्रह्मदेवस्तु सन्निपातप्रकोपस्य हेतूनत्र पृथगाह; यथा, —"विषमाध्यशनात्यशनं लकुचामफलं शिलोच्चये सलिलम् । पिण्याकमाममूलकसर्षपशाकं यवैः कृता च सुरा ॥ कृशशुष्कामिषशाकं यावकमशनं च पर्वते वासः । व्यापन्नाम्बुसुरादधिकन्दं पिडकोच्छ्रितिर्देहे ॥ मृद्विषगरादिभक्षणमनार्तवं दुर्दिनं पुरोवातः । अन्नपरिवर्तभूतावेशौ पीडा ग्रहर्क्षसंभूता ॥ अनुचितभेषजगन्धाघ्राणं पापस्य कर्मणोऽभ्यासः । स्नेहस्वेदादीनां मिथ्यायोगः पुराकृतं कर्म ॥ स्त्रीणां विषमप्रसवो मिथ्यायोगः प्रसूतानाम् । स्नेहस्वेदादीनां रसायनस्यापि च व्यापत् ॥ एते हेतव उक्ताः प्रकोपणे सन्निपातस्य"—इति । अशेषेण सामस्त्येन । आपादयन्ति जनयन्ति । अन्ये 'दोषाः प्रकुपिता गाढमपथ्याहारसेविनः' इति पठन्ति । अत्र गाढशब्देन प्राकृतः, अपथ्याहारसेविन इत्यनेन वैकृतः । अन्ये ज्वरसंप्राप्तिमनेन पाठेन पठन्ति, तद्यथा—दुष्टाः स्वहेतुभिरित्यादि । दुष्टाः प्रकुपिताश्चयादिरूपेण, स्वेषु कालेषु प्राकृतं ज्वरं, स्वहेतुभिराद्यसंप्राप्तिश्लोकव्याख्यातैर्बलवद्विग्रहादिभिर्वैकृतम् । ऊष्मणा वह्न्यूष्मणा सहिता धातूष्मणा दोषोष्मणा वा सहिता दोषा रसं हृदयस्थमागत्य, हुताशनं जठराग्निं मन्दीकृत्य, ऊष्माणमग्नेरेव, पक्तिस्थानादग्निस्थानात्, बहिः निरस्य निक्षिप्य, केवलं सर्वं, स्वकालेषु आर्तवेषु अहोरात्रिकेषु च ज्वरागमं जनयन्ति, अथवा वृद्धिमागतस्य; स्ववर्णं नखत्वङ्नयनादिषु जनयन्ति ॥ १५-१८ ॥—

मिथ्यातियुक्तैरपि च स्नेहाद्यैः कर्मभिर्नृणाम् ॥१९॥
विविधादभिघाताच्च रोगोत्थानात् प्रपाकतः ।
श्रमात् क्षयादजीर्णाच्च विषात्सात्म्यर्तुपर्ययात् ॥२०॥
ओषधीपुष्पगन्धाच्च शोकान्नक्षत्रपीडया[१] ।
अभिचाराभिशापाभ्यां मनोभूताभिशङ्कया ॥ २१ ॥
स्त्रीणामपप्रजातानां प्रजातानां तथाऽहितैः ।
स्तन्यावतरणे चैव ज्वरो दोषैः प्रवर्तते ॥ २२ ॥

न केवलमेवं स्वप्रकोपणैर्व्रणप्रश्नोक्तैः प्रकुपिता दोषा ज्वरमापादयन्ति, अपि तु तेऽन्यैरपि कारणैरित्यत आह—मिथ्यातियुक्तैरित्यादि । मिथ्यातियुक्तैः अयथाविधियुक्तैरतियुक्तैश्च । स्नेहाद्यैः स्नेहस्वेदवमनविरेचनादिकैः । नृणां ज्वरो दोषैः प्रवर्तते इति संबन्धः; 'प्रवर्तते' इत्यत्र 'प्रकुप्यति' इति केचित् । विविधादभिघातात् शस्त्रलोष्टकाष्ठादिप्रहारात् । रोगोत्थानात् रोगा विद्रध्याद्यस्तेषामुत्थानात् । श्रमादतिव्यायामात् । प्रपाकस्तेषामेव । आमादजीर्णात् । क्षयाद्राजयक्ष्मणः । सात्म्यर्तुपर्ययात् सात्म्यविपर्ययादृतुविपर्ययाच्च । ओषधीशब्दस्यादौ विषशब्दो लुप्तो द्रष्टव्यः, तेन विषौषधीपुष्पगन्धात् । नक्षत्रं जन्मनक्षत्रं, तस्य पीडा तथा क्रूरग्रहाणां बाधा तया । अभिचारो यन्त्रमन्त्रायभिपीडनं, अभिशापो द्विजगुरुसिद्धानामभिशपनं, ताभ्याम् । मनोभूताभ्याममभिशङ्काशब्दः संबध्यते, अभिशङ्काशब्देन अभिषङ्गत्वं कथ्यते; तेन मनोऽभिषङ्गेण कामाद्यभिषङ्गेणेत्यर्थः, भूतशब्देन देवादिग्रहा उच्यन्ते, तेन देवादिग्रहाभिषङ्गेणेत्यर्थः । अपप्रजातानामसम्यक्प्रसूतानां, प्रजातानां सम्यक्प्रसूतानाम्, अहितैः कृत्वा । स्तन्यस्य क्षीरस्य, अवतरणे प्रथममुन्मुखीभवने ॥ १९-२२ ॥

तैर्वेगवद्भिर्बहुधा समुद्भ्रान्तैर्विमार्गगैः ।
विक्षिप्यमाणोऽन्तरग्निर्भवत्याशु बहिश्चरः ॥ २३ ॥
रुणद्धि चाप्यपांधातुं यस्मात्तस्माज्ज्वरातुरः ।
भवत्यत्युष्णगात्रश्च ज्वरितस्तेन चोच्यते[२] ॥ २४ ॥

एवं ज्वरहेतूनुदाहृत्य यथोष्णगात्रत्वं स्यात्तथा दर्शयति—तैर्वेगवद्भिर्बहुधेत्यादि । तैर्दोषैः । वेगवद्भिः प्रसरणशीलैः । समुद्भ्रान्तैरितश्चेतश्च विक्षिप्तैः । विमार्गगैस्तिर्यग्गतैः । विक्षिप्यमाणः प्रेर्यमाणः । अन्तरग्निर्बहिश्चरो भवति 'रोमकूपैः' इति शेषः । अपांधातुं स्वेदं, रुणद्धि । स एव बहिर्निःसृतोऽन्तरग्निर्यस्मादपांधातुं रुणद्धि तस्मादत्युष्णसर्वाङ्गो भवति, यतोऽत्युष्णसर्वाङ्गः स्यात्तेन कारणेन ज्वरित इत्युच्यते । अन्ये तु 'ज्वरितस्तेन चोच्यते' इत्यत्र 'नच स्विद्यति सर्वशः' इति पठन्ति (व्याख्यानयन्ति च सर्वत्र न स्विद्यति, क्वचित् स्विद्यतीत्यर्थः) ॥ २३ ॥ २४ ॥

श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः ।
इच्छाद्वेषौ मुहुश्चापि शीतवातपादिषु ॥ २५ ॥
जृम्भाऽङ्गमर्दो गुरुता रोमहर्षोऽरुचिस्तमः ।
अप्रहर्षश्च शीतं च भवत्युत्पत्स्यति ज्वरे[३] ॥ २६ ॥

१ 'कोपान्नक्षत्रपीडनात्' इति पा० । २ 'न च स्विद्यति सर्वतः' इति पा० । ३ अयं पाठः क्वचित्पुस्तके नोपलभ्यते ।

सामान्यतो, विशेषात्तु जृम्भाऽत्यर्थं समीरणात् ।
पित्तान्नयनयोर्दाहः, कफान्नान्नाभिनन्दनम् ॥ २७ ॥
सर्वलिङ्गसमवायः सर्वदोषप्रकोपजे ।
द्वयोर्द्वयोस्तु रूपेण संसृष्टं द्वन्द्वजं विदुः ॥ २८ ॥

इदानीं पूर्वरूपमाह—श्रम इत्यादि । अरतिः शयनासनादौ सर्वत्रापि सुखाभावः । नयनप्लवो नयनयोरश्रुपूर्णता । आतपादिष्वित्यादिशब्दग्रहणाच्छय्यासनग्रहणम् । तमोऽन्धकारदर्शनम् । अप्रहर्ष आनन्दाभावः । उत्पत्स्यति भाविनि ज्वरे । सामान्यतः सर्वस्मिन्नेव ज्वरे । प्रत्येकदोषजज्वरे पूर्वरूपमाह—विशेषात्तु जृम्भाऽत्यर्थमित्यादि । न अन्नाभिनन्दनमन्नानभिलाषः ॥ २५–२८ ॥

वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम् ।
निद्रानाशः क्षुतः स्तम्भो गात्राणां रौक्ष्यमेव च २९
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्कता ।
जृम्भाऽऽध्मानं तथा शूलं भवत्यनिलजे ज्वरे ॥३०॥

वातादिजत्वेन ज्वरस्य लक्षणान्याह—वेपथुरित्यादि । वेपथुः कम्पः । विषमो वेग इति कदाचिदतिशयितः कदाचिन्मन्दश्च वेगः । क्षुतः स्तम्भः क्षुत् छिक्का तस्याः स्तम्भोऽनिर्गमनं; 'क्षुत' इत्यत्र अन्ये 'क्षव' इति पठन्ति; तन्मते क्षवः छिक्का, स्तम्भो गात्रस्य । ननु, वातज्वरमोक्षेऽपि छिक्का स्यात्, तत् कथं ज्वरागमसोक्षयोर्ज्ञानं ? उच्यते—अपरवेपथ्वादिवातज्वरलक्षणानामभावाज्ज्वरमोक्षो बोद्धव्यः । रौक्ष्यमेव चेति गात्राणां (रूक्षग्रहणेनैव कृष्णारुणवर्णयुक्तमिति ज्ञेयं); चकारात् कृष्णविण्मूत्रत्वं समुच्चीयते; अन्ये तु 'गात्राणां रौक्ष्यमेव च' इत्यत्र 'श्यावाङ्गमलनेत्रता' इति पठन्ति । शिरसः पृथगुपादानमत्यर्थं शिरोरुग्भवतीति ज्ञापनार्थं; अन्यथा गात्ररुगित्यनेनैव तत्प्राप्तेः । 'जृम्भाध्माने भ्रमः शूलं' इत्यन्ये पठन्ति ॥२९॥३०॥

वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥ ३१ ॥
प्रलापः कटुता वक्त्रे मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥ ३२ ॥

वेग इत्यादि । 'प्रलापः कटुता वक्त्रे' इत्यत्र 'प्रलापस्तिक्तवक्त्रत्वं' इति केचित् पठन्ति । मदः पूगफलेनेव मत्तता ॥ ३१ ॥ ३२ ॥

गौरवं शीतमुत्क्लेशो रोमहर्षोऽतिनिद्रता ।
स्रोतोरोधो रुगल्पत्वं प्रसेको मधुरास्यता ॥ ३३ ॥
नात्युष्णगात्रता छर्दिरङ्गसादोऽविपाकता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता३४

गौरवमित्यादि । गौरवं गात्राणां, उत्क्लेशः श्लेष्मनिष्ठीवनं, प्रसेको लालास्रावः, अङ्गसादोऽङ्गग्लानिः । अन्ये त्वेवं पठन्ति—'स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता । शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥ गौरवं शीतमुत्क्लेशो रोमहर्षोऽतिनिद्रता । प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता' इति । स्तैमित्यं निश्चलत्वं ज्वरितस्य, वेगोऽपि स्तिमितः सततस्थितो निश्चलः, अन्ये तु स्तिमितो वेगो मन्द उद्गमः ॥ ३३ ॥ ३४ ॥

निद्रानाशो भ्रमः श्वासस्तन्द्रा सुप्ताङ्गताऽरुचिः ।
तृष्णा मोहो मदः स्तम्भो दाहः शीतं हृदि व्यथा ३५
पक्तिश्चिरेण दोषाणामुन्मादः श्यावदन्तता ।
रसना परुषा कृष्णा सन्धिमूर्धास्थिजा रुजः ॥३६॥
निर्भुग्ने कलुषे नेत्रे कर्णौ शब्दरुगन्वितौ ।
प्रलापः स्रोतसां पाकः कूजनं चेतनाच्युतिः ॥३७॥
स्वेदमूत्रपुरीषाणामल्पशः सुचिरात् स्रुतिः ।

एकैकदोषजं ज्वरमभिधाय सान्निपातिकमाह—निद्रानाश इत्यादि । भ्रमश्चक्रारूढस्येव भ्रमणम् । तन्द्रालक्षणमुच्यते "इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः । निद्रार्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्"—इति । सुप्ताङ्गता गात्राणां स्पर्शाज्ञता, मोहोऽत्र मूर्च्छा, मदः पूगफलेनेव मत्तता, स्तम्भः स्तब्धता । उन्मादो मानसो विकारः । रसना जिह्वा, परुषा कर्कशा । सन्धिमूर्धास्थिजा रुज इति सन्धिरुजा मूर्धरुजा अस्थिरुजा च; अन्ये सन्ध्यादिस्थाने 'लोठनं शिरसो रुजा' इति पठन्ति, लोठनं शिरसो विधूननम् । निर्भुग्ने कुटिले, कलुषे मलिने । शब्दरुगन्वितौ शब्दान्वितौ रुगन्वितौ च कर्णौ भवतः । प्रलापोऽसंबद्धभाषणम् । स्रोतसां मुखनासादिरन्ध्राणाम् । कूजनमव्यक्तशब्दोत्थानं कण्ठे । चेतनाच्युतिः चित्तनाशः । अल्पशः सुचिरात्, स्रुतिरिति अल्पमल्पं कृत्वा चिरकालेन निःसरतीत्यर्थः ॥ ३५–३७ ॥—

सर्वजे सर्वलिङ्गानि

निद्रानाश इत्यादिपाठेन विकृतिविषमसमवेतस्य सन्निपातस्य लक्षणमभिधाय प्रकृतिसमसमवेतस्य लक्षणमाह—सर्वजे इत्यादि । सर्वदोषजे सर्वलिङ्गानि प्रत्येकवातादिज्वरोक्तलक्षणानि ॥—

विशेषं चात्र मे शृणु ॥ ३८ ॥
नात्युष्णशीतोऽल्पसंज्ञो भ्रान्तप्रेक्षी हतस्वरः ।
खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्जितः ॥ ३९ ॥
सास्रो निर्भुग्नहृदयो भक्तद्वेषी हतप्रभः ।
श्वसन्निपतितः शेते प्रलापोपद्रवायुतः ॥ ४० ॥
तमभिन्यासमित्याहुर्हतौजसमथापरे ।

इदानीमभिन्यासादिसंज्ञाभिः सन्निपातभेदमाह—विशेषमित्यादि । विशेषं भेदम् । अत्र सन्निपातज्वरे । नात्युष्णशीतः साधारणाङ्गस्पर्शः । भ्रान्तप्रेक्षी सर्वपदार्थायथार्थदर्शी । सास्रोऽ-

१ 'विषमो वेगः हीनाधिकभावेन' इति पा० । २ 'तन्मते वातज्वरे छिक्का संभवति' इति पा० । ३ अयं पाठः क्वचिन्नोपलभ्यते । ४ 'विडल्पत्वं' इति पा० । ५ 'कफजेऽक्ष्यादिक्लता' इति पा० ।

१ 'समले' इति पा० । २ 'सास्रनिर्भुग्ननयनः' इति पा० । ३ 'इदानीमन्वर्थाभिः संज्ञाभिः' इति पा० ।

श्रुपूर्णनेत्रः । निर्भुग्नहृदयः कुटिलहृदयः । श्वसन् श्वासं कुर्वन् । निपतित इव शेते, एतेन विकलाङ्ग उक्तः । प्रलाप एवोपद्रवस्तेन आयुतोऽत्यर्थयुक्तः । तं सन्निपातभेदम् ॥ ३८-४० ॥

सन्निपातज्वरं कृच्छ्रमसाध्यमपरे विदुः ॥ ४१ ॥

मतभेदेन सन्निपातज्वरस्य कृच्छ्रसाध्यत्वमसाध्यत्वं चोच्यते —सन्निपातज्वरमित्यादि । असमस्तलक्षणत्वे कृच्छ्रसाध्यत्वं, समस्तलक्षणत्वे विबद्धदोषत्वेऽग्नौ च नष्टे सत्यसाध्यत्वम् ॥४१॥

निद्रोपेतमभिन्यासं क्षीणमेनं हतौजसम् ।
संन्यस्तगात्रं संन्यासं विद्यात्सर्वात्मके ज्वरे ॥४२॥

अभिन्यासस्य भेदमाह—निद्रेत्यादि । तमेव निद्रोपेतमभिन्यासं विद्यात्, एनं क्षीणं सन्तं हतौजसं विद्यात्; तमेव च संन्यस्तगात्रं संन्यासमिति । केचिदमुमभिन्यासप्रतिपादकं वाक्यं न पठन्ति । निद्रोपेतमभिन्यासमित्यादिपाठस्याग्रे 'प्रलिम्पन्निव गात्राणि पर्वणां गौरवेण च' इत्यादिना 'मन्दज्वरप्रलापस्तु सशीतः स्यात्प्रलेपकः' इत्यन्तेनापरतन्त्रोक्तपाठेन प्रलेपकलक्षणं केचित् पठन्ति, तच्च न पठनीयं; 'तथा प्रलेपको ज्ञेय' इत्यादिपाठेन स्वतन्त्रे तस्य पठितत्वात् । 'नित्यं मन्दज्वर' इत्यादिना क्षारपाणिप्रोक्तं वातबलासकलक्षणमपरे पठन्ति, तदपि न पठनीयं, 'प्रलेपकं वातबलासकं च' इत्यनेन तस्योक्तेः । नित्यं मन्दज्वर इत्यादिपाठस्याग्रेऽन्ये तृणपुष्पकलक्षणमधीयन्ते,—"पुष्पेभ्यो गन्धरजसी तेजस्विभ्यो यदाऽनिलः । उपादाय मनुष्यस्य प्राणापानौ नियच्छति ॥ सौक्ष्म्यादनुसृतो धातून् मर्माण्यपि च तेजसा । कर्म चित्तं बलं ज्ञानं तदाऽस्याभ्येति मारुतः ॥ कर्मादिषु निरुद्धेषु स्वपितीति सुहृज्जनः । मन्यते हतचित्तत्वादोजस्युपरते सति ॥ तस्यादितः शिरोरोगः ससंज्ञस्येव जायते । विगन्धं च सुगन्धं च दृष्ट्वाऽकस्मात् स मूर्च्छति ॥ तृणपुष्पकमित्येवं ज्वरं विद्याद्विचक्षणः"—इति; तच्चौषधीगन्धजे ज्वरे तथौपत्यके चान्तर्भूतत्वान्नाध्येयमिति ॥ ४२ ॥

ओजो विस्रंसते यस्य पित्तानिलसमुच्छ्रयात् ।
स गात्रस्तम्भशीताभ्यां शयनेप्सुरचेतनः ॥ ४३ ॥
अपि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान् ।
संहृष्टरोमा स्रस्ताङ्गो मन्दसन्तापवेदनः ॥ ४४ ॥
ओजोनिरोधजं तस्य जानीयात् कुशलो भिषक् ।

केचिदत्र हतौजसलक्षणं पठन्ति; यथा—ओजो विस्रंसते यस्येत्यादि । स ज्वरी गात्रस्तम्भशीताभ्यां कृत्वा शयनेप्सुः स्वपितुमिच्छुः, जाग्रदवस्थायां स्वप्नावस्थायां च चेतनारहितो भवति, तस्य सन्निपातिन एतद्गात्रस्तम्भादिकमोजोनिरोधजं लक्षणं जानीयात् । यद्यपि तन्त्रान्तरे सन्निपातभेदास्त्रयोदश प्रोक्ताः, तथाऽपि दोषोत्कर्षापकर्षतारतम्येन धात्वावरणभेदेन च सन्निपातभेदानामानन्त्यान्नेह प्रदर्शिताः ॥ ४३ ॥ ४४ ॥—

१ 'धर्मेण' इति पा० । २ 'शयने स्यादचेतनः' इति पा० ।

सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा ॥ ४५ ॥
पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ।

सन्निपातज्वरस्य मोक्षवधयोरवधिमाह—सप्तमे दिवसे प्राप्ते इत्यादि । शीघ्रमध्यमन्दशक्तित्वाद्वातादीनां सप्तमे दिने वाताधिकः सन्निपातज्वरः, दशमे दिने पित्ताधिकः, द्वादशे दिने श्लेष्माधिको विमुञ्चति मलपाकात्, हन्ति च धातुपाकात्; यदि हि तस्य दीर्घजीवनं(ने)कर्मास्ति तदा मलपाको भवति, अन्यथा धातुपाकः । अन्ये तु सप्ताहेऽभिन्यासो, दशाहे हतौजाः, द्वादशाहे संन्यासः, मलपाकात् प्रशमं याति धातुपाकाद्धन्तीति मन्यन्ते । धातुपाकस्य लक्षणमाह—"संबाध्यमानो हृदि नाभिदेशे गात्रेषु वा पाकरुजोज्झितेषु । पक्केष्विवाचैति रुजं ज्वरार्तः स धातुपाकी कथितो भिषग्भिः"—इति । शकुनैररिष्टैर्वा मरणकारी धातुपाकी(को) ज्ञेय इति वृद्धाः । द्वादशेऽपि वेत्यत्रापिशब्दाद्भालुकिप्रोक्तः सन्निपातज्वरस्य मोक्षवधयोरवधिः प्राप्यते । तेन "सप्तमी द्विगुणा या तु नवम्येकादशी तथा । एषा त्रिदोषमर्यादा मोक्षाय च वधाय च" इति लब्धम् । पुनर्घोरतर इति पुनःशब्दात् पूर्वं घोर आसीत्, ततः पुनर्घोरतर इति लभ्यते ॥ ४५ ॥—

द्विदोषोच्छ्रायलिङ्गास्तु द्वन्द्वजास्त्रिविधाः स्मृताः ४६

इदानीं प्रकृतिसमवेतास्त्रिविधा द्वन्द्वजज्वरा उच्यन्ते—द्विदोषोच्छ्रायलिङ्गा इत्यादि । द्विदोषोच्छ्रायेत्युच्छ्रायग्रहणं द्वयोर्दोषयोः स्वकारणोच्छ्रितत्वज्ञापनार्थं, त्रिविधत्वमत्र समवृद्धद्विदोषजापेक्षयेति ॥ ४६ ॥

तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा ।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तथा ॥ ४७ ॥
पर्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः ।

इदानीं विकृतिविषमसमवेतान् द्वन्द्वजज्वरानाह—तृष्णेत्यादि । कण्ठास्यशोषः कण्ठशोषो मुखशोषश्च । वमथुः छर्दिः । यतोऽयं विकृतिविषमसमवेतः अतो वातपैत्तिके ज्वरे रोमहर्षारुच्योरभिधानं, कफपैत्तिके तन्द्राभिधानम् ॥ ४७ ॥—

स्तैमित्यं पर्वणां भेदो निद्रा गौरवमेव च ॥ ४८ ॥
शिरोग्रहः प्रतिश्यायः कासः स्वेदप्रवर्तनम् ।
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥ ४९ ॥

स्तैमित्यं निश्चलत्वं ज्वरितस्य, पर्वणां भेदो ग्रन्थिस्फुटनं, शिरोग्रहः शिरो गृहीतमिव मन्यते, प्रतिश्यायो नासास्रावः ॥ ४८ ॥ ४९ ॥

लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा ।
मुहुर्दाहो मुहुः शीतं श्लेष्मपित्तज्वराकृतिः ॥ ५० ॥
(जृम्भाध्मानमदोत्कम्पपर्वभेदपरिक्षयाः ।
तृट्प्रलापाभितापाः स्युर्ज्वरे मारुतपैत्तिके ॥ १ ॥
शूलकासकफोत्क्लेशशीतवेपथुपीनसाः ।
गौरवारुचिविष्टम्भा वातश्लेष्मसमुद्भवे ॥ २ ॥

शीतदाहारुचिस्तम्भस्वेदमोहमदभ्रमाः ।
कासाङ्गसादहृल्लासा भवन्ति कफपैत्तिके ॥ ३ ॥)

लिप्तेत्यादि । लिप्तास्यता तिक्तास्यता च । जेज्जटाचार्यस्तु द्वन्द्वजज्वरपाठमेकमेव पठति—जृम्भेत्यादिना । अयं वा पठनीयः पूर्वो वा, न तु द्वयम् ॥ ५० ॥

कृशानां ज्वरमुक्तानां मिथ्याहारविहारिणाम् ।
दोषः स्वल्पोऽपि संवृद्धो देहिनामनिलेरितः ॥ ५१ ॥
सततान्येद्युष्कत्र्याख्यचातुर्थान् सप्रलेपकान् ।
कफस्थानविभागेन यथासंख्यं करोति हि ॥ ५२ ॥

सन्ततज्वरमभिधायेदानीं विषमज्वरान् सततादीनाह—कृशानामित्यादि । कृशानां मिथ्याहारविहारिणां ज्वरमुक्तानां च मिथ्याहारविहारिणां दोषः स्वल्पोऽपि 'अपथ्यैः कृत'इति शेषः, पुनर्मिथ्याहारविहाराभ्यामभिसंवृद्धो वातप्रेरितः सन् सततादीन् यथासंख्यं कफस्थानविभागेन करोतीति सम्बन्धः । कफस्थानानि आमाशयोरःकण्ठशिरःसन्धयो यथासंख्यं कथ्यन्ते । तत्र आमाशयस्थः सततं करोति, स च प्रतिदिनं कालद्वयानुवर्तनात् किञ्चिद्यूनः, उरःस्थो अन्येद्युष्कं, कण्ठस्थस्तृतीयकं, शिरस्थश्चतुर्थकं, सन्धिस्थः प्रलेपकं, सर्वेषु कफस्थानेषु व्यवस्थितो दोषः सन्ततं करोतीति ज्ञातव्यम् । दोषशब्दोऽत्र पृथग्द्वन्द्वसमस्तरूपो वातादिर्ग्राह्यः । अनिलेरितत्वं च वातस्यापि स्थितस्य बाह्यहेतुप्रचुरीभूतेनापरेण वातेन संभवति ॥ ५१ ॥ ५२ ॥

अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते ।
ततश्चामाशयं प्राप्य दोषैः कुर्याज्ज्वरं नृणाम् ॥५३॥

यथा उरआदिस्थितो दोषोऽन्येद्युष्कादीन् करोति तथाऽऽह—अहोरात्रादित्यादि । अहोरात्रादुरःस्थो दोष आमाशयं प्राप्य अन्येद्युष्कं करोति अन्यस्मिन् दिवसे, कण्ठस्थितो द्वाभ्यामहोरात्राभ्यां तृतीयकं तृतीयदिवसे, शिरस्थितः स्थानत्रयमतिक्रम्य चतुर्थकं चतुर्थदिवसे, सन्धिषु स्थितो नित्यमेव प्रलेपकं करोति, स च राजयक्ष्मिणामेव ॥ ५३ ॥

तथा प्रलेपको ज्ञेयः शोषिणां प्राणनाशनः ।
दुश्चिकित्स्यतमो मन्दः सुकष्टो धातुशोषकृत् ॥५४॥

प्रलेपकलक्षणमाह—तथा प्रलेपको ज्ञेय इत्यादि । दुश्चिकित्स्यतम इति हेतुभावेन सन्निपातात्मकत्वात् । मन्दो मन्दवेगः । सुकष्ट इति हेतुफलभावेन मारणात्मकत्वात् ॥ ५४ ॥

कफस्थानेषु वा दोषस्तिष्ठन् द्वित्रिचतुर्षु वा ।
विपर्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान् ५५

विषमज्वरानभिधाय तद्विपर्ययज्वरानाह—कफस्थानेष्वित्यादि । कफस्थानयोर्द्वयोरुरआमाशययोस्तिष्ठन् दोषोऽन्येद्युष्कविपर्ययं करोति; कस्तद्विपर्ययः ? अहोरात्रे पूर्वाह्णादीनामेककालं मुक्त्वा समस्ताहोरात्रं भवतीति । एवं त्रिषु कफस्थानेषु कण्ठोरआमाशयेषु तिष्ठन् दोषस्तृतीयकविपर्ययं करोति, यस्तृतीयदिने विमुञ्चति । चतुर्षु कफस्थानेषु शिरःकण्ठोरआमाशयेषु तिष्ठन् दोषश्चतुर्थकविपर्ययं करोति, स चतुर्थेऽह्नि मुञ्चतीति । सततस्य तु विपर्ययो न भवति, एकस्मिन्नेव कफस्थाने स्थितेन दोषेण तत्करणाद् व्याधिस्वभावाद्वा । कफस्थानेषु वा दोष इत्यत्र दोषशब्दः पृथग्द्वन्द्वसमस्तदोषप्रतिपादकः ॥ ५५ ॥

परो हेतुः स्वभावो वा विषमे कैश्चिदीरितः ।
आगन्तुश्चानुबन्धो हि प्रायशो विषमज्वरे ॥ ५६ ॥

विषमज्वराणां नियतैककालागमने एकीयमतेन हेतुमाह—पर इत्यादि । परो भूतादिः, हेतुः कारणं, स्वभावो वेति विषमज्वरे हेतुरित्यर्थः । अन्ये तु विषमज्वरे स्वभावो वा पर उत्कृष्टो हेतुः कैश्चिदाचार्यैरीरित इति व्याख्यानयन्ति । विषमज्वरे भूतादिर्हेतुरुक्तस्तस्य समर्थनमाह—आगन्तुरित्यादि । प्रायशो बाहुल्येन, आगन्तुर्भूतादिः, अनुबन्धः कारणं, हीति यस्मादर्थे ॥ ५६ ॥

वाताधिकत्वात् प्रवदन्ति तज्ज्ञा-
स्तृतीयकं चापि चतुर्थकं च ।
औपत्यके मद्यसमुद्भवे च
हेतुं ज्वरे पित्तकृतं वदन्ति ॥ ५७ ॥
प्रलेपकं वातबलासकं च
कफाधिकत्वेन वदन्ति तज्ज्ञाः ।
मूर्च्छानुबन्धा विषमज्वरा ये
प्रायेण ते द्वन्द्वसमुत्थितास्तु ॥ ५८ ॥

इदानीमुक्तानामन्येषां चारम्भकदोषकथनायाह—वातेत्यादि । यद्यपि तन्त्रान्तरे कफपित्तात्त्रिकग्राहीत्यादिना तृतीयचतुर्थकयोर्द्वन्द्वदोषसमुद्भवत्वं प्रतिपादितं, तथाऽपि स्वतन्त्रे पित्तश्लेष्मलिङ्गत्वेऽपि तयोर्वाताधिकत्वं ज्ञेयम् । औपत्यके पर्वतासन्नभूमिसमुद्भवे ज्वरे । पित्तकृतमिति तत्र औपत्यकमद्यसमुद्भवयोः पित्तं कारणं हेतुं वदन्ति; तत्र औपत्यके ज्वरे पर्वतासन्नभूमिस्थितानां तीक्ष्णोष्णवीर्याणामुग्रगन्धानामौषधीनां पित्तकारित्वं, मद्यसमुद्भवे तु मद्यमेव पित्तकारी हेतुः । अन्ये तु 'औपत्यपानात्ययसंप्रभूते हेतुं ज्वरे पित्तमुदाहरन्ति' इति पठन्ति । प्रलेपके यद्यपि वायुरेव प्रेरयिता, तथाऽपि सन्धीनां श्लेष्मस्थानत्वाच्छ्लेष्मोत्कटोऽयं, अन्यशास्त्रोपपन्नाश्चार्थास्तद्विधेभ्य एव ज्ञातव्या इति प्रमाणात्तन्त्रान्तराद्वा वातबलासको ज्ञेयः । तथाच, —"नित्यं मन्दज्वरो रुक्षः शूनः कृच्छ्रेण सिध्यति । स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी"—इति । मूर्च्छानुबन्धेत्यादि । मूर्च्छानुबन्धाः सततमूर्च्छा ये विषमज्वरास्ते प्रायेण द्वन्द्वसमुच्छ्रिताः; एवंविधास्ते विषमा दुश्चिकित्स्याश्च भवन्ति । 'मुञ्चानु-

---

१ 'क्षामाणां' इति पा० । २ 'किञ्चिन्मूलः' इति पा० । ३ 'घोरं' इति पा० । ४ 'प्रलेपकस्त्वविषमः' इति मधुकोशे पाठः ।

१ 'समस्ताहोरात्रभवनं' इति पा० । २ 'तथाऽपि स्वतन्त्रे वायुना जन्यते, परतन्त्रे पित्तश्लेष्मभ्यां, तस्माद्दाहशैत्यपित्तश्लेष्मलिङ्गत्वेऽपि' इति पा० । ३ 'सर्वाङ्गश्लेष्मभूयिष्ठो भवेद्वातबलासकः' इति पा० ।

बन्धा' इत्येके पठन्ति; तत्र मुञ्चन्ति अनुबध्नन्ति ये ते मुक्तानुबन्धाः सततकादयः सविपर्ययाः। केचित् 'मुक्त्वाऽनुबन्धान्' इति पठन्ति; तत्र, अनुबन्धान् अनुबन्धज्वरानेव विषमान् मुक्त्वा येऽन्ये विषमज्वरास्ते द्वन्द्वसमुत्थिता इति। अन्ये तु व्याख्यानयन्ति—अनुबन्धानुपद्रवज्वरान्मुक्त्वा येऽन्ये मौलाः सततकादयो विषमज्वरत्वेनाभिमतास्ते प्रायेण द्वन्द्वसमुत्थिताः; प्रायोग्रहणात् पृथक्समस्तैश्च जन्यन्ते इति ॥ ५७ ॥ ५८ ॥

त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥५९॥
करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च।
प्रशान्ते कुरुतस्तस्मिञ्छीतमन्ते च तावपि ॥ ६० ॥
द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ।
दाहपूर्वस्तयोः कष्टः कृच्छ्रसाध्यश्च स स्मृतः ॥६१॥

अतः परं सततादीनां शीतदाहपूर्वत्वेन द्वैविध्यमाह—त्वक्स्थावित्यादि। तयोः श्लेष्मानिलयोः, प्रशान्तयोः स्वकालापगमात् प्रत्यनीकप्राप्त्या वा। अन्ते दाहं करोति चेत्यत्र चकारात् मोहमूर्च्छादयः। तस्मिन् पित्ते। तावपि श्लेष्मानिलौ; अपिशब्दाद्भ्रमश्रुतन्द्रादयः। यद्यप्येतौ ज्वरौ दोषत्रयजौ तथाऽप्यत्र दोषद्वयोक्त्या संसर्गजावित्युक्तं, एककार्यकरत्वात्कफवातयोरेकेन व्यपदेशाद्वेत्यन्ये। द्वयोर्दाहपूर्वशीतपूर्वकयोः। कष्टः कृच्छ्रसाध्य इति विशेषणद्वयोपादानादत्यर्थं दुःसाध्यत्वं दर्शितं; दाहपूर्वोऽत्यन्तकष्टसाध्यः शीतपूर्वः सुखसाध्य इति कुतः? रोगशक्तेरचिन्त्यत्वात् ॥ ५९-६१ ॥

प्रसक्तश्चाभिघातोत्थश्चेतनाप्रभवस्तु यः।

अभिघातकामादिजयोरप्यत्यन्तकष्टत्वं दर्शयन्नाह—प्रसक्त इत्यादि। प्रसक्तः प्रकर्षेण सङ्गी, एतच्चाभिघातोत्थचेतनाप्रभवज्वरयोर्विशेषणम्। अभिघातोत्थः काष्ठलोष्टाद्यभिघातजः। चेतनाप्रभवः कामादिजः ॥—

रात्र्यह्नोः षट्सु कालेषु कीर्तितेषु यथा पुरा ॥६२॥
प्रसह्य विषमोऽभ्येति मानवं बहुधा ज्वरः।

इदानीं सततादीनां स्वकालेषूद्गमं दर्शयति—रात्र्यह्नोरित्यादि। षट्सु कालेषु पूर्वाह्णमध्याह्नापराह्णप्रदोषार्धरात्रप्रत्यूषेषु, कीर्तितेषु कथितेषु, यथा पुरा येन प्रकारेण पूर्वं व्रणप्रश्नाध्याये। तत्र पूर्वाह्णप्रदोषयोः कफस्य, मध्याह्नार्धरात्रयोः पित्तस्य, अपराह्णप्रत्यूषयोर्वातस्य प्रकोप इति; एवं पूर्वोक्तकथितेषु स्वस्वदोषप्रकोपकालेषु प्रसह्य हठाद्विषमो ज्वरोऽभ्येति अभि समन्ततो व्याप्य मानवमागच्छति। बहुधेति अहोरात्रे कालद्वयं, एककालं, एकदिनानन्तरं, द्विदिनानन्तरं; अन्ये तु व्याख्यानयन्ति—बहुधा कदाचिच्छीतः, कदाचिदुष्णः, कदाचिद्धस्तपादयोः, कदाचिदंसाद्यवयवेषु, नियतकालं, चिरकालमल्पकालं चेति। एतेन विषमज्वराणामानन्त्यमुक्तम् ॥ ६२ ॥—

स चापि विषमो देहं न कदाचिद्विमुञ्चति ॥ ६३ ॥
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते।
वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते ॥ ६४ ॥

विषमज्वराणामुपशान्तवेगानामपि देहावस्थानं दर्शयति—स चापीत्यादि। विषमो विषमज्वरः। समाहारत्वेन कार्श्यादिति सिद्धे यत् कार्श्येभ्य इति बहुवचनं तेन लक्षणान्तरमपि गृह्यते। तथाच,—"शिरसो गौरवं ग्लानिर्नातिश्रद्धा च भोजने। माधुर्यमथ वैरस्यं तिक्तत्वमथवा पुनः॥ वक्त्रस्य जायते यस्मात् प्रवेगेऽपि गते सति। तस्मात्तु नियतो लीनः शरीरे विषमज्वरः"—इति ॥ ६३ ॥ ६४ ॥

धात्वन्तरस्थो लीनत्वान्न सौक्ष्म्यादुपलभ्यते।
अल्पदोषेन्धनः क्षीणः क्षीणेन्धन इवानलः ॥ ६५ ॥

यदि वेगापगमेऽपि न विमुच्यते तर्हि किमिति नोपलभ्यत इत्याह—धात्वन्तरस्थो लीनत्वादित्यादि। एकस्माद्धातोरन्यो धातुः धात्वन्तरं तत्रस्थः, अन्ये तु धात्वन्तरशब्देन सप्त कलाः कथयन्ति। लीनत्वादेकदेशस्थितत्वात्। सूक्ष्मत्वादणुत्वात्। अल्पदोषेत्यादि अल्पदोष इव इन्धनत्वेन क्षीणोऽल्पीभूतो ज्वरः; 'अल्पदोषा एव इन्धनं यस्य स अल्पदोषेन्धनः' इत्यन्ये ॥६५॥

दोषोऽल्पोऽहितसंभूतो ज्वरोत्सृष्टस्य वा पुनः।
धातुमन्यतमं प्राप्य करोति विषमज्वरम् ॥ ६६ ॥

इदानीं भोजभालुकिपुष्कलावतप्रभृतीनां शल्यतन्त्रविदां मतेन विषमज्वरोत्पत्तिमभिधाय कायचिकित्साविदामग्निवेशादीनां मतेन धातुस्थानैर्दोषैर्विषमज्वराणामुत्पत्तिं दर्शयति—दोष इत्यादि। अहितसंभूतोऽपथ्याद्वृद्धिंगतः। ज्वरोत्सृष्टस्य ज्वरमुक्तस्य, वाशब्देन कृशस्येति समुच्चीयते। कृशानामित्यादिना कफस्थानविभागेन प्राक् सततादयो दर्शिताः, अत्र तु धात्वन्तरगतभेदेनेति न पुनरुक्तता ॥ ६६ ॥

संततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः।
मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ॥ ६७ ॥
कुर्याच्चातुर्थकं घोरमन्तकं रोगसंकरम्।

इदानीं रसादीनां धातूनां मध्ये यं यं धातुमाश्रित्य दोषो यं यं विषमज्वरमारभते तं तं दर्शयन्नाह—सततं रसरक्तस्थ इत्यादि। रसरक्तस्थो दोषः सततं ज्वरं करोति, येऽपि 'दोषो रक्ताश्रयः प्रायः करोति सततज्वरं' इति पठन्ति तैरपि प्रायोग्रहणाद्रसोऽङ्गीकर्तव्यः, यतो रसमादाय दोषा ज्वरमापादयन्ति। अन्ये तु सततमित्यत्रैव संततमिति पठन्ति, तत्र संततमित्येतस्मात्रे सततमिति शब्दो लुप्तो ज्ञेयः; तेन रसस्थः संततं, रक्तस्थः सततमिति व्याख्यानयन्ति। केचित्तु सतत-

१ 'तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्तः' इति पा०। २ 'चेतनाप्रसवः' इति पा०।

१ 'यस्माद्गौरववैवर्ण्यकार्श्येभ्यो न विमुच्यते' इति पा०। २ 'सन्ततं' इति पा०।

पर्यायं सन्ततं मन्यन्ते । संततज्वरस्य विषमज्वरत्वं नास्ति, तत्सन्निधौ पाठान्तरेण व्याख्यानान्तरेण च यद्ग्रहणं तत् संततापेक्षया सततादीनां विषमत्वाद् विषमत्वप्रतिपादनार्थं; अन्यथा किमपेक्ष्यैषां विषमत्वं भवेत् । स दोषः पिशिताश्रितोऽन्येद्युष्कं कुर्यादिति संबन्धः । मेदोगतो दोषस्तृतीयेऽह्नि कुर्यात् तृतीयकं ज्वरमिति बोद्धव्यम् । घोरं कष्टकारिणम् । अन्तकं यमसदृशं, मारणात्मकत्वाचिरं क्लेशनत्वाच्च ॥ ६७ ॥—

केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥ ६८ ॥

इदानीं धात्वन्तरस्थदोषारब्धत्वेऽपि सततकादावेकीयमतेन भूताभिषङ्गं हेतुमाह—केचिदित्यादि । भूताभिषङ्गो ग्रहावेशः । पूर्वं दोषप्रस्तावे दोषोत्थिता एव परं विषमज्वरा भूतादिजा अपि भवन्तीति प्रतिपादनार्थं 'परो हेतुः स्वभावो वा' इत्यादि पठितं; इह तु धात्वाश्रितप्रकरणत्वादिति न पौनरुक्त्यम् ॥६८॥

सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ।
सन्तत्या योऽविसर्गी स्यात्सन्ततः स निगद्यते ६९

सन्निपातारब्धस्य संततज्वरस्य 'सप्तमे दिवसे प्राप्ते' इत्यादिना मोक्षवधयोरवधिमभिधायेदानीमेकदोषजद्विदोषजस्य विसर्गकालावधिद्वारेणं[2] लक्षणमाह—सप्ताहमित्यादि । सन्तत्या नैरन्तर्येण, अविसर्गी अविसर्जनशीलः । अयं च सुखसाध्यः; यदुक्तं,— "सन्ततज्वर एवान्यः स्वल्पदुर्बलकारणः । एकदोषो द्विदोषो वा सुखसाध्यः प्रकीर्तितः"—इति ॥ ६९ ॥

अहोरात्रे सततको द्वौ कालावनुवर्तते ।
अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्तते ॥ ७० ॥
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ।

सततादीनां लक्षणमाह—अहोरात्र इत्यादि । पूर्वाह्णादीनां कालानां मध्ये कालद्वयमनुवर्तते । एककालमिति अन्येद्युष्को ज्वरः अहोरात्रादन्यस्मिन्नहोरात्रे एककालमागच्छतीत्यर्थः । तृतीयकस्तृतीयेऽह्नीत्यत्रैककालमिति संबध्यते । चतुर्थकश्चतुर्थेऽह्नीत्यत्रापि एककालमिति योज्यम् । अत्र दोषोत्कर्षापकर्षाभ्यामधिककालत्वं हीनकालत्वमपि च ज्ञातव्यं, नतु नियमः ॥ ७० ॥—

वातेनोदीर्यमाणाश्च हीयमाणाश्च सर्वतः ।
एकद्विदोषा मर्त्यानां तस्मिन्नेवोदितेऽहनि ॥ ७१ ॥
वेलां तामेव कुर्वन्ति ज्वरवेगो मुहुर्मुहुः ।
(वातेनोद्धूयमानस्तु यथा पूर्येत सागरः ॥ ७२ ॥
वातेनोदीरितास्तद्वद्दोषाः कुर्वन्ति वै ज्वरान् ।
यथा वेगागमे वेलां छादयित्वा महोदधेः ॥ ७३ ॥
वेगहानौ तदेवाम्भस्तत्रैवान्तर्निलीयते ।
दोषवेगोदये तद्वदुदीर्येत ज्वरोऽस्य वै ॥ ७४ ॥
वेगहानौ प्रशाम्येत यथाऽम्भः सागरे तथा ।)[3]

इदानीं धातुस्थदोषारब्धानां विषमज्वराणामुद्गमकालं पूर्वोक्तमेवाह—वातेनेत्यादि । तस्मिन् पूर्वे, उदिते कथिते विषमज्वराणां संबन्धिन्यहनि दिने, मानुषाणामेकद्विदोषाः पृथग्द्वन्द्वभावेन स्थिता वातेनोत्कटीक्रियमाणा हीयमाणा आकृष्यमाणाश्च सर्वतः, तामेव पूर्वाह्णादिकां वेलां ज्वरवेगविषये मुहुर्मुहुः कुर्वन्ति । 'ज्वरवेगात्' इति केचित्; तत्र ज्वरवेगाद्धेतोस्तां वेलां कुर्वन्ति । केचिदत्र 'वातेनोद्धूयमानास्तु' इत्यादिकं यावत् 'प्राप्ते प्राप्ते प्रवर्तते' इत्यन्तं ग्रन्थपाठं पठन्ति; स च उक्तार्थः, अतः सर्वैरपि निबन्धकारैः परिहृतः, तस्मान्न पठनीयः ॥ ७१-७४ ॥—

विविधेनाभिघातेन ज्वरो यः संप्रवर्तते ॥ ७५ ॥
यथादोषप्रकोपं तु तथा मन्येत तं ज्वरम् ।

इदानीं वातादिकृतान् सप्तज्वरानभिधाय आगन्तुज्वरमनेकभेदभिन्नं दर्शयन्नाह—विविधेनाभिघातेनेत्यादि । विविधेनेति शस्त्रलोष्टकाष्ठादिना, दोषप्रकोपजत्वेऽपि आद्यनिमित्तेन व्यपदेशादभिघातज इत्युच्यते ॥ ७५ ॥—

श्यावास्यता विषकृते दाहातीसारहृद्ग्रहाः[1] ॥ ७६ ॥
अभक्तरुक् पिपासा च तोदो मूर्च्छा बलक्षयः ।
ओषधीगन्धजे मूर्च्छा शिरोरुक् वमथुः क्षवः ७७
कामजे चित्तविभ्रंशस्तन्द्राऽऽलस्यमरोचकः ।
हृदये वेदना चास्य गात्रं च परिशुष्यति ॥ ७८ ॥
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः ।
अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते ॥७९॥
भूताभिषङ्गादुद्वेगहास्यकम्पनरोदनम् ॥

केषुचिद्विशिष्टेषु निमित्तेषु वैशेषिकं लक्षणमाह—श्यावास्यतेत्यादि । विषस्य त्रिदोषकरत्वेऽप्यत्यन्तपित्तकरत्वात् श्यावास्यता स्यात् । अभक्तरुक् अरोचकः । औषधिगन्धजे मूर्च्छेत्यादि । वमथुः छर्दिः, क्षवः छिक्का । कामजे इत्यादि । चित्तविभ्रंशः किंकर्तव्यतामूढत्वम् । भयादित्यादि । प्रलापोऽसंबद्धभाषणं; यद्यपि प्रलाप इति सामान्यं लक्षणं तथाऽपि निदानादिभिः कृत्वा विशेषो ज्ञातव्य इति । वेपथुः कम्पः । अभिचारेत्यादि । अभिचारो मन्त्रादिभिर्मारणप्रयोगः, अभिशापो ब्रह्मर्षिगुरुसिद्धानामाक्रोशः । भूताभिषङ्गादित्यादि । भूतानां देवादिग्रहाणामभि समन्ततो भावेन सङ्गो भूताभिषङ्गः । उद्वेग उद्विग्नचित्तता ॥ ७६-७९ ॥—

श्रमक्षयाभिघातेभ्यो देहिनां कुपितोऽनिलः ॥ ८० ॥
पूरयित्वाऽखिलं देहं ज्वरमापादयेद्भृशम् ।

श्रमादिजानां ज्वराणां संप्राप्तिद्वारेण लक्षणमाह—श्रमेत्यादि । पूरयित्वा व्याप्य ॥ ८० ॥—

रोगाणां तु समुत्थानाद्विदाहागन्तुतस्तथा ॥ ८१ ॥
ज्वरोऽपरः संभवति तैस्तैरन्यैश्च हेतुभिः ।
दोषाणां स तु लिङ्गानि कदाचिन्नातिवर्तते ॥ ८२ ॥

१ अस्याग्रे 'चिरकालं रोगोत्पादकं' इत्यधिकं पठ्यते क्वचित्पुस्तके । २ 'क्वचित् कालावधिद्वारेण' इति पा० । ३ अयं पाठः क्वचित्पुस्तके नोपलभ्यते ।

१ 'दाहातीसारहृद्द्रवाः' इति पा० ।

इदानीमन्यथाऽऽगन्तुज्वरं विवक्षुराह—रोगाणामित्यादि। रोगाणां विद्रध्यादीनां; विदाहागन्तुतस्तथेति विदाहतः पाकात् तेषामेव, आगन्तुतः अभिघातात्, अपक्वविद्रध्यादिपाटनादित्यर्थः; अन्ये तु विदाहतः सामान्यसन्तापात्, आगन्तुतः सामान्याभिघातादिभिरिति व्याख्यानयन्ति। ज्वरोऽपरोऽन्यः, भेदात्। तैस्तैरन्यैश्च हेतुभिरिति विद्रध्यादिसमुत्थानात् प्रागुक्तैरन्यैश्च ज्वरकारिभिर्हेतुभिः। स त्विति स पुनर्ज्वरो हेतुभेदाद्भिन्नोऽपि वातादीनां लिङ्गानि नातिवर्तते न परित्यज्य याति॥ ८१॥ ८२॥

गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ।
रसस्थे तु ज्वरे लिङ्गं दैन्यं चास्योपजायते॥ ८३॥
रक्तनिष्ठीवनं दाहः स्वेदश्छर्दनविभ्रमौ।
प्रलापः पिटिका तृष्णा रक्तप्राप्ते ज्वरे नृणाम्॥८४॥
पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता।
ऊष्माऽन्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ८५
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्दिरेव च।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता॥८६॥
मेदोऽस्थ्नां कुञ्च(ज)नं श्वासो विरेकश्छर्दिरेव च।
विक्षेपणं च गात्राणामेतदस्थिगते ज्वरे॥ ८७॥
तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा।
अन्तर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे।
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे॥ ८८॥
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः।
दग्ध्वेन्धनं यथा वह्निर्धातून् हत्वा यथा विषम् ८९
कृतकृत्यो व्रजेच्छान्तिं देहं हत्वा तथा ज्वरः।

केचिदत्र रसादिधातुगतज्वरस्य लक्षणं पठन्ति,—"रसस्थे तु ज्वरे वत्स! लक्षणानि निबोध मे। गुरुत्वं दैन्यमुत्क्लेशः सदनं छर्द्यरोचकौ॥ रागोष्णपिटिकास्तृष्णा सरक्तं ष्ठीवनं भ्रमः। दाहो मूर्च्छाऽरुचिश्छर्दिः प्रलापो रक्तसंस्थिते॥ पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता। ऊष्माऽन्तर्मोहविक्षेपौ[१] ग्लानिः स्यान्मांसगे ज्वरे॥ वेगस्तीव्रः पिपासा च मूर्च्छा छर्दिः प्रलापकः। गन्धस्य चासहत्वं च मेदःस्थे ग्लान्यरोचकौ॥ विरेकवमने चोभे त्वस्थिभेदः[२] प्रकूजनम्। विक्षेपणं च गात्राणां श्वासश्चास्थिगते ज्वरे॥ हिक्का कासो महाश्वासस्तमसश्च प्रवेशनम्। मर्मच्छेदो बहिः शैत्यं दाहोऽन्तश्चैव मज्जगे॥ तस्मान्मरणमाप्नोति शुक्रस्याप्युपसर्पणे। शेफसःस्तब्धता मोक्षः शुक्रस्य तु विशेषतः"—इति। एतच्च न पठनीयम्। कुतः? यतः सर्वशरीरं सन्ततेन व्याप्तं, सततादिभिश्च रसादिधातव इति कुतोऽपरो रसादिधातुगतज्वरावकाश[३] इति रसादिस्थज्वराणां पाठो न पठनीय एवेति जेज्जटाचार्याभिमतम्। श्रीगयदासाचार्येण चायं पाठोऽन्यादृशः पठितो व्याख्यातश्च, तन्मतानुसारिभिरस्माभिरपि पठ्यते व्याख्यायते च—गुरुतेत्यादि। गुरुता गात्राणाम्। सदनं च गात्राणामेव। दैन्यं ग्लानिः। अस्येति प्राणिनः। यद्यपि रसैकधातुप्राप्त्या सन्तत एवायं तथाऽप्यनुक्तधात्वाश्रितलक्षणकथनार्थमत्र निर्देशः। रक्तेत्यादि। मोहो विगतचित्तता। पिण्डिकेत्यादि। पिण्डिकोद्वेष्टनं जङ्घाक्रोडे जानुनोऽधोभागे पीडा। ऊष्माऽन्तः अन्तर्दाहः। विक्षेपोऽङ्गविक्षेपः। भृशमित्यादि। असहिष्णुता क्रोधनत्वं, केचित्तु स्वगन्धस्यासहिष्णुत्वमिति मन्यन्ते। कुञ्चनं संकोचः, स च सान्निध्यादस्थ्नामित्यनेन संबध्यते। तम इत्यादि। तमःप्रवेशनमन्धकारदर्शनम्। महाश्वासो वक्ष्यमाणलक्षणः। मर्मच्छेदश्चेति हृदयस्य छेदनमिव। शुक्रस्थानगत इति ननु शुक्रगे ज्वरे मरणमित्युक्तं तन्न, शुक्रं सर्वदेहगतं ततश्च रसादिधातुत्वभिभवेनापि शुक्रप्राप्तेस्तद्गतेऽपि मरणमिति। नैवं, सर्वशरीरस्थस्यापि शुक्रस्य कलान्तरितत्वेन त्वचां क्रमेण मर्मप्राप्तेः। यद्येवमनुक्रमादेव शुक्रं ज्वरेण कथं प्राप्यत इति चेत्? धात्वन्तरानतिक्रम्य शुक्रमार्गगमनादिति। शुक्रगतो ज्वरोऽपरव्यापाराभावाद्देहघातेनैवोपशाम्यतीति[१] दर्शयति—दग्ध्वेत्यादि। मृतशरीरे ऊष्माभावाज्ज्वरोपशमो ज्ञायते, विषाक्तकाण्डविद्धसर्पदष्टमृगादेर्मरणाद्विषोपशान्तिः प्रतीयते॥८३-८९॥—

वातपित्तकफोत्थानां ज्वराणां लक्षणं यथा॥ ९०॥
तथा तेषां भिषग्ब्रूयाद्रसादिष्वपि बुद्धिमान्।
समस्तैः सन्निपातेन धातुस्थमपि निर्दिशेत्॥ ९१॥
द्वन्द्वजं द्वन्द्वजैरेव दोषैश्चापि वदेत् कृतम्।

इदानीं धातुगतानामपि ज्वराणामुक्तैरेव वातादिज्वरलक्षणैर्दोषात्मकत्वेनावगम इति दर्शयति—वातेत्यादि। यथा येन प्रकारेण वातादिज्वराणां लक्षणं, तथा तेन प्रकारेण तेषां वातादिज्वराणां रसादिषु सप्तसु धातुषु गतानां लक्षणं बुद्धिमान् भिषक् ब्रूयादिति संबन्धः। समस्तैर्दोषलक्षणैः। द्वन्द्वजं ज्वरं, द्वन्द्वजैरेवेति द्विदोषजनितैः। दोषैश्चापीति दोषलक्षणैः धातुस्थं वदेदिति॥ ९०॥ ९१॥—

गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया॥ ९२॥
आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च।

गम्भीर इत्यादि। आनद्धत्वेन दोषपुरीषविबन्धेन। आनद्धत्वेन चेत्यत्र चकारात् प्रलापभ्रमसन्ध्यस्थिशूलादिपरिग्रहः; एतद्विपर्ययेणान्ये[२] ज्वरा ज्ञेयाः॥ ९२॥—

हतप्रभेन्द्रियं क्षीणमरोचकनिपीडितम्[३]॥ ९३॥
गम्भीरतीक्ष्णवेगार्तं ज्वरितं परिवर्जयेत्।

गम्भीरज्वरस्यासाध्यत्वमाह—हतेत्यादि। हतप्रभेन्द्रियं हतशरीरदीप्तिं तथा हतश्रोत्रचक्षुरादिशक्तिकम्। अन्ये प्रभाशब्देन इन्द्रियशक्तिं वदन्ति; तेन हतेन्द्रियशक्तिकमित्यर्थः।

---

१ 'ऊष्मान्तर्मोहविक्षेपौ' इति पा०। २ 'मर्मभेदः' इति 'पर्वभेदः' इति च पा०। ३ 'अपरो रसादिगतज्वरवेगकालः' इति पा०।

१ 'ज्वरोऽपरव्यापाराभावात्' इति पा०। २ 'एतद्विपर्ययेणोत्तानज्वरो ज्ञेयः' इति पा०। ३ 'क्षामं दुरात्मानमुपद्रुतम्' इति पा०।

गम्भीर इव गम्भीरोऽन्तर्वेगः, तीक्ष्णोऽतिदुःसहो बहिरन्तश्च वेगः, ताभ्यामन्योन्यमार्तं पीडितं; एतेन क्षीणं गम्भीरार्तं विवर्जयेत्, तीक्ष्णवेगार्तं च क्षीणमिति। 'अरोचकनिपीडितं' इत्यत्र 'दुरात्मानमुपद्रुतं' इति तथा 'उपद्रवनिपीडितं' इति च केचित् पठन्ति। दुरात्मानं दुःखितान्तःकरणं, उपद्रुतं ज्वरोपद्रवैः। 'अपरे दुरात्मभिरुपद्रुतम्' इति पठन्ति, तत्र प्रेतभूतपिशाचरक्षोभिः पीडितम् ॥ ९३ ॥—

हीनमध्याधिकैर्दोषैस्त्रिसप्तद्वादशाहिकः ॥ ९४ ॥
ज्वरवेगो भवेत्तीव्रो यथापूर्वं सुखक्रियः।

अतोऽनन्तरं तीक्ष्णवेगस्य सुखक्रियत्वमाह—हीनेत्यादि। हीनैर्दोषैस्त्र्यहं सुखक्रियस्तीक्ष्णवेगः, मध्यैः सप्ताहं, अधिकैर्द्वादशाहानीति। अत्र हीनमध्यत्वं वृद्ध्यपेक्षया। यथापूर्वं सुखक्रिय इति द्वादशाहिकात्तीक्ष्णवेगात् साप्ताहिकः सुचिकित्स्यः, साप्ताहिकात्तीक्ष्णवेगात् त्र्याहिकः सुचिकित्स्यः। हीनमध्याधिकैर्दोषैस्त्रिसप्तद्वादशाहिक इति यदुक्तं तदवधिमात्रद्योतकं; तेन दोषतारतम्याद्दोषभेदानामानन्त्यादुक्तावधेर्न्यूनो न्यूनतरो न्यूनतमो, अधिकोऽधिकतरोऽधिकतमोऽप्यवधिर्बोद्धव्यः ॥९४॥—

कालो ह्येष यमश्चैव नियतिर्मृत्युरेव च ॥ ९५ ॥
तस्मिन् व्यपगते देहाज्जन्मेह पुनरुच्यते ॥
इति ज्वराः समाख्याताः कर्मेदानीं प्रवक्ष्यते ॥९६॥

इदानीं कालनामभिर्विशेषणैर्मारणात्मकत्वं ज्वरस्य सूचयन् तन्मुक्तस्य पुनर्जन्म प्रतिपादयति—काल इत्यादि। इतिशब्दो निदानपरिसमाप्तौ। कर्मेत्यादि। कर्म चिकित्सा ॥ ९५ ॥ ९६ ॥

ज्वरस्य पूर्वरूपेषु वर्तमानेषु बुद्धिमान्।
पाययेत घृतं स्वच्छं ततः स लभते सुखम् ॥ ९७ ॥
विधिर्मारुतजेष्वेष, पैत्तिकेषु विरेचनम्।
मृदु, प्रच्छर्दनं तद्वत्कफजेषु विधीयते ॥ ९८ ॥

ज्वरस्येत्यादि। ज्वरस्येति निरामवातजनितस्य। घृतं पुराणं, तस्य कालादिसंस्कारेण विशेषगुणकारित्वात्। स्वच्छं सुष्ठु अच्छं केवलं, स्वच्छवचनाद्द्रव्यान्तरयोगो निषिध्यते, न तु संस्कारः पाकेन कालेन च। मारुतजेषु श्रमक्षयादिकुपितवातज्वरपूर्वरूपेषु, नत्वामाशयानुपूर्व्योत्पन्नेषु सामवातज्वरपूर्वरूपेषु। अत एव बुद्धिमान् पाययेदित्युक्तम्। एष सर्पिःपानविधिः। सुखमिति तावदच्छं केवलं घृतं पातव्यं यावत् सुखं प्राप्नोति, तदनन्तरं लघुभोजनादि। पैत्तिकेषु पित्तज्वरपूर्वरूपेषु। मृदु अतीक्ष्णम्। तद्वन्मृदु। कफजेषु कफज्वरपूर्वरूपेषु ॥ ९७ ॥ ९८ ॥

सर्वेद्विदोषजेषूक्तं यथादोषं विकल्पयेत्।

सर्वेत्यादि। सर्वेषु सन्निपातज्वरपूर्वरूपेषु, द्विदोषजेषु द्वन्द्वज्वरपूर्वरूपेषु; उक्तं यथादोषं सर्पिःपानादिकं, विकल्पयेदवधारयेत् ॥—

अस्नेहनीयोऽशोध्यश्च संयोज्यो लङ्घनादिना ॥९९॥

इदानीं घृताद्यनर्हस्य ज्वरपूर्वरूपे किं विधेयमित्याह—अस्नेहनीय इत्यादि। अस्नेहनीयोऽजीर्णी तरुणज्वरीत्यादिकः। अशोध्यो वमनविरेचनायोग्यः। लङ्घनादिनेत्यादिग्रहणात् षडङ्गादिशृतशीतोष्णोदकादिकं गृह्यते ॥ ९९ ॥

रूपप्राग्रूपयोर्विद्यान्नानात्वं वह्निधूमवत्।

अथ नवज्वरे स्नेहसंशोधनवर्जनात् कथं पूर्वरूपे तदुपदेश इत्याह—रूपप्राग्रूपयोरित्यादि। रूपप्राग्रूपयोः नानात्वं पृथक्त्वं वह्निधूमवत् विद्यात्; वह्निधूमदृष्टान्तेन नानात्वमनयोर्न घटपटादिवत्, अतोऽनयोर्ज्ञाने यत्नो विधेयः।—

प्रव्यक्तरूपेषु हितमेकान्तेनापतर्पणम् ॥ १०० ॥

पूर्वरूपे चिकित्सितमभिधाय रूपे चिकित्सितमाह—प्रव्यक्तरूपेष्वित्यादि। एकान्तेन अतिशयेन। अतर्पणमत्रोपवासः, शेषाणामतर्पणभेदानामवस्थाविशेषेण वक्ष्यमाणत्वात्। तेनामाशयानुपूर्व्योत्पन्नेषु ज्वरेषूपवासार्हेषु हितमित्यर्थः ॥ १०० ॥

आमाशयस्थे दोषे तु सोत्क्लेशे वमनं परम्।

अवस्थाविशेषेणापतर्पणविशेषमाह—आमाशयस्थे इत्यादि। हृल्लासलालाप्रसेकादिना दोषोत्क्लेशो ज्ञेयः ॥—

आनद्धः स्तिमितैर्दोषैर्यावन्तं कालमातुरः ॥ १०१ ॥
कुर्यादनशनं तावत्ततः संसर्गमाचरेत्।

लङ्घनं कियन्तं कालं कार्यमित्याह—आनद्ध इत्यादि। यावन्तं कालमातुरः स्तिमितैर्दोषैरप्रचलितरूपैरानद्धो बद्ध इव भवेत्तावन्तं कालं लङ्घयेदिति संबन्धः। स्तिमितत्वं च दोषाणामामरसावनद्धत्वात्। तत आनद्धत्वे निवृत्ते, अन्नाभिलाषे सति, संसर्गं पेयादिक्रममाचरेत्। अन्ये श्लोकोत्तरार्धमन्यथा पठन्ति,—"कालं तावन्तमश्नीयाल्लघ्वन्नं तु विरिक्तवत्" इति। लघ्वन्नमिति अत्रान्नद्रव्यकृतं लघ्वन्नं; विरिक्तवदित्यनेन मात्रालघुत्वम् १०१—

न लङ्घयेन्मारुतजे क्षयजे मानसे तथा ॥ १०२ ॥
अलङ्घ्याश्चापि ये पूर्वं द्विव्रणीये प्रकीर्तिताः।

उचितस्यापि लङ्घनस्य क्वचिन्निषेधमाह—न लङ्घयेदित्यादि। क्षयजे धातुक्षयजे यक्ष्मज्वरे वा, मानसे कामक्रोधादिसंभूते। अलङ्घ्या "गर्भिणीवृद्धबालैर्दुर्बलभीरुभिः" इत्यनेनोक्ताः। अन्ये तु व्याख्यानयन्ति—मारुतजे ज्वरे न लङ्घयेत्; किंभूते? क्षयजे। एतेन धातुक्षयप्रकुपितवातज इत्युक्तं; अथवा क्षयजे न लङ्घयेत्; किंभूते? मारुतजे। एतेन यक्ष्मज्वरे मारुतसंभूते न लङ्घयेत्। (यैः सामावस्थायां मारुतज्वरो यक्ष्मज्वरश्च स लङ्घनीय एव, निरामे मारुतजे ज्वरे न लङ्घयेत्।) ॥ १०२ ॥—

अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ॥ १०३ ॥
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम्।

अतो लङ्घनवर्णनमाह—अनवस्थितदोषाग्नेरित्यादि। अनवस्थितदोषाग्नेरिति 'पुरुषस्य' इति शेषः। तत्र दोषा अनव-

१ 'तत्रामाशयानुपूर्व्योत्पन्नेषु' इति पा०। २ अयं पाठो हस्तलिखितपुस्तके क्वचिन्नोपलभ्यते। ३ अयं पाठो हस्तलिखितपुस्तकेषु नोपलभ्यते।

स्थिताः स्थानान्तरगमनात्, वहिश्चानवस्थितो वहिर्विक्षिप्तत्वात् । आहारेच्छा हृदि काङ्क्षा, मुखोपनीतस्याहारस्य रसनेन्द्रियस्येच्छा रुचिः ॥ १०३ ॥—

सृष्टमारुतविण्मूत्रं क्षुत्पिपासाऽसहं लघुम् ॥१०४॥
प्रसन्नात्मेन्द्रियं क्षामं नरं विद्यात् सुलङ्घितम् ।

सम्यग्लङ्घितलक्षणमाह—सृष्टमारुतविण्मूत्रमित्यादि । सृष्टमारुतविण्मूत्रमिति अधःप्रवृत्तवातपुरीषमूत्रं, क्षुत्पिपासासहमिति सम्यग्लङ्घनादेकस्मिन्नेव काले ये क्षुत्पिपासे समवेते भवतस्ते सोढुमशक्तम् । तथाच तन्त्रान्तरं,—"वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे । हृदयोदरकण्ठास्यशुद्धौ तन्द्राक्लमे गते ॥ स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये । कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि–" इति । लघुमङ्गगौरवादिरहितम् । आत्मा अन्तःकरणम् । क्षामं सर्वाक्षमम् । एवंभूतं सुलङ्घितं विद्यात् ॥ १०४ ॥—

बलक्षयस्तृषा शोषस्तन्द्रानिद्राभ्रमक्लमाः ॥ १०५ ॥
उपद्रवाश्च श्वासाद्याः संभवन्त्यतिलङ्घनात् ।

अतिलङ्घनलक्षणमाह—बलक्षय इत्यादि । बलक्षय इति कालजयुक्तिजसहजानां बलानां हानिः, अथवा बलक्षय ओजःक्षयः । शोषो मुखशोषः । तन्द्रा शारीरोक्तलिङ्गा निद्राभेदः । निद्रा प्रसिद्धा । ननु श्लेष्मणा निद्रा उत्पद्यते, अतिलङ्घनात्तु श्लेष्मक्षये जाते कथं सा उत्पद्यते ? सत्यं; निद्रेव निद्रेत्युपमया चेष्टोपरमान्निद्रात्वेन विवक्षिता । अन्ये तु तन्द्रानिद्रयोर्मध्ये अकारप्रश्लेषं मन्यन्ते, ततश्चानिद्रेति व्याख्यानयन्ति । भ्रमश्चक्रारूढस्येव भ्रमणं, क्लमोऽनायासश्रमः । आदिशब्दात् कासस्वरक्षयच्छर्दिहिक्कादयः । तन्त्रान्तरोक्तपर्वभेदादीन्यतिलङ्घनलक्षणानि सुलङ्घनलक्षणोक्तप्रसन्नात्मेन्द्रियादिवैपरीत्यादधिगन्तव्यानि ॥ १०५ ॥—

दीपनं कफविच्छेदि पित्तवातानुलोमनम् ॥ १०६ ॥
कफवातज्वरार्तेभ्यो हितमुष्णाम्बु तृड्छिदम् ।
तद्धि मार्दवकृद्दोषस्रोतसां

अर्धावशिष्टोदकगुणमाह—दीपनमित्यादि । कफविच्छेदि स्त्यानश्लेष्मणो विच्छेदकम् । कफवातज्वरार्तेभ्य इति बहुवचननिर्देशात् कफज्वरार्तवातज्वरार्तकफवातज्वरार्तेभ्यो हितमित्यर्थः । यद्यपि पानीयवर्गे उष्णोदकगुणा वर्णितास्तथाऽपि तत्रोक्तगुणेभ्योऽधिकविधानार्थमत्रोक्ताः । यद्येवं तर्ह्येते गुणास्तत्रैव कुतो न निर्दिष्टाः ? स्वस्थातुरयोरप्युष्णोदकस्य हितत्वापादनार्थं; तच्चोष्णोदकं मार्दवकृत् मृदुकारि; दोषस्रोतसां दोषवहस्रोतसाम्, अथवा दोषाणां स्रोतसां च मृदुत्वं विदधाति । एवंगुणमप्युष्णोदकं ज्वरेऽल्पं देयमित्याहुराचार्याः ॥ १०६ ॥—

शीतमन्यथा ॥ १०७ ॥
सेव्यमानेन तोयेन ज्वरः शीतेन वर्धते ।

शीतोदकगुणमाह—शीतमन्यथेत्यादि । शीतमक्वथितम् । अन्यथा उष्णोदकगुणविपरीतगुणम् । किं शीतोदकमुष्णाम्बुगुणविपरीतमेव स्यादुतान्यत् किमपि कुरुत इत्याह—सेव्यमानेनेत्यादि ॥ १०७ ॥—

पित्तमद्यविषोत्थेषु शीतलं तिक्तकैः शृतम् ॥१०८॥
गाङ्गेयनागरोशीरपर्पटोदीच्यचन्दनैः ।

इदानीं शृतशीतस्य गुणमाह—पित्तेत्यादि । पित्तमद्यविषोत्थेषु ज्वरेषु तिक्तकैः शृतशीतलं जलं देयं, केवलं वा शृतशीतलं जलं देयं, तन्त्रान्तरवचनात् । तान्येव तिक्तद्रव्याण्याह—गाङ्गेयेत्यादि । गाङ्गेयं मुस्तम्, उदीच्यं वालकं, चन्दनं रक्तचन्दनम् । कल्पनोच्यते—गाङ्गेयादिसर्वद्रव्यं कर्षमात्रमुदकप्रस्थे क्वाथ्यार्धशृतं कृत्वा प्रयोक्तव्यं; वृद्धवैद्यास्तु गाङ्गेयादिसर्वद्रव्यपलमुदकाढके पक्त्वाऽर्धाढकमवशेषयन्ति । यद्यप्युतिक्ता शुण्ठी तथाऽपि पाचनीयत्वेन यौगिकत्वादस्मिन् योगे प्रक्षेपः । तन्त्रान्तरे तु, "कर्षमात्रं ततो द्रव्यं साधयेत् प्रास्थिकेऽम्भसि । अर्धशृतं प्रयोक्तव्यं पाने पेयादिसंविधौ"—इति । पञ्जिकाकारस्तु पूर्वार्धमेव पठति नोत्तरार्धं; तिक्तकैस्तिक्तद्रव्यैः पर्पटादिभिरिति च व्याख्यानयति ॥ १०८ ॥—

दीपनी पाचनी लघ्वी ज्वरार्तानां ज्वरापहा ॥१०९॥
अन्नकाले हिता पेया यथास्वं पाचनैः कृता ।

दीपनीत्यादि । अन्नकाले स्वस्थवृत्ताभिधास्यमाने 'विसृष्टे विण्मूत्रे' इत्यादिके, 'दिनान्ते' इत्यन्ये । यथास्वं पाचनैः कृता पञ्चमूलीप्रभृतिभिः संस्कृता । अन्ये तु पाचनैरित्यत्र बहुवचनमाद्यर्थे, तेन दीपनपाचनसंशमनीयादिभिः संस्कृतेति व्याख्यानयन्ति । पुनः पेयागुणाभिधानमुष्णोदकगुणाभिधानवत्, अतो न पुनरुक्तिः ॥ १०९ ॥—

बहुदोषस्य मन्दाग्नेः सप्तरात्रात् परं ज्वरे ॥ ११० ॥
लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते ।
तदा तं मुखवैरस्यतृष्णारोचकनाशनैः ॥ १११ ॥
कषायैः पाचनैर्हृद्यैर्ज्वरघ्नैः समुपाचरेत् ।

कृतलङ्घनादेर्ज्वरिणो यस्यामवस्थायां पाचनं देयं तामाह—बहुदोषस्येत्यादि । ननु, तन्त्रान्तरे स्वेदतिक्तकरसौ पाचनार्थमुक्तौ, तावत्र कस्मान्न निर्दिष्टौ ? सत्यं, उष्णोदकविधानेन तावत् कफवातज्वरस्य स्वेदो लब्धः, षडङ्गकल्पनया पानीयसंस्कारेण च तिक्तकरसो गृहीत इत्यत्र द्वावपि निर्दिष्टौ । मुखवैरस्यतृष्णारोचकनाशनैरिति वक्ष्यमाणैर्मुस्तपित्तकफज्वरपाचनैः, वातादिलक्षणत्वाद्वदनवैरस्यादीनाम् । कषायैः क्वाथैः । आमदोषपाचनार्थं यवागूः कथमामे प्रयुज्यते ? सत्यं, द्विप्रकारा ह्यामता प्रभूता अल्पा च, तत्र प्रभूतामतां विहायाल्पामतायां प्रयुज्यत इति न दोषः ॥ ११० ॥ १११ ॥—

पञ्चमूलीकषायं तु पाचनं पवनज्वरे ॥ ११२ ॥
सक्षौद्रं पैत्तिके मुस्तकटुकेन्द्रयवैः कृतम् ।

१ 'लङ्घनान्ते यवागूभिः' इति पा० ।

पिप्पल्यादिकषायं तु कफजे परिपाचनम् ॥ ११३ ॥
द्वन्द्वजेषु तु संसृष्टं दद्या-

तान्येव पाचनानि प्रतिदोषमाह—पञ्चमूलीत्यादि । पञ्चमूली महती । अन्ये तु कफानुगे वातज्वरे महती, पित्तानुगे च कनीयसी, इति द्विविधामपि पञ्चमूलीं गृह्णन्ति । संसृष्टं मिश्रम् । सन्निपातचिकित्सा द्वन्द्वजचिकित्सायामेवान्तर्भूता, अतः पृथङ्नोक्ता ॥ ११२ ॥ ११३ ॥—

-दथ विवर्जयेत् ।
पीताम्बुर्लङ्घितो भुक्तोऽजीर्णी क्षीणः पिपासितः ११४

येषां पाचनमहितं तानाह—अथेत्यादि । विवर्जयेत् 'पाचनम्' इति शेषः । पीताम्बुः सद्य एव पीतोदकः । लङ्घितः कृतोपवासः । भुक्तः सद्य एव कृताहारः । अजीर्णी अपरिपक्वभोजनः ॥ ११४ ॥

(तीक्ष्णे ज्वरे गुरौ देहे विबद्धेषु मलेषु च ।
सामदोषं विजानीयाज्ज्वरं पक्वमतोऽन्यथा ॥)[१]
मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च ।
पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम् ॥ ११५ ॥

इदानीं पक्वदोषलक्षणमाह—मृदावित्यादि । तद्वक्ष्यमाणशमनशोधनाख्यमौषधम् ॥ ११५ ॥

दोषप्रकृतिवैकृत्यादेकेषां पक्वलक्षणम् ।

एकीयमतमाह—दोषप्रकृतिवैकृत्यादित्यादि । दोषप्रकृतिवैकृत्यादिति ज्वरोत्पादिकाया दोषप्रकृतेरुच्छ्रिताया अन्यथात्वादित्यर्थः ॥—

हृदयोद्वेष्टनं तन्द्रा लालास्रुतिररोचकः ॥ ११६ ॥
दोषाप्रवृत्तिरालस्यं विबन्धो बहुमूत्रता ।
गुरूदरत्वमस्वेदो न पक्तिः शकृतोऽरतिः ॥ ११७ ॥
स्वापः स्तम्भो गुरुत्वं च गात्राणां वह्निमार्दवम् ।
मुखस्याशुद्धिरग्लानिः प्रसङ्गी बलवाञ्ज्वरः ॥ ११८ ॥
लिङ्गैरेभिर्विजानीयाज्ज्वरमामं विचक्षणः ।

इदानीं सामान्यमामज्वरलक्षणमाह—हृदयोद्वेष्टनमित्यादि । हृदयोद्वेष्टनं हृदयस्य आमोटनमिव । दोषाप्रवृत्तिर्वातादीनां निश्चलता । विबन्धो विड्वातयोरप्रवर्तनम् । अरतिः न कुत्रचिदवस्थितिश्चेतसः । अग्लानिरीषच्छान्तिः । प्रसङ्गी संसक्तः । एतानि लक्षणानि प्रायेण सप्तरात्रं यावद्भवन्ति । अमुं पाठं पञ्जिकाकारो 'लालाप्रसेको हृल्लासो हृदयाशुद्ध्यरोचकाः । तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता ॥ क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवाञ्ज्वरः । आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम्' इत्यादिना ग्रन्थेन पठति ॥ ११६-११८ ॥—

सप्तरात्रात्परं केचिन्मन्यन्ते देयमौषधम् ॥ ११९ ॥
दशरात्रात्परं केचिद्दातव्यमिति निश्चिताः ।

इदानीं कषायरसस्यौषधस्योपयोगकालं परमतेनाह—सप्तेत्यादि । औषधं कषायरसमपि, नतु तिक्तरसमेव, तस्य सामेऽप्युपयोगार्हत्वात् । ननु, 'मृदौ ज्वरे लघौ देहे' इत्यादिनैव पक्वलक्षणेऽभिहिते भेषजदानमुक्तं, तत्कथं सप्तरात्रादित्यादिकं[१] परमतमङ्गीक्रियते ? सत्यं, सप्तरात्रादर्वाक् पाचनस्यापि निषेधार्थं सप्तरात्रग्रहणं, दशाहादनन्तरमविद्यमानेऽपि पाकलक्षणे औषधं देयमिति दर्शनार्थं च दशरात्रग्रहणम् । निश्चिता निश्चयकारिणो वैद्याः ॥ ११९ ॥—

पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते ॥ १२० ॥
अचिरज्वरितस्यापि देयं स्याद्दोषपाकतः ।

यदा पुनः सप्ताहादर्वागपि पित्तज्वरोऽल्पदोषश्च शीघ्रं पाकं यायात्तदौषधं देयमित्याह[२]—पैत्तिके इत्यादि । अल्पकालसमुत्थितेऽपि पैत्तिके ज्वरे यदौषधं देयं दातव्यं भवेत् तत्तदा देयमिति पिण्डार्थः । वाशब्दाद्वातश्लेष्मादिज्वरे दोषपाके सत्यौषधं देयम् ॥ १२० ॥—

भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम् ॥१२१॥
शोधनं, शमनीयं तु करोति विषमज्वरम् ।

कस्माद्दोषाणां पाके सत्येवौषधं देयमित्याह—भेषजमित्यादि । शोधनमौषधमामदोषस्य पुरुषस्य ज्वरं ज्वलयति दीपयतीत्यर्थः; शमनीयं तु पुनरौषधं दत्तं विषमज्वरं करोति । केचित् 'ज्वलयति' इत्यत्र 'वर्धयति' इति पठन्ति ॥१२१॥—

च्यवमानं ज्वरोत्क्लिष्टमुपेक्षेत मलं सदा ॥ १२२ ॥
अतिप्रवर्तमानं च साधयेदतिसारवत् ।

इदानीं ज्वरिणामावस्थिकं कर्तव्यमाह—च्यवमानमित्यादि । उत्क्लिष्टमिति यतो ज्वरेणामाशयाच्चालितमत एव च्यवमानं, मलं वातादिकं, सदाऽऽमावस्थायां पक्वावस्थायां च । अतिसारवदित्यनेन पाचयन् संग्रहं नयेदित्यर्थः सूच्यते । मलोऽत्र न पुरीषमेव, अनिर्गमने वमनादिभिर्निर्हरणोपदेशात् ॥ १२२ ॥—

यदा कोष्ठानुगाः पक्वा विबद्धाः स्रोतसां मलाः १२३
अचिरज्वरितस्यापि तदा दद्याद्विरेचनम् ।

तर्हि कदा शोधनं प्रयोज्यमित्याह—यदा कोष्ठानुगा इत्यादि । विरेचनमत्र शोधनं, न त्वधोरेचनमेव । केचित् पूर्वत्र अस्मिंश्च वाक्ये मलं पुरीषं कथयन्ति ॥ १२३॥—

पक्वो ह्यनिर्हृतो दोषो देहे तिष्ठन् महात्ययम् १२४
विषमं वा ज्वरं कुर्याद्बलव्यापदमेव च ।
तस्मान्निर्हरणं कार्यं दोषाणां वमनादिभिः ॥ १२५ ॥

पक्वदोषोपेक्षणे दूषणमाह—पक्व इत्यादि । अनिर्हृतो वमनादिना, महात्ययं गम्भीरं, बलव्यापदं बलापचयं कुर्यात् । तस्मादित्यादि । निर्हरणमीषद्धरणम् ॥ १२४ ॥ १२५ ॥

१ अयं श्लोकः केषुचित्पुस्तकेषु न पठ्यते ।

१ 'सप्तरात्रादिकं' इति पा० । २ 'यदा पुनर्वातपित्तकफज्वरोऽल्पदोषस्य शीघ्रं पाकं याति तदौषधं देयमित्याह—'पैत्तिके इत्यादि । इति पा० ।

प्राक्कर्म वमनं चास्य कार्यमास्थापनं तथा ।
विरेचनं तथा कुर्याच्छिरसश्च विरेचनम् ॥ १२६ ॥
क्रमशः

इदानीं क्रमशो वमनादिपरिपाटीमाह—प्रागित्यादि । यद्यपि प्रथमं लङ्घनस्योपदेशस्तथाऽप्यवस्थाप्राप्तत्वाद्वमनस्यापि प्राक्कर्मत्वम् । क्रमश इति क्रमेण, न युगपत्; अथवा लङ्घनपाचनानन्तरं स्नेहादिना कोष्ठप्राप्तेषु दोषेषु मध्यमावस्थायां ज्वरस्येति क्रमशो देयम् । प्राक्कर्म वमनं चास्येत्र चकारादग्रेऽनुवासनमित्यपि ॥ १२६ ॥—

बलिने देयं वमनं श्लैष्मिके ज्वरे ।
पित्तप्राये विरेकस्तु कार्यः प्रशिथिलाशये ॥ १२७ ॥
सरुजेऽनिलजे कार्यं सोदावर्ते निरूहणम् ।
कटीपृष्ठग्रहार्तस्य दीप्ताग्नेरनुवासनम् ॥ १२८ ॥
शिरोगौरवशूलघ्नमिन्द्रियप्रतिबोधनम् ।
कफाभिपन्ने शिरसि कार्यं मूर्धविरेचनम् ॥ १२९ ॥

यादृशस्य पुंसो यदात्मके ज्वरे वमनादिकं प्रयुज्यते तदाह—बलिने इत्यादि । बलिने पुरुषाय श्लैष्मिके ज्वरे वमनं देयं, 'आमाशयस्थे दोषे तु सोत्क्लेशे' इत्यादिना या पूर्वं वमनावस्था कथिता तस्यां जातायामित्यर्थः । पित्तप्राये पित्तबाहुल्ये, प्रशिथिलाशये अस्तब्धपक्वाशये । तुशब्दाद्वमनमपि पित्ते देयम् । तथाच,—"उपस्थिते श्लेष्मपित्ते व्याधावामाशयाश्रये । वमनार्थं प्रयुञ्जीत भिषग्देहमदूषयन्"—इति । सरुजे कोष्ठरुग्युक्ते । सोदावर्ते सविबन्धे । शिरोगौरवशूलघ्नमित्यादिकं मूर्धविरेचनमिति । जीर्णज्वरे मूर्धविरेचनं न तु तरुणज्वरे परं सान्निपातकं विहाय, सान्निपातके पुनः संज्ञाप्रबोधनार्थं तरुणेऽपि प्रयुज्यते । पञ्जिकाकारस्तु 'क्रमेण बलिने देयं वमनं श्लैष्मिके ज्वरे' इत्यत्र 'आमाशयस्थे दोषे तु सोत्क्लेशे वमनं परम्' इत्यादि पूर्वोक्तमेव पाठं पठति ॥ १२७–१२९ ॥

दुर्बलस्य समाध्मातमुदरं सरुजं दिहेत् ।
दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ॥ १३० ॥
अम्लपिष्टैः सुखोष्णैश्च

अतः परं दुर्बलस्योदरलेपमाह—दुर्बलस्येत्यादि । दारु देवदारु, हैमवती वचा, अम्लं काञ्जिकम् ॥ १३० ॥—

पवने तूर्ध्वमागते ।
रुद्धमूत्रपुरीषाय गुदे वर्तिं निधापयेत् ॥ १३१ ॥

वर्तिविषयमाह—पवने इत्यादि । वर्तिरत्र दारुहैमवत्यादिभिः कृता, अन्ये तु मदनफलसैन्धवपिप्पल्यादिभिर्यौगिकैर्द्रव्यैः कृता इति व्याख्यानयन्ति ॥ १३१ ॥

पिप्पलीपिप्पलीमूलयवानीचव्यसाधिताम् ।
पाययेत यवागूं वा मारुताद्यनुलोमिनीम् ॥ १३२ ॥

ऊर्ध्वगतपवने रुद्धमूत्रपुरीषस्यान्यत् किं कुर्यादित्याह—पिप्पलीत्यादि ॥ १३२ ॥

शुद्धस्योभयतो यस्य ज्वरः शान्तिं न गच्छति ।
सशेषदोषरूक्षस्य तस्य तं सर्पिषा जयेत् ॥ १३३ ॥

सशेषदोषत्वाद्रूक्षत्वाच्च ज्वरेऽप्रशाम्यति सति रूक्षस्य शुद्धस्य प्रतीकारमाह—शुद्धस्येत्यादि ॥ १३३ ॥

कृशं चैवाल्पदोषं च शमनीयैरुपाचरेत् ।
उपवासैर्बलस्थं तु ज्वरे सन्तर्पणोत्थिते ॥ १३४ ॥

शोधनविधिमभिधाय संशमनविधिमाह—कृशमित्यादि । उपवासैरिति भोजनपरित्यागैः । जेज्जटाचार्यस्तु—उपवासस्यापि संशमनीयत्वाद्विशिष्टविषये तन्नियोगमाह—उपवासैरित्यादि । उपवासैरिति बहुवचनाद्दशविधमपि लङ्घनं यथावस्थं योज्यम् । तथा च,—"चतुष्प्रकारा संशुद्धिः पिपासामारुतातपौ । पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम्"—इति । ईदृशे च व्याख्याने संशमनप्रस्तावेऽपि पुनः शोधनमभिहितं भवति ॥ १३४ ॥

क्लिन्नां यवागूं मन्दाग्निं तृषार्तं पाययेन्नरम् ।

संशमनेष्वाहारस्य वरत्वात्तदभिधानमाह—क्लिन्नामित्यादि । क्लिन्नामल्पसिक्थत्वेन; 'क्लिन्नां' इत्यत्र 'तन्वीं' इति केचित् पठन्ति, तत्रापि स एवार्थः ॥—

तृट्छर्दिदाहघर्मार्तं मद्यपं लाजतर्पणम् ॥ १३५ ॥
सक्षौद्रमम्भसा पश्चाज्जीर्णे यूषरसौदनम् ।
उपवासश्रमकृते क्षीणं(णे) वाताधिके ज्वरे ॥ १३६ ॥
दीप्ताग्निं भोजयेत् प्राज्ञो नरं मांसरसौदनम् ।
मुद्गयूषौदनश्चापि हितः कफसमुत्थिते ॥ १३७ ॥
स एव सितया युक्तः शीतः पित्तज्वरे हितः ।

यवाग्वनर्हस्य तर्पणमाह—तृडित्यादि । हित इति 'अन्नकाले' इति शेषः । स इत्यादि । स एव मुद्गयूष एव ॥ १३५–१३७ ॥—

दाडिमामलमुद्गानां यूषश्चानिलपैत्तिके ॥ १३८ ॥
ह्रस्वमूलकयूषस्तु[1] वातश्लेष्माधिके हितः ।
पटोलनिम्बयूषस्तु पथ्यः पित्तकफात्मके ॥ १३९ ॥
दाहच्छर्दियुतं क्षामं निरन्नं तृष्णयाऽर्दितम् ।
सिताक्षौद्रयुतं लाजतर्पणं पाययेत च ॥ १४० ॥

द्वन्द्वज्वराणां पथ्यमाह—दाडिमेत्यादि । ह्रस्वमूलको लघुमूलकः । लाजतर्पणं पाययेत चेत्यत्र द्रवानुक्तेः शीतोदकेन लाजतर्पणपानं, केचिच्छृतशीतेन पानमिच्छन्ति, अन्ये तु ज्वरापहैः फलरसैः पानं लाजतर्पणस्य पथ्यमाहुः ॥ १३८–१४० ॥

कफपित्तपरीतस्य ग्रीष्मेऽसृक्पित्तिनस्तथा[2] ।
मद्यनित्यस्य न हिता यवागूस्तमुपाचरेत् ॥ १४१ ॥
यूषैरम्लैरनम्लैर्वा जाङ्गलैश्च रसैर्हितैः ।

१ 'ह्रस्वमूलकयूषेण भोजयेत् कफवातिके' इति पा० । २ 'ध्रुवते' इति पा० ।

इदानीं प्रशस्ताया यवाग्वा विशिष्टविषयेऽहितत्वं दर्शयन्नाह—कफपित्तपरीतस्येत्यादि । कफपित्तपरीतस्य कफपित्ताभ्यां मिलिताभ्यां व्याप्तस्य । यद्यपि रक्तपित्तप्रतिषेधे घृतमिश्राया यवाग्वा हितत्वमभिधास्यति, तथाऽप्यत्र ज्वरे सति रक्तपित्ते यवागूरहिता, संयोगे पुनस्तथेति तस्य यवागूरहिता । तस्य पथ्यमाह—तमुपाचरेत्यादि । यूषैरम्लैरनम्लैर्वेति विकल्पः सात्म्यापेक्षया अन्यपेक्षया च । यूषजाङ्गलरसोपदेशोऽपि सात्म्यापेक्षया अवस्थापेक्षया च । यूषो मुद्गादियूषः । कफपित्तपरीतादीनां दाहाद्यभिभूतानां यूषरसोपदेशस्तत्र कालिको मन्तव्यः ॥ १४१ ॥—

मद्यं पुराणं मन्दाग्नेर्यवान्नोपहितं हितम् ॥ १४२ ॥

इदानीं शमनत्वान्मद्यतक्रेऽवस्थावशेन द्रव्यान्तरोपहिते हिततया दर्शयन्नाह—मद्यमित्यादि । मद्यं पुराणं सम्यक् पक्कं, दीपनीयत्वात् कफघ्नत्वाच्च ॥ १४२ ॥

सव्योषं वितरेत्तक्रं कफारोचकपीडिते ।

तक्रप्रयोगमाह—सव्योषमित्यादि । सव्योषं त्रिकटुकसंस्कृतं, वितरेत् दद्यात् ॥—

कृशोऽल्पदोषो दीनश्च नरो जीर्णज्वरार्दितः ॥१४३॥
विबद्धः सृष्टदोषश्च रूक्षः पित्तानिलज्वरी ।
पिपासार्तः सदाहो वा पयसा स सुखी भवेत् १४४

क्षीरावस्थामाह—कृश इत्यादि । दीनः क्लिष्टचित्तः । विबद्धदोषोऽप्रवृत्तदोषः, सृष्टदोषश्च्युतदोषः । ननु, यदि विबद्धदोषे क्षीरं प्रयुज्यते तत्कथं प्रच्युतेऽपि प्रयुज्यते ? सत्यं, उभयशक्तिकत्वात् प्रच्युतेऽपि प्रयुज्यते; अथवा प्रच्युतो दोषः स्तोकस्तोकेन यस्य प्रवर्तते, अत्र सोऽभिप्रेतः; ततः सम्यग्दोषप्रवर्तनार्थं भेदनं क्षीरं च्युतदोषेऽपि प्रयुज्यते इत्यर्थः । एष पाठो निबन्धकारैः कियन्मात्रः पठितः कियन्मात्रश्च परित्यक्तः, अस्माभिर्वृद्धपठितत्वात् सर्वोऽपि लिखितः ॥ १४३ ॥ १४४ ॥

तदेव तरुणे पीतं विषवद्धन्ति मानवम् ।[3]

तरुणज्वरे पयः पीतं सत् किं कुर्यादित्याह—तदेवेत्यादि । तदेवेति पयः । तरुणे तरुणज्वरे ॥—

सर्वज्वरेषु सुलघु मात्रावद्भोजनं हितम् ॥ १४५ ॥
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्धनम् ।

इदानीं सर्वज्वरोचितस्याहारस्य यथाकालमुपयोगमाह—सर्वज्वरेष्वित्यादि । सुलघु पुराणरक्तशाल्यादि, मात्रावदल्पं, वेगापाये ज्वरवेगहानौ, अन्यथा उक्तप्रकारवैपरीत्येन, तत् भोजनं, हि यस्मादर्थे । केचित् 'वेगापाये' इत्यत्र 'दिनापाये' इति पठन्ति; दिनान्ते इति च व्याख्यानयन्ति । 'सर्वज्वरेषु सप्ताहं मात्रावल्लघु भोजयेत्' इतीदृशं पूर्वार्धं केचित् पठन्ति, स च निबन्धेषु न दृश्यते ॥ १४५ ॥—

ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत् ॥ १४६ ॥
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा ।
स क्षीणः कृच्छ्रतां याति यात्यसाध्यत्वमेव च १४७
तस्माद्रक्षेद्बलं पुंसां बले सति हि जीवितम् ।
गुर्वभिष्यन्द्यकाले च ज्वरी नाद्यात् कथञ्चन ॥१४८॥
न तु तस्याहितं भुक्तमायुषे वा सुखाय वा ।

इदानीं जीर्णज्वरितस्यारुचावपि हितभोजनोपदेशमाह—ज्वरित इत्यादि । अस्य जीर्णज्वरिणो यदि हितभोजने कथञ्चिदरुचिस्तदा हितमेवानेकप्रकाराभिः कल्पनाभिर्मुखप्रियं कृत्वाऽरुचिनिवृत्त्यर्थं ज्वरितोऽश्नीयात् । तथाच तन्त्रान्तरे,—"सातत्यात् स्वाद्वभावाच्च पथ्यं द्वेष्यत्वमागतम् । कल्पनाविधिभिस्तैस्तैः प्रियत्वं गमयेत् पुनः"—इति । कस्मादेवंविधमपि कृत्वा ज्वरितोऽश्नीयादित्याह—अन्नकाले ह्यभुञ्जान इत्यादि । अन्ये तु यद्यस्य जीर्णज्वरिणोऽरुचिः स्यात्तदा अहितमप्यश्नीयादिति व्याख्यानयन्ति । ननु, यद्यरुचौ सत्यामहितभोजनं क्रियते तदा 'गुर्वभिष्यन्द्यकाले च' इत्याद्युत्तरोक्तश्लोकेन सह कथं न विरोधः ? सत्यं, अहितस्य सातत्यसेवननिराकरणार्थं गुर्वभिष्यन्द्यकाले चेत्यादिश्लोकः । गुर्वित्यादि अभिष्यन्दि दोषधातुमलस्रोतसां क्लेदप्राप्तिजननम् । कथञ्चन सकृदपि । तुशब्दो यस्मादर्थे, तेन यस्मादहितं भुक्तं भोजनं ज्वरितस्य न आयुषोऽर्थे सुखार्थे वा भवति तस्माद्गुर्वादि न भक्षयेत् । यद्यपि कैश्चिन्निबन्धकारैरेष पाठो न पठितस्तथाऽपि सर्वनिबन्धोपजीविना मया पञ्जिकाकारपठितत्वात् पठितः ॥ १४६-१४८ ॥—

संततं विषमं वाऽपि क्षीणस्य सुचिरोत्थितम् १४९
ज्वरं संभोजनैः पथ्यैर्लघुभिः समुपाचरेत् ।

इदानीं दुर्बलस्य चिरोत्थिते ज्वरे पथ्यसंभोजनैर्बृंहणविधिमाह—संततमित्यादि । संततं नित्यलग्नं, विषमं सततान्येद्युष्कादिकम् । संभोजनैर्यथेष्टभोजनैः ॥ १४९ ॥—

मुद्गान्मसूरांश्चणकान् कुलत्थान् समकुष्ठकान् १५०
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ।

मुद्गान् मसूरांश्चणकानित्यादि । पूर्वं दोषप्रत्यनीकत्वदर्शनार्थं मुद्गादियूषाणामुपादानं, अत्र तु विकारप्रत्यनीकत्वदर्शनार्थम्, अतो न पुनरुक्तिः ॥ १५० ॥—

पटोलपत्रं वार्ताकं कठिल्लं पापचैलिकम् ॥ १५१ ॥
कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम् ।
पत्रं गुडूच्याः शाकार्थे ज्वरितानां प्रदापयेत् ॥१५२॥

पटोलपत्रमित्यादि । कठिल्लं पुनर्नवाशाकं, पापचैलिकं पाठाशाकं, गोजिह्वां गोजीशाकम् ॥ १५१ ॥ १५२ ॥

लावान् कपिञ्जलानेणान् पृषताञ्छरभाञ्छशान् ।
कालपुच्छान् कुरङ्गांश्च तथैव मृगमातृकान् ॥१५३॥
मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् ।[1]

---

१ 'यूषरसोपदेशस्तात्कालिको' इति पाठान्तरम् । २ 'कासघ्नत्वाच्च' इति पा० । ३ 'तदेव तु पयः पीतं तरुणे हन्ति मानवम्' इति पा० ।

१ 'हितानीति प्रकल्पयेत्' इति पा० ।

लावानित्यादि । कपिञ्जलो गौरतित्तिरिः, एणः कृष्णमृगः, पृषतश्चित्रमृगः 'चीतल' इति लोके, शरभोऽष्टपादुष्ट्रप्रमाणो महाशृङ्गः, कालपुच्छः स च प्रसिद्धः, कुरङ्गश्चतुःशृङ्गः 'मेढुली' इति लोके । मांसार्थे मांसप्रयोगे; केचिन्मांसार्थे बृंहणार्थे इति व्याख्यानयन्ति, 'मांसं मांसेन वर्धते' इत्युक्तत्वात् ॥ १५३ ॥—

सारसक्रौञ्चशिखिनः कुकुटांस्तित्तिरां(रीं)स्तथा१५४
गुरूष्णत्वान्न शंसन्ति ज्वरे केचिच्चिकित्सकाः ।

अतः परं सारसादीनामप्रशस्तत्वं परमतेन दर्शयन्नाह—सारसक्रौञ्चशिखिन इत्यादि । सारसो रक्तचञ्चुकः पक्षिविशेषः, क्रौञ्चः 'क्रौञ्चि' इति प्रसिद्धः, शिखी मयूरः, तित्तिरः कृष्णतित्तिरिः, तित्तिरिशब्द अकारान्तोऽप्यस्ति । यद्यपि मांसवर्गे कुक्कुटतित्तिरी परमुष्णौ दर्शितौ न सारसादयस्तथाऽप्यत एव विधानात् 'उष्णौ मयूरतित्तिरौ' इति दर्शनात् सारसादयोऽप्युष्णा ज्ञेयाः ॥ १५४ ॥—

ज्वरितानां प्रकोपं तु यदा याति समीरणः ॥ १५५ ॥
तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः ।

निषिद्धानामपि सारसादीनामवस्थायां ज्वरे प्रयोगमाह—ज्वरितानामित्यादि ॥ १५५ ॥—

परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च ॥१५६॥
(स्नानाभ्यङ्गदिवास्वप्नशीतव्यायामयोषितः) ।
कषायगुरुरूक्षाणि क्रोधादीनि तथैव च ॥ १५७ ॥
सारवन्ति च भोज्यानि वर्जयेत्तरुणज्वरी ।
तथैव नवधान्यादिं वर्जयेच्च समासतः ॥ १५८ ॥

इदानीं नवज्वरे यानि वर्जनीयानि तान्याह—परिषेकेत्यादि । परिषेको धाराप्रसेकः । अवगाहः जलपूर्णकटाहादौ निमज्जनम् । स्नेहान् स्नेहपानम् । संशोधनानि वमनादीनि । कषायः कषायद्रव्यकृतः क्वाथः । क्रोधादीनीत्यत्र आदिशब्दाच्छोकादीनि । सारवन्ति स्निग्धान्यभिष्यन्दीनि च । नवधान्यादिवर्गस्तत्कान्तो व्रणितोपासनीयोक्तः । समासतः संक्षेपतः । यद्यपि परिषेकादिवर्जनमामज्वरलक्षणानन्तरं पठितुमुचितं स्यात्तथाऽपि नवज्वरे भेषजस्यात्यन्तनिषेधज्ञापनार्थं तत्र नोक्तम् । केचिदमुमेव पाठमीदृशं पठन्ति—'परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च । सारवन्ति च भोज्यानि वर्जयेत्तरुणज्वरी ॥ तथैव नवधान्यानि क्रोधादीनि च वर्जयेत्' इति । व्याख्यानयन्ति च—स्नाननिषेधादवगाहनिषेधो बोद्धव्यः, अभ्यङ्गनिषेधश्च स्नेहनिषेधात्, क्रोधादीनि चेत्यत्र चकारात् कषायो गृहीतव्यः ॥ १५६–१५८ ॥

अनवस्थितदोषाग्नेरेभिः सन्धुक्षितो ज्वरः ।
गम्भीरतीक्ष्णवेगत्वं यात्यसाध्यत्वमेव च ॥ १५९ ॥

इदानीं नवज्वरे परिषेकादिसेवनात्किं स्यादित्याह—अनवस्थितेत्यादि । अनवस्थितदोषाग्नेर्नवज्वरिणः, एभिः परिषेकादिभिः सन्धुक्षितो वृद्धो ज्वरो गम्भीरादिवेगित्वं यातीति पिण्डार्थः । अनवस्थितदोषा विमार्गगाः, वह्निरनवस्थितो बहिर्गमनात् ॥ १५९ ॥—

शीततोयदिवास्वप्नक्रोधव्यायामयोषितः ।
न सेवेत ज्वरोत्सृष्टो यावन्न बलवान् भवेत् १६० ॥
मुक्तस्यापि ज्वरेणाशु दुर्बलस्याहितैर्ज्वरः ।
प्रत्यापन्नो दहेद्देहं शुष्कं वृक्षमिवानलः ॥ १६१ ॥
तस्मात्कार्यः परीहारो ज्वरमुक्तैर्विरिक्तवत् ।
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा ॥ १६२ ॥

इदानीं ज्वरमुक्तस्य शीततोयादिनिषेधार्थमाह—शीतेत्यादि । ज्वरोत्सृष्टो ज्वरविमुक्तः । इदानीं ज्वरमुक्तस्य शीततोयादिसेवनात् किं स्यादित्याह—मुक्तस्येत्यादि । अहितैः शीततोयादिभिः । प्रत्यापन्नः पुनरागतः । दहेत् विनाशयेत् । यस्मादहितसेवनात् पुनरागतो ज्वरो देहं दहेत्, तस्मादहितानां परिहारो ज्वरमुक्तेन पुरुषेण कार्य इति पिण्डार्थः । प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथेति दोषाणामविकृतकार्यकारित्वेन दोषतः प्रकृतिस्थत्वं ज्ञेयं, व्यायामादिसेवनसामर्थ्येन च प्राणतः प्रकृतिस्थत्वं ज्ञेयम् ॥ १६०–१६२ ॥

ज्वरे प्रमोहो भवति स्वल्पैरप्यवचेष्टितैः ।
निषण्णं भोजयेत्तस्मान्मूत्रोच्चारौ च कारयेत् ॥१६३

ज्वरे आयासनिषेधार्थमाह—ज्वरे इत्यादि । ज्वरे ज्वरकर्शिते पुरुषे । प्रमोहोऽत्र मूर्च्छा । अवचेष्टितैरुत्थानचङ्क्रमणादिभिः । निषण्णं शय्यायामेव आसीनमुपविष्टमिति यावत्, मूत्रोच्चारौ च कारयेदित्यत्रापि निषण्णमिति संबन्धनीयम् । उच्चारो विष्ठा ॥ १६३ ॥

अरोचके गात्रसादे वैवर्ण्येऽङ्गमलादिषु ।
शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयान्नरः १६४

अतः परं ज्वरोपशमेऽरोचकादिप्रतिषेधार्थमाह—अरोचके इत्यादि । गात्रसादोऽङ्गग्लानिः । शान्त इव शान्तो लीनज्वर इत्यर्थः, नतु सर्वथोपशान्तज्वरः, यस्मादुपशान्तज्वरेऽरोचकादीनामभाव एव । शोध्यः शोधनीयः । अनुबन्धभयात् पुनरुद्भवशङ्कया ॥ १६४ ॥

न जातु स्नापयेत्[१] प्राज्ञः सहसा ज्वरकर्शितम् ।
तेन संदूषितो ह्यस्य पुनरेव भवेज्ज्वरः ॥ १६५ ॥

अतः परं ज्वरकर्शितस्य स्नाननिषेधमाह—न जातु स्नापयेदित्यादि । जातु कथञ्चन । प्राज्ञो वैद्यः । सहसा शीघ्रं, यावद्बलं न प्राप्नोतीत्यर्थः । तेन स्नानेन ॥ १६५ ॥

चिकित्सेच्च ज्वरान् सर्वान्निमित्तानां विपर्ययैः ।
श्रमक्षयाभिघातोत्थे मूलव्याधिमुपाचरेत् ॥ १६६ ॥
स्त्रीणामपप्रजातानां स्तन्यावतरणे च यः ।
तत्र संशमनं कुर्याद्यथादोषं विधानवित् ॥ १६७ ॥

१ 'तर्पयेत्' इति पा० ।

इदानीं संक्षेपतः सर्वज्वरचिकित्सामाह—चिकित्सेदित्यादि । निमित्तानां कारणानां, विपर्ययैः विपरीतैः; यथा—संतर्पणोत्थेऽपतर्पणम्, अपतर्पणजे संतर्पणमिति । श्रमक्षयाभिघातोत्थे इत्यादि । मूलव्याधिमित्यत्र व्याधिशब्दो दोषे प्रवर्तते, कारणे कार्योपचारात्; तेन मूलदोषं वायुं, श्रमादिभिर्वातकोपादित्यर्थः । स्त्रीणामित्यादि । अपप्रजाताः पतितगर्भाः स्त्रियः, तासां यो ज्वरः, तथा स्तन्यावतरणे च स्त्रीणां यो ज्वरः, तत्र संशमनं कुर्यादिति पिण्डार्थः । यथादोषमिति यस्य दोषस्य तत्र प्रकोपो भवेत्तस्य प्रत्यनीकं संशमनं कुर्यादित्यर्थः । संशमनशब्देन पाचनमपि गृहीतम् । केचिदमुं पाठं न पठन्ति; श्रीजेज्जटाचार्यपठितत्वादस्माभिः पठितः ॥ १६६ ॥ १६७ ॥

अतः संशमनीयानि कषायाणि निबोध मे ।
सर्वज्वरेषु देयानि यानि वैद्येन जानता ॥ १६८ ॥

एवं संक्षेपेण चिकित्सामुपदिश्य, अधुना संशमनकषायान् विवक्षुराह—अत इत्यादि । निबोध जानीहि । मे मत्सकाशात् ॥ १६८ ॥

पिप्पलीसारिवाद्राक्षाशतपुष्पाहरेणुभिः ।
कृतः कषायः सगुडो हन्याच्छ्वसनजं ज्वरम् ॥१६९॥

इदानीं प्रथमं वातज्वरे संशमनमाह—पिप्पलीत्यादि । सारिवा उत्पलसारिवा, हरेणुः रेणुका । श्वसनजं वातजम् । पिप्पल्यादिद्रव्यपलमुदकस्य षोडशभिः पलैरुत्क्वाथ्य, चतुर्भागावशिष्टं पलचतुष्टयं गृहीत्वा, गुडकर्षसंयुक्तं पाययेत् । तथा चोक्तम्,—"भेषजात् षोडशगुणं जलं, क्वाथ्यं पलं मतम् । चतुर्भागावशेषं तु पेयमेवं सुखार्थिना"—इति । क्वाथ्यद्रव्यस्य यत् पलं प्रमाणं तदुत्तमानां; तथा चोक्तम्,—"उत्तमस्य पलं मानं त्रिभिः कर्षैश्च मध्यमे । जघन्यस्य पलार्धं च स्नेहक्वाथौषधेषु च"—इति । वृद्धवैद्याश्च मध्यमप्रमाणेनाष्टौ शरावानुदकस्य प्रक्षिप्याष्टभागावशेषितं शरावमेकं गृह्णन्ति, शेषं सममेव व्याख्यानयन्ति; गुडावापमपि वृद्धवैद्या न मन्यन्ते ॥ १६९ ॥

शृतं शीतकषायं वा गुडूच्याः पेयमेव तु ।

शृतमित्यादि । शृतमनन्तरोक्तकल्पनया क्वाथीकृतम् । उष्णोदकपाचितादद्रव्याद्रात्रिपर्युषिताद्यो रसोऽभिनिर्याति स शीतकषायशब्दवाच्यः । तथाचोक्तं—"द्रव्यादापोथितात्तोये प्रतप्ते संस्थितान्निशि । कषायो योऽभिनिर्याति स शीतः समुदाहृतः—"इति । शृतकषायपानं कफानुबन्धवातज्वरे, पित्तानुबन्धे तु शीतकषायपानमिति ॥—

बलादर्भश्वदंष्ट्राणां कषायं पादशेषितम् ॥ १७० ॥
शर्कराघृतसंयुक्तं पिबेद्वातज्वरापहम् ।

बलादर्भश्वदंष्ट्राणामित्यादि । श्वदंष्ट्रा गोक्षुरकः, कषायः पूर्वोक्तकल्पनया क्वथितः । शर्कराघृतयोः प्रमाणं कर्षम् ॥१७०॥—

शतपुष्पावचाकुष्ठदेवदारुहरेणुकाः ॥ १७१ ॥
कुस्तुम्बुरूणि नलदं मुस्तं चैवाप्सु साधयेत् ।
क्षौद्रेण सितया चापि युक्तः क्वाथोऽनिलाधिके १७२

शतपुष्पेत्यादि । हरेणुका रेणुका, कुस्तुम्बुरु धान्यकं, नलदमुशीरम् । शर्कराक्षौद्रप्रमाणं पूर्ववत् । शतपुष्पादिहरेणुकान्तैरेको योगः परं शर्कराहीनः; कुस्तुम्बुरुप्रभृतिभिश्च द्वितीयः ॥ १७१ ॥ १७२ ॥

द्राक्षागुडूचीकाश्मर्यत्रायमाणाः ससारिवाः ।
निःक्वाथ्य सगुडं क्वाथं पिबेद्वातकृते ज्वरे ॥ १७३ ॥
गुडूच्याः स्वरसो ग्राह्यः शतावर्याश्च तत्समः ।
निहन्यात्सगुडः पीतः सद्योऽनिलकृतं ज्वरम् १७४

द्राक्षागुडूचीत्यादि । काश्मर्यं गम्भारीफलम् । सगुडमिति क्वाथोपरि कर्षप्रमाणस्य गुडस्य पश्चान्निक्षेपः ॥१७३॥ १७४॥

घृताभ्यङ्गस्वेदलेपानवस्थासु च योजयेत् ।

घृतेत्यादि । ननु, यथाप्रतिज्ञं कषायेषु वाच्येषु स्नेहनाद्युपदेशः कुतोऽभिधीयते? उच्यते—वातज्वरप्रतीकारप्रस्तावात् । अवस्थासु शीतोद्गमादिषु । तत्र जीर्णज्वरे त्वग्गते घृताभ्यङ्गः, शीतोद्गमे च स्वेदलेपाविति ॥—

श्रीपर्णीचन्दनोशीरपरूषकमधूकजः ॥ १७५ ॥
शर्करामधुरो हन्ति कषायः पैत्तिकं ज्वरम् ।

पैत्तिकज्वरसंशमनमाह—श्रीपर्णीत्यादि । श्रीपर्णीशब्देन गम्भारीफलं, चन्दनं रक्तचन्दनं, परूषकं स्वनामप्रसिद्धं, मधूको गुडपुष्पस्तस्यापि फलं ग्राह्यम् । यावत्प्रमाणया शर्करया मधुरः क्वाथो भवति तावत्येव शर्करा प्रक्षेप्तव्या, वृद्धवैद्या आदिद्रव्यसमां शर्करामाहुः ॥ १७५ ॥—

पीतं पित्तज्वरं हन्यात्सारिवाद्यं सशर्करम् ॥१७६॥

पीतं पित्तज्वरमित्यादि । सारिवाद्यं सारिवादिद्रव्यगणजातं कषायकल्पनया निःक्वाथ्य कर्षप्रमाणशर्करायुतं पीतं सत् पित्तज्वरं हन्यादिति संबन्धः ॥ १७६ ॥

सयष्टीमधुकं हन्यात्तथैवोत्पलपूर्वकम् ।

सयष्टीमधुकमित्यादि । उत्पलादिगणोक्तं द्रव्यजातं सयष्टीमधुकं निःक्वाथ्य पीतं सत् पित्तज्वरं हन्यादिति संबन्धः । यद्यपि उत्पलादिगणेनैव यष्टीमधुकं प्राप्तं तथाऽपि पुनः सयष्टीमधुकमिति यत्कृतं तद्यष्टीमधुकस्य भागद्वयप्रतिपादनार्थम् ॥—

शृतं शीतकषायं वा सोत्पलं शर्करायुतम् ॥ १७७ ॥

शृतमित्यादि । शृतं शीतकषायं वेति विकल्पो दाहादितारतम्याद्यपेक्षया । सोत्पलमित्यत्र आदिशब्दो लुप्तो द्रष्टव्यः; तेन, उत्पलादिगणसहितम्, उत्पलादिगणकृतमित्यर्थः ॥ १७७ ॥

गुडूचीपद्मरोध्राणां सारिवोत्पलयोस्तथा ।
शर्करामधुरः क्वाथः शीतः पित्तज्वरापहः ॥ १७८ ॥

१ 'मांसीं' इति पा० । २ 'यष्टिमधुः' इति पा० ।

गुडूचीत्यादि। पद्मं कमलम्, उत्पलमीषन्नीलम्। एते च सर्वे एवानन्तरोक्ताः पाक्यकषायाः शीतकषाया वा दोषादिबलं दृष्ट्वा वैद्येन योज्याः ॥ १७८ ॥

द्राक्षारग्वधयोश्चापि काश्मर्यस्याथवा पुनः।
स्वादुतिक्तकषायाणां कषायैः शर्करायुतैः ॥ १७९ ॥
सुशीतैः शमयेत्तृष्णां प्रवृद्धां दाहमेव च।

इदानीं पित्तज्वरे आवस्थिकं क्रममाह—द्राक्षारग्वधयोरित्यादि। द्राक्षारग्वधयोश्चापीत्येको योगः, काश्मर्यस्याथवेति द्वितीयः, स्वादुतिक्तकषायाणामिति तृतीयः। आरग्वधः कृतमालफलं, काश्मर्यं गम्भारीफलम्। स्वादुतिक्तकषायाणामिति स्वादूनि द्राक्षामधुकसारिवादीनि, तिक्तानि दुरालभापर्पटककिराततिक्तकप्रभृतीनि, कषायाणि पद्मोत्पलप्रभृतीनि, तेषां कषायैः। सुशीतैरिति शीतकषायैरेवेति कार्तिककुण्डाचार्यः, जेज्जटाचार्यस्तु पूर्वं क्वथितैः पश्चाच्छीतीकृतैरिति मन्यते ॥ १७९ ॥—

शीतं मधुयुतं तोयमाकण्ठाद्वा पिपासितम् ॥१८०॥
वामयेत्पाययित्वा तु तेन तृष्णा प्रशाम्यति।

पित्तज्वरेऽपरमावस्थिकं कार्यमाह—शीतं मधुयुतमित्यादि। यद्यपि संशमनप्रस्तावे वमनं नोपयुक्तं, तथाऽपि प्रवृद्धायां तृष्णायां वमनस्यापि संशमनकार्यकरत्वादुपदेशः ॥ १८० ॥—

क्षीरैः क्षीरिकषायैश्च सुशीतैश्चन्दनायुतैः ॥ १८१ ॥
अन्तर्दाहे विधातव्यमेभिश्चान्यैश्च शीतलैः।

क्षीरैरित्यादि। क्षीरिकषायैर्वटादिक्वाथैः, विधातव्यं पानलेपनपरिषेकावगाहादिकम्। कार्तिककुण्डस्तु बहिःपरिमार्जनमेवेच्छति। अन्यैश्च शीतलैः काकोल्यादिभिः शीतवीर्यैः, तथा शीतस्पर्शैरपीत्यर्थः ॥ १८१ ॥—

पद्मकं मधुकं द्राक्षां पुण्डरीकमथोत्पलम् ॥ १८२ ॥
यवान् भृष्टानुशीराणि समङ्गां काश्मरीफलम्।
निदध्यादप्सु चालोड्य निशापर्युषितं ततः ॥१८३॥
क्षौद्रेण युक्तं पिबतो ज्वरदाहौ प्रशाम्यतः।

पित्तज्वरावस्थायां शीतकषायमाह—पद्मकं मधुकमित्यादि। समङ्गा अञ्जलिकारिका, वराहक्रान्तामपरे। यद्यपि काश्मरीफलमित्युक्तं तथाऽपि काश्मरीफलमज्जा गृह्यते, अत्यन्तपित्तहरत्वात्। निदध्यात् धारयेत्। अप्सु चालोड्येति अर्धक्वथिताम्बुनि प्रतप्ते आलोड्येत्यर्थः; अथवा अनुष्णमपि वार्यौषधान्वितं पर्युषितं शीतकषायम्, अविशेषात्। ज्वरदाहौ प्रशाम्यत इति ज्वरश्च दाहश्च, तौ प्रशाम्यतः; एतेन ज्वरसंयुक्तो दाहः शाम्यति, तथा ज्वरं विनाऽपि यो दाहः सोऽपि शाम्यतीत्यर्थः। अन्ये तु 'ज्वरो दाहश्च शाम्यति' इति पठन्ति। तत्र पाठे ज्वरोऽपि शाम्यतीति लभ्यते। अनेन शीतकषायविधानेनान्यान्यपि शीतकषायाणि कार्याणि। केचित् 'पद्मकं मधुकं द्राक्षां पुण्डरीकमथोत्पलम्' इति पाठं न पठन्ति ॥ १८२ ॥ १८३ ॥—

जिह्वातालुगलक्लोमशोषे मूर्ध्नि च दापयेत् ॥ १८४ ॥

पित्तज्वरावस्थायां मूर्धप्रलेपमाह—जिह्वातालुगलक्लोमेत्यादि। क्लोम तिलकम्। मूर्ध्नि मस्तके। दापयेत् पद्मकादिशीतकषायस्य जिह्वादिशोषे मस्तकरुजासु चाभ्यन्तरमुपयोगः स्पर्शे चेति व्याख्यानयन्ति। ननु, कषायाधिकारे कथं मूर्ध्नि लेपो गण्डूषश्च निर्दिश्यते? उच्यते—कषायाणीति बाहुल्येन निर्देशात्; यथा छत्रिणः, तेनादोष इति ॥ १८४ ॥

केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्।
शर्करादाडिमाभ्यां वा द्राक्षाखर्जूरयोस्तथा ॥१८५॥
वैरस्ये धारयेत्कल्कं गण्डूषं च तथा हितम् ॥

पित्तज्वरे आवस्थिकं क्रममाह—केशरमित्यादि। केशरादिर्मधुसैन्धवसंयुतमित्यन्त एको योगः, शर्करादिः खर्जूरयोस्तथेत्यन्तो द्वितीयः। वैरस्ये मुखवैरस्ये। धारयेत् 'मुखे' इति शेषः। कल्को दृषदि पेषितः सद्रवः। तथा हितमिति विशिष्टदोषारब्धज्वरप्रत्यनीकमित्यर्थः। केचिज्जिह्वाताल्वादिशोषे मातुलुङ्गकेशरस्यैव केवलं मधुसैन्धवयुक्तस्य मूर्ध्नि धारणमिच्छन्ति, तथा द्राक्षाखर्जूरकल्कस्य शर्करादाडिमयुतस्य वैरस्ये आस्ये धारणमिच्छन्ति। यद्यपि मुखवैरस्यं वातलिङ्गं, तथाऽपि पित्तादपि वैरस्यं ज्ञेयं, तन्त्रान्तरोक्तत्वात्। केचित् 'पद्मकं मधुकं द्राक्षां' इत्यादिकं 'गण्डूषं च तथा हितं' इति पर्यन्तं न पठन्ति; स च पाठः पठनीयः, सर्वनिबन्धकारैः पठितत्वात् ॥ १८५ ॥—

सप्तच्छदं गुडूचीं च निम्बं स्फूर्जकमेव च ॥ १८६ ॥
क्वाथयित्वा पिबेत् क्वाथं सक्षौद्रं कफजे ज्वरे।

कफज्वरसंशमनान्याह—सप्तच्छदमित्यादि। सप्तच्छदः सप्तपर्णः, स्फूर्जको वनकुरण्टकाकारः फणिज्जकापरपर्यायः। क्वाथमित्यत्र कल्कमित्यन्ये। पिबेत् परं शीतीकृतं, मधुन उष्णेन सह निषिद्धत्वात्; मधु चात्र क्वाथ्यद्रव्यचतुर्थांशम् ॥१८६॥—

कटुत्रिकं नागपुष्पं हरिद्रा कटुरोहिणी ॥ १८७ ॥
कौटजं च फलं हन्यात् सेव्यमानं कफज्वरम्।

कटुत्रिकमित्यादि। नागपुष्पं नागकेशरम्। सेव्यमानमसकृदुपयोगात् ॥ १८७ ॥—

हरिद्रां चित्रकं निम्बमुशीरातिविषे वचाम् ॥१८८॥
कुष्ठमिन्द्रयवान् मूर्वां पटोलं चापि साधितम्।
पिबेन्मरिचसंयुक्तं सक्षौद्रं कफजे ज्वरे ॥ १८९ ॥

हरिद्रामित्यादि। मूर्वा चोरस्नायुः, 'सक्षौद्रं' इत्यत्र 'सगुडं' इत्यन्ये पठन्ति ॥ १८८ ॥ १८९ ॥

सारिवातिविषाकुष्ठपुराख्यैः सदुरालभैः।
मुस्तेन च कृतः क्वाथः पीतो हन्यात् कफज्वरम् १९०

सारिवातिविषाकुष्ठेत्यादि। पुरो गुग्गुलुः ॥ १९० ॥

मुस्तं वृक्षकबीजानि त्रिफला कटुरोहिणी ।
परूषकाणि च क्काथः कफज्वरविनाशनः ॥ १९१ ॥

मुस्तमित्यादि । वृक्षकबीजानि इन्द्रयवाः ॥ १९१ ॥

राजवृक्षादिवर्गस्य कषायो मधुसंयुतः ।
कफवातज्वरं हन्याच्छीघ्रं कालेऽवचारितः ॥१९२॥

इदानीं यद्यप्युद्देशशास्त्रसामर्थ्यात् कफज्वरचिकित्सानन्तरं सन्निपातज्वरचिकित्सितं पठितुमुचितं, तथाऽपि सन्निपाते द्वन्द्वजचिकित्सा कर्तव्येति दर्शनार्थं पूर्वं द्वन्द्वजचिकित्सामाह —राजवृक्षादिवर्गस्येत्यादि । राजवृक्षादिरारग्वधादिः, कालेऽवचारित औषधकाले दत्तः । पूर्वोक्तं वातपित्तद्वन्द्वजक्रमं विहाय वातश्लेष्मद्वन्द्वजचिकित्सितं प्रथमं यदत्र कृतं तत् केवलकफज्वरेऽपि वातश्लेष्मद्वन्द्वजचिकित्सितं विधेयमिति दर्शनार्थम् ॥ १९२ ॥

नागरं धान्यकं भार्गीमभयां सुरदारु च ।
वचां पर्पटकं मुस्तं भूतीकमथ कट्फलम् ॥ १९३ ॥
निःक्काथ्य कफवातोत्थे क्षौद्रहिङ्गुसमन्वितम् ।
दा(पा)तव्यं श्वासकासघ्नं श्लेष्मोत्सेके गलग्रहे १९४
हिक्कासु कण्ठश्वयथौ शूले हृदयपार्श्वजे ।

नागरमित्यादि । भूतीकं सुगन्धितृणं 'रोहिषं' इति प्रसिद्धम् । निःक्काथ्य पूर्वोक्तया कषायकल्पनया । मधु कर्षप्रमाणम् । हिङ्गु माषकप्रमाणं, "माषिके हिङ्गुसिन्धूत्थे" इति वचनात् । श्लेष्मोत्सेके श्लेष्मवृद्धौ । हृदयपार्श्वजे इत्यत्रापि 'शूले' इति संबध्यते । एष योगः शृङ्गीसहितः कट्फलादिः । केचिदमुं पाठं देवदार्वभयेत्यादिना पठन्ति ॥१९३॥१९४॥—

बलापटोलत्रिफलायष्ट्याह्वानां वृषस्य च ॥ १९५ ॥
क्काथो मधुयुतः पीतो हन्ति पित्तकफज्वरम् ।
कटुकाविजयाद्राक्षामुस्तपर्पटकैः कृतः ॥ १९६ ॥
कषायो नाशयेत् पीतः श्लेष्मपित्तभवं ज्वरम् ।
भार्गीवचापर्पटकधान्यहिङ्ग्वभयाघनैः ॥ १९७ ॥
काश्मर्यनागरैः क्काथः सक्षौद्रः श्लेष्मपित्तजे ।
सशर्करामक्षमात्रां कटुकामुष्णवारिणा ॥ १९८ ॥
पीत्वा ज्वरं जयेज्जन्तुः कफपित्तसमुद्भवम् ।

बलापटोलत्रिफलेत्यादि । विजया हरीतकी । भार्गीवचेत्यादि । अक्षमात्रां कर्षप्रमाणाम् ॥ १९५–१९८ ॥—

किराततिक्तममृतां द्राक्षामामलकं शटीम् ॥ १९९ ॥
निष्काथ्य वातपित्तोत्थे तं क्काथं सगुडं पिबेत् ।
रास्ना वृषोऽथ त्रिफला राजवृक्षफलैः सह ॥२००॥
कषायः साधितः पीतो वातपित्तज्वरं जयेत् ।

किराततिक्तमित्यादि । जेज्जटाचार्यस्तु सन्निपातज्वरचिकित्सां पठित्वा द्वन्द्वजचिकित्सां पठति, दोषैः पृथक् समस्तैश्च द्वन्द्वैरागन्तुभिस्तथेत्युक्तत्वात् ॥ १९९ ॥ २०० ॥—

१ 'द्वन्द्वेन' इति पा० ।

सर्वदोषसमुत्थे तु संसृष्टानवचारयेत् ॥ २०१ ॥

इदानीं समसन्निपातज्वरचिकित्सामाह—सर्वदोषेत्यादि । सर्वदोषसमुत्थे समसन्निपाते । संसृष्टानवचारयेदिति वातादिविहितान् कषायानेकीकृत्य प्रयुञ्जीतेत्यर्थः । अस्याग्रे केचित् 'वर्धनैः क्षपणैर्वापि' इत्यादिकं पाठं पठन्ति, स च वर्तमानेषु पुस्तकेषु न दृश्यते, अतो न लिखितः ॥ २०१ ॥

यथादोषोच्छ्रयं चापि ज्वरान् सर्वानुपाचरेत् ।

विषमसन्निपातचिकित्सामाह—यथादोषोच्छ्रयमित्यादि । यथादोषोच्छ्रयमिति यस्य दोषस्य उच्छ्रयो भवति तद्दोषप्रतीकारेणेत्यर्थः । सर्वान् विषमसन्निपातज्वरान् । एतत् सामान्यं सर्वेषामेव ज्वराणां चिकित्सितेषु आगन्तूनामपि चिकित्सिते च ॥—

वृश्चीवबिल्ववर्षाभ्वः पयश्चोदकमेव च ॥ २०२ ॥
पचेत् क्षीरावशिष्टं तु तद्धि सर्वज्वरापहम् ।

सामान्यसन्निपातचिकित्सां निर्दिदिक्षुरादौ क्षीरस्य जीवनतया क्षीरप्रयोगमाह—वृश्चीवेत्यादि । वृश्चीवः श्वेतपुनर्नवा, वर्षाभूः रक्तपुनर्नवा । पचेदिति "द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम् । क्षीरावशेषं कर्तव्यं क्षीरपाके त्वयं विधिः"—इति परिभाषया । केचिदग्रिमश्लोकोक्तमेवोदकप्रमाणमिच्छन्ति । अन्ये एनं योगद्वयं मन्यन्ते, तन्त्रान्तरोक्तत्वात्; वृश्चीवबिल्वमित्येको योगः, वर्षाभ्वादिर्द्वितीयः ॥ २०२ ॥—

उदकांशास्त्रयः क्षीरं शिंशिपासारसंयुतम् ॥ २०३ ॥
तत् क्षीरशेषं क्कथितं पेयं सर्वज्वरापहम् ।

सन्निपातेऽपरमपि क्षीरयोगमाह—उदकांशास्त्रय इत्यादि । उदकांशास्त्रयः क्षीरांशापेक्षया, क्षीरस्याष्टौ पलानि, शिंशपासारः पलप्रमितः ॥ २०३ ॥—

नलवेतसयोर्मूले मूर्वायां देवदारुणि ॥ २०४ ॥
कषायं विधिवत् कृत्वा पेयमेतज्ज्वरापहम् ।
हरिद्रा भद्रमुस्तं च त्रिफला कटुरोहिणी ॥ २०५ ॥
पिचुमन्दः पटोली च देवदारु निदिग्धिका ॥
एषां कषायः पीतस्तु सन्निपातज्वरं जयेत् ॥२०६॥
अविपक्तिं प्रसेकं च शोफं कासमरोचकम् ॥
त्रैफलो वा ससर्पिष्कः क्काथः पेयस्त्रिदोषजे ॥२०७॥

नलवेतसयोरित्यादि । कषायं विधिवत् कृत्वेति पूर्वोक्तकषायकल्पनया । क्षीरसाध्यायामवस्थायामयमपि योगो देयः । केचिन्नलवेतसादियोगं न पठन्ति; स च पठनीयः, सर्वनिबन्धकारैः पठितत्वात् ॥ २०४–२०७ ॥

अनन्तां बालकं मुस्तां नागरं कटुरोहिणीम् ।
सुखाम्बुना प्रागुदयात्पाययेताक्षसंमितम् ॥ २०८ ॥

१ "वर्धनेनैकदोषस्य क्षपणेनेतरस्य वा । कफस्थानानुपूर्व्या वा संनिपातज्वरं जयेत्" इति चरकः । २ 'शिंशपासारमेव च' इति पा० ।

एष सर्वज्वरान् हन्ति दीपयत्याशु चानलम् ।

अनन्तामित्यादि । अनन्ता दुरालभा । सुखाम्बुना अत्रोष्णोदकेन पलप्रमितेन । प्रागुदयादिति अत्रोदयः सूर्यस्य बोद्धव्यः, न तु ज्वरस्य; तेन सूर्योदयात् पूर्वं देयं, एतेन प्रातरेव । अक्षसंमितं कर्षसमम् । 'सुखाम्बुना प्रागुदयात्' इत्यत्र 'पिष्ट्वा सुखाम्बुना कल्कं' इति केचित् पठन्ति ॥ २०८ ॥—

द्रव्याणि दीपनीयानि तथा वैरेचनानि च ॥ २०९ ॥
एकशो वा द्विशो वाऽपि ज्वरघ्नानि प्रयोजयेत् ।

इदानीमुक्तानुक्तसंग्रहार्थमाह—द्रव्याणि दीपनीयानीत्यादि । दीपनीयानि पिप्पल्यादीनि, वैरेचनानि त्रिवृदभयादीनि, ज्वरघ्नानि दीर्घज्वरघ्नानि । प्रयोजयेत् दोषबलमपेक्ष्य सन्निपातजीर्णज्वरावस्थायामेकशो द्विशो वा दापयेत् । ये त्वेवं वदन्ति–पिप्पल्यादीनि प्रायशः कटुकानि, तानि च ज्वरे न प्रायोगिकान्युष्णवीर्यत्वात्; विरेचनान्यपि गुरुत्वादयौगिकानि; तेषां सम्यक् शास्त्रावबोधो नास्ति, पिप्पल्यादीनां ज्वरे पठितत्वात् ॥ २०९ ॥—

सर्पिर्मध्वभयातैललेहोऽयं सर्वजं ज्वरम् ॥ २१० ॥
शान्तिं नयेत्त्रिवृच्चापि सक्षौद्रा प्रबलं ज्वरम् ।

सर्पिरित्यादि । प्रबलं दाहादिसमन्वितम् । लेहावस्था च तन्त्रान्तराज्ज्ञेया । तथाच तन्त्रान्तरं—"पथ्यातैलघृतक्षौद्रैर्लेहो दाहश्रमज्वरान् । कासासृक्पित्तवीसर्पश्वासान् हन्ति वमीरपि"–इति । 'सक्षौद्रा विषमज्वरे' इति केचित् पठन्ति; तन्न, विषमज्वरस्य परतोऽभिधास्यमानत्वात् ॥ २१० ॥—

ज्वरे तु विषमे कार्यमूर्ध्वं चाधश्च शोधनम् ॥२११॥

इदानीं विषमज्वरचिकित्सामाह—ज्वरे त्वित्यादि । ऊर्ध्वशोधनं वमनं, तच्च कफाधिके विषमज्वरे । अधःशोधनं विरेचनं, तच्च पित्ताधिके । एतेन सर्वेष्वेव विषमज्वरेषु कफपित्ताधिकतया वमनविरेचने प्रयोक्तव्ये इत्युक्तम् । अन्ये तु विषमज्वरे इत्यत्र यद्यपि विषमज्वरशब्देन संततं विहायान्ये विषमज्वराः प्रोक्ताः, तथाऽप्यत्र तृतीयचतुर्थकौ ग्राह्यौ, यतस्तयोरेव साधारणं वातादिहरमास्थापनविरेचनवमनादिकं युक्तमिति व्याचक्षते ॥ २११ ॥

घृतं प्लीहोदरोक्तं वा निहन्याद्विषमज्वरम् ॥

घृतमित्यादि । प्लीहोदरोक्तं घृतं षट्पलं, तच्च कफोत्तरे विषमज्वरे देयं, तीक्ष्णत्वात् ॥—

गुडप्रगाढां त्रिफलां पिबेद्वा विषमार्दितः ॥ २१२ ॥

गुडप्रगाढामित्यादि । गुडप्रगाढां किंचिदधिककर्षगुडप्रतिवापयुतां त्रिफलां पिबेत्, 'क्वथितां' इति शेषः । विषमार्दितो विषमज्वरपीडितः ॥ २१२ ॥

गुडूचीनिम्बधात्रीणां कषायं वा समाक्षिकम् ।

गुडूचीनिम्बधात्रीणामित्यादि । धात्री आमलकी । एष योगश्चातुर्थकज्वरघ्नः, समानतन्त्रोक्तत्वात् ॥—

प्रातः प्रातः ससर्पिष्कं रसोनमुपयोजयेत् ॥ २१३ ॥

प्रातः प्रातः ससर्पिष्कमित्यादि ॥ २१३ ॥

त्रिचतुर्भिः पिबेत् क्वाथं पञ्चभिर्वा समन्वितैः[१] ।
मधुकस्य पटोलस्य रोहिण्या मुस्तकस्य च ॥२१४॥
हरीतक्याश्च सर्वोऽयं त्रिविधो योग इष्यते[२] ।

मधुकादीनां हरीतक्यन्तानां द्रव्याणां त्रिभिः, चतुर्भिः, पञ्चभिर्वा द्रव्यैः समन्वितैः कृतं क्वाथं पिबेदिति संबन्धः । मधुकं यष्टीमधु, रोहिणी कटुका, मुस्तं प्रसिद्धम् । सर्वोऽयं त्रिविधो योग इष्यते अयं मधुकादियोगस्त्रिप्रकारो वक्ष्यते । कथं? मधुकपटोलरोहिणीभिस्त्रिरेको योगः मधुकपटोलरोहिणीमुस्तकैश्चतुर्भिर्द्वितीयः, मधुकपटोलरोहिणीमुस्तकहरीतकीभिः पञ्चभिस्तृतीयः, एवं त्रयो योगाः । केचिन्मुस्तकस्थाने 'वत्सकं' पठित्वाऽन्यथा व्याख्यानयन्ति; तद्यथा—मधुकादिहरीतकीपर्यन्तानां द्रव्याणां रसभेदवत् त्रियोगचतुष्कसंयोगपञ्चसंयोगसंस्कृतं क्वाथं पिबेत्; तद्यथा,—मधुकपटोलरोहिणीभिः, मधुकपटोलवत्सकैः, मधुकपटोलहरीतकीभिः, मधुकरोहिणीवत्सकैः, मधुकरोहिणीहरीतकीभिः, मधुकवत्सकहरीतकीभिः, पटोलरोहिणीवत्सकैः, पटोलवत्सकहरीतकीभिः, पटोलरोहिणीहरीतकीभिः, रोहिणीवत्सकहरीतकीभिः, एवं त्रिभिर्द्रव्यैर्दश विकल्पा भवन्ति; मधुकपटोलरोहिणीवत्सकैः, मधुकपटोलरोहिणीहरीतकीभिः, मधुकरोहिणीवत्सकहरीतकीभिः, मधुकपटोलवत्सकहरीतकीभिः, पटोलरोहिणीवत्सकहरीतकीभिः, एवं चतुर्भिः पञ्च विकल्पाः; मधुकरोहिणीवत्सकपटोलकहरीतकीभिः पञ्चभिरेकः; इत्थं त्रिप्रकारस्यापि योगस्य षोडश विकल्पा भवन्ति, ते च सूक्ष्ममतिना वैद्येन दोषापेक्षया प्रयोक्तव्याः ॥ २१४ ॥—

सर्पिःक्षीरसिताक्षौद्रमागधीर्वा यथाबलम् ॥ २१५ ॥
दशमूलीकषायेण मागधीर्वा प्रयोजयेत् ।

सर्पिःक्षीरसिताक्षौद्रेत्यादि । सर्पिःप्रभृतीनां समुदितानामयं प्रयोगो विषमज्वरे ज्ञेयः । दशमूलीकषायेण पातव्यकषायकल्पनया क्वथितेन, कर्षप्रमाणां पिप्पलीं पिबेत्, यस्मादयं पिप्पलीवर्धमानो न भवति ॥ २१५ ॥—

पिप्पलीवर्धमानं वा पिबेत् क्षीररसाशनः ॥ २१६ ॥

वर्धमानपिप्पलीप्रयोगमाह—पिप्पलीवर्धमानमित्यादि । वर्धमानपिप्पलीप्रयोगो वातव्याधिचिकित्सितमवलोक्य कर्तव्यः ॥ २१६ ॥

ताम्रचूडस्य मांसेन पिबेद्वा मद्यमुत्तमम् ।

ताम्रचूडस्येत्यादि । ताम्रचूडः कुक्कुटः । मद्यमुत्तमं मार्द्वीकं सस्यकं च । जेजटाचार्यस्तु मार्द्वीकस्थाने माध्वीकमाह । कुक्कुटमांसेन सहोत्तममद्यपानं वातप्रधानस्य मन्दाग्नेश्च । एतानि

१ 'प्रागुक्तोष्णोदकेन' इति पा० ।

१ 'समन्वितम्' इति पा० । २ 'उच्यते' इति पा० ।

वक्ष्यमाणानि पूर्वोक्तानि च यद्यपि विषमज्वरे पठितानि, तथाऽपि जीर्णज्वरेऽपि देयानि ॥—

कोलाग्निमन्थत्रिफलाक्काथे दध्ना घृतं पचेत् ॥२१७॥
तिल्वकावापमेतद्धि विषमज्वरनाशनम् ।

कोलाग्निमन्थत्रिफलेत्यादि । कोलं पञ्चकोलं, तिल्वकः पट्टिकारोध्रः । कल्पनामाह—पञ्चकोलादिद्रव्याणां पलशतं, पानीयपलानि द्वादशाधिकानि पञ्चशतानि, एकीकृत्य विपचेत्, यावच्चतुर्थांशमष्टाविंशत्यधिकशतं निष्पद्यते; तेन क्वाथेन चतुर्गुणेन तथा चतुर्गुणेन च दध्ना द्वात्रिंशत्पलप्रमितं घृतम्, अष्टपलप्रमाणं तिल्वकावापं दत्त्वा पचेत् । अनेन विधिनाऽनुक्तप्रमाणानि तैलघृतानि पाचनीयानि । ब्रह्मदेवाचार्यस्तु पञ्चकोलादीनां कषायत्रयेण पृथक् स्नेहचतुर्गुणेन तथा चतुर्थेन दध्ना स्नेहचतुर्गुणेन च घृतं तिल्वकावापं साधयति; तच्च प्रमादव्याख्यानं; पञ्चकोलादिकषायत्रयस्य जेजटादिष्वनुक्तेः ॥२१७॥—

पिप्पल्यतिविषाद्राक्षासारिवाबिल्वचन्दनैः ॥२१८॥
कटुकेन्द्रयवोशीरसिंहीतामलकीघनैः ।
त्रायमाणास्थिराधात्रीविश्वभेषजचित्रकैः ॥ २१९ ॥
पक्कसैतैर्घृतं पीतं विजित्य विषमाग्निताम् ।
जीर्णज्वरशिरःशूलगुल्मोदरहलीमकान् ॥ २२० ॥
क्षयकासं ससंतापं पार्श्वशूलानपास्यति ।

पिप्पल्यतिविषेत्यादि । सारिवा उत्पलसारिवा सुगन्धमूला, सिंही बृहत्कण्टकारिका, तामलकी दरफलिका भूम्यामलकीति लोके, स्थिरा शालपर्णी, तेषां कल्ककषायाभ्यां घृतं साधयेत् ॥ २१८–२२० ॥—

गुडूचीत्रिफलावासात्रायमाणायवासकैः ॥ २२१ ॥
क्वथितैर्विधिवत्पक्कमेतैः कल्कीकृतैः समैः ।
द्राक्षामागधिकाम्भोदनागरोत्पलचन्दनैः ॥ २२२ ॥
पीतं सर्पिः क्षयश्वासकासजीर्णज्वरान् जयेत् ।

गुडूचीत्रिफलेत्यादि । एभिः द्राक्षादिभिः ॥२२१॥२२२॥—

कलशीबृहतीद्राक्षात्रायन्तीनिम्बगोक्षुरैः ॥ २२३ ॥
बलापर्पटकाम्भोदशालपर्णीयवासकैः ।
पक्कमुत्क्वथितैः सर्पिः कल्कैरेभिः समन्वितम् २२४
शटीतामलकीभार्गीमेदामलकपौष्करैः ।
क्षीरद्विगुणसंयुक्तं जीर्णज्वरमपोहति ॥ २२५ ॥
शिरःपार्श्वरुजाकासक्षयप्रशमनं परम् ।

कलशीत्यादि । कलशी पृश्निपर्णी, त्रायन्ती त्रायमाणा, अम्भोदो मुस्ता । एभिः शट्यादिभिः । अनुक्तमपि चतुर्गुणं जलं देयं, तद्विना पाको न स्यादिति वृद्धभिषजः ॥ २२३–२२५ ॥—

पटोलीपर्पटारिष्टगुडूचीत्रिफलावृषैः ॥ २२६ ॥
कटुकाम्बुदभूनिम्बयासयष्ट्याह्वचन्दनैः ।
दार्वीशक्रयवोशीरत्रायमाणाकणोत्पलैः ॥ २२७ ॥
धात्रीभृङ्गरजोभीरुकाकमाचीरसैर्घृतम् ।
सिद्धमाश्वपचीकुष्ठज्वरशुक्रार्जुनव्रणान् ॥ २२८ ॥
हन्यान्नयनवदनश्रवणघ्राणजान् गदान् ।

पटोलीपर्पटारिष्टेत्यादि । पटोल्यादीनां कुष्ठान्तानां कल्कैः, धात्र्यादीनां स्वरसैश्च घृतं पाचनीयम् । अरिष्टो निम्बः, वृषो वासकः, अम्बुदो मुस्तं, भूनिम्बः किराततिक्तकः, यासो दुरालभा, शक्रयवः इन्द्रयवः, उत्पलं कुष्ठम् ॥ २२६–२२८ ॥—

विडङ्गत्रिफलामुस्तमञ्जिष्ठादाडिमोत्पलैः ॥ २२९ ॥
प्रियङ्ग्वेलैलवालूकचन्दनामरदारुभिः ।
बर्हिष्ठकुष्ठरजनीपर्णिनीसारिवाद्वयैः ॥ २३० ॥
हरेणुकात्रिवृद्दन्तीवचातालीशकेसरैः ।
द्विक्षीरं विपचेत्सर्पिर्मालतीकुसुमैः सह ॥ २३१ ॥
जीर्णज्वरश्वासकासगुल्मोन्मादगरापहम् ।
एतत्कल्याणकं नाम सर्पिर्माङ्गल्यमुत्तमम् ॥ २३२ ॥
अलक्ष्मीग्रहरक्षोग्निमान्द्यापस्मारपापनुत् ।
शस्यते नष्टशुक्राणां वन्ध्यानां गर्भदं परम् ॥ २३३ ॥
मेध्यं चक्षुष्यमायुष्यं रेतोमार्गविशोधनम् ।

विडङ्गत्रिफलामुस्तेत्यादि । उत्पलं नीलोत्पलं[1], एला सूक्ष्मैला, एलवालुकं कुष्ठगन्धिकं, चन्दनं रक्तचन्दनं, अमरदारुः देवदारुः, बर्हिष्ठं वालुकं, रजनीद्वयं पिण्डहरिद्रा दारुहरिद्रा च, पर्णिनीद्वयं शालपर्णी पृश्निपर्णी च, सारिवाद्वयं सारिवा उत्पलसारिवा च । विडङ्गादिद्रव्यकल्कमष्टपलप्रमाणं गव्यघृतप्रस्थं चोदकस्य चतुर्भिः प्रस्थैः साधयेत् । कार्तिककुण्डस्तु इदं घृतमन्यथा पठति, स चादर्शनान्न लिखितः ॥ २२९–२३३ ॥—

एतैरेव तथा द्रव्यैः सर्वगन्धैश्च साधितम् ॥ २३४ ॥
कपिलाया घृतप्रस्थं सुवर्णमणिसंयुतम् ।
तत्क्षीरेण सहैकध्यं प्रसाध्य कुसुमैरिमैः ॥ २३५ ॥
सुमनश्चम्पकाशोकशिरीषकुसुमैर्वृतम् ।
तथा नलदपद्मानां केशरैर्दाडिमस्य च ॥ २३६ ॥
तिथौ प्रशस्ते नक्षत्रे साधकस्यातुरस्य च ।
कृतं मनुष्यदेवाय ब्राह्मणैरभिमन्त्रितम् ॥ २३७ ॥
दत्तं सर्वज्वरान् हन्ति महाकल्याणकं त्विदम् २३८
दर्शनस्पर्शनाभ्यां च सर्वरोगहरं शिवम् ।
अधृष्यः सर्वभूतानां वलीपलितवर्जितः ॥ २३९ ॥
अस्याभ्यासाद्भवत्येह जीवेद्वर्षशतत्रयम् ।

महाकल्याणकमाह—एतैरेव तथा द्रव्यैरित्यादि । एतैर्द्रव्यैस्तथा सर्वगन्धैश्च कपिलाघृतप्रस्थं सुवर्णादियुक्तं, तत्साधितं सर्पिरेतैः सुमनादिजैः कुसुमैः कपिलाक्षीरेण सहैकध्यं कृतं, पुनः प्रसाध्य ब्राह्मणैरभिमन्त्रितं, वैद्यातुरयोः प्रशस्ततिथ्यादौ मनुष्यदेवाय राज्ञे दत्तमिदं कल्याणकं घृतं सर्वज्वरान् हन्तीति

१ 'नीलोत्पलम्' इति पा० ।

पिण्डार्थः । एतैः कल्याणकोक्तैर्विडङ्गादिभिः, सर्वगन्धैरेलादिपठितैः, मणिभिः स्फटिकादिभिः । तत्क्षीरेण कपिलाक्षीरेण । सुमना जाती, वृतं युक्तं, नलदं मांसी, पद्मं लोहितपद्मम् । साधकस्य वैद्यस्य । मनुष्यदेवाय नृपतये । अधृष्योऽजेयः । एतद्घृतं पाकद्वयसाधितं बोद्धव्यम् ॥ २३४-२३९ ॥—

गव्यं दधि च मूत्रं च क्षीरं सर्पिः शकृद्रसः ॥२४०॥
समभागानि पाच्यानि कल्कांश्चैतान् समावपेत् ।
त्रिफलां चित्रकं मुस्तं हरिद्रातिविषे वचाम् ॥ २४१ ॥
विडङ्गं त्र्यूषणं चव्यं सुरदारु तथैव च ।
पञ्चगव्यमिदं पानाद्विषमज्वरनाशनम् ॥ २४२ ॥

गव्यमित्यादि । शकृद्रसो गोपुरीषोत्थरसः । पाच्यानि पचनीयानि । कल्कप्रमाणमत्र स्नेहचतुर्थांशम् ॥ २४०-२४२ ॥

पञ्चगव्यमृते गर्भात्पाच्यमन्यद्

अगर्भपञ्चगव्यमाह—पञ्चगव्यमृतेगर्भादित्यादि । अन्यत् द्वितीयं पञ्चगव्यम् । ऋते गर्भादिति द्वितीयं पञ्चगव्यं कल्कं विना पचनीयं, एतेनैतदुक्तं भवति—पूर्वं पञ्चगव्यं सकल्कं, एतच्च द्वितीयमकल्कं; फलं च तुल्यम् ॥—

वृषेण च ॥
बलयाऽथ परं पाच्यं गुडूच्या तद्वदेव तु ॥ २४३ ॥
जीर्णज्वरे च शोफे च पाण्डुरोगे च पूजितम् ।

इदानीं पञ्चगव्योक्तत्रिफलादिकल्केन वृषादिपृथक्स्वरसत्रयेण घृतत्रयस्य साधनं निर्दिशन्नाह—वृषेण चेत्यादि । तद्वदिति पूर्वोक्तकल्पनयेत्यर्थः । तद्वच्छब्दो घृतत्रयेऽपि संबध्यते ॥ २४३ ॥—

एतेनैव तु कल्पेन घृतं पञ्चाविकं पचेत् ।
पञ्चाजं पञ्चमहिषं चतुरुष्ट्रमथापि च ॥ २४४ ॥

इदानीं पञ्चगव्योक्तविधिना पञ्चाविकादीनि घृतानि पचनीयानीति दर्शयन्नाह—एतेनैव तु कल्पेनेत्यादि । अनेनैव कल्पेन पूर्वोक्तपञ्चगव्यविधिना । चतुरुष्ट्रं शकृद्रसवर्जनेन ॥ २४४ ॥

त्रिफलोशीरशम्पाककटुकातिविषाघनैः ।
शतावरीसप्तपर्णगुडूचीरजनीद्वयैः ॥ २४५ ॥
चित्रकत्रिवृतामूर्वापटोलारिष्टवालकैः ।
किराततिक्तकवचाविशालापद्मकोत्पलैः ॥ २४६ ॥
सारिवाद्वययष्ट्याह्वचविकारक्तचन्दनैः ।
दुरालभापर्पटकत्रायमाणाटरूपकैः ॥ २४७ ॥
रास्नाकुङ्कुममञ्जिष्ठामागधीनागरैस्तथा ।
धात्रीफलरसैः सम्यग्द्विगुणैः साधितं हविः २४८
परिसर्पज्वरश्वासगुल्मकुष्ठनिवारणम् ।
पाण्डुप्लीहाग्निसादिभ्य एतदेव परं हितम् ॥ २४९ ॥
पटोलकटुकादार्वीनिम्बवासाफलत्रिकम् ।

१ 'पूर्वोक्तकल्कयुक्तमित्यर्थः' इति पा० ।

दुरालभापर्पटकत्रायमाणाः पलोन्मिताः ॥ २५० ॥
प्रस्थमामलकानां च क्वाथयेत्सलिलार्मणे ।
तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ॥ २५१ ॥
कल्कैः कुटजभूनिम्बघनयष्ट्याह्वचन्दनैः ।
सपिप्पलीकैस्तत्सिद्धं चक्षुष्यं शुक्रयोर्हितम् ॥२५२॥
घ्राणकर्णाक्षिवदनवर्त्मरोगव्रणापहम् ।
रक्तपित्तकफस्वेदक्लेदपूयोपशोषणम् ॥ २५३ ॥
कामलाज्वरवीसर्पगण्डमालाहरं परम् ।

त्रिफलेत्यादि । शुक्रयोर्नेत्रगतरोगयोः ॥ २४५-२५३ ॥—

शृतं पयः शर्करा च पिप्पल्यो मधुसर्पिषी ॥ २५४ ॥
पञ्चसारमिदं पेयं मथितं विषमज्वरे ।
क्षतक्षीणे क्षये श्वासे हृद्रोगे चैतदिष्यते ॥ २५५ ॥

पञ्चसारमाह—शृतं पय इत्यादि । शृतं पयः क्वथितं दुग्धं, मथितं 'हस्तेन' इति शेषः ॥ २५४ ॥ २५५ ॥

लाक्षाविश्वनिशामूर्वामञ्जिष्ठास्वर्जिकामयैः ।
षड्गुणेन च तक्रेण सिद्धं तैलं ज्वरान्तकृत् ॥२५६॥

इदानीमन्तःपरिमार्जनमभिधाय बहिःपरिमार्जनार्थं तैलमाह—लाक्षेत्यादि । विश्वं शुण्ठी, निशा हरिद्रा, मूर्वा चोरस्नायुः, आमयं कुष्ठम् । लाक्षादिकल्कस्याष्टौ पलानि, तैलस्य द्वात्रिंशत्पलानि, तैलात् षड्गुणेन तक्रेण तैलं साधनीयम् । ज्वरान्तकृत् शीतपूर्वदाहपूर्वयोर्विनाशकारीत्यर्थः ॥ २५६ ॥

क्षीरिवृक्षासनारिष्टजम्बूसप्तच्छदार्जुनैः ।
शिरीषखदिरास्फोटामृतवल्ह्यटरूषकैः ॥ २५७ ॥
कटुकापर्पटोशीरवचातेजोवतीघनैः ।
साधितं तैलमभ्यङ्गादाशु जीर्णज्वरापहम् ॥ २५८ ॥

क्षीरिवृक्षेत्यादि । क्षीरिवृक्षा न्यग्रोधादयः, असनो बीजकः, अरिष्टो निम्बः, सप्तच्छदः सप्तपर्णः, अर्जुनः ककुभः, आस्फोटा सारिवा अर्को वा, तेजोवती काकमर्दनिका । क्षीरिवृक्षादिकल्केनाष्टपलमितेन तैलप्रस्थं चतुर्गुणजलेन साधयेत् ॥ २५७ ॥ २५८ ॥

निर्विषैर्भुजगैर्नागैर्विनीतैः कृततस्करैः ।
त्रासयेदागमे चैनं तदहर्भोजयेन्न च ॥ २५९ ॥
अत्यभिष्यन्दिगुरुभिर्वामयेद्वा पुनः पुनः ।
मद्यं तीक्ष्णं पाययेत घृतं वा ज्वरनाशनम् ॥ २६० ॥
पुराणं वा घृतं काममुदारं वा विरेचनम् ।
निरूहयेद्वा मतिमान् सुस्विन्नं तदहर्नरम् ॥ २६१ ॥

इदानीं विषमज्वराणां विशिष्टावस्थायां भूताभिषङ्गजादीनां वा विषमज्वराणां चिकित्सामाह—निर्विषैरित्यादि । निर्विषैर्भुजगैः डुण्डुभाहिपताकाप्रभृतिभिः, नागैर्हस्तिभिः, विनीतैः हस्तिशिक्षाविद्भिर्विनम्रीकृतैः, कृततस्करैः मिथ्याध्यारोपित-

१ 'विनीतफलैः' इति पा० ।

चौरैः । आगमे ज्वरागमकाले, यस्माज्वरारम्भोन्मुखस्य दोषस्य निर्विषभुजगादिभयात् क्षुभितेन वायुना विक्षेपणं क्रियते तस्माज्वरानुत्पादो ज्वरकालविस्मारकत्वाद्वा । तदहरिति ज्वरागमनदिने, न भोजयेन्न चाश्नीयात्; शेषदोषक्षपणार्थम् । अल्पभिष्यन्दिगुरुभिरित्यादि । अल्पभिष्यन्दिगुरुभिः क्षीरदधियवागूभिः मदनफलसंस्कृताभिर्वामयेत्, तदहरिति शेषः । अल्पभिष्यन्यादिभिर्यद्वमनं तद्बलरक्षणार्थम् । मद्यं तीक्ष्णमित्यादि । घृतं वा ज्वरनाशनं षट्पलं; यद्येवं 'घृतं प्लीहोदरोक्तं यत्' इत्यनेन तस्योक्तिः कुतः पुनरभिधानम्? उच्यते, कामं तत्पानस्य तदहः प्रतिपादनार्थम् । पुराणं घृतमौषधार्थे संस्कृतं पाययेत् । कामं स्वेच्छया, उदारं विरेचनमपीडाकरं, नत्वप्रशिथिलाशयस्य विरेचनानर्हस्य विधेयम् । तं विरेचनार्थं पुनर्निरूहयेत् । तदहरिति सर्वत्र संबन्धनीयम् ॥ २५९-२६१ ॥

अजाव्योश्चर्मरोमाणि वचा कुष्ठं पलङ्कषा ।
निम्बपत्रं मधुयुतं धूपनं तस्य दापयेत् ॥ २६२ ॥

विषमज्वरे धूपनमाह—अजेत्यादि । अजा छागी, अविर्मेषी, पलङ्कषा गुग्गुलुः । विषमज्वरोक्तोऽप्यसौ योगो जीर्णज्वरे भूतविषमज्वरे च प्रयोक्तव्यः, समानतन्त्रोक्तत्वात् ॥ २६२ ॥

बैडालं वा शकृद्योज्यं वेपमानस्य धूपनम् ।

अवस्थाविशेषेण धूपनमाह—बैडालमित्यादि । बैडालं शकृत् बिडालविष्ठा ॥—

पिप्पली सैन्धवं तैलं नेपाली चेक्षणाञ्जनम् ॥२६३॥

विषमज्वरेऽञ्जनमाह—पिप्पलीत्यादि । यद्यपि अञ्जनमित्युक्तेऽपि नेत्राञ्जनं प्राप्तं, तथाऽप्यत्रेक्षणाञ्जनमिति यदुक्तं तदभ्यङ्गवाचिनोऽञ्जनशब्दस्य निषेधार्थम् ॥ २६३ ॥

उदरोक्तानि सर्पींषि यान्युक्तानि पुरा मया ।
कल्पोक्तं चाजितं सर्पिः सेव्यमानं ज्वरं जयेत् २६४

इदानीं विषमज्वरेऽतिदेशेन चिकित्सितमाह—उदरोक्तानि सर्पींषीत्यादि । कल्पोक्तं कल्पस्थानोक्तम् । अजितमजेयाख्यम् । केचित् 'यान्युक्तानि पुरा मया' इत्यत्र 'कुर्यात् सर्वगणेषु च' इति पठन्ति, सर्वज्वरसमूहेष्विति च व्याख्यानयन्ति । अपरे तु 'सर्वज्वरेषु च' इति पठन्ति ॥ २६४ ॥

भूतविद्यासमुद्दिष्टैर्बन्धावेशनपूजनैः ।
जयेद्भूताभिषङ्गोत्थं

भूतज्वरे चिकित्सितमतिदेशेनाह—भूतविद्यासमुद्दिष्टैरित्यादि । बन्धः समन्त्रै रज्वादिभिः, आवेशनं समन्त्रसर्षपादिताडनं, पूजनं बल्युपहारस्तुत्यादिभिः । यद्यपि निदानप्रस्तावे पूर्वं विषादिज्वरस्योपदेशः पश्चाद्भूताभिषङ्गजस्य, तथाऽप्यत्र पूर्वं यद्भूताभिषङ्गज्वरचिकित्सितमुक्तं तद्भूतविद्यासमुद्दिष्टस्य विधेर्विषमज्वरेऽपि हितत्वं बोधयति ॥—

विज्ञानाद्यैश्च मानसम् ॥ २६५ ॥

विज्ञानाद्यैरिति मानसं ज्वरं विज्ञानाद्यैर्जयेदिति संबन्धः । आदिशब्दाद्धैर्यस्मृतिज्ञानसमाधयो गृह्यन्ते । मानसं कामशोकक्रोधभयजम् । विज्ञानाद्यैरित्यत्र 'मनःसान्त्वैश्च' इति केचित् पठन्ति, मनःप्रसादनैरिति च व्याख्यानयन्ति ॥ २६५ ॥

श्रमक्षयोत्थे भुञ्जीत घृताभ्यक्तो रसौदनम् ।

श्रमक्षयोत्थे भुञ्जीतेत्यादि । यद्यपि रसौदनभोजनं पूर्वमेवोक्तं, तथाऽपि घृताभ्यङ्गयोगादधिकफलदर्शनार्थमत्रोक्तम् ॥—

अभिशापाभिचारोत्थौ ज्वरौ होमादिना जयेत् २६६

अभिशापाभिचारोत्थावित्यादि । अभिशापः सिद्धादीनामाक्रोशः, अभिचारो यन्त्रमन्त्रादिभिरवपीडनं, आदिशब्दात् शान्तिप्रायश्चित्तमङ्गलजपादयः ॥ २६६ ॥

दानस्वस्त्ययनातिथ्यैरुत्पातग्रहपीडितम् ।

दानस्वस्त्ययनातिथ्यैरित्यादि । स्वस्त्ययनमाशीर्वादः, आतिथ्यमतिथिपूजनम् । उत्पातोऽनिष्टसूचकं निर्घातादि, ग्रहा आदित्यादयः ॥—

अभिघातज्वरे कुर्यात् क्रियामुष्णविवर्जिताम् २६७
कषायमधुरां स्निग्धां यथादोषमथापि वा ।

अभिघातज्वरे कुर्यादित्यादि । यस्माद्वातरक्तबहुलोऽभिघातज्वरस्तस्मादेवंभूतास्तत्र क्रियाः कार्याः ॥ २६७ ॥—

ओषधीगन्धविषजौ विषपित्तप्रसाधनैः ॥ २६८ ॥
जयेत् कषायं च हितं सर्वगन्धकृतं तथा ।
निम्बदारुकषायं वा हितं सौमनसं यथा ॥ २६९ ॥

ओषधीगन्धविषजावित्यादि । विषपित्तप्रसाधनैः विषपित्तचिकित्सितैरित्यर्थः । अन्ये 'विषपीतप्रसाधनैः' इति पठन्ति, व्याख्यानयन्ति च—विषपीतस्य यानि प्रसाधनानि चिकित्सितानि तैरित्यर्थः । ओषधीगन्धविषजज्वरयोरपरमपि योगमाह—जयेदित्यादि । सर्वगन्धकृतमेलादिकृतं, सौमनसं जातीकृतम् । भूताभिषङ्गादिजानां ज्वराणां विषमज्वरमध्ये व्यतिक्रमेण यदुपादानं तद्भूताभिषङ्गादिजा अपि ज्वराः प्रायेण वैषम्येण भवन्तीति बोधयति ॥ २६८ ॥ २६९ ॥

यवान्नविकृतिः सर्पिर्मद्यं च विषमे हितम् ।

यवान्नविकृतिरित्यादि । यवान्नविकृतिर्यवभक्ष्यविकाराः । सर्पिर्मद्ययोर्विषमज्वरेऽत्यन्तहितत्वोपादानार्थं पुनरभिधानम् । अन्ये 'यावान्नविकृतिः' इति पठन्ति; यावान्नो यवौदनः, विकृतिर्यवविकारः; यद्यपि यवविकृतिशब्देनैव यवौदनो लब्धस्तथाऽपि यवौदनस्यात्यन्तहितत्वोपादानार्थं यावान्नग्रहणमिति च व्याख्यानयन्ति ॥—

संपूजयेद्द्विजान् गाश्च देवमीशानमम्बिकाम् ॥२७०॥

विषमज्वरे युक्तिव्यपाश्रयं चिकित्सितमभिधायेदानीं दैवव्यपाश्रयमाह—संपूजयेदित्यादि । ईशानो महेश्वरः, अम्बिका चण्डी, द्विजादिपूजनाद्दुरितोपशान्तिर्धर्मोत्पत्तिश्च ॥ २७० ॥

कफवातोत्थयोश्चापि ज्वरयोः शीतपीडितम् ।
दिह्यादुष्णेन वर्गेण परश्चोष्णो विधिर्हितः ॥ २७१ ॥
सिञ्चेत् कोष्णैरारनालशुक्तगोमूत्रमस्तुभिः ।
दिह्यात् पलाशैः पिष्टैर्वा सुरसार्जकशिग्रुजैः ॥२७२॥
क्षारतैलेन वाऽभ्यङ्गः सशुक्तेन विधीयते ।
पानमारग्वधादेश्च क्वथितस्य विशेषतः ॥ २७३ ॥
अवगाहः सुखोष्णश्च वातघ्नक्वाथयोजितः ।
जित्वा शीतं क्रमैरेभिः सुखोष्णजलसेचितम् २७४
प्रवेश्यौर्णिककार्पासकौशेयाम्बरसंवृतम् ।
शाययेत् क्षामदेहं च कालागुरुविभूषितम् ॥२७५॥
स्तनाढ्या रूपसंपन्नाः कुशला नवयौवनाः ।
भजेयुः प्रमदा गात्रैः शीतदैन्यापहाः शुभाः ॥२७६॥
शरच्छशाङ्कवदना नीलोत्पलविलोचनाः ।
स्फुरितभ्रूलताभङ्गललाटतटकम्पनाः ॥ २७७ ॥
प्रलम्बबिम्बप्रचलद्बिम्बीफलनिभाधराः[१] ।
कृशोदर्योऽतिविस्तीर्णजघनोद्वहनालसाः ॥ २७८ ॥
कुङ्कुमागुरुदिग्धाङ्ग्यो घनतुङ्गपयोधराः ।
सुगन्धिधूपितश्लक्ष्णस्रस्तांशुकविभूषणाः ॥ २७९ ॥
गाढमालिङ्गयेयुस्तं तरुं वनलता इव ।
प्रह्लादं चास्य विज्ञाय ताः स्त्रीरपनयेत् पुनः ॥२८०॥
तासामङ्गपरिष्वङ्गनिवारितहिमज्वरम् ।
भोजयेद्धितमन्नं च यथा सुखमवाप्नुयात् ॥ २८१ ॥

इदानीं जीर्णज्वराणां द्वन्द्वजानां बहिःपरिमार्जनप्रलेपाभिषेकाभ्यङ्गशयनानुलेपनस्त्रीसंवाहनादिकमाह—कफवातोत्थयोश्चापि ज्वरयोरित्यादि । दिह्यात् लिम्पेत् । उष्णेन वर्गेण भद्रदार्वादिना सुरसादिना एलादिना वा । परश्चोष्णो विधिरिति पर उत्कृष्टः, उष्णो विधिः स्वेदः । आरनालं काञ्जिकं, शुक्तं चुकं तच्च तण्डुलाम्बुसौवीरादिभिः कृतसन्धानं, तथा च तन्त्रान्तरे पठ्यते—"प्रस्थमेकं तु भक्तस्य त्रयं सौवीरकस्य च । अर्धं प्रस्थं तु दध्नश्च भिषगम्लस्य दापयेत् ॥ पलषोडशकं चैव शोधितस्यार्द्रकस्य च । सैन्धवं पिप्पलीं चैव चूर्णीकृत्य विनिक्षिपेत् ॥ स्थापयेत् सुदृढे भाण्डे सर्पिषा परिभाविते । हेमन्ते वासराण्यष्टौ वसन्ते षट् दिनानि च ॥ प्रावृट्काले चतुरहं वर्षास्वपि च वासयेत् । अत ऊर्ध्वं क्षिपेच्चूर्णं चातुर्जातातपलद्वयम्"—इत्यादि । अस्य शुक्तस्य गुणवर्णनं बहुलत्वान्न लिखितम् । पलाशैः पत्रैः । अर्जकः कुठेरकः, अन्ये सितपर्णासमाहुः; शिग्रुः शोभाञ्जनानुकारी विटपः, शोभाञ्जनमपरे । क्षारतैलं क्षारेण सिद्धं तैलं क्षारतैलमाहुः; अपरे तन्त्रान्तरोक्तं 'शुष्कमूलकशुण्ठीनां क्षार' इत्यादिकं क्षारतैलमिच्छन्ति; तन्न, तस्य सशुक्तस्य सशुक्तेनेति विशेषणवैयर्थ्यात् । अवगाहो द्रवपूर्णभाजने निमज्जनं, सुखोष्ण ईषदुष्णः । क्रमैरेभिः उष्णवर्गप्रलेपादिभिः । प्रवेश्य 'निवातागारे' इति शेषः । और्णिका नानाप्रकाराः कम्बलाः, कार्पासाः कार्पासतन्तुरचिताः, कौशेयाः कोशकारक्रिमिलालातन्तुरचिताः 'तसर' इति लोके । ग्लानदेहमित्यादि । एवंभूताः स्त्रियो ग्लानदेहं कृष्णागुरुविभूषितं पुरुषं मृदुमर्दनार्थं गात्रैः कृत्वा भजेयुरिति संबन्धः । कुशलाः कामसूत्रज्ञाः । दैन्यं क्लिष्टचेतनात्वम् । शरच्छशाङ्कवदना इत्यादि । एवंविधाश्च ललनास्तं पुरुषं गाढमालिङ्गयेयुरिति संबन्धः । प्रह्लादमित्यादि । अस्य पुरुषस्य प्रह्लादं हर्षं ज्ञात्वा ताः पूर्वोक्तवनिता अपनयेत्, अन्यथा तत्संसर्गान्महानन्र्थ इति । हितमन्नं वातश्लेष्महरमाहारम् । 'अवगाहः सुखोष्णश्च वातघ्नक्वाथसंयुतः' इत्यत्र 'अवगाहः सुखोष्णश्च वातघ्नः क्वाथभोजने' इति केचित् पठन्ति, व्याख्यानयन्ति च—वातघ्नोऽवगाहः कार्यः, सुखोष्णे च क्वाथभोजने कार्ये । अत्र द्वितीयश्चकारो लुप्तो ज्ञेयः; तेन क्वाथभोजनेअपि वातघ्ने बोद्धव्ये । प्रवेश्यौर्णिकेत्यत्र 'प्रवेण्यौर्णिके' इति केचित् पठन्ति, व्याख्यानयन्ति च—प्रवेणी सूचीवाणाख्यो वस्त्रविशेषः । 'कालागुरुविभूषितं' इत्यत्र 'कृष्णागुरुविभावितं' इति केचित् पठन्ति, कृष्णागुरुलिप्तमिति च व्याख्यानयन्ति ॥ २७१–२८१ ॥

दाहाभिभूते तु विधिं कुर्याद्दाहविनाशनम् ।
मधुफाणितयुक्तेन निम्बपत्राम्भसाऽपि वा ॥ २८२ ॥
दाहज्वरार्तं मतिमान् वामयेत् क्षिप्रमेव च ।
शतधौतघृताभ्यक्तं दिह्याद्वा यवशक्तुभिः ॥ २८३ ॥
कोलामलकसंयुक्तैः शुक्तधान्याम्लसंयुतैः ।
अम्लपिष्टैः सुशीतैश्च फेनिलापल्लवैस्तथा ॥ २८४ ॥
अम्लपिष्टैः सुशीतैर्वा पलाशतरुजैर्दिहेत् ।
बदरीपल्लवोत्थेन फेनेनारिष्टकस्य च ॥ २८५ ॥
लिप्तेऽङ्गे दाहतृण्मूर्च्छाः प्रशाम्यन्ति च सर्वशः ।

दाहाभिभूते इत्यादि । दाहविनाशनविधिर्वक्ष्यमाणः । ननु, यथा शीतप्रतीकारे पूर्वं 'कफवातोत्थयोश्चापि ज्वरयोः शीतपीडितम्' इत्युक्तं तथाऽत्रापि पित्तज्वराभिभूत इति कथं नोक्तं? सत्यं, ज्वररहितदाहे असौ विधिः कार्य इति दर्शनार्थम् । मधुफाणितयुक्तेनेत्यादि । 'मधुफाणितमिश्रेण' इति केचित् पठन्ति । ते च 'अपि वा' इति शब्दं पादपूरणार्थं वर्णयित्वा निम्बपत्राम्भसेत्यस्य विशेषणमाचक्षते । यद्यपि कफे वमनं प्रयुज्यते न पित्ते, तथाऽपि प्रवृद्धं पित्तं किञ्चिद्वमनेनापि निर्ह्रियते । तथाच तन्त्रान्तरं,—"स्वस्थानगतमुत्क्लिष्टमग्निनिर्वापकं भिषक् । पित्तं ज्ञात्वा विरेकेण वमनेनाथवा हरेत्"—इति । अपरे तु 'मधुफाणितमिश्रेण निम्बपत्राम्भसा पिबेत्' इति पठन्ति । शतधौतघृताभ्यक्तमित्यादि । शतवारान् शीतजलेन धौतं फेनिलं घृतं शतधौतघृतम् । दिह्यात् लिम्पेत् । शुक्तं चुकं, धान्याम्लं काञ्जिकं;

१ 'प्रलम्बविलसत्काञ्च्यो बिम्बीफलनिभाधराः' इति पा० ।

१ 'तसरीकृता इत्यर्थः' इति पा० ।

'शुक्तधान्याम्लसंयुतैः' इत्यत्रापरे तु 'धान्याम्लैरपि बुद्धिमान्' इति पठन्ति; तत्र धान्याम्लयुक्तैर्यवशक्तुभिरिति ज्ञेयम् । अम्लपिष्टैरित्यादि । अम्लं काञ्जिकं, फेनिला उपोदिका । तथा-शब्दात् कोलामलकशुक्तसंयुक्तैः फेनिलापल्लवैर्लिम्पेदिति ज्ञेयम् । अम्लपिष्टैः सुशीतैरित्यादि । पलाशतरुजैः पलाशपल्लवैः । अरिष्टो निम्बः, फेनिलात्रक्षो वा । फेनकल्पनामाह—बदरीपल्लवान् काञ्जिकपिष्टान् काञ्जिकपूर्णभाजने निक्षिप्य करेण विलोडयेत्, ततो यः फेन उत्तिष्ठेत् तेन लिम्पेत् ॥२८२-२८५॥—

यवार्धकुडवं पिष्ट्वा मञ्जिष्ठार्धपलं तथा ॥ २८६ ॥
अम्लप्रस्थशतोन्मिश्रं तैलप्रस्थं विपाचयेत् ।
एतत् प्रह्लादनं तैलं ज्वरदाहविनाशनम् ॥ २८७ ॥

प्रह्लादनतैलमाह—यवार्धकुडवमित्यादि । अम्लप्रस्थशतोन्मिश्रं काञ्जिकप्रस्थशतयुक्तम् ॥ २८६ ॥ २८७ ॥

न्यग्रोधादिर्गणो यस्तु काकोल्यादिश्च यो गणः ।
उत्पलादिर्गणो यस्तु पिष्टैर्वा तैः प्रलेपयेत् ॥ २८८ ॥
तत्कषायाम्लसंसिद्धाः स्नेहाश्चाभ्यञ्जने हिताः ।
तेषां शीतकषाये वा दाहार्तमवगाहयेत् ॥ २८९ ॥
दाहवेगे त्वतिक्रान्ते तस्मादुद्धृत्य मानवम् ।
परिषिच्याम्बुभिः शीतैः प्रलिम्पेच्चन्दनादिभिः २९०
ग्लानं वा दीनमनसमाश्लिषेयुर्वराङ्गनाः ।
पेलवक्षौमसंवीताश्चन्दनार्द्रपयोधराः ॥ २९१ ॥
बिभ्रत्योऽब्जस्रजश्चित्रा मणिरत्नविभूषिताः ।
भजेयुस्ताः स्तनैः शीतैः स्पृशन्त्योऽम्बुरुहैः सुखैः ९२
प्रह्लादं चास्य विज्ञाय ताः स्त्रीरपनयेत् पुनः ।
हितं च भोजयेदन्नं तथाऽऽप्नोति सुखं महत् ॥२९३॥

तत्कषायाम्लसंसिद्धा इति न्यग्रोधादिकाकोल्याद्युत्पलादिक्काथकाञ्जिकविपक्वा इत्यर्थः । तेषामित्यादि । तेषां न्यग्रोधादीनाम् । दाहवेगे त्वतिक्रान्ते इत्यादि । तस्मात् न्यग्रोधादिप्रभृतिशीतकषायावगाहात् । चन्दनादिना चन्दनादिगणेन; अपरे तु चन्दनं श्रीचन्दनम्, आदिशब्दादुशीरलामज्जकादय इति व्याख्यानयन्ति । ग्लानं वा दीनमनसमित्यादि । दीनमनसं क्लिष्टचित्तम् । आश्लिषेयुः आलिङ्गेयुः । पेलवं सुकुमारं, क्षौमं दुकूलं पट्टवस्त्रमित्यर्थः । संवीताः सम्यगाच्छादिताः । बिभ्रत्यो धारयन्त्यः, अब्जस्रज उत्पलादिमालाः, चित्रा नानावर्णाः । भजेयुरित्यादि । ताः स्त्रियः, अम्बुरुहैः सुखैरुत्पलादिभिर्विकचैः स्पृशन्त्यः, स्तनैः कृत्वा भजेयुरिति पिण्डार्थः । हितमन्नं पित्तहरम् ॥ २८८-२९३ ॥

पित्तज्वरोक्तं शमनं विरेकोऽन्यद्धितं च यत् ।[1]

ज्वरदाहेऽतिदेशेनापरमपि चिकित्सितमाह—पित्तज्वरोक्तमित्यादि । अन्यदपि यद्धितं भवेत्तत्कर्तव्यमित्यर्थः ॥—

१ 'विरेकस्तद्धितं' इति पा० ।

निर्हरेत्पित्तमेवादौ दोषेषु समवायिषु ॥ २९४ ॥
दुर्निवारतरं तद्धि ज्वरार्तानां विशेषतः ।

इदानीं दाहप्रतीकारप्रस्तावे संसर्गज्वरे तावत् प्रकृतिकालाक्षेपया क्वचित् सन्निपातेऽपि पित्तस्यादौ प्रतीकारार्थमाह—निर्हरेदित्यादि । समवायिषु संसर्गिषु, नतु सन्निपातेषु; तत्र प्रतीकारस्यादावुक्तत्वात् । पित्तान्वितसंसर्गस्य[1] द्वित्वात् समवायिष्वित्यत्र बहुवचनं न संभवति, तथाऽपि कालप्रकृत्यपेक्षया सन्निपातेऽपि कफविरोधेनादौ कदाचित् पित्तस्य प्रतिक्रिया कार्येति दर्शनार्थं बहुवचनम् । अन्ये तु 'शमयेत् पित्तमेवादौ ज्वरेषु समवायिषु' इति पठन्ति, व्याख्यानयन्ति च—समवायिषु ज्वरेषु सन्निपातज्वरेष्वादौ पित्तं शमयेत् लङ्घनाम्बुयवाग्वादिभिः प्रकृतिस्थं कुर्यात्, यस्मादग्निमुपहत्य ज्वरो भवति, अग्निश्च पित्तान्तर्गतः, तस्मात् पित्तसंशमने[2] आदौ यत्नः कार्यः । तथा चोक्तं,—"समवाये तु दोषाणां पूर्वं पित्तमुपाचरेत् । ज्वरे चैवातिसारे च सर्वत्रान्यत्र मारुतम्"—इति । ननु, सन्निपातज्वरेष्वादावन्यत्रामश्लेष्मणो निर्हरणं कथितं, तथा च—"सन्निपातज्वरे पूर्वं कुर्यादामविशोषणम् । पश्चाच्छ्लेष्मणि संक्षीणे शमयेत् पित्तमारुतौ"—इति, तत् कथमत्र सन्निपातेष्वादौ पित्तशमनं? सत्यं, शमनशब्देनात्र प्रकृतिस्थापनमुच्यते न निर्हरणमित्यदोषः । दुर्निवारतरमिति वातकफावपि समवाये दुर्निवारौ पित्तं च दुर्निवारतरम् । हि यस्मादर्थे । अत्र निबन्धकारैर्बहूक्तं तच्च शिष्यबुद्धिव्याकुलहेतुत्वात् परिहृतम् ॥ २९४ ॥—

छर्दिमूर्च्छापिपासादीनविरोधाज्ज्वरस्य च ॥ २९५ ॥
उपद्रवाञ्जयेच्चापि प्रत्यनीकेन हेतुना ।

इदानीं ज्वरचिकित्सितमभिधायोपद्रवचिकित्सितमाह—छर्दिमूर्च्छेत्यादि । छर्द्यादीनुपद्रवान् ज्वरस्याविरोधेन प्रत्यनीकेन हेतुना जयेदिति संबन्धः । ननु, छर्द्यादय उपद्रवाः कथं प्रोच्यन्ते, यावता ज्वरलक्षणान्येतानि? सत्यं, ये ज्वरेण सहोत्पन्नाश्छर्द्यादयस्ते ज्वरलक्षणानि, ये तु ज्वरस्योत्तरकालजास्त उपद्रवाः; तथा चोक्तं,—"व्याधेरुपरि यो व्याधिर्भवत्युत्तरकालजः । उपक्रमाविरोधी[3] च स उपद्रव उच्यते"—इति । यद्यपि प्रागुक्तात्—'सोपद्रवमन्योन्याविरोधेनोपचरेद्बलवन्तमुपद्रवं च'—इति वाक्यादेवान्योन्याविरोधेन चिकित्सा सिद्धा, तथाऽपि 'अविरोधाज्ज्वरस्य' इति यत् पुनरुक्तं तन्नियमार्थं; तेन बलवन्तमुपद्रवं विहायान्यत्र सर्वत्राप्यविरोधेनैव चिकित्सा कर्तव्येति; अन्ये तु पूर्वं सामान्येनोक्तमत्र तु विशेषेणेति न दोषः । प्रत्यनीकेन स्वचिकित्सितेन । यद्येवं तर्हि हेतुनेति पदं व्यर्थं; तन्न, युक्तिव्यपाश्रयदैवव्यपाश्रयसत्त्वावजयेति त्रिप्रकारस्यापि चिकित्सितस्य संग्रहार्थत्वात्; अथवा हेतुग्रहणं

१ 'पित्तान्वितसंसर्गस्यापि द्वयत्वात्' इति पा० । २ 'पित्तसंशमनोत्पादे यत्नः' इति पा० । ३ 'उपक्रमाविघाती' इति पा० ।

हेतुविपरीतप्राप्त्यर्थं, यस्मात्त्रिविधमौषधं-हेतुविपरीतं व्याधिविपरीतं, तदर्थकारि चेति ॥ २९५ ॥—

विशेषमपरं चात्र शृणूपद्रवनाशनम् ॥ २९६ ॥
मधुकं रजनी मुस्तं दाडिमं साम्लवेतसम् ।
अञ्जनं तिन्तिडीकं च नलदं पत्रमुत्पलम् ॥ २९७ ॥
त्वचं व्याघ्रनखं चैव मातुलुङ्गरसो मधु ।
दिह्यादेभिर्ज्वरार्तस्य मधुशुक्तयुतैः शिरः ॥ २९८ ॥
शिरोभितापसंमोहवमिहिक्काप्रवेपथून् ।
प्रदेहो नाशयत्येष ज्वरितानामुपद्रवान् ॥ २९९ ॥

विशेषमपरमित्यादि । अञ्जनं रसाञ्जनं, नलदं मांसी, पत्रं पत्रकं, उत्पलं नीलोत्पलं, व्याघ्रनखो नखः । मधुशुक्तं जम्बीररसकृतः सन्धानविशेषः; तथा चोक्तं,—"जम्बीरस्य फलरसं पिप्पलीचूर्णसंयुतम् । मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत् ॥ मासेन तज्जातरसं मधुशुक्तं प्रकीर्तितम्"—इति । प्रदिह्यात् लिम्पेत् । शिरोभितापः शिरोरुक् । संमोहो मूर्च्छा ॥ २९६-२९९ ॥

मधूकमथ ह्रीबेरमुत्पलानि मधूलिकाम् ॥ ३०० ॥
लीढ्वा चूर्णानि मधुना सर्पिषा च जयेद्वमिम् ।
कफप्रसेकासृक्पित्तहिक्काश्वासांश्च दारुणान् ॥३०१॥

मधूकमित्यादि । ह्रीबेरं बालकं, मधूलिका जलयष्टी ॥ ३०० ॥ ३०१ ॥

लिहन् ज्वरार्तस्त्रिफलां पिप्पलीं च समाक्षिकाम् ।
कासे श्वासे च मधुना सर्पिषा च सुखी भवेत् ३०२

लिहन् ज्वरार्तस्त्रिफलामित्यादि । अत्र योगे यन्मधुनो वारद्वयमुपादानं तदेकस्य मधुनः पेष्यद्रव्यवत् प्रमाणं, अन्यस्य त्वालोडनवत्प्रमाणम् ॥ ३०२ ॥

विदारी दाडिमं लोध्रं दधित्थं बीजपूरकम् ।
एभिः प्रदिह्यान्मूर्धानं तृड्दाहार्तस्य देहिनः ॥३०३॥

विदारीमित्यादि । दधित्थं कपित्थम् ॥ ३०३ ॥

दाडिमस्य सितायाश्च द्राक्षामलकयोस्तथा ।
वैरस्ये धारयेत् कल्कं गण्डूषं च यथाहितम् ३०४
क्षीरेक्षुरसमाक्षीकसर्पिस्तैलोष्णवारिभिः ।

दाडिमस्येत्यादि । वैरस्ये मुखवैरस्ये । क्षीरेक्षुरसमाध्वीकेत्यादि । माक्षीकं मधु, अत्रापि मुखवैरस्ये धारयेदिति योजनीयम् ॥ ३०४ ॥—

शून्ये मूर्ध्नि हितं नस्यं जीवनीयशृतं घृतम् ॥ ३०५ ॥

शून्ये इत्यादि । शून्ये रिक्ते । जीवनीयानि काकोल्यादीनि दश । तथा चोक्तं,—"जीवन्ती काकोल्यौ द्वे मेदे मुद्गमाषपर्ण्यौ च । जीवकर्षभकौ मधुकं चेति गणो जीवनीयाख्यः" ॥३०५॥

चूर्णितैस्त्रिफलाश्यामात्रिवृत्पिप्पलिसंयुतैः ।
सक्षौद्रः शर्करायुक्तो विरेकस्तु प्रशस्यते ॥ ३०६ ॥
पक्वे पित्तज्वरे रक्ते चोर्ध्वगे वेपथौ तथा ।

चूर्णितैरित्यादि । श्यामा वृद्धदारकः । ऊर्ध्वगे ऊर्ध्वप्रवृत्ते रक्ते ॥ ३०६ ॥—

कफवातोत्थयोरेवं स्नेहाभ्यङ्गैर्विशोधयेत् ॥ ३०७ ॥

कफवातोत्थयोरेवमित्यादि । विशोधयेद्विशुद्धिं नयेत्, शमं नयेदिति तात्पर्यार्थः । कफवाताविति कर्मपदं शेषीभूतमत्र योजनीयम् ॥ ३०७ ॥

हृतदोषो भ्रमार्तस्तु लिह्यात् क्षौद्रसिताभयाः ।

हृतेत्यादि । हृतदोषोऽपि यो भ्रमार्तो भवेत् स क्षौद्रेण सिताभया लिह्यादिति पिण्डार्थः ॥—

वातघ्नमधुरैर्योज्या निरूहा वातजे ज्वरे ॥ ३०८ ॥
विभज्य दोषं प्राणं च यथास्वं चानुवासनाः ।

इदानीं वातज्वरे निरूहद्रव्याण्याह—वातघ्नमधुरैरित्यादि । वातघ्ना भद्रदार्वादयः, मधुराः काकोल्यादयः । अवेक्ष्य दोषं प्राणं चेति हीनमध्योत्तमादिभेदेन दोषं बलं च वीक्ष्येत्यर्थः । तेनाल्पप्रकुपितदोषे अल्पो निरूहो, मध्यमे मध्यमः, उत्तमे उत्तमः; एवं बलेऽपि । यथास्वं चानुवासना इति वातहरद्रव्यसाधितस्नेहानुवासना योज्या इति ॥ ३०८ ॥—

उत्पलादिकषायाद्या(द्वा)श्चन्दनोशीरसंयुताः ३०९
शर्करामधुराः शीताः पित्तज्वरहरा मताः ।
आम्रादीनां त्वचं शङ्खं चन्दनं मधुकोत्पले ॥ ३१० ॥
गैरिकाञ्जनमञ्जिष्ठामृणालान्यथ पद्मकम् ।
श्लक्ष्णपिष्टं तु पयसा शर्करामधुसंयुतम् ॥ ३११ ॥
सुपूतं शीतलं बस्तिं दह्यमानाय दापयेत् ।

पित्तज्वरे निरूहद्रव्याण्याह—उत्पलादिकषायाद्या इत्यादि । आद्याः प्रधानाः । उत्पलादिकषायाद्या इत्यादि विशेषणयुक्ता निरूहा ज्ञेयाः । पित्तज्वरे निरूहद्रव्याण्यभिधायापराण्यपि निरूहद्रव्याण्याह—आम्रादीनां न्यग्रोधादिगणान्तर्भूतत्वात् पूर्वद्रव्याणि विहाय आम्रादिकानि द्रव्याणि नन्दीवृक्षकपर्यन्तानि ग्राह्याणि[१] । चन्दनं रक्तचन्दनं, उत्पलं नीलोत्पलं, अञ्जनं स्रोतोऽञ्जनं, तदभावे रसाञ्जनं सौवीराञ्जनं वा, मृणालं बिसं, पद्मकं पद्मकाष्ठं; बस्तिर्निरूहबस्तिः ॥ ३०९-३११ ॥—

ज्वरदाहापहं तेषु सिद्धं चैवानुवासनम् ॥ ३१२ ॥

पित्तज्वरेऽनुवासनद्रव्याण्यतिदेशेनाह—ज्वरदाहापहमित्यादि । तेषु न्यग्रोधादित्वक्प्रभृतिषु ॥ ३१२ ॥

आरग्वधगणक्वाथाः पिप्पल्यादिसमायुताः ।
सक्षौद्रमूत्रा देयाः स्युः कफज्वरविनाशनाः ॥३१३॥

---

१ 'आम्रादीनां न्यग्रोधाद्यन्तर्गणा(ता)नां, तेन न्यग्रोधादिगणे आम्रात्पूर्वद्रव्याणि विहायाम्रादिकानि द्रव्याणि गणसमाप्तिपर्यन्तानि ग्राह्याणि' इति पा० ।

कफज्वरे निरूहद्रव्याण्याह—आरग्वधेत्यादि । देयाः स्युर्दातव्या भवेयुः, 'निरूहा' इति शेषः । अन्ये तु "आरग्वधादिसंसिद्धाः कफजे क्षौद्रसंयुताः । ज्वरं हन्युर्निरूहाश्च तत्सिद्धाश्चानुवासनाः"— इति पठन्ति ॥ ३१३ ॥

कफघ्नैरेव संसिद्धा द्रव्यैश्चाप्यनुवासनाः ।

कफजेऽनुवासनमाह—कफघ्नैरित्यादि । कफघ्नैर्द्रव्यैरारग्वधादिभिः ॥—

संसर्गे सन्निपाते च संसृष्टा वस्तयो हिताः ॥३१४॥

संसर्गसन्निपातयोर्निरूहद्रव्याण्याह—संसर्गे इत्यादि । संसर्गे सन्निपातादौ, संसृष्टा मिलिताः, वस्तयो निरूहा इति ॥ ३१४ ॥

संसृष्टैरेव संसृष्टा द्रव्यैश्चाप्यनुवासनाः ।

संसर्गसन्निपातयोरतिदेशेनानुवासनद्रव्याण्याह—संसृष्टैरित्यादि । संसृष्टैः संमिलितैः, संसृष्टा मिलिताः ।—

वातरोगापहाः सर्वे स्नेहा ये सम्यगीरिताः ॥३१५॥
विना तैलं त एव स्युर्योज्या मारुतजे ज्वरे ।

इदानीं वातज्वरेऽनुवासनविषये तैलनिषेधमाह—वातरोगापहा इत्यादि । सर्वे स्नेहाः सर्पिस्तैलवसामज्जानः, योज्याः 'अनुवासने' इति शेषः ॥ ३१५ ॥—

निखिलेनोपयोज्याश्च त एवाभ्यञ्जनादिषु ॥ ३१६ ॥

वातज्वरेऽनुवासननिषिद्धस्यापि तैलस्याभ्यङ्गादौ प्रयोगमाह—निखिलेनेत्यादि । निखिलेन सामस्त्येन । एतेन तैलस्यापि ग्रहणम् । त एव सर्पिस्तैलवसामज्जान एव । एते चत्वारः स्नेहा व्यस्ताः समस्ता वा संस्कृताश्च प्रयोज्याः । अत एव षट्कट्वरादितैलमपि शस्यते ॥ ३१६ ॥

पैत्तिके मधुरैस्तिक्तैः सिद्धं सर्पिश्च पूज्यते ।

पित्तज्वरे पुनरभ्यङ्गार्थं विशिष्टं स्नेहमाह—पैत्तिके मधुरैरित्यादि । पूज्यते अभ्यङ्गादिषु ॥—

श्लैष्मिके कटुतिक्तैश्च, संसृष्टानीतरेषु च ॥ ३१७ ॥

श्लैष्मिके पानाभ्यङ्गार्थं स्नेहविशेषमाह—श्लैष्मिकेइत्यादि । कटुतिक्तैश्चेत्यत्र सर्पिः सिद्धमिति योजनीयम् । यद्यपि कफस्य तुल्यगुणं सर्पिस्तथाऽपि विशिष्टसंस्कारवशात् कफेऽपि सर्पिः प्रयुज्यते । अन्ये तु चकारादनुक्तमपि तैलं कथयन्ति; तन्न, अन्यतन्त्रसंवादाभावात् । संसर्गसन्निपातेष्वभ्यङ्गार्थं विशिष्टस्नेहमाह—संसृष्टानीतरेषु चेति ।-संसृष्टानि सर्पिरादीनि अन्योन्यमिश्राणि तथा वातादिहरद्रव्यैर्मिश्रैरेव साधितानि च; इतरेषु सन्निपातेषु ॥ ३१७ ॥

हतावशेषं पित्तं तु त्वक्स्थं जनयति ज्वरम् ।
पिबेदिक्षुरसं तत्र शीतं वा शर्करोदकम् ॥ ३१८ ॥
शालिषष्टिकयोरन्नमश्नीयात् क्षीरसंप्लुतम् ।

इदानीं हतावशेषस्य पित्तस्य प्रतीकारमाह—हतावशेषमित्यादि । तत्र हतावशेषपित्तज्वरे । अन्नमोदनम् । यद्यपि त्वक्स्थिते पित्ते बहिःपरिमार्जनं युक्तं नान्तःपरिमार्जनं, तथाऽपि तद्वीर्ययुक्तस्य रसस्य सर्वतोगमनादन्तःपरिमार्जनमुक्तम् ॥ ३१८ ॥—

कफवातोत्थयोरेव स्वेदाभ्यङ्गौ प्रयोजयेत् ॥ ३१९ ॥

इदानीं कफवातयोरपि हतावशेषयोः प्रतीकारार्थमाह—कफवातोत्थयोरेवेत्यादि । कफवातोत्थयोरिति हतावशेषकफवातज्वरयोरित्यर्थः ॥ ३१९ ॥

घृतं द्वादशरात्रात्तु देयं सर्वज्वरेषु च ।
तेनान्तरेणाशयं स्वं गता दोषा भवन्ति हि ॥ ३२० ॥

अधुना यावता कालेन ज्वरे सर्पिर्देयं तावन्तं कालं सकारणं दर्शयन्नाह—घृतमित्यादि । सर्वज्वरेषु चेति ये ज्वरा लङ्घनोष्णोदकपानपेयापाचनैस्तु पक्वास्तेषु सर्वज्वरेषु द्वादशाहादनन्तरं घृतं देयम् । तेनान्तरेण तेनावसरेण तेन कालेनेत्यर्थः, द्वादशरात्राद्रूर्ध्वमिति तात्पर्यार्थः । आशयं स्वं गता दोषा इति स्थानमात्मीयं प्राप्ता वातादयो भवन्ति, पाकप्राप्तत्वात् । यद्यप्यष्टाहेन दशाहात्परं वा ज्वरपाको भवति तथाऽपि सन्निपातज्वरस्य द्वादशाहेन पाको भवतीति दर्शनार्थं द्वादशाहग्रहणम् । केचिदत्र[1] नस्यार्थं घृतं पठन्ति; तन्न पठनीयं, नस्यार्थघृतस्य गण्डूषोत्तरं प्रागेव पठितत्वात् ॥ ३२० ॥

धातून् प्रक्षोभयन् दोषो मोक्षकाले बलीयते ।
तेन व्याकुलचित्तस्तु म्रियमाण इवेहते ॥ ३२१ ॥

शान्तिं गच्छत्यपि ज्वरे यथा क्लेशातिशयो भवति तथा दर्शयन्नाह—धातूनित्यादि । मोक्षकाले धातूंश्चालयन् दोषो बलीयते बलीवाचरतीति पिण्डार्थः । ननु, प्रक्षीणावस्थायां कस्माद्दोषो बलीवाचरति ? सत्यं, प्रभावात्; यथा दीपो निर्वाणावस्थायां महतीं ज्वालां प्रदर्शयन् निर्वाणं याति[2], तद्वदयमपि ज्वरारम्भको दोषो बलीयत इति । केचित् बलीयते बलीयान् गच्छति इति व्याख्यानयन्ति, ईयते इति इदधातोर्दिवादिकस्य कर्तरि प्रयोगात्[3] । अपरे तु 'अवलीयते' इति पठन्ति[4], व्याख्यानयन्ति च—अवलीयते तादृग्रूपेण नोपलभ्यते । तेन दोषेण, म्रियमाण इवेहते मुमूर्षुवद्गात्रविक्षेपणादिकां क्रियां करोतीत्यर्थः[5] ॥ ३२१ ॥

लघुत्वं शिरसः स्वेदो मुखमापाण्डु पाकि च ।
क्षवथुश्चान्नकाङ्क्षा च ज्वरमुक्तस्य लक्षणम् ॥ ३२२ ॥

ज्वरमुक्तलक्षणमाह—लघुत्वमित्यादि । लघुत्वं शिरस इति शिरोलघुत्वं, आपाण्डु ईषत्पाण्डु, क्षवथुः छिक्का । ज्वरातीसारयोर्महाव्याधित्वान्मुक्तिलक्षणं कथितं नान्येषाम् । केचिदाचार्या 'धातून् प्रक्षोभयन् दोष' इत्यादिकमनन्तरोक्तं

---

१ 'तथा तद्वीर्यान्वितरसस्य सर्वतो व्यानविक्षेपणेन त्वचामपि स्पर्शनात्' इति पा० । २ 'केचित्तदेव' इति पा० । ३ 'प्रयोगादिपठितत्वात्' इति पा० । ४ 'निर्वाणयति' इति पा० । ५ 'इति पाठं मन्यन्ते, ते च व्याख्यानयन्ति' इति पा० ।

सन्निपातज्वरमुक्तिलक्षणं, 'लघुत्वं शिरस' इत्यादिकं चेतरज्वरमुक्तिलक्षणमिति ब्रुवते ॥ ३२२ ॥

शम्भुक्रोधोद्भवो घोरो बलवर्णाग्निसादकः ।
रोगराट् रोगसंघातो ज्वर इत्युपदिश्यते ॥ ३२३ ॥

व्यापित्वात् सर्वसंस्पर्शात् कृच्छ्रत्वादन्तसंभवात् ।
अन्तको ह्येष भूतानां ज्वर इत्युपदिश्यते ॥ ३२४ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे ज्वरप्रतिषेधो नाम (प्रथमोऽध्यायः, आदित) एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

इदानीं ज्वरस्यातिशयेन प्रतीकरणाय गरीयस्त्वं दर्शयन्नाह—शम्भुक्रोधोद्भव इत्यादि । एतैर्हेतुभिर्ज्वरोऽन्तक इत्युपदिश्यत इति संबन्धः । व्यापित्वमस्य पुरुषपश्वादिसर्वप्राणिव्यापनात्, सर्वसंस्पर्शित्वं समनस्केन्द्रियस्य देहस्य तापनात्, कृच्छ्रत्वमग्नेरुपघातादत्यन्तपीडाकरत्वाद्वा, अन्तसंभवत्वं चापरव्याधिग्रस्तस्यापि पुरुषस्य ज्वरेणैव प्राणनाशित्वात् । अन्तक इव अन्तकः, अन्तकारित्वात् । यद्यप्ययमध्यायो निबन्धकारैरन्यक्रमपाठैः पठितः, तथाऽपि मया यथा गुरुणोपदिष्टस्तेन क्रमेण पठितः ॥ ३२३ ॥ ३२४ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गतकायचिकित्सायां ज्वरप्रतिषेधाध्याय एकोनचत्वारिंशत्तमः ॥ ३९ ॥

चत्वारिंशत्तमोऽध्यायः ।

अथातोऽतीसारप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

ज्वरप्रतिषेधानन्तरमग्न्युपघातपूर्वकत्वसामान्यादतीसारप्रतिषेधारम्भः प्राप्तः—अथेत्यादि । अतिसरणमतीसारः, तस्य प्रतिषेधः चिकित्सितं; तथा चोक्तं—"अतिरत्यर्थवचने, सरतिर्गतिकर्मणि । तस्मात्तदत्यन्तसरणादतीसार इति स्मृतः" इति ॥ १ ॥ २ ॥

गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः ।
विरुद्धाध्यशनाजीर्णैरसात्म्यैश्चापि भोजनैः ॥ ३ ॥
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषाद्भयात् ।
शोकाद्दुष्टाम्बुमद्यातिपानात् सात्म्यर्तुपर्ययात् ॥ ४ ॥

जलातिरमणैर्वेगविघातैः कृमिदोषतः ।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते ॥ ५ ॥

यतो विज्ञातेऽतिसारे चिकित्सितं क्रियतेऽतस्तद्विज्ञानार्थं पूर्वं निदानमाह—गुर्वतिस्निग्धेत्यादि । गुरु मात्रागुणविपाकेभ्यः । अतिशब्दः स्निग्धादिभिः स्थूलान्तैः प्रत्येकं संबध्यते । स्थूलं स्थूलावयवं पिष्टान्नादि । यद्यपि गुरुग्रहणेनैव स्निग्धस्थूलयोः प्राप्तिस्तथाऽप्यतिशयेनातीसारहेतुत्वापादनार्थं तयोर्ग्रहणम् । विरुद्धं हिताहितीयोक्तम्, अध्यशनमजीर्णभोजनम्, अजीर्णानि आमविदग्धादीनि । स्नेहाद्यैरिति स्नेहवमनविरेचननिरूहानुवासनैः । अतियुक्तैरतियोगयुक्तैः । मिथ्याप्रयुक्तैरसम्यग्युक्तैः, यद्यपि मिथ्याप्रयुक्तैरित्यनेनैवातियोगः प्राप्तस्तथाऽप्यतिशयेनातीसारहेतुत्वापादनार्थमतियोगग्रहणम् । विषात् दूषीविषात् । दुष्टाम्बुमद्यातिपानात् वीर्यविपाकस्पर्शैर्दुष्टमम्बु, मद्यं पुनर्दुष्टं नवं व्यापन्नमकालजं वा, तयोराधिक्येन पानात् । सात्म्यर्तुपर्ययात् सात्म्यविपर्ययात् ऋतुविपर्ययाच्चेत्यर्थः । यद्येवं तर्हि असात्म्यैश्चापि भोजनैरिति निष्फलं; तन्न, विशेषहेतुत्वात् । जलातिरमणैः पानीयातिक्रीडनैः । वेगविघातैर्मूत्रादिवेगावरोधैः । कृमिदोषतः कृमिप्रकोपात् । केचिदाचार्या गुर्वतिस्निग्धरूक्षेत्यादिसूत्रात् पूर्वमतीसारस्य प्रागुत्पत्तिं पठन्ति, तद्यथा,—"दीर्घसत्रेण यजतः पृषध्रस्य महात्मनः । आलम्भ्याः पशवः क्षीणास्ततो गावः प्रकल्पिताः ॥ तासामुपाकृतानां च गवामत्यर्थसेवनात् । असात्म्यत्वादथोष्णत्वाद्गौरवाच्च विशेषतः ॥ अतिस्नेहाच्च संक्षीणो जाठरोऽग्निस्तदा किल । अतीसारः पुरोत्पन्नो दोषधातुमलाश्रयः ॥ अथ तेनैव कल्पेन संप्रलेष महागदः"—इति ॥ ३–५ ॥

संशम्यापां धातुरन्तः कृशानुं
वर्चोमिश्रो मारुतेन प्रणुन्नः ।
वृद्धोऽतीवाधः सरत्येष यस्मा-
द्व्याधिं घोरं तं त्वतीसारमाहुः ॥ ६ ॥

लक्षणं तस्य वक्ष्यते इत्यभिधाय संप्राप्तिरपि लक्षणं भवत्यतो हेतोर्निरुक्तिद्वारेण संप्राप्तिमाह—संशम्यापां धातुरित्यादि । यस्मादन्तरग्निं संशम्य अपांधातुरेवम्भूतोऽतीवाधः सरति तस्मादतीसारमाचार्या आहुरिति पिण्डार्थः । संशम्य मन्दीकृत्य । अपांधातुः कायद्रवः श्लेष्मपित्तरसादिकः । अन्ये तु कफदुष्टं रसं स्वेदं चापांधातुशब्देनाहुः । वर्चोमिश्रः पुरीषयुक्तः । प्रणुन्नः प्रेरितः । वृद्धो वृद्धिं गतः ॥ ६ ॥

एकैकशः सर्वशश्चापि दोषैः
शोकेनान्यः षष्ठ आमेन चोक्तः ।
केचित् प्राहुर्नैकरूपप्रकारं
नैवेत्येवं काशिराजस्त्ववोचत् ॥ ७ ॥
दोषावस्थास्तस्य नैकप्रकाराः
काले काले व्याधितस्योद्भवन्ति ।

इदानीमतीसाराणां संख्यामाह—एकैकश इत्यादि । संख्येयनिर्देशादेव संख्यायां लब्धायां षष्ठ इति संख्याकरणं नियमार्थं; तेन द्वन्द्वजा अतीसारा न भवन्ति, व्याधिस्वभावादिति सूचितम् । येऽन्ये तन्त्रान्तरीया वातादिभिर्व्यस्तैः समस्तैश्च चत्वारो, भयशोकाभ्यां च द्वौ, इत्यनया परिपाट्या षट्त्वं मन्यन्ते,

तेषामीदृशोऽभिप्रायः—आमजोऽतीसारः सन्निपातजेऽवरुद्धः, 'आमाजीर्णात् प्रद्रुताः क्षोभयन्तः' इत्युक्तत्वात्। कैश्चिद्धारीतादिभिर्द्वन्द्वजादिभेदेन बहवोऽतिसाराः पठिताः, ते धन्वन्तरेरनभिमताः, अतस्तन्निषेधार्थमाह—केचित् प्राहुरित्यादि। केचिन्नैकरूपप्रकारमतीसारमाहुः; कुतः? द्वन्द्वजरक्तातीसारादिभेदेन बहुप्रकारत्वात्, काशिराजश्च तमतीसारमेव द्वन्द्वजादिभेदेन बहुप्रकारमिति हेतोर्नैवावोचत्; कोऽसौ हेतुर्यद्वशादनन्तप्रकारं तं नावोचदित्याह—दोषावस्था इत्यादि; दोषावस्था आमपक्वरक्ताद्याः, तस्यातीसारिणः, काले काले स्वे स्वे काले; तत्र प्रथमा आमावस्था, ततः पक्वावस्था, तथा पित्तातीसारे पित्तलसेवनाद्रक्तातीसारावस्था भवति; एवमेकदोषावस्थे[1]ऽप्यतीसारे दोषान्तरानुबन्धेन द्वन्द्वजाभासता ज्ञेया। एतेनैतदुक्तम्—अतीसारः षट्प्रकार एव, याश्च आमपक्वरक्तान्यदोषानुबन्धाद्यास्तत्रानेकप्रकारा अवस्थास्ता दोषाणामेवेत्यर्थः॥ ७॥—

हृन्नाभिपायूदरकुक्षितोद-
गात्रावसादानिलसन्निरोधाः॥ ८॥
विट्सङ्ग आध्मानमथाविपाको
भविष्यतस्तस्य पुरःसराणि।

इदानीमतीसारस्य पूर्वरूपमाह—हृन्नाभिपायूदरेत्यादि। हृत् हृदयं, पायु गुदं, तोदशब्दो हृदादिभिः कुक्षिपर्यन्तैः प्रत्येकं संबध्यते। यद्यप्युदरग्रहणेनैव नाभिकुक्षी अपि प्राप्येते, तथाऽपि नाभिकुक्ष्यभिधानं विशेषेण तत्र तोदो भवतीति दर्शनार्थम्। पुरःसराणि पूर्वरूपाणीत्यर्थः॥ ८॥—

शूलाविष्टः सक्तमूत्रोऽन्त्रकूजी
स्रस्तापानः सन्नकट्यूरुजङ्घः॥ ९॥
वर्चो मुञ्चत्यल्पमल्पं सफेनं
रूक्षं श्यावं सानिलं मारुतेन।

इदानीं वातातीसारस्य लक्षणमाह—शूलाविष्ट इत्यादि। शूलाविष्टः शूलार्दितः। सक्तमूत्रो विबद्धमूत्रः। अन्त्रकूजी गुडगुडशब्दयुक्तः। स्रस्तापानोऽधश्च्युतगुदः। सन्नकट्यूरुजङ्घः शिथिलकट्यूरुजङ्घः। अल्पमल्पमिति चान्यातिसारापेक्षया। सानिलं सशब्दवातयुतम्। श्यावशब्दोऽत्र व्रणास्रावोक्तारुणभस्मकपोतास्थिवर्णाद्युपलक्षयति॥ ९॥—

दुर्गन्ध्युष्णं वेगवन्मांसतोय-
प्रख्यं भिन्नं स्विन्नदेहोऽतितीक्ष्णम्॥ १०॥
पित्तात् पीतं नीलमालोहितं वा
तृष्णामूर्च्छादाहपाकज्वरार्तः।

पित्तातीसारलक्षणमाह—दुर्गन्धीत्यादि। एवम्भूतः पुरुष एवम्भूतं वर्चः पित्तादतीसार्यत इति संबन्धः। वेगवदतिशयेन सवेगम्। मांसतोयप्रख्यं मांसधावनोदकसदृशम्। भिन्नं स्फुटितम्, अतितीक्ष्णमतिशयेन तीक्ष्णं, तच्च मक्षिकाणामपसर्पणेन ज्ञेयम्। दाहो गुदे जठरे वा, पाको गुदे एव ज्ञेयः॥१०॥—

तन्द्रानिद्रागौरवोत्क्लेशसादी
वेगाशङ्की सृष्टविट्कोऽपि भूयः॥ ११॥
शुक्लं सान्द्रं श्लेष्मणा श्लेष्मयुक्तं
भक्तद्वेषी निःस्वनं हृष्टरोमा।

श्लेष्मातीसारलक्षणमाह—तन्द्रानिद्रेत्यादि। तन्द्रा शारीरोक्तलक्षणनिद्राभेदः, उत्क्लेशः थूत्करणं, सादी अङ्गग्लानियुक्तः। सृष्टविट्क इत्यादि। सृष्टविट्कोऽपि पुरुषो भूयः पुनर्वेगाशङ्की भवतीत्यर्थः। सान्द्रं घनम्। निःस्वनं निःशब्दम्। हृष्टरोमा उद्धर्षितरोमा॥ ११॥—

तन्द्रायुक्तो मोहसादास्यशोषी
वर्चः कुर्यान्नैकवर्णं तृषार्तः॥ १२॥
सर्वोद्भूते सर्वलिङ्गोपपत्तिः
कृच्छ्रश्चायं बालवृद्धेष्वसाध्यः।

इदानीं सन्निपातातीसारलक्षणमाह—तन्द्रायुक्त इत्यादि। नैकवर्णं किं तर्हि सर्वदोषवर्णम्। सर्वलिङ्गोपपत्तिः सर्वलिङ्गप्राप्तिः॥ १२॥—

तैस्तैर्भावैः शोचतोऽल्पाशनस्य
बाष्पावेगः पक्तिमाविध्य(श्य)जन्तोः॥१३॥
कोष्ठं गत्वा क्षोभयत्यस्य रक्तं
तच्चाधस्तात् काकणन्तीप्रकाशम्।
वर्चोमिश्रं निःपुरीषं सगन्धं
निर्गन्धं वा सार्यते तेन कृच्छ्रात्॥ १४॥
शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं
रोगो वैद्यैः कष्ट एष प्रदिष्टः।

शोकजलक्षणमाह—तैस्तैर्भावैरित्यादि। एवम्भूतस्य पुरुषस्य बाष्पावेगः कोष्ठं गत्वा, पक्तिमाविध्य, रक्तमस्य क्षोभयतीति संबन्धः। तैस्तैर्भावैर्बन्धुवियोगादिभिः, शोचतः शोकं कुर्वतः, बाष्पावेगः शोकोत्थतेज उद्रेकः, पक्तिमग्निं पक्तिहेतुत्वात्, आविध्य आकुलीकृत्य, क्षोभयति। तच्चेति रक्तं, अधस्तादिति पदं क्षोभयतीत्यनेन संबन्धनीयं, अन्ये सार्यते तेन इत्यत्र संबध्नन्ति। काकणन्ती गुञ्जा। सगन्धं निर्गन्धं वेति सपुरीषापुरीषत्वादित्यर्थः। केचिदत्र अल्पाशनस्येत्यस्यानन्तरं शोकोत्पन्न इत्यतः प्रागन्यथा पठन्ति 'शुष्कं भुक्तं तेज ऊष्मगृहीतं कोष्ठं गत्वा रक्तमत्यर्थमुष्णम्। गुञ्जाप्रख्यं प्रेरयेच्चाप्यधस्ताद्वर्चोयुक्तं निष्पुरीषं सगन्धम्॥ निर्गन्धं वा सार्यते सोऽतिसारः' इति। व्याख्यानयन्ति च,—शुष्कं शुष्कतां गतं, अल्पत्वात्; भुक्तं भोजनं, तेजः शोकोत्थं तेजः, ऊष्मगृहीतम् ऊष्मणा गृहीतम्॥ १३॥ १४॥—

आमाजीर्णोपद्रुताः क्षोभयन्तः
कोष्ठं दोषाः संप्रदुष्टाः सभक्तम्॥ १५॥

[1] 'एकदोषारब्धे' इति पा०।

नानावर्णं नैकशः सारयन्ति
कृच्छ्राज्जन्तोः षष्ठमेनं वदन्ति ॥ १६ ॥

आमातीसारलक्षणमाह—आमाजीर्णेत्यादि । दोषाः संप्रदुष्टाः कोष्ठं क्षोभयन्तः सन्तो नानावर्णं कृच्छ्रात् सरुक् एकशो न अपितु बहुशः सारयन्तीति पिण्डार्थः । आमाजीर्णोपद्रुताः आमाख्येनाजीर्णेनोदीरिताः, क्षोभयन्तश्चालयन्तः, 'मलं' इति शेषः । सभक्तं ससिक्थम् । अत्र पुनः षष्ठसंख्यावचनं नियमार्थं, तेन भयस्नेहाजीर्णविसूचिकार्शोऽजीर्णादिनिमित्ता अतीसारा न पृथग्गणनीयाः, यतस्ते दोषजेष्वेवान्तर्भूताः । एनमामजम् । केचित् 'संप्रदुष्टाः सभक्तम्' इत्यत्र 'धातुसङ्घान् मलांश्च' इति पठन्ति; धातुसङ्घान् रक्तादीन्, मलान् पुरीषादीन्, 'दूषयित्वा' इति शेषः, इति च व्याख्यानयन्ति । यद्यपि सर्वातीसाराणामादावामातीसारत्वं, तथाऽपि प्रभूतामजनितत्वादामजस्य पृथगुपादानं, एवं सान्निपातिकत्वेऽप्यस्य पृथगुपादानं समाधेयम् ॥ १५ ॥ १६ ॥

संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्ववसीदति ।
पुरीषं भृशदुर्गन्धि विच्छिन्नं चामसंज्ञकम्[१] ॥ १७ ॥

इदानीमामातीसारस्य लक्षणमाह—संसृष्टमेभिर्दोषैरित्यादि । संसृष्टमेभिर्दोषैः पूर्वनिर्दिष्टैर्वातादिलिङ्गैर्गुरुतरैर्व्याप्तमित्यर्थः । अवसीदति ब्रुडति । विच्छिन्नमल्पाल्पप्रवर्तकं; विच्छिन्नमित्यत्र पिच्छिलमिति केचित् पठन्ति ॥ १७ ॥

एतान्येव तु लिङ्गानि विपरीतानि यस्य तु ।
लाघवं च मनुष्यस्य तस्य पक्वं विनिर्दिशेत् ॥ १८ ॥

आमलक्षणमभिधाय पक्वलक्षणमाह—एतान्येवेत्यादि । एतान्येव लिङ्गानि अनन्तरोक्तापक्वलिङ्गानि । चकारात् कफदुष्टिरहितं पुरीषं समुच्चीयते । 'मनुष्यस्य' इत्यत्र 'पुरीषस्य' इति केचित् पठन्ति; व्याख्यानयन्ति च—यद्यपि न्यस्तमप्स्ववसीदतीत्यस्य वैपरीत्येनैव पुरीषलाघवं प्राप्तं, तथाऽपि पुनर्लाघवोपादानं कफदुष्टिरहितत्वबोधनाय । ननु, कफसंसृष्टः पक्वोऽपि मलो निमज्जति तत् कथं पक्वकफातीसारज्ञानं ? उच्यते—तदितरलक्षणैरेव ॥ १८ ॥

सर्पिर्मेदोवेसवाराम्बुतैल-
मज्जक्षीरक्षौद्ररूपं स्रवेद्यत् ।
मञ्जिष्ठाभं मस्तुलुङ्गोपमं वा
विस्रं शीतं प्रेतगन्ध्यञ्जनाभम् ॥ १९ ॥
राजीमद्वा चन्द्रकैः सन्ततं वा
पूयप्रख्यं कर्दमाभं तथोष्णम् ।
हन्यादेतद्यत् प्रतीपं भवेच्च
क्षीणं हन्युश्चोपसर्गाः प्रभूताः ॥ २० ॥
असंवृतगुदं क्षीणं दुराध्मातमुपद्रुतम् ।
गुदे पक्वे गतोष्माणमतीसारकिणं त्यजेत् ॥ २१ ॥

इदानीमतीसाराणां परिहारार्थमसाध्यलक्षणमाह—सर्पिरित्यादि । वेसवारं विशिष्टसंस्कारसंस्कृतं मांसं खानिस्कापरपर्यायं, तेन मिश्रमम्बु वेसवाराम्बु; रूपशब्दः सर्पिरादिभिः प्रत्येकं संबध्यते । मस्तुलुङ्गोऽर्धविलीनचतुःस्नेहाकारो मस्तकमज्जा तत्सदृशम् । विस्रमामगन्धि, शटितमृतकगन्धतुल्यगन्धमित्यर्थः । अञ्जनाभं सौवीराञ्जनाभम् । राजीमन्नीलपीतादिरेखायुक्तम् । चन्द्रकैर्मयूरपिच्छाभैः, सन्ततं व्याप्तम् । यत् प्रतीपं यथास्वदोषलिङ्गेभ्यो विपरीतलिङ्गं, अन्ये तु अरिष्टलिङ्गमाहुः । उपसर्गा उपद्रवाः, ते च तन्त्रान्तरे पठिता ज्वरशोफादयः । उक्तं च,—"शोफं शूलं ज्वरं तृष्णां श्वासं कासमरोचकम् । छर्दिं हिक्कां च मूर्च्छां च दृष्ट्वाऽतीसारिणं त्यजेत्" इति । प्रभूता बहवः । एते उपद्रवाः क्षीणमतीसारिणं हन्युरिति योजनीयम् । असंवृतगुदमसङ्कुचितगुदमित्यर्थः । क्षीणमुत्साहोपचयबलरहितं, दुरात्मानमजितेन्द्रियम् । उपद्रुतमवारणीयोक्तैरुपद्रवैर्जुष्टम् । गुदे पक्वे गतोष्माणं गुदे पक्वे सति यस्य ऊष्मा बहिर्निर्गतो विनष्टस्तादृशमतिसारिणं त्यजेत् । केचित् 'दुरात्मानं' इत्यत्र 'सदाऽऽध्मातं' इति पठन्ति, सदाऽऽध्मानयुक्तमिति च व्याख्यानयन्ति ॥ १९–२१ ॥

शरीरिणामतीसारः संभूतो येन केनचित् ।
दोषाणामेव लिङ्गानि कदाचिन्नातिवर्तते ॥ २२ ॥
स्नेहाजीर्णनिमित्तस्तु बहुशूलप्रवाहिकः ।
विसूचिकानिमित्तस्तु चान्योऽजीर्णनिमित्तजः ।
विषार्शःकृमिसंभूतो यथास्वं दोषलक्षणः[१] ॥ २३ ॥

इदानीं षट्संख्याधिक्यशङ्कानिषेधार्थमितराणामतीसाराणां दोषजेष्वेवान्तर्भावार्थमाह—शरीरिणामित्यादि । येन केनचित् 'हेतुना' इति शेषः । यस्माद्बहुनिमित्तजोऽप्यतीसारो दोषलिङ्गानि नातिवर्तते नातिक्रामति तस्माद्यथास्वदोषलक्षणादतीसारो ज्ञेय इत्यर्थः । एतेन न षट्संख्याधिक्यम् । केचित् 'शरीरिणामतीसारः' इत्यादिपाठमामजातिसारलक्षणादनन्तरं पठन्ति, युक्तश्चायं तथैव पाठः; परं जेज्जटाचार्यवचनानुरोधेनात्र पठितः; जेज्जटाचार्यं विहायान्ये टीकाकारा अस्थानन्तरं पाठं न पठन्ति, क्षोदक्षमत्वाभावात् ॥ २२ ॥ २३ ॥

आमपक्वक्रमं हित्वा नातिसारे क्रिया यतः ।
अतः सर्वेऽतिसारास्तु ज्ञेयाः पक्वामलक्षणैः ॥ २४ ॥

इदानीमामपक्वलक्षणज्ञाने भिषजो यत्नातिशयं प्रतिपादयन्नाह—आमपक्वक्रममित्यादि । पक्वामलक्षणैः पूर्वोक्तैरेव ॥२४॥

तत्रादौ लङ्घनं कार्यमतिसारेषु देहिनाम्[२] ।
ततः पाचनसंयुक्तो यवाग्वादिक्रमो हितः ॥ २५ ॥

इदानीं चिकित्सावसरः—तत्रादौ लङ्घनमित्यादि । तत्रेति वाक्योपक्रमे । लङ्घनमुपवासः । आदौ प्रथमतः । यस्मात् सर्वे

---

१ 'चामसंस्कृतम्' इति पा० ।

१ 'यो दोषो यत्र चान्तर्भवति तथैव भावार्थमाह' इति पा० ।
२ 'आदौ तु लङ्घनं कार्यं' इति पा० ।

एवातीसारा आदावामत्वं भजन्तेऽत आमशमनार्थमादौ लङ्घनं, ततो लङ्घनादनन्तरम् । आदिशब्दाद्यूषरसादयो गृह्यन्ते । एतद्यवागूयूषरसादिकं यद्यस्य हितं भवति तत्तदवस्थां बुद्ध्वा दद्यात् । केचित् 'तत्रादौ लङ्घनं कार्यं' इत्यस्य स्थाने 'हितं लङ्घनमेवादौ' इत्यादिपाठं पठन्ति, स च मया न दृष्ट इति न दर्शितः ॥ २५ ॥

अथवा वामयित्वाऽऽमे शूलाध्मानिपीडितम् ।
पिप्पलीसैन्धवाम्भोभिर्लङ्घनाद्यैरुपाचरेत् ॥ २६ ॥

अवस्थाविशेषेण पक्षान्तरमाह—अथवा वामयित्वेत्यादि । आमेऽतीसारे शूलादिपीडितं पुरुषं पिप्पलीसैन्धवाम्भोभिर्वामयित्वा लङ्घनाद्यैरुपाचरेदिति संबन्धः । लङ्घनाद्यैरिति लङ्घनखेदोष्णोदकपानादिभिः । ननु, अग्निमान्द्यादतीसारप्रवृत्तिः, तत् कथमग्निमान्द्यजनकस्य वमनस्य तत्रोपदेशः ? सत्यम्, अतिप्रवृत्तदोषप्रतिबन्धार्थं च वमनं प्रयुज्यते ॥ २६ ॥

कार्यं च वमनस्यान्ते प्रद्रवं लघुभोजनम् ।
खडयूषयवागूषु पिप्पल्याद्यं च योजयेत् ॥ २७ ॥

वमनादनन्तरं यत् कार्यं तदाह—कार्यमित्यादि । प्रद्रवं प्रकृष्टद्रवं यवागूयूषादि । ननु, भोजेनातीसारे द्रवस्य निषेधो दर्शितस्तत् कथमत्र द्रवाणां यवाग्वादीनां प्रयोगः ? सत्यं, भोजे केवलस्यैव द्रवस्य निषेधो न संस्कृतस्येत्यदोषः । अन्ये तु प्रगतद्रवं प्रद्रवं कथयन्ति । तन्न, अतीसारे यवागूपदेशात् । खडयूषयवागूषु पिप्पल्याद्यं च योजयेदिति ष(ख)डयूषः कपित्थदाडिममरिचादिभिः सुपक्वं तक्रम्, अन्ये तु षडा दाडिमतक्रशाकादिसंस्कृता द्रवाः, यूषा मुद्गमसूरादिकृताः ॥ २७ ॥

अनेन विधिना चामं यस्य वै नोपशाम्यति ।
हरिद्रादिं वचादिं वा पिबेत् प्रातः स मानवः ॥२८॥

षडयूषादिभिरपच्यमानेऽतीसारे पाचनार्थमाह—अनेन विधिना चाममित्यादि । आममामातीसारः । प्रातःशब्दो निरन्नताद्योतकः ॥ २८ ॥

आमातीसारिणां कार्यं नादौ संग्रहणं नृणाम् ।
तेषां दोषा विबद्धाः प्राग्जनयन्त्यामयानिमान् ॥२९॥
प्लीहपाण्ड्वामयानाहमेहकुष्ठोदरज्वरान् ।
शोफगुल्मग्रहण्यर्शःशूलालसकहृद्ग्रहान् ॥ ३० ॥

आमातिसारे आदौ संग्रहाद्दोषमाह—आमातीसारिणामित्यादि । तेषामामातिसारिणाम् । विबद्धा विशेषेण बद्धा संगृहीता इत्यर्थः । अन्ये आमातीसारिणामित्यादिपाठस्य स्थाने 'दोषस्तम्भनमादौ तु न कर्तव्यं विजानता । तस्मादौ बध्यमानस्तु[1] बली कुर्यादुपद्रवान्' इति पठन्ति । अपरे तु अन्यथा पाठं पठन्ति, स चाप्रसिद्ध इति न दर्शितः ॥ २९ ॥ ३० ॥

सशूलं बहुशः कृच्छ्राद्विबद्धं योऽतिसार्यते ।
दोषान् सन्निचितान् तस्य पथ्याभिः संप्रवर्तयेत् ३१

इदानीमावस्थिकं क्रममाह—सशूलमित्यादि । विबद्धं विबद्धमिव अल्पाल्पप्रवृत्तिः । सन्निचितान् सञ्चयगतान्, प्रवृद्धानित्यर्थः । संप्रवर्तयेदित्यत्र बहुश इति संबन्धनीयम् । यस्मात् सन्निचिताः शूलकारिणो दोषा विरेचनेनाधःपतन्ति तस्मादतीसारेऽपि विरेचनं प्रयुज्यते ॥ ३१ ॥

योऽतिद्रवं प्रभूतं च पुरीषमतिसार्यते ।
तस्यादौ वमनं कुर्यात् पश्चाल्लङ्घनपाचनम् ॥ ३२ ॥

अपरमावस्थिकमाह—योऽतिद्रवमित्यादि । यस्माद्वमनमूर्ध्वमार्गहरणद्वारेणोदकधातोरुच्छेदकारी तस्मात् प्रयुज्यते ॥ ३२ ॥

स्तोकं स्तोकं विबद्धं वा सशूलं योऽतिसार्यते ।
अभयापिप्पलीकल्कैः सुखोष्णैस्तं विरेचयेत् ॥३३॥

स्तोकमित्यादि । वाशब्दोऽभयापिप्पलीकल्कैरित्यत्र संबन्धनीयः । यद्यपि 'सशूलं बहुश' इत्यनेनैव स्तोकं विबद्धमित्यस्यार्थः प्राप्तः, तथाऽपि पिप्पलीसंयोगस्याधिकस्य दर्शनार्थं पुनरभिधानम् ॥ ३३ ॥

आमे च लङ्घनं शस्तमादौ पाचनमेव वा ।

तत्र लङ्घनं परं यदि तस्यैव विकल्पकार्यमाह—आमे च लङ्घनमित्यादि । आमातीसारे लङ्घनं कार्यं परं यदि लङ्घने क्षमं शरीरमन्नानभिलाषश्च भवति, अतो विपर्यये आदौ पाचनमिति ॥—

योगाश्चात्र प्रवक्ष्यन्ते त्वामातीसारनाशनाः ॥ ३४ ॥

योगाश्चात्रेत्यादि । योगाः पाचनयोगाः ॥ ३४ ॥

कलिङ्गातिविषाहिङ्गुसौवर्चलवचाभयाः ।
देवदारुवचामुस्तानागरातिविषाभयाः ॥ ३५ ॥
अभया धान्यकं मुस्तं पिप्पली नागरं वचा ।
नागरं धान्यकं मुस्तं बालकं बिल्वमेव च ॥ ३६ ॥
मुस्तं पर्पटकं शुण्ठी वचा प्रतिविषाऽभया ।
अभयाऽतिविषा हिङ्गु वचा सौवर्चलं तथा ॥ ३७ ॥
चित्रकः पिप्पलीमूलं वचा कटुकरोहिणी ।
पाठा वत्सकबीजानि हरीतक्यो महौषधम् ॥ ३८ ॥
मूर्वा निर्दहनी पाठा त्र्यूषणं गजपिप्पली ।
सिद्धार्थका भद्रदारु शताह्वा कटुरोहिणी ॥ ३९ ॥
एला सावरकं कुष्ठं हरिद्रे कौटजा यवाः ।
मेषशृङ्गी त्वगेले च कृमिघ्नं वृक्षकाणि च ॥ ४० ॥
वृक्षादनी वीरतरुर्बृहत्यौ द्वे सहे तथा ।
अरलुत्वक् तैन्दुकी च दाडिमी कौटजी शमी ॥४१॥
पाठा तेजोवती मुस्तं पिप्पली कौटजं फलम् ।
पटोलं(ली) दीप्यको बिल्वं हरिद्रे देवदारु च ॥४२॥
विडङ्गमभया पाठा शृङ्गवेरं घनं वचा ।
वचा वत्सकबीजानि सैन्धवं कटुरोहिणी ॥ ४३ ॥
हिङ्गुर्वत्सकबीजानि वचा बिल्वशलाटु च ।
नागरातिविषे मुस्तं पिप्पल्यो वात्सकं फलम् ॥४४॥

[1] 'वर्धमानस्तु' इति पा० ।

महौषधं प्रतिविषा मुस्तं चेत्यामपाचनाः ।
प्रयोज्या विंशतिर्योगाः श्लोकार्धविहितास्त्विमे ४५
धान्याम्लोष्णाम्बुमद्यानां पिबेदन्यतमेन वा ।
निष्क्वाथान् वा पिबेदेषां सुखोष्णान् साधु साधितान्

तानेव पाचनयोगानाह—कलिङ्गेत्यादि । कलिङ्गा इन्द्रयवाः । प्रतिविषा श्यामकन्दाऽतिविषाभेदः । महौषधं शुण्ठी । मूर्वा चोरस्नायुः, निर्दहनी चित्रकः, त्र्यूषणं त्रिकटुकम् । सिद्धार्थकाः श्वेतसर्षपाः, कटुरोहिणी कटुका । सावरकं रोध्रं, हरिद्रे हरिद्राद्वयं, कौटजा यवा इन्द्रयवाः । मेषशृङ्गी कर्कटशृङ्गी, त्वक् त्वचा, क्रमिघ्नं विडङ्गं, वृक्षकः कुटजः, वृक्षादनी बन्दाकः, वीरतरुः शरः, बृहत्यौ क्षुद्रफला स्थूलफला च, द्वे सहे मुद्गपर्णी माषपर्णी च । अरलुः श्योनाकभेदः तस्य त्वक्, अन्ये श्योनाकमरलुशब्देनाहुः; त्वक्शब्दोऽर्थवशात्तिन्दुकी चेत्यादिष्वपि संबन्धनीयः । तेजोवती काकमर्दनिका । दीप्यको यवानी, अन्ये अजमोदामाहुः । शृङ्गवेरं शुण्ठी, बिल्वशलाटु कोमलं बिल्वं, वात्सकं फलमिन्द्रयवाः । श्लोकार्धविहिता अर्धश्लोकैः कृता इत्यर्थः । धान्याम्लादीनां मध्यादन्यतमेन कलिङ्गकादिचूर्णं पिबेत् । एतेषां निःक्वाथान् साधु साधितान् मात्रया साधितान् पिबेदिति । एतद्वृद्धवैद्या नेच्छन्ति, बहुद्रव्यसाधिताम्बुसंस्कृताहारस्यारुचिकरत्वात् ॥ ३५—४६ ॥

पयस्युत्क्वाथ्य मुस्तानां विंशतिं त्रिगुणाम्भसि ।
क्षीरावशिष्टं तत्पीतं हन्त्यामं शूलमेव च ॥ ४७ ॥
निखिलेनोपदिष्टोऽयं विधिरामोपशान्तये ।
हरीतकीमतिविषां हिङ्गु सौवर्चलं वचाम् ॥ ४८ ॥
पिबेत् सुखाम्बुना जन्तुरामातीसारपीडितः ।
पटोलं दीप्यकं बिल्वं वचापिप्पलीनागरम् ॥ ४९ ॥
मुस्तं कुष्ठं विडङ्गं च पिबेद्वाऽपि सुखाम्बुना ।
शृङ्गवेरं गुडूचीं च पिबेदुष्णेन वारिणा ॥ ५० ॥
लवणान्यथ पिप्पल्यो विडङ्गानि हरीतकी ।
चित्रकं शिंशपा पाठा शार्ङ्गेष्टा लवणानि च ॥ ५१ ॥
हिङ्गुर्वृक्षकबीजानि लवणानि च भागशः ।
हस्तिदन्त्यथ पिप्पल्यः कल्कावक्षसमौ स्मृतौ ॥५२॥
वचा गुडूचीकाण्डानि योगोऽयं परमो मतः ।
एते सुखाम्बुना योगा देयाः पञ्च सतां मताः ॥५३॥
निवृत्तेष्वामशूलेषु यस्य न प्रगुणोऽनिलः ।
स्तोकं स्तोकं रुजामच्च सशूलं योऽतिसार्यते ॥ ५४॥
सक्षारलवणैर्युक्तं मन्दाग्निः स पिबेद्घृतम् ।
क्षीरनागरचाङ्गेरीकोलदध्यम्लसाधितम् ॥ ५५ ॥
सर्पिरच्छं पिबेद्वापि शूलातीसारशान्तये ।
दध्ना तैलघृतं पक्वं सव्योषाजातिचित्रकैः ॥ ५६ ॥
सबिल्वपिप्पलीमूलदाडिमैर्वा रुगन्वितैः ।
निखिलो विधिरुक्तोऽयं वातश्लेष्मोपशान्तये ॥५७॥
तीक्ष्णोष्णवर्ज्यमेनं तु विदध्यात्पित्तजे भिषक् ।
यथोक्तमुपवासान्ते यवागूश्च प्रशस्यते ॥ ५८ ॥
बलयोरंशुमत्यां च श्वदंष्ट्राबृहतीषु च ।
शतावर्यां च संसिद्धाः सुशीता मधुसंयुताः ॥५९॥

सशूलेऽतिसारे योगानाह—पयसीत्यादि ॥ ४७—५९ ॥

मुद्गादिषु च यूषाः स्युर्द्रव्यैरेतैः सुसंस्कृताः ।

यवागूविषये यूषमाह—मुद्गादिषु चेत्यादि । मुद्गादिष्वित्यादिशब्दान्मुद्गकलायमसूरादिवर्गग्रहणम् । द्रव्यैरेतैरिति बलादिभिः । क्वाथकल्पना अत्रापि पूर्ववत् ॥—

मृदुभिर्दीपनैस्तिक्तैर्द्रव्यैः स्यादामपाचनम् ॥ ६० ॥
हरिद्रातिविषापाठावत्सबीजरसाञ्जनम् ।
रसाञ्जनं हरिद्रे द्वे बीजानि कुटजस्य च ॥ ६१ ॥
पाठा गुडूची भूनिम्बस्तथैव कटुरोहिणी ।
एतैः श्लोकार्धनिर्दिष्टैः क्वाथाः स्युः पित्तपाचनाः ६२

पैत्तिके आमातीसारे परं पाचनमाह—मृदुभिर्दीपनैरित्यादि । एवंविशिष्टैस्तिक्तैर्दुरालभागुडूच्यतिविषाप्रभृतिभिरामपाचनं पित्तातीसारे बोद्धव्यम् । ननु, तिक्तानि शीतवीर्याणि कथमामातीसारे पाचनानि ? उच्यते, ज्वरातीसारादौ तिक्तान्यपि पाचनान्येवाभिमतानि; उक्तं च,—'खेदनं लङ्घनं कालो यवागवस्तिक्तको रसः । पाचनान्यविपक्वानां' इति । अन्ये तु तिक्तकानि अर्कागरुप्रभृतीन्युष्णवीर्याणि पाचनीयानि; नान्यानि, तेषां शीतवीर्यत्वात् । अतीसारे अर्कादीनामयौगिकत्वात्तान्येव तिक्तद्रव्याण्याह—हरिद्रातिविषापाठेत्यादि । हरिद्रादिभिः पित्तपाचनाः क्वाथाः श्लोकार्धनिर्दिष्टाः स्युरिति संबन्धः ॥ ६०—६२ ॥

मुस्तं कुटजबीजानि भूनिम्बं सरसाञ्जनम् ।
दार्वी दुरालभा बिल्वं बालकं रक्तचन्दनम् ॥ ६३ ॥
चन्दनं बालकं मुस्तं भूनिम्बं सदुरालभम् ।
मृणालं चन्दनं रोध्रं नागरं नीलमुत्पलम् ॥ ६४ ॥
पाठा मुस्तं हरिद्रे द्वे पिप्पली कौटजं फलम् ।
फलत्वचं वत्सकस्य शृङ्गवेरं घनं वचा[1] ॥ ६५ ॥
षडेतेऽभिहिता योगाः पित्तातीसारनाशनाः ।

अपरान् योगान् सिद्धतमान् सामपित्तपाचनार्थमाह—मुस्तमित्यादि । भूनिम्बं किरातं, सरसाञ्जनं रसाञ्जनसहितम् । दार्वी दारुहरिद्रा, बिल्वं बिल्वफलम् । मृणालं पद्मनालं, चन्दनं रक्तचन्दनं, रोध्रं शावरं, नागरं शुण्ठी । घनं मुस्तम् । अभिहिता योगाः 'श्लोकार्धेन' इति शेषः । पूर्वेभ्यो विंशतियोगेभ्यो हरिद्रातिविषेत्यादियोगास्तथा मुस्तं कुटजबीजानीत्यादयो योगाः सिद्धतमाः, अतः पृथक् पठिताः । वातकफोत्थयोरतीसारयोः पाचनेन वातकफपाकात् पित्तानुबन्धः स्यात् तस्तत्संशमनार्थं मुस्तं कुटजबीजानीत्यादयो योगा निर्दिष्टा इति केचिद्व्याख्यानयन्ति । अत एव पक्वातीसारचिकित्सित-

१ 'वचा बिडम्' इति पा० ।

प्रकरणात् प्राक् पित्तारब्धपक्वातीसारस्य चिकित्सा तैरभिहिता ॥ ६३-६५ ॥

बिल्वशक्रयवाम्भोदवालकातिविषाकृतः ।
कषायो हन्त्यतीसारं सामं पित्तसमुद्भवम् ॥ ६६ ॥

अतः परमपरं सिद्धतमं योगमाह—बिल्वेत्यादि । बिल्वं बिल्वफलं कोमलं, शक्रयवा इन्द्रयवाः, अम्भोदो मुस्ता, अतिविषाकृत इति कृतग्रहणं शीतकषायादिनिवृत्त्यर्थम् । अयं योगश्चिरप्रवृत्तेऽपि सामे सशोणिते दृश्यते ॥ ६६ ॥

मधुकोत्पलबिल्वाब्दह्रीवेरोशीरनागरैः ।
कृतः काथो मधुयुतः पित्तातीसारनाशनः ॥ ६७ ॥

मधुकोत्पलबिल्वाब्देत्यादि । मधुकं यष्टिमधु, उत्पलं नीलोत्पलम् । अब्दं मुस्तं, ह्रीवेरं वालकं; मधुकादिद्रव्यैः कृतः क्वाथः सुशीतो मधुयुतः पित्तातीसारनाशनो भवतीति संवन्धः ॥ ६७ ॥

यदा पक्वोऽप्यतीसारः सरत्येव मुहुर्मुहुः ।
ग्रहण्या मार्दवाज्जन्तोस्तत्र संस्तम्भनं हितम् ॥ ६८ ॥

पक्वातीसारस्य सरणे किं कार्यमित्याह—यदा पक्वोऽप्यतीसार इत्यादि । ग्रहण्या मार्दवादग्निस्तम्भात् । संस्तम्भनं संग्रहणम् ॥ ६८ ॥

समङ्गा धातकीपुष्पं मञ्जिष्ठा लोध्रमुस्तकम् ।
शाल्मलीवेष्टको रोध्रं वृक्षदाडिमयोस्त्वचौ ॥ ६९ ॥
आम्रास्थिमध्यं लोध्रं च बिल्वमध्यं प्रियङ्गवः ।
मधुकं शृङ्गवेरं च दीर्घवृन्तत्वगेव च ॥ ७० ॥
चत्वार एते योगाः स्युः पक्वातीसारनाशनाः ।
उक्ता य उपयोज्यास्ते सक्षौद्रास्तण्डुलाम्बुना ॥७१॥

तानेव स्तम्भनयोगानाह—समङ्गा धातकीपुष्पमित्यादि । समङ्गा लज्जालुका, अन्ये वराहक्रान्तामाहुः । शाल्मलीवेष्टकः शाल्मलीनिर्यासकः, अन्ये वेष्टकं वृन्तमाहुः; वृक्षः कुटजः । आम्रास्थिमध्यमाम्रफलमज्जा । शृङ्गवेरं शुण्ठी, दीर्घवृन्तत्वक् अरलुत्वक्, अन्ये श्योनाकत्वगित्याहुः । चत्वार एते योगाः श्लोकार्धोक्ताः । अन्ये तु–'समङ्गाधातकिपुष्पमञ्जिष्ठा-रोध्रमुस्तकम् । शाल्मलीवेष्टकं वाऽपि विदध्याद्योगमुत्तमम्' इत्येकेनैव शाल्मलीवेष्टकेनापरं पञ्चमं योगं मन्यन्ते; तत एव च 'एते हि पञ्चयोगाः स्युः पक्वातीसारनाशनाः' इति पठन्ति । सर्वेऽपि पक्वातीसारनाशनाः स्युः । अन्ये तु पित्तातीसारनाशना इति व्याख्यानयन्ति । कथमेते योगा उपयोज्या इत्याह—उक्ता इत्यादि । ये योगाः समङ्गादिका उक्तास्ते सक्षौद्रास्तण्डुलाम्बुना उपयोज्या इत्यर्थः ॥ ६९-७१ ॥

मौस्तं कषायमेकं वा पेयं मधुसमायुतम् ।
लोध्राम्बष्ठाप्रियङ्ग्वादीन् गणानेवं प्रयोजयेत् ॥७२॥

मौस्तं कषायमेकमित्यादि । कषायमेकं वेति कथमेतदुच्यते मधुपानीययोरपि विद्यमानत्वात्? नैवं, तयोः संस्कारत्वेनाप्रधानत्वात् । अयं योगः पक्वपित्तरक्तातीसारे विशेषेण बोद्धव्यः; सामान्ये पक्वातीसारे केचिन्मन्यन्ते, तथा चोक्तं 'पक्वातीसारिणे देयो मुस्ताक्वाथः समाक्षिकः' इति । रोध्राद्यम्बष्ठादिप्रियङ्ग्वादीन् गणानेवमिति क्वाथान् कृत्वा मधुप्रक्षेपेण सहोपयोजयेदित्यर्थः ॥ ७२ ॥

पद्मां समङ्गां मधुकं बिल्वजम्बूशलाटु च ।
पिबेत्तण्डुलतोयेन सक्षौद्रमगदङ्करम् ॥ ७३ ॥

पद्मां समङ्गामित्यादि । पद्मा भार्गी, समङ्गा लज्जालुका, बिल्वजम्बूशलाटु चेति बिल्वफलं कोमलं, जम्बूफलं च कोमलम् । अगदङ्करमत्रातीसारहरमित्यर्थः ॥ ७३ ॥

कच्छुरामूलकल्कं वाऽप्युदुम्बरफलोपमम् ।
पयस्या चन्दनं पद्मा सितामुस्ताब्जकेशरम् ॥ ७४ ॥
पक्वातिसारं योगोऽयं जयेत्पीतः सशोणितम् ।

कच्छुरामूलकल्कं वेत्यादि । कच्छुरा कङ्कतिका, तन्मूलकल्कमुदुम्बरफलोपमं कर्षप्रमाणं सक्षौद्रं तण्डुलाम्बुना पिबेदिति संबध्यते । पयस्या चन्दनमित्यादि । पयस्या अर्कपुष्पी, अन्ये दुग्धिकामाहुः, क्षीरकाकोलीमपरे; चन्दनं रक्तचन्दनं, पद्मा भार्गी, सिता शर्करा, अब्जकेशरं पद्मकेशरम् । सशोणितमिति पित्तातीसारमेव नतु रक्तातीसारं, तच्चिकित्साया वक्ष्यमाणत्वात् । 'पक्वातीसारं योगोऽयं' इत्यत्रान्ये 'पित्तातीसारं योगोऽयं' इति पठन्ति । पीत इति क्वथितकषायविधिनेइत्यर्थः ॥ ७४ ॥—

निरामरूपं शूलार्तं लङ्घनाद्यैश्च कर्षितम् ॥ ७५ ॥
नरं रूक्षमवेक्ष्याग्निं सक्षारं पाययेद्घृतम् ।

इदानीं घृतपानार्हमतीसारिणमाह—निरामरूपमित्यादि । पक्वातीसारप्रस्तावे निरामरूपमिति प्राप्तमतस्तदभिधानमतिशयेन निरामरूपप्रापणार्थम् । अवेक्ष्याग्निं 'दीप्तं' इति शेषः । सक्षारं यवाक्षरसहितं, स्वर्जिकाक्षारसहितमित्यन्ये । निरामरूपमित्याद्यारभ्य वातचिकित्सितं शूलस्यान्यथाऽसंभूतेरित्यन्ये वदन्ति ॥ ७५ ॥

बलाबृहत्यंशुमतीकच्छुरामूलसाधितम् ॥ ७६ ॥
मधूक्षितं समधुकं पिबेच्छूलैरभिद्रुतः ।

बलाबृहत्यंशुमतीत्यादि । 'घृतं' इत्यनुवर्तते । मधूक्षितमीषन्मात्रमधुयुक्तमित्यर्थः । समधुकं यष्टीमधुसहितं, वक्ष्यमाणयोगे यष्टीमधुकस्य प्रक्षेपदर्शनादत्रापि प्रक्षेपः । शूलैरभिद्रुतः शूलैरार्तः ॥ ७६ ॥—

दार्वीबिल्वकणाद्राक्षाकटुकेन्द्रयवैर्घृतम् ॥ ७७ ॥
साधितं हन्त्यतीसारं वातपित्तकफात्मकम् ।
दध्ना चाम्लेन संपक्कं सव्योषाजाजिचित्रकम् ॥७८॥
सचव्यपिप्पलीमूलं दाडिमैर्वा रुगर्दितः ।

१ 'प्राप्तात्' इति पा० ।

दार्वीबिल्वकणाद्राक्षेत्यादि । दार्वी दारुहरिद्रा, कणा पिप्पली । अतीसारं वातपित्तकफात्मकं व्यस्तैः समस्तैश्च दोषैरारब्धम् ॥ ७७ ॥ ७८ ॥—

पयो घृतं च मधु च पिबेच्छूलैरभिद्रुतः ॥ ७९ ॥
सिताजमोदकट्वङ्गमधुकैरवचूर्णितम् ।

पयो घृतमित्यादि । क्षीरघृतमधूनि समांशानि शर्कराजमोदारलुयष्टीमधुकैश्चूर्णितैरवचूर्ण्य शूलैरभिद्रुतः पिबेदिति संबन्धः ॥ ७९ ॥—

अवेदनं सुसंपक्कं दीप्ताग्नेः सुचिरोत्थितम् ॥ ८० ॥
नानावर्णमतीसारं पुटपाकैरुपाचरेत् ।

पुटपाकस्य विषयमाह—अवेदनं सुसंपक्कमित्यादि । नानावर्णमित्यनेन सान्निपातिकोऽतीसारः पुटपाकस्य विषय इति दर्शितम् ॥ ८० ॥—

त्वक्पिण्डं दीर्घवृन्तस्य पद्मकेसरसंयुतम् ॥ ८१ ॥
काश्मरीपद्मपत्रैश्चावेष्ट्य सूत्रेण संदृढम् ।
मृदाऽवलिप्तं सुकृतमङ्गारेष्ववकूलयेत् ॥ ८२ ॥
स्विन्नमुद्धृत्य निष्पीड्य रसमादाय तं ततः ।
शीतं मधुयुतं कृत्वा पाययेतोदरामये ॥ ८३ ॥
जीवन्तीमेषशृङ्ग्यादिष्वेवं द्रव्येषु साधयेत् ।

पुटपाकविधिमाह—त्वक्पिण्डमित्यादि । दीर्घवृन्तस्य अरलुकस्य । अवकूलयेत् पचेत् । उदरामयोऽत्रातीसारः । अरलुकस्य त्वचं पद्मकेसरं च समभागं गृहीत्वा संपिष्य तत्पिण्डं पद्मकाश्मरीपत्रपुटके निक्षिप्य सूत्रेणावेष्ट्य मृत्तिकया निर्धूमखदिराङ्गारेषु तावत् पचेद् यावद्बाह्ये रक्तवर्णता भवति, ततोऽङ्गारेभ्य आकृष्य तत्पिण्डं निष्पीड्य स्वरसं गृहीत्वा शीतीभूतं च कर्षप्रमितमधुसहितमतीसारे क्काथमात्रया पाययेत् । अनेन विधिना सर्वपुटपाककल्पना । ये च सुकृतमिति कुशवेष्टितमिति व्याख्यानयन्ति, तन्मते 'सूत्रेणावेष्ट्य' इति पाठो नास्ति । जीवन्तीमेषशृङ्ग्यादिष्वेवमित्यादि । जीवन्ती उत्तरापथे महाकन्दा कर्कोटिकासदृशपत्रा, लाटविषये तु मूलिनी महाप्रताना । आदिशब्दात् पाठाशटीप्रभृतीनां ग्रहणम् । एवमिति यथा अरलुत्वक्पुटपाकविधिरेवमत्रापीत्यर्थः । अन्ये त्वेवं पठन्ति—'जीवन्तीमेषशृङ्गेषु चैवं वृन्तेषु कारयेत्' इति ॥ ८१-८३ ॥—

तित्तिरिं लुञ्चितं सम्यक् निःकृष्टान्त्रं तु पूरयेत् ८४
न्यग्रोधादित्वचां कल्कैः पूर्ववच्चावकूलयेत् ।
रसमादाय तस्याथ सुस्विन्नस्य समाक्षिकम् ॥ ८५ ॥
शर्करोपहितं शीतं पाययेतोदरामये ।

तित्तिरिं लुञ्चितमित्यादि । तित्तिरिं कृष्णतित्तिरिं; निःकृष्टान्त्रमित्युपलक्षणं, तेन तुण्डपादवर्जितमिति च लभ्यते । पूर्ववच्चावकूलयेदिति कृष्णतित्तिरिं पादतुण्डान्त्रवर्जितं कृत्वा न्यग्रोधादिवल्कलकल्केन कोष्ठं पूरयित्वा काश्मरीपद्मपत्रपुटके निक्षिप्य कुशैरावेष्ट्य मृत्तिकया लिप्त्वा खदिराङ्गारेषु पचेत्; स्वरसप्रमाणं मधुशर्कराप्रक्षेपप्रमाणं पूर्ववदिति । श्रीब्रह्मदेवस्तु व्याख्यानयति—न्यग्रोधादीत्यादिशब्दात् पलाशनन्दीवृक्षादीनां ग्रहणं, कुतः? तेषां संग्राहकत्वात्; नतु सामस्त्येन न्यग्रोधादिगणस्य; कुतः? स्तम्भकत्वात्; तथाचोक्तं—'संग्राहि स्तम्भनाद्भिन्नं यथा तदभिदध्महे । आग्नेयगुणभूयिष्ठं तोयांशं परिशोषयेत् ॥ संगृह्णाति मलं तत्स्याद्ग्राहि शुण्ठ्यादयो यथा । समीरगुणभूयिष्ठं शीतत्वाद्यन्नभस्ततः ॥ विधाय वृद्धिं स्तम्भाति स्तम्भनं तद्यथा वटः" इति । अयं च वातपित्तातीसारे कर्तव्यः ॥ ८४ ॥ ८५ ॥—

लोध्रचन्दनयष्ट्याह्वदार्वीपाठासितोत्पलान् ॥ ८६ ॥
तण्डुलोदकसंपिष्टान् दीर्घवृन्तत्वगन्वितान् ।
पूर्ववत् कूलितात्तस्माद्रसमादाय शीतलम् ॥ ८७ ॥
मध्वाक्तं पाययेच्चैतत् कफपित्तोदरामये ।

लोध्रचन्दनयष्ट्याह्वेत्यादि । लोध्रादिनीलोत्पलान्तानरलुत्वक्सहितान् तण्डुलोदकसंपिष्टान् पूर्ववत्कूलितान् पुटपाकविधिना पक्कान्, अस्मात् पिष्टस्विन्नरोध्रादिकल्कात् रसं गृहीत्वा शीतं मधुयुतं पाययेदिति संबन्धः ॥ ८६ ॥ ८७ ॥—

एवं प्ररोहैः कुर्वीत वटादीनां विधानवत् ॥ ८८ ॥
पुटपाकान् यथायोगं जाङ्गलोपहितान् शुभान् ।

एवं प्ररोहैरित्यादि । एवं पूर्वोक्तप्रकारेण, वटादीनां प्ररोहैः शाखाधोभागनिःसृतजटाभिरित्यर्थः । आदिशब्दात् प्लक्षगर्दभाण्डादिप्ररोहाणां ग्रहणम् । विधानवत् यथायोगमवस्थापेक्षमित्यर्थः । जाङ्गलोपहितानिति अत्र जाङ्गलशब्देन लावककपिञ्जलादीनां ग्रहणं, लघुत्वात् । वटाद्यवरोहजाङ्गलमांसपुटपाककल्पना पूर्ववत् ॥ ८८ ॥—

बहुश्लेष्म सरक्तं च मन्दवातं चिरोत्थितम् ॥ ८९ ॥
कौटजं फाणितं वाऽपि हन्त्यतीसारमोजसा ।
अम्बष्ठादिमधुयुतं पिप्पल्यादिसमन्वितम् ॥ ९० ॥

बहुश्लेष्म सरक्तमित्यादि । फाणितमिव फाणितं, स्त्यानमध्वाकृति । ओजसा शक्त्या आत्मप्रभावेण । अत्र कल्पना—बृहत्फलशुक्लकुसुमस्निग्धपत्रस्य पुन्नामधेयस्य कुटजस्य वल्कं गृहीत्वा षोडशगुणे अष्टगुणे चतुर्गुणे वा जले क्काथयित्वा अर्धावशिष्टं क्काथमादाय वस्त्रगालितं कृत्वा पुनस्तावत् पचेत् यावत् पक्वफाणिताकृतिः स्यात्, ततस्तन्मध्येऽम्बष्ठादिमधुपिप्पल्यादिचूर्णं चतुर्थांशं निक्षिप्य अवतार्यमिति । अन्ये तु कुटजत्वक्स्वरसं गृहीत्वा तावत् क्काथयेद्यावत् फाणिताकृतिर्भवतीति व्याख्यानयन्ति ॥ ८९ ॥ ९० ॥

पृश्निपर्णीबलाबिल्वबालकोत्पलधान्यकैः ।
सनागरैः पिबेत् पेयां साधितामुदरामयी ॥ ९१ ॥

पृश्निपर्णीत्यादि । बिल्वं बिल्वफलं कोमलं, उत्पलं नीलोत्पलं, सनागरैः सशुण्ठीकैः । उदरामयी अतीसारी । पेयार्थं क्वाथकल्पना पूर्ववत् ॥ ९१ ॥

अरलुत्वक् प्रियङ्गुं च मधुकं दाडिमाङ्कुरान् ।
आवाप्य पिष्ट्वा दधनि यवागूं साधयेद्द्रवाम् ॥९२॥
एषा सर्वानतीसारान् हन्ति पक्वानसंशयम् ।

अरलुत्वगित्यादि । दाडिमाङ्कुरान् दाडिमकोमलपत्राणि । अरलुत्वगादीन् पिष्ट्वा दधनि निक्षिप्य यवागूं साधयेदित्यर्थः । अत्र पिष्ट्वेति यदुक्तं तदरलुत्वगादिक्वाथेन यवागूसाधननिषेधार्थम् । साधयेद्द्रवामिति यथा नातिसान्द्रा भवतीत्यर्थः । एषा यवागूः । पक्वातिसारप्रस्तावात् पक्वाभिधानस्य प्राप्तस्य पुनर्ग्रहणेन एषा यवागूः पक्वातीसारे अतिशयेन हितेति ज्ञापयति ॥ ९२ ॥—

रसाञ्जनं सातिविषं त्वग्बीजं कौटजं तथा ॥ ९३ ॥
धातकी नागरं चैव पाययेत्तण्डुलाम्बुना ।
सशूलं रक्तजं घ्नन्ति एते मधुसमायुताः ॥ ९४ ॥

रसाञ्जनमित्यादि । एते योगाः । सशूलं रक्तजं 'अतीसारं' इति शेषः । अन्ये तु 'हन्ति योगोऽयं मधुसंयुतः' इति पठित्वा एक एव योगोऽयमिति मन्यन्ते ॥ ९३ ॥ ९४ ॥

मधुकं बिल्वपेशी च शर्करामधुसंयुता ।
अतीसारं निहन्युश्च शालिषष्टिकयोः कणाः ॥ ९५ ॥
तद्वल्लीढं मधुयुतं बदरीमूलमेव तु ।

मधुकमित्यादि । शालिषष्टिकयोः कणा इति अत्रापि शर्करामधुसंयुता इति संबन्धनीयम् । अयमपरो योगो मधुकं बिल्वपेशी चेत्यादियोगस्याग्रे कैश्चित् पठ्यते । तद्यथा—'योगान् सांग्राहिकांश्चान्यान् पिबेत् सक्षौद्रशर्करान् । न्यग्रोधादिषु कुर्याच्च पुटपाकान् यथेरितान्'—इति ॥ ९५ ॥—

बदर्यर्जुनजम्ब्वाम्रशल्लकीवेतसत्वचः ॥ ९६ ॥
शर्कराक्षौद्रसंयुक्ताः पीता घ्नन्त्युदरामयम् ।

बदर्यर्जुनेत्यादि । अर्जुनः ककुभः; बदर्यादीनां त्वचः शर्कराक्षौद्रयुताः पीता उदरामयमतीसारं घ्नन्तीत्यर्थः ॥९६॥—

एतैरेव यवागूंश्च षडान् यूषांश्च कारयेत् ॥ ९७ ॥
पानीयानि च तृष्णासु द्रव्येष्वेतेषु बुद्धिमान् ।

एतैरेव यवागूंश्चेत्यादि । एतैरेव बदर्यादिभिः । षडा दाडिमगोरसादिना घनपल्लवफलादिभिः कृताः । 'रसाञ्जनं सातिविषं' इत्यादिकं 'द्रव्येष्वेतेषु बुद्धिमान्' इत्यन्तं रक्तातीसारचिकित्सितं कार्तिकाचार्यो न पठति, रक्तातीसारस्यानङ्गीकृतत्वात्; पित्तातीसारावस्थायां च यो रक्तातीसारस्तस्य चिकित्सा 'पित्तातिसारी यो मर्त्य' इत्यादिना वक्ष्यमाणाऽस्ति; श्रीजेज्जटाचार्येणैष पाठो विमृश्यैव सर्वोऽपि पठितस्तन्मतानुसारिणा श्रीब्रह्मदेवेनापि ॥ ९७ ॥—

कृतं शाल्मलिवृन्तेषु कषायं हिमसंज्ञितम् ॥ ९८ ॥
निशापर्युषितं पेयं सक्षौद्रं मधुकान्वितम् ।

कृतं शाल्मलिवृन्तेषु कषायमित्यादि । कषायं हिमसंज्ञितमिति शीतकषायमित्यर्थः; न तु क्वथितं, हिमशब्दोपादानात् । शीतकषायविधिमाह—द्रव्यचूर्णमुपादाय अहोरात्रं तुल्ये जले स्थापयेत्, ततो मृदितं वस्त्रपूतं पलचतुष्टयप्रमाणं मधु यष्टीमधु च कर्षप्रमाणं प्रक्षिप्य पेयमित्यर्थः ॥ ९८ ॥—

विबद्धवातविट् शूलपरीतः सप्रवाहिकः ॥ ९९ ॥
सरक्तपित्तश्च पयः पिबेत्तृष्णासमन्वितः ।
यथाऽमृतं तथा क्षीरमतीसारेषु पूजितम् ॥ १०० ॥
चिरोत्थितेषु तत् पेयमपांभागैस्त्रिभिः शृतम् ।
दोषशेषं हरेत्तद्धि तस्मात्पथ्यतमं स्मृतम् ॥ १०१ ॥
हितः स्नेहविरेको वा बस्तयः पिच्छिलाश्च ये ।
पिच्छिलस्वरसे सिद्धं हितं च घृतमुच्यते ॥ १०२ ॥

चूर्णादीनभिधाय क्षीरपानस्य विषयमाह—विबद्धवातविट् शूलपरीत इत्यादि । विबद्धः अवरुद्धो वातो विट् च यस्य सः, तथा शूलपरीतः, तथा प्रवाहिकायुक्तः, तथा रक्तपित्तान्वित इति विषयचतुष्टयमस्य क्षीरस्य । पयः पिबेदित्युक्तं तत् कीदृशं पेयमित्याह—अपां भागैरित्यादि; अपां भागैरित्युपादानात् केवलजलेन क्षीरसाधनमत्रोक्तम् । दोषशेषहारित्वं क्षीरस्य प्रभावात् । तत् क्षीरम् । हि यस्मादर्थे । स्नेहविरेकोऽत्र विरेचनीयद्रव्यसंस्कृतेन स्नेहेन स्वभावेन विरेचनस्नेहेन वा । बस्तयः पिच्छिलाश्च ये बस्तयो बस्तिविकारोक्तवक्ष्यमाणाश्च । पिच्छिला अरलुशाल्मलीप्रभृतयः, तेषां स्वरसे सिद्धं घृतं बस्तौ हितमित्यर्थः ॥ ९९-१०२ ॥

शकृता यस्तु संसृष्टमतिसार्येत शोणितम् ।
प्राक् पश्चाद्वा पुरीषस्य सरुक् सपरिकर्तिकः ॥१०३॥
क्षीरिशुङ्गाशृतं सर्पिः पिबेत् सक्षौद्रशर्करम् ।

अवस्थावशेन चिकित्सितमाह—शकृतेत्यादि । शकृता पुरीषेण संसृष्टं, सरुक् सशूलं, सपरिकर्तिकः बस्तिगुदमेढ्रेषु परिकृन्तनमिव वातवेदना परिकर्तिका तत्सहित इत्यर्थः । क्षीरिशुङ्गा वटाश्वत्थादीनां नूतनपत्राङ्कुराः । घृतपाकप्रमाणं स्नेहाध्यायोक्तं, क्षौद्रशर्कराप्रक्षेपः प्रत्येकं कर्षप्रमाणः॥१०३॥—

दार्वीत्वक्पिप्पलीशुण्ठीलाक्षाशाक्रयवैर्घृतम् ॥१०४॥
संयुक्तं भद्ररोहिण्या पक्वं पेयादिमिश्रितम् ।
त्रिदोषमप्यतीसारं पीतं हन्ति सुदारुणम् ॥ १०५ ॥

तस्यामेवावस्थायामपरमपि घृतमाह—दार्वीत्वगित्यादि । दार्वीत्वक् दारुहरिद्रात्वक् । अन्ये दार्वी दारुहरिद्रा, त्वक् त्वचमाहुः । भद्ररोहिणी कटुका । दार्वीत्वगादिभिर्भद्ररोहिणीपर्यन्तैः स्नेहचतुर्थांशैरुदकचतुर्गुणं घृतं पक्वं पेयायवागूप्रभृतिभिर्युक्तं पीतं त्रिदोषमप्यतीसारं हन्तीति संबन्धः ॥ १०४ ॥ १०५ ॥

गौरवे वमनं पथ्यं यस्य स्यात् प्रबलः कफः ।
ज्वरे दाहे सविड्बन्धे मारुताद्रक्तपित्तवत् ॥१०६॥

प्रागामावस्थायां वमनमभिधायेदानीं पक्वावस्थायामपि वमनमाह—गौरवे वमनमित्यादि । गौरवे जठरगौरवे, रक्तपित्तवदिति यथा रक्तपित्तेऽधोगते वमनं तथा अतीसारेऽपि गौरवादियुक्ते यस्य पुरुषस्य प्रबलः कफो भवेत्, मारुतात् विड्बन्धे च सति वमनं पथ्यमिति संबन्धः । ननु वमनं कथमतीसारघ्नम् ? उच्यते-द्रवश्लेष्मणः क्षयाद्विपरीतमार्गचिकित्साप्रभावाद्वा ॥ १०६ ॥

संपक्वे बहुदोषे च विबन्धे मूत्रशोधनैः ।
कार्यमास्थापनं क्षिप्रं तथा चैवानुवासनम् ॥१०७॥

आस्थापनानुवासनविषयमाह—संपक्वेत्यादि । संपक्वे 'अतीसारे' इति शेषः । विबन्धेऽधोवातादीनामप्रवृत्तौ । मूत्रशोधनैस्तृणपञ्चमूलीपाषाणभेदगोक्षुरप्रभृतिभिः । आस्थापनं निरूहः ॥ १०७ ॥

प्रवाहणे गुदभ्रंशे मूत्राघाते कटिग्रहे ।
मधुराम्लैः शृतं तैलं सर्पिर्वाऽप्यनुवासनम् ॥१०८॥

अनुवासनस्यापरं विषयमाह—प्रवाहणे इत्यादि । गुदभ्रंशे गुदनिःसरणे, मधुरैः काकोल्यादिभिः, अम्लैर्बीजपूरककपित्थचुक्रिकावृक्षाम्लकाञ्जिकादिभिः ॥ १०८ ॥

गुदपाकस्तु पित्तेन यस्य स्यादहिताशिनः ।
तस्य पित्तहराः सेकास्तत्सिद्धाश्चानुवासनाः ॥१०९॥

गुदपाक इत्यादि । यस्यातीसारिणः, अहिताशिनः अपथ्यभोजिनः । तत्र गुदपाके पित्तहराः सेकाः क्षीरेक्षुरसशर्करोदकमधुरौषधकषायैः कृताः, तत्सिद्धाः पित्तहरैः सिद्धा अनुवासनाः स्नेहाः । यद्यपि गुदपाकः पित्तेनैव स्यात्तथाऽपि 'गुदे पक्वे गतोष्माणमतीसारकिणं त्यजेत्' इति यो गुदपाकोऽभिहितस्तत्परिहारार्थमहिताशित्वेन प्रकुपितपित्तजनितगुदपाकचिकित्सार्थं च 'गुदपाकस्तु पित्तेन' इत्युक्तम् ॥ १०९ ॥

दधिमण्डसुराबिल्वसिद्धं तैलं समारुते ।
भोजने च हितं क्षीरं कच्छुरामूलसाधितम् ॥११०॥

तैलानुवासनविषयमाह—दधीत्यादि । दधिमण्डो दधिमस्तु । दधिमण्डादिभिः सिद्धं तैलमनुवासने देयमित्यर्थः । समारुते 'अतीसारे' इति शेषः । कच्छुरा कङ्कतिका, 'शूकशिम्बा' इत्येके, 'दुरालभा' इत्यन्ये ॥ ११० ॥

अल्पाल्पं बहुशो रक्तं सरुग्य उपवेश्यते ।
यदा वायुर्विबद्धश्च पिच्छाबस्तिस्तदा हितः ॥१११॥

पिच्छाबस्तेर्विषयमाह—अल्पाल्पमित्यादि । बहुशो बहून् वारान्, सरुक् सवेदनं, य उपवेश्यते अतिसार्यते, तस्य तदा पिच्छाबस्तिर्हित इति संबन्धः । पिच्छाबस्तिः पिच्छिलद्रव्यैः कृतः; स च बदर्यैरावतीशेलुशाल्मलीत्यादिना निरूहक्रमोक्तः; जेज्जटाचार्यस्तु 'अत्रैवाध्याये वक्ष्यमाणानां कपित्थशाल्मलीफञ्जीत्यादिद्रव्याणां कल्कपिण्डं पुटपाकविधिना संस्वेद्य निष्पीड्य रसमानीय तेन रसेन सक्षीरेण पिच्छाबस्तिर्देयः, अथवा कपित्थादिद्रव्यकल्कं क्षीरेणालोड्य पिच्छाबस्तिर्देयः' इति मन्यते ॥ १११ ॥

प्रायेण गुददौर्बल्यं दीर्घकालातिसारिणाम् ।
भवेत्तस्माद्धितं तेषां गुदे तैलावचारणम् ॥ ११२ ॥

दीर्घकालातिसारिणां गुददौर्बल्ये चिकित्सितमाह—प्रायेण गुददौर्बल्यमित्यादि । तैलावचारणं पिचुसेकानुवासनैः; सदाहे गुददौर्बल्ये पुनर्घृतमवचारणीयम् ॥ ११२ ॥

कपित्थशाल्मलीफञ्जीवटकार्पाससदाडिमाः ।
यूथिका कच्छुरा शेलुः शणश्चूचूश्च दाधिकाः ॥११३॥

अतीसारशूले चिकित्सितमाह—कपित्थशाल्मलीत्यादि । फञ्जी पाठाभेदः, अन्ये भार्गीमाहुः । कच्छुरा कङ्कतिका, अन्ये दुरालभामाहुः । शेलुः श्लेष्मातकः । दाधिका दध्ना संस्कृताः । हितशब्दोऽत्र वक्ष्यमाणः संबध्यते, स चार्थाद्बहुवचनान्तो द्रष्टव्यः । कपित्थादयश्चूचूपर्यन्ता दध्ना संस्कृता हिता इत्यर्थः ॥ ११३ ॥

शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ।
बलाश्वदंष्ट्राबिल्वानि पाठानागरधान्यकम् ॥ ११४ ॥
एष आहारसंयोगे हितः सर्वातिसारिणाम् ।

पेयाद्युपयोगद्रव्याण्याह—शालपर्णीत्यादि । एष शालपर्ण्यादिः । आहारसंयोगे पेयादिसंस्कारे; संस्कारश्च शालपर्ण्यादिद्रव्यपलचतुष्टयं जलाढके साधयित्वा अर्धशृतेन तेन पेयादि साधनीयं; वृद्धवैद्यास्तु बहुद्रव्यसाधिताम्बुसंस्कृताहारस्यारुचिकरत्वादाढकेऽम्भसि पलमात्रं द्रव्यं साधयन्ति । भक्तादिसाधने द्रवप्रमाणं तन्त्रान्तराज्ज्ञेयं; तथाहि—"भक्तं पञ्चगुणे तोये यवागूं षड्गुणे पचेत् । चतुर्दशगुणे पेयां विलेपीं च चतुर्गुणे"—इति । एष शालपर्ण्यादिर्दशाङ्गत्वेन प्रसिद्धः ॥ ११४ ॥—

तिलकल्को हितश्चात्र मौद्गो मुद्गरसस्तथा ॥ ११५ ॥

तिलकल्क इत्यादि । मौद्गो मुद्गस्य कल्कः ॥ ११५ ॥

पित्तातिसारी यो मर्त्यः पित्तलान्यतिषेवते ।
पित्तं प्रदुष्टं तस्याशु रक्तातीसारमावहेत् ॥ ११६ ॥
ज्वरं शूलं तृषां दाहं गुदपाकं च दारुणम् ।

इदानीं पित्तातीसारस्यैवावस्थाविशेषं रक्तातीसारमाह—पित्तातिसारी यो मर्त्य इत्यादि । पित्तलान्येवेति अन्नपानादीनि । दारुणं कष्टसाध्यम् ॥ ११६ ॥—

यो रक्तं शकृतः पूर्वं पश्चाद्वा प्रतिसार्यते ॥ ११७ ॥
स पल्लवैर्वटादीनां ससर्पिः साधितं पयः ।
पिबेत् सशर्कराक्षौद्रमथवाऽप्यभिमथ्य तत् ॥११८
नवनीतमथो लिह्यात्तक्रं चानुपिबेत्ततः ।

पित्तातीसारस्यैवावस्थान्तरमभिधाय चिकित्सितमाह—यो रक्तमित्यादि । सः पित्तातीसारयुक्तः पुरुषः । वटादीनां न्यग्रोधादीनां; अत्र न्यग्रोधादिपल्लवानां पलार्धं, क्षीरपलचतुष्टयं, चतुर्गुणं जलं च दत्त्वा साधयित्वा क्षीरा-

१ 'तथैवाप्यनुवासनम्' इति पा० । २ 'प्रवाहेण' इति पा० ।

वशेषं ग्राह्यं, तच्च घृतकर्पैकयुतं मध्याम्भिः पिबेत् । अभिमथ्य विलोड्य । तत्क्षीरं तदुत्पन्नं नवनीतं च शर्करामधुयुतं लिह्यादित्यर्थः । अन्ये तु वटादिपल्लवशृतं क्षीरं मधुघृतशर्करादियुक्तं पिबेदिति मन्यन्ते; तत एव च नवनीतं केवलं लिह्यात्, ततस्तक्रं पिबेदिति वदन्ति ॥ ११७ ॥ ११८ ॥—

प्रियालशाल्मलीप्लक्षशल्लकीतिनिशत्वचः ॥ ११९ ॥
क्षीरे विमृदिताः पीताः सक्षौद्रा रक्तनाशनाः ।

प्रियालशाल्मलीप्लक्षेत्यादि । प्रियालादीनां त्वचः पृथक् पृथक् पेयाः सामस्त्येन वा । प्रियालश्चारः, प्लक्षः पर्कटी, तिनिशः स्यन्दनः । क्षीरे अजाक्षीरे, तन्त्रान्तरोक्तत्वात् । विमृदिता आलोडिताः । सक्षौद्रा मधुसहिताः ॥ ११९ ॥—

मधुकं शर्करां लोध्रं पयस्यामथ सारिवाम् ॥१२०॥
पिबेच्छागेन पयसा सक्षौद्रं रक्तनाशनम् ।

मधुकं शर्करां लोध्रमित्यादि । पयस्या अर्कपुष्पी ॥१२०॥—

मञ्जिष्ठां सारिवां लोध्रं पद्मकं कुमुदोत्पलम् ॥१२१॥
पिबेत् पद्मां च दुग्धेन छागेनासृक्प्रशान्तये ।

मञ्जिष्ठां सारिवामित्यादि । पद्मकं प्रसिद्धं, कुमुदं श्वेतं, उत्पलं नीलं, पद्मा भार्गी । मञ्जिष्ठादीनि कल्कीकृतानि चूर्णितानि वा छागदुग्धेन पिबेदित्यर्थः ॥ १२१ ॥—

शर्करोत्पललोध्राणि समङ्गा मधुकं तिलाः ॥१२२॥
तिलाः कृष्णाः सयष्ट्याह्वाः समङ्गा चोत्पलानि च ।
तिला मोचरसो लोध्रं तथैव मधुकोत्पलम् ॥१२३॥
कच्छुरा तिलकल्कश्च योगाश्चत्वार एव च ।
आजेन पयसा पेयाः सरक्ते मधुसंयुताः ॥ १२४ ॥

शर्करोत्पललोध्राणीत्यादि । समङ्गा वराहक्रान्ता । तिलाः कृष्णाः कृष्णतिलाः, सयष्ट्याह्वा यष्टीमधुसहिताः । मोचरसः शाल्मलीनिर्यासः । कच्छुरा कङ्कतिका । सरक्ते पुरीषे 'स्रवति' इति शेषः । शर्करेत्यादिचत्वारो योगाः श्लोकार्धिका मधुसहिताः सरक्ते पुरीषे छागदुग्धेन पेया इत्यर्थः ॥१२२-१२४॥

द्रवे सरक्ते स्रवति बालबिल्वं सफाणितम् ।
सक्षौद्रतैलं प्रागेव लिह्यादाशु हितं हि तत् ॥१२५॥

सरक्ते अद्रवे च पुरीषे सरति चिकित्सितमभिधाय सरक्तद्रवातीसारिणश्चिकित्सितमाह—द्रवे सरक्ते इत्यादि । द्रवे द्रवमले, 'उदकधातौ' इत्यन्ये । फाणितं काकवी, सक्षौद्रतैलं मधुतैलसहितं, प्रागेवेति भोजनात् पूर्वं हितम् । 'आशु हितम्' इत्यत्र 'हितकरम्' इत्यन्ये पठन्ति ॥ १२५ ॥

कोशकारं घृते भृष्टं लाजचूर्णं सिता मधु ।
सशूलं रक्तपित्तोत्थं लीढं हन्त्युदरामयम् ॥ १२६ ॥

कोशकारमित्यादि । कोशकार ईक्षुभेदः । अत्र विधिः—निस्त्वचं कोशकारस्य सूक्ष्मखण्डं घृते भृष्ट्वा पेषयित्वा लाजशर्कराचूर्णमिश्रं मधुना लिहन् रक्तपित्तोत्थं सशूलमुदरामयमतीसारं हन्तीत्यर्थः ॥ १२६ ॥

१ 'द्रवति' इति पा० । २ 'इच्छुभभेदः' इति पा० । 'कोशकारो नाम कौशेयवस्त्रोपादानभूततन्तूत्पादकः कीटविशेषः' इति हाराणचन्द्रः ।

बिल्वमध्यं समधुकं शर्कराक्षौद्रसंयुतम् ।
तण्डुलाम्बुयुतो योगः पित्तरक्तोत्थितं जयेत् ॥१२७॥

बिल्वमध्यमित्यादि । अवस्थावशेन पित्ताद्रक्ताद्वा उत्थितं, ननु रक्तपित्ताभ्यामेवोत्थितं, एवं सत्यतीसाराणां सप्तत्वं स्यात् ॥ १२७ ॥

योगान् सांग्राहिकांश्चान्यान् पिबेत्सक्षौद्रशर्करान् ।
न्यग्रोधादिषु कुर्याच्च पुटपाकान् यथेरितान् ॥१२८॥

अत्र सांग्राहिकानिति सामान्योक्तावपि पित्तातिसारोक्तानिति प्रत्येतव्यम्, औपयिकत्वात् । ननु न्यग्रोधादिषु पुटपाका दर्शिताः, तत्कथं पुनरभिधीयन्ते ? उच्यते—न्यग्रोधादिषु कुर्याच्चेति यथेरितान् पुटकान् कुर्यादिति योजनात् ॥ १२८ ॥

गुदपाके च ये उक्तास्तेऽत्रापि विधयः स्मृताः ।

गुदपाके चेत्यादि । ये उक्ताः सेकादयस्ते पित्तरक्तोत्थितेऽतीसारे हिताः ॥—

रुजायां चाप्रशाम्यन्त्यां पिच्छाबस्तिर्हितो भवेत् ॥

अवस्थावशेन पुनः पिच्छाबस्तिमाह—रुजायामित्यादि ॥ १२९ ॥

सक्तविड् दोषबहुलं दीप्ताग्निर्योऽतिसार्यते ।
विडङ्गत्रिफलाकृष्णाकषायैस्तं विरेचयेत् ॥ १३० ॥
अथवैरण्डसिद्धेन पयसा केवलेन वा ।
यवागूर्वितरेच्चास्य वातघ्नैर्दीपनैः कृताः ॥ १३१ ॥

इदानीमवस्थापेक्षमतीसारे विरेचनमाह—सक्तविडित्यादि । सक्तविट् विबद्धपुरीषः । दोषबहुलमिति दोषशब्दोऽत्र पुरीषवचनः, तेन पुरीषबहुलमित्यर्थः । तमतीसारिणं विडङ्गादिकषायैर्विरेचयेदित्यर्थः । अथवेत्यादि । एरण्डमूलसिद्धेन केवलेन क्षीरेण विरेचयेदिति संबन्धः । विरेचितस्य किं कार्यमित्याह—यवागूरित्यादि । वातघ्नैर्दीपनैरिति शालिपर्ण्यादिभिः । ननु, स्तोकं स्तोकं विबद्धमित्यादावसम्यक्प्रवर्तमाने पुरीषे विरेचनमुक्तम्, अत्रातिप्रवर्तमाने कथं विरेकः ? उच्यते—अत्रातीसारातिप्रवर्तकस्य प्रकुपितपित्तस्य विरेचनेन निराकरणाददोषः ॥ १३० ॥ १३१ ॥

दीप्ताग्निर्निष्पुरीषो यः सार्यते फेनिलं शकृत् ।
स पिबेत् फाणितं शुण्ठीदधितैलपयोघृतम् ॥१३२॥

अतोऽतीसारस्यैवावस्थान्तरान्वितस्य निःसारकसंज्ञकस्य लक्षणं चिकित्सितं चाह—दीप्ताग्निर्निष्पुरीषो य इत्यादि । निष्पुरीषः क्षीणवर्चाः, फेनिलं शकृत् फेनवत् पुरीषमित्यर्थः । फाणितं काकवी, तैलं तिलतैलं, पयो दुग्धं, फाणितमित्यादिकं घृतान्तमेकीकृत्य पिबेदित्यर्थः ॥ १३२ ॥

खिन्नानि गुडतैलाभ्यां भक्षयेद्बदराणि च ।

अत्रैव द्वितीयं योगमाह—खिन्नानीत्यादि ॥—

खिन्नानि पिष्टवद्वाऽपि समं बिल्वशलाटुभिः १३३

तृतीययोगमाह—खिन्नानीत्यादि । खिन्नानि 'बदराणि'

१ 'निश्चारकसंज्ञिकस्य' इति पा० ।

इति शेषः । पिष्टवदिति पिष्टस्वेदनविधिनेत्यर्थः । समं बिल्वशलाटुभिः बालबिल्वफलैः सहेत्यर्थः । एतेन बिल्वशलाटुभिः सह बदराणि पिष्टस्वेदनविधिना स्विन्नानि शीतीभूतानि गुडतैलाभ्यामश्नीयादित्यर्थः । अन्ये त्वन्यथा पठन्ति—'सुस्विन्नान् पिष्टवद्वाऽपि माषान् बिल्वशलाटुभिः' इति । माषानिति क्षीणपुरीषस्य पुरीषजननार्थं माषोपदेशः ॥ १३३ ॥

दध्नोपयुज्य कुल्माषान् श्वेतामनुपिबेत् सुराम् ।

चतुर्थं योगमाह—दध्नोपयुज्येत्यादि । कुल्माषान् आस्तरस्विन्नान् यवपिष्टमयान् । श्वेतां सुरां पैष्टीम् । कुल्माषान् दध्ना सहोपयुज्य पैष्टीं सुरां पिबेदित्यर्थः ॥—

शशमांसं सरुधिरं समङ्गां सघृतं दधि ॥ १३४ ॥
खादेद्विपाच्य सेवेत मृद्वन्नं शकृतः क्षये ।

पञ्चमं योगमाह—शशमांसमित्यादि । समङ्गा लज्जालुका, दधिसंयुतं कल्कं [1]शशरुधिरेणैव प्राश्नीयान्मलसंक्षये इति । अन्ये 'समङ्गां' इत्यत्र 'समांशं' इति पठन्ति, व्याख्यानयन्ति च—शशमांसरुधिरेण समांशं तुल्यं कृत्वा सघृतं सदधि विपाच्य खादेदित्यर्थः । सेवेत मृद्वन्नमिति मृद्वन्नमत्र पुरीषजनकं माषादिकं संस्कृतम् । शकृतः क्षये पुरीषक्षये ॥१३४॥—

संस्कृतो यमके माषयवकोलरसः शुभः ॥ १३५ ॥
भोजनार्थं प्रदातव्यो दधिदाडिमसाधितः ।

वर्चःक्षये यूषप्रयोगमाह—संस्कृत इत्यादि । यमके घृततैले, रसोऽत्र क्वाथः; माषादियूषो घृततैलसंस्कृतो दधिदाडिमाभ्यां सह साधितश्च क्षीणपुरीषस्य भोजनार्थं प्रदातव्य इत्यर्थः ॥ १३५ ॥—

विडं बिल्वशलाटूनि नागरं चाम्लपेषितम् ॥१३६॥
दध्नः सरश्च यमके भृष्टो वर्चःक्षये हितः ।

क्षीणवर्चसः अपरं योगमाह—विडमित्यादि । विडं लवणभेदः, दध्नः सरो दध्न उपरितनो भागः । यमके घृततैले ॥ १३६ ॥—

सशूलं क्षीणवर्चा यो दीप्ताग्निरतिसार्यते [2]।
स पिबेद्दीपनैर्युक्तं सर्पिः संग्राहकैः सह ॥ १३७ ॥

विशिष्टावस्थाहितमष्टमयोगमाह—सशूलमित्यादि । दीपनैश्चित्रकादिभिः, संग्राहकैर्धातकीबिल्वशलाटुप्रभृतिभिः । यः क्षीणपुरीषो दीप्ताग्निरतिसार्यते स चित्रकादिधातक्यादिद्रव्यचूर्णयुक्तमपक्वमेव सर्पिः पिबेदित्यर्थः ॥ १३७ ॥

वायुः प्रवृद्धो निचितं बलासं
नुदत्यधस्तादहिताशनस्य ।
प्रवाहमाणस्य मुहुर्मलाक्तं
प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः ॥ १३८ ॥

इदानीं प्रवाहिकासंज्ञमतीसारभेदमाह—वायुरित्यादि । निचितं संचयप्राप्तं, बलासं श्लेष्माणं, नुदति प्रेरयति, अधस्ताद् गुदमार्गे, प्रवाहमाणस्य प्रेर्यमाणस्य, मुहुर्वारंवारं, मलाक्तमिषत्पुरीषमिश्रं, 'श्लेष्माणं' इति शेषः; एतेनैतदुक्तं भवति—यत्र रोगे वातप्रेरितं कफं पुरुषः प्रेरयति, तां प्रवाहिकां कफं प्रवाहमाणस्य प्रेर्यमाणस्य तज्ज्ञाः प्रवदन्तीति संबन्धः । बलासमित्युपलक्षणं, तेन पित्तं रक्तं वा निचितमिति ज्ञेयम् ॥ १३८ ॥

प्रवाहिका वातकृता सशूला
पित्तात् सदाहा सकफा कफाच्च ।
सशोणिता शोणितसंभवा तु
ताः स्नेहरूक्षप्रभवा मतास्तु ॥ १३९ ॥
तासामतीसारवदादिशेच्च
लिङ्गं क्रमं चामविपक्वतां च ।

वातादिभेदेन प्रवाहिकामाह—प्रवाहिका वातकृतेत्यादि । स्नेहरूक्षप्रभवा इति स्नेहरूक्षाभ्यां प्रभवो यासां तास्तथा; एतच्च प्रायिकम् । ताः प्रवाहिकाः । तासामित्यादि । तासां प्रवाहिकाणां, यद्यपि वातादिभेदेन प्रागेव प्रवाहिकाणां लक्षणमुक्तं तथाऽप्यतीसारवदादिशेच्च लिङ्गमित्यभिधानमधिकलिङ्गज्ञापनार्थम् । क्रमं क्रियाक्रमम् । आमविपक्वतामामतां विपक्वतां चेत्यर्थः ॥ १३९ ॥—

न शान्तिमायाति विलङ्घनैर्या
योगैरुदीर्णा यदि पाचनैर्वा ॥ १४० ॥
तां क्षीरमेवाशु श्रृतं निहन्ति
तैलं तिलाः पिच्छिलवस्तयश्च ।

लङ्घनाद्युपक्रमैर्या प्रवाहिका न प्रशाम्यति तां कथं चिकित्सेदित्याह—न शान्तिमित्यादि । उदीर्णा उत्कटा या प्रवाहिका लङ्घनैः पाचनयोगैर्वा शान्तिं न याति तां क्षीरादिकं हन्तीति संबन्धः ॥ १४० ॥—

आर्द्रैः कुशैः संपरिवेष्टितानि
वृन्तान्यथार्द्राणि हि शाल्मलीनाम् ॥१४१॥
पक्वानि सम्यक् पुटपाकयोगे-
नापोथ्य तेभ्यो रसमाददीत ।
क्षीरं श्रृतं तैलहविर्विमिश्रं
कल्केन यष्टीमधुकस्य वाऽपि ॥ १४२ ॥
बस्तिं विदध्याद्भिषगप्रमत्तः
प्रवाहिकामूत्रपुरीषसङ्गे ।

पिच्छाबस्तिमाह—आर्द्रैः कुशैरित्यादि । बस्तिं पिच्छाबस्तिम्; अस्य प्रमाणं निरूहोक्तविधिनोक्तं ज्ञातव्यम् । अप्रमत्तः सावधानः ॥ १४१ ॥ १४२ ॥—

द्विपञ्चमूलीकथितेन शूले
प्रवाहमाणस्य समाक्षिकेण ॥ १४३ ॥
क्षीरेण चास्थापनमग्र्यमुक्तं

१ 'तद्रुधिरेणैव' इति पा० । २ 'दीप्ताग्निस्तूर्णमतिसार्यते' इति पा० ।

अवस्थाविशेषे आस्थापनोपदेशमाह—द्विपञ्चमूलीत्यादि । द्विपञ्चमूलीक्कथितेन दशमूलीक्कथितेन । आस्थापनं निरूहः । अग्र्यं श्रेष्ठम् । क्षीरपाककल्पेन दशमूलीसाधितेन क्षीरेण मधुसहितेनास्थापनं श्रेष्ठमुक्तं, प्रवाहमाणस्य शूले भवतीति संबन्धः ॥ १४३ ॥—

तैलेन युञ्ज्यादनुवासनं च ।

अनुवासनमाह—तैलेनेत्यादि । द्विपञ्चमूलीसाधितक्षीरसिद्धेन तैलेनानुवासनं युञ्ज्यादित्यर्थः; न पुनरपक्वतैलेन, तस्य व्यापत्करत्वात् ॥—

वातघ्नवर्गे लवणेषु चैव
तैलं च सिद्धं हितमन्नपाने ॥ १४४ ॥

अन्नसंस्कारार्थं पानार्थं च तैलमाह—वातघ्नवर्गे इत्यादि । वातघ्नवर्गे विदारिगन्धादौ, लवणेषु सैन्धवसौवर्चलादिषु; अत्र विदारिगन्धादिक्काथेन सैन्धवाद्यावापेन सिद्धं तैलमन्नसंस्कारे पाने च हितमित्यर्थः । अन्ये तु लवणेषु चेत्यत्र 'मधुरेषु' इति पठन्ति, एवमन्यत्र दृष्टत्वात् ॥ १४४ ॥

लोध्रं विडं बिल्वशलाटु चैव
लिह्याच्च तैलेन कटुत्रिकाढ्यम् ।

लेहप्रयोगमाह—लोध्रं विडमित्यादि । कटुत्रिकाढ्यमिति त्रिकटुप्रधानं स्पष्टत्रिकटुकमित्यर्थः ॥—

दध्ना ससारेण समाक्षिकेण
भुञ्जीत निश्चा(ःसा)रकपीडितस्तु ॥१४५॥
सुतप्तकुप्यक्कथितेन वाऽपि
क्षीरेण शीतेन मधुप्लुतेन ।
शूलार्दितो व्योषविदारिगन्धा-
सिद्धेन दुग्धेन हिताय भोज्यः ॥ १४६ ॥
वातघ्नसांग्राहिकदीपनीयैः
कृतान् षैडांश्चाप्युपभोजयेच्च ।
खादेच्च मत्स्यान् रसमाप्नुयाच्च
वातघ्नसिद्धं सघृतं सतैलम् ॥ १४७ ॥
एणाव्यजानां तु वटप्रवालैः
सिद्धानि सार्धं पिशितानि खादेत् ।
मेध्य(द्य)स्य सिद्धं त्वथ वाऽपि रक्तं
वस्तस्य दध्ना घृततैलयुक्तम् ॥ १४८ ॥
खादेत् प्रदेहैः शिखिलावजैर्वा
भुञ्जीत यूषैर्दधिभिश्च मुख्यैः ।
माषान् सुसिद्धान् घृतमण्डयुक्तान्
खादेच्च दध्ना मरिचोपदंशान् ॥ १४९ ॥

लोध्रादिकं लीढ्वा भोजनमाह—दध्ना ससारेणेत्यादि । दध्ना ससारेण उपरितनस्निग्धभागसराख्यसहितेन, समाक्षिकेण मधुसहितेन, एवंविधेन दध्ना सह भोजनं कुर्वीतेत्यर्थः । निश्चारकः प्रवाहिकाभेदः पुरीषक्षयापरपर्यायः, तेन पीडितः; अन्ये तु निश्चारकाभिधानेन अतिसारः प्रवाहिका चोच्यते इति मन्यन्ते, अत्रोक्तयोगानामुभयहितत्वापादनार्थम् । नन्वयमर्थः 'तासामतीसारवदादिशेच्च' इत्यनेन प्राप्तः पुनरत्राभिधानेन किं प्रयोजनं? उच्यते—अत्रोक्तयोगाः प्रवाहिकायां विशेषेण हिता इति ज्ञापनार्थम् । सुतप्तेत्यादि ।—सुतप्तसुवर्णरूप्येतरलोहप्रक्षेपक्कथितेन क्षीरेण; अन्ये त्वघटितं रूप्यादिकं कुप्यमाचक्षते; केचित् कुप्यस्थाने कूर्पमिति पठन्ति व्याख्यानयन्ति च—कूर्पो दक्षिणापथे पाषाणविशेषः शङ्खमुण्डाकृतिः रसायनवादेषु प्रयुज्यते । एवंविधेन क्षीरेण वा भुञ्जीतेति संबध्यते । व्योषं त्रिकटु । विदारिगन्धेत्यत्रादिशब्दो लुप्तो ज्ञेयः, तेन विदारिगन्धादिगणो गृह्यते । त्रिकटुविदारिगन्धादिगणसिद्धेन क्षीरेण शूलार्दितो निश्चारकी हिताय भोज्य इति संबन्धः । वातघ्नेत्यादि ।—वातघ्नानि शालपर्ण्यादीनि, भद्रदार्वादीनीत्यन्ये; सांग्राहिकाणि बिल्वपाठाचाङ्गेरीप्रभृतीनि; दीपनीयानि चित्रकशुण्ठ्यादीनि । षडा सदाडिमा गोरसादाना घनाः । कृताः संस्कृताः । मत्स्यान् सांग्राहिकान् रोहितशकुलादीन् । रसं लावादिमांसरसम् । आप्नुयात् पिबेत्, धातूनामनेकार्थत्वात् । वातघ्नानि शालपर्णीपृश्निपर्णीबृहत्यादीनि, तैः सिद्धं; बदरादिसंस्कृतमित्यन्ये व्याख्यानयन्ति । सघृतं सतैलमिति घृततैलेन भृष्टं, वातघ्नसिद्धं घृततैलभृष्टं मांसरसमाप्नुयादिति संबन्धः । एणाव्यजानामित्यादि ।—एणः कृष्णसारः, अविर्मेंडः, अजा छागी, वटप्रवालैः वटकोमलपल्लवैः, पिशितानि मांसानि; एणादीनां पिशितानि वटप्रवालैः सह सिद्धानि खादेदिति संबन्धः । मेध्यस्येत्यादि ।—मेधो यज्ञस्तदर्हो मेध्यः तस्य; एतेन मेदुरस्येत्युक्तं, यज्ञे तस्यार्हत्वात् । रक्तं स्त्यानं रक्तं, अत एव खादेदित्युपपन्नम् । वस्तस्य छागस्य । दध्नेति दध्ना सहितमित्यर्थः । 'मेध्यस्य' इत्यत्रान्ये 'मेध्यं च' इति पठन्ति; तत्र मेध्यमिति रक्तस्य विशेषणम्; मेध्यस्य वस्तस्य रक्तं घृततैलभृष्टं दध्ना संस्कृतं खादेदिति संबन्धः । खादेत् प्रदेहैरित्यादि । पाकेन घनीभूता रसाः प्रदेहाः, तैः । शिखी मयूरः, कुकुट इत्यन्ये । प्रलेपैरित्यन्ये पठन्ति । (तत्रापि स एवार्थः । शिखिलावजैः प्रदेहैश्च सह संस्कृतं तद्रक्तं खादेदिति संबध्नीयात्; अन्ये प्रदेहैरिति भुञ्जीतेत्यत्र संबध्नन्ति ।) यूषैः माषादियूषैः । माषानित्यादि ।—सुसिद्धान् सुस्विन्नान्, घृतमण्डस्तु घृतस्य स्त्यानस्य उपरिस्थो भागस्तेन युक्तान्, मरिचोपदंशान् मरिचावचूर्णितान्; सुस्विन्नान् माषान् घृतमण्डमिश्रान् मरिचावचूर्णितान् खादेदिति संबन्धः ॥ १४५–१४९ ॥

महारुजे मूत्रकृच्छ्रे भिषग्बस्तिं प्रदापयेत् ।
पयोमधुघृतोन्मिश्रं मधुकोत्पलसाधितम् ॥ १५० ॥
स बस्तिः शमयेत्तस्य रक्तं दाहमथो ज्वरम् ।

१ 'अवस्थायां' इति पा० । २ 'रसान्' इति पा० ।

१ 'आतिसारिकः' इति पा० । २ अन्ये तु 'दधिदाडिमाम्लैः' इति पठन्ति, 'तत्र दधिदाडिमाम्लैर्यूषैर्भुञ्जीतेति संबन्धः' इति पा० । ३ 'उपर्यच्छो भागः' इति पा० ।

आहारमुपदिश्य बस्तिमाह—महारुजे इत्यादि । बस्तिं निरूहम् । मधुकं यष्टीमधु, उत्पलं नीलोत्पलम् । मधुकनीलोत्पलसाधितेन क्वाथेन क्षीरमधुघृतोन्मिश्रितेन बस्तिं भिषक् प्रदापयेत्, स च दत्तः सन् रक्तमित्यादिकं शमयेदिति संबन्धः । यद्यपि प्रवाहिकायां प्रागेव बस्तिरभिहितस्तत्प्रसङ्गेनैतावपि बस्ती अभिधेयौ भवतः, तथाऽप्यत्र विशिष्टावस्थायां निश्चारकसंज्ञायां महारुजाद्यनुबन्धे विशिष्टौ बस्ती प्रतिपादितौ ॥ १५० ॥—

मधुरौषधसिद्धं च हितं तस्यानुवासनम् ॥ १५१ ॥
रात्रावहनि वा नित्यं रुजार्तो यो भवेन्नरः ।

निरूहबस्तिमभिधायानुवासनमाह—मधुरौषधसिद्धमित्यादि । मधुरौषधानि काकोल्यादीनि तैः सिद्धं; रुजार्तो यो नरो भवेत्तस्य मधुरौषधसिद्धमनुवासनं रात्रौ दिने वा हितमिति संबन्धः । यद्यपि रात्रावनुवासनं निषिद्धं तथाऽपि नित्यं शूलार्ते रुग्दाहज्वरसद्भावे सति रात्रावपि देयम् ॥ १५१ ॥—

यथा यथा सतैलः स्याद्वातशान्तिस्तथा तथा १५२
प्रशान्ते मारुते चापि शान्तिं याति प्रवाहिका ।
तस्मात् प्रवाहिकारोगे मारुतं शमयेद्भिषक् ॥१५३॥

प्रवाहिकारोगेऽनुवासनसाफल्यमाह—यथेत्यादि । याति उपशान्तिं गच्छतीत्यर्थः ॥ १५२ ॥ १५३ ॥

पाठाजमोदाकुटजोत्पलं च
शुण्ठी समा मागधिकाश्च पिष्टाः ।
सुखाम्बुपीताः शमयन्ति रोगं

प्रवाहिकारोगे दीपनीयौषधमाह—पाठाजमोदेत्यादि । सुखाम्बु ईषदुष्णाम्बु । पाठादयः पिप्पल्यन्ताः समास्तुल्याः पिष्टाः सुखाम्बुना पीता रोगं प्रवाहिकाख्यं शमयन्तीति संबन्धः ॥—

मेध्याण्डसिद्धं सघृतं पयो वा ॥ १५४ ॥

मेध्याण्डसिद्धमित्यादि । मेध्याण्डं छागलाण्डं, तत्सिद्धं पयः क्षीरं सघृतं प्रवाहिकां शमयेदित्यत्रापि संबध्यते । क्षीरपाकविधिः प्रागुक्तः ॥ १५४ ॥

शुण्ठीं घृतं सक्षवकं सतैलं
विपाच्य लीढ्वाऽऽमयमाशु हन्यात् ।

शुण्ठीमित्यादि । क्षवकः छिक्काकरः फणिज्जकाकारो लोके 'छिंकिनी' इति प्रसिद्धः । अत्र विधिः—शुण्ठीक्षवककल्कं सघृततैलमवलेहविधिना विपाच्य लीढ्वा आमयं प्रवाहिकाख्यमाशु हन्यादिति संबन्धः ॥—

गजाशनाकुम्भिकदाडिमानां
रसैः कृता तैलघृते सदध्नि ॥ १५५ ॥
बिल्वान्विता पथ्यतमा यवागूः

गजाशनेत्यादि । गजाशना शल्लकी, कुम्भिका पानीयकुम्भिका, रसैः क्वाथैः, कृता संस्कृता । बिल्वान्विता बिल्वगर्भान्विता । शल्लक्यादिक्वाथैर्बिल्वगर्भान्विता तैलघृते संस्कृता दध्नि सिद्धा यवागूः पथ्यतमेति संबन्धः ॥ १५५ ॥—

धारोष्णदुग्धस्य तथा च पानम् ।

प्रवाहिकायां क्षीरपानस्य पथ्यतमत्वमाह—धारोष्णदुग्धस्येत्यादि । तथेति पथ्यतममित्यर्थः ॥—

लघूनि पथ्यान्यथ दीपनानि
स्निग्धानि भोज्यान्युदरामयेषु ॥ १५६ ॥
हिताय नित्यं वितरेद्विभज्य
योगांश्च तांस्तान् भिषगप्रमत्तः ॥ १५७ ॥

इदानीमुपसंहारमाह—लघूनीत्यादि । भोज्यानि भोजनप्रकारान् । उदरामयेषु अतीसारप्रवाहिकाख्येषु । वितरेत् दद्यात् । विभज्येति दोषविशेषमवस्थां च । अन्ये तु 'पथ्यानि योगांश्च विभज्य' इति संबध्नन्ति । योगांश्च तांस्तानिति लघुदीपनस्निग्धान् । अप्रमत्तः सावधानः ॥ १५६ ॥ १५७ ॥

तृष्णापनयनी लघ्वी दीपनी बस्तिशोधनी ।
ज्वरे चैवातिसारे च यवागूः सर्वदा हिता ॥१५८॥

एकान्तहितत्वार्थं यवाग्वा गुणकीर्तनमाह—तृष्णापनयनीत्यादि । तृष्णापनयनी पिपासाहरी । सर्वदा सर्वास्ववस्थासु, यतो ज्वरातिसारयोरग्निमान्द्यं भवति, यवागूश्चाग्निदीप्तिकरी, अतः सर्वदा हिता ॥ १५८ ॥

रूक्षाज्जाते क्रिया स्निग्धा रूक्षा स्नेहनिमित्तजे ।
भयजे सान्त्वनापूर्वा शोकजे शोकनाशिनी ॥१५९॥
विषार्शःकृमिसंभूते हिता चोभयशर्मदा ।

रोगप्रत्यनीकं चिकित्सितमभिधाय हेतुविपरीतमाह—रौक्ष्यादित्यादि । रूक्षाज्जाते 'अतीसारे' इति शेषः; स्निग्धा क्रिया 'हिता' इति शेषः । भयजे अतीसारे सान्त्वनापूर्वा शा(सा)मप्रयोगपूर्वा । शोकजे पुत्रमित्रकलत्रादिवियोगजे । विषादिसंभूतेऽतीसारे उभयशर्मदा विषार्शःकृमिहिता तज्जनितातिसारे हिता चेत्यर्थः; एतेन हेतुव्याधिप्रत्यनीका क्रियोक्ता ॥ १५९ ॥—

छर्दिमूर्च्छातृडाद्यांश्च साधयेदविरोधतः ॥ १६० ॥

अतीसारोपद्रवचिकित्सितमाह—छर्दीत्यादि । अविरोधतः इति 'मूलव्याधेः' इति शेषः ॥ १६० ॥

समवाये तु दोषाणां पूर्वं पित्तमुपाचरेत् ।
ज्वरे चैवातिसारे च सर्वत्रान्यत्र मारुतम् ॥१६१॥

नन्वतीसारे त्रयाणां दोषाणां द्वयोर्वा संयोगे पूर्वं को दोष उपचर्यत इत्याह—समवाये तु दोषाणामित्यादि । समवायोऽत्र संयोगः । दोषाणामिति त्रयाणां द्वयोर्वा । किं दोषाणां संयोगे सर्वत्रापि पूर्वं पित्तमुपचरणीयमित्याह—ज्वरे चैवेत्यादि । सर्वत्रान्यत्र मारुतमिति ज्वरातीसारौ विहायान्येषु रोगेषु सर्वत्र वातमुपाचरेदित्यर्थः । यद्यपि ज्वरचिकित्सिते 'शमयेत् पित्तमेवादौ' इत्यादिना ज्वरे दोषाणां समवाये पूर्वं पित्तमुपाचरेदिति प्रोक्तं, तथाऽप्यत्र ज्वरे चैवेति पुनर्यदुक्तं तज्ज्वरेऽतिशयेन पूर्वं पित्तमुपाचरेदिति प्रतिपादना-

१ 'तत्प्रसंगत एवैतावपि' इति पा० । २ 'कुटजस्य बीजैः' इति पा० ।

र्थम् । ये च तन्त्रान्तरीया अतीसारे पूर्वं वातोपक्रममिच्छन्ति तेषामयमभिप्रायः—यत्रातीसारे कफवातसमवायः स्यात्तत्र पूर्वं वातमुपाचरेत्, यस्मात् पाचनेन आमकफक्षयाद्वायोर्वृद्धिः ॥ १६१ ॥

यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।
दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः ॥ १६२ ॥

इदानीमतीसारनिवृत्तिलक्षणमाह—यस्योच्चारमित्यादि । उच्चारं पुरीषम् । सम्यगिति प्रवृत्तिशङ्कारहितम् । वातोऽत्राधोवातः । दीप्ताग्नेरिति प्रथमावस्थापेक्षया; तेन अतीसारे निवृत्तेऽपि मन्दाग्नेरिति वक्ष्यमाणं न विरुध्यते । लघुकोष्ठस्य उदरगौरवरहितस्य । स्थितो निवृत्तः । उदरामयोऽतीसारः १६२

कर्मजा व्याधयः केचिद्दोषजाः सन्ति चापरे ।
कर्मदोषोद्भवाश्चान्ये

अवश्यं वक्तव्यत्वादस्य वस्तुन एष प्रदेश इत्यतोऽत्र व्याधीनां कर्मजादिभेदेन त्रैविध्यमाह—कर्मजा व्याधय इत्यादि । तत्र पथ्यरतानां[1] सद्वृत्तरतानां शास्त्रोक्ताहारविहारसेविनां हेमन्तशिशिरे रक्तपित्ताद्युत्पद्यते, वसन्ते वातव्याध्युत्पत्तिः, प्रावृषि श्लेष्मव्याध्युत्पत्तिरित्यादयो निमित्तमन्तरेण ये चोत्पद्यन्ते ते कर्मजाः; यान् पुनरसात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिणामलक्षणैः मिथ्याहारविहारैः शास्त्रविरुद्धैरासेव्यमानैर्दोषाः कुपिता व्याधीन् जनयन्ति ते दोषजाः; उभयहेतुजाः कर्मदोषजाः ॥—

कर्मजास्तेष्वहेतुकाः ॥ १६३ ॥
नश्यन्ति त्वक्रियाभिस्ते क्रियाभिः कर्मसंक्षये ।

तेषां मध्ये कर्मजानां तत्र लक्षणमाह—कर्मजास्तेष्वहेतुकाः; तेषु कर्मजादिषु त्रिषु कर्मजा अहेतुका दोषागन्तुहेतुरहिताः । नश्यन्तीत्यादि ते कर्मजाः, तु पुनः, अक्रियाभिरचिकित्साभिः, क्रियाभिः प्रायश्चित्तजपहोमोपहारादिरूपाभिः । कर्मसंक्षये व्याधिजनककर्मक्षये । ये व्याधयोऽहेतुका उत्पद्यन्ते अक्रियाभिश्च कर्मक्षये सति नश्यन्ति ते कर्मजा इति संबन्धः ॥ १६३ ॥—

शाम्यन्ति दोषसंभूता दोषसंक्षयहेतुभिः ॥ १६४ ॥

दोषजानां लक्षणमाह—शाम्यन्तीत्यादि । ये दोषसंक्षयहेतुभिः शाम्यन्ति ते दोषजा इत्यर्थः ॥ १६४ ॥

तेषामल्पनिदाना ये प्रतिकष्टा भवन्ति च ।
मृदवो बहुदोषा वा कर्मदोषोद्भवास्तु ते ॥ १६५ ॥

कर्मदोषजानां लक्षणमाह—तेषामित्यादि । तेषां कर्मादिजानाम् । अल्पनिदाना अल्पकारणा अल्पोत्पादकदोषाः । प्रतिकष्टा इति प्रतिशब्द इत्थम्भूतार्थे; तेनेत्थंभूता अपि ये कष्टा भवन्ति, बहुदोषारब्धाश्च ये मृदवो भवन्ति, ते कर्मदोषोद्भवा व्याधय इति संबन्धः ॥ १६५ ॥

कर्मदोषक्षयकृता तेषां सिद्धिर्विधीयते ।

कर्मदोषोद्भवानां चिकित्सितमाह—कर्मेत्यादि । तेषामुभयजानाम् । कर्मदोषक्षयकृता इति कर्मक्षयकृता यागदानमन्त्रबल्युपहारदेवताराधनगुरुपूजनादिना, दोषक्षयकृता स्नेहस्वेदनवमनादिना । सिद्धिः साधनं, विधीयते क्रियते ॥—

दुष्यति ग्रहणी जन्तोरग्निसादनहेतुभिः ॥ १६६ ॥

प्रकृतमिदानीं प्रस्तूयते—तत्रानुत्पन्नातीसारस्यापि ग्रहणीरोगसंभवमाह—दुष्यतीत्यादि । दुष्यति विकृतिं याति । ग्रहणी पित्तधरा कला वह्न्यधिष्ठानत्वेन संजाता[1] । जन्तोः प्राणिनः, अग्निसादनहेतुभिः अग्निनिर्वापणकारणैः, एतेनातीसारं विनाऽपि ग्रहणीरोगसंभव उक्तः ॥ १६६ ॥

अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।
भूयः संदूषितो वह्निर्ग्रहणीमभिदूषयेत् ॥ १६७ ॥
तस्मात्कार्यः परीहारस्त्वतीसारे विरिक्तवत् ।
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा ॥ १६८ ॥

उत्पन्नातीसारस्य यथा ग्रहणीरोगोत्पत्तिस्तथा दर्शयन्नाह—अतीसारे इत्यादि । निवृत्तेऽपीत्यपिशब्दादनिवृत्तेऽपि । भूयः पुनरपि । ग्रहणीमिति अग्न्यधिष्ठानम् । तस्मादित्यादि यस्मात् पुनर्दूषितो वह्निर्ग्रहण्याख्यमधिष्ठानं दूषयति तस्मादतीसारे विरिक्तवत् परीहारः कार्य इति संबन्धः । परीहारकालावधिमाह—यावदित्यादि ॥ १६७ ॥ १६८ ॥

षष्ठी पित्तधरा नाम या कला परिकीर्तिता ।
पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता ॥१६९॥

अथ केयं ग्रहणीयांदूषितो वह्निर्दूषयतीत्याह—षष्ठी पित्तधरेत्यादि । या कला परिकीर्तिता गर्भव्याकरणे शारीरे प्रोक्ता ॥ १६९ ॥

ग्रहण्या बलमग्निर्हि स चापि ग्रहणीं श्रितः ।
तस्मात् संदूषिते वह्नौ ग्रहणी संप्रदुष्यति ॥ १७० ॥

यथाऽग्नौ दूषिते सति ग्रहणी प्रदुष्यति तथा दर्शयति—ग्रहण्या इत्यादि । हि यस्मादर्थे, यस्माद्ग्रहण्या अग्न्यधिष्ठानभूताया बलमग्निः स, चाप्यग्निर्ग्रहणीं श्रितो ग्रहणीमाश्रितः, तस्मादग्नौ प्रदूषिते ग्रहणी संप्रदुष्यतीति ॥ १७० ॥

एकशः सर्वशश्चैव दोषैरत्यर्थमुच्छ्रितैः ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥ १७१ ॥
पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः ॥ १७२ ॥

कैः प्रदुष्यतीत्याह—एकश इत्यादि । अत्यर्थमुच्छ्रितैः अत्यन्तवृद्धैः, एकशो वातादिभिः, सर्वशः सर्वैर्दोषैः, सा ग्रहणी दुष्टा सती भुक्तमन्नं, बहुशो बहून् वारान्, आममपक्वमेव विमुञ्चति । किं सा दुष्टा सती आममेव परं विमुञ्चतीत्याह—पक्वं वेत्यादि । आयुर्वेदविदोऽष्टाङ्गज्ञाः॥१७१॥१७२॥

---

१ 'पथ्यरतानां' इति हस्तलिखितपुस्तके न पठ्यते । २ 'सूत्रेण' इति पा० ।

१ 'संजाता' इति हस्तलिखितपुस्तके न पठ्यते ।

तस्योत्पत्तौ विदाहोऽन्ने सदनालस्यतृट्क्लमाः ।
बलक्षयोऽरुचिः कासः कर्णक्ष्वेडोऽन्त्रकूजनम् ॥१७३॥

अतो ग्रहणीरोगस्य पूर्वरूपमाह—तस्योत्पत्तावित्यादि । तस्य ग्रहणीरोगस्य । विदाहोऽन्ने अन्नं भुक्तं विदह्यतीत्यर्थः । सदनमङ्गसादः, आलस्यमनुत्साहः, तृट् पिपासा, क्लमो विनाऽपि व्यायामं श्रमः । कर्णक्ष्वेडोऽनेकविधहुङ्कारादिशब्द-श्रवणम् । 'विदाहोऽन्ने' इत्यत्रान्ये 'विदाहोऽन्तः' इति पठन्ति, अन्तःकोष्ठेऽन्नं विदाहमापादयतीति व्याख्यानयन्ति च ॥१७३॥

अथ जाते भवेज्जन्तुः शूनपादकरः कृशः ।
पर्वरुग्लौल्यतृट्छर्दिज्वरारोचकदाहवान् ॥ १७४ ॥
उद्गिरेच्छुक्ततिक्ताम्ललोहधूमामगन्धिकम् ।
प्रसेकमुखवैरस्यतमकारुचिपीडितः ॥ १७५ ॥

पूर्वरूपानन्तरं रूपमाह—अथेत्यादि । पर्वरुक् सन्धि-पीडा, लौल्यं सर्वरसेषु लोलुपत्वम् । उद्गिरेत् वमेत् । शुक्तं चुक्रम् । गन्धशब्दो लोहादिभिः प्रत्येकं संबध्यते । प्रसेको लालास्रावः । तमकः श्वासविशेषः, अन्ये तु तमकं मोहमा-चक्षते । पीडितशब्दः प्रसेकादिभिः प्रत्येकं संबध्यते । अत्र पाठे 'निर्मांसो वा कृशः' इत्यन्ये पठन्ति, तत्र निर्मांसोऽत्यन्त-क्षीणमांसः, कृशोऽल्पमांसः । अत्रारोचकशब्दोपादानादेवा-रुचिः प्राप्ता पुनररुच्यभिधानमस्मिन् रोगेऽरुचेरवश्यम्भाव-सूचनार्थम् ॥ १७४ ॥ १७५ ॥

वाताच्छूलाधिकैः पायुहृत्पार्श्वोदरमस्तकैः ।
पित्तात् सदाहैर्गुरुभिः कफात्त्रिभ्यस्त्रिलक्षणैः॥१७६॥

अत ऊर्ध्वं वातादिभेदेन ग्रहणीलक्षणान्याह—वातादि-त्यादि । पायुर्गुदः, हृत् हृदयं, पार्श्वे द्वे; पाय्वादिमस्तकान्तैः शूलाधिकैर्वाताद्ग्रहणीरोगो ज्ञातव्य इति; एवं सर्वत्र संबन्धनी-यम् । एभिरेव पाय्वादिभिः सदाहैः पित्ताद्ग्रहणी, गुरुभिः पाय्वादिभिः कफात्, त्रिलक्षणैरिति शूलाधिकैः सदाहैर्गुरुभिः पाय्वादिभिः; त्रिभ्यो दोषेभ्यः, 'ग्रहणी' इति शेषः ॥ १७६ ॥

दोषवर्णैर्नखैस्तद्वद्विण्मूत्रनयनाननैः ।
हृत्पाण्डूदरगुल्मार्शःप्लीहाशङ्की च मानवः ॥१७७॥

किमेतैरेव लक्षणैर्ग्रहणीरोगो ज्ञेयोऽथवाऽन्यैरपीत्याह—दोष-वर्णैरित्यादि । दोषवर्णैरिति कृष्णारुणनीलपीतरक्तासितपाण्डुभि-र्नखैः, तद्वदिति कृष्णादिवर्णैर्विडादिभिश्च 'ग्रहणीरोगो ज्ञेय' इति शेषः । हृत्पाण्डूदरादिरोगाशङ्की च मानवो भवति, 'प्रव-र्धमाने ग्रहणीरोगे' इति वाक्यशेषः ॥ १७७ ॥

यथादोषोच्छ्रयं तस्य विशुद्धस्य यथाक्रमम् ।
पेयादिं वितरेत् सम्यग्दीपनीयोपसंभृतम् ॥१७८॥
ततः पाचनसंग्राहिदीपनीयगणत्रयम् ।
पिबेत् प्रातः सुरारिष्टस्नेहमूत्रसुखाम्बुभिः ॥१७९॥
तक्रेण वाऽथ तक्रं वा केवलं हितमुच्यते ।
कृमिगुल्मोदरार्शोघ्नीः क्रियाश्चात्रावचारयेत् १८०
चूर्णं हिङ्ग्वादिकं चात्र घृतं वा प्लीहनाशनम् ।

अत ऊर्ध्वं ग्रहणीरोगचिकित्सितमाह—यथेत्यादि । दोषो-च्छ्रयो दोषोद्रेकः । तस्येति ग्रहणीरोगिणः । तत्र यथादोषो-च्छ्रयं विशुद्धस्येति वातोद्रेके निरूहेण, पित्तोद्रेके विरेकेण, कफोद्रेके वमनेन । यथाक्रममिति यथास्वं शुद्धिप्रकरणोक्तक्रमे-णेत्यर्थः । पेयादिमित्यादिशब्दाद्विलेपीयूषमृद्वोदनादिकम् । वितरेत् दद्यात् । सम्यक् यथोक्तम् । दीपनीयोपसंभृतमिति पञ्चकोलाद्यग्निदीपनद्रव्ययुक्तम् । 'यथादोषोच्छ्रयं' इत्यत्रान्ये 'यथादोषबलं' इति पठन्ति, तत्र दोषबलानतिक्रमेण विशु-द्धस्येत्यर्थः । तत इत्यादि तत इति पेयादिक्रमानन्तरम् । पाचनसंग्राहिदीपनीयगणत्रयमिति गणशब्दः प्रत्येकं संबध्यते; तेन पाचनद्रव्यगणो हरिद्रादिः, संग्राहीगणोऽम्बष्ठादिः, दीपनी-यगणः पिप्पल्यादिः; एतद्गणत्रयं दोषकालसात्म्याद्यपेक्षया सुरारिष्टादिभिस्तक्रान्तैः प्रातः पिबेदित्यर्थः । तक्रं वेत्यादि संग्राहिदीपनीयलघुत्वात् "एका शान्तिरनेकस्य" इति वचनात् । क्रिम्यादिघ्नी क्रियाऽत्रापि करणीयेत्याह—क्रिमीत्यादि । अत्रेति ग्रहणीरोगे । अवचारयेत् प्रयोजयेत् । ननु ग्रहणीरोगो वातादि-भेदेन चतुर्विधः प्रोक्तः, तत्कथं चिकित्सितं तथा नोक्तं? उच्यते—यथादोषोच्छ्रयमित्यत्राप्यनुवर्तनीयम्; तेन क्रिम्या-दिघ्नी क्रिया यथादोषोच्छ्रयमवचारयेदिति न दोषः । हिङ्ग्वा-दिचूर्णादिकं ग्रहण्यामप्यतिदिशन्नाह—चूर्णमित्यादि । हिङ्ग्वादि-चूर्णं महावातव्याध्युक्तं, घृतं वा प्लीहनाशनमिति षट्पलादिकं, अवचारयेदित्यत्रापि संबध्यते ॥ १७८-१८० ॥—

कल्केन मगधादेश्च चाङ्गेरीस्वरसेन च ॥ १८१ ॥
चतुर्गुणेन दध्ना च घृतं सिद्धं हितं भवेत् ।

चाङ्गेरीघृतमाह—कल्केनेत्यादि । मगधादेः पिप्पल्यादेः । चाङ्गेरी अम्लपत्रिका, तस्याः स्वरसेन स्नेहचतुर्गुणेन, पिप्पल्या-दिकल्केन स्नेहचतुर्थांशेन, दध्ना च चतुर्गुणेन, सिद्धं घृतं हितं भवेदित्यर्थः ॥ १८१ ॥

सर्वथा दीपनं सर्वं ग्रहणीरोगिणां हितम् ।

इदानीं ग्रहणीरोगेऽशेषसंग्रहार्थमाह—सर्वथेत्यादि । सर्वथा सर्वप्रकारेण । दीपनमग्निदीपनम्; यदग्निदीपनं तत्सर्वं ग्रहणी-रोगिणां सर्वथा हितमिति संबन्धः ॥—

ज्वरादीनविरोधाच्च साधयेत् स्वैश्चिकित्सितैः १८१

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते काय-चिकित्सातन्त्रेऽतिप्रतिषेधो नाम
(द्वितीयोऽध्यायः,
आदितः) चत्वारिंशोऽध्यायः ॥ ४० ॥

अतोऽनन्तरं ग्रहणीरोगोपद्रवाणां ज्वरारोचकादीनां प्रति-कारमाह—ज्वरादीनित्यादि । ज्वरादीनित्यादिशब्दादरोचकशू-लकरपादशोफादीनां ग्रहणम् । अविरोधाच्चेति 'मूलव्याधेः' इति शेषः । यद्यपि निबन्धकारैरयमध्यायो व्यस्तपाठेन पठि-

तस्तथाऽपि मया मद्गुरुणा येन क्रमेणोपदिष्टस्तथाऽयं पठितो व्याख्यातश्च ॥ १८१ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गतकायचिकित्सायामतिसारप्रतिषेधाध्यायश्चत्वारिंशत्तमः ॥ ४० ॥

एकचत्वारिंशत्तमोऽध्यायः ।

अथातः शोषप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अतीसारप्रतिषेधानन्तरं शोषेऽप्यतीसारसंभूतेरथवा ज्वरातीसाराभ्यां शोषस्योत्पत्तेः शोषप्रतिषेधारम्भो युक्त इत्यत आह—अथात इत्यादि । अथेत्यादिकं पूर्ववद्व्याख्येयम् । शोषप्रतिषेधं शोषचिकित्सितम् ॥ १ ॥ २ ॥

अनेकरोगानुगतो बहुरोगपुरोगमः ।
दुर्विज्ञेयो दुर्निवारः शोषो व्याधिर्महाबलः ॥ ३ ॥

ननु, शोषचिकित्सितं व्याख्यास्याम इति प्रतिज्ञां कृत्वा निदानाभिधाने को हेतुः? उच्यते—अज्ञातरोगस्य वैद्यस्य चिकित्सायां प्रागल्भ्यं न स्यादतो निदानारम्भ इति; तथा चोक्तं—"रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्"—इति । प्रागेव विकारस्वभावाभिधानाय वाक्यमाह—अनेकरोगानुगत इत्यादि । अनेकरोगा उपद्रवसंज्ञकाः, तैरनुगत आश्रितः । बहवो रोगाः श्वासकासाङ्गसादकफसंस्रवादयः, पुरोगमाः पूर्वरूपत्वेनोपस्थिता यस्य स तथा । दुर्विज्ञेय इति त्रिदोषलिङ्गत्वादंशांशबलविकल्पनाभिः प्रकुपितदोषाणां लिङ्गदर्शनात् । दुर्निवार इति दोषाणां परस्परविरुद्धोपक्रमत्वात्; दुर्निवारत्वाच्च कृच्छ्रोऽयं महाबलः ॥ ३ ॥

संशोषणाद्रसादीनां शोष इत्यभिधीयते ।
क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते पुनः ॥ ४ ॥
राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः ।
तस्मात्तं राजयक्ष्मेति केचिदाहुः पुनर्जनाः ॥ ५ ॥

इदानीमस्य व्याधेर्यथा शोषक्षयराजयक्ष्मेति नामानि तथाऽऽह—संशोषणाद्रसादीनामित्यादि । क्रिया चिकित्सा, कायवाङ्मानसं वा कर्म, तस्य क्षयकरत्वात् । राज्ञ इति 'द्विजानां' इति शेषः । चन्द्रमसश्चन्द्रस्य, आमयो यक्ष्मारोगः, केचिदिति आत्रेयप्रभृतयः; यस्मादेष आमयो द्विजानां राज्ञश्चन्द्रमसश्चन्द्रस्याभूत्तस्मात् तं रोगं केचित् पुनर्जना राजयक्ष्मेति ब्रुवते; यतोऽयं यक्ष्मा रोगो रोगाणां राजा अतो राजयक्ष्मेति वाग्भटो व्याख्यानयति । किलेति वार्तायाम् । एवं खलु यथा श्रूयते—पूर्वं दक्षनामा प्रजापतिरभूत्, तस्य बह्वयो दुहितरो बभूवुः, तेन च सप्ताधिका विंशतिः कन्यकाश्चन्द्राय विवोढे दत्ताः, स चन्द्रमास्तासु मध्ये रोहिण्यामेवानुरक्तो बभूव, ततश्च सशोकाभिरश्विन्यादिभिर्दुहितृभिरात्मपितरि दक्षसंज्ञके चन्द्रस्य रोहिण्यामासक्तिवृत्तान्तो निवेदितः, ततो दुहितॄणां वार्तामाकर्ण्य, चन्द्रमाहूय, सर्वास्वपि निजपुत्रीषु समतया वर्तनाय चन्द्रोऽभिहितः, स च तथेति स्वीकृत्यापि स्वगुरोर्वचनमनादृत्य न तासु समवर्तत, ततो दक्षप्रजापतेः क्रोधो निश्वासरूपेण मूर्तिमान् भूत्वा निःसृत्य यक्ष्मरूपेण रोहिण्यामतिप्रसङ्गेनाविलं चन्द्रमाविशत्, ततोऽसौ तेन रोगेणाभिभूतः सन् गतप्रभो गतोत्साहश्च संजातः, गुरुवचनातिक्रमेण दोषं मत्वा तमेव दक्षनामानं गुरुं शरणं गतवान्, ततोऽनन्तरं देववैद्याभ्यामश्विभ्यां स चिकित्सितः, ततः प्राप्तबलश्चन्द्रो (रराजातीव सुप्रभः) लब्धगुरुप्रसादोऽश्विभ्यां चिकित्सितोऽभूत् । एवं च सति कर्मदोषजो व्याधिरिति दर्शितम् ॥ ४ ॥ ५ ॥

स व्यस्तैर्जायते दोषैरिति केचिद्वदन्ति हि ।

एकीयमतेनास्य व्याधेः पृथग्दोषजत्वमाह—स व्यस्तैरित्यादि । स व्याधिः । व्यस्तैः पृथग्भूतैः ॥—

एकादशानामेकस्मिन् सान्निध्यात्तन्त्रयुक्तितः ॥ ६ ॥
क्रियाणामविभागेन प्रागेकोत्पादनेन च ।
एक एव मतः शोषः सन्निपातात्मको ह्यतः ॥ ७ ॥

परमतनिराकरणाय स्वमतमाह—एकादशानामित्यादि । एकादशानामिति स्वरभेदशूलादीनाम् । एकस्मिन्निति राजयक्ष्मरोगे; अन्ये तु राजयक्ष्मातुर इति व्याख्यानयन्ति, सान्निध्यादिति विद्यमानत्वात् । तन्त्रयुक्तितः अर्थयुक्तितः; अन्ये तन्त्रेत्यत्र तन्त्रेति पठन्ति; तत्र तस्मिन्, युक्तितो युक्तिवशादिति व्याख्यानयन्ति । का सा युक्तिः? यद्वशेनैक एव शोष इत्याह—क्रियाणामविभागेनेति ।—चिकित्सानामपृथक्त्वेन दर्शितत्वादित्यर्थः । एकत्वे तृतीयं हेतुमाह—प्रागेकोत्पादनेन चेति ।—यस्मात् पूर्वं दक्षेण क्रुद्धेनैकस्योत्पादनं कृतम् । हि यस्मादर्थे; यस्माच्छोषस्यैकत्वे हेतुत्रितयमत्रोक्तमत एक एव शोषः सन्निपातात्मको मत इति संबन्धः ॥ ६ ॥ ७ ॥

उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति हि ।

ननु, यदि सन्निपातात्मक एक एवायं तत् कथमत्र एकैकदोषैः पृथग्लिङ्गज्ञानमित्याह—उद्रेकादित्यादि । उद्रेकादाधिक्यात् । तत्र शोषे । हिशब्दो हेतौ, स च हेतुर्बहुप्रकारोऽपि चतुर्विधत्वं न त्यजति ॥—

क्षयाद्वेगप्रतीघातादाघाताद्विषमाशनात् ॥ ८ ॥
जायते कुपितैर्दोषैर्व्याप्तदेहस्य देहिनः ।

१ 'केचिदाहुर्मनीषिणः' इति पा० । २ 'यथा' इति मुद्रितपुस्तके न पठ्यते ।

१ 'विवोढुं' इति पा० । २ 'चन्द्रवृत्तान्तः' इति पा० । ३ 'तथेत्युपक्रम्यापि' इति पा० । ४ 'अपि याप्योऽभूत्' इति पा० । ५ 'तन्त्रयुक्तित इत्यर्थापत्तेः' इति पा० । ६ 'अनेकदोषपृथग्लिङ्गज्ञानं' इति पा० ।

तमेव चतुर्विधं हेतुमाह—क्षयाद्वेगप्रतीघातादित्यादि । क्षयात् रसादिशुक्रान्तानां धातूनां क्षयात् । वेगप्रतीघातात् वातमूत्रपुरीषादीनां प्रवृत्त्युन्मुखानामवरोधात् । आघातात् पतनादितः, अयथाबलमारम्भादिति बोद्धव्यम् । विषमाशनादिति अप्राप्तातीतकालबहल्पभोजनात् । क्षयादित्यादिहेतुभिः कुपितैर्दोषैर्व्याप्तदेहस्य शोषो जायते इति संबन्धः । अन्ये त्वेवं पठन्ति—'वेगाघातात् पूरणाद्वा सह्वातात् संक्षयादपि' इति; व्याख्यानयन्ति च-पूरणं विषमाशनमभिप्रेतं, सह्वातोऽत्र साहसः, शेषं पूर्ववद्व्याख्येयम् ॥ ८ ॥—

कफप्रधानैर्दोषैर्हि रुद्धेषु रसवर्त्मसु ॥ ९ ॥

कफप्रधानैरित्यादि । कफप्रधानैरुत्कटकफैः । हिशब्दो हेतौ । रसवर्त्मस्वित्यत्रादिशब्दो लुप्तो ज्ञेयः; वर्त्म मार्गः, तेन रसादिवाहिनीषु धमनीष्वित्यर्थः ॥ ९ ॥

अतिव्यवायिनो वाऽपि क्षीणे रेतस्यनन्तरम् ।
क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः ॥ १० ॥

अपरप्रकारेण धातुक्षयाद्राजयक्ष्मसंभवं दर्शयन्नाह—अतीत्यादि । अतिव्यवायिनः अत्यर्थं ग्राम्यधर्मसेविनः । क्षीणे रेतसि शुक्रे, शुक्रक्षयश्च मेढ्रवृषणवेदनेत्यादिना ज्ञेयः । अनन्तरं रेतसः क्षयादित्यर्थः । क्षीयन्ते धातवः सर्वे इति परं यदि स्त्रीभ्यो न निवर्तते । ननु, रसवर्त्मरोधाद्रसेन रक्तस्याबृंहणात्तदपचयः, रक्तापचयाच्च मांसस्यापचय इत्यादिपूर्वपूर्वधातुक्षीणतया कृत्वा शुक्रस्य युक्तः क्षयः, शुक्रक्षये तु पूर्वधातूनां कथं क्षयः ? उच्यते—यथा महाजलाधारपरिक्षये तत्र प्रविशतां जलप्रायाणां (जन्तूनां) क्षयस्तद्वदत्रापीति । खमार्गावरोधाद्रसोऽसञ्चरन् किं करोति ? हृदये विदह्यते, कासवेगेन मुखमार्गात् पिच्छिलबहलविस्रहरितपीतश्वेतः प्रवर्तते ॥ १० ॥

भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम् ।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि ॥ ११ ॥

इदानीं मध्यबलदोषारब्धस्य शोषस्य षड्रूपाणि दर्शयन्नाह—भक्तद्वेषो ज्वर इत्यादि । स्वरभेदः घर्घरादिस्वरः ॥ ११ ॥

स्वरभेदोऽनिलाच्छूलं संलोचश्चांसपार्श्वयोः ।
ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥१२॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ॥१३॥

षड्रूपाणि निर्दिश्य दोषभेदेनैकादशरूपाणि बलवत्समदोषारब्धस्य शोषस्य दर्शयन्नाह—स्वरभेद इत्यादि । संलोचो लुञ्चनमिव, अंसयोः पार्श्वयोः; 'संलोच' इत्यत्रान्ये 'संकोच' इति पठन्ति, तत्र संकोचनमिवेत्यर्थः । शिरसः परिपूर्णत्वं 'कफेन' इति शेषः । अभक्तच्छन्दो भक्तारुचिः । कण्ठस्य चोद्ध्वंसः कण्ठभङ्गः; अन्ये उद्ध्वंसं उत्कासिकेति व्याख्यानयन्ति । स्वरभेदादिलिङ्गत्रयं राजयक्ष्मणि वातेन, ज्वरादीनि चत्वारि पित्तेन, शिरसः परिपूर्णत्वादीनि चत्वारि कफेन; एवं षड्रूपाण्यपि वातादिभेदेन ज्ञेयानि ॥ १२ ॥ १३ ॥

एकादशभिरेभिर्वा षड्भिर्वाऽपि समन्वितम् ।
(कासातीसारपार्श्वार्तिस्वरभेदारुचिज्वरैः ॥ १४ ॥
त्रिभिर्वा पीडितं लिङ्गैर्ज्वरकासासृगामयैः ।)
जह्याच्छोषार्दितं जन्तुमिच्छन् सुविपुलं यशः॥१५॥

ईदानीं रूपप्रस्तावाद्बहुरूपान्वितस्यासाध्यत्वमाह[1]—एकादशभिरित्यादि । एतैरेभिः स्वरभेदोऽनिलाच्छूलमित्यादिकैः, षड्भिर्वाऽपीति भक्तद्वेषो ज्वर इत्यादिभिः, अपिशब्दात्रिभिर्वा श्वासकासासृगामयैस्तन्त्रान्तरोक्तैः, समन्वितमिति समुच्चीयते । जह्यादिति त्यजेत्, परं वह्नौ मन्दे बलमांसक्षये सतीति बोद्धव्यम् । ननु, सर्वरूपादर्धत्रिरूपौ लघुतरौ, तत्कथं तावप्यसाध्यौ ? उच्यते—बलवह्न्यपचये कालप्रकर्षात्तयोरपि महत्त्वात्; एतेन सर्वरूपोपपन्न एवासाध्यः, इतरौ तु कालप्रकर्षेणेति । अयं पाठः पुस्तकान्तरेष्वन्यथा पठ्यते, स च निबन्धकारैर्न पठितः ॥ १४ ॥ १५ ॥

व्यवायशोकस्थाविर्यव्यायामाध्वोपवासतः ।
व्रणोरःक्षतपीडाभ्यां शोषानन्ये वदन्ति हि ॥ १६ ॥

एकीयमतेन शोषभेदान्निर्दिशन्नाह—व्यवायशोकेत्यादि । व्यवायः स्त्रीसेवा; शोकः पुत्रादिवियोगेन चित्तोद्वेगः; स्थाविर्यं वृद्धत्वं, अन्ये वार्धक्यमिति पठन्ति, तत्राप्येकोऽर्थः; व्यायामः शरीरायासजनकं कर्म; अध्वा दीर्घमार्गाटनं; व्यवायाद्युपवासान्तैर्हेतुभिस्तथा व्रणपीडया उरःक्षतपीडया चान्ये शोषान् वदन्तीति संबन्धः ॥ १६ ॥

व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथापूर्वं क्षीयन्ते चास्य धातवः ॥ १७ ॥

व्यवायशोषिणो लक्षणान्याह—व्यवायेत्यादि । शुक्रस्य क्षयलिङ्गैरिति 'शुक्रक्षये मेढ्रवृषणवेदना' इत्यादिभिः । यथापूर्वमिति यथापूर्वं तत्र शुक्रस्य पूर्वं मज्जा, मज्ज्ञोऽस्थि, अस्थ्नो मेदः, मेदसो मांसं, मांसस्य रक्तमित्येवं क्षीयन्ते धातवः प्राग्वदेव दर्शितन्यायात्, परं यदि स्त्रीभ्यो न निवर्तते ॥ १७ ॥

प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ।
विना शुक्रक्षयकृतैर्विकारैरभिलक्षितः ॥ १८ ॥

शोकशोषिणमाह—प्रध्यानशील इत्यादि । प्रध्यानशीलश्चिन्तापरः । स्रस्ताङ्गोऽवसन्नगात्रः । तादृश इति व्यवायशोषितवदभिलक्षितः, परं शुक्रक्षयकृतैर्लिङ्गैर्विना; एतेन पाण्डुदेह इत्यर्थः ॥ १८ ॥

जराशोषी कृशो मन्दवीर्यबुद्धिबलेन्द्रियः ।
कम्पनो[2]ऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः(नः) १९

---

१ 'बहुरूपो राजयक्ष्मा असाध्यस्तमाह' इति पा० । २ 'श्वसनो' इति पा० ।

ष्ठीवति श्लेष्मणा हीनं गौरवारुचिपीडितः ।
संप्रस्रुतास्यनासाक्षः सुप्तरूक्षमलच्छविः ॥ २० ॥

जराशोषिणमाह—जराशोषी कृशो मन्देत्यादि । मन्दशब्दो वीर्यादिभिः प्रत्येकं संबध्यते, वीर्यं शक्तिः, बलमोजो हृदि स्थितं सप्तधातुधामभूतम् । पुनैररुचिकथनमत्यन्तारोचकख्यापनार्थम् । संप्रस्रुतेत्यादि संप्रस्रुतशब्द आस्यादिभिस्त्रिभिः प्रत्येकं संबध्यते । आस्यं मुखकुहरम्, अक्षि लोचनम् । सुप्तरूक्षत्वं प्रभायाः, रूक्षत्वं च मलस्य; यद्यपि सुप्तरूक्षत्वं त्वचि भवति न प्रभायां, तथाऽपि मञ्चाः क्रोशन्तीतिवदुपचारात् प्रभायां बोद्धव्यम् । जेज्जटाचार्यस्तु जराशोषिणो लक्षणमत्र न पठति, सप्ततेस्तूर्ध्वं क्षीयमाणेत्यादिना आतुरोपक्रमणीये उक्तत्वात् ॥ १९ ॥ २० ॥

अध्वप्रशोषी स्रस्ताङ्गः संभृष्टपरुषच्छविः ।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥ २१ ॥

अध्वशोषिणमाह—अध्वप्रशोषीत्यादि । स्रस्ताङ्गः शिथिलगात्रावयवः । प्रसुप्तगात्रावयव इत्यनेन अकर्मण्यशरीरप्रदेश उक्तः । शुष्कशब्दः क्लोमादिभिः प्रत्येकं संबध्यते; क्लोम तिलकं, आननं मुखकुहरम् । संभृष्टपरुषच्छविरिति दग्धस्येव परुषा छविर्यस्येत्यर्थः; केचित् 'संसृष्टपरुषच्छविः' इत्यत्र 'संसृष्टपरुषच्छविः' इति पठित्वा संसृष्टा परुषा छविः यस्य स इति व्याख्यानयन्ति । यद्यपि जराशोष्यनन्तरं व्यायामशोषी वाच्यो नाध्वशोषी, तथाऽप्यध्वशोषिलक्षणानां व्यायामशोषिण्यतिदेशात् पूर्वमत्राध्वशोषी निर्दिष्टः । यद्येवं तर्हि व्यायामशोषिलक्षणान्येव कुतोऽध्वशोषिणि नातिदिश्यन्ते ? सत्यं, उरःक्षतलिङ्गानामधिकानां व्यायामशोषिणि सद्भावात् । केचिदत्र 'तृडङ्गमर्ददौर्बल्यपारुष्यैरर्दितोऽध्वना' इति पाठं पठन्ति, तत्रापि स एवार्थः ॥ २१ ॥

व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः ।
उरःक्षतकृतैर्लिङ्गैः संयुक्तश्च क्षताद्विना ॥ २२ ॥

व्यायामशोषिणमाह—व्यायामशोषी भूयिष्ठमित्यादि । एभिरेवेति अनन्तरोक्तैरध्वशोषिलक्षणैरित्यर्थः । उपवासशोषिलक्षणं दोषधातुमलक्षयवृद्धिविज्ञानीयोक्तं 'तत्र वातलाहारसेविन' इत्यादिकं ज्ञातव्यम् ॥ २२ ॥

रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
व्रणितस्य[3] भवेच्छोषः स चासाध्यतमः स्मृतः ॥२३॥

व्रणशोषिलक्षणमाह—रक्तक्षयादित्यादि । व्रणशोषिणो वैशेषिकलक्षणानुपदेशात् सामान्यलक्षणं ज्ञेयम् । यद्येवं कुतोऽस्य पृथगभिधानमिति चेत्, विशिष्टकारणतया असाध्यतमत्वख्यातेः[4] ॥ २३ ॥

[1] 'तथैवारुचिपीडितः' इति 'तथैवारतिपीडितः' इति च पा० । [2] 'पुनररुचिकरणं' इति पा० । [3] 'व्रणितस्य भवेच्छोषो दोषैः साध्यतमः स च' इति हस्तलिखितपुस्तके पाठ उपलभ्यते । [4] 'साध्यतमत्वख्यातेः' इति पा० ।

व्यायामभाराध्ययनैरभिघातातिमैथुनैः ।
कर्मणा चाप्युरस्येन[1] वक्षो यस्य विदारितम् ।
तस्योरसि क्षते रक्तं पूयः श्लेष्मा च गच्छति ॥२४॥
कासमानश्छर्दयेच्च पीतरक्तासितारुणम् ।
संतप्तवक्षाः सोऽत्यर्थं दूयनात्परिताम्यति ॥ २५ ॥
दुर्गन्धवदनोच्छ्वासो भिन्नवर्णस्वरो नरः ।

उरःक्षतशोषिणमाह—व्यायामेत्यादि । कर्मणा चाप्युरस्येनेति धनुराकर्षणादिनेत्यर्थः । क्षते अतिदारिते । असितमीषत्कृष्णं, अरुणमीषद्रक्तम् । दूयनादतिवेदनात्, परिताम्यति मोहं याति । दुर्गन्धशब्दो वदनोच्छ्वासाभ्यां संबध्यते ॥ २४ ॥ २५ ॥—

केषांचिदेवं शोषो हि कारणैर्भेदमागतः ॥ २६ ॥
न तत्र दोषलिङ्गानां समस्तानां निपातनम् ।

एकीयमतमाह—केषांचिदित्यादि । केषांचिदाचार्याणां मते एवं व्यवायादिभिरनेकैः कारणैः कृत्वा हि यस्मात् शोषो भेदमागतः; अत एक एव क्षमते शोषो नेतरे व्यवायादिजाः । कुतो व्यवायादिजाः शोषा न भवन्तीत्याह—न तत्रेत्यादि । तत्र तेषु व्यवायादिजेषु ॥ २६ ॥—

क्षया एव हि ते ज्ञेयाः प्रत्येकं धातुसंज्ञिताः ॥२७॥

यदि ते व्यवायादिजाः शोषाः न भवन्ति तर्हि किंनामधेया भवन्तीत्याह—क्षया एवेत्यादि । ते व्यवायादिजाः क्षया एव, किंविशिष्टाः ? प्रत्येकं धातुसंज्ञिताः धातुक्षयसंज्ञका इत्यर्थः । यतः शुक्रमारभ्य विलोमेन व्यवायादिभिर्धातूनां यथापूर्वं संक्षयात् ॥ २७ ॥

चिकित्सितं तु तेषां हि प्रागुक्तं धातुसंक्षये ॥ २८ ॥

तेषां किञ्चिच्चिकित्सितमाह—चिकित्सितं तु तेषामित्यादि । धातुसंक्षये दोषधातुमलक्षयवृद्धिविज्ञानीयाध्याये ॥ २८ ॥

श्वासाङ्गसादकफसंस्रवतालुशोष-
च्छर्द्यग्निसादमदपीनसपाण्डुनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥ २९ ॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठ-
गृध्रास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्ये-
च्छुष्कांस्तरून् पवनधूमदवार्दितांश्च ॥ ३० ॥

इदानीमेकीयमतं प्रदर्श्य संप्राप्त्यनन्तरं राजयक्ष्मणः पूर्वरूपाण्याह—श्वासाङ्गसादकफसंस्रवेत्यादि । अङ्गसादोऽङ्गानामनुत्साहः, अग्निसादोऽग्निमान्द्यम् । मदः पूगफलेनेव मत्तता । मांसपरो मांसाभिलाषी । रिरंसुः रन्तुमिच्छुः । शल्लकी गोधानुकारी वज्रशकलः 'शल्लक' इति लोके प्रसिद्धः, नीलकण्ठो मयूरः, गृध्रः आमिषाशी योजनदृष्टिः । कपयो वानराः । कृक-

[1] 'कर्मभिश्चाप्यनौरस्यैर्वक्षो' इति पा० ।

लासः कृकण्टकः 'गिरगिट' इति पूर्वदेशीया भाषन्ते । तं शोषिणं, वाहयन्ति प्रापयन्ति स शोषी । ननु, संप्राप्त्यनन्तरं पूर्वरूपेषु वक्तव्येषु कथं रूपाण्यभिधाय पूर्वरूपोपादानं कृतम् ? उच्यते—रूपाण्यव्यक्तानि पूर्वरूपाण्यस्येति प्रतिपादनार्थम् ॥ २९ ॥ ३० ॥

महाशनं क्षीयमाणमतीसारनिपीडितम् ।
शूनमुष्कोदरं चैव यक्ष्मिणं परिवर्जयेत् ॥ ३१ ॥

वर्ज्यमाह—महाशनमित्यादि । मुष्को वृषणम् । यक्ष्मिणमित्यत्रान्ये शोषिणमिति पठन्ति ॥ ३१ ॥

उपाचरेदात्मवन्तं दीप्ताग्निमकृशं नवम् ।

उपक्रम्यमाह—उपाचरेदात्मवन्तमित्यादि । आत्मवन्तं जितेन्द्रियम् ॥—

स्थिरादिवर्गसिद्धेन घृतेनाजाविकेन च ॥ ३२ ॥
स्निग्धस्य मृदु कर्तव्यमूर्ध्वं चाधश्च शोधनम् ।
आस्थापनं तथा कार्यं शिरसश्च विरेचनम् ॥ ३३ ॥

तदेव चिकित्सितमाह—स्थिरादिवर्गसिद्धेनेत्यादि । स्थिरादिर्विदारिगन्धादिः । मृदु यत् कर्शनं न भवतीत्यर्थः । आस्थापनं निरूहः । तथेति मृद्वित्यर्थः । शिरसो विरेचनं नस्यम् ॥ ३२ ॥ ३३ ॥

यवगोधूमशालींश्च रसैर्भुञ्जीत शोधितः ।

शोधितस्य पश्चात्कर्म आह—यवगोधूमेत्यादि । रसैः जाङ्गलमांसरसैः ॥—

दृढेऽग्नौ बृंहयेच्चापि निवृत्तोपद्रवं नरम् ॥ ३४ ॥

बृंहणविषयमाह—दृढेऽग्नावित्यादि । निवृत्तोपद्रवमिति प्रशान्तस्वरभेदादिकमित्यर्थः ॥ ३४ ॥

व्यवायशोषिणं प्रायो भजन्ते वातजा गदाः ।
बृंहणीयो विधिस्तस्मै हितः स्निग्धोऽनिलापहः ॥३५॥

इदानीं व्यवायशोषिणो विशिष्टं चिकित्सितमाह—व्यवायेत्यादि । व्यवायशोषिणमित्यादिवाक्यं केचिन्नेच्छन्ति, 'क्रियाणां चाविभागेन' इत्युक्तस्य व्याघातात् ॥ ३५ ॥

काकानुलूकान्नकुलान् बिडालान्
गण्डूपदान् व्यालबिलेशयाखून् ।
गृध्रांश्च दद्याद्विविधैः प्रवादैः
ससैन्धवान् सर्षपतैलभृष्टान् ॥ ३६ ॥
देयानि मांसानि च जाङ्गलानि
मुद्गाढकीसूपरसांश्च[3] हृद्याः ।
खरोष्ट्रनागाश्वतराश्वजानि
देयानि मांसानि सुकल्पितानि ॥ ३७ ॥
मांसोपदंशांश्च पिबेदरिष्टान्
मार्द्वीकयुक्तान् मदिराश्च सेव्याः ।
अर्कामृताक्षारजलोषितेभ्यः
कृत्वा यवेभ्यो विविधांश्च भक्ष्यान् ॥ ३८ ॥
खादेत्, पिबेत् सर्पिरजाविकं वा
कृशो यवाग्वा सह भक्तकाले ।
सर्पिर्मधुभ्यां त्रिकटु प्रलिह्या-
च्चव्याविडङ्गोपहितं क्षयार्तः ॥ ३९ ॥

शोषिणां यानि मांसान्यादेयानि तान्याह—काकानुलूकान्नकुलानित्यादि । बिडाला ग्राम्यादिभेदेन षट्प्रकारा मार्जाराः; तथा च—"ग्राम्यो वन्यस्तोयजातः पक्षिमार्जारविजकौ । सुगन्धवृषणश्चेति मार्जाराः षट् प्रकीर्तिताः"—इति । व्याला व्याघ्रादयः, बिलेशयाः श्वाविच्छल्लकीप्रभृतयः, आखुरत्र वृक्षमूषिकः । विविधैः प्रवादैरिति "काकांस्तित्तिरिशब्देन मत्स्यशब्देन चोरगान् । भृष्टमत्स्यान्त्रशब्देन दद्याद्गण्डूपदानपि" इत्यादिभिर्नानाप्रकारैर्वचनैः । एवंप्रकारेण दाने[1] किं प्रयोजनमिति चेत् ? अजुगुप्सया भक्षणं भक्षितस्य चानुल्लेखनम् । तथाचोक्तं—"जानन् जुगुप्सुर्नैवाद्याद्भुक्तं वा पुनरुल्लिखेत् । तस्माच्छद्मोपसिद्धानि मांसान्येतानि दापयेत्"—इति । जाङ्गलानि जङ्घालविष्किरप्रतुदजानि, शेषजाङ्गलवर्गाणामत्र विशेषेणाभिधानात् । यद्यपि जाङ्गलशब्देनैव गृध्रादयोऽपि लब्धास्तथाऽप्यत्यन्तबृंहणत्वाद्गृध्रादीनां पृथगुपादानम् । मुद्गाढकीसूपरसाः स्रोतःशुद्धिकरत्वाद्देयाः । नागो हस्ती, अश्वतरो वेशरः । सुकल्पितानि वेशवारीकृतानि नानाप्रकारप्रकल्पितानि[2] । तथा च वृद्धभोजः—"खरोष्ट्राश्वतरं नागं मांसं मांसाभिवृद्धये । दद्यान्माहिषशब्देन वेसवारीकृतं भिषक्"—इति । मांसोपदंशानरिष्टान् अभयारिष्टप्रभृतीन्, मार्द्वीकयुक्तान् द्राक्षासवयुक्तान्, मदिरा मद्यम् । भक्ष्यान्निर्देष्टुमाह—अर्कामृतक्षारजलोषितेभ्य इत्यादि । अर्कगुडूचीक्षारपानीयोषितेभ्यो यवेभ्यो भक्ष्यान् कृत्वा खादेदिति संबन्धः । उषितेभ्यो रात्रौ स्थितेभ्यः । अर्कादिभस्म चतुर्गुणेन जलेन गालयित्वा पचेद्यावदर्धावशिष्टं भवति । तथा चोक्तं—"पानाय भोजनायाथ भस्म स्राव्यं चतुर्गुणे । जलेऽर्धमवशिष्टे(ष्टं) तु क्षाराम्भो ग्राह्यमिष्यते"—इति । पिबेदित्यादि । अजाविकं वेति आजं वा आविकं वेत्यर्थः । अजेत्यत्र ह्रस्वत्वं छन्दोऽनुरोधात् । भक्तकाले भोजनकाले । सर्पिर्मधुभ्यामित्यादि । उपहितं संयुक्तम् ॥ ३६-३९ ॥

मांसादमांसेषु घृतं च सिद्धं
शोषापहं क्षौद्रकणासमेतम् ।

मांसादमांसेष्वित्यादि । मांसादा गृध्रादयः, तन्मांसरसे चतुर्गुणे सिद्धं सर्पिः क्षौद्रपिप्पलीयुक्तं शोषापहं भवति । क्षौद्रकणेत्यत्र दन्तिकणेति केचित् पठन्ति ॥—

द्राक्षासितामागधिकावलेहः
सक्षौद्रतैलः क्षयरोगघाती ॥ ४० ॥

१ 'नरं' इति पा० । २ 'प्रकारैः' इति पा० । ३ 'मुद्गाढकीयूपरसांश्च' इति पा० ।

१ 'एवंप्रकारदानैः' इति पा० । २ 'नान्यप्रकारकल्पितानि' इति ।

घृतेन चाजेन समाक्षिकेण
तुरङ्गगन्धातिलमाषचूर्णम् ।

द्राक्षेत्यादि । अवलेहोऽयम् ॥ ४० ॥—

सिताश्वगन्धामगधोद्भवानां
चूर्णं घृतक्षौद्रयुतं प्रलिह्यात् ॥ ४१ ॥

सिताश्वगन्धेत्यादि । सिता शर्करा, मगधोद्भवा पिप्पली ४१

क्षीरं पिबेद्वाऽप्यथ वाजिगन्धा-
विपक्वमेवं लभतेऽङ्गपुष्टिम् ।

क्षीरमित्यादि । वाजिगन्धाविपक्वं सामान्यक्षीरपाकपरिभाषया । वाजिगन्धा अश्वगन्धा ॥—

तदुत्थितं क्षीरघृतं सिताढ्यं
प्रातः पिबेद्वाऽपि पयोनुपानम् ॥ ४२ ॥

तदुत्थितं क्षीरघृतमित्यादि । तदुत्थितमश्वगन्धाविपक्वक्षीरोत्थं, क्षीरघृतं क्षीराद्विलोडितादुद्धृतं घृतम् ॥ ४२ ॥

उत्सादने चापि तुरङ्गगन्धा
योज्या यवाश्चैव पुनर्नवे च ।

उद्वर्तनमुपचर्यार्थमाह—उत्सादने इत्यादि । उत्सादनमुद्वर्तनम् । तुरङ्गगन्धा अश्वगन्धा । पुनर्नवे श्वेतरक्ते द्वे । ननु, शोषे बृंहणमुपयुज्यते, एताश्च विलेखनाः, ततः कथं तदुपयोगः ? सत्यं, बाह्योपयोगेन तेषां बृंहणत्वेनोपयोगात् ॥—

कृत्स्ने वृषे तत्कुसुमैश्च सिद्धं
सर्पिः पिबेत्क्षौद्रयुतं हिताशी ॥ ४३ ॥
यक्ष्माणमेतत् प्रबलं च कासं
श्वासं च हन्यादपि पाण्डुतां च ।

कृत्स्ने इत्यादि । कृत्स्ने वृषे इति समूलपत्रशाखाङ्कुरे । वासकाङ्गेभ्यः क्वाथे, तत्कुसुमैर्वासकपुष्पैः, 'कल्कीकृतैः' इति शेषः । सिद्धं सर्पिरिति चतुर्गुणक्वाथेन पुष्पकल्केनाष्टमभागेन च । तथा चोक्तं,—"शणस्य कोविदारस्य वृषस्य च पृथक् पृथक् । कल्काढ्यत्वान्न शंसन्ति पुष्पकल्पं चतुष्पलम्"—इति ॥४३॥

शकृद्रसा गोश्वगजाव्यजानां
क्वाथा मिताश्चापि तथैव भागैः ॥ ४४ ॥
मूर्वाहरिद्राखदिरद्रुमाणां
क्षीरस्य भागस्त्वपरो घृतस्य ।
भागान् दशैतान् विपचेद्विधिज्ञो
दत्त्वा त्रिवर्गं मधुरं च कृत्स्नम् ॥ ४५ ॥
कटुत्रिकं चैव सभद्रदारु
घृतोत्तमं यक्ष्मनिवारणाय ।

शकृद्रसा इत्यादि । गोश्वगजाविच्छगलीनां प्रत्येकं शकृद्रसाः, तथैव मूर्वाहरिद्राखदिरद्रुमाणां क्वाथभागैर्मिताः स्वल्पा भागाः, तथा क्षीरस्यापरो नवमो भागः, घृतस्य दशम इति, एतान् दशभागान् त्रिवर्गादिकेन कल्केन विपचेदिति संबन्धः । मूर्वा चोरस्नायुः । खदिरद्रुमाणामिति द्रुमग्रहणं मध्यमवयसः खदिरस्य ग्रहणार्थम् । त्रिवर्गः त्रिफला । मधुरं च कृत्स्नं[1] काकोल्यादिकम्, अपरेऽष्टवर्गमाहुः ॥ ४४ ॥ ४५ ॥—

द्वे पञ्चमूल्यौ वरुणं करञ्जं
भल्लातकं बिल्वपुनर्नवे च ॥ ४६ ॥
यवान् कुलत्थान् बदराणि भार्गी
पाठां हुताशं समहीकदम्बम् ।
कृत्वा कषायं विपचेद्धि तस्य
षड्भिर्हि पात्रैर्घृतपात्रमेकम् ॥ ४७ ॥
व्योषं महावृक्षपयोऽभयां च
चव्यं सुराख्यं लवणोत्तमं च ।
एतद्धि शोषं जठराणि चैव
हन्यात् प्रमेहांश्च सहानिलेन ॥ ४८ ॥

द्वे पञ्चमूल्यावित्यादि । द्वे पञ्चमूल्यौ दशमूलमित्यर्थः । बिल्वस्य पृथक्पाठादत्र फलं ग्राह्यम् । हुताशः चित्रकः, महीकदम्बो मुण्डितिका । कृत्वा कषायमिति दशमूलादीनामष्टषष्ट्यधिकानि सप्तशतपलानि चतुर्गुणेनाम्भसा निःक्वाथ्य चतुर्भागावशिष्टः क्वाथो ग्राह्यः । तस्य क्वाथस्य, पात्रैराढकैः । कल्कद्रव्याण्याह—व्योषमित्यादि । व्योषं त्रिकटुकं, महावृक्षपयः सेहुण्डक्षीरं, सुराख्यं देवदारु, लवणोत्तमं सैन्धवम्; केचित् 'लवणोत्तमं'इत्यत्र 'मगधोद्भवां' इति पठित्वा पिप्पलीमिति व्याख्यानयन्ति । प्रमेहांश्च सहानिलेनेति वातिकानपि प्रमेहान् हन्तीत्यर्थः; एतच्च स्तुतिपरं,[1] वातिकमेहानामसाध्यत्वात् ॥ ४६–४८ ॥

गोश्वाव्यजेभैणखरोष्ट्रजातैः
शकृद्रसक्षीररसक्षतोत्थैः ।
द्राक्षाश्वगन्धामगधासिताभिः
सिद्धं घृतं यक्ष्मविकारहारि ॥ ४९ ॥

गोश्वाव्यजेभैणेत्यादि । गोश्वादीनां शकृद्रसक्षीरमांसरसरुधिरैः द्राक्षादीनां कल्केन सिद्धं घृतं यक्ष्मविकारान् हन्तीति संबन्धः । इभा हस्तिनी, एणः कृष्णसारः । क्षीरं यथासंभवं ग्राह्यं, न तु सर्वेषाम् ॥ ४९ ॥

एलाजमोदामलकाभयाक्ष-
गायत्र्यरिष्टासनशालसारान् ।
विडङ्गभल्लातकचित्रकोग्रा-
कटुत्रिकाम्भोदसुराष्ट्रजांश्च ॥ ५० ॥
पक्त्वा जले तेन पचेद्धि सर्पि-
स्तस्मिन् सुसिद्धे त्ववतारिते च ।
त्रिंशत्पलान्यत्र सितोपलाया
दत्त्वा तुगाक्षीरिपलानि षट् च ॥ ५१ ॥

---

१ 'कल्कं' इति पा० ।

१ 'स्तुतिवचः' इति पा० ।

प्रस्थे घृतस्य द्विगुणं च दद्यात्
क्षौद्रं ततो मन्थहतं विदध्यात् ।
पलं पलं प्रातरतः प्रलिह्य
पश्चात् पिबेत् क्षीरमतन्द्रितश्च ॥ ५२ ॥
एतद्धि मेध्यं परमं पवित्रं
चक्षुष्यमायुष्यमथो यशस्यम् ।
यक्ष्माणमाशु व्यपहन्ति चैतत्
पाण्ड्वामयं चैव भगन्दरं च ॥ ५३ ॥
श्वासं च हन्ति स्वरभेदकास-
हृत्प्लीहगुल्मग्रहणीगदांश्च ।
न चात्र किंचित् परिवर्जनीयं
रसायनं चैतदुपास्यमानम् ॥ ५४ ॥

एलाजमोदेत्यादि । एलादिकान् सुराह्वजान्तान् कषायकल्पेन विपाच्य, तेन क्वाथेन सर्पिर्विपचेदिति संबन्धः । तस्मिन् क्वाथे सिद्धे पूते शर्करायास्त्रिंशत्पलानि दद्यात्, तुगाक्षीर्याश्च षट्पलानि, तथा घृतस्य प्रस्थे द्विगुणं द्विप्रस्थमितं क्षौद्रं दद्यात् । अक्षं बिभीतकं, गायत्री खदिरः, अरिष्टो निम्बः, असनो बीजकः, शालः प्रसिद्धः, सारशब्दः खदिरादिभिः संबध्यते । उग्रा वचा, अम्भोदो मुस्तं, सुराह्वजा तुवरमृत्तिका । तुगाक्षीरी वंशलोचनं, अन्ये वंशलोचनानुकारिपार्थिवद्रव्यमाहुः । मन्थहतं खजविलोडितम् । अतो अस्माद्रसायनात् । अतन्द्रितः अनलसः । मेध्यं मेधाजनकम् ॥ ५०-५४ ॥

प्लीहोदरोक्तं विहितं च सर्पि-
स्त्रीण्येव चान्यानि हितानि चात्र ।

अत्र रसायनेऽपराण्यपि घृतान्यतिदेशेनाह—प्लीहोदरोक्तं विहितमित्यादि । प्लीहोदरोक्तं षट्पलकं, त्रीण्येव चान्यानि उदरोक्तान्येव; तद्यथा—एकं 'हरीतकीचूर्णप्रस्थं' इत्यादिकं, द्वितीयं 'गव्ये पयसि महावृक्षक्षीरं' इत्यादि, तृतीयं 'चव्यचित्रकदन्त्यतिविषा' इत्यादिकम् । अत्र शोषे । एतानि स्रोतोवरोधशान्त्यर्थं रेचनत्वेन हितानि ।—

उपद्रवांश्च स्वरवैकृतादीन्
जयेद्यथास्वं प्रसमीक्ष्य शास्त्रम् ॥ ५५ ॥

स्वरभेदादीनां चिकित्सितमतिदेशेनाह—उपद्रवांश्च स्वरवैकृतादीनित्यादि । यथास्वं यस्य यदात्मीयं स्वरभेदादिशास्त्रं, तत् प्रसमीक्ष्येत्यर्थः ॥ ५५ ॥

अजाशकृन्मूत्रपयोघृताम्बु-
ज्यांसालयानि प्रतिसेवमानः ।
स्नानादिनानाविधिना जहाति
मासादशेषं नियमेन शोषम् ॥ ५६ ॥

इदानीमजायाः सर्वप्रकारेणोपयोगमाह—अजाशकृन्मूत्रेत्यादि । अजाशकृदादिकं यथासंभवं स्नानादिविधिना पुरुषः सेवमानोऽशेषं शोषं मासाज्जहातीति संबन्धः । अजाशब्दः शकृदादिभिरालयान्तैः प्रत्येकं संबध्यते । आलयं गृहम्, अजानामेव ॥ ५६ ॥

रसोनयोगं विधिवत् क्षयार्तः
क्षीरेण वा नागबलाप्रयोगम् ।
सेवेत वा मागधिकाविधानं
तथोपयोगं जतुनोऽश्मजस्य ॥ ५७ ॥

रसोनयोगमित्यादि । विधिवद्यथाशास्त्रम् । क्षीरेणेति नागबलाप्रयोगमागधिकाविधानाभ्यां संबध्यते । तथेति क्षीरेणेत्यर्थः । जतुनोऽश्मजस्य शिलाजतुनः ॥ ५७ ॥

शोकं स्त्रियं क्रोधमसूयनं च
त्यजे-

इदानीं परिहार्यमाह—शोकं स्त्रियमित्यादि । क्रोधः पराभिद्रोहलक्षणः; असूयनं परगुणेषु दोषारोपणम् ।—

दुदारान् विषयान् भजेत ।
वैद्यान् द्विजातींस्त्रिदशान् गुरूंश्च
वाचश्च पुण्याः शृणुयाद्द्विजेभ्यः ॥ ५८ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे (तृतीयोऽध्यायः, आदित) एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

इदानीं दैवव्यपाश्रयां चिकित्सामाह—उदारानित्यादि । उदारा विषया धर्माविरुद्धा मनोनुकूलाश्च शब्दादयः । भजेत सेवेत । द्विजातीन् विप्रान्, त्रिदशान् देवान्, गुरून् पितृमातृप्रभृतीन् । पुण्या वाचो वेदोक्ता रुद्रस्तुतिप्रभृतयः ॥ ५८ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे शोषप्रतिषेधनामैकचत्वारिंशत्तमोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशत्तमोऽध्यायः ।

अथातो गुल्मप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

शोषप्रतिषेधानन्तरं रिष्टोक्तक्रमानुक्रमेण गुल्मप्रतिषेधारम्भो युज्यत इत्याह—अथातो गुल्मप्रतिषेधमित्यादि ॥ १ ॥ २ ॥

यथोक्तैः कोपनैर्दोषाः कुपिताः कोष्ठमागताः ।
जनयन्ति नृणां गुल्मं स पञ्चविध उच्यते ॥ ३ ॥

तत्र निदानानन्तरयीकत्वात् प्रतिषेधस्यादौ गुल्मानां हेतुसंप्राप्तिसंख्या आह—यथोक्तैरित्यादि । यथोक्तैः कोपनैः व्रणप्रश्नोक्तैर्बलवद्विग्रहादिक्रोधादिदिवास्वप्नादिभिः । आमपक्वाग्निरक्तमूत्राशय हृदयोण्डुकफुप्फुसाश्च कोष्ठशब्दवाच्याः, तथा चोक्तम्—'स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च । हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते' इति । गुल्मः पञ्चविधः—पृथग्दोषैस्त्रयः, समस्तैरेकः, रक्तेनापरः, एवं पञ्चविधः । एत-

च प्रायोवचनं, द्वन्द्वजगुल्मानां सद्भावात् । तथा चोक्तम्—"व्यामिश्रलिङ्गानपरांस्तु गुल्मांस्त्रीनादिशेद्भेषजकल्पनार्थम्—" इति, तथा व्रणप्रश्नोक्तप्रसरतया पञ्चदशप्रकारगुल्मसंभवात् । यथोक्तैः कोपनैरित्यादिर्हेतुः, दोषाः कुपिता इत्यादिः संप्राप्तिः, स पञ्चविध इत्येषा संख्या ॥ ३ ॥

हृद्बस्त्योरन्तरे ग्रन्थिः संचारी यदि वाऽचलः ।
चयापचयवान् वृत्तः स गुल्म इति कीर्तितः ॥ ४ ॥

गुल्मस्य रूपमाह—हृद्बस्त्योरन्तरे ग्रन्थिरित्यादि । हृद्बस्त्योः हृदये च बस्तौ च, वा तयोरेवान्तरे; तेन सर्वमुदरमाक्षिप्तम् । संचारी चलनशीलः, वाताधिक्यात् । अचल एकस्थानशायी, वायोरल्पत्वात् । चयापचयवान् कदाचिदुपचितः कदाचिदपचित इति, विचित्रक्रियत्वाद्वायोः । वृत्तो वर्तुलः । केचित् 'हृन्नाभ्योरन्तरे' इति पठन्ति; ते च नाभिग्रहणेनैव सामीप्याद्बस्तिं गृह्णन्ति । चयापचयवानित्यत्र 'स्थिरोपचयवान्' इति केचित् पठन्ति, स्थिर उपचयो वृद्धिर्यस्य स इति च व्याख्यानयन्ति ४

पञ्च गुल्माश्रया नृणां पार्श्वे हृन्नाभिवस्तयः ।

इदानीं तत्राप्युदरे पञ्चगुल्माश्रयानाह—पञ्च गुल्माश्रया इत्यादि । सुबोधमेतत् । कार्तिककुण्डस्त्वेनं पाठं 'स व्यस्तैर्जायते दोषैः' इत्यादिवाक्यादनन्तरं पठति ॥—

गुंपितानिलमूलत्वाद्गूढमूलोदयादपि ॥ ५ ॥
गुल्मवद्वा विशालत्वाद्गुल्म इत्यभिधीयते ।

अथ गुल्मनिरुक्तिमाह—गुंपितानिलमूलत्वादित्यादि । गुंपितानिलमूलत्वात् आकुलीकृतवायुमूलत्वात्, एतेन सर्वगुल्मानां वायुः कारणम् । गूढमूलोदयादिति गूढमूलाः कन्दादयः, तेषामिवोदयादुत्पत्तेः; अन्ये तु गूढमूलो गुप्तकारण उदयो यस्य स तथा तस्मात्, मूलस्य वायोर्गूढत्वमावृतत्वमुच्यते तत्प्रकोपद्वैविध्यात्; तथा च—"वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन च"—इति । गुल्मवत् मनुष्यादिसंहतिवत् । विशालत्वाद्विस्तीर्णत्वात् । एतेनैतदुक्तं भवति—यथा संहतिविशेषेणावस्थिता मनुष्यवृक्षादयो गुल्मव्यपदेशं भजन्ते—मनुष्यगुल्मो वृक्षगुल्म इति, एवमत्रापि । दृष्टान्तत्रयं गुल्मस्य दोषत्रयोद्भवत्वप्रदर्शनार्थम् । 'गुपितानिलमूलत्वात्' इत्यत्र 'कुपितानिलमूलत्वात्' इति केचित् पठन्ति । तत्रापि स एवार्थः । 'गूढमूलोदयात्' इत्यत्रापरे 'गूढगुल्मोदयात्' इति पठन्ति, व्याख्यानयन्ति च—गूढस्य लतादिवृतस्य गुल्मस्येव वर्तुलविटपस्येव उदयादुत्पत्तेर्गुल्म इत्यर्थः ॥ ५ ॥—

स यस्मादात्मनि चयं गच्छत्यप्स्विव बुद्बुदः ॥ ६ ॥
अन्तः सरति यस्माच्च न पाकमुपयात्यतः ।

इदानीं यथा न पच्यते गुल्मस्तथाऽऽह—स यस्मादित्यादि । स गुल्मो यस्मात् कारणादात्मनि स्वावयवे चयं निचयं गच्छति याति; अप्स्विव बुद्बुद उद्गच्छति उद्वर्तिं याति, तथा गुल्मरूपोऽपि दोषः स्वावयवे उद्गच्छति उद्वर्तिं याति; अन्तः अभ्यन्तरे, सरति भ्राम्यति । एवम्भूतः प्रायेण वातिको भवति, स च न पच्यते; इतरे च गुल्मा यदा रक्तादिदूष्यमधिष्ठायावतिष्ठन्ते तदा कदाचित् पच्यन्ते । तथा चोक्तम्—"रक्तपित्तातिवृद्धत्वात् क्रियामनुपलभ्य वा । यदि गुल्मो विदह्येत शस्त्रं तत्र भिषग्जितम्"—इति । अथैवमन्तर्विद्रधेर्गुल्मस्य च शीघ्रमन्दपाकित्वेन भेदः ॥ ६ ॥—

स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः ॥ ७ ॥
पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ।

इदानीं 'स पञ्चविध उच्यते' इत्यस्यैव विवरणमाह—स व्यस्तैर्जायते दोषैरित्यादि । स गुल्मः, व्यस्तैः एकैकैः, उच्छ्रितैः प्रकुपितैः, रक्तेन आर्तवरक्तेन; चकारात् धातुरक्तेनापि गुल्मो जायते, स च पुंसां स्त्रीणां च भवति; तस्य च पृथगुपादनं न कृतं, पैत्तिकगुल्मसमानलक्षणतया तत्रैवावरोधात् ॥ ७ ॥—

सदनं मदन्ता वह्नेराटोपोऽन्त्रविकूजनम् ॥ ८ ॥
विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा ।
द्वेषोऽन्ने वायुरूर्ध्वं च पूर्वरूपेषु गुल्मिनाम् ॥ ९ ॥

गुल्मपूर्वरूपाण्याह—सदनमित्यादि । आटोप उदरापूरः । सङ्गो निरोधः । सौहित्यासहता तृप्त्यक्षमत्वम् । वायुरूर्ध्वं सन्ततोद्गार इत्यर्थः ॥ ८ ॥ ९ ॥

हृत्कुक्षिशूलं मुखकण्ठशोषो
वायोर्निरोधो विषमाग्निता च ।
ते ते विकाराः पवनात्मकाश्च
भवन्ति गुल्मेऽनिलसंभवे तु ॥ १० ॥

वातगुल्मलक्षणमाह—हृत्कुक्षिशूलमित्यादि । विषमाग्निता चेति चकारान्मुखवैरस्यं ग्राह्यम् । ते ते विकाराः स्तम्भकम्पादयः । केचिद्वातगुल्मलक्षणं 'आध्मानशूले भवतोऽतिमात्रं' इत्यादिना पाठेन पठन्ति; स चाभावान्न लिखितः ॥ १० ॥

स्वेदज्वराहारविदाहदाहा-
स्तृष्णाऽङ्गरागः कटुवक्त्रता च ।
पित्तस्य लिङ्गान्यखिलानि यानि
पित्तात्मके तानि भवन्ति गुल्मे ॥ ११ ॥

पित्तगुल्मलक्षणमाह—स्वेदेत्यादि । आहारविदाहः भुक्तमात्रस्याहारस्याम्लिकादिसद्भावः । पित्तस्य लिङ्गानि भ्रममदमूर्च्छादीनि । पित्तगुल्मलक्षणमपि केचिदन्यपाठेन पठन्ति । यथा—'अम्लीभवत्यन्नमथो ज्वरश्च दाहः पिपासा कटुवक्त्रता च । पित्तस्य लिङ्गानि च कीर्तितानि भवन्ति पित्तप्रभवे तु गुल्मे' इति ॥ ११ ॥

स्तैमित्यमन्नेऽरुचिरङ्गसाद-
श्छर्दिः प्रसेको मधुरास्यता च ।

१-२-३-'कुपितानिलमूलत्वात्' इति पा० । ४ 'वनस्पत्यादिसंहतिवत्' इति पा० । ५ 'लतादिच्छन्नस्य' इति पा० ।

१ 'सोऽप्यभावान्न लिखितः' इति पाठान्तरम् ।

कफस्य लिङ्गानि च यानि तानि
भवन्ति गुल्मे कफसंभवे तु ॥ १२ ॥

कफगुल्मलक्षणमाह—स्तैमित्यमित्यादि। स्तैमित्यं स्तिमितता। अन्ने अरुचिः अन्नानभिलाषः। प्रसेको लालास्रावः। कफस्य लिङ्गानि गौरवशैत्यादीनि। कफगुल्ममपि केचित् "अन्ने न लिप्सा गुरुगात्रता च छर्दिः प्रसेको मधुरास्यता च" इत्यादिपाठेन पठन्ति, सोऽप्यभावान्न दर्शितः ॥ १२ ॥

सर्वात्मकः सर्वविकारयुक्तः
सोऽसाध्य उक्तः

सन्निपातगुल्मलक्षणमाह—सर्वात्मक इत्यादि। सर्वविकारयुक्तः प्रत्येकवातादिगुल्मोक्तलक्षणसहितः। 'सर्वात्मके सर्वरुजोपपत्तिः' इति केचित् पठन्ति, व्याख्यानयन्ति च—सर्वलिङ्गोपपत्तिरिति वक्तव्ये सर्वरुजोपपत्तिरिति यत्कृतं तन्महारुजत्वप्रतिपादनार्थम्[1]। केचिदत्र निचयगुल्मं पुरीषलसिकारक्तजन्यं दक्षिणपार्श्वाश्रितं पठन्ति। तस्य विशेष उच्यते,—"सिराजालपरिच्छन्नो दाहरागज्वरान्वितः। कूर्मवद्रक्तपर्यन्तस्त्रिदोषः स न सिध्यति"—इति। केचिच्च गुल्मावस्थाविशेषमुपस्तम्भनामान्तरं[2] पठन्ति—"पयो ह्यम्लसमायुक्तं दधिभावं व्रजेद्यथा। यत्नहीनस्य गुल्मोऽपि तथोपस्तम्भतां व्रजेत् ॥ अम्भोवहे स्तम्भयित्वा स्रोतसी कोष्ठसंश्रितः। उदरे प्रति सन्तिष्ठेदुपस्तम्भं तु तं विदुः"-इति ॥—

क्षतजं प्रवक्ष्ये।
नवप्रसूताऽहितभोजना या
या चामगर्भं विसृजेदृतौ[3] वा ॥ १३ ॥
वायुर्हि तस्याः परिगृह्य रक्तं
करोति गुल्मं सरुजं सदाहम्।
पैत्तस्य लिङ्गेन समानलिङ्गं
विशेषणं चाप्यपरं निबोध ॥ १४ ॥
न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम्।
तं गर्भकालातिगमे चिकित्स्य-
मसृग्भवं गुल्ममुशन्ति तज्ज्ञाः ॥ १५ ॥

आर्तवरक्तजगुल्मं हेत्वादिभिराह—क्षतजमित्यादि। क्षतजशब्देनार्तवरक्तमुच्यते[4], कारणे कार्योपचारात्। आमगर्भः षण्मासं यावत्। ऋतावित्यत्रापि अहितभोजनेति संबध्यते। पैत्तस्य पित्तजगुल्मस्य। विशेषणं विशेषम्। निबोध जानीहि। न स्पन्दते न चलति, 'अङ्गैः' इति शेषः। अन्ये तु परतो निषेधस्योभयत्र संबन्धात् स्पन्दते इत्येव वर्णयन्ति; तेन पिण्डितः स्पन्दत एवेत्यर्थः; तथाचोक्तम्—'यः स्पन्दते पिण्डित एव नाङ्गैः' इति। गर्भिणीनां लिङ्गानि श्रमादीनि सदनान्तान्यत्र व्याधिस्वभावाद्भवन्ति। तं रक्तगुल्मम्। गर्भकालातिगमे प्रसूतिकालेऽतिक्रान्ते; प्रसूतिकालादनन्तरं पिण्डीभूते रक्तगुल्मे स्नेहादिनोपस्कृतदेहायाः सुखसाध्यत्वम्। उक्तं च—"ज्वरे तुल्यर्तुदोषत्वं प्रमेहे तुल्यदूष्यता। रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणम्" इति। केचिदेवं व्याख्यानयन्ति—'मासे व्यतीते दशमे चिकित्स्यः' इति वक्तव्ये 'तं गर्भकालातिगमे चिकित्स्यम्' इति यत्कृतं तद्रक्तगुल्मे सम्यगुपचिते प्रसूतिकालादर्वागपि चिकित्सा करणीयेति बोधयति ॥ १३–१५ ॥

वातगुल्मार्दितं स्निग्धं युक्तं स्नेहविरेचनैः।
उपाचरेद्यथाकालं निरूहैः सानुवासनैः ॥ १६ ॥

अतः परं चिकित्सामाह—वातगुल्मार्दितमित्यादि। स्निग्धमवस्थापेक्षया चतुर्भिरपि स्नेहैः। यथाकालमिति पक्षाद्विरेको वान्तस्येत्यादिनोक्तस्य कालस्यानतिक्रमेणेत्यर्थः; 'यथाकालं' इत्यत्र 'यथायोगं' इति पठित्वा यथावस्थमिति व्याख्यानयन्ति ॥१६॥

पित्तगुल्मार्दितं स्निग्धं काकोल्यादिघृतेन तु।
विरिक्तं मधुरैर्योगैर्निरूहैः समुपाचरेत् ॥ १७ ॥

पित्तगुल्मार्दितमित्यादि। मधुरैर्योगैरारग्वधादिभिः क्षीरशर्करादिमिश्रैः; अन्ये तु भित्त्वा द्विषेक्षुमित्याद्युक्तैर्मधुरैर्योगैरिति व्याख्यानयन्ति। निरूहैः समुपाचरेन्मधुरैरेव ॥ १७ ॥

श्लेष्मगुल्मार्दितं स्निग्धं पिप्पल्यादिघृतेन तु।
तीक्ष्णैर्विरिक्तं तद्रूपैर्निरूहैः समुपाचरेत् ॥ १८ ॥

श्लेष्मगुल्मार्दितमित्यादि। तीक्ष्णैर्दन्तीन्द्रवन्तीप्रभृतिभिः। तद्रूपैर्निरूहैस्तीक्ष्णैः 'आरग्वधादिभिः क्वाथः' इत्यादिभिरित्यर्थः। सर्वगुल्मेषु स्नेहस्वेदौ प्रयोज्यौ, वातानुबन्धत्वात्[1] ॥१८॥

सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः।

सन्निपातोत्थिते गुल्मे इत्यादि। ननु, पूर्वं सान्निपातिको गुल्मोऽसाध्य उक्तः, तत् कथं त्रिदोषघ्नो विधिर्हित इत्युच्यते? सत्यं, यथा[2] विषमसन्निपातजो गुल्मोऽसाध्यस्तथा समसन्निपातजोऽभिनवो बलवति पुरुषे कृच्छ्रसाध्यः, अतोऽत्र चिकित्सितमुक्तम्। तथाचोक्तं—"सन्निपातोत्थितो गुल्मस्त्रिरोत्थोऽसमदोषजः। वर्जनीयोऽन्यथा कृच्छ्रसाध्यो बलवतो मतः"—इति ॥—

पित्तवद्रक्तगुल्मिन्या नार्याः कार्यः क्रियाविधिः ॥१९॥
विशेषमपरं चास्याः श्रृणु रक्तविभेदनम्।
पलाशक्षारतोयेन सिद्धं सर्पिः प्रयोजयेत् ॥ २० ॥
दद्यादुत्तरबस्तिं च पिप्पल्यादिघृतेन तु।
उष्णैर्वा भेदयेद्भिन्ने विधिरासृग्दरो हितः ॥ २१ ॥

पित्तवद्रक्तगुल्मिन्या इत्यादि। पित्तवत् पित्तगुल्मवत्।

१ 'तन्महारुजासूचनार्थम्' इति पा०। २ 'गुल्मावस्थाविशेषप्रास्या नामान्तरं' इति पा०। ३ 'प्रसवेदृतौ' इति पा०। ४ 'क्षतजशब्देनात्र रक्तमुच्यते' इति पा०।

१ 'हेतवः' इति पा०। २ 'सम्यक् ज्ञाते' इति पा०। ३ 'वातसद्भावात्' इति पाठान्तरम्। ४ 'यस्मात्' इति पा०। ५ 'पलाशभसतोयेन' इति पा०

पित्तगुल्मचिकित्सया प्रतिकृतस्य रक्तगुल्मस्य विशेषचिकित्सामाह—विशेषमपरं चास्या इत्यादि । पलाशक्षारतोयेन पलाशभस्मगालितेन जलेन । केचित्तोयशब्दं क्वाथे वर्णयन्ति । स च क्षारक्वाथः स्नेहोपयोगोक्तविधिना कार्यः । पिप्पल्यादिगणकल्कक्वाथाभ्यां साधितघृतेन । उष्णैरिति पिप्पल्यादिप्रभृतिभिः । विधिरासृग्दर इति रक्तपित्तोक्तो विधिः; कुत एतत्? असृग्दरे रक्तपित्तविध्यतिदेशात्; असृग्दरविध्यतिदेशेन रक्तपित्तविध्यतिदेशं कुर्वन्नेतज्ज्ञापयति–अधोगतरक्तपित्तचिकित्सितमत्र कार्यमिति ॥ १९–२१ ॥

आनूपौदकमज्जानो वसा तैलं घृतं दधि ।
विपक्वमेकतः शस्तं वातगुल्मेऽनुवासनम् ॥ २२ ॥

वातगुल्मेऽनुवासनमुद्दिशन्नाह—आनूपौदकमज्जान इत्यादि । आनूपा गजगवयादयः, औदका मत्स्यादयः । वसाऽपि आनूपादीनामेव । विपक्वमेकत इति एतच्च स्नेहमेकीकृत्य विपक्वम्, अर्थाद्वातहरैर्द्रव्यैरिति बोद्धव्यम् ॥ २२ ॥

जाङ्गलैकशफानां तु वसा सर्पिश्च पैत्तिके ।

पैत्तिके गुल्मेऽनुवासनमाह—जाङ्गलैकशफानामित्यादि । अत्र जाङ्गलशब्देन जङ्घालविष्किरौ प्रधानतया गृह्येते । एकशफा अश्ववेशरादयः । वसा सर्पिश्चेति अत्रापि विपक्वमिति संबध्यते । तेनैतद्द्वयं पित्तहरैर्द्रव्यैर्विपक्वं पैत्तिके गुल्मेऽनुवासनं योज्यमिति ।—

तैलं जाङ्गलमज्जान एवं गुल्मे कफोत्थिते ॥ २३ ॥

कफगुल्मेऽनुवासनमाह—तैलं जाङ्गलमज्जान इत्यादि । एवमिति कफहरद्रव्यैर्विपक्वमनुवासनं शस्तमित्यर्थः ॥ २३ ॥

धात्रीफलानां स्वरसे षडङ्गं विपचेद्घृतम् ।
शर्करासैन्धवोपेतं तद्धितं वातगुल्मिने ॥ २४ ॥

वातादिजगुल्मेष्वनुवासनमभिधाय वातापहघृतान्याह—धात्रीफलानामित्यादि । धात्रीफलानां स्वरसे चतुर्गुणे; षडङ्गमिति षट्पलकं; तेनात्र पञ्चकोलयवक्षारकल्कमिति लभ्यते । शर्करासैन्धवोपेतमिति शर्करासैन्धवप्रक्षेपयुक्तं तद्घृतं वातगुल्मिने हितमित्यर्थः ॥ २४ ॥

चित्रकव्योषसिन्धूत्थपृथ्वीकाचव्यदाडिमैः ।
दीप्यकग्रन्थिकाजाजीहपुषाधान्यकैः समैः ॥ २५ ॥
दध्यारनालबदरमूलकस्वरसैर्घृतम् ।
तत्पिबेद्वातगुल्माग्निदौर्बल्याटोपशूलनुत् ॥ २६ ॥

चित्रकादिघृतमाह—चित्रकव्योषेत्यादि । पृथ्वीका हिङ्गुपत्रिका, 'कृष्णजीरक' इत्यन्ये; दीप्यकोऽजमोदा, ग्रन्थिकं पिप्पलीमूलम् । समैरिति 'कल्कीकृतैः' इत्यध्याहार्यम् । दध्यादीनि मूलकस्वरसान्तानि प्रत्येकं घृताच्चतुर्गुणानि ॥२५॥२६॥

हिङ्गुसौवर्चलाजाजीविडदाडिमदीप्यकैः ।
पुष्करव्योषधान्याम्लवेतसक्षारचित्रकैः ॥ २७ ॥
शटीवचाजगन्धैलासुरसैश्च विपाचितम् ।
शूलानाहहरं सर्पिर्दध्ना चानिलगुल्मिनाम् ॥ २८ ॥

हिङ्ग्वाद्यं घृतमाह—हिङ्गुसौवर्चलेत्यादि । धान्यं धान्यकम् । अजगन्धा बोवयिका । सुरसः तुलसी । हिङ्ग्वादीनां सुरसान्तानां कल्के दध्ना चतुर्गुणेन विपाचितं सर्पिः शूलादिहरमिति संबन्धः ॥ २७ ॥ २८ ॥

विडदाडिमसिन्धूत्थहुतभुग्व्योषजीरकैः ।
हिङ्गुसौवर्चलक्षाररुग्वृक्षाम्लाम्लवेतसैः ॥ २९ ॥
बीजपूररसोपेतं सर्पिर्दधिचतुर्गुणम् ।
साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित् ॥३०॥

दाधिकसंज्ञं घृतमाह—विडदाडिमसिन्धूत्थेत्यादि । हुतभुक् चित्रकः । क्षारो यवक्षारः, रुक् कुष्ठं, वृक्षाम्लं तिन्तिडीकम् । बीजपूरकरसोऽत्र चतुर्गुणः, द्रवद्रव्यत्वात् ॥ २९ ॥ ३० ॥

रसोनस्वरसे सर्पिः पञ्चमूलरसान्वितम् ।
सुरारनालदध्यम्लमूलकस्वरसैः सह ॥ ३१ ॥
व्योषदाडिमवृक्षाम्लयवानीचव्यसैन्धवैः ।
हिङ्ग्वम्लवेतसाजाजीदीप्यकैश्च समांशिकैः ॥ ३२ ॥
सिद्धं गुल्मग्रहण्यर्शःश्वासोन्मादक्षयज्वरान् ।
कासापस्मारमन्दाग्निप्लीहशूलानिलाञ्जयेत् ॥ ३३ ॥

रसोनादिघृतमाह—रसोनस्वरसे इत्यादि । पञ्चमूलरसान्वितमिति बिल्वादिपञ्चमूलक्वाथान्वितम् । आरनालं काञ्जिकं, दध्यम्लं दधिमस्तु । दीप्यकोऽजमोदा । रसोनस्वरसादिमूलकस्वरसान्तैः षड्भिर्द्रवैर्घृतसमैः, व्योषादिद्रव्यैः कल्कितैः सर्पिश्चतुर्थांशैः, सिद्धं सर्पिर्गुल्मादीन् जयेदिति संबन्धः ॥ ३१–३३ ॥

दधि सौवीरकं सर्पिः क्वाथौ मुद्गकुलत्थजौ ।
पञ्चाढकानि विपचेदावाप्य द्विपलान्यथ ॥ ३४ ॥
सौवर्चलं सर्जिकां च देवदार्वथ सैन्धवम् ।
वातगुल्मापहं सर्पिरेतद्दीपनमेव च ॥ ३५ ॥

दधि सौवीरकमित्यादि । दध्यादीनि चत्वारि पृथगाढकप्रमाणानि, सौवर्चलादीनि द्विपलान्यावाप्य सर्पिराढकं विपचेत्; अयमत्र सिद्धः पाठः, पारंपर्याविच्छेदस्मरणात् । वर्तमानपुस्तकेषु चायं पठ्यते—कुलत्थमूलकक्वाथेत्यादि ॥ ३४ ॥ ३५ ॥

तृणमूलकषाये तु जीवनीयैः पचेद्घृतम् ।
न्यग्रोधादिगणे वाऽपि गणे वाऽप्युत्पलादिके ॥३६
रक्तपित्तोत्थितं घ्नन्ति घृतान्येतान्यसंशयम् ।

पित्तजरक्तजगुल्मयोर्घृतान्याह—तृणमूलकषाये इत्यादि । अत्र तृणमूलशब्दात्तृणपञ्चमूलकषाये इति बोद्धव्यम् । जीवनीयैरिति काकोल्यादिभिः कल्कीकृतैरित्यर्थः । न्यग्रोधादिगणे क्वाथीकृते इति ज्ञेयम् । वाऽपीत्यपिशब्दो जीवनीयैः पचेद्घृत-

१ 'मृदुकृतस्य' इति पा० । २ 'वर्तयन्ति' इति पा० । ३ 'अपराणि घृतान्याह' इति पा० ।

मिति समुच्चिनोति । एवमुत्पलादावपि ग्राह्यम् । रक्तपित्तोत्थितं 'गुल्मं' इति शेषः ॥ ३६ ॥—

आरग्वधादौ विपचेद्दीपनीययुतं घृतम् ॥ ३७ ॥
क्षारवर्गे पचेच्चान्यत् पचेन्मूत्रगणेऽपरम् ।
घ्नन्ति गुल्मं कफोद्भूतं घृतान्येतान्यसंशयम् ॥३८॥

कफगुल्मे घृतान्याह—आरग्वधादौ विपचेदित्यादि । आरग्वधादाविति क्वाथीकृते । दीपनीययुतमिति पिप्पल्यादिकल्कयुतम् । एकं घृतम् । क्षारवर्गे इति मुष्ककादारभ्य यावच्चतस्रः कोशातकीरिति क्षारवर्गे, मुष्ककादिगणे इत्यन्ये व्याख्यानयन्ति । अत्रापि दीपनीययुतमिति संबध्यते, तेन क्षीरवर्गद्रवे पिप्पल्यादिकल्कयुतं घृतं पचेदित्यर्थः; द्वितीयं घृतमित्यर्थः । पचेन्मूत्रगणेऽपरमिति मूत्रगणे गोमूत्रादिकेऽष्टसंख्याकेऽपरं तृतीयं घृतम् । अत्रापि दीपनीययुतमिति संबध्यते । 'मूत्रगणेऽपरम्' इत्यत्रान्ये 'दीपनीयगणेऽपरम्' इति पठन्ति, तच्च टीकाकारा अनार्षं वर्णयन्ति । केचिदिदं कफगुल्मचिकित्सितं वातगुल्मचिकित्सानन्तरं पठित्वा वातावरकं कफशान्तये कफहन्तॄण्यपि घृतानि वातगुल्मे शस्तानीति व्याख्यानयन्ति ॥ ३७ ॥ ३८ ॥

यथादोषोच्छ्रयं चापि चिकित्सेत्सान्निपातिकम् ।

एवं घृतान्यभिधायाधुना सान्निपातिके दोषोद्रेकेण घृतचूर्णादिभिश्चिकित्सितमाह—यथेत्यादि । यथादोषोच्छ्रयं यो यो दोष उच्छ्रित उत्कटस्तच्चिकित्सया चिकित्सेदित्यर्थः । 'यथादोषोच्छ्रयं' इत्यत्रान्ये 'यथादोषबलं'इति पठन्ति; तत्राप्येकोऽर्थः ॥—

चूर्णं हिङ्ग्वादिकं वाऽपि घृतं वा प्लीहनाशनम् ३९
पिबेद्गुल्मापहं काले सर्पिस्तैल्वकमेव वा ।

तच्च यथादोषोच्छ्रयं चिकित्सितं वाते जिते सति कार्यमिति वातहरविधिमाह—चूर्णमित्यादि । चूर्णं हिङ्ग्वादिकमिति हिङ्गुत्रिकटुकेत्यादिना वातव्याध्युक्तम् । घृतं वा प्लीहनाशनमिति षट्पलकमित्यर्थः । यद्यपि षट्पलं घृतं तन्त्रान्तरे कफगुल्महरत्वेन दर्शितं, तथाऽप्यत्र विलक्षणैकद्रव्यत्वाद्वातगुल्महरत्वम् । काले उत्पन्नमात्र एव षट्पलकं घृतं हितं, काले अवस्थायामित्यन्ये । सर्पिस्तैल्वकमिति तिल्वकः पट्टिकारोध्रः, तेन संस्कृतं तैल्वकं, वातव्याध्युक्तं वा ॥ ३९ ॥—

तिलेक्षुरकपालाशसार्षपं यावनालजम् ॥ ४० ॥
भस्म मूलकजं चापि गोजाविखरहस्तिनाम् ।
मूत्रेण महिषीणां च पालिकैश्चावचूर्णितैः ॥ ४१ ॥
कुष्ठसैन्धवयष्ट्याह्वनागरकृमिघातिभिः ।
साजमोदैश्च दशभिः सामुद्राच्च पलैर्युतम् ॥ ४२ ॥
अयःपात्रेऽग्निनाऽल्पेन पक्त्वा लेह्य(ह)मथोद्धरेत् ।
तस्य मात्रां पिबेद्धा सुरया सर्पिषाऽपि वा ॥४३॥
धान्याम्लेनोष्णतोयेन कौलत्थेन रसेन वा ।
गुल्मान् वातविकारांश्च क्षारोऽयं हन्त्यसंशयम्॥४४॥

१ 'क्षारवर्गद्रवे' इति पा० ।

पानीयं क्षारमाह—तिलेत्यादि । इक्षुरकः कोकिलाक्षकः । नागरकस्थाने केचित्त्र्यूषणं पठन्ति । कृमिघाति विडङ्गम् । तिलादीनां मूलकान्तानां भस्म गवादिमूत्रगणेन चतुर्गुणेन क्षारकल्पेन परिस्राव्य कुष्ठादिभिरजमोदान्तैः पालिकैः सामुद्रात् समुद्रलवणाद्दशभिः पलैश्चूर्णितैर्युतं लोहपात्रे मृदुना चाग्निना लेह्यं पक्त्वा उद्धरेदिति संबन्धः । अन्ये तु व्याख्यानयन्ति–तिलादिभस्मपलशतं गवादिमूत्रेण चतुर्गुणेन निःक्काथ्य पादभागिकमवशेष्य, तच्चतुर्थांशं कुष्ठादिचूर्णमावाप्य तावत् पचेद्यावल्लेह्यं भवति । दध्नेत्याद्यनेकावलोडनद्रव्योपदेशो दोषकालाद्यपेक्षया । वातविकारान् तूनीप्रभृतीन् ॥ ४०–४४ ॥

स्वर्जिकाकुष्ठसहितः क्षारः केतकिजोऽपि वा ।
तैलेन शमयेत् पीतो गुल्मं पवनसंभवम् ॥ ४५ ॥

श्लोकेन योगद्वयमाह—स्वर्जिकेत्यादि । क्षारो यवक्षारः । तत्र स्वर्जिकाकुष्ठसहितो यवक्षारस्तैलेनेत्येको योगः; केतकिजोऽपि वेत्यत्रापि क्षार इति संबध्यते, तेन केतकिजोऽपि वा क्षारस्तैलेनेति द्वितीयो योगः । गौडास्तु केतकिक्षारः स्वर्जिकाकुष्ठसहितस्तैलेनेत्येकमेव योगं मन्यन्ते ॥ ४५ ॥

पीतं सुखाम्बुना वाऽपि स्वर्जिकाकुष्ठसैन्धवम् ।

क्षारावलेहमभिधाय चूर्णमाह—पीतमित्यादि । सुखाम्बुना ईषदुष्णोदकेन । गुल्मं हन्तीत्यत्रापि संबध्यते ॥—

वृश्चीव(र)मुरुबूकं च वर्षाभूर्बृहतीद्वयम् ॥ ४६ ॥
चित्रकं च जलद्रोणे पक्त्वा पादावशेषितम् ।
मागधीचित्रकक्षौद्रलिप्ते कुम्भे निधापयेत् ॥ ४७ ॥
मधुनः प्रस्थमावाप्य पथ्याचूर्णार्धसंयुतम् ।
बुसोषितं दशाहं तु जीर्णभक्तः पिबेन्नरः ॥ ४८ ॥
अरिष्टोऽयं जयेद्गुल्ममविपाकमरोचकम् ।

वृश्चीवाद्यरिष्टमाह—वृश्चीवेत्यादि वृश्चीवः शुक्लपुनर्नवा । उरुबूकः शुक्लैरण्डः । वर्षाभूः रक्तपुनर्नवा । बृहतीद्वयमिति एका अणुफला द्वितीया कण्टकिनी स्थूलफला । वृश्चीवादीनां चित्रकान्तानामाढकम्; अन्ये पलशतं मन्यन्ते, द्रोणेऽम्भसि पलशतमित्यादिपरिभाषितत्वात् । पादावशेषितं चतुर्थांशावशिष्टं क्वाथं, मगधादिप्रमाणं यावन्मात्रेण कुम्भस्य सम्यग्लेपनं भवति, पथ्याचूर्णार्धसंयुक्तं हरीतकीचूर्णाष्टपलसंयुतम् । बुसोषितं बुसमध्ये स्थितम् । जीर्णभक्तः परिणताहारः लघुकोष्ठ इति यावत् । पिबेत् प्रातरेव ॥ ४६–४८ ॥—

पाठानिकुम्भरजनीत्रिकटुत्रिफलाग्निकम् ॥ ४९ ॥
लवणं वृक्षबीजं च तुल्यं स्यादनवो गुडः ।
पथ्याभिर्वा युतं चूर्णं गवां मूत्रयुतं पचेत् ॥ ५० ॥
गुटिकास्तद्घनीभूतं कृत्वा खादेदभुक्तवान् ।
गुल्मप्लीहाग्निसादांस्ता नाशयेयुरशेषतः ॥ ५१ ॥

१ 'आलोड्य' इति पा० । २ 'पृथ्वीकामुरुबूकं च' इति पा० । ३ 'तुषोषितं' इति पा० । ४ 'चणकफला' इति पा० । ५ 'पथ्याभिः सहितं चूर्णं' इति पा० ।

हृद्रोगं ग्रहणीदोषं पाण्डुरोगं च दारुणम् ।

पाठेत्यादि । निकुम्भा दन्ती । अग्निकश्चित्रकः, 'अग्निमन्थ' इत्यन्ये, 'मोरट' इत्यपरे । वृक्षबीजमिन्द्रयवः । अनवं गुडं पुराणं गुडम् । पाठादिचूर्णं समपुराणगुडयुतं खादेत्, अथवा तदेव चूर्णं हरीतकीभिः सह गोमूत्रेण पचेत्, तं च घनीभूतं गुटिकाः कृत्वा प्रातरेव खादेत् । हरीतकीप्रमाणं चूर्णाच्चतुर्थांशं, गोमूत्रं तु चतुर्गुणम् ॥ ४९–५१ ॥—

सशूले सोन्नतेऽस्पन्दे दाहपाकरुगन्विते ॥ ५२ ॥
गुल्मे रक्तं जलौकोभिः सिरामोक्षेण वा हरेत् ।

इदानीमवस्थायां गुल्मे रक्तमोक्षणमाह—सशूले इत्यादि । अस्पन्दे अचले । पाकरुगन्विते पाकवेदनायुक्ते, जलौकोभी रक्तं हरेत् गुल्मस्थाने एव, सिरामोक्षेण तु बाह्वोः, तन्त्रान्तरोक्तत्वात् । केचित् 'अलाबुपातनं चापि गुल्मे शस्तं कफात्मके' इति पठन्ति ॥ ५२ ॥—

सुखोष्णा जाङ्गलरसाः सुस्निग्धा व्यक्तसैन्धवाः ५३
कटुत्रिकसमायुक्ता हिताः पाने तु गुल्मिनाम् ।

गुल्मिनां जाङ्गलरसस्य पानमाह—सुखोष्णा इत्यादि । सुखोष्णा ईषदुष्णाः । जाङ्गलरसा जङ्घालविष्किरमांसरसाः संस्कृताः । सुस्निग्धाः सम्यक् स्नेहसंस्कृताः । हिता इति 'यथादोषं' इति शेषः ॥ ५३ ॥—

पेया वातहरैः सिद्धाः कौलत्थाः संस्कृता रसाः ५४
खलाः सपञ्चमूलाश्च गुल्मिनां भोजने हिताः ।

भोजनार्थमाह—पेयेत्यादि । वातहरैर्भद्रदार्वादिभिः । संस्कृताः स्नेहादिभिः । खलाः कपित्थदाडिमतक्रशाकादिसंस्कृताः 'कचिला' इति प्रसिद्धाः । सपञ्चमूलाः पञ्चमूलसहिताः, एतेन पञ्चमूलसहितैः कपित्थादिभिः कृता इत्यर्थः । भोजने हिता यथादोषमित्युपस्कारः ॥ ५४ ॥—

बद्धवर्चोनिलानां तु सार्द्रकं क्षीरमिष्यते ॥ ५५ ॥

अवस्थावशेन गुल्मे भोजनविशेषमाह—बद्धेत्यादि । बद्धवर्चोनिलानां निरुद्धपुरीषवायूनाम् । सार्द्रकमार्द्रकसहितम् । इष्यते 'भोजने' इति शेषः ॥ ५५ ॥

कुम्भीपिण्डेष्टकास्वेदान् कारयेत् कुशलो भिषक् ।

आन्तरोपचारमभिधायावस्थायां बाह्योपचारं स्वेदमाह—कुम्भीपिण्डेष्टकास्वेदानित्यादि । कुम्भीप्रभृतिस्वेदाः स्वेदाध्याये अभिहिताः । निपुणतया स्वेदान् कारयेत् ॥—

गुल्मिनः सर्व एवोक्ता दुर्विरेच्यतमा भृशम् ॥ ५६ ॥
अतश्चैतांस्तु सुस्विन्नान् स्रंसनेनोपपादयेत् ।

वातश्लेष्मात्मके सशूले कठिने च गुल्मे गुल्मिनो विरेकमाह—गुल्मिन इत्यादि । सुस्विन्नानिति स्नेहो हि स्वेदेनैवाक्षिप्तः, तेन सम्यक् स्निग्धस्विन्नान् । स्रंसनेन विरेकेण । उपपादयेत् योजयेत् ॥ ५६ ॥—

विम्लापनाभ्यञ्जनानि[१] तथैव दहनानि च ॥ ५७ ॥
उपनाहाश्च कर्तव्याः सुखोष्णाः शाल्वणादयः ।
उदरोक्तानि सर्पींषि मूत्रवर्तिक्रियास्तथा[२] ॥ ५८ ॥
लवणानि च योज्यानि यान्युक्तान्यनिलामये ।

किं गुल्मे विरेक एव कार्य उतान्यदपीत्याह—विम्लापनाभ्यञ्जनानीत्यादि । विम्लापनमङ्गुल्यादिना गुल्मस्य मर्दनं, दहनं जाम्बवौष्ठादिना । शाल्वणादय इत्यत्रादिशब्दः प्रकारे; तेन शाल्वणप्रकारा अन्येऽप्युपनाहस्वेदाः पच्यमानाभिमुखे गुल्मे कार्याः । उदरोक्तानि सर्पींषि 'हरीतकीचूर्णप्रस्थं' इत्यादिकानि । मूत्रवर्तिक्रियास्तथेति उदरोक्ता 'वमनशिरोविरेचनद्रव्याणां' इत्यादिकाः । लवणानि पत्रलवणस्नेहलवणकल्याणलवणानि । अनिलामये वातव्याधौ । केचित् सर्पींषीत्यस्याग्रे चूर्णा इति पठित्वा नाराचकादय इति व्याख्यानयन्ति ॥ ५७ ॥ ५८ ॥—

वातवर्चोनिरोधे तु सामुद्रार्द्रकसर्षपैः ॥ ५९ ॥
कृत्वा पायौ विधातव्या वर्तयो मरिचोत्तराः ।

इदानीं मूत्रवर्तिप्रयोगावस्थामपरवर्तिं चाह—वातेत्यादि । सामुद्रं समुद्रलवणं, समुद्रफेनमपरे । मरिचोत्तरा मरिचप्रधानाः ॥ ५९ ॥—

दन्तीचित्रकमूलेषु तथा वातहरेषु च ॥ ६० ॥
कुर्यादरिष्टान् सर्वांश्च श्लोकस्थाने यथेरितान् ।

दन्तीचित्रकमूलेष्वित्यादि । वातहरेषु विदारिगन्धाप्रभृतिषु । श्लोकस्थाने यथेरितानिति यथा सूत्रस्थाने विरेचनकल्पे आसवकरणमुक्तं, तेनैव प्रकारेणात्रापि दन्त्यादिक्वाथेऽरिष्टानासवान् कुर्यात् । अन्ये तु श्लोकस्थाने इत्यत्र द्वितीयं स्थानशब्दं लुप्तं वर्णयन्ति, लुप्तस्थानशब्देन गुल्मप्रतिषेधं गृह्णन्ति । तेनात्रोक्तत्र्यूषणवायरिष्टवद्दन्त्यादिक्वाथे मधुपथ्याचूर्णप्रक्षेपेणारिष्टकरणं, सूत्रस्थानोक्तप्रकारेण वाऽऽसवकरणम् ॥ ६० ॥—

खादेद्वाऽप्यङ्कुरान् भृष्टान् पूतीकनृपवृक्षयोः ॥ ६१ ॥

खादेदित्यादि । अङ्कुरान् कोमलपल्लवान् । भृष्टानिति 'स्नेहेन' इति शेषः; अन्ये अग्निना भृष्टानित्याहुः, तन्मते वातकारिणोऽप्यङ्कुरा व्याधिप्रत्यनीकत्वाद्गुल्मे हिताः । पूतीकश्चिरबिल्वः, नृपवृक्षो गिरिमालकः ॥ ६१ ॥

ऊर्ध्ववातं मनुष्यं च गुल्मिनं न निरूहयेत् ।

इदानीं गुल्मे हितस्यापि निरूहस्यावस्थायां निषेधमाह—ऊर्ध्ववातमित्यादि । ऊर्ध्ववातमूर्ध्ववातयुक्तं गुल्मिनं मनुष्यं न निरूहयेदिति संबन्धः । केचिदिमं पाठं न पठन्ति ॥—

पिबेत्त्रिवृन्नागरं वा सगुडां वा हरीतकीम् ॥ ६२ ॥
गुग्गुलं त्रिवृतां दन्तीं द्रवन्तीं सैन्धवं वचाम् ।
मूत्रमद्यपयोद्राक्षारसैर्वीक्ष्य बलाबलम् ॥ ६३ ॥

१ 'विलेपनाभ्यञ्जनानि' इति पा० । २ 'चूर्णवर्तिक्रियास्तथा' इति पा० ।

पिबेदित्यादि । पिबेदिति वक्ष्यमाणेन मूत्रमद्यादिद्रवेण; अन्ये पानीयेन पिबेदित्याहुः । त्रिवृन्नागरमित्येको योगः, सगुडां वा हरीतकीमिति द्वितीयः । गुग्गुलुमित्यादि । द्रवन्ती चीरितपत्रा दन्तीभेदः । पयः दुग्धं, द्राक्षारसः द्राक्षास्वरसः । वीक्ष्य बलाबलमिति 'दोषादीनां' इति वाक्यशेषः । अत्रापि पिबेदिति संबन्धनीयम् ॥ ६२ ॥ ६३ ॥

एवं पीलूनि भृष्टानि पिबेत् सलवणानि तु ।

एवमित्यादि । एवमिति मूत्रादिभिरित्यर्थः । (भृष्टानि स्नेहैः) ॥—

पिप्पलीपिप्पलीमूलचव्यचित्रकसैन्धवैः ॥ ६४ ॥
युक्ता हन्ति सुरा गुल्मं शीघ्रं काले प्रयोजिता ।

पिप्पलीत्यादि । सुरा पैष्टी । हन्तीत्यत्र शीघ्रमिति संबध्यते । काले आध्मानादिकायामवस्थायाम् ॥ ६४ ॥—

बद्धविण्मारुतो गुल्मी भुञ्जीत पयसा यवान् ॥६५॥
कुल्माषान् वा बहुस्नेहान् भक्षयेल्लवणोत्तरान् ।

बद्धेत्यादि । पयसा दुग्धेन । यवान् वाट्यादिकृतान् । कुल्माषान् यवपिष्टमयान् भक्ष्यान् । लवणोत्तरान् सैन्धवप्रधानान् ॥ ६५ ॥—

अथास्योपद्रवः शूलः कथंचिदुपजायते ॥ ६६ ॥
शूलं निखानितमिवासुखं येन तु वेत्त्यसौ ।

इदानीं गुल्मोपद्रवमाह—अथेत्यादि । अस्य गुल्मस्य, उपद्रवः पश्चात्कालभावी कथञ्चित् स्वहेतुभिरित्यर्थः । शूल उपजायते । शूलं निखानितमिव कीलकं निखानितमिवेत्यर्थः ॥ ६६ ॥—

तत्र विण्मूत्रसंरोधः कृच्छ्रोच्छ्वासः स्थिराङ्गता ६७
तृष्णा दाहो भ्रमोऽन्नस्य विदग्धपरिवृद्धिता ।
रोमहर्षोऽरुचिश्छर्दिर्भुक्तवृद्धिर्जडाङ्गता ॥ ६८ ॥
वाय्वादिभिर्यथासङ्ख्यं मिश्रैर्वा

तस्यैवोपद्रवस्य दोषविशेषेण लिङ्गं संख्यां चाह—तत्रेत्यादि । तत्रेत्युपद्रवे शूले । स्थिराङ्गता कठिनाङ्गता । अन्नस्य विदग्धपरिवृद्धिता अन्नस्य विदाहे शूलस्य परिवृद्धिर्भवतीत्यर्थः । भुक्तवृद्धिरिति भुक्तस्य वृद्धिः भुक्तमात्रे शूलस्य वृद्धिर्भवतीत्यर्थः । जडाङ्गता अङ्गानां जडता । मिश्रैरिति द्वन्द्वैः सान्निपातिकैश्चेत्यर्थः । विण्मूत्रसंरोध इत्यादिकं वातजशूललक्षणं, तृष्णादाह इत्यादिकं पित्तजशूललक्षणं, रोमहर्षोऽरुचिरित्यादिकं श्लेष्मजशूललक्षणं, द्विदोषलिङ्गं द्वन्द्वैः, सर्वलिङ्गं समस्तैः ॥ ६७ ॥ ६८ ॥—

वीक्ष्य योजयेत् ।
पथ्यात्रिलवणं क्षारं हिङ्गुतुम्बुरुपौष्करम् ॥ ६९ ॥
यवानीं च हरिद्रां च विडङ्गान्यम्लवेतसम् ।
विदारीत्रिफलाऽभीरुश्रृङ्गाटीगुडशर्कराः ॥ ७० ॥
काश्मरीफलयष्ट्याह्वपरूषकहिमानि च ।
षड्ग्रन्थातिविषादारुपथ्यामरिचवृक्षजान् ॥ ७१ ॥
कृष्णामूलकचव्यं च नागरक्षारचित्रकान् ।
उष्णाम्लकाञ्जिकक्षीरतोयैः श्लोकसमापनान् ॥७२॥
यथाक्रमं विमिश्रांश्च द्वन्द्वे सर्वांश्च सर्वजे ।

अतः परमुपद्रवशूलस्य चिकित्सितमाह—वीक्ष्येत्यादि । वीक्ष्येति वातादिभेदेन शूलमित्यर्थः । त्रिलवणं सैन्धवसौवर्चलविडानि । क्षारो यवक्षारः । अभीरुः शतावरी, शृङ्गाटी जलजं द्रव्यं त्रिकण्टकफलं, । गुडशर्करा गाङ्गेटीफलम् । हिमं चन्दनम् । षड्ग्रन्था वचा । वृक्षज इन्द्रयवः । मूलकं पिप्पलीमूलम् । उष्णशब्दोऽम्लकाञ्जिकादिभिः संवध्यते । श्लोकसमापनान् 'योगान्' इति शेषः । यथाक्रममिति पथ्याद्यम्लवेतसान्तमुष्णाम्लकाञ्जिकेन वातिके, विदार्यादिहिमान्तमुष्णक्षीरेण पैत्तिके, षड्ग्रन्थादिचित्रकान्तमुष्णतोयेन श्लैष्मिके; विमिश्रं द्वन्द्वे इति पथ्यादिविदार्यादी वातपैत्तिके, पथ्यादिषड्ग्रन्थादी वातश्लैष्मिके, विदार्यादिषड्ग्रन्थादी पित्तश्लैष्मिके, सर्वांश्च पथ्यादीन् त्रीन् सन्निपाते ॥ ६९-७२ ॥—

तथैव सेकावगाहप्रदेहाभ्यङ्गभोजनम् ॥ ७३ ॥
शिशिरोदकपूर्णानां भाजनानां च धारणम् ।
वमनोन्मर्दनस्वेदलङ्घनक्षपणक्रियाः ॥ ७४ ॥
स्नेहादिश्च क्रमः सर्वो विशेषेणोपदिश्यते ।

किमेतदेवोपद्रवशूले कार्यमुतान्यदपीत्याह—तथैवेत्यादि । तथैवेति यथासंख्यमित्यर्थः । तेन सेकादिकं वातिके, शिशिरोदकादिकं पैत्तिके, वमनादिकं श्लैष्मिके । स्नेहादिक्रमश्च यथादोषं यथावस्थं सर्वेषामेव, द्वन्द्वजे द्वयं, सान्निपातिके समस्तम् । क्षपणक्रिया अन्या अपि कफक्षयकरी ॥ ॥ ७३ ॥ ७४ ॥—

वल्लूरं मूलकं मत्स्यान् शुष्कशाकानि वैदलम् ॥७५॥
न खादेदालुकं गुल्मी मधुराणि फलानि च ।

गुल्मोपद्रवमभिधाय गुल्मे वर्ज्यमाह—वल्लूरं मूलकमित्यादि । वल्लूरं शुष्कमांसम् । वैदलं मुद्गवनमुद्गादिकम् । आलुकं पिण्डालुकादिभेदेनानेकप्रकारम् । मधुराणि फलानि क्षीरिवृक्षफलानि चोचमोचादीनि च । चकारादेवंविधान्यन्यान्यपि वर्ज्यानि । अस्याग्रे केचित् 'लध्वन्नं दीपनं स्निग्धमुष्णं वातानुलोमनम् । बृंहणं च भवेद्यच्च तद्धितं सर्वगुल्मिनाम् ॥ स्थानेऽवसेको रक्तस्य बाहुमध्ये सिराव्यधः । स्वेदोऽनुलोमनं चैव प्रशस्तं सर्वगुल्मिनाम्' इत्यादिकं पठन्ति; स चाभावान्न लिखितः । (इति डल्हणेनान्यग्रन्थदर्शनादुक्तम्) ॥ ७५ ॥—

१ 'पिष्टानि' इति पा० । २ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते । ३ 'शूलं' इति पा० । ४ 'शूलं निखानितमिव सुखं येन न वेत्त्यसौ' इति पा० ।

१ 'उपद्रवलिङ्गस्य' इति पा० । २ 'गाङ्गेटी बला' इति पा० । ३ अयं पाठो मुद्रितपुस्तके नोपलभ्यते ।

विना गुल्मेन यच्छूलं गुल्मस्थानेषु जायते ॥ ७६ ॥
निदानं तस्य वक्ष्यामि रूपं च सचिकित्सितम् ।

गुल्मोपद्रवं शूलमभिधायेदानीं केवलं शूलमाह—विनेत्यादि। गुल्मस्थानेषु गुल्मप्रतिषेधोक्तेषु । अन्ये विना गुल्मेनेत्यादिश्लोकं परित्यज्य 'अथातः शूलप्रतिषेधं व्याख्यास्यामः' इति प्रतिज्ञां पठित्वा वातमूत्रपुरीषाणां निग्रहादित्यादिना पृथगेव शूलाध्यायं पठन्ति; ते च पूर्वपरिपाटीं त्यजन्ति । अपरे विना गुल्मेनेत्यादिकं समस्तमपि असौश्रुतं भणित्वा परित्यजन्ति । अस्माभिस्तु सर्वमतानुसारिभिर्जेज्जटाभिप्रायेण पठितः ॥ ७६ ॥—

वातमूत्रपुरीषाणां निग्रहादतिभोजनात् ॥ ७७ ॥
अजीर्णाध्यशनायासविरुद्धान्नोपसेवनात् ।
पानीयपानात् क्षुत्काले विरूढानां च सेवनात् ७८
पिष्टान्नशुष्कमांसानामुपयोगात्तथैव च ।
एवंविधानां द्रव्याणामन्येषां चोपसेवनात् ॥ ७९ ॥
वायुः प्रकुपितः कोष्ठे शूलं संजनयेद्भृशम् ।
निरुच्छ्वासो भवेत्तेन वेदनापीडितो नरः ॥ ८० ॥

शूलस्य हेतुं संप्राप्तिं चाह—वातमूत्रपुरीषाणामित्यादि । निग्रहात् वेगकालेऽवरोधात् । अजीर्णमामविदग्धादिभेदभिन्नम् । अध्यशनं साजीर्णभोजनम् । आयासः शरीरायासजनकं कर्म । विरुद्धान्नं हिताहितीयोक्तम् । विरूढानां विगतरोहाणामङ्कुरितानां वा । एवंविधानां दोषप्रकोपणानाम् । कोष्ठे सर्वस्मिन्नुदरे । निरुच्छ्वासः निरुद्धोच्छ्वासः । तेन शूलेन । वातमूत्रपुरीषाणां निग्रहादित्यादिरन्येषां चोपसेवनादित्यन्तो हेतुः, वायुः प्रकुपित इत्यादिश्च संप्राप्तिः ॥ ७७–८० ॥

शङ्कुस्फोटनवत्तस्य यस्मात्तीव्राश्च वेदनाः ।
शूलासक्तस्य लक्ष्यन्ते तस्माच्छूलमिहोच्यते ॥ ८१ ॥

तत् कस्माच्छूलमुच्यत इत्याह—शङ्कित्यादि । शङ्कुस्फोटनवत् कीलकाहननवत्तीव्रा वेदनाः, तस्य व्याधितस्य, शूलासक्तस्य शूलिनः; एतेनैतदुक्तं भवति—यथा कस्यचित् कीलकाहननेन तीव्रा वेदना लक्ष्यते तद्वत्तस्य यस्माद्वेदना लक्ष्यते तस्माच्छूलमिहोच्यते ॥ ८१ ॥

निराहारस्य यस्यैव तीव्रं शूलमुदीर्यते ।
प्रस्तब्धगात्रो भवति कृच्छ्रेणोच्छ्वसितीव च ॥ ८२ ॥
वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः ।
एतैर्लिङ्गैर्विजानीयाच्छूलं वातसमुद्भवम् ॥ ८३ ॥

वातशूललक्षणमाह—निराहारस्येत्यादि ॥ ८२ ॥ ८३ ॥

तृष्णा दाहो मदो मूर्च्छा तीव्रं शूलं तथैव च ।
शीताभिकामो भवति शीतेनैव प्रशाम्यति ॥ ८४ ॥
एतैर्लिङ्गैर्विजानीयाच्छूलं पित्तसमुद्भवम् ।

पित्तशूललक्षणमाह—तृष्णेत्यादि । शीताभिकामः शीताभिलाषः । प्रशाम्यति 'शूलं' इति शेषः ॥ ८४ ॥—

शूलेनोत्पीड्यमानस्य हृल्लास उपजायते ॥ ८५ ॥
अतीव पूर्णकोष्ठत्वं तथैव गुरुगात्रता ।
एतच्छ्लेष्मसमुत्थस्य शूलस्योक्तं निदर्शनम् ॥ ८६ ॥

कफशूललक्षणमाह—शूलेनेत्यादि । हृल्लासस्थूल्करणम् । निदर्शनं लक्षणम् ॥ ८५ ॥ ८६ ॥

सर्वाणि दृष्ट्वा रूपाणि निर्दिशेत्सान्निपातिकम् ।
सन्निपातसमुत्थानमसाध्यं तं विनिर्दिशेत् ॥ ८७ ॥
शूलानां लक्षणं प्रोक्तं

सान्निपातिकशूललक्षणमाह—सर्वाणीत्यादि । ननु, कैश्चित् पूर्वाचार्यैर्दोषभेदेन नियतं स्थानं शूलस्योक्तम् । तथाहि,—"वातात्मकं बस्तिगतं वदन्ति, पित्तात्मकं चापि वदन्ति नाभ्याम् । हृत्पार्श्वकुक्षौ कफसन्निविष्टं, सर्वेषु देशेषु च सन्निपातात्"—इति; तत् कथमत्र तथा नोक्तम् । सत्यं, कुपितदोषाणां स्वाशये पराशये च व्याध्युत्पादकत्वान्न नियतं स्थानमस्ति, अतस्तथा नोक्तम् ॥ ८७ ॥—

चिकित्सां तु निबोध मे ।
आशुकारी हि पवनस्तस्मात्तं त्वरया जयेत् ॥ ८८ ॥
तस्य शूलाभिपन्नस्य स्वेद एव सुखावहः ।

चिकित्सामित्यादि । निबोध जानीहि । मे मत्सकाशात् । आशुकारीत्यादि । आशुकारी शीघ्रमत्ययकारित्वात् । हि यस्मात् । तं वातम् । तस्येत्यादि ।—तस्य पुरुषस्य, शूलाभिपन्नस्य वातिकशूलाक्रान्तस्य; अन्ये तु तस्य वातस्य यच्छूलं तेन आक्रान्तस्येत्याहुः ॥ ८८ ॥—

पायसैः कृशरापिण्डैः स्निग्धैर्वा पिशितैर्हितः ॥ ८९ ॥

स च स्वेदः कैर्द्रव्यैः कार्य इत्याह—पायसैरित्यादि । पायसो दुग्धसिद्धास्तण्डुलाः । कृशरापिण्डैः तिलतण्डुलमाषकृतयवागूपिण्डैः । हित इति 'स्वेद' इति शेषः ॥ ८९ ॥

त्रिवृच्छाकेन वा स्निग्धमुष्णं भुञ्जीत भोजनम् ।
चिरबिल्वाङ्कुरान् वापि तैलभृष्टांस्तु भक्षयेत् ॥ ९० ॥
वैहङ्गांश्च रसान् स्निग्धान् जाङ्गलान् शूलपीडितः ।
यथालाभं निषेवेत मांसानि बिलशायिनाम् ॥ ९१ ॥

भोजनमाह—त्रिवृच्छाकेनेत्यादि । स्निग्धादिगुणं भोजनं त्रिवृच्छाकेन सह भुञ्जीतेति पिण्डार्थः । चिरबिल्वाङ्कुरानित्यादि । अङ्कुराः शुङ्गाः । वैहङ्गांश्चेत्यादि । जाङ्गलान् वैहङ्गान् लावादिकृतानित्यर्थः । बिलेशयाः श्वाविच्छल्लकादयः ॥ ९० ॥ ९१ ॥

सुरा सौवीरकं चुक्रं मस्तूदश्वित्तथा दधि ।
सकाललवणं पेयं शूले वातसमुद्भवे ॥ ९२ ॥

सुरा सौवीरकमित्यादि । सुरा पिष्टभवा । सौवीरकं काञ्जिकभेदः । चुक्रं शुक्तम् । मस्तु दधिमस्तु । उदश्वित् अर्धोदकं तक्रम् । तथेति यथालाभमित्यर्थः । काललवणशब्देन यद्यपि निर्गन्धसौवर्चलमुच्यते, तथाऽप्यत्र गन्धवत्सौवर्चलं ग्राह्यं, तन्त्रान्तरोक्तत्वात् ॥ ९२ ॥

---

१ 'शङ्कास्फोटनवत्' इति पा० । २ 'कण्टकहननेनेव' इति पा० ।

कुलत्थयूषो युक्ताम्लो लावकीयूषसंस्कृतः।
ससैन्धवः समरिचो वातशूलविनाशनः ॥ ९३ ॥

कुलत्थयूष इत्यादि। युक्तं मात्रयोपहितमम्लं दाडिमादिकं यत्र स युक्ताम्लः। लावकीयूषसंस्कृत इति लावकेन कृतो यूषो लावकीयूषः, तेन संस्कृतः ॥ ९३ ॥

विडङ्गशिग्रुकम्पिल्लपथ्याश्यामाम्लवेतसान्।
सुरसामश्वमूत्रीं च सौवर्चलयुतान् पिबेत् ॥ ९४ ॥
मद्येन वातजं शूलं क्षिप्रमेव प्रशाम्यति।

विडङ्गमित्यादि। शिग्रुः विटपशाकं, शोभाञ्जनमपरे। श्यामाऽरुणमूला त्रिवृत्। सुरसा तुलसी। अश्वमूत्री शल्लकी ॥ ९४ ॥—

पृथ्वीकाजाजिचविकायवानीव्योषचित्रकाः ॥ ९५ ॥
पिप्पल्यः पिप्पलीमूलं सैन्धवं चेति चूर्णयेत्।
तानि चूर्णानि पयसा पिबेत् काम्बलिकेन वा ॥ ९६ ॥
मध्वासवेन चुक्रेण सुरासौवीरकेण वा।
अथवै(चै)तानि चूर्णानि मातुलुङ्गरसेन वा ॥ ९७ ॥
तथा बदरयूषेण भावितानि पुनः पुनः।
तानि हिङ्गुप्रगाढानि सह शर्करया पिबेत् ॥ ९८ ॥
सह दाडिमसारेण वर्तिः कार्या भिषग्जिता।
सा वर्तिर्वातिकं शूलं क्षिप्रमेव व्यपोहति ॥ ९९ ॥
गुडतैलेन वा लीढा पीता मद्येन वा पुनः।

पृथ्वीकेत्यादि। पृथ्वीका हिङ्गुपत्रिका। अजाजी उत्तरापथे जीरकविशेषः। काम्बलिकेन दधिमस्त्वम्लसिद्धयूषेण। चुक्रं शुक्तम्। सौवीरकं विरेचनद्रव्यविकल्पकथितम्। पक्षान्तरमाह—अथवेत्यादि। एतानि पूर्वोक्तानि चूर्णानि, बीजपूरकरसेन बदरयूषेण वा पुनः पुनर्भावितानि हिङ्गूत्कटानि शर्करया सह मातुलुङ्गरसेनैव पिबेदिति पिण्डार्थः। सह दाडिमसारेणेत्यादि।—तैरेव चूर्णैर्दाडिमसारेण सह भिषग्जिता वैद्येन वर्तिर्वा कार्या। सा च वर्तिर्गुडतैलेन लीढा मद्येन वा पीता सती वातिकं शूलं क्षिप्रमेव हन्तीत्यर्थः ॥ ९५-९९ ॥—

बुभुक्षाप्रभवे शूले लघु संतर्पणं हितम् ॥ १०० ॥
उष्णैः क्षीरैर्यवागूभिः स्निग्धैर्मांसरसैस्तथा।

बुभुक्षाप्रभवे इत्यादि। लघ्विति मात्रया स्वभावेन च। सन्तर्पणं भोजनम्। उष्णैरिति क्षीरादिभिः संबध्यते ॥ १०० ॥—

वातशूले समुत्पन्ने रूक्षं स्निग्धेन भोजयेत् ॥ १०१ ॥
सुसंस्कृताः प्रदेयाः स्युर्घृतपूरा विशेषतः।
वारुणीं च पिबेज्जन्तुस्तथा संपद्यते सुखी ॥ १०२ ॥
एतद्वातसमुत्थस्य शूलस्योक्तं चिकित्सितम्।

वातेत्यादि। सुसंस्कृताः शुण्ठीमरिचादिभिः। प्रदेया दातव्याः। घृतपूरा घृतपूपा इत्यर्थः। वारुणी सुरा। तथा तेन प्रकारेण। सुखी संपद्यते सुखी भवतीत्यर्थः। उपसंहारमाह—एतद्वातसमुत्थस्येत्यादि ॥ १०१ ॥ १०२ ॥—

अथ पित्तसमुत्थस्य क्रियां वक्ष्याम्यतः परम् १०३
स सुखं छर्दयित्वा तु पीत्वा शीतोदकं नरः।
शीतलानि च सेवेत सर्वाण्युष्णानि वर्जयेत् ॥ १०४ ॥

वातशूलोपक्रममभिधायेदानीं पित्तशूलचिकित्सामाह—अथेत्यादि। अथेति वाक्यालङ्कारे, वाक्योपक्रमे इत्यन्ये। तदेव चिकित्सितमाह—स इत्यादि। स पित्तशूली नरः, शीतोदकं पीत्वा, सुखं यथा भवति तथा छर्दयित्वा, शीतलानि भजेत, उष्णानि सर्वाणि वर्जयेदिति पिण्डार्थः ॥ १०३ ॥ १०४ ॥

मणिराजतताम्राणि भाजनानि च सर्वशः।
वारिपूर्णानि तान्यस्य शूलस्योपरि निक्षिपेत् १०५

मणिराजतताम्राणीत्यादि। राजतं रूप्यमयम्। सर्वशः आसुखात्। अस्य पित्तशूलिनः ॥ १०५ ॥

गुडः शालिर्यवाः क्षीरं सर्पिःपानं विरेचनम्।
जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम् १०६
रसान् सेवेत पित्तघ्नान् पित्तलानि विवर्जयेत्।
पालाशं धान्वनं वाऽपि पिबेद्यूषं सशर्करम् ॥ १०७ ॥

गुडेत्यादि। पित्तघ्नान् रसान् जाङ्गलवर्गे यानि निर्दिष्टानि पित्तहराणि मांसानि तत्कृतान् रसानित्यर्थः। पित्तलानीत्यादि। पित्तलानि अन्नपानादीनि। पालाशं यूषं मांसादमांसरसमित्यर्थः। धान्वनं जाङ्गलमांसरसम् ॥ १०६ ॥ १०७ ॥

परूषकाणि मृद्वीकाखर्जूरोदकजान्यपि।
तत् पिबेच्छर्करायुक्तं पित्तशूलनिवारणम् ॥ १०८ ॥

परूषकाणीत्यादि। परूषकाणि परूषकफलानि। उदकजानि पद्मानि ॥ १०८ ॥

अशने भुक्तमात्रे तु प्रकोपः श्लैष्मिकस्य च।
वमनं कारयेत्तत्र पिप्पलीवारिणा भिषक् ॥ १०९ ॥

श्लैष्मिकशूलचिकित्सामाह—अशने इत्यादि। अशने भोजने। श्लैष्मिकस्य श्लेष्मशूलस्य। तत्र श्लेष्मशूले। पिप्पलीवारिणा पिप्पलीयुक्तपानीयेन, अन्ये वारिशब्दं क्वाथे वर्तयन्ति, अपरे पिप्पलीशब्देन मदनफलबीजानि कथयन्ति ॥ १०९ ॥

रूक्षः स्वेदः प्रयोज्यः स्यादन्याश्चोष्णाः क्रिया हिताः
पिप्पली शृङ्गवेरं च श्लेष्मशूले भिषग्जितम् ॥ ११० ॥

रूक्षः स्वेदः प्रयोज्य इत्यादि।—रूक्षः स्वेदः स्निग्धरहितः करीषादिकृतः। पिप्पलीशृङ्गवेरप्रयोगश्चूर्णकल्कक्वाथादिविधिना ॥ ११० ॥

पाठां वचां त्रिकटुकं तथा कटुकरोहिणीम्।
चित्रकस्य च निर्यूहे पिबेद्यूषं सहाजकम् ॥ १११ ॥

पाठामित्यादि। पाठादीनि द्रव्याणि चूर्णितानि कल्कितानि

---

१ 'सुरसामश्वकर्णं च' इति पा०।

१ 'निर्यूहं' इति पा०।

वा चित्रकस्य निर्यूहे क्राथे पिबेदित्येको योगः । यूषं सहार्जकमिति द्वितीयो योगः । यूषं शूलहरशिम्बिधान्ययूषम् । अर्जकः कुठेरकः ॥ १११ ॥

एरण्डफलमूलानि मूलं गोक्षुरकस्य च ।
शालपर्णीं पृश्निपर्णीं बृहतीं कण्टकारिकाम् ॥ ११२
दद्याच्छृगालविन्नां च सहदेवां तथैव च ।
महासहां क्षुद्रसहां मूलमिक्षुरकस्य च ॥ ११३ ॥
एतत् संभृत्य संभारं जलद्रोणे विपाचयेत् ।
चतुर्भागावशेषं तु यवक्षारयुतं पिबेत् ॥ ११४ ॥
वातिकं पैत्तिकं वाऽपि श्लैष्मिकं सान्निपातिकम् ।
प्रसह्य नाशयेच्छूलं छिन्नाभ्रमिव मारुतः ॥ ११५ ॥

एरण्डद्वादशकमाह—एरण्डेत्यादि । शृगालविन्ना पृश्निपर्णीभेदः । महासहा माषपर्णी । क्षुद्रसहा मुद्गपर्णी । इक्षुरकः कोकिलाक्षकः । संभृत्य एकीकृत्य । एरण्डादिद्रव्यसंभारश्चतुःषष्टिपलप्रमितः, तुलाप्रमित इत्यन्ये । प्रसह्य बलात्कारेण । पिबेदित्यनेनाभ्यवहारेणात्र सूच्यते; तेन तृष्णायां पानमाचमनं वा तेन कार्य, अन्यथा द्रोणचतुर्थांशस्य साधितस्य जलस्यापरक्राथवत् पलद्वयपाने वैयर्थ्यं स्यात् । यद्यप्ययं योगः सर्वशूलहरस्तथाप्यत्यन्तकफशूलहरत्वादत्रोक्तः । केचित् 'मूलं चेक्षुरकस्य' इत्यत्र 'दद्याच्चैवेक्षुवालिकाम्' इति पठित्वा खगगलीमिति व्याख्यानयन्ति ॥ ११२–११५ ॥

पिप्पली स्वर्जिकाक्षारो यवाश्चित्रक एव च ।
सेव्यं चैतत् समानीय भस्म कुर्याद्विचक्षणः ॥ ११६
तदुष्णवारिणा पीतं श्लेष्मशूले भिषग्जितम् ।

पिप्पल्य इत्यादि । सेव्यमुशीरं, तद्भस्म ॥ ११६ ॥—

रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः ११७
स संरुद्धः करोत्याशु सौध्मानं गुड्गुडायनम्[^2] ।
सूचीभिरिव निस्तोदं कृच्छ्रोच्छ्वासी तदा नरः ११८
नान्नं वाञ्छति नो निद्रामुपैत्यर्तिनिपीडितः ।
पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः ॥ ११९ ॥

यद्यपि चत्वारः शूलाः, तथापि दोषधातुमलसंसर्गादायतनविशेषान्निमित्ततश्चैषां विकल्प इति कृत्वा पार्श्वादिशूलमाह—रुणद्धीत्यादि । स वायुः । आध्मानमुदरापूरः । गुड्गुडायनमन्त्राव्यक्तशब्दः । नो निद्रामुपैति न निद्रां प्राप्नोतीत्यर्थः ॥ ११७–११९ ॥

तत्र पुष्करमूलानि हिङ्गु सौवर्चलं विडम् ।
सैन्धवं तुम्बुरुं पथ्यां चूर्णं कृत्वा तु पाययेत् १२०
पार्श्वहृद्बस्तिशूलेषु यवक्राथेन संयुतम् ।
सर्पिः प्लीहोदरोक्तं वा घृतं वा हिङ्गुसंयुतम् ॥१२१॥
बीजपूरकसारं वा पयसा सह साधितम् ।
एरण्डतैलमथवा मद्यमस्तुपयोरसैः ॥ १२२ ॥
भोजयेच्चापि पयसा जाङ्गलेन रसेन वा ।

पार्श्वशूले चिकित्सितमाह—तत्रेत्यादि । पुष्करमूलादीनि द्रव्याणि चूर्णं कृत्वा पार्श्वादिशूलेषु यवक्राथेन संयुतं पाययेदिति पिण्डार्थः । यद्यप्ययं योगोऽपतन्त्रकेऽपि पठितस्तथाऽप्यत्राम्लवेतसाभावात् पुनः पठितः । सर्पिः प्लीहोदरोक्तमित्यादि प्लीहोदरोक्तं सर्पिः षट्पलं, हिङ्गुसंयुतं घृतं वा असिद्धमेव । पयसा क्षीरेण, साधितं क्वथितं, बीजपूरकसारं बीजपूरकफलबीजम्, अत्रापि पाययेदिति संबध्यते । केचित् 'बीजपूरकसारं च' इत्यत्र 'पिबेद्बीजकसारं च' इति पठन्ति । एरण्डतैलमित्यादि ।—एरण्डतैलं वा मद्यादिभिर्यथासात्म्यं यथादोषं च प्रातरेव पिबेत्, जीर्णे च क्षीरेण जाङ्गलरसेन वा भोजयेत् ॥ १२०–१२२ ॥—

प्रकुप्यति यदा कुक्षौ वह्निमाक्रम्य मारुतः ॥१२३॥
तदाऽस्य भोजनं भुक्तं सोपस्तम्भं न पच्यते ।
उच्छ्वसित्यामशकृता शूलेनाहन्यते मुहुः ॥ १२४ ॥
नैवासने न शयने तिष्ठन्[^3] वा लभते सुखम् ।
कुक्षिशूल इति ख्यातो वातादामसमुद्भवः ॥१२५॥

कुक्षिशूलमाह—प्रकुप्यतीत्यादि । आक्रम्य मन्दीकृत्य । सोपस्तम्भं स्तब्धतान्वितम् । उच्छ्वसिति उच्छ्वासं करोति 'पुरुष' इति शेषः । आमशकृता अपक्वपुरीषेण । तिष्ठन् ऊर्ध्वीभवन् ॥ १२३–१२५ ॥

वमनं कारयेत्तत्र लङ्घयेद्वा यथाबलम् ।
संसर्गपाचनं कुर्यादम्लैर्दीपनसंयुतैः ॥ १२६ ॥

कुक्षिशूले चिकित्सामाह—वमनं कारयेत्तत्रेत्यादि । तत्र कुक्षिशूले । यथाबलं बलस्यानतिक्रमेण । संसर्गपाचनं पेयादिक्रमपाचनम् । अम्लैर्दाडिमतक्रादिभिः । दीपनसंयुतैरिति पञ्चकोलयुतैः ॥ १२६ ॥

नागरं दीप्यकं चव्यं हिङ्गु सौवर्चलं विडम् ।
मातुलुङ्गस्य बीजानि तथा श्यामोरुबूकयोः ॥१२७॥
बृहत्याः कण्टकार्याश्च क्राथं शूलहरं पिबेत् ।

क्राथमाह—नागरं दीप्यकमित्यादि । नागरादिक्राथं हिङ्गुसौवर्चलविडप्रक्षेपं पिबेदिति पिण्डार्थः । बीजानीतिशब्दो मातुलुङ्गादिभिः कण्टकारीपर्यन्तैः सह संबध्यते । श्यामा वृद्धदारकः । उरुबूकः रक्तैरण्डः, शुक्लैरण्डमपरे । बृहती अणुफला स्थूलफला वा ॥ १२७ ॥—

वचा सौवर्चलं हिङ्गु कुष्ठं सातिविषाऽभया ॥१२८॥
कुटजस्य च बीजानि सद्यःशूलहराणि तु ।
विरेचने[^4] प्रयुञ्जीत ज्ञात्वा दोषबलाबलम् ॥ १२९ ॥

कुक्षिशूले विरेचनमाह—वचेत्यादि । वचादीनि कुटजबीजान्तानि सद्यःशूलहराणि विरेचने दोषबलाबलं ज्ञात्वा प्रयुञ्जी-

[^1]: १ 'शालिपर्णीं पृष्ठपर्णीं' इति पा० ।
[^2]: २ 'ध्मानं गुड्गुडायनम्' इति पा० ।
[^3]: १ 'तिष्ठन् स' इति 'तिष्ठन्न' इति च पा० ।
[^4]: २ 'विरेचनं' इति पा० ।

तेति पिण्डार्थः । दोषबलाबलमित्यत्रादिशब्दो लुप्तो द्रष्टव्यः, तेन प्रकृत्यादीनपि ज्ञात्वेत्यर्थः ॥ १२८ ॥ १२९ ॥

स्नेहवस्तींश्चिरूहांश्च कुर्याद्दोषनिवर्हणान् ।

किं कुक्षिशूले विरेचनमेव युज्यते उतान्यदपीत्याह—स्नेहवस्तीनित्यादि ॥—

उपनाहाः स्नेहसेका धान्याम्लपरिषेचनम् ॥ १३० ॥
अवगाहाश्च शस्यन्ते यच्चान्यदपि तद्धितम् ।

कुक्षिशूले उपनाहादिस्वेदस्य प्रशस्तत्वमाह—उपनाहा इत्यादि । उपनाहाः शाल्वणाप्रकाराः । धान्याम्लं काञ्जिकम् । अवगाहो वातहरद्रवपूर्णद्रोण्यादिनिमज्जनम् । यच्चान्यदपीत्यादि । तद्धितं कुक्षिशूलहितं यदन्यदपि भवति तदस्य शस्यते इत्यर्थः ॥ १३० ॥—

कफपित्तावरुद्धस्तु मारुतो रससूर्च्छितः ॥ १३१ ॥
हृदिस्थः कुरुते शूलमुच्छ्वासंरोधकं परम् ।
स हृच्छूल इति ख्यातो रसमारुतसंभवः ॥ १३२ ॥

हृच्छूलमाह—कफेत्यादि । अवरुद्धो रुद्धः । रससूर्च्छितो रससंयुतः । उच्छ्वासरोधकं उच्छ्वासस्य आसमन्ताद्रोधकमित्यर्थः । एतद्धृच्छूलं यस्माद्धृद्रोगविलक्षणं तस्माद्धृद्रोगाद्भिन्नं, तथा संप्राप्तिभेदाच्च ॥ १३१ ॥ १३२ ॥

तत्रापि कर्माभिहितं यदुक्तं हृद्विकारिणाम् ।

हृच्छूले हृद्रोगोक्तां क्रियामतिदिशन्नाह—तत्रापि कर्माभिहितमित्यादि । यद्धृद्विकारिणां हृद्रोगिणां कर्मोक्तं तदत्रापि हृच्छूलेऽभिहितमिति पिण्डार्थः ॥—

संरोधात् कुपितो वायुर्वस्तिमावृत्य तिष्ठति ॥१३३॥
वस्तिवङ्क्षणनाभीषु ततः शूलोऽस्य जायते ।
विण्मूत्रवातसंरोधी वस्तिशूलः स मारुतात् ॥१३४

वस्तिशूलमाह—संरोधादित्यादि । संरोधात् मूत्रपुरीषादीनामित्यर्थः । वस्तिः मूत्राधारः, वङ्क्षणः गण्डकः ॥ १३३ ॥ १३४ ॥

नाभ्यां वङ्क्षणपार्श्वेषु कुक्षौ मेढ्रान्त्रमर्दकः ।
मूत्रमावृत्य गृह्णाति मूत्रशूलः स मारुतात् ॥ १३५॥

मूत्रशूलमाह—नाभ्यामित्यादि । यदा मेढ्रान्त्रमर्दको वायुरावृत्य अवरुध्य मूत्रं गृह्णाति, तदा नाभ्यादिषु शूलो जायते । स च मारुतात् मूत्रशूलो ज्ञेयः ॥ १३५ ॥

वायुः प्रकुपितो यस्य रुक्षाहारस्य देहिनः ।
मलं रुणद्धि कोष्ठस्थं मन्दीकृत्य तु पावकम् ॥१३६॥
शूलं संजनयंस्तीव्रं स्रोतांस्यावृत्य तस्य हि ।
दक्षिणं यदि वा वामं कुक्षिमादाय जायते ॥ १३७ ॥

सर्वत्र वर्धते क्षिप्रं भ्रमंस्तथ सघोषवान् ।
पिपासा वर्धते तीव्रा भ्रमो मूर्च्छा च जायते १३८
उच्चारितो मूत्रितश्च न शान्तिमधिगच्छति ।
विट्शूलमेतज्जानीयाद्भिषक् परमदारुणम् ॥ १३९ ॥

पुरीषशूलमाह—वायुरित्यादि । एवंभूतस्य देहिनो वह्निं मन्दीकृत्य स्रोतांसि चावृत्य प्रकुपितो वायुस्तीव्रं शूलं संजनयन् कोष्ठस्थं मलं रुणद्धि, तस्य च दक्षिणं वामं वा कुक्षिं गृहीत्वा शूलोऽय जायते, स च सर्वत्र भ्रमन् घोषवान् शब्दयुक्तो वर्धते इति पिण्डार्थः । उच्चारितः संजातपुरीषवेगः । नाधिगच्छति न प्राप्नोति । परमदारुणमतिशयकष्टकारि ॥ १३६ –१३९ ॥

क्षिप्रं दोषहरं कार्यं भिषजा साधु जानता ।
स्वेदनं शमनं चैव निरूहाः स्नेहवस्तयः ॥ १४० ॥
पूर्वोद्दिष्टान् पाययेत योगान् कोष्ठविशोधनान् ।
उदावर्तहराश्चास्य क्रियाः सर्वाः सुखावहाः ॥१४१॥

इदानीं वस्तिशूलादीनां सामान्यचिकित्सामाह—क्षिप्रमित्यादि । दोषहरं शोधनम् । साधु शोभनम् । शमनं संशमनम् ॥ १४० ॥ १४१ ॥

अतिमात्रं यदा भुक्तं पावके मृदुतां गते ।
स्थिरीभूतं तु तत्कोष्ठे वायुरावृत्य तिष्ठति ॥ १४२ ॥
अविपाकगतं ह्यन्नं शूलं तीव्रं करोत्यति ।
मूर्च्छाऽऽध्मानं विदाहश्च हृदुत्क्लेशो विलम्बिका ॥
विरिच्यते छर्दयति कम्पतेऽथ विमुह्यति ।
अविपाकाद्भवेच्छूलस्त्वन्नदोषसमुद्भवः ॥ १४४ ॥

अतिमात्रमित्यादि । अविपाकगतमविपाकं प्राप्तम् ॥ १४२ –१४४ ॥

वमनं लङ्घनं स्वेदः पाचनं फलवर्तयः ।
क्षारांश्चूर्णानि गुटिकाः शस्यन्ते शूलनाशनाः १४५

तस्य चिकित्सितमाह—वमनमित्यादि ॥ १४५ ॥

गुल्मावस्थाः क्रियाः कार्या यथावत् सर्वशूलिनाम् ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे गुल्मप्रतिषेधो नाम (चतुर्थोऽध्यायः, आदितः) द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

इदानीमुपसंहारमाह—गुल्मावस्था इत्यादि । यथावत् यथावस्थम् ॥ १४६ ॥

इति श्रीडल्हणाचार्यविरचितायां सुश्रुतव्याख्यायां निबन्धसंग्रहाख्यायामुत्तरतन्त्रे कायचिकित्सायां गुल्मप्रतिषेधो नाम द्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥

---

१ 'उच्छ्वासरोधकं' इति पा० । २ 'संज्ञितः' इति पा० । ३ 'यदा मेढ्रान्त्रमर्दक इति मेढ्रे मूत्रान्त्रं मेढ्रान्त्रं, तद्गृह्णाति यः सर्वथा एवंविधो वायुरावृत्य' इति पा० ।

१ 'शूलं तत्र सघोषवत्' इति पा० । २ 'शूलो जायते' इति पा० । ३ 'क्षारचूर्णानि' इति पा० ।

त्रिचत्वारिंशत्तमोऽध्यायः ।

अथातो हृद्रोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

गुल्मप्रतिषेधानन्तरं स्थानसामीप्यान्नामसङ्कीर्तनाद्वा हृद्रोगप्रतिषेधो युक्त इत्यत आह—अथात इत्यादि ॥ १ ॥ २ ॥

वेगाघातोष्णरूक्षान्नैरतिमात्रोपसेवितैः ।
विरुद्धाध्यशनाजीर्णैरसात्म्यैश्चापि(ति) भोजनैः ॥३
दूषयित्वा रसं दोषा विगुणा हृदयं गताः ॥
कुर्वन्ति हृदये बाधां हृद्रोगं तं प्रचक्षते ॥ ४ ॥

इदानीं प्रतिज्ञानन्तरं पूर्ववद्धृद्रोगस्य हेतुसंप्राप्ती आह—वेगेत्यादि । एतैर्वेगाघातादिहेतुभिर्विगुणाः कुपिता दोषा हृदयं गत्वा रसं दूषयित्वा हृदये बाधां कुर्वन्ति, तं हृद्रोगं प्रचक्षते आचार्या इति संबन्धः । वेगाघात इत्यत्र आघातशब्दो द्विरावर्तयितव्यः, तेन वेगाघात आघातश्च; तत्र वेगाघातो वेगावरोधः, आघातो लगुडादिप्रहारः । विरुद्धं हिताहितीयोक्तम्, अध्यशनं साजीर्णभोजनम्, अजीर्णमामविदग्धादिकम् । बाधाग्रहणं बाधावैचित्र्यज्ञापनार्थम् । वेगाघातादिरसात्म्यभोजनान्तो हेतुः, दूषयित्वेत्यादिका संप्राप्तिः । हृद्रोगे पूर्वरूपानभिधानमव्यक्तलक्षणानामेव पूर्वरूपत्वेनाभिमतत्वात्; अन्ये जातिमात्रपरिच्छेदात् पूर्वरूपावगमः ॥ ३ ॥ ४ ॥

चतुर्विधः स दोषैः स्यात् क्रिमिभिश्च[1] पृथक् पृथक् ।
लक्षणं तस्य वक्ष्यामि चिकित्सितमनन्तरम् ॥ ५ ॥

तस्य संख्यामाह—चतुर्विध इत्यादि । स हृद्रोगः । दोषैरेकैकैः सन्निपतितैश्च, कृमिभिरिति कृमिभिः सहेत्यर्थः । ननु, तन्त्रान्तरे पञ्च हृद्रोगाः पठिताः, तत् कथमत्र चत्वारः? सत्यं, त्रिदोषहृद्रोगोत्तरावस्थैव कृमिहृद्रोगः, तेन न पञ्च हृद्रोगाः । पृथक् पृथगित्यादि । अनन्तरं लक्षणानन्तरमित्यर्थः ॥ ५ ॥

आयम्यते मारुतजे हृदयं तुद्यते तथा ।
निर्मथ्यते दीर्यते च स्फोट्यते पाट्यतेऽपि[2] च ॥६॥

वातिकहृद्रोगलक्षणमाह—आयम्यत इत्यादि । आयम्यते दीर्घीक्रियत इव, मारुतजे हृद्रोगे, तुद्यते प्रतोदेन व्यथ्यत इव, निर्मथ्यते विलोड्यत इव, दीर्यते आरयेव, पाट्यते द्विधाक्रियत इव ॥ ६ ॥

तृष्णोषादाहचोषाः स्युः पैत्तिके हृदयक्लमः ।
धूमायनं च मूर्च्छा च स्वेदः शोषो मुखस्य च ॥७॥

पैत्तिकहृद्रोगलक्षणमाह—तृष्णेत्यादि । ऊषा प्रादेशिको दाहः । चोषः चूष्यत इव वेदनाविशेषः । पैत्तिके पित्तजे हृद्रोगे । धूमायनं धूमोद्गमनमिव ॥ ७ ॥

गौरवं कफसंस्रावोऽरुचिः स्तम्भोऽग्निमार्दवम् ।
माधुर्यमपि चास्यस्य बलासावतते हृदि ॥ ८ ॥

श्लैष्मिकहृद्रोगलक्षणमाह—गौरवमित्यादि । स्तम्भो जडिमा । बलासावतते श्लेष्मच्छन्ने ॥ ८ ॥

उत्क्लेशः ष्ठीवनं तोदः शूलो हृल्लासकस्तमः ।
अरुचिः श्यावनेत्रत्वं शोषश्च कृमिजे भवेत् ॥ ९ ॥

त्रिदोषजहृद्रोगलक्षणमाह—उत्क्लेश इत्यादि । ष्ठीवनं थूत्करणम् । हृल्लासो लालास्रुतिः । तमोऽन्धकारदर्शनं श्वासो वा । तम इत्यत्र 'सान्निपातिके भवेत्' इति वाक्यशेषः । तत्र तोदशूलौ वातेन, उत्क्लेशहृल्लासष्ठीवनानि श्लेष्मणा, तमः पित्तेनेति । केचित् 'अरुचिः श्यावनेत्रत्वं शोषश्च कृमिजे भवेत्' इत्यन्तं सान्निपातिकहृद्रोगलक्षणं मन्यन्ते । त्रिदोषजहृद्रोगस्यैवापचारात् क्रिमीन् प्राप्तस्य लक्षणमाह—अरुचिरित्यादि । कृमिजे इति त्रिदोषजहृद्रोग एवापचारेणोत्तरावस्थायां कृमिनिपातात् कृमिज इत्युच्यते । तथाच तन्त्रान्तरम्,—"त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते । तिलक्षीरगुडादीनि ग्रन्थिस्तस्योपजायते ॥ मर्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति । संक्लेदात् कृमयश्चास्य भवन्त्युपहतात्मनः"—इति, अतो न संख्यातिरेकः । केचित् सान्निपातिको हृद्रोगो व्याधिस्वभावान्न भवत्येवेत्याहुः; तन्न, समानतन्त्रे त्रिदोषजदर्शनात् ॥ ९ ॥

भ्रमक्लमौ सादशोषौ ज्ञेयास्तेषामुपद्रवाः ।

वातादिजानां कृमिहीनानां हृद्रोगिणामुपद्रवानाह—भ्रम इत्यादि । भ्रमश्चक्रारूढस्येव भ्रमणं, क्लमोऽनायासः श्रमः । सादोऽङ्गसादः । शोषो मुखस्य धातूनां च । यद्यपि भ्रमादयो वातपित्तात्मकास्तथाऽपि व्याधिस्वभावाच्छ्लैष्मिकेऽपि भवन्ति ॥—

कृमिजे कृमिजातीनां श्लैष्मिकाणां च ये मताः १०

कृमिजस्योपद्रवानाह—कृमिजे कृमिजातीनामित्यादि । श्लैष्मिकाणामिति कृमिजातीनामित्यस्य विशेषणम् । तेन श्लैष्मिकाणां कृमिजातीनां य एव उपद्रवास्त एव कृमिजे हृद्रोगे मता इत्यर्थः ॥ १० ॥

वातोपसृष्टे हृदये वामयेत् स्निग्धमातुरम् ।
द्विपञ्चमूलक्वाथेन सस्नेहलवणेन तु ॥ ११ ॥
पिप्पल्येलावचाहिङ्गुयवभस्मानि सैन्धवम् ।
सौवर्चलमथो शुण्ठीमजमोदां च चूर्णितम् ॥ १२ ॥
फलधान्याम्लकौलत्थदधिमद्यासवादिभिः ।
पाययेत विशुद्धं च स्नेहेनान्यतमेन वा ॥ १३ ॥

इदानीं वातहृद्रोगचिकित्सामाह—वातोपसृष्टे इत्यादि । वातोपसृष्टे हृदये वातहृद्रोगे इत्यर्थः । यद्यपि वाते वमनं न शस्तं, तथाऽपि वातस्य कफस्थानगतत्वादत्र वमनं शस्तमेव, तथा पित्तजेऽपि । वमनानन्तरं यत् कार्यं तदाह—पिप्पलीत्यादि । यवभस्म यवक्षारः । फलानि मातुलुङ्गादिफलानि, तेषां रसोऽभिप्रेतः । मद्यासवौ मद्यवर्गोक्तौ । स्नेहेनान्यतमेन वा चतुःस्नेहमध्ये एकेन स्नेहेनेत्यर्थः ॥ ११–१३ ॥

भोजयेज्जीर्णशाल्यन्नं जाङ्गलैः सघृतै रसैः ।
वातघ्नसिद्धं तैलं च दद्याद्वस्तिं प्रमाणतः ॥ १४ ॥

१ 'पञ्चमः क्रिमिभिस्तथा । पृथग्लिङ्गं प्रवक्ष्यामि' इति पा० ।
२ 'पीड्यते' इति पा० ।

वातहृद्रोगे पथ्यमाह—भोजयेदित्यादि । किं वातहृद्रोगे एतदेव कार्यमुतान्यदपीत्याह—वातघ्नसिद्धमित्यादि । वातघ्नसिद्धं भद्रदार्वादिपक्वम् । प्रमाणतः यथाप्रमाणम् ॥ १४ ॥

श्रीपर्णीमधुकक्षौद्रसितोत्पलजलैर्वमेत् ।
पित्तोपसृष्टे हृदये सेवेत मधुरैः शृतम् ॥ १५ ॥
घृतं कषायांश्चोद्दिष्टान् पित्तज्वरविनाशनान् ।

पित्तहृद्रोगे वमनमाह—श्रीपर्णीत्यादि । श्रीपर्णी काश्मरी, मधुकं यष्टीमधु, सिता शर्करा, उत्पलं कुष्ठम् । अत्र जलशब्दो न क्वाथत्वेन सर्वत्र संबन्धनीयः, क्षौद्रादीनां क्वाथेऽनुपयोगात् । सेवेत मधुरैरित्यादि । मधुरैः शृतं काकोल्यादिभिः पक्वम् । पित्तज्वरविनाशनान् कषायान् चन्दनोशीरश्रीपर्ण्यादिनोक्तान् ॥ १५ ॥—

तृप्तस्य च रसैर्मुख्यैर्मधुरैः सघृतैर्भिषक् ॥ १६ ॥
सक्षौद्रं वितरेद्वस्तौ तैलं मधुकसाधितम् ।

पित्तहृद्रोगे स्नेहवस्तिमाह—तृप्तस्येत्यादि । रसैर्मुख्यैरेणादिमांसरसैः । मधुरैरम्लादिसंस्कृतैः । मधुकसाधितमेकेनैव यष्टीमधुकेन पक्वं; अन्ये जीवनीयसाधितमाहुः ॥ १६ ॥—

वचानिम्बकषायाभ्यां वान्तं हृदि कफात्मके ॥ १७ ॥
चूर्णं तु पाययेतोक्तं वातजे भोजयेच्च तम् ।
फलादिमथ मुस्तादिं त्रिफलां वा पिबेन्नरः ॥ १८ ॥
श्यामात्रिवृत्कल्कयुतं घृतं वाऽपि विरेचनम् ।
बलातैलैर्विदध्याच्च वस्तिं वस्तिविशारदः ॥ १९ ॥

श्लैष्मिकहृद्रोगे चिकित्सामाह—वचेत्यादि । श्लेष्महृद्रोगे वचानिम्बकषायाभ्यां वान्तं वातजे हृद्रोगे उक्तं चूर्णं पिप्पल्येलेत्यादिकं पाययेदिति पिण्डार्थः । न केवलं तच्चूर्णं पाययेत्, भोजयेच्च तमिति तं वातजे हृद्रोगे उक्तं चूर्णं भोजयेच्च भक्तेन सह खादेदित्यर्थः । फलादिमथ मुस्तादिमित्यादि ।—फलादिः मदनफलादिः संशोधनसंशमनीयोक्तः । मुस्तादिः द्रव्यसंग्रहणीयोक्तः । श्यामात्रिकवृत्कल्कयुतमित्यादि ।—श्यामा वृद्धदारकः । अत्र पिबेदिति संबध्यते । बलातैलैरित्यादि । वातादिचिकित्सितं सर्वमेवानुक्तमपि त्रिदोषजे कार्यम् ॥ १७–१९ ॥

क्रिमिहृद्रोगिणं स्निग्धं भोजयेत् पिशितौदनम् ।
दध्ना च पललोपेतं त्र्यहं, पश्चाद्विरेचयेत् ॥ २० ॥
सुगन्धिभिः सलवणैर्योगैः साजाजिशर्करैः ।
विडङ्गगाढं धान्याम्लं पाययेताप्यनन्तरम् ॥ २१ ॥
हृदयस्थाः पतन्त्येवमधस्तात् क्रिमयो नृणाम् ।
यवान्नं वितरेच्चास्य सविडङ्गमतः परम् ॥ २२ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे हृद्रोगप्रतिषेधो नाम (पञ्चमोऽध्यायः, आदितः) त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

१ 'जाङ्गलैः' इति पा०। २ 'वितरेद्वस्तिं' इति पा०। ३ 'भोजयेद्घृतम्' इति पा०। ४ 'बलातैलं विदध्यात्' इति पा०।

क्रिमिहृद्रोगचिकित्सामाह—क्रिमिहृद्रोगिणमित्यादि । पिशितौदनं सपललं दध्ना सह क्रिमिहृद्रोगिणं त्र्यहं भोजयेत् क्रमीणामुत्क्लेशनार्थं; पिशितं मांसं, पललोपेतं भृष्टतिलचूर्णयुक्तम् । क्रिम्युत्क्लेशानन्तरं किं कुर्यादित्याह—पश्चादित्यादि । सुगन्धिभिर्योगैर्विरेचनकल्पोक्तैः 'शर्कराक्षौद्रसंयुक्तं' इत्यादिभिः । सलवणैर्योगैरिति 'समास्त्रिवृन्नागरकाभयाः स्युः' इत्यादिभिः । साजाजिशर्करैरिति सुगन्धियोगसलवणयोगविशेषणं, साजाजिकानां वैरेचनिकानामनिर्देशात्; तेन, अजाजिशर्करासहितैः सुगन्धिभिर्योगैरथवा सलवणैरप्यजाज्यादियुक्तैर्विरेचयेत् । पीतविरेकस्यानुपानमाह—विडङ्गगाढमित्यादि । विडङ्गगाढं विडङ्गोत्कटम् । धान्याम्लं काञ्जिकम् । एवं पूर्वोक्तेन विधानेन । केचित् 'सलवणैः' इत्यत्र 'सपललैः' इति पठित्वा सभृष्टतिलकल्कैः सुगन्धिभिर्योगैर्विरेचयेदिति व्याख्यानयन्ति । क्रिमिहृद्रोगे वमनं न योज्यं, क्रिमिजर्जरहृदयत्वात्; अत एव सुगन्धियोगैर्विरेचनमुक्तं, वमनशङ्काभयात् । धान्याम्लपानादनन्तरं किं कुर्यादित्याह—यवान्नं वितरेदित्यादि । वितरेत् दद्यात् । अत इति विरेकात् ॥ २०—२२ ॥

इति श्रीडल्हणविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गतकायचिकित्सातन्त्रे हृद्रोगप्रतिषेधो नाम त्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशत्तमोऽध्यायः ।

अथातः पाण्डुरोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

हृद्रोगप्रतिषेधानन्तरं संख्यासाम्यात्तीक्ष्णाम्लकटुकादिहृद्रोगचिकित्सितस्य हेतुत्वात् पाण्डुरोगप्रतिषेधारम्भो युक्त इत्याह—अथात इत्यादि । अत्रादिशब्दद्वयं लुप्तं द्रष्टव्यं, तेन पाण्ड्वादिरोगादिप्रतिषेधमिति । तत्र प्रथमेनादिशब्देन कृष्णपीतमिश्रा वर्णा ग्राह्याः, कामलादयो द्वितीयेन; अपरे तु पाण्डुवर्णाधिक्यात् सर्वे एव पाण्डुरोगाः प्रोच्यन्त इति मत्वा एकमेवादिशब्दं लुप्तं वर्णयन्ति; ते च आदिशब्दात् कामलादीन् गृह्णन्ति । अपरे त्वादिशब्दं विनाऽपि कामलादीन् गृह्णन्ति, पाण्डुरोगान्तर्भावात्तेषामिति ॥ १ ॥ २ ॥

व्यवायमम्लं लवणानि मद्यं
मृदं दिवास्वप्नमतीव तीक्ष्णम् ।
निषेवमाणस्य विदूष्य रक्तं
कुर्वन्ति दोषास्त्वचि पाण्डुभावम् ॥ ३ ॥

पाण्डुरोगस्य हेतुसंप्राप्ती आह—व्यवायमम्लमित्यादि । व्यवायादीनि निषेवमाणस्य पुरुषस्य दुष्टा दोषा रक्तं विदूष्य त्वचि पाण्डुभावं कुर्वन्तीति पिण्डार्थः । व्यवायः स्त्रीसेवा, स च सर्वदोषप्रकोपकः, अन्ये तु वातपित्तप्रकोपकत्वं व्यवायस्य मन्यन्ते

१ 'विरेचनादनन्तरं' इति पाठान्तरम्।

भारहरणादौ क्रोधादौ च तत्पाठात् । अम्ललवणयोः पित्तकफकरत्वम् । मृत्तिका सर्वदोषप्रकोपणी, नानाविधत्वात्; तथा-चोक्तम्,—"कषाया मारुतं, पित्तमूषरा, मधुरा कफम् । कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तं विरूक्षयेत्"–इति । दिवास्वप्नस्त्रिदोषप्रकोपकः । तीक्ष्णं पित्तकोपि । एवं यथास्वं यथासंभवं हेतुरुक्तः । विदूष्य रक्तमित्यादिका संप्राप्तिः । अतीव तीक्ष्णमित्यत्रादिशब्दो लुप्तो द्रष्टव्यः; तेन पिष्टपयोमाषतिलादीनां ग्रहणम् । केचित् 'मृन्मयमत्स्यामिषतीक्ष्णपिष्टपयोदिवास्वप्नतिलेक्षुमाषान् । निषेवमाणस्य' इति पठन्ति, शेषं समम् । तेऽपि लुप्तादिशब्दाद्व्यवायादीनि गृह्णन्ति । अपरे अतीव तीक्ष्णमित्यत्र अतीव रूक्षमिति पठन्ति ॥ ३ ॥

पाण्ड्वामयोऽष्टार्धविधः प्रदिष्टः
पृथक्समस्तैर्युगपच्च दोषैः ।

संख्यामाह—पाण्ड्वित्यादि । अष्टार्धविधश्चतुर्विधः; कथं चतुर्विध इत्याह—पृथगित्यादि । पृथग्दोषैस्त्रयः, समस्तैरेकः । युगपदिति पदं दोषत्रयस्यैककालप्रकोपसूचनार्थम् । यद्यपि तन्त्रान्तरे मृज्जः पाण्डुरोगः पञ्चमः कथितः, तथाऽप्यत्र मृज्जस्त्रिदोषज एवान्तर्भूतः, वक्ष्यमाणाश्च कामलादयः पाण्डुरोगस्यैव पर्यायाः; अतोऽत्र चत्वार एव । केचित् पाण्ड्वामयस्त्वष्टविध इति पठन्ति । तन्मते पृथग्दोषैस्त्रयः, समस्तैरेकः, मृद्भक्षणादेकः, द्वे कामले च, एको हलीमकः, एवं पाण्डुरोगोऽष्टविधः । तथाच तन्त्रान्तरम्—"वातेन पित्तेन कफेन चापि त्रिदोषमृद्भक्षणसंभवः स्यात् । द्वे कामले चैकहलीमकश्च स चाष्टधैवं त्विह पाण्डुरोगः"—इति ॥—

सर्वेषु चैतेष्विह पाण्डुभावो
यतोऽधिकोऽतः खलु पाण्डुरोगः ॥ ४ ॥

यद्यपि वातादिभेदेन कृष्णादिवर्णत्वमभिधास्यति, तथाऽप्यस्य विकारस्य पाण्डुवर्णाधिक्यात् पाण्डुरोगव्यपदेश इति दर्शयन्नाह—सर्वेषु चैतेष्विह पाण्डुभाव इत्यादि ॥ ४ ॥

त्वक्स्फोटनं ष्ठीवनगात्रसादौ
मृद्भक्षणं प्रेक्षणकूटशोथः ।
विण्मूत्रपीतत्वमथाविपाको
भविष्यतस्तस्य पुरःसराणि ॥ ५ ॥

इदानीं पाण्डुरोगपूर्वरूपाण्याह—त्वगित्यादि । त्वक्स्फोटः त्वचां स्फुटनम् । ष्ठीवनं थूत्करणम् । यद्यप्यत्र मृद्भक्षणं कथितं, तथाऽपि मृद्भक्षणे इच्छा गम्यते । प्रेक्षणमक्षि । अविपाक आहारस्य । पुरःसराणि अग्रेसराणि ॥ ५ ॥

स कामलापानकिपाण्डुरोगः
कुम्भाह्वयो लाघर(व)कोऽलसाख्यः ।
विभाष्यते लक्षणमस्य कृत्स्नं
निबोध वक्ष्याम्यनुपूर्वशस्तत् ॥ ६ ॥

तस्यैव पाण्डुरोगस्य पर्यायानाह—स इत्यादि । स रोगः कामलादिकाभिः संज्ञाभिर्विभाष्यते विविधं भाष्यते । अस्येति कामलादिपर्यायैर्निर्दिष्टस्य रोगस्य । अनुपूर्वशः पूर्वं पूर्वमनुपूर्वेणेत्यर्थः । तं पाण्डुरोगम् ॥ ६ ॥

कृष्णेक्षणं कृष्णसिरावनद्धं
तद्वर्णविण्मूत्रनखाननं च ।
वातेन पाण्डुं मनुजं व्यवस्ये-
च्छुक्तं तथाऽन्यैस्तदुपद्रवैश्च ॥ ७ ॥

वातिकपाण्डुरोगलक्षणमाह—कृष्णेक्षणमित्यादि । कृष्णेक्षणं कृष्णाक्षिकम् । तद्वर्णविण्मूत्रनखाननं कृष्णवर्णविण्मूत्रनखमित्यर्थः । तदुपद्रवैर्वातोपद्रवैः ॥ ७ ॥

पीतेक्षणं पीतसिरावनद्धं
तद्वर्णविण्मूत्रनखाननं च ।
पित्तेन पाण्डुं मनुजं व्यवस्ये-
च्छुक्तं तथाऽन्यैस्तदुपद्रवैश्च ॥ ८ ॥

पैत्तिकपाण्डुरोगलक्षणमाह—पीतेत्यादि । तद्वर्णं पीतवर्णम् । तदुपद्रवैः पित्तोपद्रवैरित्यर्थः ॥ ८ ॥

शुक्लेक्षणं शुक्लसिरावनद्धं
तद्वर्णविण्मूत्रनखाननं च ।
कफेन पाण्डुं मनुजं व्यवस्ये-
च्छुक्तं तथाऽन्यैस्तदुपद्रवैश्च ॥ ९ ॥

श्लैष्मिकपाण्डुरोगलक्षणमाह—शुक्लेत्यादि । तद्वर्णं शुक्लवर्णं, तदुपद्रवैः कफोपद्रवैः ॥ ९ ॥

सर्वात्मके सर्वमिदं व्यवस्येद्

सान्निपातिकपाण्डुरोगलक्षणमाह—सर्वात्मके सर्वमिदमित्यादि । सर्वात्मके सान्निपातिके पाण्डुरोगे, सर्वं समस्तं, इदं वातादिजपाण्डुरोगलक्षणं, व्यवस्येत् जानीयात् ॥—

वक्ष्यामि लिङ्गान्यथ कामलायाः ।
यो ह्यामयान्ते सहसाऽन्नमम्ल-
मद्यादपथ्यानि च तस्य पित्तम् ॥ १० ॥
करोति पाण्डुं वदनं विशेषात्
पूर्वेरितौ तन्द्रिबलक्षयौ च ।

इदानीं पाण्डुरोगपर्यायभूताया अपि कामलाया लक्षणमाह—वक्ष्यामीत्यादि । ननु, यदि पाण्डुरोगस्य पर्यायः कामला, तत् कथं तस्य लक्षणान्युक्तानि? सत्यं, यथा पाण्डुरोगाणां वातादिजानां प्रतिस्वं भेदो विद्यते तथाऽस्यापीति न दोषः; एतेन कामलादीनां संज्ञानां विशिष्टावस्थाविषयत्वाद्विशिष्टत्वं,

१ 'तम्' इति पा० । 'अत्र कामलेति कामशब्दोऽयं साधारणशब्दविशेषात्स्वल्पे भक्ताद्यभिलाषे प्रवर्तते, तं लातीति कामला । दुष्टत्वेन कुत्सितोऽपानोऽपानकः, सोऽस्यास्तीति अपानकी, कामलकाख्योऽपानकिपाण्डुरोगः कामलापानकिपाण्डुरोगः । कुम्भकामलकाख्योऽपानकिपाण्डुरोगस्त्वत्र कुम्भाह्वय उच्यते भीमो भीमसेन इतिवत् । रोगस्यास्य कुम्भकामलेति संज्ञा तन्त्रान्तरे उपदिश्यते । स एव पुनर्ज्वरादिभिर्लाघवं करोति, सत्यपि सामर्थ्ये कर्मस्वनुत्साहं च जनयतीत्यलसाख्योऽपानकिपाण्डुरोगस्तु लाघवक उच्यते' इति हाराणचन्द्रः।

१ 'तन्द्राविलत्वं प्रथमोदितांश्च' इति पा० ।

पर्यायत्वं पाण्डुरोगत्वापरित्यागात् । तान्येव लिङ्गान्याह—य इत्यादि । लिङ्गानि वक्ष्याम्यथ कामलाया इत्यभिधाय कामला-कारणवचनं भविष्यन्त्या अपि तस्याः परिज्ञानार्थम् । आमयान्ते पाण्डुरोगान्ते अन्यरोगान्ते च । सहसा शीघ्रम् । अन्नमम्लमम्लभोजनम् । पाण्डुमित्यत्र देहमिति शेषः । पूर्वैरितौ तन्द्रिबलक्षयौ चेति शारीरस्थाने गर्भव्याकरणाध्याये तन्द्रा कथिता, सूत्रस्थाने दोषादिक्षयवृद्ध्यध्याये बलक्षय इत्यर्थः । ननु, तन्द्राशब्दस्य व्युत्पादितत्वात् कथं तन्द्रिबलक्षयाविति ? सत्यं, कृष्यादेराकृतिगणत्वेनेक्प्रत्ययान्तत्वेन साधु । अन्ये 'तन्द्राऽबलत्वं प्रथमोदितं च' इति पठन्ति; तत्रापि स एवार्थः । अपरे 'प्रथमोदितांश्च' इति पठन्ति; ते च पाण्डुरोगोक्तलिङ्गविशेषान् गृह्णन्ति । 'पाण्डुवदनम्' इत्यत्र 'पीतवदनम्' इति केचित् पठन्ति, तं चानार्षं टीकाकारा भाषन्ते ॥ १० ॥—

भेदस्तु तस्याः खलु कुम्भसाह्वः
शोफो महांस्तत्र च पर्वभेदः ॥ ११ ॥

इदानीं कामलाभेदमाह—भेद इत्यादि । तत्रेति कुम्भसाह्वे । पर्वभेदः सन्धिपीडा । कुम्भसाह्वस्तन्त्रान्तरे कुम्भकामलेति कथ्यते ॥ ११ ॥

ज्वराङ्गमर्दभ्रमसादतन्द्रा-
क्षयान्वितो लाघर(व)कोऽलसाख्यः ।

तस्यैव कुम्भसाह्वस्यावस्थायां संज्ञान्तरमाह—ज्वराङ्गमर्देत्यादि । स एव कुम्भसाह्वो ज्वरादियुक्तो लाघरकोऽलसाख्यः स्यादिति पिण्डार्थः । लाघरकः कथ्यते अलसकश्च कथ्यत इत्यर्थः । अङ्गमर्दो वेदनाविशेषः, स्फुटनिकेत्यपरे । अन्ये पाण्डुरोग एव ज्वरादियुक्तः कुम्भसाह्वः कथ्यत इति मन्यन्ते । अस्यैव अवस्थाभेदं[१] पानकीति तन्त्रान्तरीयाः पठन्ति । तद्यथा —"सन्तापो भिन्नवर्चस्त्वं बहिरन्तश्च पीतता । पाण्डुता नेत्ररोगश्च पानकीलक्षणं वदेत्"—इति ॥—

तं वातपित्ताद्धरिपीतनीलं
हलीमकं नाम वदन्ति तज्ज्ञाः ॥ १२ ॥

इदानीं हलीमकलक्षणमाह—तमित्यादि । तं पाण्डुरोगम् । कुम्भसाह्वो यदा हरितपीतनीलः स्यात्तदा तज्ज्ञाः कायचिकित्साविदो हलीमकं नाम वदन्ति । हरि हरितं, नीलं श्यावम् । केचित्तु 'तं वातपित्ताभिपरीतलिङ्गं'[२] इति पठित्वा वातपित्ताभ्यामभिपरीतं संबद्धं लिङ्गं यस्य तथेति व्याख्यानयन्ति ॥१२॥

उपद्रवास्तेष्वरुचिः पिपासा
छर्दिर्ज्वरो मूर्धरुजाऽग्निसादः ।
शोफस्तथा कण्ठगतोऽबलत्वं
मूर्च्छा क्लमो हृदयपीडनं च ॥ १३ ॥

इदानीं पाण्डुरोगोपद्रवानाह—उपद्रवा इत्यादि । तेषु पाण्डुरोगेषु । मूर्धरुजा शिरोव्यथा । अबलत्वं निर्बलत्वम् । सोपद्रवस्य पाण्डुरोगस्य कृच्छ्रसाध्यत्वमसाध्यत्वं च यथावस्थं बोद्धव्यम् ॥ १३ ॥

१ 'अवस्थाविशेषः पानकीति' इति पा० । २ 'वातपित्ताभिपरीतलिङ्गः' इति पा० ।

साध्यं तु पाण्ड्वामयिनं समीक्ष्य
स्निग्धं घृतेनोर्ध्वमधश्च शुद्धम् ।
संपादयेत् क्षौद्रघृतप्रगाढै-
र्हरीतकीचूर्णयुतैः प्रयोगैः ॥ १४ ॥
पिबेद्घृतं वा रजनीविपक्वं
यत्त्रैफलं तैल्वकमेव वाऽपि ।
विरेचनद्रव्यकृतं पिबेद्वा
योगांश्च वैरेचनिकान् घृतेन ॥ १५ ॥

इदानीं चिकित्सितमाह—साध्यमित्यादि । साध्यपाण्डुरोगज्ञानं वक्ष्यमाणासाध्यलक्षणविपर्ययादरिष्टलक्षणवैपरीत्याच्च । घृतेनेति कल्याणकदाधिकमहातिक्तपञ्चगव्यादिना, अन्ये केवलेनैव गव्यघृतेनेत्याहुः । यदत्र पाण्डुरोगेषु घृतेनैव स्नेहनमुक्तं तत्तेषां पित्तभूयिष्ठत्वाद्रक्तदूष्यत्वाच्च । यद्यपि पाण्डुरोगे ऊर्ध्वशोधनं निषिद्धं, तथाऽपि ऋतुदेशप्रकृतिकालशरीरापेक्षया मृदु वमनं देयम् । तथा च तन्त्रान्तरम्,—"कालं च देशप्रकृती शरीरं समीक्ष्य दद्याद्वमनं विधिज्ञः । वान्तस्य तीक्ष्णान्यनुलोमनानि कल्पोपदिष्टानि भिषग्विदध्यात्"—इति । वमनानन्तरं वक्ष्यमाणैः शालिप्रभृतिभिः कृतसंसर्जनक्रमस्य दोषशमनार्थमाह—संपादयेदित्यादि । शुद्धं पाण्डुरोगिणमेवंभूतैः प्रयोगैर्वक्ष्यमाणयोगैः शेषदोषशमनार्थं संपादयेत् सम्यग्योजयेदित्यर्थः । ननु, सर्पिर्मधुहरीतकीयुक्तमेकमेवायोरजोयोगमभिधास्यति तत् कथं प्रयोगैरिति बहुवचनं ? सत्यं, प्रदेशान्तरोक्तानां नवायसप्रभृतीनामत्र शस्तत्वात् । पिबेद्घृतं वेत्यादि । रजनीविपक्वं हरिद्राकल्कसाधितम् । त्रैफलं त्रिफलासाधितम् । तैल्वकमिति तिल्वकः पट्टिकारोध्रः, तेन साधितमित्यर्थः; अन्ये तैल्वकं वातव्याध्युक्तमाहुः । विरेचनद्रव्यकृतमित्यादि ।—त्रिवृदादिसंस्कृतं घृतं; वैरेचनिकान् योगान् विरेचनद्रव्यविकल्पोक्तान्, तांश्च घृतेन पिबेत् ॥ १४ ॥ १५ ॥

मूत्रे निकुम्भार्धपलं विपाच्य
पिबेदभीक्ष्णं कुडवार्धमात्रम् ।
खादेद्गुडं वाऽप्यभयाविपक्वं-
मारग्वधादिक्वथितं पिबेद्वा ॥ १६ ॥

इदानीं पाण्डुरोगेऽपराण्यपि विरेचनान्याह—मूत्रे इत्यादि । निकुम्भा दन्ती, तस्या अर्धपलं महिषीमूत्रे षोडशगुणे विपाच्य, चतुर्भागावशिष्टं कुडवार्धमात्रं पलद्वयमात्रं, विरेकाय पिबेदित्यर्थः । गुड इक्षुविकृतिः । अभयाविपक्वं हरीतकीक्वाथविपक्वं, अन्ये अभयाविपक्वं गुडकं सहरीतकीप्रभृतिकमाहुः । अपरे 'अभयाविमिश्रम्'[१] इति पठन्ति । मुहुर्वैरेचनिकयोगनिर्देशात्[२] पाण्डुरोगे विरेचनस्यात्यन्तहितत्वं ज्ञेयम् ॥ १६ ॥

१ 'अभयाविमिश्रं' इति पा० । २ 'बहुविरेकयोगनिर्देशात्' इति पा० ।

अयोरजोव्योषविडङ्गचूर्णं
लिह्याद्धरिद्रां त्रिफलान्वितां वा।
सर्पिर्मधुभ्यां विदधीत वाऽपि
शास्त्रप्रदेशाभिहितांश्च योगान्॥ १७॥

किं पाण्डुरोगे पूर्वोक्तमेव कार्यमुतान्यदपीत्याह—अय इत्यादि। अयोरजोव्योषविडङ्गचूर्णमित्येको योगः। हरिद्रां त्रिफलान्वितामिति द्वितीयो योगः। अयोरजो लोहचूर्णम्। व्योषं त्रिकटुकम्। लिह्यादित्यत्र मधुसर्पिर्भ्यामिति संबन्धनीयम्। हरिद्रां पिण्डहरिद्राम्। केचित् हरिद्राशब्देन आदौ दारुशब्दलोपात् दारुहरिद्रां गृह्णन्ति। विदधीत वाऽपीत्यादि। विदधीत कुर्वीत। शास्त्रप्रदेशाभिहितांश्च योगान् शास्त्रेऽन्यप्रदेशोक्तान् नवायसादीन्॥ १७॥

हरेच्च दोषान् बहुशोऽल्पमात्रान्
श्चयेद्धि दोषेष्वतिनिर्हृतेषु।

इदानीं पाण्डुरोगे यच्छोधनमुक्तं तदल्पमात्रया कर्तव्यमित्याह–हरेच्च दोषानित्यादि। बहुशो बहून् वारान्। अल्पमात्रान् स्तोकस्तोकान्। कस्मात् स्तोकान् स्तोकान् हरेदित्याह–श्वयेद्धि दोषेष्वित्यादि। श्वयेत् श्वयथुं प्राप्नुयात्। हि यस्मादर्थे। अत्र पाठान्तरं—'हरेच्च दोषान् बहुशोऽल्पमात्रान् शुद्धेषु दोषेष्व[1]भिनिर्हृतेषु' इति। शुद्धेषु दुष्टिरहितेषु; अभिनिर्हृतेष्वित्यभिशब्दः सम्यगर्थः, अतियोगस्यानिष्टत्वात्॥—

धात्रीफलानां रसमिक्षुजं च
मन्थं पिबेत् क्षौद्रयुतं हिताशी॥ १८॥

धात्रीफलानामित्यादि। धात्रीफलानामामलकफलानां स्वरसं क्षौद्रयुतं पिबेदित्येको योगः। इक्षुजं रसं क्षौद्रयुतमिति द्वितीयः। मन्थमिति "शक्तवः सर्पिषाऽभ्यक्ताः शीतवारिपरिप्लुताः"–इत्याद्युक्तलक्षणं क्षौद्रयुतमिति तृतीयः। तथा च तन्त्रान्तरम्,—"पिबेत् सुशीतलान् मन्थान् घृताक्तान् मधुसंयुतान्। सक्षौद्रं वा रसं धात्र्या इक्षोर्वाऽपि हिताशनः"–इति। तन्त्रान्तरे पाण्डुरोगे मन्थशब्देन विशिष्टो मन्थ उच्यते। तद्यथा—"धात्रीफलरसे शक्तूनिक्षूणां च रसे तथा। पाण्डुर्मधुसमायुक्तं पिबेन्मन्थं सुशीतलम्"—इति॥ १८॥

उभे बृहत्यौ रजनीं शुकाख्यां
काकादनीं चापि सकाकमाचीम्।
आदारिबिम्बीं सकदम्बपुष्पीं
विपाच्य सर्पिर्विपचेत् कषाये॥ १९॥
तत् पाण्डुतां हन्त्युपयुज्यमानं
क्षीरेण वा मागधिका यथाग्नि।

उभे इत्यादि। शुकाख्या चर्मकारवटः, अन्ये शुकशिम्बामाहुः। काकादनी काकतिन्दुकः। आदारिबिम्बीं सकदम्बपुष्पीमित्यादि।—आदारी वेल्लन्तरसदृशपुष्पा आलिरिति लोके, बिम्बी रास्नानुकारिविटपा लोहितफला च; कार्तिककुण्डस्तु आदारिशिम्बी आउलिरिति प्रसिद्धेति व्याख्यानयति। कदम्बपुष्पी भूमिकदम्बः, अलम्बुषामपरे। एतानि कषायकल्पेन विपाच्य, तस्मिन् कषाये सर्पिर्घृतं विपचेत्। क्षीरेण वेत्यादि। मागधिका वा क्षीरेण सह यथाग्नि उपयुज्यमाना पाण्डुतां हन्तीत्यर्थः॥ १९॥—

हितं च यष्टीमधुजं कषायं
चूर्णं समं वा मधुनाऽवलिह्यात्॥ २०॥

हितं चेत्यादि। यष्टीमधुककषायं मधुना सममित्येको योगः। चूर्णं वा यष्टीमधुकस्य मधुना समं मधुना सह लिह्यादिति द्वितीयः। अन्ये 'चूर्णं समं वा मधुनाऽवलिह्यात्' इत्यत्र 'चूर्णं लिहेद्वा मधुना द्वितीयम्' इति पठन्ति; तत्रापि स एवार्थः॥२०॥

गोमूत्रयुक्तं त्रिफलादलानां
दत्त्वाऽऽयसं चूर्णमनल्पकालम्।
प्रवालमुक्ताञ्जनशङ्खचूर्णं
लिह्यात्तथा काञ्चनगैरिकोत्थम्॥ २१॥

गोमूत्रयुक्तमित्यादि। त्रिफलादलानां चूर्णमायसं चूर्णं दत्त्वा गोमूत्रयुक्तमनल्पकालं चिरकालं लिह्यात्। त्रिफलादलानामिति दलशब्दोऽष्ठीलापरिहारार्थम्। अन्ये 'गोमूत्रयुक्तं त्रिफलादलानां' इत्यत्र 'गोमूत्रपीतत्रिफलादलानां' इति पठन्ति, गोमूत्रभावितत्रिफलादलानामिति व्याख्यानयन्ति। प्रवालेत्यादि। प्रवालो विद्रुमः, मुक्ता मौक्तिकं, अञ्जनं रसाञ्जनम्। तथेति गोमूत्रयुक्तमनल्पकालं लिह्यादित्यर्थः। काञ्चनगैरिकोत्थमित्यत्रापि तथेति संबध्यते; तेन सुवर्णगैरिकचूर्णं गोमूत्रयुतं चिरकालं लिह्यादित्यर्थः। 'गोमूत्रपीतां त्रिफलां सपिष्टां' इति केचित् पठन्ति, गोमूत्रपीतां गोमूत्रभावितां मधुनाऽवलिह्यादिति व्याख्यानयन्ति॥ २१॥

आजं शकृत्स्यात् कुडवप्रमाणं
विडं हरिद्रा लवणोत्तमं च।
पृथक् पलांशानि समग्रमेत-
च्चूर्णं हिताशी मधुनाऽवलिह्यात्॥ २२॥

आजमित्यादि। आजं शकृत् छागलीपुरीषम्। कुडवप्रमाणं चतुष्पलमात्रम्। विडं लवणम्। लवणोत्तमं सैन्धवम्। पृथक् पलांशानि बिडादीनि पृथक्पलमात्राणीत्यर्थः। समग्रं समस्तम्॥ २२॥

मण्डूरलोहाग्निविडङ्गपथ्या-
व्योषांशकः सर्वसमानताप्यः।
मूत्रासुतो[3]ऽयं मधुनाऽवलेहः
पाण्ड्वामयं हन्त्यचिरेण घोरम्॥ २३॥

इदानीं पाण्डुरोगे सिद्धतमं योगमाह—मण्डूरेत्यादि। मण्डूरं लोहकिट्टानुकारि द्रव्यम्। अग्निश्चित्रकः। व्योषं त्रिकटुकम्। मण्डूरादीनां व्योषपर्यन्तानामंशः समो भागो यस्मिन् स तथेत्यर्थः। ताप्यो माक्षिकधातुः। मूत्रासुतः मूत्रे उषितः मूत्रसन्धित इत्यर्थः॥ २३॥

१ 'यष्टीमधुकं' इति पा०। २ 'शकृद्वा' इति पा०। ३ 'मूत्रायुतोऽयं' इति पा०।

बिभीतकायोमलनागराणां
चूर्णं तिलानां च गुडश्च मुख्यः ।
तक्रानुपानो वटकः प्रयुक्तः
क्षिणोति घोरानपि पाण्डुरोगान् ॥ २४ ॥

अपरमपि सिद्धतमं योगमाह—बिभीतकेत्यादि । अयोमलं लोहसिङ्घाणकम् । तिलानां कृष्णतिलानामपि चूर्णम् । गुडश्च मुख्य इति सर्वसमो गुडो नार्धगुड इत्यर्थः । क्षिणोति हन्ति । यद्यप्येतद्योगद्वयमनार्षं तथाऽपि सिद्धतमत्वेनास्मद्गुरुसंमतत्वादस्माभिः पठितम् ॥ २४ ॥

सौवर्चलं हिङ्गु किराततिक्तं
कलायमात्राणि सुखाम्बुना वा ।
मूर्वाहरिद्रामलकं च लिह्यात्
स्थितं गवां सप्तदिनानि मूत्रे ॥ २५ ॥
मूलं बलाचित्रकयोः पिबेद्वा
पाण्ड्वामयार्तोऽक्षसमं हिताशी ।
सुखाम्बुना वा लवणेन तुल्यं
शिग्रोः फलं क्षीरभुजोपयोज्यम् ॥ २६ ॥

सौवर्चलमित्यादि । सौवर्चलादीनामेकत्वेन निर्दिष्टानां बहुवचनान्तं कलायमात्राणीति विशेषणं सौवर्चलादीनां प्रत्येकं कलायमात्रेति प्रमाणबोधनार्थम् । सुखाम्बुना वा ईषदुष्णाम्बुना, 'लिहेत्' इति वाक्यशेषः । वाशब्दोऽत्र योगापेक्षया । मूर्वेत्यादि । मूर्वादिकं सप्तदिनानि गवां मूत्रे स्थितं लिह्यात् । मूर्वा चोरस्नायुः । बलाचित्रकयोः समुदितयोर्मूलकल्कं वा कर्षसमं हिताशी पाण्डुरोगार्तो मूत्रेण सुखाम्बुना वा पिबेदित्यर्थः । कार्तिककुण्डस्तु 'मूर्वाहरिद्रामलकं पिबेद्वा स्थितं गवां सप्तदिनानि मूत्रे' इति पठति; तत्र तन्त्रयुक्तिवशात् 'यत्र तत्' इति पदं द्रष्टव्यं, तेन यत्र मूर्वादिकं स्थितं तत् पिबेदित्यर्थः । तथाच तन्त्रान्तरम्—"निशामलकमूर्वाभिर्भावितं सप्त वासरान् । गोमूत्रं पिबतः पाण्डुः कामला च प्रणश्यति"–इति । सुखाम्बुना उष्णोदकेन । लवणेन सैन्धवेन । तुल्यं समम् । शिग्रोः फलं शोभाञ्जनकफलम् । कलायमात्रमित्यनुवर्तनीयं, सैन्धवस्यापि हिङ्ग्वदधिकमात्रस्यानभिमतत्वात् । क्षीरभुजा दुग्धाशनेन । उपयोज्यं पानादिविधिना ॥ २५ ॥ २६ ॥

न्यग्रोधवर्गस्य पिबेत् कषायं
शीतं सिताक्षौद्रयुतं हिताशी ।
शालादिकं चाप्यथ सारचूर्णं
धात्रीफलं वा मधुनाऽवलिह्यात् ॥ २७ ॥

न्यग्रोधवर्गस्येत्यादि । न्यग्रोधवर्गस्य न्यग्रोधादिगणस्य । कषायं क्वाथपाकपरिभाषया क्वथितम् । शालादिकं चाप्यथ सारचूर्णमित्यादि । शालसारादिचूर्णं मधुनाऽवलिह्यात्, आमलकचूर्णं वेत्यर्थः ॥ २७ ॥

१ 'तक्रानुपानं वटकाप्रयुक्तं' इति पा० ।

विडङ्गमुस्तत्रिफलाजमोद-
परूषकव्योषविनिर्दहन्यः ।
चूर्णानि कृत्वा गुडशर्करे च
तथैव सर्पिर्मधुनी शुभे च ॥ २८ ॥
संभारमेतद्विपचेन्निधाय
सारोदके सारवतो गणस्य ।
जातं च लेह्यं मतिमान् विदित्वा
निधापयेन्मोक्षकजे समुद्गे ॥ २९ ॥
हन्त्येष लेहः खलु पाण्डुरोगं
सशोथमुग्रामपि कामलां च ।

विडङ्गमुस्तत्रिफलेत्यादि । एतानि विडङ्गादिद्रव्याणि चूर्णीकृतानि, सारवतो गणस्य सारोदके शालसारादिगणसारक्वाथे, निधाय निक्षिप्य, तथा शुभे निर्मले कृत्वा गुडशर्करे सर्पिर्मधुनी च निक्षिप्य, ऐकध्यं तावत् पचेद्यावल्लेह्यं स्यात्, ततश्च संजातलेह्यं विदित्वा मतिमान् वैद्यो मोक्षकजे समुद्गे मोक्षकमये संपुटे निधापयेत् निक्षिपेदिति पिण्डार्थः । विनिर्दहनी चित्रकः । गुडशर्कराविडङ्गादिद्रव्यचूर्णप्रमाणं सारोदकचतुर्थांशेन, मधुसर्पिःप्रमाणमपि तथैव । ननूष्णयोगेन मधु विरुध्यते, तत् कथं मधुना सहावलेहपाकः? सत्यं, उष्णेन सह मधुनोऽभ्यवहारे विरोधो न पाके; तथा च तन्त्रान्तरं—'सक्षौद्रां शर्करां पक्त्वा' इत्यादि । यद्यप्यत्र पाण्डुरोगचिकित्सितं सामान्येनोक्तं, तथाऽप्येतदेव चिकित्सितं द्रव्यस्वरूपेण विकल्प्य यथादोषं योज्यम् । तथा च तन्त्रान्तरम्—"पाण्डुरोगप्रशान्त्यर्थमिदमुक्तं चिकित्सितम् । विकल्प्यैवं च भिषजा यथादोषबलं प्रति ॥ स्नेहप्रायं पवनजे, तिक्तशीतं तु पैत्तिके । श्लैष्मिके कटुरूक्षोष्णं, मिश्रं स्यात् सान्निपातिके" इति ॥ २८ ॥ २९ ॥—

सशर्करा कामलिनां त्रिभण्डी
हिता गवाक्षी सगुडा च शुण्ठी ॥ ३० ॥

अतः परं कामलाचिकित्सितमाह—सशर्करेत्यादि । त्रिभण्डी त्रिवृत्, सशर्करा कामलिनां हिता । गवाक्षी इन्द्रवारुणी, सा सगुडा हिता, शुण्ठ्यपि सगुडा ॥ ३० ॥

कालेयके चापि घृतं विपक्वं
हितं च तत् स्याद्रजनीविमिश्रम् ।

कालेयके इत्यादि । कालेयकं दारुहरिद्रानुकारि द्रव्यं, तत्कल्कसाधितं घृतं, रजनीविमिश्रं हरिद्राचूर्णप्रक्षेपयुतम् ॥—

धातुं नदीजं जतु शैलजं वा
कुम्भाह्वये मूत्रयुतं पिबेद्वा ॥ ३१ ॥

कुम्भाह्वयचिकित्सामाह—धातुमित्यादि । नदीजं धातुं सुवर्णमाक्षिकम् । तच्च मूत्रयुतं पिबेत् । जतु शैलजं वेति शिलाजतु वा मूत्रयुतं पिबेत् ॥ ३१ ॥

१ 'चूर्णानि कृत्वा' इति पा० । २ क्षौद्रयुतम्' इति पा० ।

मूत्रे स्थितं सैन्धवसंप्रयुक्तं
मासं पिबेद्वाऽपि हि लोहकिट्टम्।

मूत्रे स्थितमित्यादि। गोमूत्रे मासमुषितं लोहकिट्टं लोहमलं तेनैव मूत्रेण चूर्णितं सैन्धवयुक्तं कुम्भाह्वये पिबेत्। लोहकिट्टमित्यत्र हिरण्यकिट्टमिति केचित् पठन्ति; तन्नेच्छन्ति निबन्धकाराः, हिरण्यस्यामलत्वात्॥—

दग्ध्वाऽक्षकाष्ठैर्मलमायसं वा
गोमूत्रनिर्वापितमष्टवारान्॥ ३२॥
विचूर्ण्य लीढं मधुनाऽचिरेण
कुम्भाह्वयं पाण्डुगदं निहन्यात्।
सिन्धूद्भवं वाऽग्निसमं च कृत्वा
क्षिप्त्वा च मूत्रे सकृदेव तप्तम्॥ ३३॥
लौहं च किट्टं बहुशश्च तप्त्वा
निर्वाप्य मूत्रे बहुशस्तथैव।
एकीकृतं गोजलपिष्टमेत-
दैकध्यमावाप्य पचेदुखायाम्॥ ३४॥
यथा न दह्येत तथा विशुष्कं
चूर्णीकृतं पेयमुदश्विता तत्।
तक्रौदनाशी विजयेत रोगं
पाण्डुं तथा दीपयतेऽनलं च॥ ३५॥

कुम्भाह्वये सिद्धतमं योगमाह—दग्ध्वेत्यादि। सिन्धूद्भवं सैन्धवम्। अग्निसमं कृत्वा बिभीतकाग्निना अग्निवर्णं कृत्वेत्यर्थः। सकृत् एकवारम्। लौहं च किट्टमिति लोहसिंहाणकमित्यर्थः। निर्वाप्य निर्वापितं कृत्वा। एकीकृतं समभागेन मिश्रीकृतं, गोजलपिष्टं निर्वापणावशिष्टपञ्चगुणे गोमूत्रे पिष्टम्, उखायां स्थाल्यां निक्षिप्य, मुखं पिधाय, यथा बाष्पो बहिर्न निःसरति यथा न दह्येत तथा विपचेत्। ततश्च विशुष्कं चूर्णीकृतमुदश्विता मथितेन सह पेयम्। जीर्णे च तक्रौदनं भोजयेदित्यर्थः। अयमसौश्रुतोऽपि पूर्वोक्तहेतुत्वादस्माभिः पठितः। अस्य योगस्य तन्त्रान्तरे बिभीतकलवणमिति संज्ञा॥ ३२-३५॥

द्राक्षागुडूच्यामलकीरसैश्च
सिद्धं घृतं लाघर(व)के हितं च।

इदानीं लाघरकचिकित्सामाह—द्राक्षेत्यादि।—

गौडानरिष्टान्मधुशर्कराश्च
मूत्रासवान् क्षारकृतांस्तथैव॥ ३६॥
स्निग्धान् रसानामलकैरुपेतान्
कोलान्वितान् वाऽपि हि जाङ्गलानाम्।
सेवेत शोफाभिहितांश्च योगान्
पाण्ड्वामयी शालियवांश्च नित्यम्॥ ३७॥

इदानीं तन्त्रान्तरोक्तान् सर्वानेवाभयारिष्टादीन् भोजनं च संगृह्णन्नाह—गौडानित्यादि। गौडानरिष्टान् अभयारिष्टादीन्। मधुशर्कराश्चेति मधुशब्देन मध्वासवः, स च लोहारिष्टप्रभृतिकः; शर्कराशब्देन शर्करासवः। मूत्रासवान् कुष्ठचिकित्सितोक्तान्। क्षारकृतानासवान् श्वीपदपठितान्। स्निग्धान् रसान् स्नेहभृष्टान् जाङ्गलानां मांसरसान्; आमलकैरुपेतान् आमलकफलसंस्कृतान्, कोलान्वितान् वेति बदरसंस्कृतान्; विकल्पाभिधानं सात्म्यापेक्षया। शोफाभिहितान् योगान् देवदारुशुण्ठीरसादिकान्। शालयो रक्तशाल्यादयः॥ ३६॥ ३७॥

श्वासातिसारारुचिकासमूर्च्छा-
तृट्छर्दिशूलज्वरशोफदाहान्।
तथाऽविपाकस्वरभेदसादान्
जयेद्यथास्वं प्रसमीक्ष्य शास्त्रम्॥ ३८॥

पाण्डुरोगोपद्रवचिकित्सामाह—श्वासेत्यादि। एतान् श्वासादीनुपद्रवान्, यथास्वं शास्त्रं यथात्मीयं चिकित्साशास्त्रं प्रसमीक्ष्य जयेत्। केचिदमुं पाठमन्यथा पठन्ति,—'तृष्णां ज्वरं छर्दिमथातिसारं मूर्च्छां क्षयं श्वासमनन्नलिप्साम्[1]। तथाऽविपाकस्वरभेदसादान् जयेद्यथावत् प्रसमीक्ष्य शास्त्रम्'—इति। ननु, ज्वरातिसारान्वितस्य तस्यासाध्यत्वेन वक्ष्यमाणत्वात् कुतो ज्वरातिसारयोश्चिकित्सातिदेशः? उच्यते, अचिरोत्थितयोस्तयोः सतोः पाण्डुरोगिणः प्रतिकार्यत्वात्॥ ३८॥

अन्तेषु शूनं परिहीनमध्यं
म्लानं तथाऽन्तेषु च मध्यशूनम्।
गुदे च शेफस्यथ मुष्कशूनं
प्रताम्यमानं च विसंज्ञकल्पम्[2]॥ ३९॥
विवर्जयेत् पाण्डुकिनं यशोऽर्थी
तथाऽतिसारज्वरपीडितं च॥ ४०॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे पाण्डुरोगप्रतिषेधो नाम (षष्ठोऽध्यायः, आदितः) चतुश्चत्वारिंशत्तमोऽध्यायः॥४४॥

इदानीमनुपक्रम्यस्य पाण्डुरोगिणो लक्षणमाह—अन्तेषु शूनमित्यादि। अन्तेषु हस्तपादमुखेषु। परिहीनमध्यं कृशमध्यकायम्। म्लानं कृशम्। गुदे च शेफसीत्यत्रापि शूनमिति संबन्धनीयं, शेफो योनिलिङ्गम्। मुष्कशूनमण्डकोषशूनम्। यद्यपि मध्यशूनमित्यनेनैव गुदादिशोफः प्राप्तः, तथाऽप्यन्ते म्लानतां विनाऽपि गुदादिशोफी त्याज्य इति दर्शनार्थं गुदादिशोफकथनम्। प्रताम्यमानं मूर्च्छन्तम्। विसंज्ञकल्पं विचेतनप्रायम्। यद्यपि मूर्च्छायेन विसंज्ञकल्पमिति प्राप्तं, तथाऽप्यभिधानं विसंज्ञकल्पस्य विशेषेणासाध्यताप्रतिपादनार्थम्। अतिसारज्वरपीडितमतिसारज्वराभ्यां पीडितमित्यर्थः। यद्यपि पानकीहलीमकचिकित्सितं नोक्तं, तथाऽपि पाण्डुरोगचिकित्सितं तयोरपि कर्तव्यम्॥ ३९॥ ४०॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे पाण्डुरोगप्रतिषेधो नाम चतुश्चत्वारिंशत्तमोऽध्यायः॥ ४४॥

---

१ 'श्वासमनल्पशोथम्' इति पा०। २ 'मुष्कयोश्च शूनं, प्रताम्यन्तमसंज्ञकल्पम्' इति पा०।

पञ्चचत्वारिंशत्तमोऽध्यायः ।

अथातो रक्तपित्तप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

पाण्डुरोगप्रतिषेधानन्तरं दूष्यसाम्याद्रक्तपित्तप्रतिषेधारम्भो युक्त इत्यत आह—अथात इत्यादि ॥ १ ॥ २ ॥

क्रोधशोकभयायासविरुद्धान्नातपानलान् ।
कट्वम्ललवणक्षारतीक्ष्णोष्णातिविदाहिनः ॥ ३ ॥
नित्यमभ्यसतो दुष्टो रसः पित्तं प्रकोपयेत् ।
विदग्धं स्वगुणैः पित्तं विदहत्याशु शोणितम् ॥ ४ ॥
ततः प्रवर्तते रक्तमूर्ध्वं चाधो द्विधाऽपि वा ।

निदानानन्तरीयकत्वात् प्रतिषेधस्यादौ रक्तपित्तनिदानभूते हेतुसंप्राप्ती आह—क्रोधशोकभयायासेत्यादि । क्रोधादीनि नित्यमभ्यसतो निषेवमाणस्य पुरुषस्य दुष्टिं गतो रसः पित्तं प्रकोपयेत्, ततश्च विदग्धं दुष्टं पित्तं स्वगुणैस्तीक्ष्णोष्णादिभिः शोणितं विदहति प्रदूषयति, तत ऊर्ध्वमधो वा रक्तं प्रवर्तत इति पिण्डार्थः । तीक्ष्णमुष्णकट्वम्ललवणक्षारव्यतिरिक्तं ज्योतिष्मत्यपामार्गफलादिकम् । आयासः श्रमः । विरुद्धान्नं हिताहितीयोक्तम् । क्रोधशोकेत्यादिर्हेतुः, नित्यमभ्यसत इत्यादिः संप्राप्तिः । कट्वम्ललवणेत्यत्र केचित् 'तीक्ष्णमुष्णाम्ललवणं दिवास्वप्नं विदाहि यत्' इति पठन्ति ॥ ३ ॥ ४ ॥—

आमाशयाद्व्रजेदूर्ध्वमधः पक्वाशयाद्व्रजेत् ॥ ५ ॥
विदग्धयोर्द्वयोश्चापि द्विधाभागं प्रवर्तते ।
केचित् सयकृतः प्लीह्नः प्रवदन्त्यसृजो गतिम् ॥ ६ ॥

तद्रक्तं यथोर्ध्वमधो वा द्विधाऽपि वा प्रवर्तते तथा दर्शयन्नाह—आमाशयादित्यादि । यद्यपि रक्तस्य यकृत्प्लीहस्थानत्वादामाशयपक्वाशयाभ्यां प्रवर्तनं न संभवति, तथाऽपि प्रकुपितरक्तस्य तत्रापि गमनात् प्रवर्तनं ताभ्यां संभवत्येव । विदग्धयोश्चाप्युभयोरिति दुष्टयोरामपक्वाशययोरित्यर्थः । तयोश्च दुष्टिः दुष्टरुधिरसंयोगात् । एकीयमतमाह—केचिदित्यादि । सयकृतः कालखण्डसहितात् । एतदप्यनुमतम्, अप्रतिषेधात् । अस्मिन् पाठे अङ्गीकृतेऽपि पूर्ववाक्येन सह न विरोधः, यतो यकृत्प्लीहाभ्यामेव रक्तं प्रवर्तते परमामपक्वाशयमधिष्ठाय ॥ ५ ॥ ६ ॥

ऊर्ध्वं साध्यमधोयाप्यमसाध्यं युगपद्गतम् ।

त्रिप्रकारस्य रक्तपित्तस्य साध्ययाप्यासाध्यत्वमाह—ऊर्ध्वमित्यादि । ऊर्ध्वं साध्यमिति यदा दौर्बल्याद्युपद्रवहीनं मांसप्रक्षालनाभमित्याद्यसाध्यलक्षणरहितमेकदोषानुगं भवति तदा साध्यं, यदा तु तदेव शान्तिं गत्वा पुनर्भवति मार्गान्तरं वा याति अल्पोपद्रवमल्पासाध्यलक्षणयुक्तं द्विदोषानुगं च भवति तदा याप्यं, यदा च बहूपद्रवयुक्तं बह्वसाध्यलक्षणयुक्तं त्रिदोषानुगतं च भवति तदा असाध्यम् । अधो याप्यमिति अल्पोपद्रवमसाध्यलक्षणहीनं द्विदोषानुगं च भवति तदा अधोगं याप्यं; यदा च त्रिदोषानुगमसाध्यलक्षणयुक्तं तदा वर्ज्यं, यदा चैकदोषानुगं निरुपद्रवं वर्ज्यलक्षणासंयुक्तं तदा साध्यम् । असाध्यं युगपद्गतमिति यदा त्रिदोषानुगं बहूपद्रवमसाध्यलक्षणयुक्तं भवति तदा असाध्यं, यदा चान्यथा तदा याप्यमित्यर्थः । युगपद्गतमुभयमार्गप्रवृत्तमित्यर्थः ॥—

सदनं शीतकामित्वं कण्ठधूमायनं वमिः ॥ ७ ॥
लोहगन्धिश्च निःश्वासो भवत्यस्मिन् भविष्यति ।

अथ पूर्वरूपमाह—सदनमित्यादि । सदनमङ्गग्लानिः । कण्ठधूमायनं कण्ठे धूमोद्गमनमिव वेदनेत्यर्थः । अस्मिन् रक्तपित्ते ॥ ७ ॥—

बाह्यासृग्लक्षणैस्तस्य सङ्ख्यादोषोच्छ्रितीर्विदुः ॥ ८ ॥

रक्तपित्तस्य संख्यां दोषोच्छ्रयं चातिदेशेनाह—बाह्यासृग्लक्षणैस्तस्येत्यादि । बाह्यासृग्लक्षणैरिति शोणितवर्णनीयोक्तैः फेनिलमरुणमित्यादिभिः, तस्य रक्तपित्तस्य, संख्या सप्तविधा । ननु, पित्तेन विदग्धेन विदग्धं रक्तं रक्तपित्तमुच्यते, तत् कथं पित्तादपि पृथगुद्दिश्यते? उच्यते, तद्रक्तान्तरेण संसर्गात् । दोषोच्छ्रितिर्दोषाधिक्यम् ॥ ८ ॥

दौर्बल्यश्वासकासज्वरवमथुमदा-
स्तन्द्रितादाहमूर्च्छा
भुक्ते चान्ने विदाहस्त्वधृतिरपि सदा
हृद्यतुल्या च पीडा ।
तृष्णा कण्ठस्य भेदः शिरसि च दवनं
पूतिनिष्ठीवनं च
द्वेषो भक्तेऽविपाको विरतिरपि रते
रक्तपित्तोपसर्गाः ॥ ९ ॥

इदानीं रक्तपित्तोपद्रवानाह—दौर्बल्यश्वासकासेत्यादि । वमथुः छर्दिः । मदः पूगफलेनेव मत्तता । अधृतिः असन्तोषः । अतुल्या असाधारणा । कण्ठस्य भेदः कण्ठक्षणनम् । शिरसि च दवनं सन्तापः । विरतिरपि रतेः सुखस्यापि विनाशो भवतीत्यर्थः । उपसर्गा उपद्रवाः । भुक्ते चान्ने विदाह इत्यत्र 'भुक्ते घोरो विदाह' इत्यन्ये पठन्ति । तत्र सप्तमी षष्ठ्यर्थे, तेन भुक्तस्य आहारस्य घोरो महान् विदाह इत्यर्थः । 'कण्ठस्य भेद' इत्यत्र 'कोष्ठस्य भेद' इत्यपरे पठन्ति; कोष्ठशब्देन कोष्ठस्थो मलस्तस्य भेद इति च व्याख्यानयन्ति । तदेतत् पाठद्वयमूर्ध्वाधःप्रवृत्तिरूपं यथासंभवं बोद्धव्यं, एकत्र द्वयोरप्यनौपयिकत्वात् । शिरसि च दवनमित्यत्र 'प्रविततसिरता' इति केचित् पठन्ति, सिराततगात्रतेति व्याख्यानयन्ति । 'विरतिरपि रतेः' इत्यत्र अपरे 'विनतिरपि भवेत्' इति पठन्ति; विनतिः शरीरस्य विनमनम् । अपरे 'विकृतिरपि भवेत्' इति पठन्ति, तत्रापि कायस्याकुञ्चनात्मिका विकृतिरित्यर्थः ॥ ९ ॥

१ 'विदग्धयोश्चाप्युभयोः' इति पा० । २ 'द्विधामार्गं' इति पा० । ३ 'युगपद्गतिः' इति पा० ।

१ 'तपनं' इति पा० ।

मांसप्रक्षालनाभं क्वथितमिव च यत्
कर्दमाम्भोनिभं वा
मेदःपूयास्रकल्पं यकृदिव यदि वा
पक्वजम्बूफलाभम् ।
यत् कृष्णं यच्च नीलं भृशमतिकुणपं
यत्र चोक्ता विकारा-
स्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा
यच्च तुल्यं विभाति ॥ १० ॥

असाध्यरक्तपित्तलक्षणमाह—मांसप्रक्षालनाभमित्यादि । मांसप्रक्षालनाभं मांसधावनतोयाभम् । कर्दमाम्भोनिभं कर्दमेन मिश्रितं यदम्भस्तोयं तन्निभम् । मेदःपूयास्रकल्पं मेदःपूयरक्तसदृशमित्यर्थः । अतिकुणपं शटितशवगन्धि । उक्ता विकारा दौर्बल्यश्वासादयः, 'प्रभूता' इति वाक्यशेषः । तद्वर्ज्यमिति ऊर्ध्वाधोमार्गत्वेन साध्यं याप्यं च यदुक्तं भवति तदप्येवंविधमसाध्यम् । सुरपतिधनुरिन्द्रधनुः । 'क्वथितमिव च यत्' इत्यत्र 'क्वथितमिव यकृत्' इति पठित्वा पक्वकालखण्डतुल्यमिति व्याख्यानयन्ति ॥ १० ॥

नादौ संग्राह्यमुद्रिक्तं यदसृग्बलिनोऽश्नतः ।
तत् पाण्डुग्रहणीकुष्ठप्लीहगुल्मज्वरावहम् ॥ ११ ॥

आदौ बलवति रक्तपित्ते संग्रहणनिषेधमाह—नादौ संग्राह्यमुद्रिक्तमित्यादि । यद्रक्तपित्तमुद्रिक्तमतिशयेन वृद्धिं गतं, तद्बलयुक्तस्याश्नतश्च पुरुषस्यादौ न संग्राह्यं; यस्मात्तदादौ संगृहीतं सत् पाण्ड्वादिरोगावहं भवति ॥ ११ ॥

अधःप्रवृत्तं वमनैरूर्ध्वगं च विरेचनैः ।
जयेदन्यतरद्वाऽपि क्षीणस्य शमनैरसृक् ॥ १२ ॥

तर्हि तत्र किं कुर्यादित्याह—अधःप्रवृत्तं वमनैरित्यादि । संशोधनार्हस्य बलवतो नरस्याधोगं रक्तपित्तं बहुदोषं वमनैर्जयेत्, एवंविधस्योर्ध्वगं विरेचनैरित्यर्थः । ननु, अधोगं वातानुगं भवति, ऊर्ध्वगं च कफानुगं, तत् कथं तयोर्वमनविरेचने युज्येते ? सत्यं, व्याधिप्रत्यनीकत्वाद्युज्येत एव; तथाच तन्त्रान्तरं—"अधोगं वमनैर्धीमानूर्ध्वगं रेचनैर्जयेत्"—इति । अन्यतरद्वेति ऊर्ध्वगमधोगं वा क्षीणस्य पुरुषस्य शमनैर्जयेदिति न वमनविरेकैः; तथा च तन्त्रान्तरम्—"ऊर्ध्वगं वाऽप्यधोगं वा क्षीणस्य शमनैर्जयेत्"—इति ॥ १२ ॥

अतिप्रवृद्धदोषस्य पूर्वं लोहितपित्तिनः ।
अक्षीणबलमांसाग्नेः कर्तव्यमपतर्पणम् ॥ १३ ॥

इदानीं संशोधनार्हस्य लङ्घनमपि हितमिति दर्शयन्नाह—अतिप्रवृद्धदोषस्येत्यादि । अपतर्पणं लङ्घनम् ॥ १३ ॥

लङ्घितस्य ततः पेयां विदध्यात् स्वल्पतण्डुलाम् ।
रसयूषौ प्रदातव्यौ सुरभिस्नेहसंस्कृतौ ।
तर्पणं पाचनं लेहान् सर्पींषि विविधानि च ॥ १४ ॥

लङ्घनादनन्तरं किं कुर्यादित्याह—लङ्घितस्येत्यादि । विदध्यात् कुर्यात् । किं रक्तपित्ते पेयामेव विदध्यादुतान्यदपीत्याह—तर्पणमित्यादि । तर्पणमिति मृद्वीकामधुकादिसाधितजलेन सशर्करेणालोडिताः सघृतक्षौद्रा लाजशक्तवः । पाचनं ह्रीबेरचन्दनोशीरपर्पटमुस्तसाधितजलपानम् । लेहानिति वक्ष्यमाणान् मधुकशोभाञ्जनकादिपुष्पैः कृतान् सघृतक्षौद्रान् । विविधानि सर्पींषि वासाघृतादीनि । तत्राधोगे पेया हिता यदि मारुतो बली न स्यात्, मारुतश्चेद्बली भवति तदा मांसरस एव; ऊर्ध्वगे च तर्पणं हितम् । तथा च तन्त्रान्तरम्—"अधोवहे यवाग्वादि न चेत् स्यान्मारुतो बली । ऊर्ध्वगे तर्पणं शस्तं यथादोषमथापि वा"—इति । केचित् 'लङ्घितस्य ततो युक्त्या लघ्वन्नमवचारयेत्' इति पठन्ति, व्याख्यानयन्ति च—युक्त्या मात्रया प्रत्यनीकं चेत्यर्थः ॥ १४ ॥

द्राक्षामधुककाश्मर्यसितायुक्तं विरेचनम् ।
यष्टीमधुकयुक्तं च सक्षौद्रं वमनं हितम् ॥ १५ ॥

पूर्वमुद्दिष्टं यद्वमनविरेचनं तयोर्द्रव्याण्याह—द्राक्षामधुककाश्मर्येत्यादि । द्राक्षादियुक्तं विरेचनद्रव्यकल्पोक्तं मृदु विरेचनं, यष्टीमधुकक्षौद्रयुक्तं वमनद्रव्यविकल्पोक्तं मृदु वमनं हितम् ॥ १५ ॥

पयांसि शीतानि रसाश्च जाङ्गलाः
सतीनयूषाश्च सशालिषष्टिकाः ।
पटोलशेलूसुनिषण्णयूथिका-
वटातिमुक्ताङ्कुरसिन्दुवारजम् ॥ १६ ॥
हितं च शाकं घृतसंस्कृतं सदा
तथैव धात्रीफलदाडिमान्वितम् ।
रसाश्च पारावतशल्लकूर्मजा-
स्तथा यवाग्वो विहिता घृतोत्तराः ॥ १७ ॥
सन्तानिकाश्चोत्पलवर्गसाधिते
क्षीरे प्रशस्ता मधुशर्करोत्तराः ।
हिमाः प्रदेहा मधुरा गणाश्च ये
घृतानि पथ्यानि च रक्तपित्तिनाम् ॥ १८ ॥

वमनविरेचनद्रव्याण्यभिधाय भोजनद्रव्याणि प्रतिपादयति—पयांसीत्यादि । शीतानि उत्पलादिद्रव्यक्वथितशीतानि, तानि तु पित्तप्राये । जाङ्गलरसा एणादिलावादिकृताः, ते च वातानुबन्धे । सतीनयूषा वर्तुलकलाययूषाः, ते च कफानुगे रक्तपित्ते हिताः । पटोलेत्यादि । शेलुः दक्षिणापथजं शाकं, श्लेष्मान्तकमपरे । सुनिषण्णकः शिरवालिका, चतुष्पर्णीत्यपरे । अतिमुक्त आवर्तकः । अङ्कुराः कोमलपल्लवाः पटोलादीनाम् । सिन्दुवारः निर्गुण्डी । एतान्यपि शाकानि कफानुगे शस्तानीति । पटोलेत्यत्र केचित् जीवन्तीति पठन्ति । रसाश्चेत्यादि । जाङ्गलरसाभिधानेनैव पारावतरसस्यापि परिग्रहे तदभिधानं विशेषेण रक्तपित्ते हितत्वापादनार्थम् । धात्रीदाडिमे संस्कारार्थम् । यवाग्वोऽभिहिताः । सन्तानिका घृतस्योपरितनः स्त्यानो भागः ।

१ 'मेदःपूयास्थिकल्पं' इति पा० ।

घृतोत्तरा घृतप्रधानाः । हिमाः प्रदेहा इत्यादि । हिमाः प्रदेहाः शीता लेपाः; ते च न्यग्रोधादिप्रभृतिशीतलगणकृताः । मधुरा गणाः काकोल्यादयः । ते च पानादिना योज्याः । घृतानि मधुरगणसाधितानि तन्त्रान्तरसंवादात् । पथ्यानि हितानि ॥ १६-१८ ॥

मधूकशोभाञ्जनकोविदारजैः
प्रियङ्गुकायाः कुसुमैश्च चूर्णितैः ।
भिषग्विदध्याच्चतुरः समाक्षिकान्
हिताय लेहानसृजः प्रशान्तये ॥ १९ ॥
लिह्याच्च दूर्वावटजांश्च पल्लवान्
मधुद्वितीयान् सितकर्णिकस्य च ।
हितं च खर्जूरफलं समाक्षिकं
फलानि चान्यान्यपि तद्गुणान्यथ ॥ २० ॥

मधूकेत्यादि । मधूकादिपुष्पैरेकैकैश्चूर्णितैस्त्रयो लेहाः, प्रियङ्गुकायाः कुसुमैश्चतुर्थो लेहः । अपरानपि लेहानाह—लिह्यादित्यादि । दूर्वावटपल्लवान् मधुद्वितीयान् लिह्यादित्येको योगः । सितकर्णिकः श्वेतकर्णिकारः, तस्यापि पल्लवान् मधुद्वितीयान् लिह्यादिति द्वितीयो योगः । केचित् समुदितमेकं योगं मन्यन्ते; तन्नेच्छन्ति निबन्धकाराः, समानतन्त्रसंवादात् । 'दूर्वावटजांश्च पल्लवान्' इत्यत्रापरे 'दुग्धद्रुमपल्लवान्' इति पठित्वा वटादिपल्लवानिति व्याचक्षते । किं रक्तपित्ते एतदेव हितमुतान्यदपीत्याह—हितमित्यादि । समाक्षिकं समधु । अनुक्तसंग्रहायाह—फलानि चान्यान्यपीत्यादि । अन्यानि फलानि काश्मर्यादीनि । तद्गुणानि खर्जूरफलतुल्यगुणानि ॥ १९ ॥ २० ॥

रक्तातिसारप्रोक्तांश्च योगानत्रापि योजयेत् ।

इदानीं रक्तपित्तेऽतिदेशेन चिकित्सामाह—रक्तातीसारप्रोक्तांश्चेत्यादि । रक्तातीसारप्रोक्तान् योगान् 'प्रियालमल्लिका' इत्यादीन् । अस्याग्रे कार्तिककुण्डः 'नीलोत्पलानां मधुना भस्म वाऽपि परिस्रुतम्' इत्यादियोगं पठति, स च जेज्जटाचार्येण सक्षौद्रमिन्दीवरभस्मेत्यादिना अग्रे पठितः ॥—

शुद्धेक्षुकाण्डमापोथ्य नवे कुम्भे हिमाम्भसा ॥२१॥
योजयित्वा क्षिपेद्रात्रावाकाशे सोत्पलं तु तत् ।[1]
प्रातः स्रुतं क्षौद्रयुतं पिबेच्छोणितपित्तवान् ॥ २२ ॥

शुद्धेक्षुकाण्डमापोथ्येत्यादि । शुद्धेक्षुकाण्डानि निर्वल्कलेक्षुकाण्डानि, आपोथ्य अवक्षुद्य । हिमाम्भसा योजयित्वेत्यादि शीतलजलेन योजयित्वा नवे घटे रात्रावाकाशे निरावरणस्थाने क्षिपेत् धारयेत्, ततश्च प्रातःकाले स्रुतं गालितं नीलोत्पलचूर्णमधुभ्यां युतं शोणितपित्तवान् नरः पिबेत् ॥ २१ ॥ २२ ॥

पिबेच्छीतकषायं वा जम्ब्वाम्रार्जुनसंभवम् ।
उदुम्बरफलं पिष्ट्वा पिबेत्तद्रसमेव वा ॥ २३ ॥

पिबेदित्यादि । पिबेदित्यत्र मधुयुतमित्यनुक्तमपि संबध्यते, समानतन्त्रसंवादात् । उदुम्बरफलमित्यादि । उदुम्बरफलं पिष्ट्वा तद्रसं गृहीत्वा मधुयुतं पिबेत् ॥ २३ ॥

त्रपुषीमूलकल्कं वा सक्षौद्रं तण्डुलाम्बुना ।
पिबेदक्षसमं कल्कं यष्टीमधुकमेव वा ॥ २४ ॥
चन्दनं मधुकं रोध्रमेवमेव समं पिबेत् ।
करञ्जबीजमेवं वा सिताक्षौद्रयुतं पिबेत् ॥ २५ ॥
मज्जानमिङ्गुदस्यैवं पिबेन्मधुकसंयुतम् ।
सुखोष्णं लवणं बीजं कारञ्जं दधिमस्तुना ॥ २६ ॥
पिबेद्वाऽपि त्र्यहं मर्त्यो रक्तपित्ताभिपीडितः ।
रक्तपित्तहराः शस्ताः षडेते योगसत्तमाः ॥ २७ ॥

इदानीं रक्तपित्ते सिद्धतमान् षड्योगानाह—त्रपुसीमूलकल्कमित्यादि । सक्षौद्रं कर्षोन्मितमधुसहितं, तण्डुलाम्बुना कल्काच्चतुर्गुणेनेत्यर्थः । अक्षसमं कर्षप्रमाणं, एवमेवेति सक्षौद्रं तण्डुलाम्बुनेत्यर्थः । करञ्जबीजादियोगद्वयं कफानुबन्धे ऊर्ध्वगे शस्तम् । मज्जानमिङ्गुदस्येत्यादि सितामधुयुतमेव(क)मेव पिबेदित्यर्थः ॥ २४-२७ ॥

पथ्याश्चैवावपीडेषु घ्राणतः प्रस्रुतेऽसृजि ।

अनन्तरोक्ता षड्योगा घ्राणगे रक्तेऽवपीडनेऽपि योज्या इत्याह—पथ्या इत्यादि । पथ्या हिताः 'अनन्तरोक्तास्त्रपुसीमूलकल्कमित्यादि षड्योगाः' इति शेषः ॥—

अतिनिस्रुतरक्तो वा क्षौद्रयुक्तं पिबेदसृक् ।
यकृद्वा भक्षयेदाजमामं पित्तसमायुतम् ॥ २८ ॥

असृगिति शरीरधातुसामान्यादेणादीनामित्यर्थः । यकृत् कालखण्डम् ॥ २८ ॥

पलाशवृक्षस्वरसे विपक्वं
सर्पिः पिबेत् क्षौद्रयुतं सुशीतम् ।
वनस्पतीनां स्वरसैः कृतं वा
सशर्करं क्षीरघृतं पिबेद्वा ॥ २९ ॥
द्राक्षामुशीराण्यथ पद्मकं सिता
पृथक्पलांशान्युदके समावपेत् ।
स्थितं निशां तद्रुधिरामयं जयेत्
पीतं पयो वाऽम्बुसमं हिताशिनः ॥ ३० ॥
तुरङ्गवर्चःस्वरसं समाक्षिकं
पिबेत् सिताक्षौद्रयुतं वृषस्य वा ।
लिहेत्तथा वास्तुकबीजचूर्णं
क्षौद्रान्वितं तण्डुलसाह्वयं वा ॥ ३१ ॥
लिह्याच्च लाजाञ्जनचूर्णमेक-
मेवं सिताक्षौद्रयुतां तुगाख्याम् ।
द्राक्षां सितां तिक्तकरोहिणीं च
हिमाम्बुना वा मधुकेन युक्ताम् ॥ ३२ ॥
पथ्यामहिंस्रां रजनीं घृतं च
लिह्यात्तथा शोणितपित्तरोगी ।

वनस्पतीनां वटादीनाम् । क्षीरघृतं क्षीरोत्थं घृतम् । पयो

---

१ 'शतस्य' इति पा० । २ 'मधूकशोभाञ्जनकोविदारजैः कुसुमैस्त्रयो लेहाः' इति पा० ।

वाऽम्बुसममिति दुग्धं जलं च तुल्यमित्यर्थः। केचिदेवं पठन्ति— 'वासाकषायं ससितं पिबेद्वा तुरङ्गवर्चःस्वरसं समाक्षिकम्' इति। लिहेत्तथा वास्तुकबीजचूर्णमित्यादि।—वास्तुकबीजचूर्णं टङ्कवास्तुकबीजचूर्णं क्षौद्रान्वितं लिहेत्। तण्डुलसाह्वयं वेति तण्डुलीयं क्षौद्रान्वितं वा लिह्यादित्यर्थः। केचिदेवं पठन्ति— 'सतण्डुलीयं मधुनाऽवलेहयेत् सितायुतं वास्तुकमूलमेव वा' इति। लिह्याच्चेत्यादि। लाजा भृष्टधान्यानि। अञ्जनं रसाञ्जनम्। एकं प्रधानं, एवं क्षौद्रेणेत्यर्थः। 'लालाञ्जनचूर्णम्' इत्यत्र 'कालाञ्जनचूर्णम्' इति केचित् पठन्ति; तत्र कालाञ्जनं सौवीराञ्जनम्। सिताक्षौद्रयुतमित्यादि। तुगाख्या वंशरोचनानुकारि पार्थिवं द्रव्यं, अन्ये वंशरोचनामाहुः; तां च शर्कराक्षौद्रयुतां लिह्यात्। द्राक्षां सितामित्यादि। द्राक्षादीनि त्रीणि द्रव्याणि यष्टीमधुकेन युतानि शीतोदकेन वा लिह्यात्। पथ्यामित्यादि। पथ्या हरीतकी, रजनी हरिद्रा, एतानि हरीतकीप्रभृतीनि द्रव्याणि घृतेन सह लिह्यात्। अयं योगः कण्ठगे प्रसृते च रक्तपित्ते योज्यः। केचित् 'रजनीं घृतं च' इत्यत्र 'रजनीद्वयं च' इति पठन्ति, ते च शीतोदकेनैव लेह्यमिच्छन्ति; अयं पाठः समानतन्त्रविरोधादन्याय्यः ॥ २९-३२ ॥—

वासाकषायोत्पलमृत्प्रियङ्गु-
रोध्राञ्जनाम्भोरुहकेशराणि ॥ ३३ ॥
पीत्वा सिताक्षौद्रयुतानि जह्यात्
पित्तासृजो वेगमुदीर्णमाशु ।

इदानीं वेगवति रक्तपित्ते सिद्धतमं योगमाह—वासाकषायोत्पलेत्यादि। उत्पलं नीलोत्पलं, मृत् केदारमृत्तिका, अम्भोरुहकेशरं पद्मकेशरम्। कल्पनामाह—पीत्वा सिताक्षौद्रयुतानि जह्यादित्यादि। वासाकषायमुत्पलमृदादिचूर्णप्रक्षेपं सिताक्षौद्रयुतं पीत्वा नरो रक्तपित्तस्योदीर्णमुद्रिक्तं वेगमाशु जह्यात् शीघ्रं परित्यजेत् ॥ ३३ ॥—

गायत्रिजम्ब्वर्जुनकोविदार-
शिरीषरोध्राशनशाल्मलीनाम् ॥ ३४ ॥
पुष्पाणि शिग्रोश्च विचूर्ण्य लेह्यो
मध्वन्वितः शोणितपित्तरोगे ।

गायत्रिजम्ब्वर्जुनकोविदारेत्यादि। गायत्री खदिरः, अर्जुनः ककुभः, कोविदारः काञ्चनारः, अशनो बीजकः। शिग्रुः शोभाञ्जनकः ॥ ३४ ॥—

सक्षौद्रमिन्दीवरभस्मवारि
करञ्जबीजं मधुसर्पिषी[1] च ॥ ३५ ॥
जम्ब्वर्जुनाम्रक्कथितं च तोयं
घ्नन्ति त्रयः पित्तमसृक् च योगाः ।

इदानीं रक्तपित्ते त्रीन् योगानाह—सक्षौद्रमिन्दीवरभस्मेत्यादि। इन्दीवरभस्मवारि इन्दीवरक्षारोदकं सक्षौद्रं पिबेदित्येको योगः। करञ्जबीजं मधुसर्पिषा चेति करञ्जबीजं मधुसर्पिषा वा लिह्यादिति द्वितीयो योगः। जम्ब्वर्जुनाम्रक्कथितं तोयमित्यादि।—जम्ब्वादिक्कथितं तोयं सक्षौद्रं पिबेदिति तृतीयो योगः। एषु मध्ये अन्त्यौ योगौ कण्ठान्तःस्थिते[1] रक्तपित्ते योज्यौ ॥ ३५ ॥—

मूलानि पुष्पाणि च मातुलुङ्ग्याः
पिष्ट्वा पिबेत्तण्डुलधावनेन ॥ ३६ ॥
घ्राणप्रवृत्ते जलमाशु देयं
सशर्करं नासिकया पयो वा ।

मूलानीत्यादि। मातुलुङ्गी बीजपूरकः, 'मधुकर्कटी' इति अन्ये। घ्राणप्रवृत्ते जलमाशु देयमित्यादि। घ्राणप्रवृत्ते रक्तपित्ते सशर्करं पानीयं दुग्धं वा सशर्करं नासिकया देयम्। केचित् 'नासिकया' इत्यत्र 'नासिकयोः' इति पठन्ति ॥ ३६ ॥—

द्राक्षारसं क्षीरघृतं पिबेद्वा
सशर्करं चेक्षुरसं हिमं वा ॥ ३७ ॥

घ्राणप्रवृत्तेऽपरमपि नस्ययोगमाह—द्राक्षारसमित्यादि। द्राक्षारसं सशर्करं नासिकया पिबेत्, क्षीरघृतं क्षीरमथनोद्भूतं तद्वा सशर्करं नासिकया पिबेत्, इक्षुरसं हिमं वा तथैव पिबेत्, इत्थं त्रयो योगाः कल्पनीयाः। तथा च तन्त्रान्तरं—"द्राक्षारसस्य नस्यं नस्यं वा क्षीरसर्पिषः सपदि। इक्षो रसस्य नस्यं सशर्करं रक्तनुद्भवति"—इति ॥ ३७ ॥

शीतोपचारं मधुरं च कुर्या-
द्विशेषतः शोणितपित्तरोगे ।

सर्वतन्त्रोक्तचिकित्सासंग्रहार्थमाह—शीतोपचारमित्यादि। शीतोपचारं दाहादिषु बाह्येऽपि कुर्यादिति ॥—

द्राक्षाघृतक्षौद्रसितायुतेन
विदारिगन्धादिविपाचितेन ॥ ३८ ॥
क्षीरेण चास्थापनमग्र्यमुक्तं
हितं घृतं चाप्यनुवासनार्थम् ।

रक्तपित्ते आस्थापनार्थं क्षीरमनुवासनार्थं च घृतमाह—द्राक्षेत्यादि। विदारिगन्धादिगणसाधितेन क्षीरेण घृतक्षौद्रसितायुतेनास्थापनं रक्तपित्तेऽग्र्यमुक्तं, तथा चानुवासनार्थं घृतं हितम्। तच्च घृतं यष्टीमधुकसाधितं, अपक्वस्य स्नेहस्य व्यापत्करत्वात्। अन्ये विदारिगन्धादिसाधितक्षीरेण घृतपाकमिच्छन्ति ॥ ३८ ॥—

प्रियङ्गुरोध्राञ्जनगैरिकोत्पलैः
सुवर्णकालीयकरक्तचन्दनैः ॥ ३९ ॥
सिताश्वगन्धाम्बुदयष्टिकाह्वयै-
र्मृणालसौगन्धिकतुल्यपेषितैः ।
निरूह्य चैनं पयसा समाक्षिकै-
र्घृतप्लुतैः शीतजलावसेचितम् ॥ ४० ॥
क्षीरौदनं भुक्तमथानुवासये-
द्घृतेन यष्टीमधुसाधितेन च ।

१ 'मधु शर्करा च' इति पा०।

१ 'आद्यौ योगौ कण्ठनेत्रस्थिते' इति पा०।

अधोवहं शोणितमेष नाशये-
त्तथाऽतिसारं रुधिरस्य दुस्तरम् ॥ ४१ ॥
विरेकयोगे त्वति चैव शस्यते

अपरेऽपि रक्तपित्ते आस्थापनानुवासने आह—प्रियङ्गुरोध्राञ्जनगैरिकोत्पलैरित्यादि । अञ्जनं सौवीराञ्जनम् । गैरिकं सामान्यगैरिकम् । उत्पलं नीलोत्पलं; नागकेशरमपरे । सुवर्णं सुवर्णगैरिकम्, अन्तलोपात् । कालीयकं दारुहरिद्रानुकारि द्रव्यम् । अम्बुदो मुस्ता । यष्टिकाह्वयो मधुयष्टिका । मृणालं पद्मकेशरम् । सौगन्धिकं कुमुदभेदः । प्रियङ्ग्वादिभिः सौगन्धिकान्तैस्तुल्यैः पेषितैः कल्कीकृतैः समधुघृतैः पयसा सहैनं रक्तपित्तिनं निरूहयेत् । ततश्च शीतलजलावसेचितं क्षीरौदनं भुक्तं पुरुषं यष्टीमधुकसाधितेन घृतेनानुवासयेत् । अधोवहं शोणितमधोगं रक्तपित्तम् । एष आस्थापनानुवासनप्रयोगः । अतिसारं रुधिरस्येति रक्तातिसारमित्यर्थः । विरेकयोगे त्वतीति विरेकातियोगे ॥ ३९-४१ ॥—

वाम्यश्च रक्ते विजिते बलान्वितः ॥ ४२ ॥

वाम्यश्च रक्ते इत्यादि । निरूहनानुवासनाभ्यां विजिते रक्तपित्ते सति बलान्वितः पुरुषो वाम्यो वामनीयः, अधोमार्गप्रवृत्तिनिवारणार्थम् । अत्र कार्तिककुण्डेन बहूक्तं, तच्च ग्रन्थगौरवभयात् परिहृतम् ॥ ४२ ॥

एवंविधा उत्तरवस्तयश्च
मूत्राशयस्थे रुधिरे विधेयाः ।

विशिष्टस्थानगे रक्तपित्ते विशिष्टचिकित्सामाह—एवंविधा उत्तरवस्तयश्चेत्यादि । एवंविधा अनन्तरोक्तास्थापनानुवासनतुल्याः । मूत्राशयस्थे बस्तिस्थे मूत्रस्रोतःप्रवृत्ते च ॥—

प्रवृत्तरक्तेषु च पायुजेषु
कुर्याद्विधानं खलु रक्तपैत्तम् ॥ ४३ ॥

अर्शसः अतिप्रवृत्तौ च रक्तपित्तचिकित्सितमतिदिशन्नाह—प्रवृत्तरक्तेष्वित्यादि । पायुजेषु अर्शःसु ॥ ४३ ॥

विधिश्चासृग्दरेऽप्येष स्त्रीणां कार्यो विजानता ।
शस्त्रकर्मणि रक्तं च यस्यातीव प्रवर्तते ॥ ४४ ॥

विधिश्चासृग्दरेऽप्येष इत्यादि । एष विधिरधोगरक्तपित्तघ्नो विधिः । विजानता वैद्येन असृग्दरे कार्यः । न केवलमसृग्दरे एव एष विधिः कार्यः किन्तु यस्य शस्त्रकर्मणि कृते अतिरक्तं प्रवर्तते तस्याप्येष एव विधिः कार्यः । केचिदत्रैवासृग्दरलक्षणं पठन्ति । तद्यथा—'दहेदधो वङ्क्षणदेशमस्याः श्रोणीं च पृष्ठं च तथैव वृक्कौ[१] । असृग्दरं चापि करोति नार्या गर्भाशयार्तिं त्वचिरेण घोराम्'—इति । ये त्वत्र पठन्ति ते शुक्रशोणितशुद्धावसृग्दरलक्षणं न पठन्ति ॥ ४४ ॥

१ 'कुक्षिं' इति पा० ।

त्रयाणामपि दोषाणां शोणितेऽपि च सर्वशः ।
लिङ्गान्यालोक्य कर्तव्यं चिकित्सितमनन्तरम् ॥४५॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे रक्तपित्तप्रतिषेधो नाम (सप्तमोऽध्यायः, आदितः) पञ्चचत्वारिंशत्तमोऽध्यायः ॥ ४५ ॥

किं रक्तपित्तघ्नो विधिः रक्तपित्ताख्ये रोगेऽसृग्दरे शस्त्रकर्मण्यतिरक्तप्रवृत्तौ चाविशेषेणैव कार्य उत किंचिदपेक्ष्येत्याह—त्रयाणामपि दोषाणामित्यादि । त्रयाणामपि दोषाणां पृथग्द्वन्द्वसमस्तानां लिङ्गानि शोणितवर्णनीयोक्तानि शोणिते सर्वश आलोक्यानन्तरं चिकित्सितं कर्तव्यं, असृग्दरे वा शस्त्रकर्मणि रक्तातिप्रवृत्तौ रक्तपित्तघ्नो विधिः कार्य इत्यर्थः । अत्राधोवहस्य नाशनं यापनं वाऽभिप्रेतं, तेन सान्निपातिकस्याक्षीणमांसाग्नेर्याप्यत्वमभिप्रेतम् । अत्र कार्तिककुण्ड आपातनिकापूर्वं गर्भिणीत्यादिपाठं पठति, स चाभावान्न लिखितः ॥ ४५ ॥

इति श्रीडल्हणार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे कायचिकित्सायां पञ्चचत्वारिंशत्तमोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशत्तमोऽध्यायः ।

अथातो मूर्च्छाप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथात इत्यादि ॥ १ ॥ २ ॥

क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभीघाताद्धीनसत्त्वस्य वा पुनः ॥ ३ ॥
करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥ ४ ॥
हृत्पीडा जृम्भणं ग्लानिः संज्ञानाशो बलस्य च ।
सर्वासां पूर्वरूपाणि, यथास्वं ता विभावयेत्[१] ॥ ५ ॥

इदानीं दोषजमूर्च्छाया हेतुसंप्राप्ती आह—क्षीणस्येत्यादि । एवंभूतस्य पुरुषस्य वेगाघातादिभिर्हेतुभिरुग्रा दोषा यदा बाह्याभ्यन्तरेषु करणायतनेषु निविशन्ते तदा मानवा मूर्च्छन्तीति पिण्डार्थः । हीनसत्त्वस्य अल्पसत्त्वस्य । करणायतनेषु बुद्धीन्द्रियकर्मेन्द्रियमनोबुद्ध्यहङ्कारस्थानेषु । उग्रा अतिप्रवृद्धाः प्रसृताश्च । बाह्येष्वाभ्यन्तरेषु चेति बाह्यकरणायतनानि कर्मेन्द्रियाणि, आभ्यन्तरकरणायतनानि मनोबुद्ध्यहङ्कारस्थानानि । आभ्यन्तरकरणायतनस्य हृदयस्यैकत्वात् कथं बहुवचनं ? सत्यं, अन्तःसंज्ञावहनाडीनामप्यन्तःकरणायतनत्वेनाभिमतत्वात् । निविशन्ते अवतिष्ठन्ते । अपरे करणायतनशब्देनैव करणानि कथयन्ति, उपचारात् । तेन बाह्याभ्यन्तरेषु करणेषु यदा दोषा निविशन्ते तदा मानवा मूर्च्छन्तीत्यर्थः । अन्ये त्वन्यथा

१ 'यथास्वमुपलक्षयेत्' इति पाठान्तरम् ।

व्याख्यानयन्ति—करणायतनेषु यदा दोषा निविशन्ते तथा बाह्याभ्यन्तरेषु करणेषु निविशन्ते तदा मानवा मूर्च्छन्तीति ॥ ३—५ ॥

संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः ।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥ ६ ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् ।
मोहो मूर्छेति तां प्राहुः

यया प्रक्रियया मानवो मूर्च्छति तामाह—संज्ञेत्यादि । सुखदुःखव्यपोहकृत् सुखदुःखनाशकृत्, सुखदुःखनाशश्च संज्ञानाशात्; संज्ञानाशस्तु संज्ञावहनाडीपिधानात् । अन्ये सुखदुःखे सत्त्वरजसी, तयोर्व्यपोहो नाशस्तं करोतीति व्याख्यानयन्ति ॥ ६ ॥—

षड्विधा सा प्रकीर्तिता ॥ ७ ॥
वातादिभिः शोणितेन मद्येन च विषेण च ।
षट्स्वप्येतासु[1] पित्तं हि प्रभुत्वेनावतिष्ठते ॥ ८ ॥

संख्यामाह—षड्विधेत्यादि । ये तन्त्रान्तरीया वातादिभिः शोणितेन च चतुर्विधां मूर्च्छामिच्छन्ति तेषामयमाशयः—मद्यविषयोस्त्वनन्तरोक्तपाण्डुरोगवत् पृथगुपादानं, तेन स्वमते षड्विधैव मूर्च्छा । सर्वास्वपि मूर्च्छासु पित्तं कर्तृत्वेन प्रधानमित्याह—षट्स्वित्यादि । प्रभुत्वेनावतिष्ठते इतरदोषावाक्रम्य वर्तत इत्यर्थः । वेगाघातादिर्हेतुः; करणायतनेष्वित्यादिः संप्राप्तिः ॥ ७ ॥ ८ ॥

अपस्मारोक्तलिङ्गानि तासामुक्तानि तत्त्वतः ।

वातादिजानां तिसृणां लिङ्गमपस्मारोक्तलिङ्गातिदेशेनाह—अपस्मारेत्यादि । अपस्मारोक्तलिङ्गानि यथास्वं तासां जानीयादित्यर्थः । केचित् 'अपस्मारोक्तलिङ्गानि' इत्यत्र 'अपस्मारेण लिङ्गानि' इति पठित्वा व्याख्यानयन्ति—दन्तनखखादनाक्षिवैकृतलालास्रावादिरहितान्यपस्मारेण तुल्यानि लक्षणानि यथास्वमुपलक्षयेदित्यर्थः । तथाच तन्त्रान्तरं,—"सर्वाकृतिः सन्निपातादपस्मार इवागतः । स जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः" —इति ॥—

पृथिव्यम्भस्तमोरूपं रक्तगन्धश्च[2] तन्मयः ॥ ९ ॥
तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ।

वातजादीनां तिसृणां लिङ्गान्यतिदिश्य रक्तजायाः संप्राप्तिं लक्षणं चाह—पृथिवीत्यादि । पृथ्वी अम्भश्च द्वयमपि तमोरूपं[3] तमोबहुलं; तथा चोक्तं पुरा-'तमोबहुला पृथिवी, सत्त्वतमोबहुला आपः' इति, रक्तगन्धश्च[4] तन्मय इति पृथिव्यम्भःसमुद्भवः; पाञ्चभौतिकेऽपि रक्ते पृथिव्यम्भसोः प्राधान्यात् । मूर्च्छन्ति भुवि मानवा इत्येतेन गन्धस्य तमोबहुलत्वमुक्तम् । ननु, गन्धः पार्थिवस्तत्कथं पृथिव्यम्भःसमुद्भव इत्युच्यते? सत्यं, परस्परोपकार्यत्वात्[1] । मूर्च्छन्ति भुवि मानवा इति ये मानवाः पृथिवीगुणबहुलास्तामसा इत्यर्थः । ननु, यदि रक्तगन्धो मूर्च्छाजनकः, तर्हि किमिति सर्वेषामेव न मूर्च्छामुत्पादयति ? सत्यं, ये हीनसत्त्वास्तेषां मूर्च्छामुत्पादयति न सर्वेषाम् । अपरे 'रक्तगन्धश्च तन्मय'इत्यन्यथा व्याचक्षते, तद्यथा—तन्मयः पृथिव्यम्भोमयः; अत्र यथासंभवं व्याख्यानं; तेन रक्तमम्भोमयं, द्रवत्वात्; गन्धश्च पृथिवीमयः, पार्थिवत्वाद्गन्धस्य; तेन तमोभूयिष्ठायाः पृथिव्याः सकाशाद्गन्धस्य जातत्वाद्गन्धोऽपि तमोबहुल एव, कारणानुरूपत्वात् कार्यस्य; शेषं समम् । अन्ये तु 'पृथिव्यम्भस्तमोरूपं रक्तं गन्धश्च तन्मय' इति पठन्ति; पृथिवी चाम्भश्च पृथिव्यम्भसी, तयोः संबन्धि यत्तमः, तद्रूपं तद्बहुलं तल्लक्षणं वा रक्तं, गन्धश्च तन्मय इति तमोमय इत्यर्थः; तमोबहुलपृथिव्युत्पन्नत्वाद्गन्धस्य । एतेन तमोभूयिष्ठपृथिव्यम्भउत्पन्नरक्तस्य धातुजनितत्वाद्गन्धस्य स्वयं तमोभूयिष्ठत्वाच्च रक्तगन्धो मानवैराघ्रातः सन् हृद्यवस्थितं तमो वर्धयन् मूर्च्छामापादयति, 'सर्वभावानां सामान्यं वृद्धिकारणम्' इत्युक्तत्वात् । ननु, तमोबहुलत्वाद्रक्तं मूर्च्छाजनकं तर्हि तमोभूयिष्ठे एते पृथिव्यम्भसी कुतो मूर्च्छां नोत्पादयतः ? सत्यं, पृथिव्यम्भसी सात्म्यतया स्वरूपतश्च मूर्च्छां नोत्पादयतः । अन्ये तु पठन्ति—'पृथिव्यम्भस्तमोरूपं रक्तगन्धेन तु त्रयम्' इति; व्याख्यानयन्ति च—पृथिव्यम्भस्तमसां रूपं स्वलक्षणं यस्य रक्तस्य तत्पृथिव्यम्भस्तमोरूपं; रक्तगन्धेन कृत्वा तु पुनस्त्रयं सत्त्वरजस्तमसां गुणानां त्रितयं 'रक्ते ज्ञायते' इति वाक्यशेषः । ननु, गन्धेन कृत्वा कथं गुणानां त्रितयं रक्ते ज्ञायते इति चेत् ? सत्यं, रक्ते गन्धो विस्रो वर्तते, गन्धश्च गुणविशेषः, उक्तं च,—"तेषां विशेषाः शब्दस्पर्शरूपरसगन्धाः—" इति, ते च विशेषास्त्रिगुणाः; उक्तं च,—"सर्वे एवैते विशेषाः सत्त्वरजस्तमोमया भवन्ति" इति । किन्त्वत्र तमोगुणस्याधिक्यं ज्ञेयम् । एतेनैतदुक्तं भवति—पृथिव्यम्भस्तमःस्वलक्षणस्य रक्तस्य गन्धेन त्रिगुणेन तमोगुणविशिष्टेन मानवा मूर्च्छन्ति ॥ ९ ॥—

द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमुह्यति ॥ १० ॥

स्वमतं प्रदर्श्य परमतमाह—द्रव्यस्वभाव इत्येके इत्यादि ॥ १० ॥

गुणास्तीव्रतरत्वेन[2] स्थितास्तु विषमद्ययोः ।
त एव तस्माज्जायेत मोहस्ताभ्यां यथेरितः ॥ ११ ॥

विषमद्योरथे आह—गुणा इत्यादि । त एव गुणा रूक्षादयः । मोहो मूर्च्छा । ताभ्यां विषमद्याभ्याम् । यथेरितो[3] यथाकथित इत्यर्थः । अथ विषमद्यविकारयोः[4] सामान्येनैव मूर्च्छा-

१ 'तासु षट्स्वपि' इति पा० । २ 'रक्तगन्धस्तदन्वयः' इति पा० । ३ 'तमोरूपमिति तमःस्वरूपम्' इति पा० । ४ 'रक्तगन्धस्तदन्वयः' इति पा० ।

१ 'अथाकाशपवनेत्यादौ अपां चतुर्गुणत्वेन दर्शितत्वात् कथं तदन्वयेनापि गन्धो व्यपदिश्यत इति चेत् ? न, परस्परोपकारादियुक्तेः । एवमपि भूतान्तरे पृथिवीनिमित्तत्वाद्गन्धस्येति व्याख्यानं कार्तिककुण्डात्' इति पा० । २ 'तीव्रतमत्वेन' इति पा० । ३ 'यथेरित इति स्वैः स्वैर्विकारैर्विषकल्पपानात्ययोर्यथाकथितैरित्यर्थः' इति पा० । ४ 'विषमद्याधिकारयोः' इति पा० ।

प्रणयनात् कथमत्र विशिष्टमभिधानं ? उच्यते—तत्रेतरलक्षणैः सह तद्ग्रहणार्थम् । ननु, यदि विषमद्ययोस्तुल्या गुणाः स्थिताः, तत् किमिति विषवन्मद्यं मारणात्मकं न स्यात् ? सत्यं, मद्ये तेषां गुणानामनतितीव्रत्वेनावस्थानात् । यद्येवं तर्हि 'गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः' इति कथं न व्याहन्यते ? सत्यं, तीव्रतरशब्दादग्रे तीव्रशब्दो मध्ये लुप्तो द्रष्टव्यः । तेन विषे तीव्रतरत्वेन ते गुणाः स्थिताः, मद्ये तीव्रत्वेनेत्यर्थः । तथाच तन्त्रान्तरम्,—"विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपणाः । त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः ॥ त एव तैस्माभ्यां तु मोहौ स्यातां यथेरितौ"—इति ॥ ११ ॥

स्तब्धाङ्गदृष्टिस्त्वसृजा गूढोच्छ्वासश्च मूर्च्छितः ॥

रुधिरजमूर्च्छालक्षणमाह—स्तब्धाङ्गदृष्टिस्त्वसृजेत्यादि । स्तब्धशब्दोऽङ्गदृष्टिभ्यां संबध्यते । गूढोच्छ्वासोऽस्पष्टश्वासः ॥—

मद्येन विलपञ्छेते नष्टविभ्रान्तमानसः ।
गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत् १२

मद्यजमूर्च्छालक्षणमाह—मद्येनेत्यादि । विलपन्निति विलापं कुर्वन् । नष्टविभ्रान्तमानस इति नष्टमानसोऽपैस्सरणः, विभ्रान्तमानसो विक्षिप्तचेताः । जरां पाकम् ॥ १२ ॥

वेपथुस्वप्नतृष्णाः स्युः स्तम्भश्च विषमूर्च्छिते ।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः ॥ १३ ॥

विषजमूर्च्छालक्षणमाह—वेपथुस्वप्नतृष्णाः स्युरित्यादि । वेपथुः कम्पः । स्तम्भः स्तब्धता । वेदितव्यमित्यादि । मूलादिकन्दान्तस्य विषस्य यथास्वं यानि लक्षणानि तैः कृत्वा विषमूर्च्छितस्य पुंसो यथास्वं यथात्मीयं विषं ज्ञेयम् ॥ १३ ॥

सेकावगाहौ मणयः सहाराः
शीताः प्रदेहा व्यजनानिलाश्च ।
शीतानि पानानि च गन्धवन्ति
सर्वासु मूर्च्छास्वनिवारितानि ॥ १४ ॥

अतः परं चिकित्सितमाह—सेकावगाहावित्यादि । मणयः सहारा इति मणयो मुक्तास्फटिकप्रभृतयः । ते च सहारा हारारोपिता हिता इत्यर्थः । व्यजनानिला व्यजनानां वायवः । शीताः प्रदेहाः चन्दनोत्पलप्रभृतिकृताः प्रलेपाः । शीतानि पानानि च गन्धवन्तीति यानि शीतानि गन्धवन्ति च पानानि तानीत्यर्थः । अनिवारितानि प्रशस्तानि ॥ १४ ॥

सिताप्रियालेक्षुरसप्लुतानि
द्राक्षामधूकस्वरसान्वितानि ।
खर्जूरकाश्मर्यरसैः शृतानि
पानानि सर्पींषि च जीवनानि ॥ १५ ॥

तान्येव शीतानि गन्धवन्ति च पानान्याह—सिताप्रियालेक्षुरसप्लुतानीत्यादि । खर्जूरकाश्मर्यरसैः शृतानि सिताप्रियालादियुतानि पानानि पानकानि सर्वास्वनिवारितानि । न केवलं पानान्येवानिवारितानि सर्पींषि च जीवनानीति काकोल्यादिसिद्धानीत्यर्थः । केचित् पानानीत्यत्र सिद्धानीति पठन्ति, ते च घृतविशेषणं मन्यन्ते ॥ १५ ॥

सिद्धानि वर्गे मधुरे पयांसि
सदाडिमा जाङ्गलजा रसाश्च ।
तथा यवा लोहितशालयश्च
मूर्च्छासु पथ्याश्च सदा सतीनाः ॥ १६ ॥

किमेतान्येव सर्वमूर्च्छासु हितान्युतान्यान्यपीत्याह—सिद्धानीत्यादि । मधुरे वर्गे काकोल्यादौ । पयांसि सर्वाण्यपि दुग्धानि, सर्वेषां क्षीराणां मूर्च्छाहरत्वात् । सदाडिमा दाडिमेन संस्कृताः, जाङ्गलजा रसाः । मूर्च्छासु ये भोजने हितास्तानाह—तथेत्यादि । पथ्या हिताः, 'भोजने' इति शेषः । सतीनो वर्तुलकलायः ॥ १६ ॥

भुजङ्गपुष्पं मरिचान्युशीरं
कोलस्य मध्यं च पिबेत् समानि ।
शीतेन तोयेन बिसं मृणालं
क्षौद्रेण कृष्णां सितया च पथ्याम् ॥ १७ ॥

भुजङ्गपुष्पमित्यादि । भुजङ्गपुष्पं नागकेशरम् । कोलस्य मध्यं बदरमज्जा । एतानि भुजङ्गपुष्पादीनि समानि तुल्यानि शीततोयेन सह पिबेत् । न केवलमेतान्येव शीततोयेन सह पिबेत् बिसं मृणालं चापि शीततोयेन पिबेत्; बिसं बिसेन्द्रकं, मृणालं पद्मनालम् । क्षौद्रेण कृष्णामिति मधुना सह पिप्पलीं पिबेदित्यर्थः; अन्ये लिहेदिति मन्यन्ते । सितया च पथ्यामिति हरीतकीं शर्करया सह पिबेदित्यर्थः ॥ १७ ॥

कुर्याच्च नासावदनावरोधं
क्षीरं पिबेद्वाऽप्यथ मानुषीणाम् ।
मूर्च्छां प्रसक्तां तु शिरोविरेकै-
र्जयेदभीक्ष्णं वमनैश्च तीक्ष्णैः ॥ १८ ॥

अतः परं किं कुर्यादित्याह—कुर्यादित्यादि । नासावक्रयोरवरोधेन व्याघुट्यान्तः प्रविष्टो मारुतो रुद्धानि स्रोतांसि विवृण्वन् मूर्च्छामपहन्ति; नारीक्षीरं चातिशीतलत्वात् । मूर्च्छामित्यादि । प्रसक्तां भूयो भूयोऽनुसङ्गिनीम् । शिरोविरेकैः नस्यैः । अभीक्ष्णं पुनः पुनः । यद्यपि सर्वमूर्च्छायां पित्तं प्रधानं, तीक्ष्णे नस्यवमने न युक्तेऽस्य, तथाऽपि संज्ञावहस्रोतोनिरोधशान्तिकरत्वाद् व्याधिप्रत्यनीकत्वाच्च हिते एव । केचित् 'तीक्ष्णैः' इत्यत्र 'पथ्यैः' इति पठन्ति; तत्र पित्तश्लेष्महरैरित्यर्थः ॥ १८ ॥

हरीतकीक्वाथशृतं घृतं वा
धात्रीफलानां स्वरसैः कृतं वा ।
द्राक्षासितादाडिमलाजवन्ति
शीतानि नीलोत्पलपद्मवन्ति ॥ १९ ॥

१ 'तस्य ताभ्यां' इति पा० । २ 'अपसरणयुक्तः' इति पा० ।

१ 'सतीनतोयेन' इति पा० । २ 'अन्तः प्रवृद्धो' इति पा० । ३ 'हरीतकीक्वाथशृतं पिबेद्वा' इति पा० ।

पिबेत् कषायाणि च गन्धवन्ति
पित्तज्वरं यानि शमं नयन्ति ।

हरीतकीक्वाथशृतमित्यादि । हरीतकीक्वाथेन शृतं सिद्धं हरीतकीक्वाथशृतम् । धात्रीफलानामामलकफलानां स्वरसैः । द्राक्षासितेत्यादि । यानि कषायाणि श्रीपर्ण्यादिकृतानि पित्तज्वरं शमं नयन्ति तानि द्राक्षासितादाडिमलाजवन्ति तत्प्रधानानि पिबेत् । नीलोत्पलपद्मवन्ति नीलोत्पलपद्मप्रधानानि । गन्धवन्ति गन्धद्रव्याढ्यानि । नीलोत्पलपद्मवन्तीत्यादिकं पित्तज्वरहरकषायविशेषणम् ॥ १९ ॥—

प्रभूतदोषस्तमसोऽतिरेकात्
संमूर्च्छितो नैव विबुध्यते यः ॥ २० ॥
संन्यस्तसंज्ञो भृशदुश्चिकित्स्यो
ज्ञेयस्तदा बुद्धिमता मनुष्यः ।

इदानीं मूर्च्छाया अवस्थायां संज्ञान्तरमाह—प्रभूतदोष इत्यादि । यः प्रभूतदोषो मनुष्यः संमूर्च्छितः सन् तमसोऽतिरेकान्नावबुध्यते नावबोधं प्राप्नोति स दुश्चिकित्स्यो मतिमता वैद्येन संन्यस्तसंज्ञो ज्ञेय इति पिण्डार्थः । संन्यस्तसंज्ञ इति मृत्युमुखे वर्तमानत्वात् संन्यस्त इव संन्यस्तः ॥ २० ॥—

यथाऽऽमलोष्ट्रं सलिले निषिक्तं
समुद्धरेदाश्वविलीनमेव ॥ २१ ॥
तद्वच्चिकित्सेत्त्वरया भिषक्त-
मस्वेदनं मृत्युवशं प्रयातम् ।

इदानीं संन्यस्तस्य शीघ्रं प्रतीकाराय दृष्टान्तमाह—यथाऽऽमलोष्टमित्यादि । आमलोष्टमामम् मृत्पिण्डम् । तं संन्यस्तसंज्ञम् । अस्वेदनं प्रस्वेदरहितम् ॥ २१ ॥—

तीक्ष्णाञ्जनाभ्यञ्जनधूमयोगै-
स्तथा नखाभ्यन्तरतोत्रपातैः ॥ २२ ॥
वादित्रगीतानुनयैरपूर्वै-
र्विघट्टनैर्गुप्तफलावघर्षैः ।

कैश्चिकित्सेदित्याह—तीक्ष्णाञ्जनाभ्यञ्जनेत्यादि । तीक्ष्णशब्दोऽञ्जनादिभिः प्रत्येकं संबध्यते । तोत्राणि सूचिप्रकाराणि । वादित्रं वीणादि । अनुनयः सान्त्वनापूर्वकं वचनादि । विघट्टनैर्विविधप्रकारेण चालनैः । गुप्तफलावघर्षैः कपिकच्छूफलावघर्षणैः । अन्ये गुप्तफलं वृषणं, तस्यावघर्षणैः पीडनैरित्यर्थः । केचिद्विघट्टनैरित्यत्र 'विस्मापनैः' इति पठन्ति; तत्र आश्चर्यकारकैरित्यर्थः । एतैरुपचारैरुपाचरेदासंज्ञाप्राप्तेः ॥ २२ ॥—

आभिः क्रियाभिश्च न लब्धसंज्ञः
सानाहलालाश्वसनश्च वर्ज्यः ॥ २३ ॥

आभिः क्रियाभिरित्यादि । आभिः क्रियाभिरनन्तरोक्ताभिस्तीक्ष्णाञ्जनादिभिः । सानाहलालाश्वसनश्च आनाहादियुक्तः; श्वसनः श्वास इत्यर्थः ॥ २३ ॥

२ 'शान्तिपूर्वकं' इति पा० ।

प्रबुद्धसंज्ञं वमनानुलोम्यै-
स्तीक्ष्णैर्विशुद्धं लघुपथ्यभुक्तम् ।
फलत्रिकैश्चित्रकनागराढ्यै-
स्तथाऽश्मजाताज्जतुनः प्रयोगैः ।
सशर्करैर्मासमुपक्रमेत
विशेषतो जीर्णघृतं स पाय्यः ॥ २४ ॥

तीक्ष्णाञ्जनादिभिर्लब्धसंज्ञे संन्यासिनि पश्चात्कर्माह—प्रभूतेत्यादि । तीक्ष्णाञ्जनादिभिः प्रबुद्धसंज्ञं संन्यासिनं तीक्ष्णैर्वमनानुलोम्यैर्वमनविरेचनैर्विशुद्धं, अन्नसंसर्जनक्रमेण च लघुपथ्यभुक्तं, त्रिफलाचित्रकशुण्ठीभावितैः सशर्करैः शिलाजतुप्रयोगैः वज्रकवटककल्पनया कल्पितैर्मासं यावदुपक्रमेत, शेषदोषोपशमनार्थम् । जीर्णं घृतं दशाब्दिकं पाय्यः पाययितव्यः ॥ २४ ॥

यथास्वं च ज्वरघ्नानि कषायाण्युपयोजयेत् ।
सर्वमूर्च्छापरीतानां विषजायां विषापहम् ॥ २५ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे मूर्च्छाप्रतिषेधो नाम (अष्टमोऽध्यायः, आदितः) षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥

यथास्वं ज्वरघ्नानीति यथास्वं यथादोषं ज्वरेषु यानि कषायाण्युक्तानि तानि तद्दोषजमूर्च्छास्वपि योज्यानि । विषापहमिति कल्पस्थानोक्तं विषमोहशमनं नस्याञ्जनादिकम् ॥ २५ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशत्तमोऽध्यायः ।

अथातः पानात्ययप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

मूर्च्छाप्रतिषेधानन्तरं पित्तप्रधानसाम्यात् असंवित्तिजनकसाम्याच्च पानात्ययप्रतिषेधारम्भो युक्त इत्यत आह—अथात इत्यादि । पानात्यय इत्यत्र आदिशब्दो लुप्तो ज्ञेयः, तेन परमदादीनां ग्रहणम् ॥ १ ॥ २ ॥

मद्यमुष्णं तथा तीक्ष्णं सूक्ष्मं विशदमेव च ।
रूक्षमाशुकरं चैव व्यवायि च विकाशि च ॥ ३ ॥

तत्रादौ मद्यगुणप्रणयनं, एवंगुणमपि मद्यं मिथ्योपयुक्तं पानात्ययादिकं करोतीति प्रतिपादनार्थम् । मद्यमित्यादि । आशुकरं शीघ्रकारि । व्यवायि सर्वं देहं व्याप्य पश्चात् पाकं याति । विकाशि सन्धिबन्धविमोचकम् । यद्यपि सूत्रस्थाने मद्यगुणा उक्तास्तथाऽप्यधिकख्यापनार्थमत्राप्युक्ताः ॥ ३ ॥

१ 'सर्वदोषजमूर्च्छास्वपि' इति पा० । २ 'इदानीं पूर्वं मद्यगुणानाह—' इति पा० । ३ 'मद्यगुणप्रतिपादनं' इति पा० ।

औष्ण्याच्छीतोपचारं तत्तैक्ष्ण्याद्धन्ति मनोगतिम् ।
विशत्यवयवान् सौक्ष्म्याद्वैशद्यात्कफशुक्रनुत् ॥ ४ ॥
मारुतं कोपयेद्रौक्ष्यादाशुत्वाच्चाशुकर्मकृत् ।
हर्षदं च व्यवायित्वाद्विकाशित्वाद्विसर्पति ॥ ५ ॥

मद्यगुणानभिधाय कर्माण्याह—औष्ण्यादित्यादि । औष्ण्याच्छीतोपचारमित्यनेन पित्तकोपित्वं सूचितम् । मनोगतिं बाह्याध्यात्मिकां करणप्राप्तिम् । अवयवान् हृदयौजःप्रभृतीन् । हर्षदं मनोहर्षकरं; न तु पुंस्त्वदं, शुक्रहरत्वात् ॥ ४ ॥ ५ ॥

तदम्लं रसतः प्रोक्तं लघु रोचनदीपनम् ।
केचिल्लवणवर्ज्यांस्तु रसानत्रादिशन्ति हि ॥ ६ ॥

मद्यस्य कर्माभिधाय रसमाह—तदम्लं रसत इत्यादि । तन्मद्यम् । अम्लमम्लरसोत्कटं, तेनेतरेऽपि पञ्चरसा अनुरसत्वेन मद्ये बोद्धव्याः । तथा चोक्तम्,—"मद्यस्य षड्रसत्वेऽपि व्यक्तोऽम्लो रस उच्यते—" इति । एकीयमतमाह—केचिल्लवणवर्ज्यानित्यादि ॥ ६ ॥

स्निग्धैस्तदन्नैर्मांसैश्च भक्ष्यैश्च सह सेवितम् ।
भवेदायुःप्रकर्षाय बलायोपचयाय च ॥ ७ ॥

एवंगुणमपि मद्यं यथा सेव्यमानं गुणाय भवति तथाऽऽह—स्निग्धैस्तदन्नैरित्यादि । स्निग्धैरित्युपलक्षणं; तेनेतरेऽपि मद्यविपरीतगुणाः शीतादयो ज्ञेयाः । तन्मद्यम् । बलाय ओजसे, उपचयाय च मांसोपचयाय ॥ ७ ॥

काम्यता मनसस्तुष्टिर्धैर्यं तेजोऽतिविक्रमः ।
विधिवत् सेव्यमाने तु मद्ये सन्निहिता गुणाः ॥ ८ ॥

अनन्तरोक्तविधिना सेव्यमानेन मद्येन काम्यतादयोऽपि गुणा भवन्तीति दर्शयन्नाह—काम्यतेत्यादि । काम्यता कमनीयत्वम् । तेजः प्रभा । सन्निहिताः सम्यगवस्थिताः ॥ ८ ॥

तदेवानन्नमश्नेन सेव्यमानममात्रया ।
कायाग्निना ह्यग्निसमं समेत्य कुरुते मदम् ॥ ९ ॥

विधिरहितं सेव्यमानं मद्यं यत् करोति तदाह—तदेवानन्नमित्यादि । तदेव मद्यम्, अग्निसमं वह्नितुल्यम्, अज्ञेन उक्तमद्यपानविधानानभिज्ञेन, अनन्नमन्नरहितमतिमात्रया च सेव्यमानं, कायाग्निना जठरानलेन, समेत्य मिलित्वा, मदं कुरुते इति पिण्डार्थः ॥ ९ ॥

मदेन करणानां तु भावान्यत्वे कृते सति ।
निगूढमपि भावं स्वं प्रकाशीकुरुतेऽवशः ॥ १० ॥

मदेनावशः पुरुषो यत् करोति तदाह—मदेनेत्यादि । करणानां मनोबुद्धीन्द्रियाणां, भावान्यत्वे स्वरूपान्यथात्वे कृते सति, निगूढमपि संवृतमपि, भावमभिप्रायं, स्वमात्मीयं, प्रकाशीकुरुते प्रकटीकुरुते, अवशो मदपरवश इति पिण्डार्थः ॥१०॥

त्र्यवस्थश्च मदो ज्ञेयः पूर्वो मध्योऽथ पश्चिमः ।
पूर्वे वीर्यरतिप्रीतिहर्षभाष्यादिवर्धनम् ॥ ११ ॥

अथ कतिप्रकारो मद इत्याह—त्र्यवस्थश्चेत्यादि । त्र्यवस्थः त्रिप्रकारः । ते च त्रयः प्रकाराः पूर्वादयः ॥—

पूर्वमदलक्षणमाह—पूर्वे इत्यादि । पूर्वे प्रथमे मदे वीर्यमुत्साहलक्षणं, रतिः हर्षः, प्रीतिः तृप्तिः, हर्षः तुष्टिः; आदिशब्दाद्धास्यादयः ॥ ११ ॥

प्रलापो मध्यमे मोहो युक्तायुक्तक्रियास्तथा ।

मध्यममदलक्षणमाह—प्रलाप इत्यादि । युक्तायुक्तक्रिया इति कदाचिदयुक्ताः कदाचिद्युक्ताः क्रिया इत्यर्थः ॥—

विसंज्ञः पश्चिमे शेते नष्टकर्मक्रियागुणः ॥ १२ ॥

पश्चिममदलक्षणमाह—विसंज्ञ इत्यादि । पश्चिमे पश्चिममदे । नष्टकर्मक्रियागुण इति नष्टानि कर्माणि क्रियागुणाः क्रियाफलानि च यस्य स तथा; अत्र गुणशब्दः फले वर्तते । केचित्, 'बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्ननिद्रारुचिवृद्धिहेतुः । संपाठगीतस्वरवर्धनश्च प्रोक्तोऽतिरम्यः प्रथमो मदो हि ॥ अव्यक्तबुद्धिस्मृतिवाग्विचेष्टः सोन्मत्तलीलाकृतिरप्रशान्तः । आलस्यनिद्राभिहतो मुहुश्च मध्येन मत्तः पुरुषो मदेन ॥ गच्छेदगम्यां न गुरूंश्च मन्येत् खादेदभक्ष्याणि च नष्टसंज्ञः । ब्रूयाच्च गुह्यानि हृदि स्थितानि मत्तो मदेन प्रवरेण मर्त्यः' इति पठन्ति; व्याख्यानयन्ति च—अव्यक्तबुद्धिस्मृतिवागिति अस्पष्टबुद्धिस्मरणवचनः; विचेष्टो विगतकायपरिस्पन्दः, सोन्मत्तलीलाकृतिरिति सह उन्मत्तलीलाकृतिभ्यां वर्तते इति तथा उन्मत्तक्रीडाकार इत्यर्थः । अयं पाठः पूर्वो वा पठनीयः, नतु पाठद्वयं पठनीयम् ॥ १२ ॥

श्लैष्मिकानल्पपित्तांश्च स्निग्धान्मांसोपसेविनः ।
पानं न बाधतेऽत्यर्थं विपरीतांस्तु बाधते ॥ १३ ॥

इदानीं पुरुषविशेषेण सेव्यमानं मद्यं नातिबाधां कुरुते इत्याह—श्लैष्मिकानल्पपित्तांश्चेत्यादि । विपरीतान् पित्ताधिकरुक्षातिमात्रसेविनः ॥ १३ ॥

निर्भक्तमेकान्तत एव मद्यं
निषेव्यमाणं मनुजेन नित्यम् ।
उत्पादयेत् कष्टतमान् विकारा-
नापादयेच्चापि शरीरभेदम् ॥ १४ ॥

निर्भक्तमेकान्तत एव मद्यमित्यादि । निर्भक्तमाहाररहितम् । शरीरभेदं देहनाशम् । यद्यप्ययमर्थस्तदेवानन्नमित्यादिनैवोक्तस्तथाऽपि निर्भक्तमिति यदत्र पुनरुक्तं तन्निर्भक्तपानस्यातिगर्हितत्वख्यापनार्थम् ॥ १४ ॥

क्रुद्धेन भीतेन पिपासितेन
शोकाभितप्तेन बुभुक्षितेन ।
व्यायामभाराध्वपरिक्षतेन
वेगावरोधाभिहतेन चापि ॥ १५ ॥
अत्यम्लभक्ष्यावततोदरेण
साजीर्णभुक्तेन तथाऽबलेन ।

१ 'आशुकारि तत्' इति पा० ।

१ 'हर्षः' इति पा० । २ 'मांसोपसेविनः' इति पा०

उष्णाभितप्तेन च सेव्यमानं
करोति मद्यं विविधान् विकारान् ॥ १६ ॥

इदानीं क्रुद्धादिभिः सेव्यमानं मद्यं विकारान् जनयतीति प्रतिपादयितुमाह—क्रुद्धेनेत्यादि । व्यायामभाराध्वपरिक्षतेनेति व्यायामादिभिः परिखिन्नेनेत्यर्थः । अभिहतेन पीडितेन । अत्यम्लभक्ष्यावततोदरेण अत्यम्लभक्षणाव्रतजठरेण ॥ १५ ॥ १६ ॥

पानात्ययं परमदं पानाजीर्णमथापि वा ।
पानविभ्रममुग्रं च तेषां वक्ष्यामि लक्षणम् ॥ १७ ॥

के ते विविधा विकारास्तानाह—पानात्ययमित्यादि ॥१७॥

स्तम्भाङ्गमर्दहृदयग्रहतोदकम्पाः
पानात्ययेऽनिलकृते शिरसो रुजश्च ।
स्वेदप्रलापमुखशोषणदाहमूर्च्छाः
पित्तात्मके वदनलोचनपीतता च ॥ १८ ॥
श्लेष्मात्मके वमथुशीतकफप्रसेकाः
सर्वात्मके भवति सर्वविकारसंपत् ।

इदानीं पानात्ययस्य वातादिभेदेन लक्षणमाह—स्तम्भेत्यादि । स्तम्भः स्तब्धता ॥ १८ ॥—

ऊष्माणमङ्गगुरुतां विरसाननत्वं
श्लेष्माधिकत्वमरुचिं मलमूत्रसङ्गम् ॥ १९ ॥
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा-
स्तृष्णां रुजां शिरसि सन्धिषु चापि भेदम् ।

परमदलक्षणमाह—ऊष्माणमित्यादि । विरसाननत्वं विरसमुखत्वम् । श्लेष्माधिकत्वं कैफोत्कर्षत्वम् । परस्य तु मदस्य परमदस्येत्यर्थः । भेदमिति भेद इव भेदः । परमदादीनां त्रयाणां दोषत्रयजनितत्वात् पृथग्दोषलिङ्गं नोक्तम् ॥ १९ ॥—

आध्मानमुद्गिरणमम्लरसो विदाहो-
ऽजीर्णस्य पानजनितस्य वदन्ति लिङ्गम् ॥२०॥
ज्ञेयानि तत्र भिषजा सुविनिश्चितानि
पित्तप्रकोपजनितानि च कारणानि ।

पानाजीर्णलक्षणमाह— आध्मानमित्यादि । उद्गिरणं छर्दिः । अजीर्णस्य पानजनितस्य पानाजीर्णस्य । कारणानि लक्षणानि, कारणस्यापि व्याधिलक्षणत्वात् ॥ २० ॥—

हृद्गात्रतोदवमथुज्वरकण्ठधूम-
मूर्च्छाकफस्रवणमूर्धरुजो विदाहः ॥ २१ ॥
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेन धीराः ।

पानविभ्रमलक्षणमाह—हृदित्यादि । वमथुः छर्दिः, कण्ठधूमः कण्ठे धूमोद्गमनमिवै, मूर्धरुजा शिरःपीडा ॥ २१ ॥—

हीनोत्तरौष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमति(पि)पानहतं विजह्यात् ॥२२॥

जिह्वौष्ठदन्तमसितं त्वथवाऽपि नीलं
पीते च यस्य नयने रुधिरप्रभे च ।

इदानीमसाध्यलक्षणमाह—हीनोत्तरौष्ठमित्यादि । हीनोत्तरौष्ठः स्वभावौष्ठादल्पौष्ठः । अमन्ददाहं तीव्रदाहम् । कदाचिदतिशीतं कदाचित्तीव्रदाहम् । पानहतं पानपीडितम् । विजह्यात् त्यजेत् । असितं कृष्णम् । पीते पीतवर्णे ॥ २२ ॥—

हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं भजन्ते ॥ २३ ॥

इदानीमुपद्रवानाह—हिक्काज्वरावित्यादि । वमथुः छर्दिः, वेपथुः कम्पः ॥ २३ ॥

तेषां निवारणमिदं हि मयोच्यमानं
व्यक्ताभिधानमखिलेन विधिं निबोध ॥

तेषां निवारणमित्यादि । तेषां पानात्ययादीनाम् ॥—

मद्यं तु चुक्रमरिचार्द्रकदीप्यकुष्ठ-
सौवर्चलायुतमलं पवनस्य शान्त्यै ॥ २४ ॥
पृथ्वीकदीप्यकमहौषधहिङ्गुभिर्वा
सौवर्चलेन च युतं वितरेत् सुखाय ।

तमेव विधिमाह—मद्यमित्यादि । दीप्यकोऽजमोदा, यवानीत्यपरे । सौवर्चलायुतमीषत्सौवर्चलयुक्तम् । अलं समर्थम् । पवनस्य वातजमदात्ययस्य । वितरेत् दद्यात् ॥ २४ ॥—

आम्रातकाम्रफलदाडिममातुलुङ्गैः
कुर्याच्छुभान्यपि च षाडवपानकानि ॥ २५ ॥
सेवेत वा फलरसोपहितान् रसादी-
नानूपवर्गपिशितान्यपि गन्धवन्ति ।

किं मदात्यये मद्यमेव सेव्यमुतान्यदपीत्याह—आम्रातकाम्रेत्यादि । दाडिममत्राम्लमेव । षाडवो यूषविशेषः । आम्रातकादिभिः क्वथितैरिक्षुविकारयुतैः षाडवः कार्यः । तथा च तन्त्रान्तरे षाडवकल्पना,—"युतमिक्षुविकारेण क्वथितं चूतजं फलम् । घृतशुण्ठीतिलयुतं विज्ञेयो घनषाडवः"—इति । फलरसोपहितान् मातुलुङ्गरसयुक्तान् । रसादीन् मांसरसयूषादीन् । आनूपवर्गपिशितानि कूलचरादिवर्गमांसानि । गन्धवन्तीति प्रभूतहिङ्गुजीरकादियुतानि ॥ २५ ॥—

पित्तात्मके मधुरवर्गकषायमिश्रं
मद्यं हितं समधुशर्करमिष्टगन्धम् ॥ २६ ॥

पित्तजमदात्ययचिकित्सामाह—पित्तात्मके मधुरवर्गकषायमिश्रमित्यादि । मधुरवर्गो गुडूचीवर्जितः काकोल्यादिः, तन्त्रान्तरसंवादात् । इष्टगन्धमेलात्वक्पत्रकाद्यैः सुरभीकृतम् ॥ २६ ॥

पीत्वा च मद्यमपि चेक्षुरसप्रगाढं
निःशेषतः क्षणमवस्थितमुल्लिखेच्च ।
लावैणतित्तिरिरसांश्च पिबेदनम्लान्
मौद्गान् सुखाय सघृतान् ससितांश्च यूषान् ॥

पित्तात्मके मदात्यये वमनमाह—पीत्वेत्यादि । उल्लिखेत

१ 'कफौत्कट्यं' इति पा० । २ 'धूमोद्वहनमिव' इति 'धूमोद्गमनमिव' इति च पा० ।

१ 'दीप्यकाद्यं' इति पा० ।

घमेत् । यद्यपि पित्ते वमनं न कार्यं तथाऽपि पित्तस्य कफस्थानगतत्वाद्वमनं हितमेव, व्याधिप्रत्यनीकत्वाद्वा । किं पित्तात्मके एतदेव कार्यमुतान्यदपीत्याह—लावैणतित्तिरिरसानित्यादि । केचित् 'मौद्गान् सुखाय सघृतान् ससितांश्च यूषान्' इत्यत्र 'मौद्गान् सशर्करघृतान् स हिताय यूषान्' इति पठन्ति; स इति पित्तपानात्ययीति च व्याख्यानयन्ति ॥ २७ ॥

पानात्यये कफकृते कफमुल्लिखेच्च
मद्येन बिम्बिविदुलोदकसंयुतेन ।
सेवेत तिक्तकटुकांश्च रसानुदारान्
यूषांश्च तिक्तकटुकोपहितान् हिताय ॥ २८ ॥

कफजमदात्ययचिकित्सामाह—पानात्यये कफकृते इत्यादि । बिम्बी ओष्ठोपमफला, विदुलो वेतसः । कफमदात्ययेऽपरमप्यौषधमाह—सेवेतेत्यादि । तिक्तकटुकान् तिक्तकटुकद्रव्यसंस्कृतान् । रसान् मांसरसान्; उदारान् जाङ्गलजान मेदस्कानित्यर्थः । यूषान् मुद्गादियूषान् । तिक्तानि दुरालभादीनि, कटुकानि पिप्पल्यादीनि, उपहितान् संस्कृतान् ॥ २८ ॥

पथ्यं यवान्नविकृतानि च जाङ्गलानि
श्लेष्मघ्नमन्यदपि यच्च निरत्ययं स्यात् ।

श्लेष्मजपानात्ययेऽपरमपि यद्धितं तदाह—पथ्यमित्यादि । पथ्यं हितम् । यवान्नविकृतानि यवान्नानि विविधप्रकारैः कृतानीत्यर्थः । अत्रान्नशब्दः पेयलेह्यव्यवच्छेदकः । जाङ्गलानि जाङ्गलमांसानि । निरत्ययं निर्दोषम् ॥—

कुर्याच्च सर्वमथ सर्वभवे विधानं
द्वन्द्वोद्भवे द्वयमवेक्ष्य यथाप्रधानम् ॥ २९ ॥

सन्निपातजद्वन्द्वजमदात्ययचिकित्सामाह—कुर्यादित्यादि । सर्वं प्रत्येकदोषजपानात्ययचिकित्सितम् । सर्वभवे संनिपातोद्भवे । द्वन्द्वभवे द्वन्द्वजे । यथाप्रधानं योगप्रधानमित्यर्थः; एतेन समसन्निपाते सर्वप्रधानं कार्यं, एकतमाधिके च तत्प्रधानमित्यर्थः; एवं द्वन्द्वजेऽपि ॥ २९ ॥

सामान्यमन्यदपि यच्च समग्रमग्र्यं
वक्ष्यामि यच्च मनसो मदकृत् सुखं च ।

सामान्यमन्यदपीत्यादि । अन्यदपि यत् सामान्यं मनसो हर्षकृद्वक्ष्यामि तत् समग्रमपि सर्वेषामग्र्यं श्रेष्ठं सुखं च, सुखहेतुत्वादित्यर्थः ॥—

त्वङ्नागपुष्पमगधैलमधूकधान्यैः
श्लक्ष्णैरजाजिमरिचैश्च कृतं समांशैः ॥ ३० ॥
पानं कपित्थरसवारिपरूषकाढ्यं
पानात्ययेषु विधिवत्स्रुतमम्बरान्ते ।
ह्रीवेरपद्मपरिपेलवसंप्रयुक्तैः
पुष्पैर्विलिप्य करवीरजलोद्भवैश्च ॥ ३१ ॥
पिष्टैः सपद्मकयुतैरपि सारिवाद्यैः
सेकं जलैश्च वितरेदमलैः सुशीतैः ।
त्वक्पत्रचोचमरिचैलभुजङ्गपुष्प-
श्लेष्मातकप्रसववल्कगुडैरुपेतम् ॥ ३२ ॥
द्राक्षायुतं हृतमलं मदिरामयार्तै-
स्तत्पानकं शुचि सुगन्धि नरैर्निषेव्यम् ।
पिष्ट्वा पिबेच्च मधुकं कटुरोहिणीं च
द्राक्षां च मूलमसकृत् त्रपुषीभवं यत् ॥ ३३ ॥
कार्पासिनीमथ च नागबलां च तुल्यां
पीत्वा सुखी भवति साधु सुवर्चलां च ।

पानात्ययचिकित्सामाह—त्वगित्यादि । नागपुष्पं नागकेशरम्, एला सूक्ष्मैला, अजाजी उत्तरापथे प्रसिद्धो जीरकविशेषः । समांशैः तुल्यभागैः । पानं पानकम् । कपित्थरसः कपित्थस्वरसः । स्रुतं गालितम् । अम्बरान्ते वस्त्रान्ते । ह्रीवेरेत्यादि । ह्रीवेरादियुक्तैः करवीरजलोद्भवैः पुष्पैः पिष्टैर्विलिप्य पद्मकयुतैः सारिवादिभिश्च प्रलिप्य, अमलैः सुशीतैश्च जलैः सेकं वितरेत् दद्यादिति पिण्डार्थः । ह्रीवेरः वालकम् । पद्मकं पद्मकाष्ठं, जलोद्भवपुष्पत्वेन पद्मस्य परिग्रहात् । कार्तिककुण्डस्तु 'सपद्मकयुतैः' इत्यनेन पद्मकसहितप्रियङ्ग्वाद्यभिधाय तेन युक्तैः करवीरादिपुष्पैर्ह्रीबेरादियुक्तैरिति व्याख्यानयति, पद्मकं जलजं मन्यते । परिपेलवो वन्यकः । जलोद्भवैः नीलोत्पलप्रभृतिभिः । सपद्मकयुतैरपि सारिवाद्यैरिति सपद्मकः पद्मकसहितः प्रियङ्ग्वादिः, तेन युतैः सारिवादिभिरित्यर्थः । त्वगित्यादि ।—त्वक् वनवासिकात्वक् । श्लेष्मातकप्रसवं बहुवारपुष्पम् । हृतमलं वस्त्रगालितम् । मदिरामयार्तैः पानात्ययपीडितैः । सुगन्धि शोभनगन्धि । केचित् त्वक्पत्रशब्देन त्वक्पत्रिकामाहुः । पिष्ट्वेत्यादि । असकृदिति साध्विति च पदं पिष्ट्वेत्यत्र संबन्धनीयम् । मधुकादिस्त्रपुसीमूलान्त एको योगः । कार्पासिनीमित्यादिः साधुसुवर्चलां चेत्यन्तो द्वितीयः । कार्पासिनी वनकार्पासिनी । सुवर्चला सूर्यभक्ता । कार्पासिनीमथ चेत्यत्र कार्पासमेवमथेति केचित् पठन्ति, कार्पासं कार्पासीमूलं, एवमसकृत् पिष्ट्वेति च व्याख्यानयन्ति ॥ ३०–३३ ॥—

काश्मर्यदारुविडदाडिमपिप्पलीषु
द्राक्षान्वितासु कृतमम्बुनि पानकं यत् ॥३४॥
तद्वीजपूरकरसायुतमाशु पीतं
शान्तिं परां परमदे त्वचिरात् करोति ।

परमदे चिकित्सामाह—काश्मर्येत्यादि । काश्मर्यं गम्भारीफलं, कृतं संस्कृतं, अम्बुनि पानीये ॥ ३४ ॥—

द्राक्षासितामधुकजीरकधान्यकृष्णा-
स्वेवं कृतं त्रिवृतया च पिबेत्तथैव ॥ ३५ ॥
सौवर्चलायुतमुदाररसं फलाम्लं
भार्गीश्रृतेन च जलेन हितोऽवसेकः ॥ ३६ ॥

परमदे पानकान्तरमाह—द्राक्षेत्यादि । द्राक्षादिषु द्रव्येषु एवं बीजपूरकरससंस्कारेण कृतं पानकं त्रिवृतया त्रिजटया च कृतं पानकं पिबेत् । तथैव सौवर्चलायुतमित्यादि ।—उदाररसं जाङ्गलमांसरसं, सौवर्चलायुतमीषत्सौवर्चलायुतं, दाडिमाद्यम्लफलेनाम्लं तथैव पिबेदित्यर्थः । अवसेकः परिषेकः ॥३५॥३६॥

१ 'कार्पासमूलमथ' इति पा० ।

इक्ष्वाकुधामार्गववृक्षकाणि
काकाह्वयोदुम्बरिकाश्च दुग्धे।
विपाच्य तस्याञ्जलिना वमेद्धि
मद्यं पिबेच्चाह्नि गते त्वजीर्णे ॥ ३७॥

पानाजीर्णचिकित्सामाह—इक्ष्वाक्वित्यादि। इक्ष्वाक्वादीनि द्रव्याणि क्षीरपाकविधानेन दुग्धे विपाच्य तस्य कुडवेनाजीर्णे पानाजीर्णे वमेत्, ततश्च अह्नि दिवसे गते अतीते सति मद्यं पिबेदग्निदीपनार्थम्। इक्ष्वाकुस्तिक्तालाबूः। धामार्गवः पीतघोषः। वृक्षकः कुटजफलम्। काकाह्वयोदुम्बरिका गो(का)ष्ठोदुम्बरिका। अन्ये गते त्वजीर्णे अपगते पानाजीर्णे इति व्याख्यानयन्ति॥ ३७॥

त्वक्पिप्पलीभुजगपुष्पविडैरुपेतं
सेवेत हिङ्गुमरिचैलयुतं फलाम्लम्।
उष्णाम्बुसैन्धवयुतास्त्वथवा विडत्वक्-
चव्यैलहिङ्गुमगधाफलमूलशुण्ठीः ॥ ३८॥
हृद्यैः खडैरपि च भोजनमत्र शस्तं

किंमयं मद्यं पानाजीर्णे पिबेदित्याह—त्वगित्यादि। त्वक्पिप्पलीप्रभृतियुतं मद्यं सेवेत, तथा हिङ्गुमरिचादियुतं मद्यं सेवेत। भुजगपुष्पं नागपुष्पम्। फलाम्लं दाडिमबीजपूरकादिभिरम्लीकृतं मद्यम्। उष्णाम्बुसैन्धवयुता इत्यादि। अत्रापि सेवेतेति संबध्यते। मगधाफलमूलमिति पिप्पल्याः फलमूलमित्यर्थः। भोजनमाह—हृद्यैरित्यादि। खडा यूषविशेषाः। अत्र पानाजीर्णे। 'हृद्यैः' इत्यत्र 'मद्यैः' इत्यन्ये पठन्ति। अपरे 'खडैः' इत्यत्र 'फलैः' इति पठन्ति। 'विडत्वक्' इत्यत्र 'यथोक्तं' इति केचित् पठन्ति॥ ३८॥—

द्राक्षाकपित्थफलदाडिमपानकं यत्।
तत् पानविभ्रमहरं मधुशर्कराढ्य-
माम्रातकोलरसपानकमेव चापि॥ ३९॥
खर्जूरवेत्रककरीरपरूषकेषु[1]
द्राक्षात्रिवृत्सु च कृतं ससितं हिमं वा।
श्रीपर्णियुक्तमथवा तु पिबेदिमानि
यष्ट्याह्वयोत्पलहिमाम्बुविमिश्रितानि ॥ ४०॥
क्षीरिप्रवालबिसजीरकनागपुष्प-
पत्रैलवालुसितसारिवपद्मकानि।
आम्रातभव्यकरमर्दकपित्थकोल-
वृक्षाम्लवेत्रफलजीरकदाडिमानि॥ ४१॥

पानविभ्रमचिकित्सामाह—द्राक्षाकपित्थेत्यादि। अत्र फलशब्देन विशिष्टानि मातुलुङ्गादिफलानि गृह्यन्ते। न केवलं द्राक्षादिपानकं मधुशर्कराढ्यं पानविभ्रमे शस्तम्, आम्रातकोलरसपानकमपि। अथवा खर्जूरादिषु कृतं संस्कृतं सशर्करं श्रीपर्णीयुक्तं हिमं पानकं पानविभ्रमे शस्तम्। करीरो मरुदेशजस्तस्य फलम्। श्रीपर्णीयुक्तं काश्मरीफलयुक्तम्। अथवेत्यादि।—अथवा इमानि क्षीरिप्रवालादीनि दाडिमान्तानि यष्ट्याह्वयोत्पलहिमाम्बुविमिश्रितानि अत्र पानविभ्रमे पिबेत्। यष्ट्याह्वयोत्पलहिमाम्बुविमिश्रितानीति यष्टीमधुनीलोत्पलयुक्तं यद्धिमाम्बु तेन विमिश्रितानीत्यर्थः। क्षीरिप्रवाला वटादिपल्लवाः। भव्यं तालफलप्रमाणमुत्तरापथजम्, अन्ये कर्मरङ्गमाहुः॥ ३९-४१॥

[1] 'खर्जूरवेत्रकरवीरपरूषकेषु' इति पा०।

सेवेत वा मरिचजीरकनागपुष्प-
त्वक्पत्रविश्वचविकैलयुतान् रसांश्च।
सूक्ष्माम्बरस्रुतहिमांश्च सुगन्धिगन्धान्
पानोद्भवान्नुदति सप्तगदानशेषान्॥ ४२॥

इदानीं पानात्ययादीनां चिकित्सामाह—सेवेतेत्यादि। रसान् मांसरसान्। समग्रान् संपूर्णान्; संपूर्णत्वं चैषां मरिचादिभिः सर्वैरेवान्वितत्वम्। सूक्ष्माम्बरस्रुतहिमान् सूक्ष्मवस्त्रगालितशीतानित्यर्थः। सुगन्धिगन्धान् अत्यर्थमगुर्वादिधूपितान्। नुदति स्फोटयति। पानोद्भवान् सप्तगदान् चत्वारो मदात्ययाः, त्रयश्च परमदपानाजीर्णपानविभ्रमाः, पानात्ययप्रभवत्वात्तेषां; एवं सप्त॥ ४२॥

पञ्चेन्द्रियार्थविषया मृदुपानयोगा
हृद्याः सुखाश्च मनसः सततं निषेव्याः[1]।
पानात्ययेषु विकटोरुनितम्बवत्यः
पीनोन्नतस्तनभरानतमध्यदेशाः॥ ४३॥
प्रौढाः स्त्रियोऽभिनवयौवनपीनगात्र्यः
सेव्याश्च पञ्चविषयातिशयस्वभावाः॥ ४४॥

एवं पानात्ययादीनां चिकित्सितमभिधायाधुना पानात्ययचिकित्सामेवाह—पञ्चेन्द्रियार्थविषया इत्यादि। पञ्चेन्द्रियार्थविषया इति पञ्चेन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः, तेषां विषयाः करणानि। मृदुपानयोगाः मृदुमद्ययोगाः; ते च पैष्टिकगौडिकमाध्वीकादयः। हृद्या हृदयहिता हृदयप्रियाश्च। सुखाः सुखकराः। विकटोरुनितम्बवत्यः विकटौ श्रेष्ठौ विस्तीर्णौ वा ऊरू यासां ता विकटोरवः, नितम्बवत्यः श्रेष्ठनितम्बाः; यस्मादत्र प्रशंसायां वतुप्प्रत्ययः। पीनोन्नतस्तनभरानतमध्यदेशाः पीनोन्नतस्तनभरेण आनत ईषन्नम्रो मध्यदेशो यासां तास्तथा। प्रौढाः कामक्षमाः। पञ्चविषयाः शब्दाद्यतिशयाः, त एव स्वभावो यासां तास्तथा। श्रीब्रह्मदेवस्तु पञ्चानां विषयाणामतिशयेन स्व आत्मीयो भावो[2]ऽभिप्रायो यासां तास्तथा। 'पञ्चेन्द्रियार्थविषयातिशयस्वभावा[3]' इत्यन्ये पठन्ति, व्याख्यानयन्ति च—पञ्चेन्द्रियार्थविषयाणां शब्दादीनामतिशयो यासां तास्तथेत्यर्थः॥ ४३॥ ४४॥

पिबेद्रसं पुष्पफलोद्भवं वा
सितामधूकत्रिसुगन्धियुक्तम्।
संचूर्ण्य संयोज्य च नागपुष्पै-
रजाजिकृष्णामरिचैश्च तुल्यैः॥ ४५॥

[1] 'नियोज्याः' इति पा०। [2] 'भावः सत्ता' इति पा०। [3] '०स्वभावात्' इति पा०।

अपरं पानात्यये किं कार्यमित्याह—पिबेद्रसं पुष्पफलोद्भवमित्यादि । पुष्पफलोद्भवं कूष्माण्डोद्भवम् । मधूको गुडपुष्पः । त्रिसुगन्धि त्रिजातकम् ॥ ४५ ॥

वर्षाभूयष्ट्याह्वमधूकलाक्षा-
त्वक्कर्बुदाराङ्कुरजीरकाणि ।
द्राक्षां च कृष्णामथ केशरं च
क्षीरे समालोड्य पिबेत् सुखेप्सुः ॥ ४६ ॥

वर्षाभूयष्ट्याह्वेत्यादि । वर्षाभूप्रभृतीनि केशरान्तानि क्षीरे समालोड्य सुखेप्सुः पुरुषः पिबेदिति पिण्डार्थः । वर्षाभूः श्वेतपुनर्नवा, त्वक् चोचं, कर्बुदाराङ्कुराः काञ्चनाराङ्कुराः ॥ ४६ ॥

भवेच्च मद्येन तु येन पातितः
प्रकामपीतेन सुरासवादिना ।
तदेव तस्मै विधिवत् प्रदापये-
द्विपर्यये भ्रंशमवश्यमृच्छति ॥ ४७ ॥

मदात्ययेषु सामान्यमद्यपाने उक्तेऽपि विशेषविधिमाह—भवेदित्यादि । येन सुरासवादिना मद्येन प्रकामपीतेन पुरुषः पातितो भवेत्, तदेव सुरासवादिकं मद्यं तस्मै पुरुषाय विधिवत् सौवर्चलादियुक्तं प्रदापयेत् । कस्मात्तदेव तस्मै प्रदापयेदित्याह—विपर्यय इत्यादि । यस्माद्विपर्यये कृते असौ पुरुषो, भ्रंशं क्लेशं, ऋच्छति प्राप्नोति, तस्मात्तदेव मद्यं तस्मै प्रदापयेदित्यर्थः ॥ ४७ ॥

यथा नरेन्द्रोपहतस्य कस्यचि-
द्भवेत् प्रसादस्तत एव नान्यतः ।
ध्रुवं तथा मद्यहतस्य देहिनो
भवेत् प्रसादस्तत एव नान्यतः ॥ ४८ ॥

मद्यपीडितस्य पुंसो यथा मद्यादेव स्वास्थ्यं स्यात्तथा दृष्टान्तमाह—यथेत्यादि । तत इति नरेन्द्रादित्यर्थः । द्वितीयततःशब्देन मद्यं परामृश्यते ॥ ४८ ॥

विच्छिन्नमद्यः सहसा योऽतिमद्यं निषेवते ।
तस्य पानात्ययोद्दिष्टा विकाराः संभवन्ति हि ॥४९॥

इदानीमनुक्तसंग्रहायाह—विच्छिन्नमद्य इत्यादि । विच्छिन्नमद्यः त्यक्तमद्यः । सहसा अविमृश्यैव । पानात्ययोद्दिष्टा ध्वंसकादयः । तथाच तन्त्रान्तरम्,—"विच्छिन्नमद्यः सहसा योऽतिमद्यं निषेवते । भवेतां मारुतात् कष्टौ तस्य ध्वंसकविक्षयौ" —इत्यादि ॥ ४९ ॥

मद्यस्याग्नेयवायव्यौ गुणावम्बु(म्भो)वहानि तु ।
स्रोतांसि शोषयेयातां तेन तृष्णोपजायते ॥ ५० ॥

मद्यपानाद्यथा तृष्णोत्पत्तिस्तथाऽऽह—मद्यस्येत्यादि । आग्नेयवायव्यौ गुणौ तैक्ष्ण्यरूक्षौ । अम्बुवहानि स्रोतांसीत्यत्राम्बुवहस्रोतःशब्देनाम्बु कथ्यते, उपचारात् । अन्ये तु व्याख्यानयन्ति—यैः स्रोतोभिरुदकं वहन्ति तान्येव स्रोतांसि तौ तीक्ष्णरूक्षौ गुणौ शोषयित्वा तत आधारस्रोतःशोषात्तदाश्रयस्याम्बुनोऽपि शोषः, तेन हेतुना मद्येनापि तृषोपजायते । मद्यस्येत्यादिपाठस्थाने केचित् 'मद्यमाग्नेयभावात्' इत्यादि पाठं पठन्ति, स चाभावान्न लिखितः ॥ ५० ॥

पाटलोत्पलकन्देषु मुद्गपर्ण्यां च साधितम् ।
पिबेन्मागधिकोन्मिश्रं तत्राम्भो हिमशीतलम् ५१

मद्यजतृष्णाचिकित्सामाह—पाटलेत्यादि । पाटला सुगन्धिपुष्पवृक्षः, उत्पलव्यक्तिबहुत्वात् कन्देष्विति बहुत्वमुक्तम् । तत्रेति तृष्णायाम् । हिमस्तुषारस्तद्वच्छीतलं हिमशीतलम् । पाटलादिसाधितमम्भो हिमशीतलं पिप्पलीचूर्णमिश्रं तृष्णायां पिबेदिति पिण्डार्थः ॥ ५१ ॥

सर्पिस्तैलवसामज्जदधिभृङ्गरसैर्युतम् ।
क्वाथेन विल्वयवयोः सर्वगन्धैश्च पेषितैः ॥ ५२ ॥
पक्वमभ्यञ्जने श्रेष्ठं

तृष्णायां क्वाथमभिधायोपचारार्थं स्नेहमाह—सर्पिस्तैलवसामज्जेत्यादि । भृङ्गरसो भृङ्गराजरसः । बिल्वं बिल्वफलम् । यवाः प्रसिद्धाः । सर्वगन्धा एलादिपठिताः । पेषिताः कल्कीकृताः । दधिभृङ्गरसैरिति द्विभेदभिन्नभृङ्गापेक्षया रसस्यापि द्विविधत्वं, ततो बहुवचनम् । दध्ना भृङ्गरसेन बिल्वयवयोः क्वाथेन प्रत्येकं चतुर्गुणेन सर्वगन्धैः कल्कीकृतैः स्नेहचतुर्थांशैः सर्पिस्तैलं वसा मज्जेति चतुःस्नेहं पक्वमभ्यञ्जने शस्तमिति संबन्धः । अन्येऽत्र मज्जास्थाने दुग्धं पठन्ति, व्याख्यानयन्ति च—तैलवसेति यद्यपि द्रवद्रव्यमध्ये तैलवसे पठिते तथाऽपि स्नेहस्य स्नेहान्तरेणासंस्कारात् सर्पिस्तैलवसेति स्नेहस्य त्रयं दुग्धादिचतुर्द्रवैः पक्वमभ्यञ्जने शस्तमिति ॥ ५२ ॥—

सेके क्वाथश्च शीतलः ।

अभ्यञ्जनस्नेहमभिधाय सेकमाह—सेके क्वाथ इत्यादि । सेके परिषेके । क्वाथश्च शीतल इति मधुरशीतद्रव्यकृतो हिमसन्निभः । एतावभ्यङ्गसेकौ सतृषि मदात्यये कार्यौ; अन्ये मद्यजतृष्णायामेवाभ्यङ्गसेकाविच्छन्ति ॥—

रसवन्ति च भोज्यानि यथास्वमवचारयेत् ॥ ५३ ॥
पानकानि सुशीतानि हृद्यानि सुरभीणि च ।

सतृषि मदात्यये भोज्यानि निर्दिशन्नाह—रसवन्तीत्यादि । रसवन्ति प्रचुरमधुररसानि । भोज्यानि भक्तानि । यथास्वं यथादोषप्रत्यनीकमिति; एतेन यद्भोज्यं यस्य दोषस्य प्रत्यनीकं तद्दोषजे सतृषि मदात्यये तद्भोज्यमवचारयेदित्यर्थः । पानकानि द्राक्षादाडिमादिकृतानि । हृद्यानि मनःप्रियाणि । सुरभीणि कर्पूराद्यधिवासितानि ॥ ५३ ॥—

त्वचं प्राप्तस्तु पानोष्मा पित्तरक्ताभिमूर्च्छितः ।
दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम् ॥ ५४ ॥

इदानीं मद्योष्मणो दाहकारित्वमतिदेशेन तज्जन्यदाहस्य चिकित्सितं च श्लोकेनाह—त्वचमित्यादि । पानोष्मा मद्यपानोष्मा । पित्तरक्ताभिमूर्च्छितः पित्तरक्तसंपृक्तः । घोरं

१ 'सुखोष्णम्' इति पा० । २ 'भ्रंशमसौ च गच्छति' इति पा० ।

भयावहम् । पित्तवत्तत्र भेषजं मधुरशीतादि । पानोष्मेत्यत्र मद्योष्मेति केचित् पठन्ति ॥ ५४ ॥

शीतं विधानमत ऊर्ध्वमहं प्रवक्ष्ये
दाहप्रशान्तिकरमृद्धिमतां नराणाम् ।
तत्रादितो मलयजेन हितः प्रदेह-
श्चन्द्रांशुहारतुहिनोदकशीतलेन ॥ ५५ ॥
शीताम्बुशीतलतरैश्च शयानमेनं
हारैर्मृणालवलयैरबलाः स्पृशेयुः ।
भिन्नोत्पलोज्ज्वलहिमे शयने शयीत
पत्रेषु वा सजलबिन्दुषु पद्मिनीनाम् ॥५६॥

दाहप्रतीकारमतिदेशेनाभिधायेश्वराणां पुरुषाणां विशिष्टं प्रतीकारमाह—शीतमित्यादि । तत्रेति दाहे । आदित इति आदौ । मलयजेनेति सुरभिचन्दनेन । प्रदेहः प्रतनुर्लेपः । मलयजविशेषणमाह—चन्द्रांशुहारतुहिनोदकशीतलेनेति ।—हारो मुक्ताहारः, तुहिनोदकं हिमपानीयं, तद्वच्छीतलेनेत्यर्थः । अन्ये 'चन्द्रांशुहारहिमनिर्मलशीतलेन' इति, अपरे 'चन्द्रांशुहारकरकाहिमशीतलेन' इति पठन्ति । करकाः स्फटिकगुटिकाकारा वृष्टिजलजाः पाषाणाः, हिमं तुषारः, शेषं समम् । शीताम्बुशीतलतरैः शीतोदकवदतिशयशीतलैः । एतद्विशेषणं हारैर्मृणालवलयैरित्यनयोः । 'शीताम्बुशीतलकरैः' इत्यन्ये; शीताम्बुवत् शीतलहस्तैः । शयानं विश्रान्तं न तु स्वपन्तं, तादृग्दाहार्तस्य निद्राया असंभवात् । अन्ये 'मृणालवलयैः' इत्यत्र 'तुषारविमलैः' इति पठित्वा हारैरित्यस्य विशेषणं मन्यन्ते । अबलाः प्रौढस्त्रियः । स्पृशेयुः स्पर्शनं कुर्युः । दाहार्तस्य सुखोत्पादनाय शयनमाह—भिन्नोत्पलोज्ज्वलहिमे इति ।—प्रफुल्लनीलोत्पलोज्ज्वलशीतले एवंविधे शयने शयीत । पक्षान्तरमाह—पत्रेषु वेत्यादि । सजलबिन्दुषु पद्मिनीनां पत्रेषु वा शयीतेति संबन्धः ॥ ५५ ॥ ५६ ॥

आसादयन् पवनमाहृतमङ्गनाभिः
कह्लारपद्मदलशैवलसंचयेषु ।
कान्तैर्वनान्तपवनैः परिमृश्यमानः
शक्तश्चरेद्भवनकाननदीर्घिकासु ॥ ५७ ॥

किं कुर्वन् शयीतेत्याह—आसादयन्नित्यादि । आसादयन् प्राप्नुवन् । कं? पवनम् । किंभूतं? आहृतमानीतम् । अङ्गनाभिः स्त्रीभिः; व्यजनादिभिः कृत्वेत्यूह्यम् । कह्लारपद्मदलशैवलसंचयेषु शयीतेति संबध्यते । कह्लारं सौगन्धिकोत्पलम् । अन्ये 'संचयेषु' इत्यत्र 'संचयेभ्यः' इति पठित्वा कह्लारपद्मदलशैवलसंचयेभ्योऽबलाभिराहृतमिति संबध्नन्ति । एवंविधैः शयनैराह्लादितः सन् किं कुर्यादित्याह—कान्तैरित्यादि । कान्तैः कमनीयैर्मृदुशीतसुगन्धिभिः, वनान्तपवनैरामादिवाटिकासमीपवातैः, परिमृश्यमानः स्पृश्यमानः, शक्तः समर्थः सन्, चरेत् भ्रमेत् । कासु भवनकाननदीर्घिकासु गृहोद्यानससोपानपुष्करिणीषु । अन्ये 'कान्तैः' इत्यत्र 'शीतैः' इति, 'वनान्तपवनैः' इत्यत्र 'जलान्तपवनैः,' 'परिमृश्यमान' इत्यत्र 'परिमृज्यमानः,' 'शक्तः' इत्यत्र 'प्रीतः' इति पठन्ति ॥ ५७ ॥

दाहाभिभूतमथवा परिषेचयेत्तु
लामज्जकाम्बुरुहचन्दनतोयतोयैः ।
विस्रावितां हृतमलां नववारिपूर्णां
पद्मोत्पलाकुलजलामधिवासिताम्बुम् ॥ ५८ ॥
वापीं भजेत हरिचन्दनभूषिताङ्गः
कान्ताकरस्पृशनकर्कशरोमकूपः ।

दाहाभिभूतमित्यादि । अथवा तमातुरं दाहपीडितं परिषेचयेत् । कैः? लामज्जकेत्यादिभिः; लामज्जकं पर्वतोद्भूतमूलं, अन्ये उशीरमाहुः; अम्बुरुहं पद्मोत्पलादिकं; चन्दनमत्र श्वेतं, तस्यैव दाहहरत्वात्; तोयं वालकं; एषां तोयैः क्वाथैः । विस्रावितामिति निःसारितपूर्वपानीयाम् । हृतमलामाकृष्टपङ्कादिकाम्, नववारिपूर्णामपरनिर्मलजलभृतां; पद्मोत्पलाकुलजलां पद्मभीषच्छुक्लं, उत्पलानि नीलोत्पलानि, तैर्व्याप्तजलाम् । अधिवासिताम्बुं प्रचुरचन्दनादिप्रक्षेपेण सुगन्धितजलाम् । एवंविधां वापीं भजेत सेवेत, 'दाहार्त आतुर' इति शेषः । किंभूतः सन्? चन्दनभूषिताङ्गः श्वेतचन्दनानुलिप्तगात्रः । पुनः किंभूतः? कान्तेत्यादिविशेषणयुक्तः ॥ ५८ ॥—

तत्रैनमम्बुरुहपत्रसमैः स्पृशन्त्यः
शीतैः करोरुवदनैः कठिनैः स्तनैश्च ॥ ५९ ॥
तोयावगाहकुशला मधुरस्वभावाः
संहर्षयेयुरबलाः सुकलैः प्रलापैः ।

तत्र तस्यां वाप्याम् । एनं दाहार्तम् । अम्बुरुहं कमलं, तस्य पत्रसमैः पत्रतुल्यैः; एतच्च शीतैः करोरुवदनैरित्यस्य विशेषणम् । 'वदनैः' इत्यत्र 'जघनैः' इत्यन्ये । मधुरस्वभावा मृदुप्रचाराः । सुकलैः प्रलापैः शोभनकलायुक्तैः प्रकृष्टवचनैः । तत्र वाप्यामेवंविधैः करोरुवदनैः स्तनैश्च कठिनैः स्पृशन्त्योऽबलाः प्रौढस्त्रियस्तोयावगाहकुशला मृदुप्रचाराः सुकलैः प्रलापैरेनं दाहार्तं संहर्षयेयुः तुष्टिमुत्पादयेयुरिति संबन्धः ॥ ५९ ॥—

धारागृहे प्रगलितोदकदुर्दिनाभे
क्लान्तः शयीत सलिलानिलशीतकुक्षौ ॥६०॥
गन्धोदकैः सकुसुमैरुपसिक्तभूमौ
पत्राम्बुचन्दनरसैरुपलिप्तकुडये ।
जात्युत्पलप्रियककेशरपुण्डरीक-
पुन्नागनागकरवीरकृतोपचारे ॥ ६१ ॥

---

१ 'शयानमेवं' इति पा० । २ 'श्वेतचन्दनेन' इति पा० । ३ 'पवनमाहृतमिष्टगन्धं' इति पा० । ४ 'शीतैर्वनान्तपवनैः' इति पा० । ५ 'प्रीतः' इति पा० । ६ 'व्यजनादिनिमित्तत्वेनेत्यूह्यम्' इति पा० ।

१ 'परिषेचयेत्तं' इति पा० । २ 'लामज्जकाम्बुरुहचन्दनतोयतोयैः' इति, 'शीतैरुशीरजलचन्दनवारिभिस्तम्' इति च पा० । ३ 'अधिवासितां च' इति पा० । ४ 'मधुरैः' इति 'कुशलैः' इति च पा० । ५ '०कृतोपकारे' इति पा० ।

तस्मिन् गृहे कमलरेण्वरुणे शयीत
यत्नाहतानिलविकम्पितपुष्पदाम्नि ।

धारागृहे इत्यादि । प्रगलितं गलितुं प्रवृत्तं यदुदकं तेन दुर्दिनस्येव आभा यस्य तत्तथा । क्लान्तो ग्लानियुक्तः, 'आतुर' इति शेषः । सलिलेन मिश्रितोऽनिलः सलिलानिलस्तेन शीतः कुक्षिरभ्यन्तरं यस्य तत् तत्र । 'सजलाम्बुदशीतकुक्षौ' इत्यन्ये पठन्ति; तत्र सजलमेघवच्छीताभ्यन्तरप्रदेशे । गन्धोदकैः एलादिगन्धद्रव्यकषायैः । सकुसुमैः जातीकुसुमादियुतैः । अन्ये 'सकुसुमैरुपसिक्तभूमौ' इत्यत्र 'पटुभिरुक्षितभूमिभागे' इति पठन्ति; तत्र एलादिकषायैः पटुभिर्व्यक्तगन्धैः सिक्तो भूमिप्रदेशो यत्र । पत्रं पत्रकम्, अम्बु वालकं, चन्दनं श्वेतचन्दनं; रसोऽत्र क्वाथः । कुड्यं भित्तिः । एतेषामेव कल्कक्वाथाभ्यामुपलिप्तभित्तिके । 'उपदिग्धकुड्ये' इत्यन्ये; तत्राप्येक एवार्थः । जाती प्रसिद्धा, उत्पलं नीलोत्पलं, प्रियको बीजकः, केशरो बकुलः, पुण्डरीकं श्वेतपद्मं, पुन्नागो देववल्लभः स्वनामप्रसिद्धः, नागं नागकेशरं, करवीरोऽत्र रक्तकरवीरः, अत्रैतेषां पुष्पाणि ग्राह्याणि; तैः कृतोपचारे कृतरचनाविशेषे धारागृहे । अन्ये त्वेवं पठन्ति —'मांसीतमालतृणकुङ्कुमपद्मपत्रजात्युत्पलाग्रकरवीरकृतोपकारे' इति । तमालं पत्रकं, तृणं सुगन्धितृणं, पद्मपत्रकं कमलपत्रं, जात्युत्पले पूर्ववत्, अग्रकरवीरो रक्तकरवीरः, शेषं सममिति । तस्मिन् गृहे धारागृहे । कमलरेण्वरुणे कमलधूलीवद्रक्ताङ्गे इति धारागृहविशेषणम् । यत्नाहतानिलविकम्पितपुष्पदाम्नि प्रकारान्तरानीतवातचालितपुष्पमालायुक्ते[१] ॥ ६० ॥ ६१ ॥—

हेमन्तविन्ध्यहिमवन्मलयाचलानां
शीताम्भसां सकदलीहरितद्रुमाणाम् ॥ ६२ ॥
उद्भिन्ननीलनलिनाम्बुरुहाकराणां
चन्द्रोदयस्य च कथाः शृणुयान्मनोज्ञाः ।
म्लानं प्रतान्तमनसं मनसोऽनुकूलाः
पीनस्तनोरुजघना हरिचन्दनाङ्ग्यः ॥ ६३ ॥
ता एनमार्द्रवसनाः सह संविशेयुः
श्लिष्ट्वाऽवलाः शिथिलमेखलहारयष्ट्यः ॥६४॥

एवंविधे धारागृहे शयानः किं कुर्यादित्याह— हेमन्तेत्यादि । हेमन्तः ऋतुः; मलयान्तैरचलशब्दः प्रत्येकं संबध्यते, तेनात्र विन्ध्यवनादिपरिहारः । तेषां विशेषणत्रयमाह—शीताम्भसां शीतपानीयानाम् । सकदलीहरितद्रुमाणां कदलीहरितवृक्षसहितानाम् । उद्भिन्ननीलनलिनाम्बुरुहाकराणाम् उद्भिन्नानि विकसितानि नीलनलिनानि नीलोत्पलानि अम्बुरुहाणि पुण्डरीककर्कोत्पलादीनि तेषामाकराः तद्युक्तजलाशयाः ते उत् ऊर्ध्वप्रदेशे येषामित्यर्थः; तेषामेवंविधानां पर्वतानां मनोज्ञाः कथाः शृणुयात् । चन्द्रोदयस्य चेति कथाः शृणुयादित्यर्थः । मनोज्ञा मनोनुकूलाः । एवमपि सुखमनाप्नुवन्तं कथमुपाचरेदित्याह—म्लानमित्यादि । म्लानं ग्लानियुक्तम् । प्रतान्तमनसं दीनमनस्कम् । पीनानि मांसलानि स्तनोरुजघनानि यासां तास्तथा; जघनं स्त्रीकट्यग्रभागः । हरिचन्दनाङ्ग्यः रक्तचन्दनानुलिप्ताः; अन्ये 'घनसारदिग्धा'[२] इति पठन्ति, तत्र चन्दनानुलिप्ताः । ता इति अबला इत्यर्थः । एनं दाहार्तिमन्तम् । आर्द्रवसना आर्द्रवस्त्राः । सह संविशेयुरिति दाहार्तेन सह विश्रामं कुर्युरित्यर्थः । श्लिष्ट्वा आलिङ्ग्य । अबलाः स्त्रियः । किंभूताः ? शिथिलमेखलहारयष्ट्य इति शिथिला लम्बमाना मेखला क्षुद्रसुवर्णघण्टिकायुक्तः कटिदोरकः, हारयष्टिर्मौक्तिकमाला, यासां तास्तथा । ता अबलाः मनसोऽनुकूला इत्यादिविशेषणविशिष्टाः, ग्लानं प्रतान्तमनसमातुरं श्लिष्ट्वा तेनैव सह संविशेयुरिति संबन्धः । श्लिष्ट्वेत्यत्र 'श्लिष्य' इति पठन्ति, व्याख्यानयन्ति च—श्लिष्य आश्लिष्य; छन्दोनुरोधेन आङ्शब्दलोपः ॥ ६२–६४ ॥

हर्षयेयुर्नरं नार्यः स्वगुणै रहसि स्थिताः ।
ताः शैत्याच्छमयेयुश्च पित्तपानात्ययान्तरम्[२] ॥ ६५ ॥

हर्षयेयुरित्यादि । हर्षयेयुस्तुष्टिं नयेयुः । नरमिति दाहार्तम् । नार्यः स्त्रियः । कैर्हर्षयेयुः ? स्वगुणैः मृदुभाषणादिभिः । रहसि स्थिता एकान्ते स्थिताः । ता नार्यः । शैत्यात् 'आत्मन' इति शेषः । शमयेयुः शान्तिं नयेयुः । किं शमयेयुः ? पित्तपानात्ययान्तरं पित्तपानात्ययभेदम् ॥ ६५ ॥

तृड्दाहरक्तपित्तेषु कार्योऽयं भेषजक्रमः ।
सामान्यतो[३]

इमं विधिमन्यत्राप्यतिदिशन्नाह—तृडित्यादि । तृट् पिपासा, दाहो नानाप्रकारो वक्ष्यमाणः । अयमनन्तरोक्तः । भेषजक्रम औषधविधिः कार्यः ॥—

विशेषं तु शृणु दाहेष्वशेषतः ॥ ६६ ॥

तृडादिषु सामान्यतो विधिमुद्दिश्य दाहेषु विशेषविधिमाह—विशेषमित्यादि । दाहेष्विति बहुवचनं नानाप्रकारत्वेन दाहस्याभिधास्यमानत्वात्; अत एव अशेषत इत्युक्तम्, अशेषेष्वित्यर्थः ॥ ६६ ॥

कृत्स्नदेहानुगं रक्त[४]मुद्रिक्तं दहति ध्रुवम् ।
संचूष्यते दह्यते च ताम्राभस्ताम्रलोचनः ॥ ६७ ॥
लोहगन्धाङ्गवदनो वह्निनेवावकीर्यते ।
तं विलङ्घ्य विधानेन संसृष्टाहारमाचरेत् ॥ ६८ ॥
अप्रशाम्यति दाहे च रसैस्तृप्तस्य जाङ्गलैः ।
शाखाश्रया यथान्यायं रोहिणीर्व्यधयेत् सिराः ॥६९॥

इदानीं र[५]क्तादिदाहलक्षणं तेषामेव विशिष्टं चिकित्सितं चाह कृत्स्नदेहानुगमित्यादि । कृत्स्नदेहानुगं सकलदेहव्याप्तम् ।

---

१ 'प्रकारान्तरप्रेरितवातचालितपुष्पमालायुक्ते' इति पा० । २ 'घनसारदिग्धाः' इति पा० । ३ 'हेमन्तादिभिर्मलयान्तैरचलशब्दः प्रत्येकं संबध्यते, तेन हेमन्तर्तुविन्ध्यवनादिपरिहारः' इति पा० ।

१ 'स्निग्धमितवसनाः' इति पाठान्तरम् । २ 'पित्तपानात्ययं स्त्रियः' इति पा० । ३ 'रक्तपित्ततृषादाहेष्वयमेव विधिः स्मृतः' इति पा० । ४ 'रक्तं' इति. ह. लि. पु. पाठः । ५ 'पित्तादिदाहलक्षणं' इति ह. लि. पु. पाठः ।

उद्रिक्तं प्रवृद्धम् । हिशब्द एवार्थे । संचूष्यते आकृष्यत इव वेदनाविशेषः । 'दह्यते' इत्यत्र 'उष्यते' इत्यन्ये; तत्र उष्यते दह्यत इत्यर्थः । ताम्राभस्ताम्रप्रभः । ताम्रलोचनो लोहिताक्षः । लोहगन्धशब्दोऽङ्गवदनाभ्यां संबध्यते । वह्निनेवावकीर्यते ज्वलिताङ्गारैरिवात्मानमाचितं मन्यते, अनेन दाहातिशयः प्रतिपादितः । तमिति रक्तदाहार्तम् । विलङ्घ्येति विविधप्रकारं लङ्घयित्वा । विधानेन क्रमेण, संसृष्टाहारं कृततर्पणादिक्रमं, आचरेदिति कुर्यात्, 'वैद्यप्रयुक्तं' इति शेषः । एवमप्यप्रशाम्यति दाहे किं कुर्यादित्याह—अप्रशाम्यतीत्यादि । अप्रशाम्यति दाहे जाङ्गलै रसैस्तृप्तस्य शाखाश्रया बाहुजङ्घाश्रयाः रोहिणीः लोहिताः सिरा यथान्यायं व्यधयेदिति संबन्धः; यथान्यायं सिराव्यधविधानोक्तेन न्यायेनेत्यर्थः ॥ ६७–६९ ॥

पित्तज्वरसमः पित्तात् स चाप्यस्य विधिर्हितः ।

अतः परं दाहस्य पित्तज्वरेण सह समत्वं तच्चिकित्सितं चाह—पित्तज्वरसम इत्यादि ॥—

तृष्णानिरोधादब्धातौ क्षीणे तेजः समुद्धतम् ॥७०॥
सबाह्याभ्यन्तरं देहं दहेद्वै मन्दचेतसः ।
संशुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य चेष्टते ॥ ७१ ॥

तृण्णिरोधजे दाहे चिकित्सितं निर्दिशन्नाह—तृष्णानिरोधादित्यादि । अब्धातौ पानीयधातौ । तेजः पित्तोष्मा । समुद्धतमत्यर्थवृद्धम् । एवंविधं तेजो देहं सबाह्याभ्यन्तरं मन्दचेतस आतुरस्य वै स्फुटं दहेदित्यर्थः । स दह्यमानदेहः किं कुर्यादित्याह—जिह्वां निष्कृष्येत्यादि । जिह्वां निष्कृष्य निःसार्येत्यर्थः । चेष्टते हस्तपादादिविक्षेपणं करोति, 'दाहार्तः' इति शेषः । अन्ये 'जिह्वा निःसृत्य वेपते' इति पठन्ति, तत्र दाहार्तस्य जिह्वा निःसृत्य कम्पते इत्यर्थः ॥ ७० ॥ ७१ ॥

तत्रोपशमयेत्तेजस्त्वब्धातुं च विवर्धयेत् ।
पाययेत् काममम्भश्च शर्कराढ्यं पयोऽपि वा ॥७२॥
शीतमिक्षुरसं मन्थं वितरेच्चेरितं विधिम् ।

तत्रेत्यादि । तत्र तृष्णानिरोधजे दाहे । उपशमयेत् शान्तिं नयेन्मधुरशीतादिभिः । तेजः पित्तोष्माणम् । अत्रान्ये 'तस्य तेजः प्रशमयेत्' इति पठन्ति; तत्र तस्येति दाहार्तस्य, शेषं समम् । अब्धातुं च विवर्धयेदिति स्वयोनिवर्धनैर्मधुरस्निग्धशीतलैः । अम्भः पानीयम् । तं तृष्णानिरोधजदाहार्तम् । किम्भूतमम्भः ? शर्कराढ्यं प्रभूतशर्करायुक्तम् । किमम्भ एव पाययेदित्याह—पयोऽपि वेति ।—शर्कराढ्यं दुग्धं वेत्यर्थः । मन्थं "शक्तवः सर्पिषाऽभ्यक्ताः शीतवारिपरिप्लुताः" इत्याद्युक्तलक्षणम् । वितरेच्चेरितं विधिमिति पित्तज्वरहरम् । केचित् 'वितरेच्चेतरं विधिम्' इति पठन्ति; तत्र पित्तज्वरोक्तादितरोऽन्यः पित्तहरो विधिरित्यर्थः ॥ ७२ ॥—

असृजा पूर्णकोष्ठस्य दाहो भवति दुःसहः ॥ ७३ ॥
विधिः सद्योव्रणीयोक्तस्तस्य लक्षणमेव च ।

असृजा पूर्णकोष्ठस्येत्यादि । असृजा रक्तेन । पूर्णकोष्ठस्य संभृतोदरस्य । दुःसहः रौद्रः । विधिश्चिकित्सा । तस्येति दाहार्तस्य । लक्षणमेवेति सद्योव्रणीयोक्तमित्यर्थः । 'असृजा' इत्यत्र 'असृजः' इति षष्ठ्यन्तं केचित् पठन्ति, पूरणार्थे षष्ठीं व्याख्यानयन्ति च ॥ ७३ ॥—

धातुक्षयोक्तो यो दाहस्तेन मूर्च्छातृषान्वितः ॥७४॥
क्षामस्वरः क्रियाहीनो भृशं सीदति पीडितः ।
रक्तपित्तविधिस्तस्य हितः स्निग्धोऽनिलापहः ॥७५॥

धातुक्षयोक्तो यो दाह इत्यादि । धातुक्षयोक्तो रक्तक्षयोक्तः । यच्चात्र रक्तक्षयोक्त इति पाठो न कृतः, तदितरधातुक्षयेऽपि दाहो भवतीति ज्ञापनार्थम् । तेन धातुक्षयजदाहेन । क्षामस्वरो दुर्बलस्वरः । क्रियाहीनः कायिकमानसचेष्टाहीनः । पीडितो 'दाहेन' इति शेषः ॥ ७४ ॥ ७५ ॥

क्षतजेनाश्नतश्चान्यः शोचतो वाऽप्यनेकधा ।
तेनान्तर्दह्यतेऽत्यर्थं तृष्णामूर्च्छाप्रलापवान् ॥ ७६ ॥
तमिष्टविषयोपेतं सुहृद्भिरभिसंवृतम् ।
क्षीरमांसरसाहारं विधिनोक्तेन साधयेत् ॥ ७७ ॥

असृजा पूर्णकोष्ठस्येत्यादिना कोष्ठस्थेन रक्तेन दाहमभिधायेदानीं प्रकारान्तरेणाह—क्षतजेनाश्नतश्चान्य इत्यादि । क्षतजेन रक्तेन । अश्नतः भोजनं कुर्वतः । अन्यो 'दाह' इति शेषः । शोचतो वाऽप्यनेकधेति अनेकप्रकारं शोकं कुर्वतः । शोकं कुर्वतो भोजनं कुर्वतो वाऽपि नरस्यान्यो दाहो रक्तेन भवतीति संबन्धः । तेन दाहेन, अन्तः अभ्यन्तरं दह्यते । मूर्च्छातृष्णाप्रलापवान् 'आतुरो भवति' इति शेषः । तमातुरम् । इष्टविषयोपेतमभिलषितशब्दस्पर्शादिसंयुक्तम् । सुहृद्भिः मित्रैः । अभिसंवृतं समन्ततः परिवृतम् । विधिनोक्तेन साधयेत् दाहशान्तिकरेण प्रागुक्तेन विधानेन शान्तिं नयेत् ॥ ७६ ॥ ७७ ॥

मर्माभिघातजोऽप्यस्ति स चासाध्यतमः स्मृतः ।

मर्माभिघातज इत्यादि । मर्माभिघातजः सद्यः कालान्तरे वा प्राणहरमर्माभिघातजः । यद्येवं तर्हि असाध्यत्वं प्राप्तमेव, स चासाध्यतमः स्मृत इति व्यर्थम् । नैवं, स चासाध्यतमः स्मृत इत्यस्मादेव सद्यःकालान्तरप्राणहरमर्मजो ज्ञायत इत्यदोषः । 'स चासाध्यतमः स्मृतः' इत्यत्रान्ये 'सोऽसाध्यः सप्तमो मत' इति पठन्ति । अत एव च दाहगणनां कुर्वन्ति—त्वचं प्राप्तस्तु पानोष्मेत्यादिः प्रथमो दाहः, कृत्स्नदेहानुगं पित्तमित्यादिर्द्वितीयः, तृष्णानिरोधादित्यादिस्तृतीयः, असृजा पूर्णकोष्ठस्येत्यादिश्चतुर्थः, धातुक्षयोक्त इत्यादिः पञ्चमः, क्षतजेनाश्नताश्चान्यः शोचतो वाऽपीत्यादिः षष्ठः, सप्तमश्च मर्माभिघातजः ॥—

१ 'पित्तदाहार्तं' इति ह. लि. पु. पाठः । २ 'यथाभ्यासं' इति पा० । ३ 'समुत्थितम्' इति पा० । ४ 'वेपते' इति पा० । ५ 'इच्छयाऽम्भश्च' इति 'इच्छयाऽम्भस्तं' इति पा० । ६ 'वितरेत्स्वरितं' इति पा० ।

१ 'दाहोऽन्यः स्यात्सुदुस्तरः' इति पा० । २ 'स सीदेद्भृशपीडितः' इति पा० । ३ 'सोऽसाध्यः सप्तमो मतः' इति पा० । ४ 'सद्यःकालान्तर' इति हस्तलिखितपुस्तके नोपलभ्यते ।

सर्वे एव च वर्ज्याः स्युः शीतगात्रेषु देहिषु ॥ ७८ ॥
(एवंविधो भवेद्यस्तु मदिरामयपीडितः।)

अवस्थायां सर्वेषामपि दाहानां वर्जनमाह—सर्वे एवेत्यादि। सर्वे एव 'दाहा' इति शेषः ॥ ७८ ॥

प्रशान्तोपद्रवे चापि शोधनं प्राप्तमाचरेत् ॥ ७९ ॥

दाहानां पुनरावृत्तिनिषेधाय विधानमाह—एवंविधो भवेदित्यादि। प्रशान्तोपद्रवे निवृत्ततृष्णादिके 'आतुरे' इति शेषः। शोधनं विरेचनं, पित्तहरत्वात्। प्राप्तं यथादोषप्रत्यनीकम्। आचरेत् कुर्यात् 'वैद्य' इति शेषः। अन्ये शोधनशब्देन वमनमपि कथयन्ति। तद्वमनं दाहकारिणि पित्ते कफस्थानगे कार्यम्। अन्ये 'प्रशान्तोपद्रवश्चापि' इति पठन्ति; तत्र एवंविध आतुरः शोधनमाचरेदिति व्याख्यानयन्ति ॥ ७९ ॥

सजीरकाण्यार्द्रकशृङ्गवेर-
सौवर्चलान्यर्धजलप्लुतानि।
मद्यानि हृद्यान्यथ गन्धवन्ति
पीतानि सद्यः शमयन्ति तृष्णाम् ॥ ८० ॥

यथा पीयमानं मद्यं तृष्णाकरं न भवति तथा प्राह—सजीरकाणीत्यादि। सजीरकाणि जीरकसहितानि। आर्द्रकं प्रसिद्धं, शृङ्गवेरं शुण्ठी। आर्द्रकस्यादौ सहशब्दो बोद्धव्यः; तेन 'आर्द्रकशृङ्गवेरसौवर्चलानि' इति मद्यानीत्यस्य विशेषणम्। अर्धजलप्लुतानि अर्धपानीयमिश्रितानि। हृद्यानि मनःप्रियाणि। गन्धवन्ति प्रशस्तगन्धानि। एवंविधानि मद्यानि पीतानि सन्ति सद्यस्तृष्णां शमयन्तीति पिण्डार्थः ॥ ८० ॥

जलप्लुतश्चन्दनभूषिताङ्गः
स्रग्वी सभक्तां पिशितोपदंशाम्।
पिबन् सुरां नैव लभेत रोगान्
मनोनुविघ्नं च मदं न याति ॥ ८१ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे मदात्ययप्रतिषेधो नाम (नवमोऽध्यायः, आदितः) सप्तचत्वारिंशत्तमोऽध्यायः ॥ ४७ ॥

किम्भूतः सन्मद्यपः किंभूतां सुरां पिबन् पानजरोगान् मनोविघातकं च मदं न प्राप्नोतीत्याह—जलप्लुत इत्यादि। जलप्लुतो जलार्द्रगात्रः। चन्दनभूषिताङ्गः चन्दनानुलिप्तशरीरः। स्रग्वी पुष्पमालायुक्तः। सभक्तां भक्तेन सहिताम्। पिशितोपदंशां मांसभक्षणसहिताम्। रोगान् पानजानित्यर्थः। मनोनुविघ्नं च मदं न याति मनोविघातकं मदं न प्राप्नोति। एतेनोत्तरौ मदौ नाधिगच्छतीत्युक्तम्। अन्ये 'मनोमतिघ्नं च मदं न याति' इति पठन्ति; तत्र मनोबुद्धिप्रमोहलक्षणं मदं न प्राप्नोतीत्यर्थः ॥ ८१ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे सप्तचत्वारिंशत्तमोऽध्यायः ॥ ४७ ॥

१ अयमर्धश्लोको हस्तलिखितपुस्तके न पठ्यते। २ 'कफाशयस्थे' इति पा०। ३ 'मनोमतिघ्नं च' इति पा०।

अष्टचत्वारिंशत्तमोऽध्यायः।

अथातस्तृष्णाप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

पानात्ययप्रतिषेधानन्तरं मद्यहेतुत्वात्तुल्यचिकित्सितत्वाच्च तृष्णाप्रतिषेधारम्भो युक्त इत्यत आह—अथात इत्यादि ॥१॥२॥

सततं यः पिबेद्वारि न तृप्तिमधिगच्छति।
पुनः काङ्क्षति तोयं च तं तृष्णार्दितमादिशेत् ॥ ३ ॥

तृष्णारोगस्वरूपकथनाय यादृशस्तृष्णार्दितो भवति तादृशमाह—सततं य इत्यादि। नाधिगच्छति न प्राप्नोति ॥ ३ ॥

संक्षोभशोकश्रममद्यपाना-
द्रूक्षाम्लशुष्कोष्णकटू[१]प्रयोगात्।
धातुक्षयाल्लङ्घनसूर्यतापात्
पित्तं च वातश्च भृशं प्रवृद्धौ ॥ ४ ॥
स्रोतांसि संदूषयतः समेतौ
यान्यम्बुवाहीनि शरीरिणां हि।
स्रोतःस्वपांवाहिषु दूषितेषु
जायेत तृष्णा प्रबला[२] ततस्तु ॥ ५ ॥

तृष्णाया हेतुसंप्राप्ती आह—संक्षोभशोकश्रमेत्यादि। संक्षोभोऽत्यर्थचलनम्। श्रम आयासजः खे(खे)दः। समेतौ मिलितौ। अम्बुवाहीनि स्रोतांसि जिह्वागलतालुक्लोमजानि रसवाहिन्यश्च धमन्यः। अतिबला अतिशयेन बलयुक्ता तृष्णा। संक्षोभेत्यादिकः सूर्यतापान्तो हेतुः, 'पित्तं च वातश्च भृशम्' इत्यादिका 'जायेत तृष्णाऽतिबला ततस्तु' इत्यन्ता संप्राप्तिः ॥ ४ ॥ ५ ॥

तिस्रः स्मृतास्ताः क्षतजा चतुर्थी
क्षयात्तथाऽन्याऽऽमसमुद्भवा च।
स्यात् सप्तमी भक्तनिमित्तजा तु
निबोध लिङ्गान्यनुपूर्वशस्तु[३] ॥ ६ ॥

तृष्णासंख्यामाह—तिस्र इत्यादि। तिस्र इति वातपित्तकफैः। यद्यपि कफस्य सौम्यत्वात्तृष्णाजनकत्वं न संभवति तथाऽपि वृद्धः श्लेष्मा यदा वातं पित्तेन सह आवृणोति तदा ताभ्यां संशोष्यमाणस्तृष्णां जनयति। ता इति तृष्णाः। क्षतजा व्रणनिमित्ता। चतुर्थीति चतुर्थग्रहणादाद्यानां चतसृणां तृष्णानां सुखसाध्यत्वं रसक्षयामसमुद्भवयोर्दुःसाध्यत्वं च बोधयति। क्षयात् रसक्षयात्, रसक्षयाया क्षयसंभवा सेति वक्ष्यमाणवचनात्। अन्या अपरा। आमसमुद्भवा अजीर्णजा। भुक्तनिमित्तजा चेति स्निग्धादिभोजननिमित्ता। यद्यपि तन्त्रा[४]न्तरे पञ्चैव तृष्णा निर्दिष्टास्तथाऽप्यत्र निदानभेदेन चिकित्साभेदात् सप्त निर्दिष्टाः। या च स्वभावजा तस्या अत्रानधिकारः, स्वस्थोजस्करचिकित्सितविषयत्वात्; या च बुभुक्षाप्रभवा सा

१ 'कषाययोगात्' इति पा०। २ 'तृष्णाऽतिबला' इति पा०। ३ 'लिङ्गानि तासां शृणु चौषधानि' इति पा०। ४ 'संग्रहे' इति हस्तलिखितपुस्तकेषु पाठ उपलभ्यते।

ज्वराधिकारे सम्यग्लङ्घनलक्षणत्वेनोक्ता, तस्या अप्यनधिकारत्वेनागणनं; या च पित्तज्वरलिङ्गत्वेन कथिता सा पैत्तिकायामवरुद्धा; या च पानजा सा क्षयजायामवरुद्धेति; अतो न संख्यातिरेकः । निबोध जानीहि । अनुपूर्वशः यथाक्रमेण । केचित् 'लिङ्गानि तासां शृणु सौषधानि' इति पठन्ति ॥ ६ ॥

ताल्वोष्ठकण्ठास्यविशोषदाहाः
संतापमोहभ्रमविप्रलापाः ।
पूर्वाणि रूपाणि भवन्ति तासा-
मुत्पत्तिकालेषु विशेषतस्तु ॥ ७ ॥

तृष्णायाः पूर्वरूपमाह—ताल्वोष्ठकण्ठास्येत्यादि । विशोषदाहा इति ताल्वादिभिः सह प्रत्येकं संबध्यते । विशोषो विशेषेण शोषः । सन्तापो घर्मादिभिरिव । मोहो वैचित्त्यम् । विप्रलापो विविधप्रकारेण भाषणम् । तासां तृष्णानाम् । उत्पत्तिकालेषु विशेषतस्त्विति तानि पूर्वरूपाणि अतिशयेनोत्पत्तिकालेषु संभवन्तीत्यर्थः ॥ ७ ॥

शुष्कास्यता मारुतसंभवायां
तोदस्तथा शङ्खशिरःसु चापि ।
स्रोतोनिरोधो विरसं च वक्त्रं
शीताभिरद्भिश्च विवृद्धिमेति ॥ ८ ॥

वातजतृष्णालक्षणमाह—शुष्कास्यता मारुतसंभवायामित्यादि । शुष्कास्यता मुखशोषः । शङ्खशिरःसु शङ्खयोः शिरसि चेत्यर्थः । स्रोतोनिरोधः कर्णस्रोतोनिरोधः । विरसं विरुद्धरसम् । एति प्राप्नोति । केचित् 'शुष्कास्यता' इत्यत्र 'क्षामास्यता' इति पठित्वा वक्तुं चर्वयितुं चासामर्थ्यमिति व्याख्यानयन्ति । 'शङ्खशिरःसु चापि' इत्यत्र 'शङ्खशिरोगलेषु' इति केचित् पठन्ति ॥ ८ ॥

मूर्च्छाप्रलापारुचिवक्त्रशोषाः
पीतेक्षणत्वं प्रततश्च दाहः ॥
शीताभिकाङ्क्षा मुखतिक्तता च
पित्तात्मिकायां परिधूपनं च ॥ ९ ॥

पित्तजतृष्णालक्षणमाह—मूर्च्छेत्यादि । मूर्च्छा चेतनाच्युतिः । पीतेक्षणत्वं पीतनेत्रता । प्रततः सन्ततः । शीताभिकाङ्क्षा शीतेच्छा । परिधूपनं धूमोद्गम(द्व)नमिव ॥ ९ ॥

कफावृताभ्यामनिलानलाभ्यां
कफोऽपि शुष्कः प्रकरोति तृष्णाम् ।
निद्रा गुरुत्वं मधुरास्यता च
तयाऽर्दितः शुष्यति चातिमात्रम् ॥ १० ॥

कण्ठोपलेपो मुखपिच्छिलत्वं
शीतज्वरश्छर्दिररोचकश्च ।
कफात्मिकायां गुरुगात्रता च
शाखासु शोफस्त्वविपाक एव ।
एतानि रूपाणि भवन्ति तस्यां
तयाऽर्दितः काङ्क्षति नाति चाम्भः ॥ ११ ॥

कफजतृष्णालक्षणमाह—कफावृताभ्यामित्यादि । अनिलानलाभ्यां वातपित्ताभ्याम् । गुरुत्वमुदरे बोद्धव्यम् । तयाऽर्दितः कफतृष्णया पीडितः । कण्ठोपलेपः कण्ठे मलवृद्धिः । मुखपिच्छिलत्वं श्लेष्मणा लिप्तमुखत्वम् । शीतज्वरः शीतपूर्वो ज्वरः । गुरुगात्रता हस्तपादशिरोगुरुत्वम् । शाखासु बाहुपादेषु । शोफः श्वयथुः । अविपाक आहारस्यापचनम् । नातिकाङ्क्षति नात्यभिलषतीत्यर्थः । केचिदमुं पाठमन्यथा पठन्ति—'बाष्पावरोधात् कफसंवृतेऽग्नौ तृष्णा बलासेन भवेत्तथा च' इति; शेषं निद्रेत्यादि समम् ॥ १० ॥ ११ ॥

क्षतस्य रुक्शोणितनिर्गमाभ्यां
तृष्णा चतुर्थी क्षतजा मता तु ।
तयाऽभिभूतस्य निशादिनानि
गच्छन्ति दुःखं पिबतोऽपि तोयम् ॥ १२ ॥

क्षतजतृष्णालक्षणमाह—क्षतस्येत्यादि । क्षतस्य व्रणिनः पुरुषस्य या तृष्णा भवेत् सा चतुर्थी क्षतजा । तया च पीडितस्य पुंसस्तोयं पिबतोऽपि निशादिनानि दुःखं गच्छन्तीति संबन्धः ॥ १२ ॥

रसक्षयाद्या क्षयजा मता सा
तयाऽर्दितः शुष्यति दह्यते च ।
अत्यर्थमाकाङ्क्षति चापि तोयं
तां सन्निपातादिति केचिदाहुः ॥ १३ ॥
रसक्षयोक्तानि च लक्षणानि
तस्यामशेषेण भिषग्व्यवस्येत् ।

रसक्षयाच्च क्षयजेत्यादि । मता कथिता । आकाङ्क्षत्यभिलषति । तां सन्निपातादिति केचिदाहुरिति रात्र्यह्नोः षट्सु कालेष्वत्यर्थं पानीयपानेनापि तदनुपशमात् । परमतमप्रतिषिद्धमनुमतम् । रसक्षयोक्तानि लक्षणानि 'रसक्षये हृत्पीडा कम्पः' इत्यादीनि । 'रसक्षयोत्थानि' इति केचित् पठन्ति । तस्यां क्षयजतृष्णायाम् । व्यवस्येत् जानीयात् ॥ १३ ॥—

त्रिदोषलिङ्गाऽऽमसमुद्भवा च
हृच्छूलनिष्ठीवनसादयुक्ता ॥ १४ ॥

---

१ "वितोददाहाः" इति पा० । २ 'वितोदः सूच्यादिभिरिव विविधवेदनाः' इति पा० । ३ 'शङ्खशिरोगलेषु' इति पा० । ४ 'रसाम्बुवाहिधमनीनिरोधः' इति पा० । ५ 'बाष्पावरोधात्कफसंवृतेऽग्नौ तृष्णा बलासेन भवेत्तु तत्र' इति पा० । ६ 'तृष्णार्दितः' इति पा० ।

१ 'मुखे पैच्छिल्यम्' इति पा० । २ 'भवेत्सा' इति पा० । ३ 'रसक्षयाद्या क्षयसंभवा सा तयाऽभिभूतस्तु निशादिनेषु। पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः' इति पा० ।

आमजतृष्णालक्षणमाह—त्रिदोषलिङ्गामसमुद्भवेत्यादि । त्रिदोषलिङ्गा दोषत्रयलिङ्गयुक्ता, अजीर्णतो दोषत्रयकोपात् । निष्ठीवनं थुग्थुगिका । सादोऽङ्गग्लानिः ॥ १४ ॥

स्निग्धं तथाऽम्लं लवणं च भुक्तं
गुर्वन्नमेवातितृषां करोति ।

भक्तजतृष्णालक्षणमाह—स्निग्धं तथाऽम्लमित्यादि । तृषां तृष्णाम् । एषा कफात्, वातपित्ते तु सर्वास्वपि कारणे ॥—

क्षीणं विचित्तं बधिरं तृषार्तं
विवर्जयेन्निर्गतजिह्वमाशु ॥ १५ ॥

इदानीमवस्थायां सर्वासां वर्जनमाह—क्षीणं विचित्तमित्यादि । विचित्तं नष्टमनस्कम् । तृषार्तं तृष्णापीडितं मनुष्यम् ॥ १५ ॥

तृष्णाभिवृद्धावुदरे च पूर्णे
तं वामयेन्मागधिकोदकेन ।
विलोभनं चात्र हितं विधेयं
स्याद्दाडिमाम्रातकमातुलुङ्गैः ॥ १६ ॥
तिस्रः प्रयोगैरिह सन्निवार्याः
शीतैश्च सम्यग्रसवीर्यजातैः ।

इदानीं चिकित्सावसरः—तृष्णाभिवृद्धावित्यादि । वामयेत् छर्दयेत्, परं क्षयजां विहाय; तत्र हि क्षीणधातुत्वाद्वमनमनुचितम् । तथा च तन्त्रान्तरम्,—"उल्लेखनं तु तृष्णासु क्षयादन्यत्र युज्यते"—इति । मागधिकोदकेन पिप्पलीमिश्रितजलेन । विलोभनं विशिष्टो लोभः । कैर्विलोभनं विधेयं स्यादित्याह—दाडिमाम्रातकेत्यादि । एतेन तल्लालास्रावाय तस्य पुरतो दाडिमाद्यम्लफलमन्ये खादेयुरित्युक्तं, अन्ये नानाप्रकाराभिः कथाभिरपि विलोभनमिच्छन्ति । केचिद्विलोभनमित्यत्र विलङ्घनमिति पठन्ति; विलङ्घनं लघुभोजनं न तु लङ्घनं, तस्य पित्तकरत्वादिति च व्याख्यानयन्ति । तिस्रः वातपित्तकफजास्तृष्णाः । सन्निवार्या निवारणीयाः । प्रयोगैर्वक्ष्यमाणैः । सम्यग्रसवीर्यजातैरिति संपूर्णरसवीर्यैरित्यर्थः ॥ १६ ॥—

गण्डूषमम्लैर्विरसे च वक्त्रे
कुर्याच्छुभैरामलकस्य चूर्णैः ॥ १७ ॥

गण्डूषमम्लैरित्यादि । अम्लैः मद्यारनालमातुलुङ्गादिभिः । विरसे चेति चकार आमलकस्य चूर्णैरित्यत्र द्रष्टव्यः । तेन न केवलमम्लैर्गण्डूषं कुर्यात् आमलकस्य चूर्णैरपीत्यर्थः ॥ १७ ॥

सुवर्णरूप्यादिभिरग्नितप्तै-
र्लोष्टैः कृतं वा सिकतादिभिर्वा ।
जलं सुखोष्णं शमयेत्तु तृष्णां
सशर्करं क्षौद्रयुतं हिमं वा ॥ १८ ॥

सुवर्णरूप्यादिभिरित्यादि । सुवर्णादिभिर्लोष्टैः सिकतादिभिर्वा अग्नितप्तैः कृतं संस्कृतं जलं सुखोष्णं पीतं सत् तृष्णां शमयेत्, तदेव वा हिमीकृतं शर्करामधुयुक्तं पीतं सत् तृष्णां शमयेदिति पिण्डार्थः ॥ १८ ॥

पञ्चाङ्गिकाः पञ्चगणा य उक्ता-
स्तेष्वम्बु सिद्धं प्रथमे गणे वा ।
पिबेत् सुखोष्णं मनुजोऽचिरेण
तृषो विमुच्येत हि वातजायाः ॥ १९ ॥

सामान्यचिकित्सितमभिधायेदानीं विशिष्टचिकित्सितमाह—पञ्चाङ्गिकाः पञ्चगणा इत्यादि । पञ्चाङ्गिकाः पञ्चगणा ये उक्ताः पञ्च पञ्चमूलानि । प्रथमे गणे विदारिगन्धादौ ॥ १९ ॥

पित्तघ्नवर्गैस्तु कृतः कषायः
सशर्करः क्षौद्रयुतः सुशीतः ।
पीतस्तृषां पित्तकृतां निहन्ति
क्षीरं शृतं वाऽप्यथ जीवनीयैः ॥ २० ॥

पित्तजतृष्णाचिकित्सितमाह—पित्तघ्नवर्गैरित्यादि । पित्तघ्नवर्गैः उत्पलसारिवादिकाकोल्यादिभिः । कृतः संस्कृतः । जीवनीयैः काकोल्यादिभिः ॥ २० ॥

बिल्वाढकीकन्यकपञ्चमूली-
दर्भेषु सिद्धं कफजां निहन्ति ।
हितं भवेच्छर्दनमेव चात्र
तप्तेन निम्बप्रसवोदकेन ॥ २१ ॥

कफजतृष्णाचिकित्सितमाह—बिल्वाढकीकण्टकपञ्चमूलीत्यादि । कन्यकपञ्चमूली लघुपञ्चमूलम् । अत्र कफजतृष्णायाम् । निम्बप्रसवोदकेन निम्बपल्लवोदकेन । केचित् 'बिल्वाढकीकण्टकपञ्चमूलीदर्भेषु' इति पठन्ति । कण्टकिपञ्चमूलं करमर्दकत्रिकण्टकेत्यादिनोक्तम् । अपरे 'बिल्वाढकीकण्टकपञ्चकोलदर्भेषु' इति पठन्ति । तं च पाठं कार्तिककुण्डो नेच्छति, सर्वतृष्णासु पित्तसद्भावेन पञ्चकोलस्यानुचितत्वात् ॥ २१ ॥

सर्वासु तृष्णास्वथवाऽपि पैत्तं
कुर्याद्विधिं तेन हि ता न सन्ति ।

इदानीं सर्वतृष्णासु पित्तघ्नो विधिः कार्य इति दर्शयन्नाह—सर्वासु तृष्णास्वथवेत्यादि । पैत्तं विधिं वक्ष्यमाणं मधुरशीतादिभिः पानालेपनपरिषेकादिकम् । तेन पैत्तेन विधिना, हि यस्मात्, तास्तृष्णा न सन्ति न भवन्ति ॥—

पर्यागतोदुम्बरजो रसस्तु
सशर्करस्तत्कथितोदकं वा ॥ २२ ॥
वर्गस्य सिद्धस्य च सारिवादेः
पातव्यमम्भः शिशिरं तृषार्तैः ।

---

१ 'गुर्वन्नमेवाशु' इति पा० । २ 'विलेपनं चात्र हितं वदन्ति' इति पा० । ३ 'तृष्णा प्रयोगैरिह सा निवार्या' इति पा० । ४ 'सिकतोपलैर्वा' इति पा० ।

१ 'तैरम्बु' इति पा० । २ 'मनुजोऽल्पशस्तु' इति पा० । ३ "कण्टकपञ्चमूली" इति पा० । ४-५ 'बिल्वाढकीकच्चकपञ्चकोलदर्भेषु' इति पा० । ६ 'तेन विना न शान्तिः' इति पा० ।

अपरमपि सर्वतृष्णासु विधिमाह—पर्यागतोदुम्बरज इत्यादि । पर्यागतोदुम्बरजो रस इति पक्कोदुम्बरस्वरसः । तत्क्कथितोदकं पक्कोदुम्बरक्कथितजलम् । सिद्धस्य क्काथपानपरिभाषया । शिशिरं शीतलम् ॥ २२ ॥—

कशेरुश्रृङ्गाटकपद्ममोच-
बिसेक्षुसिद्धं क्षतजां निहन्ति ॥ २३ ॥

क्षतजतृष्णाचिकित्सितमाह—कशेरुश्रृङ्गाटकेत्यादि । मोचा कदली । बिसं पद्ममूलम् । सिद्धमित्यत्र 'तोयं' इति शेषः ॥ २३ ॥

लाजोत्पलोशीरकुचन्दनानि
दत्त्वा प्रवाते निशि वासयेत्तु ।
तदुत्तमं तोयमुदारगन्धि
सितायुतं क्षौद्रयुतं वदन्ति ॥ २४ ॥
द्राक्षाप्रगाढं च हिताय वैद्य-
स्तृष्णार्दितेभ्यो वितरेज्ज्वरेभ्यः ।

इदानीं क्षतजतृष्णायां योगान्तरमाह—लाजोत्पलोशीरकुचन्दनानीत्यादि । एतानि लाजोत्पलादीनि दत्त्वा तोयं जलं प्रवाते निशि वासयेत्, ततश्च तदुदकमुदारगन्धि सुगन्धिपुष्पाधिवासितं सिताक्षौद्रयुतं क्षतजतृष्णायामुत्तमं वदन्ति । तदुदकं यथा प्रयुज्यते तदा(था)ह—द्राक्षाप्रगाढमित्यादि । केचिदनन्तरोक्तं कशेरुश्रृङ्गाटकेत्यादिकं तथा लाजोत्पलोशीरकुचन्दनानीत्यादिकं चैकत्र कृत्वाऽन्यथा पठन्ति, ते च कसेर्वादिसिद्धे तोये लाजोत्पलादीनि दत्त्वा निशि वासयेदिति योजयन्ति; ते च कसेर्वादिकं 'कुर्यात् कषायाणि यथेरितानि' इति पर्यन्तं सामान्यतृष्णाचिकित्सितमिति मन्यन्ते, स च पाठोऽभावान्न दर्शितः ॥ २४ ॥—

ससारिवादौ तृणपञ्चमूले
तथोत्पलादौ प्रथमे गणे च ॥ २५ ॥
कुर्यात् कषायं च यथेरितेन

क्षतजतृष्णायामपराण्यपि योगान्तराण्याह—ससारिवादौ तृणपञ्चमूले इत्यादि । ससारिवादौ सारिवादिगणसहिते । एतद्विशेषणं तृणपञ्चमूलोत्पलादीनाम् । तृणपञ्चमूले कुशकाशनलदर्भेत्यादिके । उत्पलादौ उत्परक्तोत्पलेत्यादिके । प्रथमो गणो विदारिगन्धादिः । यथेरितेनेति पूर्वोक्तविधानेन । एतेन लाजादि दत्त्वा प्रवाते निशि वासनं शर्करादिप्रक्षेपश्च लभ्यते । 'यथेरितेन' इत्यत्र केचित् 'यथैतदुक्तम्' इति पठन्ति; तत्रापि स एवार्थः ॥ २५ ॥—

मधूकपुष्पादिषु चापरेषु ।
राजादनक्षीरिकपीतनेषु
षट् पानकान्यत्र हितानि च स्युः ॥ २६ ॥

क्षतजतृष्णायां षट्पानकान्याह—मधूकपुष्पादिष्वित्यादि । मधूकपुष्पादिषु मधूकशोभाञ्जनकोविदारप्रियङ्गुपुष्पेषु चतुर्षु रक्तपित्तघ्नगणपठितेषु; अन्ये मधूकपुष्पद्राक्षाकाश्मर्यखर्जूरेषु चतुर्षु रक्तपित्तपठितेष्विति वदन्ति । राजादनश्चारः, अन्ये क्षीरिकामाहुः । क्षीरिकपीतन आर्द्रशिरीषः, अन्ये क्षीरीति द्रव्यान्तरमिच्छन्ति; तथा सति सप्तद्रव्यत्वेन संख्यातिरेकः स्यात् । पानकानि कषायाणि । अत्रापि यथेरितेनेति योज्यं; तेन लाजादि दत्त्वा प्रवाते निशि वासनं शर्करादिप्रक्षेपश्च गृह्यते । अत्र क्षतजतृष्णायाम् । केचित् ससारिवादावित्यादिना क्षीरिकपीतनेष्विति पर्यन्तेन षट्पानकानि वदन्ति; तन्न, सारिवादेस्तृणपञ्चमूलादीनां विशेषणत्वेनोक्तत्वात् पञ्च पानकानि स्युः । अपरे तु कसेर्वादिमारभ्य षट्पानकानीच्छन्ति; तदपि न, तस्य पृथग्दर्शितत्वात् ॥ २६ ॥

सतुण्डिकेराण्यथवा पिबेत्तु
पिष्टानि कार्पाससमुद्भवानि ।

क्षतजतृष्णायामपरमपि योगान्तरमाह—सतुण्डिकेराण्यथेत्यादि । तुण्डिकेरी वनकार्पासी । कार्पाससमुद्भवानि कार्पासफलानि । एतेन वनग्राम्यकार्पासीफलानि पिष्टानि पातव्यानि । कार्तिककुण्डस्तु सर्वासु तृष्णास्वथेत्यादिकं कार्पाससमुद्भवानीत्यन्तं सर्वासु तृष्णासु चिकित्सितं मन्यते ॥—

क्षतोद्भवां रुग्विनिवारणेन
जयेद्रसानामसृजश्च पानैः ॥ २७ ॥

क्षतजतृष्णायामपरमपि चिकित्साविशेषमाह—क्षतोद्भवामित्यादि । रुग्विनिवारणेन क्षतोद्भवरुगपनयनेन । रसानां मांसरसानाम् । असृज इति एणादिशोणितस्येत्यर्थः ॥ २७ ॥

क्षयोत्थितां क्षीरघृतं निहन्या-
न्मांसोदकं वा मधुकोदकं वा ।

क्षयजायास्तृष्णायाश्चिकित्सितमाह—क्षयोत्थितां क्षीरघृतमित्यादि । क्षीरघृतं क्षीरमथनोद्धृतं घृतं क्षीरमिश्रितं घृतं वा । मांसोदकं मांसरसस्याच्छो भागः सौरावाख्यः । मधुकोदकं यष्टीमधुकोदकम् । केचिदत्र माषोदकमिति पठित्वा माषयूषमिति व्याख्यानयन्ति ॥—

आमोद्भवां बिल्ववचायुतैस्तु
जयेत् कषायैरथ दीपनीयैः ॥ २८ ॥
आम्रातभल्लातबलायुतानि
पिबेत् कषायाण्यथ दीपनानि ।

आमजायाश्चिकित्सामाह—आमोद्भवामित्यादि । दीपनीयैः पिप्पल्यादिद्रव्यकृतैः । आम्रातेत्यादि आम्रातकादियुतानि दीपनानि कषायाणि आमजतृष्णायां पिबेत्यर्थः ॥ २८ ॥—

१ 'बिसेषु सिद्धम्' इति पा० । २ 'तथैव' इति पा० । ३ अयं हस्तलिखितपुस्तके नोपलभ्यते । ४ 'मधुरे' इति पा० । ५ 'यथैव युक्तं' इति पा० ।

१ 'तेन पुष्पाधिवासनं शर्करावापश्च गृह्यते' इति पा० । २ 'दीपनानाम्' इति पा० ।

गुर्वन्नजातां वमनैर्जयेच्च
क्षयादृते सर्वकृतां च तृष्णाम्॥ २९॥

भक्तजतृष्णाचिकित्सामाह—गुर्वन्नजातामित्यादि। गुर्वन्नजातां तृष्णां वमनैर्जयेदित्यर्थः। किं गुर्वन्नजातामेव वमनैर्जयेदुतान्यामपीत्याह—क्षयादित्यादि। क्षयादृते इति क्षयजां विहाय, सर्वदोषारब्धां तृष्णामपि वमनैर्जयेदिति पिण्डार्थः। क्षयजाऽपि सर्वदोषारब्धा, तस्यां क्षीणधातुत्वाद्वमनं न कार्यमिति द्योतनार्थं क्षयादृते इति कृतम्। सर्वकृतामामजामित्यर्थः, तस्या अपि दोषत्रयोत्पन्नत्वात्। अन्ये तु 'क्षयादृते सर्वकृताश्च तृष्णा' इति पठन्ति, क्षयजां विहाय अन्याः सर्वा अपि तृष्णा वमनैर्जयेदिति व्याख्यानयन्ति॥ २९॥

श्रमोद्भवां मांसरसो निहन्ति
गुडोदकं वाऽप्यथवाऽपि मन्थः।

तृष्णाप्रसङ्गेन श्रमादिजातानामपि तृष्णानां प्रतीकारमाह—श्रमोद्भवामित्यादि। मन्थः 'सक्तवः सर्पिषाऽभ्यक्ता' इत्याद्युक्तः। यदा श्रमजतृष्णा वातोल्बणा भवति तदा तां मांसरसो निहन्ति, यदा पित्तोल्बणा तदा मन्थ इति तात्पर्यार्थः॥—

भक्तोपरोधात्तृषितो यवागू-
मुष्णां पिबेन्मन्थमथो हिमं च॥ ३०॥

भक्तोपरोधादित्यादि। भक्तोपरोधादाहारनिरोधात्। उष्णां यवागूं वातोत्कटायां, हिमं मन्थं च पित्तोत्कटायां, पिबेदिति पर्यवसितोऽर्थः॥ ३०॥

या स्नेहपीतस्य भवेच्च तृष्णा
तत्रोष्णमम्भः प्रपिबेन्मनुष्यः।

या स्नेहपीतस्य भवेदित्यादि। यद्यपि 'स्नेहपीतस्य चेत्तृष्णा पिबेत्' इत्यादिनैव स्नेहजतृष्णाचिकित्सितं प्रागुक्तं, तथाऽपि प्रकरणान्तरत्वाद्दार्ढ्यार्थं पुनरुक्तम्॥—

मद्योद्भवामर्धजलं निहन्ति
मद्यं तृषां याऽपि च मद्यपस्य॥ ३१॥

मद्योद्भवामर्धजलमित्यादि। यद्यपि मदात्ययप्रस्तावे मद्यजतृष्णाचिकित्सितमुक्तं, तथाऽप्यधिकरणवशात् पुनरुक्तमतो न दोषः॥ ३१॥

तृष्णोद्भवां हन्ति जलं सुशीतं
सशर्करं सेक्षुरसं तथाऽम्भः।

तृष्णोद्भवामित्यादि। तृष्णोद्भवामिति हृद्रोगकर्षितस्य पुरुषस्योत्तरकालोत्पन्नामित्यर्थः। सशर्करं सुशीतं पानीयं तथा इक्षुरससहितं च पानीयं तृष्णोद्भवां तृष्णां हन्तीति पिण्डार्थः। कार्तिककुण्डस्तु 'श्रमोद्भवां मांसरसो निहन्ति' इत्यारभ्य 'तृष्णोद्भवां हन्ति जलं सुशीतं सशर्करं सेक्षुरसं तथाऽम्भः' इति यावन्न पठति; अस्माभिस्तु श्रीजेज्जटेन पठितत्वात् पठितः॥—

स्वैः स्वैः कषायैर्वमनानि तासां
तथा ज्वरोक्तानि च पाचनानि॥ ३२॥

पूर्वं तृष्णासु वमनान्युक्तानि, तानि च यैर्द्रव्यैः क्रियन्ते तान्याह—स्वैः स्वैरित्यादि। स्वैः स्वैः कषायैरात्मीयैरात्मीयैः क्वाथैः; एतेनैतदुक्तं—यासु छर्दिषु शमनाय ये कषाया उक्तास्तैरेव वमनानि तासु योज्यानि, तथा ज्वरोक्तानि पाचनानि च कार्याणि॥ ३२॥

लेपावगाहौ परिषेचनानि
कुर्यात्तथा शीतगृहाणि चापि।
संशोधनं क्षीररसौ घृतानि
सर्वासु लेहान्मधुरान् हिमांश्च॥ ३३॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे (दशमोऽध्यायः, आदितः) अष्टचत्वारिंशोऽध्यायः॥४८॥

सर्वतृष्णासु पित्तहरो विधिः कार्य इति यत् प्रागुक्तं तमेव पित्तहरविधिमाह—लेपावगाहावित्यादि। संशोधनं विरेचनं, पित्तहरत्वात्॥ ३३॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे तृष्णाप्रतिषेधो नामाष्टचत्वारिंशत्तमोऽध्यायः॥ ४८॥

एकोनपञ्चाशत्तमोऽध्यायः।

अथातश्छर्दिप्रतिषेधमध्यायं व्याख्यास्यामः॥ १॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

तृष्णाप्रतिषेधानन्तरं तृष्णोपचारतुल्यत्वात्तृष्णाप्रतिषेधे छर्देरुपादानाच्च छर्दिप्रतिषेधारम्भो युक्त इत्यत आह—अथात इत्यादि॥ १॥ २॥

अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरति।
अकाले चातिमात्रैश्च तथाऽसात्म्यैश्च भोजनैः॥३॥
श्रमात् क्षयात्तथोद्वेगादजीर्णात् कृमिदोषतः।
नार्याश्चापन्नसत्त्वायास्तथाऽतिद्रुतमश्नतः॥ ४॥
अत्यन्तामपरीतस्य छर्देर्वै संभवो ध्रुवम्।
(बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात्॥ ५॥)

छर्देर्हेतुमाह—अतिद्रवैरित्यादि। एवंभूतस्य पुरुषस्य अतिद्रवादिभिः कारणैश्छर्देः संभव उत्पत्तिर्भवेदिति संबन्धः। अहृद्यैरप्रियैः। उद्वेग उद्वेजनम्। आपन्नसत्त्वाया गर्भिण्याः।

१-२ 'उष्णोद्भवं' इति पा०।

१ अयमर्धश्लोको हाराणचन्द्रेण न पठितः।

अतिद्रुतमतिशीघ्रम् । अश्नतो भोजनं कुर्वतः । अत्यन्तामपरीतस्य अत्यर्थमामवेष्टितस्य । केचित् 'अत्यन्तामपरीतस्य' इत्यत्र 'बीभत्सैर्हेतुभिश्चान्यैः' इति पठन्ति; पूयामेध्यादिदर्शनगन्धास्वादैर्घृणाकरैरिति च व्याख्यानयन्ति ॥ ३—५ ॥

छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः ।
निरुच्यते छर्दिरिति दोषो वक्त्राद्विनिश्चरन् ॥ ६ ॥

छर्दिनिरुक्तिमाह—छादयन्नाननमित्यादि । छादयन् पूरयन्, आननं वक्त्रं, प्रवृत्तेराभिमुख्येनावस्थितत्वं वेगः, अर्दयन् दुःखयन्, अङ्गभञ्जनैरङ्गव्यथाभिः, वक्त्राद्विनिश्चरन् वक्त्राद्विनिर्गच्छन्; वेगैः कृत्वा मुखं पूरयन् अङ्गव्यथाभिश्च पीडयन् वक्त्रान्निर्गच्छन् दोषच्छर्दिरिति निरुच्यत इति संबन्धः । केचित् 'वक्त्राद्विनिश्चरन्' इत्यत्र 'वक्त्रं प्रधावितः' इति पठित्वा मुखं गत इति व्याख्यानयन्ति ॥ ६ ॥

दोषानुदीरयन् वृद्धानुदानो व्यानसङ्गतः ।
ऊर्ध्वमागच्छति भृशं विरुद्धाहारसेवनात् ॥ ७ ॥

छर्दिसंप्राप्तिमाह—दोषानुदीरयन्नित्यादि । व्यानसङ्गतः व्यानेन सह एकीभूत उदानः, विरुद्धाहारसेवनात् विरुद्धानामाहाराणां सेवनात्, वृद्धान् प्रकुपितान् दोषानुदीरयन् भृशमूर्ध्वमागच्छतीति संबन्धः । केचित् 'ईरयन् श्लेष्मपित्ते तु उदानो व्यानसंगतः । ऊर्ध्वमागच्छति रसो विरुद्धाहारसेविनाम्' इति पठन्ति; तं च कार्तिककुण्डो नेच्छति, यतो 'दोषो वक्त्रं प्रधावित' इत्यनेन गतार्थं, तथा रससहितस्य च दोषस्योर्ध्वगमनं रसदोषजत्वेन छर्द्याः पठितत्वेन सिद्धम् ॥ ७ ॥

प्रसेको[3] हृदयोत्क्लेशो भक्तस्यानभिनन्दनम् ।
पूर्वरूपं मतं छर्द्या

केचित् पूर्वरूपं न पठन्ति, युक्तं च पठितुं; समानतन्त्रपठितत्वात् ॥—

यथास्वं च विभावयेत् ॥ ८ ॥

पूर्वरूपानन्तरं प्रव्यक्तरूपता भवति, तल्लक्षणान्याह—यथास्वं च विभावयेदिति । पूर्वरूपं यथात्मीयं प्रव्यक्तं रूपावस्थायां विभावयेत् विशेषेण प्रसेकस्य कषायाम्लमधुररसत्वेन भावयेत् जानीयादित्यर्थः ॥ ८ ॥

प्रच्छर्दयेत्[4] फेनिलमल्पमल्पं
शूलार्दितोऽभ्यर्दितपार्श्वपृष्ठः ।
श्रान्तः सघोषं बहुशः कषायं
जीर्णेऽधिकं साऽनिलजा वमिस्तु ॥ ९ ॥

वातजच्छर्दिलक्षणमाह—प्रच्छर्दयेदित्यादि । अभ्यर्दितपार्श्वपृष्ठः पीडितपार्श्वपृष्ठः । सघोषं सशब्दम् । एवम्भूतः पुरुषो यत्र रोगे एवंविधं छर्दयेत् जीर्णे चाधिकं छर्दयेत् सा वमिरनिलजा ज्ञेयेति संबन्धः । केचिदमुमन्यथा पठन्ति, स चाभावान्न दर्शितः ॥ ९ ॥

योऽम्लं भृशं वा कटुतिक्तवक्त्रः
पीतं सरक्तं हरितं वमेद्वा ।
सदाहचोषज्वरवक्त्रशोषो
मूर्च्छान्वितः[1] पित्तनिमित्तजा सा ॥ १० ॥

पित्तजच्छर्दिलक्षणमाह—योऽम्लमित्यादि । भृशमम्लं कटुकं वा यो वमेत् । सदाहशब्दश्चोषज्वराभ्यां संबध्यते; चोष आचूष्यत इव वेदना ॥ १० ॥

यो हृष्टरोमा मधुरं प्रभूतं
शुक्लं हिमं सान्द्रकफानुविद्धम् ।
अभक्तरुग्गौरवसादयुक्तो[2]
वमेद्वमी सा कफकोपजा स्यात् ॥ ११ ॥

कफजवमिलक्षणमाह—यो हृष्टरोमेत्यादि । हृष्टरोमा उद्धर्षितरोमाञ्चः । प्रभूतं बहु । सान्द्रं घनं । कफानुविद्धं कफमिश्रम् । अभक्तरुक् अन्नारुचिः । सादोऽङ्गग्लानिः ॥ ११ ॥

सर्वाणि रूपाणि भवन्ति यस्यां
सा सर्वदोषप्रभवा मता तु ।

सान्निपातिकवमिलक्षणमाह—सर्वाणीत्यादि । सर्वाणि रूपाणि वातजादिसमस्तच्छर्दिरूपाणि । यद्यपि तन्त्रान्तरे सन्निपाताख्यच्छर्दिलक्षणमुक्तं[3], तथाऽप्यत्र क्षीणस्येत्यादिना वक्ष्यमाणेन सा द्वितीया सूचिता, अतश्च नोक्ता ॥—

बीभत्सजा दौर्हृदजाऽऽमजा च
सात्म्यप्रकोपात्[4] कृमिजा च या हि[5] ॥
सा पञ्चमी तां[6] च विभावयेत्तु
दोषोच्छ्रयेणैव यथोक्तमादौ ॥ १२ ॥

इदानीं कारणभेदादनेकप्रकारामपि पञ्चमीमेकामेव निर्दिशन्नाह—बीभत्सजेत्यादि । बीभत्सजा द्विष्टाशुचिपूयमेध्यादिकाद्घृणाकराज्जाता । दौर्हृदजा दौर्हृदविमाननाज्जाता, अन्ये दौर्हृदजां गर्भनिमित्तामाहुः । आमजा विसूच्यादिजाता । सात्म्यप्रकोपात् अकस्मात् सात्म्यत्यागात् । कृमिभिः कृता कृमिजा । बीभत्सजादि यावत्सा पञ्चमी, तां च दोषोच्छ्रयेणैव विभावयेत् । अन्ये तु व्याख्यानयन्ति—या कृमिजा सा पञ्चमी, तां च दोषोच्छ्रयेणैव विभावयेदिति ॥ १२ ॥

शूलहृल्लासबहुला[7] कृमिजा च विशेषतः ।
कृमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥ १३ ॥

---

१ 'वक्त्रं प्रधावितः' इति पा० । २ 'विरुद्धाहारसेविनाम्' इति पा० । ३ 'हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः । द्वेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम्' इति पा० । ४ 'यश्छर्दयेत्' इति पा० ।

१ 'मूर्च्छान्विता' इति पा० । २ '°गौरवसादयुक्तं' इति पा० । ३ 'सान्निपातिक्याश्छर्देर्लिङ्गमुक्तं' इति पा० । ४ 'याऽसात्म्यतो वा' इति पा० । ५ 'या स्यात्' इति पा० । ६ 'ताश्च' इति पा० । ७ 'शूलहृल्लासभूयिष्ठा' इति पा० ।

इदानीं कृमिजाया विशिष्टलिङ्गमाह—शूलहृल्लासबहुलेत्यादि । हृल्लासस्थुत्करणम् ॥ १३ ॥

क्षीणस्योपद्रवैर्युक्तां सासृक्पूयां सचन्द्रिकाम् ।
छर्दिं प्रसक्तां कुशलो नारभेत चिकित्सितुम् ॥ १४॥

इदानीं सर्वासामेव च वमीनामवस्थयामसाध्यत्वमाह—क्षीणस्येत्यादि । नारभेतेति पदं क्षीणस्येत्यादिभिः प्रत्येकं योजनीयम् । तेन क्षीणस्य छर्दिं चिकित्सितुं नारभेत, तथा उपद्रवैर्युक्तां नारभेत, तथा सासृक्पूयां नारभेतेत्यादि द्रष्टव्यम् । प्रसक्तां निरन्तरप्रवृत्ताम् ॥ १४ ॥

आमाशयोत्क्लेशभवा हि सर्वा-
स्तस्माद्धितं लङ्घनमेव तासु ॥ १५ ॥

इदानीं सामान्येन सर्वासामपि वमीनां चिकित्सामाह—आमाशयोत्क्लेशभवा इत्यादि । आमाशयोत्क्लेशभवा इति आमाशयमुत्क्लिश्य दोषैर्जन्यन्त इति तात्पर्यार्थः । हितं लङ्घनं 'घलिन' इति वाक्यशेषः । तासु छर्दिषु ॥ १५ ॥

वमीषु बहुदोषासु छर्दनं हितमुच्यते ।
विरेचनं वा कुर्वीत यथादोषोच्छ्रयं भिषक् ॥ १६ ॥

वमीषु बहुदोषास्वित्यादि । बहुदोषास्विति प्रबलकफासु, अन्यथा सान्निपातिक्यामेव वमनं प्राप्नुयात्; ततश्च बहुवचनं घटते । यथादोषोच्छ्रयमिति दोषोच्छ्रयं दोषाधिक्यमवेक्ष्य १६

संसर्गश्चानुपूर्वेण यथास्वं भेषजायुतः ।

शोधनानन्तरं किं कर्तव्यमित्याह—संसर्गश्चानुपूर्वेणेत्यादि । संसर्गोऽन्नसंसर्गः पेयादिः, तर्पणादिकमन्ये, अनुपूर्वेण 'पेयां विलेपीमकृतं कृतं च यूषं' इत्यादिक्रमेण । यथास्वं भेषजायुत इति वातादेर्यदात्मीयं प्रत्यनीकमौषधं तेन आयुत ईषद्युत इत्यर्थः ॥—

लघूनि परिशुष्काणि सात्म्यान्यन्नानि चाचरेत् १७

अन्नसंसर्जनानन्तरं किं कर्तव्यमित्याह—लघूनीत्यादि । लघूनि मात्रास्वभावाभ्यां लघूनि । परिशुष्काणि शष्कुल्यादीनि । सात्म्यानि ऋतुव्याधिविपरीतानि । केचिल्लघूनीत्यादिकं वमनार्हसंशमनमिच्छन्ति, वमनावशिष्टदोषशेषस्य शमनसाध्यत्वात् ॥ १७ ॥

यथास्वं च कषायाणि ज्वरघ्नानि प्रयोजयेत् ।

इदानीं वमीषु सामान्यं चिकित्सितमतिदेशेनाह—यथास्वमित्यादि । यथास्वं यथात्मीयम् । एतेन वातादिज्वरहराणि कषायाणि वातादिजासु छर्दिषु योजयेदित्यर्थः ॥—

हन्यात् क्षीरघृतं पीतं छर्दिं पवनसंभवाम् ॥ १८ ॥

१ 'ताभ्यः' इति पा० ।
२ 'ताभ्यः छर्दिभ्यः' इति पा० ।
३ 'दोषाधिक्येन' इति पा० ।
४ 'संसर्गश्चानुपूर्वेण यथास्वं भेषजायुतान्' इति पा० ।

ससैन्धवं पिबेत् सर्पिर्वातच्छर्दिनिवारणम् ।
मुद्गामलकयूषो वा ससर्पिष्कः ससैन्धवः ।
यवागूं मधुमिश्रां वा पञ्चमूलीकृतां पिबेत् ॥ १९ ॥
पिबेद्वा व्यक्तसिन्धूत्थं फलाम्लं वैष्किरं रसम् ।
सुखोष्णलवणं चात्र हितं स्नेहविरेचनम् ॥ २० ॥

इदानीं वातजवमीचिकित्सितमाह—हन्यादित्यादि । क्षीरघृतमिति क्षीरमथनोद्धृतं घृतं क्षीरयुक्तं वा घृतं क्षीरघृतं; क्षीरोदकमिति वा पाठः । सलवणं सर्पिराह—ससैन्धवमित्यादि । सर्पिरपक्वमेव । उक्तं च वाग्भटेन—"हन्ति मारुतजां छर्दिं सर्पिः पीतं ससैन्धवम्" इति । पञ्चमूलीकृतां शालपर्ण्यादिकेन बिल्वादिकेन वा कृताम् । यूषमाह—मुद्गामलकयूषो वेत्यादि । सर्पिरिह यूषसंतलनार्थम् । ससैन्धवः सैन्धवयुक्तः । यवागूमित्यादि । पञ्चमूली महतीति चन्द्रिकाकारः, स्वल्पेति चक्रपाणिः । रसमाह—पिबेद्वा व्यक्तसिन्धूत्थमित्यादि । किम्भूतं? व्यक्तसिन्धूत्थं प्रकटलवणम् । वैष्किरं लावादिमांसरसम् । तथा फलाम्लं फलेन दाडिममातुलुङ्गादिनाऽम्लमम्लतां प्राप्तम् । विरेचनमाह—सुखोष्णलवणं चात्रेति । अत्र वातच्छर्द्यां, स्नेहविरेचनं स्नेहेन एरण्डतैलादिना विरेचनं स्नेहविरेचनम् । सुखोष्णलवणं सुखं सुखकरमुष्णं लवणं यस्मिन् तत् । उक्तं च वाग्भटेन,—"कोष्णं सलवणं चात्र हितं स्नेहविरेचनम्"—इति । अथवा 'सुखोष्णं लवणं चात्र' इति पाठः ॥ १८-२० ॥

पित्तोपशमनीयानि पाक्यानि शिशिराणि च ।
कषायाण्युपयुक्तानि घ्नन्ति पित्तकृतां वमीम् ॥२१॥
शोधनं मधुरैश्चात्र द्राक्षारससमायुतैः ।
बलवत्यां प्रशंसन्ति सर्पिस्तैल्वकमेव च ॥ २२ ॥

इदानीं पित्तजवमीचिकित्सितमाह—पित्तोपशमनीयानीत्यादि । पित्तोपशमनीयानि पित्तज्वरशमनानि, 'यथास्वं च कषायाणि ज्वरघ्नानि प्रयोजयेत्' इत्युक्तत्वात् । पाक्यानि शृतानि । शिशिराणि शीतकषायाणि । शोधनं वमनं विरेचनं वा; केचिच्छोधनशब्देन विरेचनमेव कथयन्ति, पित्तजायां तस्य प्रशस्तत्वात् । अत्र पित्तच्छर्द्याम् । मधुरैः शोधनद्रव्यैर्द्राक्षारससमायुतैः शोधनं विरेकवमनरूपं प्रशंसन्ति । बलवत्यां तैल्वकं सर्पिः वातव्याध्युक्तं, रोध्रसंस्कृतं वा ॥ २१ ॥ २२ ॥

आरग्वधादिनिर्यूहं दशाङ्गयोगमेव वा ।
पाययेताथ सक्षौद्रं कफजायां चिकित्सकः ॥ २३ ॥

कफच्छर्दिचिकित्सितमाह—आरग्वधादिनिर्यूहमित्यादि ।

१ 'अस्याग्रे हस्तलिखितपुस्तकेऽयं पाठ उपलभ्यते, त्रुटितं हि टिप्पणं संपूर्यते तच्च मयाऽणुबुद्धिना । क्षमन्तु सन्तो मम बुद्धिसागरा यतो भवन्तो गुणग्राहका भुवि' । २ 'पानानि' इति पा० । ३ 'पित्तोपशमनीयानि पित्तशान्तिकराणि' पानानि पित्तकृतां वमीं घ्नन्ति । किंभूतानि? शिशिराणि शीतलानि, तथा कषायाण्युपयुक्तानि कषायैर्द्रव्यैरुपयुक्तानि' इति पा० । ४ 'आरावधादिभिर्यूषं' इति पा० ।

निर्यूहं कषायम् । दशाङ्गयोगमिति "नागरं धान्यकं भार्गीमभयां सुरदारु च । वचां पर्पटकं मुस्तं भूतीकमथ कट्फलम् ॥ विनिःक्वाथ्य पिबेत्" इति केचिद्दशाङ्गशब्दमूलमाहुः; तं च कार्तिककुण्डो नेच्छति, छर्दिहरत्वेनानभ्युपगमात् । कार्तिकस्तु दशाङ्गशब्देन 'कटुका चित्रकं' इत्यादिकं कफज्वरोक्तमाह । यद्यपि कटुकाचित्रकमित्यादिकं 'यथास्वं च कषायाणि ज्वरघ्नानि प्रजोजयेत्' इत्यनेनैव प्राप्तं, तथाऽपि पुनस्तदुपादानं मरिचरहितस्योपयोगार्थम् । अन्ये दशाङ्गशब्देनातिसारोक्तं शालिपर्ण्यादिकमाहुः; तमपि दशमूलं निरामहेतुनैव नेच्छति कार्तिककुण्डः ॥ २३ ॥

कृतं गुडूच्या विधिवत् कषायं हिमसंज्ञितम् ।
तिसृष्वपि भवेत् पथ्यं माक्षिकेण समन्वितम् ॥२४॥

सन्निपातजायाश्चिकित्सितमाह—कृतमित्यादि । विधिवद्यथोक्तशीतकषायविधिना । हिमसंज्ञितं शीतकषायाख्यम् । तिसृषु वातपित्तकफजासु, अपिशब्दात् सन्निपातजास्वपि । सान्निपातिकी छर्दिर्बाहुल्येनासाध्या, अतस्तस्याश्चिकित्सितं नोक्तम् । शीतकषायविधानं च भेषजपलं क्षुण्णमुष्णाम्बुचतुष्पलाप्लुतं निशि संस्थितं ग्राह्यमिति । तन्त्रान्तरे यथा—"द्रव्यादापोत्थितात्तोये प्रतप्ते निशि संस्थितात् । कषायो योऽभिनिर्याति स शीतः समुदाहृतः ॥ षड्भिः पलैश्चतुर्भिर्वा सलिलाच्छीतफाण्टयोः । आप्लुतं भेषजपलं रसाख्यस्य पलद्वयम्"—इति । प्रचारस्तु भिषजां भेषजपल एव जलपलद्वयेनेति । ननु गुडूची शाकवर्गे कफपित्तमात्रशमनी पठिता, तत्कथमस्याः शीतकषायो वातादित्रयजासु शस्तत्वेनोपदिश्यते? उच्यते—मधुयोगमहिम्ना दोषत्रयेऽपि हितत्वमस्याः । किंवा शाकवर्गे पत्रमस्याः कफपित्तहरमुक्तं, लता तु वातं शमयति; तदुक्तं चरके—"अमृता संग्राहकदीपनीयवातहरश्लेष्मशोणितविबन्धप्रशमनानां"—इति ॥ २४ ॥

बीभत्सजां हृद्यतमैर्दौहृदीं काङ्क्षितैः फलैः ।
लङ्घनैर्वमनैश्चामां सात्म्यैः सात्म्यप्रकोपजाम् ॥२५॥
कृमिहृद्रोगवच्चापि कृमिजां साधयेद्वमीम् ।

बीभत्सजादिष्वौषधमाह—बीभत्सजामित्यादि । दौहृदीं दौहृदविमाननजातां वमिं; अन्ये गर्भजामाहुः । आमामामजाम् । वमनं तावत् सर्वास्वेवोपदिष्टम्, आमजायां पुनर्वमनकथनं बलं विनाऽप्यत्र वमनं कार्यमिति प्रतिपादनार्थम्, अन्यथा ह्यामाद्यापत्तिः । सात्म्यप्रकोपजां सात्म्यपरित्यागजाम् ॥ २५ ॥—

वितरेच्च यथादोषं शस्तं विधिमनन्तरम् ॥ २६ ॥

यथादोषमतिदेशेन चिकित्सामाह—वितरेच्च यथादोषमित्यादि । यथादोषमिति दोषानतिक्रमेण, यथादोषप्रकृत्यापादनाय स्वं स्वं चिकित्सितं कार्यं, तदनन्तरं दोषचिकित्सितंः अत एवौषधमत्र न निर्दिष्टम् । अन्ये तु सर्वास्वेव छर्दिषु पुनरावृत्तिनिवारणार्थमेतत् कर्तव्यमित्याहुः । 'शस्तं' इत्यत्र 'व्यस्तं' इत्यन्ये पठन्ति ॥ २६ ॥

दधित्थरससंसक्तां पिप्पलीं माक्षिकान्विताम् ।
मुहुर्मुहुर्नरो लीढ्वा छर्दिभ्यः प्रवि(ति)मुच्यते ॥२७॥
समाक्षिका मधुरसा पीता वा तण्डुलाम्बुना ।
तर्पणं वा मधुयुतं तिसृणामपि भेषजम् ॥ २८ ॥
स्वयङ्गुप्तां सयष्ट्याह्वां तण्डुलाम्बुमधुद्रवाम् ।
पिबेद्यवागूमथवा सिद्धां पत्रैः करञ्जजैः ॥ २९ ॥
युक्ताम्ललवणाः पिष्टाः कुस्तुम्बुर्योऽथवा हिताः ।
तण्डुलाम्बुयुतं खादेत् कपित्थं ऽयूषणेन वा ॥ ३० ॥
सिताचन्दनमध्वाक्तं लिह्याद्वा मक्षिकाशकृत् ।
पिबेत् पयोऽग्नितप्तं च निर्वाप्य गृहगोधिकाम्[१] ॥३१॥
सर्पिःक्षौद्रयुतान् वाऽपि लाजशक्तून् पिबेत्तथा ।
सर्पिःक्षौद्रसितोपेतां मागधीं वा लिहेत्तथा ॥ ३२ ॥
धात्रीरसे चन्दनं वा घृष्टं मुद्गदलाम्बुना ।
कोलामलकमज्जानं लिह्याद्वा त्रिसुगन्धिकम् ॥३३॥
सक्षौद्रां शालिलाजानां यवागूं वा पिबेन्नरः ।
प्रेयाण्युपहरेच्चापि मनोघ्राणसुखानि च ॥ ३४ ॥
जाङ्गलानि च मांसानि शुभानि पानकानि[२] च ।
भोजनानि विचित्राणि कुर्यात्सर्वास्वतन्द्रितः ॥३५॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे छर्दिप्रतिषेधो नाम (एकादशोऽध्यायः, आदितः) एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

सामान्येन छर्दिचिकित्सामाह—दधित्थरससंयुक्तामित्यादि । दधित्थः कपित्थः, माक्षिकान्वितां मधुयुक्तां; दधित्थरसं पिप्पलीमधुकयुक्तं पीत्वा छर्दिं जयतीति पिण्डार्थः । समाक्षिकेत्यादि । मधुरसा मूर्वा । तण्डुलाम्बुना तण्डुलधावनोदकेन । तर्पणं लाजसक्तुकृतं, लाजानां छर्दिहरत्वात् । तिसृणामिति तिसृणां वातादिजानां छर्दीनां, एतेन त्रिदोषजच्छर्दिहरत्वमस्योक्तं भवति; यतो यद्वातादिजासु पृथक् तिसृषु भेषजं तदेव मिलितवातादित्रयजाया अपि प्रकृतिसमवेताया हितम । तथा चोक्तम्,—"यैषा पृथक्त्वेन मया क्रियोक्ता तां सन्निपातेषु च तीक्ष्णबुद्ध्या । रोगेषु दोषाग्निबलाद्यपेक्षया कुर्याद्भिषक् शास्त्रविधौ विचक्षणः"—इति । स्वयंगुप्तामित्यादि । स्वयंगुप्ता कपिकच्छूः । तण्डुलाम्बुमधुद्रवामिति तण्डुलाम्बुमधूनि द्रवे यस्यां सा तामित्यर्थः; मधु कर्षप्रमाणं, तण्डुलाम्बु चतुर्गुणम् । अथवा करञ्जजैः पत्रैः सह सिद्धां यवागूं पिबेत्,

१ 'सात्म्यैश्चासात्म्यकोपजाम्' इति पा० ।

१ 'गृहगोपिकाम्' इति पा० । २ 'स्वादुवत्पानकानि' इति पा० ।

श्लेष्मभूयिष्ठायामित्युपस्कारः । युक्ताम्ललवणा इत्यादि । युक्ताम्ललवणा उचितप्रमाणाम्ललवणयुक्ताः । पिष्टा दृषदि पिष्टाः । कुस्तुम्बुर्यो धान्यकाः । केचिद्युक्ताम्ललवणा इति पदं यवागवाऽपि संबध्नन्ति । तण्डुलाम्बिल्वादि । त्र्यूषणं त्रिकटुकं; योगद्वयमेतत्; अथवा कपित्थं तण्डुलाम्बुयुतं खादेत्, त्र्यूषणेन वा युतं खादेत् । सिता शर्करा । चन्दनं रक्तचन्दनम् । सितादियुक्तं मक्षिकापुरीषं वा लिह्यात् । पिबेदित्यादि । अग्नितप्तां गृहगोधिकां पयसि निर्वाप्य तत् पयः पिबेदित्यर्थः । पयो जलम् । अत्र गृहगोधि(पि)काशब्देन वरसठीकृतं मृन्मयं गृहमुच्यते, उपचारात् । अथवा सर्पिःक्षौद्रयुतान् लाजशक्तून् पिबेत् । धात्रीरसे चन्दनं वा घृष्टं मुद्गदलाम्बुना पिबेत् । कोलादिमज्जानं मधुना लिह्यात् । त्रिसुगन्धिकं त्रिजातकं वा मधुना लिह्यात् । अथवा शालिलाजानां यवागूं पिबेत् । प्रेयाण्युपाहरेदित्यादि । मनोज्ञानि सुखानि चेति चेतोनासिकाह्लादजनकानि प्रेयाणि सुगन्धद्रव्याणि, तथा सुखानि आयत्यां सुखजनकानि । तथा जाङ्गलानि मांसानि शूल्यानि शूलप्रोतानि पक्वानि तथा शुभानि पानकानि च सुखजनकानि उपाहरेत् । भोजनानि विचित्राणि नानाप्रकाराणि कुर्यात् । अतन्द्रितोऽनलसः ॥ २७-३५ ॥

इति श्रीडल्हणाचार्यविरचितायां सुश्रुतव्याख्यायां निबन्धसंग्रहाख्यायामुत्तरतन्त्रे छर्दिप्रतिषेधो नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

पञ्चाशत्तमोऽध्यायः ।

अथातो हिक्काप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

छर्दिप्रतिषेधानन्तरं तुल्यसंख्यत्वात् कतिपयनिदानसाम्याच्च हिक्काप्रतिषेधं व्याख्यातुं प्रतिजानीते,—अथात इत्यादि ॥ १ ॥ २ ॥

विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः ।
शीतपानासनस्थानरजोधूमानिलानलैः ॥ ३ ॥
व्यायामकर्मभाराध्ववेगाघातापतर्पणैः ।
आमदोषाभिघातस्त्रीक्षयदोषप्रपीडनैः ॥ ४ ॥
विषमाशनाध्यनशनैस्तथा समशनैरपि ।
हिक्का श्वासश्च कासश्च नृणां समुपजायते ॥ ५ ॥

हिक्काया निदानमाह—विदाहिगुरुविष्टम्भीत्यादि । विदाह्यादिभिर्हिक्कादयस्त्रयो जायन्ते इत्यन्वयः । विदाहीनि मरीचसर्षपमद्यप्रभृतीनि । गुरूणि गुणतः पाकतश्च । विष्टम्भीनि करीरप्रभृतीनि । रूक्षाणि चणकादीनि । अभिष्यन्दीनि अभिमुखेन स्यन्दितुं शीलं येषां तानि, अभिष्यन्दनशीलानि मत्स्यमाषफाणितादीनि । शीतशब्दः पानादिभिस्त्रिभिः संबध्यते । रजो धूलिः, सा च धूमवन्नासाप्रवेशात् कारणम् । व्यायामकर्म धनुराकर्षणादिव्यापारः । वेगाघातो वेगधारणम् । अपतर्पणमनशनादि । प्रपीडनशब्द आमदोषादिभिः प्रत्येकं संबध्यते । आमदोषः "ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् । दुष्टमामाशयगतं रसमामं प्रचक्षते"—इत्युक्तलक्षणः । कासश्वासोक्तोऽपि एकनिदानप्रतिपादनार्थं पुनरभिहित इति ॥ ३-५ ॥

मुहुर्मुहुर्वायुरुदेति सस्वनो
यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन् ।
स घोषवानाशु हिनस्त्यसून् यत-
स्ततस्तु हिक्केति भिषग्भिरुच्यते ॥ ६ ॥

हिक्कानां स्वरूपं निरुक्तिं चाह—मुहुरित्यादि । वायुरत्र सोदानः प्राण इत्याहुः । मुहुर्मुहुरुदेति ऊर्ध्वमेति । सस्वनः शब्दवान् । ऊर्ध्वगतिमेव विशिनष्टि—यकृदित्यादि । अत्र प्लिहो ह्रस्वेकारत्वं छन्दोऽनुरोधात् । मुखादिति ल्यब्लोपे पञ्चमी, तेन यकृत्प्लीहान्त्राणि मुखमानीय निःक्षिपन् निःसारयन्नित्यर्थः । मुखादिवेत्यादि मुखशब्देन प्राणोदकान्नवाहीनि स्रोतांसि लभ्यन्ते । उक्तं च,—'प्राणोदकान्नवाहीनि स्रोतांसि विकृतोऽनिलः' इति । स घोषवानित्यादिना हिक्कानिरुक्तिः । यतः स वायुः घोषवान् सन् आशु शीघ्रमसून् प्राणान् हिनस्ति ततो बुधैः 'हिक्का' इत्युच्यते । सस्वन इत्यनेन गतत्वाद् घोषवानित्यभिधानं निरुक्तिप्रदर्शनार्थम् । हिक्केति निरुक्तौ पृषोदरादित्वाद्रूपसिद्धिः । हिग् इति कृत्वा कायति शब्दायते इति 'हिक्का' इति शाब्दिकाः ॥ ६ ॥

अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा ।
वायुः कफेनानुगतः पञ्च हिक्काः करोति हि ॥ ७ ॥

तासां भेदं संप्राप्तिं चाह—अन्नजामित्यादि । वायुः कफेनानुगतः सन् अन्नजादिभेदेन पञ्च हिक्काः करोति । यस्त्वैव चरके व्यपेतेति नाम्ना पठ्यते, अन्नपाने व्यपेते परिणते जायत इत्यतो हेतोः । 'कफेनानुगतः प्राणः' इति वा पाठः । प्राणोऽत्र वायुरिति ॥ ७ ॥

मुखं कषायमरतिर्गौरवं कण्ठवक्षसोः ।
पूर्वरूपाणि हिक्कानामाटोपो जठरस्य च ॥ ८ ॥

हिक्कानां पूर्वरूपमाह—मुखमित्यादि । मुखं कषायं वातात्, नतु कफान्माधुर्यं, व्याधिप्रभावात् । अरतिः न कुत्रचिदवस्थितिश्चेतसः । केचित् पूर्वरूपं न पठन्ति, कफवातोद्भवस्य गौरवादेरनुमानग्राह्यत्वात् ॥ ८ ॥

त्वरमाणस्य चाहारं भुञ्जानस्याथवा घनम् ।
वायुरन्नैरवस्तीर्णः कटुकैरर्दितो भृशम् ॥ ९ ॥
हिक्कयत्यूर्ध्वगो भूत्वा तां विद्यादन्नजां भिषक् ।

१ "क्षयरोगप्रपीडनैः" इति पा० ।

१ 'पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः' इति पा० ।

अन्नजालक्षणमाह—त्वरमाणस्येत्यादि । अन्नजादीनां साध्यत्वेन प्राशस्त्यात् पूर्वमभिधानम् । आहारं त्वरमाणस्य अथवा घनं गुरुमन्नं भुञ्जानस्य अन्नैरवस्तीर्णे आच्छादितो वायुः तथा कटुकैर्भृशमर्दितो वायुरूर्ध्वगो भूत्वा हिक्कयति हिक्कां करोति, भिषक् तामन्नाजां विद्याजनीयात्; यद्यप्यन्नजायां वायुः कारणं, तथाऽप्यन्नेन तत्पीडनात्तद्व्यपदेशः ॥ ९ ॥—

चिरेण यमलैर्वेगैर्या हिक्का संप्रवर्तते ॥ १० ॥
कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्दिशेत् ।

यमलालक्षणमाह—चिरेणेत्यादि । या हिक्का चिरेण यमलैर्वेगैः संप्रवर्तते सा यमला, यमलैर्वेगैर्युगपद्वारद्वयं हिक्कते इत्यर्थः । कम्पयन्ती शिरोग्रीवमित्युपलक्षणं; तेन चरकोक्ताः प्रलापवमितृष्णावैचित्त्यजृम्भाविप्लुताक्षत्वमुखशोषाश्च बोद्धव्या इति गयदासः । इयमसाध्याऽपि बलवतः स्थिरधात्विन्द्रियस्य सत्त्ववतश्च सिद्ध्यति ॥ १० ॥—

विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्तते ॥ ११ ॥
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधाविता ।

क्षुद्रालक्षणमाह—विकृष्टकालैरित्यादि । विकृष्टकालैरिति चिरेण वेगैर्जायते । किंभूता ? जत्रुमूलात् प्रधाविता आगता, सा क्षुद्रिकाख्या । जत्रुः कण्ठोरसोः सन्धिरिति जेजटः; जत्रु ग्रीवामूलं, तद्ग्रहणेन हृदयक्लोमकण्ठानामपि ग्रहणमिति गयदासः ॥ ११ ॥—

नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी ॥१२॥
शुष्कौष्ठकण्ठजिह्वास्यश्वासपार्श्वरुजाकरी ।
अनेकोपद्रवयुता गम्भीरा नाम सा स्मृता ॥ १३ ॥

गम्भीरालक्षणमाह—नाभिप्रवृत्तेत्यादि । या हिक्का नाभिप्रवृत्ता नाभितः प्रवृत्तिर्यस्याः सा, अत एव अस्या गम्भीरात्वं; घोरा कष्टसाध्या । शुष्केत्यादि शुष्कशब्द ओष्ठादिभिश्चतुर्भिः संबन्धनीयः । तथा अनेकोपद्रववती अनेकोपद्रवैर्ज्वरश्वासतृष्णादिभिर्युक्ता, सा गम्भीरा नाम स्मृता; इयमसाध्या ॥१२॥१३॥

मर्माण्यापीडयन्तीव सततं या प्रवर्तते ।
देहमायम्य वेगेन घोषयत्यतितृष्यतः[३] ॥
महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी ॥ १४ ॥

महाहिक्कालक्षणमाह—मर्माणीत्यादि । मर्माणि बस्तिहृदयशिरांसि; अन्ये नाभिहृदयस्तनमूलान्याहुः । आयम्य विस्तार्य, आयस्येति पाठे स एवार्थः । घोषवती सशब्दा । इयमप्यसाध्या ॥ १४ ॥

आयम्यते हिक्कतोऽङ्गानि यस्य
दृष्टिश्चोर्ध्वं ताम्यते यस्य गाढम् ।
क्षीणोऽन्नद्विट् कासते यश्च हिक्की
तौ द्वावन्त्यौ वर्जयेद्धिक्कमानौ ॥ १५ ॥

इदानीं साध्यानामपि हिक्कानामवस्थाविशेषेऽसाध्यत्वमाह—आयम्यत इत्यादि । यस्य पुंसो हिक्कतो हिक्कां कुर्वतो देह आयम्यते दीर्घीक्रियत इव; तथैव दृष्टिश्चोर्ध्वं 'भवति' इति शेषः, दृष्टिशब्देनात्र दृष्ट्यधिष्ठानं विवक्षितं न तु दर्शनेन्द्रियशक्तिः । गाढमतिशयेन, ताम्यते आकुञ्चते देह इति संबन्ध इति जेज्जटगयदासौ; 'ताम्यते यश्च' इति पाठान्तरं, ताम्यते मुह्यति हिक्की । क्षीणस्तथा अन्नद्विट् तथा क्षौति क्षुतं करोति । तौ द्वाविति आयम्यत इत्यादिना नित्यमित्यन्तेन एकावस्थो हिक्की, क्षीण इत्यादिना अतिमात्रान्तेनापरः । साध्यानामपि मध्ये एवंविधौ वर्जयेदित्यर्थः; गम्भीरामहत्योः स्वभावादेवासाध्यत्वात्तद्युक्तौ हिक्किनौ, अन्त्यौ अन्तपठितौ, असाध्यौ । पाठान्तराणि व्याख्याविशेषाश्च विस्तरभयान्न लिखिताः ॥ १५ ॥

प्राणायामोद्वेजनत्रासनानि
सूचीतोदैः संभ्रमश्चात्र शस्तः ।

इदानीं हिक्कानां चिकित्सितमाह—प्राणायामोद्वेजनेत्यादि । अत्र हिक्कासु, प्राणायामादि शस्तमिति संबन्धः । प्राणायामो वायोर्निरोधः । यद्यपि रेचकपूरककुम्भकभेदात् प्राणायामस्त्रिविधः, तथाऽप्यूर्ध्वगतिनिरोधात् कुम्भक एवात्र । त्रासनमल्पसत्त्वस्य भयोत्पादकैर्वाक्यैः । उद्वेजनं परुषवचनैः । सूचीतोदैः संभ्रमः सूचीव्यथाभिर्मनस आकुलीकरणम् । एतच्च प्रायः क्षुद्रायामन्नजायां च योजनीयम् ॥—

यष्ट्याह्वं वा माक्षिकेणावपीडे
पिप्पल्यो वा शर्कराचूर्णयुक्ताः ॥ १६ ॥

नस्यमाह—यष्ट्याह्वं वेत्यादि । वाशब्दोऽत्र भिन्नक्रमे । यष्ट्याह्वं यष्टीमधु, माक्षिकेण मधुना, अवपीडे शस्तं; पिप्पल्यो वा शर्कराचूर्णयुक्ता अवपीडे शस्ता इति योजनीयम् ॥ १६ ॥

सर्पिः कोष्णं क्षीरमिक्षो रसो वा
नातिक्षीणे छर्दनं शान्तिहेतोः ।

सर्पिरित्यादि । सर्पिःप्रभृतिकं पानं हितम् । छर्दनं वमनम् । 'शान्तिहेतोः' इत्यत्रान्ये 'स्रंसनं च' इति पठित्वा विरेचनं चेति व्याख्यानयन्ति; तं च नेच्छन्ति श्रीजेज्जटाचार्याः, समतन्त्रेष्वपि हिक्कासु विरेचनस्यानुक्तत्वात् ॥—

नारीपयःपिष्टमशुक्लचन्दनं
घृतं सुखोष्णं च ससैन्धवं तथा ॥ १७ ॥
चूर्णीकृतं सैन्धवमम्भसाऽथवा
निहन्ति हिक्कां च हितं च नस्यतः ।

नस्यत्रयमाह—नारीपय इत्यादि । नारीपयःपिष्टमशुक्लचन्दनं रक्तचन्दनं नस्यतो नस्यात् हितमित्येको योगः । अशुक्लचन्दनं सुखोष्णं घृतं चेति द्वितीयः । सुखोष्णमीषदुष्णम् । अथवाऽम्भसा चूर्णीकृतं सैन्धवं चेति तृतीयः । एतानि त्रीणि नस्यानि दोषाद्यपेक्षया योज्यानि ॥ १७ ॥—

१ 'घनं सान्द्रं' इति पा० । २ 'यमलैर्वेगैर्भूयो वेगद्वयं करोतीत्यर्थः' इति पा० । ३ 'तृष्णार्तस्य महास्वना' इति पा० । ४ 'क्षौति यश्चातिमात्रं' इति पा० ।

१ 'स्रंसनं च' इति पा० ।

युञ्ज्याद्धूमं शालनिर्यासजातं
नैपालं वा गोविषाणोद्भवं वा ॥ १८ ॥
सर्पिःस्निग्धैश्चर्मबालैः कृतं वा
हिक्कास्थाने स्वेदनं चापि कार्यम् ।

नस्यानन्तरं लीनदोषनिर्हरणार्थं धूमानाह—युञ्ज्यादित्यादि । शालनिर्यासः सर्जरसः । नैपालं मनःशिलाजातं धूमम् । गोविषाणोद्भवं गोशृङ्गोद्भवधूमं, चर्मबालैर्गोरेव । स्वेदनमाह–हिक्केत्यादि । हिक्कास्थाने कण्ठस्तनान्तरे । केचिच्चर्मबालैः स्वेदनमिच्छन्ति ॥ १८ ॥—

क्षौद्रोपेतं गैरिकं काञ्चनाह्वं
लिह्याद्भस्म ग्राम्यसत्त्वास्थिजं वा ॥ १९ ॥
तद्वच्छ्वाविन्मेषगोशल्य(ल्ल)कानां
रोमाण्यन्तर्धूमदग्धानि चात्र ।
मध्वाज्याक्तं बर्हिपत्रप्रसूत-
मेवं भस्मौदुम्बरं तैल्वकं वा ॥ २० ॥
स्वर्जिक्षारं बीजपूराद्रसेन
क्षौद्रोपेतं हन्ति लीढ्वाऽऽशु हिक्काम् ।

लेहानाह—क्षौद्रोपेतमित्यादि । काञ्चनाह्वं गैरिकं सुवर्णगैरिकं दाक्षिणात्यप्रसिद्धं क्षौद्रोपेतं लिह्यादित्यर्थः । ग्राम्यसत्त्वा गवादयस्तेषामस्थिजं भस्म क्षौद्रोपेतं लिह्यात् । तद्वदिति क्षौद्रोपेतं श्वाविधादीनां रोमजं भस्म लिह्यात् । श्वावित् सेढिका, तस्याः सूचय एव लोमानि । अन्तर्धूमदग्धानीति एतेषां रोमाणि घटमध्ये निक्षिप्य मुखं पिधाय दग्धानीत्यर्थः । अत्र हिक्कासु । 'अत्र' इत्यत्र 'आर्त' इति केचित् पठन्ति । किमेतावदेव लीढ्वा हिक्कां हन्त्युतान्यदपीत्याह—मध्वित्यादि । बर्हिपत्रप्रसूतं मयूरपिच्छचन्द्रिकोत्पन्नं भस्म मधुघृतोपेतं, एवं पूर्वोक्तगुणम् । मधुघृते अत्र न तुल्यभागे; उक्तं च,—"भजतो विषरूपत्वं तुल्यांशे मधुसर्पिषी"—इति । औदुम्बरं तैल्वकं वा भस्म एवं मयूरपत्रवन्मधुघृतोपेतं हिक्काघ्नम् । स्वर्जिक्षारमित्यादि । यस्माद्धिक्का श्लेष्मावरुद्धमार्गवातजा तस्मान्मार्गविशुद्ध्यर्थमेते लेहा देयाः ॥ १९ ॥ २० ॥—

सर्पिःस्निग्धा घ्नन्ति हिक्कां यवाग्वः
कोष्णग्रासाः पायसो वा सुखोष्णः ॥ २१ ॥

इदानीमाहाराश्रितं हिक्कानामौषधमीह—सर्पिरित्यादि । कोष्णग्रासाः सुखोष्णकवलाः । पायसमाह—पायसो वा सुखोष्ण इति हन्तीत्यनुवर्तते ॥ २१ ॥

शुण्ठीतोये साधितं क्षीरमाजं
तद्वत् पीतं शर्करासंयुतं वा ।
आतृप्तेर्वा सेव्यमानं निहन्याद्
घ्रातं हिक्कामाशु मूत्रं त्वजाव्योः ॥ २२ ॥

क्षीरमाह—शुण्ठीतोये साधितमित्यादि । शुण्ठीतोये क्षीराचतुर्गुणे साधितमजादुग्धं पीतं तद्वद्धिक्काहरं भवति; शर्करासंयुतं वा साधितं दुग्धमातृप्तेः सेव्यमानं हिक्कां निहन्यादित्यर्थः ॥ २२ ॥

सपूतिकीटं लशुनोग्रगन्धा-
हिङ्गुग्वञ्जमाचूर्ण्य सुभावितं तत् ।

घ्रेयप्रसंगेन घ्रेययोगमाह—सपूतिकीटमित्यादि । लशुनादिकमञ्जान्तमाचूर्ण्य तच्चूर्णं सपूतिकीटं पूतिकीटचूर्णसहितं, पूतिकीटो 'भोंदुलिका' इति लोके, सुभावितमजाव्योरेव मूत्रेण बहून् वारान् भावितं, घ्रातं हिक्कां निहन्यादित्यर्थः ॥—

क्षौद्रं सितां वारणकेशरं च
पिबेद्रसेनेक्षुमधूकजेन ॥ २३ ॥

हिक्काघ्नं पानमाह—क्षौद्रमित्यादि । वारणकेशरं नागकेशरं, क्षौद्रादिकमिक्षुमधुकजेन रसेन पिबेदिति संबन्धः; अत्र मधुनो द्रवत्वाच्चूर्णाभावः, तेन मधुनः प्रक्षेपः । मधुमात्रा तु "षोडशाष्टचतुर्भागं वातपित्तकफार्तिषु । क्षौद्रं कषाये दातव्यं विपरीता तु शर्करा" इति । इक्षुरसमधूकस्वरसौ तु लेहाच्चतुर्गुणौ । उक्तं च—"कर्षश्चूर्णस्य कल्कस्य गुटिकानां तु सर्वशः । द्रवशुक्त्याऽवलेढव्यः पातव्यश्च चतुर्गुणे" ॥ २३ ॥

पिबेत् पलं वा लवणोत्तमस्य
द्वाभ्यां पलाभ्यां हविषः समग्रम् ।

योगान्तरमाह—पिबेत् पलमित्यादि । लवणोत्तमस्य सैन्धवस्य । समग्रमिति इयमुत्तममात्रेति बोधार्थं, तेन हीनबलादिकमवेक्ष्य हीनमात्रमपि पिबेदित्यर्थः ॥—

हरीतकीं कोष्णजलानुपानां
पिबेद्धृतं क्षारमधूपपन्नम् ॥ २४ ॥
रसं कपित्थान्मधुपिप्पलीभ्यां
शुक्तिप्रमाणं प्रपिबेत् सुखाय ॥ २५ ॥

हरीतक्यादियोगत्रयमाह—हरीतकीमित्यादि । घृतं कोष्णं कृत्वा क्षीरमधुभ्यामुपपन्नं युक्तं पिबेत् । शुक्तिप्रमाणमिति अर्धपलप्रमाणम् । प्रसृतप्रमाणमित्यर्थः । अर्धपलमितं मधु, पिप्पलीप्रमाणं कर्षमात्रम् । कपित्थाद्रसं स्वरसं, सुखाय आरोग्याय पिबेत् । हरीतकीमित्याद्येको योगः, पिबेद्धृतमित्यादिर्द्वितीयः, रसं कपित्थादित्यादिस्तृतीयः ॥ २४ ॥ २५ ॥

कृष्णां सितां चामलकं च लीढं
सश्रृङ्गवेरं मधुनाऽथवाऽपि ।
कोलास्थिमज्जाञ्जनलाजचूर्णं
हिक्कां निहन्यान्मधुनाऽवलीढम् ॥ २६ ॥

कृष्णादियोगमाह—कृष्णां सितामित्यादि । अथवेति पूर्वयोगापेक्षया परयोगापेक्षया वा । कृष्णां पिप्पलीं, सितां शर्करां, शृङ्गवेरं शुण्ठीं; कृष्णां सितां च मधुना लिह्यादित्येको योगः, सशृङ्गवेरमामलकं मधुनेति द्वितीयः । कार्तिककुण्डस्तु कृष्णा-

१ 'यवाग्व आह' इति पा० ।

१ 'हिङ्ग्वम्बुनाऽऽचूर्ण्य' इति पा० । २ 'पूतिकीटो वर्षाकालोद्भवः पीलिन्दिकेति प्रसिद्धः' इति पा० । ३ 'पिचुप्रमाणं' इति पा० ।

मित्यादिकमेकमेव योगमिच्छति, विकल्पं तु पूर्वयोगापेक्षया । कोलमज्जादियोगमाह—कोलास्थिमज्जेत्यादि । कोलास्थिमज्जा बदरास्थिजातं बीजं, अञ्जनं सौवीराञ्जनं, लाजाः पुष्पितं धान्यम् । मधु चूर्णाद्द्विगुणितं पातव्यम् ॥ २६ ॥

पाटलायाः फलं पुष्पं गैरिकं कटुरोहिणी ।
खर्जूरमध्यं मागध्यः काशीशं दधिनाम च ॥ २७ ॥
चत्वार एते योगाः स्युः प्रतिपादप्रदर्शिताः ।
मधुद्वितीयाः कर्तव्यास्ते हिक्कासु विजानता ॥२८॥

पाटलादिकयोगचतुष्टयमाह—पाटलायाः फलं पुष्पमित्यादि । एते चत्वारो योगाः प्रतिपादं पादिका योगाः, प्रदर्शिता उक्ताः । पाटल्याः सफलं पुष्पं क्षौद्रेणेत्येको योगः । गैरिकं स्वर्णगैरिकं, कटुरोहिणी तिक्ता, क्षौद्रेणेति द्वितीयो योगः । खर्जूरमध्यं मागध्यो मधुयुक्ता इति तृतीयो योगः; खर्जूरमध्यं खर्जूरमस्तकमज्जा, अन्ये खर्जूरास्थीन्याहुः । काशीशं खनामख्यातं, दधिनाम कपित्थं, मधुनेति चतुर्थो योगः; 'काशीशं दधि ना सह' इति केचित् पठन्ति; काशीशं दधि च ना पुरुषः लिह्यादिति व्याख्यानयन्ति ॥ २७ ॥ २८ ॥

कपोतपारावतलावश(ल्ल)क-
श्वदंष्ट्रगोधावृषदंशजान् रसान् ।
पिबेत् फलाम्लानहिमान् ससैन्धवान्
स्निग्धांस्तथैवर्ष्यमृगद्विजोद्भवान् ॥ २९ ॥

रसानाह—कपोतपारावतलावेत्यादि । कपोतादिपक्षिणां रसान् मांसरसान्, फलाम्लान् दाडिमादिसंस्कृतान्, अहिमान् उष्णान्, सैन्धवयुक्तान् स्निग्धान् घृताढ्यान् पिबेत् । वृषदंशो वनमार्जारः, गोधा पञ्चनखा । तथैव ऋष्यादिजान् रसान् पिबेत् । मृगद्विजा जङ्गालविष्किराः । ऋष्यलावकयोः पृथगुपादानं विशेषेण तयोर्हिक्काहरत्वप्रतिपादनार्थम् ॥ २९ ॥

विरेचनं पथ्यतमं ससैन्धवं
घृतं सुखोष्णं च सितोपलायुतम् ।
सदागतावूर्ध्वगतेऽनुवासनं
वदन्ति केचिच्च हिताय हिक्किनाम् ॥ ३० ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे हिक्काप्रतिषेधो नाम (द्वादशोऽध्यायः, आदितः) पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

विस्तरोक्तां चिकित्सां संक्षेपेणाह—विरेचनं पथ्यतममित्यादि । विरेचनं वायोरनुलोमार्थं बलवत आतुरस्य योज्यम् । सदागतौ वायौ । परमतमप्यनुमतमनिषेधात् । यद्यपि हिक्कासु बस्तिर्निषिद्धस्तथाऽप्यूर्ध्वगते वायौ प्रयुज्यते, अवस्थावशात् । यद्यप्येते योगाः सामान्येनोक्तास्तथाऽपि दोषोच्छ्रायमवेक्ष्य यथावस्थं प्रयोज्याः ॥ ३० ॥

१ 'भर्जिततण्डुलाः' इति पा० । २ 'बीजपूरादिरसयुक्तान्' इति पा० । ३ 'ऋक्षो भल्लूकः, द्विजा लावादयः' इति पा० ।

इति श्रीडल्हणाचार्यविरचितायां सुश्रुतव्याख्यायां निबन्धसंग्रहाख्यायामुत्तरतन्त्रे हिक्काप्रतिषेधो नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

एकपञ्चाशत्तमोऽध्यायः ।

अथातः श्वासप्रतिषेधं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥
यैरेव कारणैर्हिक्का बहुभिः संप्रवर्तते ।
तैरेव कारणैः श्वासो घोरो भवति देहिनाम् ॥ ३ ॥

हिक्काप्रतिषेधानन्तरं तुल्यहेत्वादिसाम्यात् श्वासप्रतिषेधारम्भः; अत एव वेगवदूर्ध्वागतवातयोगित्वसाधर्म्याद्धिक्काश्वासचिकित्सितमेकमेवोक्तं चरके । श्वासनिदानमाह—यैरेवेत्यादि । यैरेवेति विदाह्यादिभिः । कारणैर्हेतुभिः । बहुभिरनेकैः, बहुभिरिति कथनं श्वासस्य बहुप्रकारत्वसूचनार्थम् । हिक्का संप्रवर्तते जायते, तैरेव कारणैः श्वासो देहिनां प्राणिनां भवति । किंविशिष्टः? घोरः । कार्तिककुण्डस्तु अमुं पाठमयुक्तं वदति, हिक्काप्रतिषेध एव हिक्काश्वासयोस्तुल्यहेतुत्वप्रतिपादितत्वात्; मया पुनः श्रीजेज्जटपठितत्वात् पठितः ॥ १–३ ॥

विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः ।
श्वासयत्यूर्ध्वगो भूत्वा तं श्वासं परिचक्षते ॥ ४ ॥

इदानीं श्वाससंप्राप्तिमाह—विहायेत्यादि । प्राणो वायुः, प्रकृतिं विहाय विगुणो भूत्वेत्यर्थः, ऊर्ध्वगो भूत्वा तथा कफसंयुतः सन् यदा श्वासयति तं बुधाः श्वासं परिचक्षते कथयन्ति । प्राणो वायुः कफसंयुत इत्युक्तेऽपि तन्त्रान्येऽपि दोषाः समुच्चीयन्ते; यदुक्तं तन्त्रान्तरे—"क्षुद्रको वातिकः श्लेष्मभूयिष्ठस्तमकः स्मृतः । छिन्नः पित्तप्रधानः स्यादन्यौ मारुतकोपजौ"–इति ॥ ४ ॥

क्षुद्रकस्तमकश्छिन्नो महानूर्ध्वश्च पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥५॥

श्वासभेदानाह—क्षुद्रक इत्यादि । स श्वास एकोऽपि क्षुद्रकादिभेदात् पञ्चधा भिद्यते । संख्येयनिर्देशादेव पञ्चप्रकारत्वे सिद्धे पञ्चवचनं तमकभेदस्य प्रतमकस्य पृथक्संख्यानिषेधार्थम् ॥ ५ ॥

प्राग्रूपं तस्य हृत्पीडा भक्तद्वेषोऽरतिः परा ।
आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च ॥ ६ ॥

पूर्वरूपमाह—प्राग्रूपं तस्येत्यादि । तस्य श्वासस्य हृत्पीडादिकं प्राग्रूपं भवति ॥ ६ ॥

किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्तते ।
निषण्णस्यैति शान्तिं च स क्षुद्र इति संज्ञितः ॥७॥

क्षुद्रश्वासं लक्षयति—किञ्चिदारभमाणस्येत्यादि । यस्य

१ "तन्त्रान्तरे दोषैत्क्यमुच्यते; यथा–" इति पा० ।

किञ्चित् कर्म आरभमाणस्य पुरुषस्य यः श्वासः प्रवर्तते निषण्णस्य च शान्तिमेति स क्षुद्रः श्वास इति संज्ञितः ॥ ७ ॥

तृट्स्वेदवमथुप्रायः कण्ठघुर्घुरिकान्वितः ।
विशेषाद्दुर्दिने ताम्येच्छ्वासः स तमको मतः ॥ ८ ॥
घोषेण महताऽऽविष्टः सकासः सकफो नरः ।
यः श्वसित्यबलोऽन्नद्विट् सुप्तस्तमकपीडितः ॥ ९ ॥
स शाम्यति कफे हीने स्वपतश्च विवर्धते ।
मूर्च्छाज्वराभिभूतस्य ज्ञेयः प्रतमकस्तु सः ॥ १० ॥

तमकलक्षणमाह—तृट्स्वेदेत्यादि । सः तमकः श्वासो मतः । किंविशिष्टः ? तृट्स्वेदवमथुप्रायः । तृट् तृष्णा, स्वेदः प्रस्वेदः, वमथुः थूत्कृतिः, कण्ठे घुर्घुरिकया अन्वितो युक्तः । प्रतमकलक्षणमाह—मूर्च्छेत्यादि ॥ ८–१० ॥

आध्मातो दह्यमानेन बस्तिना सरुजं नरः ।
सर्वप्राणेन विच्छिन्नं श्वस्याच्छिन्नं तमादिशेत्॥११॥

छिन्नलक्षणमाह—आध्मातो दह्यमानेनेत्यादि ॥ ११ ॥

विसंज्ञः पार्श्वशूलार्तः शुष्ककण्ठोऽतिघोषवान् ।
संरब्धनेत्रस्त्वायम्य यः श्वस्यात् स महान् स्मृतः॥

महाश्वासलक्षणमाह—निःसंज्ञ इत्यादि । निःसंज्ञश्चेतनारहितः, संरब्धनेत्रः सशोथलोचनः, आयम्य द्विधीभूयेव, श्वस्यात् श्वासं कुर्यात्, स महान् महाश्वासः । अत्र आश्रयाश्रयिणोरभेदात् महाश्वास एव 'महान्'शब्देनोच्यते; एवं सर्वत्र ॥ १२ ॥

मर्मस्वायम्यमानेषु श्वसन्मूढो मुहुश्च यः ।
ऊर्ध्वप्रेक्षी हतरवस्तमूर्ध्वश्वासमादिशेत् ॥ १३ ॥

ऊर्ध्वश्वासलक्षणमाह—मर्मस्वित्यादि । मर्मसु हृद्बस्तिशिरःसु । आयम्यमानेषु आकृष्यमाणेषु । मूढो निश्चेष्टः । मुहुरनवरतम् । ऊर्ध्वप्रेक्षी ऊर्ध्वप्रेक्षणशीलः । हतरवो हतस्वनः ॥ १३ ॥

क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च ॥१४॥

इदानीं श्वासानां साध्यासाध्यत्वमाह—क्षुद्र इत्यादि । कृच्छ्रः कृच्छ्रसाध्यः । त्रयः श्वासाः छिन्नश्वासमहाश्वासोर्ध्वश्वासाः । तमको दुर्बलस्य चेति दुर्बलस्य पुंसस्तमकश्वासो न सिध्यतीत्यर्थः; चकारात्तन्त्रान्तरोक्तज्वरमूर्च्छादियुक्तस्येत्यपि लभ्यते ॥१४॥

स्नेहबस्तिं विना[2] केचिदूर्ध्वं चाधश्च शोधनम् ।
मृदु प्राणवतां श्रेष्ठं श्वासिनामादिशन्ति हि ॥ १५ ॥

इदानीं चिकित्सामाह—स्नेहबस्तिं विनेत्यादि । यद्यपि श्वासे स्नेहबस्तिः प्राङ्निषिद्धः, तथाऽप्यत्र पुनर्निषेधकरणं श्वासेऽवस्थावशेनापि तस्याप्रयोगार्थम् । विना ऋते । ऊर्ध्वं शोधनं वमनम्, अधःशोधनं विरेकः; मृदु अपीडाकरम्, एतद्वमनविरेकयोर्विशेषणम् । प्राणवतां बलवताम् । आदिशन्ति कथयन्ति । परमतमप्रतिषिद्धमनुमतमेव ॥ १५ ॥

१ 'स वै तमकपीडितः' इति पा० । २ 'स्नेहबस्तिमृते' इति पा० ।

श्वासे कासे च हिक्कायां हृद्रोगे चापि पूजितम् ।
घृतं पुराणं संसिद्धमभयाबिडरामठैः ॥ १६ ॥

श्वासे नित्योपयोगिकं घृतमाह—श्वासे इत्यादि । अभयादिभिः संसिद्धं पुराणं घृतं श्वासादिषु पूजितमिति संबन्धः । पुराणं दशवर्षस्थितम् । रामठं हिङ्गु ॥ १६ ॥

सौवर्चलाभयाबिल्वैः संस्कृतं वाऽनवं घृतम् ।
पिप्पल्यादिप्रतीवापं सिद्धं वा प्रथमे गणे ॥ १७ ॥
सपञ्चलवणं सर्पिः श्वासकासौ व्यपोहति ।

सौवर्चलाभयाबिल्वैरित्यादि । सौवर्चलादिभिः सिद्धमनवं पुराणं घृतं श्वासादिषु संयोज्यमिति संबन्धः । पिप्पल्यादिप्रतीवापमित्यादि ।—पिप्पल्यादिप्रतिवापं पिप्पल्यादिकल्के सिद्धम् । प्रथमो गणो विदारिगन्धादिः, तस्य क्वाथेन सिद्धम् । सपञ्चलवणमिति सिद्धं सत् पञ्चलवणप्रक्षेपं पातव्यमित्यर्थः । विकल्पाभिधानं पूर्वयोगापेक्षया । केचित् पञ्चलवणेन सह सिद्धमिति मन्यन्ते; तन्नेच्छन्ति निबन्धकाराः, समानतन्त्रविरोधात् ॥ १७ ॥—

हिंस्राविडङ्गपूतीकत्रिफलाव्योषचित्रकैः ॥ १८ ॥
द्विक्षीरं साधितं सर्पिश्चतुर्गुणजलाप्लुतम् ।
कोलमात्रैः पिबेत्तद्धि[2] श्वासकासौ व्यपोहति ॥१९॥
अर्शांस्यरोचकं गुल्मं शकृद्भेदं क्षयं तथा ।
कृत्स्ने वृषकषाये वा पचेत् सर्पिश्चतुर्गुणे ॥ २० ॥
तन्मूलकुसुमावापं शीतं क्षौद्रेण योजयेत् ।

हिंस्राविडङ्गेत्यादि । हिंस्रा बृहद्हिंस्रा, पूतीकश्चिरबिल्वः । द्विक्षीरं द्विगुणक्षीरम् । सर्पिः प्रस्थप्रमाणम् । कोलमात्रैरर्धकर्षप्रमाणैः, अन्ये कल्कस्याल्पीयस्त्वात् कोलशब्देन कर्षमिच्छन्ति । केचिदस्याग्रे 'कृत्स्ने वृषकषाये वा पचेत्' इत्यादि पठन्ति; तन्नेच्छति श्रीजेज्जटः, 'वासाघृतं षट्पलं च घृतं चात्र हितं भवेत्' इति वक्ष्यमाणवचनेन वासाघृतस्य कथनात् ॥ १८–२० ॥—

शृङ्गीमधूलिकाभार्गीशुण्ठीतार्क्ष्यसिताम्बुदैः ॥ २१ ॥
सहरिद्रैः सयष्ट्याह्वैः समैरावाप्य योगतः ।
घृतप्रस्थं पचेद्धीमान् शीततोये चतुर्गुणे ॥ २२ ॥
श्वासं कासं तथा हिक्कां सर्पिरेतन्नियच्छति ।

शृङ्गीत्यादि । शृङ्गी कर्कटशृङ्गी । मधूलिका तृणजातिः 'मर्कट' इति लोके । तार्क्ष्यं रसाञ्जनम् । अम्बुदो मुस्ता । आवाप्य प्रक्षिप्य । योगतः युक्तितः, यावत् प्रमाणेन कल्केन उत्कटगन्धादिकं न स्यात्तावत्प्रमाणः कल्को देयो न तु स्नेहचतुर्थांशेन, योगत इत्यभिधानमन्तरेणैव तथा सिद्धेः । यद्यपि स्नेहाच्चतुर्गुणो द्रव इति सामान्यपरिभाषावशादेव जलचातुर्गुण्यं सिद्धं, तथाऽपि चतुर्गुणे इति करणं साहचर्याद्वक्ष्यमाण-

१ 'संयोज्यं' इति पा० । २ 'पचेत्तद्धि' इति पा० ।

सुवहादियोगोक्तजलद्वैगुण्यमत्रापि माभूदिति दर्शनार्थम् । नियच्छति निवारयति ॥ २१ ॥ २२ ॥—

सुवहा कालिका भार्गी शुकाख्या नैचुलं फलम् ॥२३॥
काकादनी शृङ्गवेरं वर्षाभूर्बृहतीद्वयम् ।
कोलमात्रैर्घृतप्रस्थं पचेदेभिर्जलद्विकम् ॥ २४ ॥
कल्कैर्पीतमेतद्धि श्वासामयविनाशनम् ।

सुवहा कालिका भार्गीत्यादि । सुवहा गोधापदी, कालिका कालेयकं, शुकाख्या चर्मकारवटः, शुकशिम्बामपरे, नैचुलं फलं जलवेतसफलं, काकादनी वायसतिन्दुकः, वर्षाभूः श्वेतपुनर्नवा, बृहतीद्वयं स्थूलफला चणकफला च, कोलमात्रैरर्धकर्षप्रमाणैः सुवहादिभिरित्यर्थः; अन्ये कर्षप्रमाणैरिति मन्यन्ते; तन्न, समानतन्त्रविरोधात् । जलद्विकं द्विगुणजलमित्यर्थः ॥ २३ ॥ २४ ॥—

सौवर्चलयवक्षारकटुकाव्योषचित्रकैः ॥ २५ ॥
वचाभयाविडङ्गैश्च[1] साधितं श्वासशान्तये ।
गोपवल्ल्युदके सिद्धं स्यादन्यद्द्विगुणे घृतम् ॥ २६ ॥

सौवर्चलयवक्षारेत्यादि । व्योषं त्रिकटुकम् । सौवर्चलादीनां विडङ्गान्तानां कल्केन द्रवेण वा अनुक्तेनापि जलेन साधितं घृतं पीतं सत् श्वासशान्तये भवतीति योज्यम् । गोपवल्ल्युदके सिद्धमित्यादि । गोपवल्ल्युदके सारिवाक्काथे । अन्यदिति घृतविशेषणम् । द्विगुणे घृतद्विगुणे गोपवल्लीक्काथे ॥ २५ ॥ २६ ॥

पञ्चैतानि हवींष्याहुर्भिषजः श्वासकासयोः ।

इदानीं हिंस्रादिपञ्चघृतानामत्यर्थं श्वासहिततमत्वप्रतिपादनार्थमुपसंहारमाह—पञ्चैतानि हवींष्याहुरित्यादि । पञ्चैतानीति हिंस्रादिशृङ्ग्यादिसुवहादिसौवर्चलादिगोपवल्ल्यादीनि ।—

तालीशतामलक्युग्राजीवन्तीकुष्ठसैन्धवैः ॥ २७ ॥
बिल्वपुष्करभूतीकसौवर्चलकणाग्निभिः ।
पथ्यातेजोवतीयुक्तैः सर्पिर्जलचतुर्गुणम् ॥ २८ ॥
हिङ्गुपादयुतं सिद्धं सर्वश्वासहरं परम् ।
वासाघृतं षट्पलं वा घृतं चात्र हितं भवेत् ॥२९॥

तालीशतामलकीत्यादि । तामलकी दलफलिका, उग्रा वचा, जीवन्ती पटोलसमानपत्रा कन्दवती पश्चिमदेशे प्रसिद्धा, लाटदेशे स्थूलवल्ली विलक्षणैव, पुष्करं पुष्करमूलं, भूतीकं रोहिषं, कणा पिप्पली, अग्निश्चित्रकः, तेजोवती काकमर्दनिका । हिङ्गुपादयुतमिति एकद्रव्यचतुर्थांशेन हिङ्गुनेत्यर्थः । केचिदमुं पाठमन्यथा पठन्ति, स चाभावान्न लिखितः । वासाघृतं षट्पलं चेत्यादि वासाघृतं 'कृत्स्ने वृषे तत्कुसुमैः' इत्यादिना रक्तपित्तोक्तं, पित्तप्रधाने श्वासे हितं; षट्पलं वातव्याध्युक्तं, तच्च वातप्रधाने श्वासे ॥ २७–२९ ॥

तैलं दशगुणे सिद्धं भृङ्गराजरसे शुभे ।
सेव्यमानं यथान्यायं श्वासकासौ व्यपोहति ॥३०॥

पित्तवातप्रधानयोः श्वासयोः स्नेहमभिधायेदानीं कफप्रधाने स्नेहमाह—तैलमित्यादि । यथान्यायं यो यो यथा न्याय्यस्तथा; एतेन यथायोग्यतया विचारणात्स्नेहमच्छपानं वा योज्यमित्युक्तम् । अन्ये यथान्यायं यथाव्याधीत्याहुः । व्यपोहति नाशयति ॥ ३० ॥

फलाम्ला विष्किररसाः स्निग्धाः प्रव्यक्तसैन्धवाः ।
एणादीनां शिरोभिर्वा कौलत्था वा सुसंस्कृताः ३१
हन्युः श्वासं च कासं च संस्कृतानि पयांसि च ।

फलाम्ला विष्किररसा इत्यादि । फलाम्ला दाडिमबीजपूरादिना अम्लीकृताः । विष्किररसा लावादिमांसरसाः । प्रव्यक्तसैन्धवा उत्कटसैन्धवाः । एणादीनां शिरोभिर्वेति कृष्णहरिणादिमस्तकैर्वा कृता मांसरसा वातहरा इत्यर्थः । आदिशब्दाद्रौरहरिणादयः । कौलत्था वा सुसंस्कृताः कुलत्थसंस्कृता यूषाः । संस्कृतानि पयांसि 'वातहरैः पञ्चमूलप्रभृतिभिः' इति शेषः ॥ ३१ ॥—

तिमिरस्य[1] च बीजानि कर्कटाख्या च चूर्णिता ॥३२॥
दुरालभाऽथ पिप्पल्यः कटुकाख्या हरीतकी ।
श्वाविन्मयूररोमाणि कोला मागधिकाकणाः ॥३३॥
भार्गीत्वक् शृङ्गवेरं च शर्करा शल्लकाङ्गजम् ।
नृत्तकौण्डकबीजानि[2] चूर्णितानि तु केवलम् ॥३४॥
पञ्च श्लोकाधिकास्त्वेते लेहा ये सम्यगीरिताः ।
सर्पिर्मधुभ्यां ते लेह्याः कासश्वासार्दितैर्नरैः ॥३५॥

तिमिरस्येत्यादि । तिमिरो नखरागिपत्रः 'तिवरिया' इति प्रसिद्धः,कर्कटाख्यः कर्कटशृङ्गी; केचित्कर्कटाख्येत्यत्र 'कर्कटाह्वयश्च' इति पठन्ति, तत्र कर्कटाख्यस्तृणजातिः । श्वावित् सेढिका, तस्याः सूचय एव रोमाणि । कोला चव्यम् । मागधिकाकणा पिप्पलीतण्डुलाः । शल्लकाङ्गजं शल्लकशकलं; अन्ये 'शल्लका गजं' इति पठन्ति; तत्र शल्लका शल्लकी, गजं नागकेशरम् । नृत्तकौण्डको मर्कटकः; केचित् 'नृत्तकौण्डकबीजानि' इत्यत्र 'नीचैःकदम्बबीजानि' इति पठन्ति, तत्र नीचैःकदम्बीजानि लघुकदम्बबीजानि । श्लोकाधिका अर्धश्लोकनिर्दिष्टाः ॥ ३२–३५ ॥

सप्तच्छदस्य पुष्पाणि पिप्पलीश्चापि मस्तुना ।
पिबेत् संचूर्ण्य मधुना धानाश्चाप्यथ भक्षयेत् ॥३६॥

सप्तच्छदस्येत्यादि । सप्तच्छदस्य पुष्पाणि पिप्पलीश्च संचूर्ण्य मस्तुना सह पिबेदिति योज्यम् । सप्तच्छदः सप्तपर्णः । धाना भृष्टयवाः । केचित् मधुनेति पदं धानाश्चाप्यथ भक्षयेदित्यत्र संबध्नन्ति ॥ ३६ ॥

अर्काङ्कुरैर्भावितानां यवानां साध्वनेकशः ।
तर्पणं वा पिबेदेषां सक्षौद्रं श्वासपीडितः ॥ ३७ ॥
शिरीषकदलीकुन्दपुष्पं मागधिकायुतम् ।
तण्डुलाम्बुयुतं पीत्वा जयेच्छ्वासानशेषतः ॥ ३८ ॥

१ 'घृतं वचाविडङ्गैश्च' इति पा० ।

१ 'तिनिशस्य' इति पा० । २ 'त्रिकण्टकस्य बीजानि' इति पा० ।

यादृशानां यवानां धाना भक्षयेत्तादृशानाह—अर्काङ्कुरैर्भावितानामित्यादि । अर्काङ्कुरैरर्कपल्लवपुष्पकृतैः क्वाथैः । साधु शोभनं यथा भवतीत्यर्थः । अनेकश इति भावितानामित्यत्र योज्यम् । तर्पणं वा पिबेदेषामित्यादि । तर्पणं सक्तवः । एषां पूर्वोक्तानामर्काङ्कुरैर्भावितयवानामित्यर्थः । शिरीषेत्यादि । शिरीषादिपुष्पं पिप्पलीयुतं तण्डुलाम्बुना पीत्वा अशेषतो निःशेषान् श्वासान् जयेदिति संबन्धः । कुन्दो निर्गन्धं श्वेतपुष्पम् । तण्डुलाम्बु तण्डुलप्रक्षालनोदकम् ॥ ३७ ॥ ३८ ॥

कोलमज्जां तालमूलमृष्यचर्ममसीमपि ।
लिह्यात् क्षौद्रेण भार्गी वा सर्पिर्मधुसमायुताम् ॥३९॥
नीचैःकदम्बबीजं वा सक्षौद्रं तण्डुलाम्बुना ।

कोलमज्जामित्यादि । कोलमज्जा बदरमज्जा, मज्जाशब्द आकारान्तोऽप्यस्ति, तेन मज्जामिति साधुपाठः । तालमूलमित्यत्र तालमूलीमिति केचित् पठन्ति; तत्र तालमूली मुषली । नीचैःकदम्बबीजमित्यादि । नीचैःकदम्बबीजं लघुकदम्बबीजम् । तण्डुलाम्बुनेत्यत्र पेयमित्यध्याहार्यम् । केचित् 'नीपं कदम्बं रक्तं च तत् पीतं तण्डुलाम्बुना' इति पठन्ति; व्याख्यानयन्ति च—नीपं बृहत्कदम्बफलं, कदम्बं लघुकदम्बवृक्षफलं, रक्तमिति विशेषणादनयोः पक्वयोर्ग्रहणं, यतः परिपक्वं रक्तं भवति, पिष्टं पाने देयमिति यावत् । अपरे तु तण्डुलाम्बुना पीतं सुदारुणान् श्वासान् हन्तीति योजयन्ति । ये पूर्वं पञ्चलेहप्रस्तावे 'नीचैःकदम्बबीजानि' इति पठन्ति तन्मतेऽप्यत्र न पुनरुक्तता, यतः पूर्वं मधुसर्पिर्भ्यां विलिहन् श्वासान् हन्तीति लेहः, अत्र तु तण्डुलाम्बुना पानम् ॥ ३९ ॥—

द्राक्षां हरीतकीं कृष्णां कर्कटाख्यां दुरालभाम् ४०
सर्पिर्मधुभ्यां विलिहन् हन्ति श्वासान् सुदारुणान्[1] ।

द्राक्षां हरीतकीमित्यादि । कृष्णा पिप्पली । कर्कटाख्या कर्कटशृङ्गी ॥ ४० ॥—

हरिद्रां मरिचं द्राक्षां गुडं रास्नां कणां शटीम् ॥४१॥
लिह्यात्तैलेन[2] तुल्यानि श्वासार्तो हितभोजनः ।

हरिद्रामित्यादि । कणा पिप्पली । केचिदमुं पाठमन्यथा पठन्ति, स चाभावान्न दर्शितः ॥ ४१ ॥—

गवां पुरीषस्वरसं मधुसर्पिःकणायुतम्[3] ॥ ४२ ॥
लिह्याच्छ्वासेषु कासेषु वाजिनां वा शकृद्रसम् ।

गवां पुरीषस्वरसमित्यादि । गोशकृद्रसपिप्पल्यौ मधुघृताभ्यां लिह्यात्, अश्वशकृद्रसपिप्पल्यौ वा मधुघृताभ्यां लिह्यात् ॥ ४२ ॥—

पाण्डुरोगेषु शोथेषु ये योगाः संप्रकीर्तिताः ॥४३॥
श्वासकासापहास्तेऽपि कासघ्ना ये च कीर्तिताः ।

इदानीं पाण्डुरोगाद्युक्तयोगानत्राप्यतिदिशन्नाह—पाण्डुरोगेष्वित्यादि । पाण्डुरोगादिप्रतिषेधेषु ये योगाः कथितास्तेऽपि श्वासकासापहाः, कासघ्ना ये च कीर्तितास्तेऽपि । केचिदमुं पाठं न पठन्ति ॥ ४३ ॥—

भार्गीत्वक्त्र्यूषणं तैलं हरिद्रां कटुरोहिणीम् ॥ ४४ ॥
पिप्पलीं मरिचं चण्डां गोशकृद्रसमेव च ।

भार्गीत्वगित्यादि । अत्र लिह्यादिति संबन्धनीयम् ॥४४॥—

तलकोटस्य बीजेषु पचेदुत्कारिकां शुभाम् ॥ ४५ ॥
सेव्यमाना निहन्त्येषा श्वासानाशु सुदुस्तरान् ।

तलकोटस्येत्यादि । तलकोटोऽङ्कोठः । उत्कारिका लप्सिका । केचित् भार्गीत्वगित्यादिकं तलकोटस्य बीजेष्वितिपर्यन्तमुत्कारिकार्थं मन्यन्ते ॥ ४५ ॥—

पुराणसर्पिः पिप्पल्यः कौलत्था जाङ्गला रसाः ॥४६॥
सुरा सौवीरकं हिङ्गु मातुलुङ्गरसो मधु ।
द्राक्षामलकबिल्वानि शस्तानि श्वासिहिक्किनाम् ४७

इदानीं श्वासे हिक्कायां चान्यदपि यद्धितं तदाह—पुराणसर्पिरित्यादि । कौलत्थाः कुलत्थैः संस्कृताः । जाङ्गला रसा एणादीनामेव मांसरसाः । सौवीरकं विरेचनकल्पोक्तम् ॥ ४६ ॥४७॥

श्वासहिक्कापरिगतं स्निग्धैः स्वेदैरुपाचरेत् ।
आक्तं लवणतैलाभ्यां तैरस्य ग्रथितः कफः ॥ ४८ ॥
खस्थो विलयनं याति मारुतश्च प्रशाम्यति ।

श्वासे तत्प्रसङ्गेन च हिक्कायामपि तुल्यं प्रतीकारमाह—श्वासहिक्कापरिगतमित्यादि । श्वासहिक्कापरिगतं श्वासहिक्काव्याप्तम् । स्निग्धैः स्वेदैः शाल्वणप्रभृतिभिः । आक्तं लवणतैलाभ्यां सैन्धवतिलतैलाभ्यां चुप्पटितमातुरमित्यर्थः । तैः स्निग्धस्वेदैः । ग्रथितः घनीभूतः । खस्थः स्रोतःस्थितः । विलयनं द्रवभावम् ॥ ४८ ॥—

स्विन्नं ज्ञात्वा ततश्चैव भोजयित्वा रसौदनम् ॥४९॥
वातश्लेष्मविबन्धे वा भिषग्धूमं प्रयोजयेत् ।
मनःशिलादेवदारुहरिद्राच्छदनामिषैः ॥ ५० ॥
लाक्षोरुबूकमूलैश्च कृत्वा वर्तीर्विधानतः ।

स्वेदे कृतेऽपि यदा वातकफानुबन्धो नोपशाम्यति तदा किं कर्तव्यमित्याह—स्विन्नमित्यादि । स्विन्नं ज्ञात्वा रसौदनं भोजयित्वा वातकफानुबन्धे सति युक्तं धूमं प्रयोजयेदिति पिण्डार्थः । केषां धूमं प्रयोजयेदित्याह—मनःशिलेत्यादि । छदनं पत्रकं, आमिषं गुग्गुलुः । उरुबूकमूलं रक्तैरण्डमूलम् । विधानतः धूमनस्यकवलग्रहचिकित्सितोक्तविधानेन ॥ ४९॥५०॥—

सर्पिर्यवमधूच्छिष्टशालनिर्यासजं[4] तथा ॥ ५१ ॥

अपरमपि धूममाह—सर्पिरित्यादि । मधूच्छिष्टं मदनम् । शालनिर्यासो राला । सर्पिर्यवादिजं धूमं तथा तेनैव प्रकारेण प्रयोजयेदिति पिण्डार्थः ॥ ५१ ॥

१ 'निरवशेषान्' इति पा० । २ 'तैलेन विलिहन् हन्याच्छ्वासान् प्राणहरानपि' इति पा० । ३ 'मधुमागधिकायुतम्' इति पा० ।

१ 'अन्यथा पठन्ति' इति पा० । २ 'युक्तैः' इति 'युक्तं' इति च पा० । ३ 'स्निग्धं' इति पा० । ४ 'सर्पिर्नवमधूच्छिष्ट'० इति पा० ।

शृङ्गवालखुरस्नायुत्वक् समस्तं गवामपि ।

अपराण्यपि धूमद्रव्याण्याह—शृङ्गवालखुरेत्यादि । गवां शृङ्गादिकं त्वक्पर्यन्तं समस्तमपि धूमार्थं प्रयोजयेत् । स्नायुः धनुर्ज्याबन्धनार्थं द्रव्यं 'नहारु' इति लोके ॥—

तुरुष्कशल्लकीनां च गुग्गुलोः पद्मकस्य च ॥ ५२ ॥

तुरुष्केत्यादि । तुरुष्कः सिह्लकः । तुरुष्कादिपद्मकान्तानां वा धूमं प्रयोजयेत् ॥ ५२ ॥

एते सर्वे ससर्पिष्का धूमाः कार्या विजानता ।

पूर्वोक्तधूमानामुपसंहारमाह—एत इत्यादि । एते पूर्वोक्ता धूमाः ससर्पिष्काः सघृता विजानता वैद्येन कार्याः ॥—

बलीयसि कफग्रस्ते वमनं सविरेचनम् ॥ ५३ ॥

श्वासहिक्किनामवस्थायां विरेचनमाह—बलीयसीत्यादि । बलीयसि बलयुक्ते पुरुषे, वमनं सविरेचनं 'मृदु हितम्' इत्यत्राध्याहार्यम् ॥ ५३ ॥

दुर्बले चैव रूक्षे च तर्पणं हितमुच्यते ।
जाङ्गलोरभ्रजैर्मांसैरानूपैर्वा सुसंस्कृतैः ॥ ५४ ॥

दुर्बले इत्यादि । तर्पणं सन्तर्पणम् । कैस्तर्पणं प्रयोक्तव्यमित्याह—जाङ्गलोरभ्रजैरित्यादि । जाङ्गला एणादयो लावादयश्च । उरभ्रो मेषः । आनूपाः कच्छपादयः । सुसंस्कृतैः सूदशास्त्रोक्तविधिना ॥ ५४ ॥

निदिग्धिकां चामलकप्रमाणां
हिङ्ग्वर्धयुक्तां मधुना सुयुक्ताम् ।
लिहन्नरः श्वासनिपीडितो हि
श्वासं जयत्येव बलात्त्र्यहेण ॥ ५५ ॥

इदानीं श्वासे सिद्धतमं योगमाह—निदिग्धिकामित्यादि । निदिग्धिका कण्टकारी, तां कल्कीकृतामामलकप्रमाणां तदर्धप्रमाणेन हिङ्गुना मधुना च युक्तां श्वासपीडितो नरः पुरुषो लिहन् बलाच्छ्वासमाशु त्र्यहाज्जयेदिति संबन्धः । एतत् सर्वं श्वासचिकित्सितं सामान्यमपि द्रव्यस्वरूपमभिसमीक्ष्य विशेषादूह्यमिति ॥ ५५ ॥

यथाऽग्निरिद्धः पवनानुविद्धो
वज्रं यथा वा सुरराजमुक्तम् ।
रोगास्तथैते खलु दुर्निवाराः
श्वासश्च कासश्च विलम्बिका च ॥ ५६ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे हिक्काश्वासप्रतिषेधो नाम (त्रयोदशोऽध्यायः, आदितः) एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्वासस्य तत्प्रसङ्गेन च कासादीनामपि दुःखोपचर्यत्वख्यापनार्थमाह—यथाऽग्निरिद्ध इत्यादि । इद्धः दीप्तः । पवनानुविद्धो वातसहितः ॥ ५६ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे हिक्काश्वासप्रतिषेधो नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशत्तमोऽध्यायः ।

अथातः कासप्रतिषेधमध्यायं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

श्वासप्रतिषेधानन्तरं वातकफप्राधान्यत्वसाम्यात्तुल्यचिकित्सितत्वाच्च कासप्रतिषेधारम्भः—अथात इत्यादि ॥ १ ॥ २ ॥

उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः ।
कासस्यापि च विज्ञेयास्त एवोत्पत्तिहेतवः ॥३॥

इदानीमतिदेशेन कासहेतूनाह—उक्ता इत्यादि ॥ ३ ॥

धूमोपघाताद्रजसस्तथैव
व्यायामरूक्षान्ननिषेवणाच्च ।
विमार्गगत्वादपि भोजनस्य
वेगावरोधात् क्षवथोस्तथैव ॥ ४ ॥
प्राणो ह्युदानानुगतः प्रदुष्टः
संभिन्नकांस्यस्वनतुल्यघोषः ।
निरेति वक्त्रात् सहसा सदोषः
कासः स विद्वद्भिरुदाहृतस्तु ॥ ५ ॥

कासस्य संप्राप्तिनिरुक्ती आह—प्राण इत्यादि । प्राणो वायुः, उदानानुगत उदानवायुमिलितः, ऊर्ध्वगतित्वादुदानस्य, प्रदुष्टः कोपमापन्नः सन्, संभिन्नकांस्यस्वरतुल्यघोष इति जर्जरितकांस्यशब्दानुकारी स्वरः, निरेति निर्गच्छति । सदोषः सदुष्टिरित्यर्थः; दुष्टिश्चात्र तादृग्विधशब्दप्राणवायुनिर्गमनात्मिकैव; केचित् 'सदोष' इत्यत्र 'सघोष' इति पठन्ति, व्याख्यानयन्ति च—सघोषस्तादृग्विधप्राणनिर्गमनोत्थस्वरयुक्तः । स प्राणो वायुः 'कास' इत्युदाहृतः ॥ ४ ॥ ५ ॥

स वातपित्तप्रभवः कफाच्च
क्षतात्तथाऽन्यः क्षयजोऽपरश्च ।
पञ्चप्रकारः कथितो भिषग्भि-
र्विवर्धितो यक्ष्मविकारकृत् स्यात् ॥ ६ ॥

काससंख्यामाह—स वातपित्तप्रभव इत्यादि । स इति कासः । क्षतात् क्षतजः । क्षयजः शुक्रक्षयजः । संख्येयनिर्देशादेव संख्यायां सिद्धायां पञ्चप्रकार इति संख्याकरणं नियमार्थम् । तेन वातादिकृतकासस्य पञ्चप्रकाराः, न पुनर्निमित्तान्तरभेदाद्भेदः । यक्ष्मविकारकृत् राजयक्ष्मकृत्, रोगस्यापि व्याधिकारणत्वात् । यद्यपि क्षयादुत्पन्नकासस्य क्षयकर्तृत्वं न संभवति, तथाऽपि पूर्वावस्थातोऽधिकं क्षयं करोत्यतः क्षयजकास-

---

१ 'खलु काष्ठसद्भैः' इति पा० ।

स्यापि क्षयकर्तृत्वं, अथवा बहुषु छत्रिषु गच्छत्सु केषुचिदच्छत्रिष्वपि छत्रिणो यान्तीति व्यपदेशवत् क्षयजकासस्यापि क्षयकर्तृत्वव्यपदेशः । केचित् 'पञ्चप्रकारः पठितो भिषग्भिर्विशेषतो लक्षणतः पुराणैः' इति पठन्ति ॥ ६ ॥

भविष्यतस्तस्य तु कण्ठकण्डू-
र्भोज्योपरोधो गलताल्लुलेपः ।
स्वेशब्दवैषम्यमरोचकोऽग्नि-
सादश्च लिङ्गानि भवन्त्यमूनि ॥ ७ ॥

कासपूर्वरूपमाह—भविष्यतस्तस्येत्यादि । भोज्योपरोधः ग्रासस्य गले सङ्गः । स्वशब्दवैषम्यमिति ईषत्प्रकृतिस्वरवैकृतम् । अग्निसादोऽग्निमान्द्यम् । केचित् कासपूर्वरूपं न पठन्ति, रूपाणामेवाव्यक्तानां प्राग्रूपसद्भावात्; तन्न, समानतन्त्रविरोधात् ॥ ७ ॥

हृच्छङ्खमूर्धोदरपार्श्वशूली
क्षामाननः क्षीणबलस्वरौजाः ।
प्रसक्तमन्तःकफमीरणेन
कासेत्तु शुष्कं स्वरभेदयुक्तः ॥ ८ ॥

वातकासलक्षणमाह—हृच्छङ्खमूर्धोदरेत्यादि । क्षामाननः क्षीणमुखक्रियः । क्षीणबलस्वरौजा इति बलं कर्मनिर्वर्तनक्षमता, ओजो हृदि स्थितं प्रसिद्धमेव । प्रसक्तमित्यादि । प्रसक्तं यथा भवति तथाऽन्तःकफं यथा भवति शुष्कं च यथा भवति तथा कासेदित्यर्थः; प्रसक्तं निरन्तरं, अन्तःकफमभ्यन्तरकफं, शुष्कं श्लेष्मरहितम् । ईरणेन वायुना । स्वरभेदयुक्तो भिन्नस्वर इत्यर्थः । 'हृच्छङ्खमूर्धोदरपार्श्वशूलम्' इति केचित् पठन्ति, तत्रापि स एवार्थः ॥ ८ ॥

उरोविदाहज्वरवक्त्रशोषै-
रभ्यर्दितस्तिक्तमुखस्तृषार्तः ।
पित्तेन पीतानि वमेत् कटूनि
कासेत् स पाण्डुः परिदह्यमानः ॥ ९ ॥

पित्तकासलक्षणमाह—उरोविदाहज्वरेत्यादि । अभ्यर्दितः पीडितः । तिक्तमुखो निम्बादिभक्षणेनेव । पाण्डुत्वमत्र पित्तकृतं बोद्धव्यं, तेन पाण्डुः पीतवर्णः । परिदह्यमानो दाहयुक्तः ॥ ९ ॥

प्र(वि)लिप्यमानेन मुखेन सीदन्
शिरोरुजार्तः कफपूर्णदेहः ।
अभक्तरुग्गौरवसादयुक्तः
कासेत ना सान्द्रकफं कफेन ॥ १० ॥

कफकासलक्षणमाह—प्रलिप्यमानेनेत्यादि । प्रलिप्यमानेन मुखेन श्लेष्मणा लिप्यमानेन मुखेन । सीदन् पतन् । शिरोरुजार्तः शिरोव्यथापीडितः; यद्यपि शिरोरुजा वातजन्या अतो वातिक एव कासे संभवति, तथाऽपि कफजेऽपि कासे वायुसद्भावाच्छिरोरुजा युक्तैव । कफपूर्णदेहः गुरुशरीर इत्यर्थः । अभक्तरुक् भोजनारुचिः । सादोऽङ्गग्लानिः । ना पुरुषः ॥ १० ॥

वक्षोऽतिमात्रं विहतं तु यस्य
व्यायामभाराध्ययनाभिघातैः ।
विश्लिष्टवक्षाः स नरः सरक्तं
ष्ठीवत्यभीक्ष्णं क्षतजं तमाहुः ॥ ११ ॥

उरःक्षतजकासलक्षणमाह—वक्षोऽतिमात्रमित्यादि । वक्षः स्तनयोरन्तरालं, अन्ये तु जत्रुक्रोडपार्श्वानामन्तरालं वक्ष आहुः । विहतं विशेषेण पीडितम् । अभिघातो लगुडप्रहारादिः । विश्लिष्टवक्षाः अवसन्नवक्षाः । सरक्तं ष्ठीवति 'कफं' इति शेषः । तस्यावस्थायामसाध्यत्वमाह—स इत्यादि । स क्षतजकासी । उरःक्षतस्य उरःक्षतजकासस्य चायं भेदः—उरःक्षती पूर्वमेव सरक्तादिकं कफं ष्ठीवति, उरःक्षतजकासी तु पूर्वं शुष्कं कासते पश्चात् सशोणितं ष्ठीवति । तथा चोक्तं—"रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत् । स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम्"—इति । किंच उरःक्षते गात्रशूलादीनि लक्षणानि पूर्वमेव भवन्ति, तज्जकासे त्वसाध्यावस्थायामेवेत्यतोऽपि भेदः ॥ ११ ॥

स गात्रशूलज्वरदाहमोहान्
प्राणक्षयं चोपलभेत कासी ।
शुष्यन् विनिष्ठीवति दुर्बलस्तु
प्रक्षीणमांसो रुधिरं सपूयम् ॥ १२ ॥
ससर्वलिङ्गं भृशदुश्चिकित्स्यं
चिकित्सितज्ञाः क्षयजं वदन्ति ।

क्षयजकासलक्षणमाह—शुष्यन्नित्यादि । 'विनिष्ठीवति' इति पदं रुधिरं सपूयमित्यत्र संबध्यते । ससर्वलिङ्गमिति सह सर्वैर्लिङ्गैर्वर्तते यः स ससर्वलिङ्गः सर्वदोषलिङ्गयुक्त इत्यर्थः । चिकित्सितज्ञाः कायचिकित्साविदः । क्षयजं शुक्रक्षयजम् । यद्यपि सामान्यक्षयशब्देन रसादिक्षयः प्राप्तस्तथाऽप्यत्र शुक्रक्षयो ग्राह्यः, तज्जनितत्वात् क्षयकासस्य सर्वधातुक्षयस्य च । यद्यपि क्षयस्य क्षयकासस्य च भेदो नोपलभ्यते, तथाऽपि क्षये यानि कासज्वरादीनि लक्षणानि भवन्ति तान्येकदोषारब्धानि, क्षयजकासे पुनस्तानि त्रिदोषारब्धानीत्यतो भेदः । तथाच तन्त्रान्तरम्,—"क्षये कासादिकं लिङ्गमेकदोषकृतं मतम् । तदेव तत्कृते कासे सर्वदोषान्वितं बुधैः—" इति ॥ १२ ॥—

वृद्धत्वमासाद्य भवेत्तु यो वै
याप्यं तमाहुर्भिषजस्तु कासम् ॥ १३ ॥

इदानीं कासस्यावस्थायां याप्यत्वमाह—वृद्धत्वमित्यादि । वृद्धत्वं स्थविरत्वम् ॥ १३ ॥

---

१ 'सशब्दवैषम्य०' इति पा० । २ 'प्रसक्तवेगश्च समीरणेन' इति पा० । ३ 'कासेद्घनं' इति पा० ।

१ 'क्षतजः स उक्तः' इति पा० । २ 'तं सर्वलिङ्गं' इति पा० । ३ 'तमाहुः' इति पा० । ४ 'भवत्यथो वै' इति पा० ।

शृङ्गीवचाकट्फलकत्तृणाब्द-
धान्याभयाभार्ग्यमराह्वविश्वम् ।
उष्णाम्बुना हिङ्गुयुतं तु पीत्वा
बद्धास्यमप्याशु जहाति कासम् ॥ १४ ॥

इदानीं सामान्यं कासचिकित्सितमाह—शृङ्गीवचाकट्फलकत्तृणाब्देत्यादि । शृङ्गी कर्कटशृङ्गी । अब्दं मुस्ता । अमराह्वो देवदारुः । बद्धास्यं चिरकालं व्याप्य आस्ये स्थितिकरं, चिरकालानुबद्धमिति तात्पर्यार्थः । अत्र पूर्वं सामान्यचिकित्साकरणं कासे आशु चिकित्सा कर्तव्येति द्योतनार्थम् । मधुपर्पटकरहितः कट्फलादिरयम् ॥ १४ ॥

फलत्रिकव्योषविडङ्गशृङ्गी-
रास्नावचापद्मकदेवकाष्ठैः ।
लेहः समैः क्षौद्रसिताघृताक्तः
कासं निहन्यादचिरादुदीर्णम् ॥ १५ ॥

फलत्रिकव्योषविडङ्गेत्यादि । फलत्रिकं त्रिफला, व्योषं त्रिकटु, देवकाष्ठं देवदारु ॥ १५ ॥

पथ्यां सितामामलकानि लाजां
समागधीं चापि विचूर्ण्य शुण्ठीम् ।
सर्पिर्मधुभ्यां विलिहीत कासी
ससैन्धवां वोष्णजलेन कृष्णाम् ॥ १६ ॥

पथ्यामित्यादि । पथ्यादीनि चूर्णयित्वा मधुघृताभ्यां कासी विलिहीतेत्यर्थः । केचित् पथ्यादिकं लाजपर्यन्तमेकं योगं; समागधीं वाऽपि विचूर्ण्य शुण्ठीमिति द्वितीयं योगं मन्यन्ते । ससैन्धवामित्यादि । कृष्णा पिप्पली । उष्णजलेनेत्यत्र 'पिबेत्' इत्यध्याहार्यं, समानतन्त्रदर्शनात् । तथा च—"पिबेत् ससैन्धवां कृष्णां कासघ्नीं कोष्णवारिणा"—इति ॥ १६ ॥

खादेद्गुडं नागरपिप्पलीभ्यां
द्राक्षां च सर्पिर्मधुनाऽवलिह्यात् ।
द्राक्षां सितां मागधिकां च तुल्यां
सशृङ्गवेरं मधुकं तुगां च ॥ १७ ॥
लिह्याद्घृतक्षौद्रयुतां समांशां
सितोपलां वा मरिचांशयुक्ताम् ।
धात्रीकणाविश्वसितोपलाश्च
संचूर्ण्य मण्डेन पिबेच्च दध्नः ॥ १८ ॥

योगद्वयमाह—खादेद्गुडमित्यादि । नागरपिप्पलीभ्यां 'युक्तं' इति शेषः । द्राक्षां सितामित्यादि । द्राक्षामित्यादिको मागधिकां च तुल्यामित्येतत्पर्यन्त एको योगः । अत्र च खादेदिति संबन्धनीयं, समानतन्त्रदर्शनात् । तथाच,-"शर्करामागधीद्राक्षाः कासी खादेत् समांशिकाः"-इति । सशृङ्गवेरमित्यादिकः घृतक्षौद्रयुतं समांशमित्यन्तो द्वितीयो योगः । तुगा वंशलोचना, अन्ये वंशलोचनानुकारिपार्थिवं द्रव्यमाहुः । सितोपलामित्यादिर्मरिचांशयुक्तामितिपर्यन्तस्तृतीयः । सितोपलां शर्करां, मरिचांशयुक्तां मरिचभागयुक्ताम् । अत्रापि लिह्यादिति संबन्धनीयम् । धात्रीकणेत्यादि । धात्री आमलकीफलं, कणा पिप्पली, विश्वं शुण्ठी, सितोपला शर्करा । दध्नो मण्डेन मस्तुना ॥ १७ ॥ १८ ॥

हरेणुकां मागधिकां च तुल्यां
दध्ना पिबेत् कासगदाभिभूतः ।
उभे हरिद्रे सुरदारुशुण्ठीं
गायत्रिसारं च पिबेत् समांशम् ॥ १९ ॥
बस्तस्य मूत्रेण सुखाम्बुना वा
दन्तीं द्रवन्तीं च सतिल्वकाख्याम्[२] ।
भृष्टानि सर्पींष्यथ बादराणि
खादेत् पलाशानि ससैन्धवानि ॥ २० ॥

हरेणुकामित्यादि । गायत्रिसारः खदिरसारः । उभे हरिद्रे इत्यादिर्बस्तस्य मूत्रेणेति पर्यन्तमेको योगः । सुखाम्बुना वेत्यादिर्द्वितीयः; सुखाम्बु उष्णोदकम् । द्रवन्ती चीरितपत्रा दन्तीभेदः । सतिल्वकाख्यामिति पट्टिकालोध्रसहितामित्यर्थः । भृष्टानि सर्पींषीत्यादि । बादराणि पलाशानि बदरीपत्राणि ॥ १९ ॥ २० ॥

कोलप्रमाणं प्रपिबेद्धि हिङ्गु
सौवीरकेणाम्लरसेन वाऽपि ।

कोलप्रमाणमित्यादि । कोलप्रमाणं कर्षप्रमाणम् । सौवीरकेण काञ्जिकेन । अम्लरसेन बीजपूरकरसेन । यद्यपि हिङ्ग्वल्पप्रमाणमेवं हितं, तथाप्यर्धकर्षप्रमाणं हिङ्गु प्रयुज्यते, रोगविशेषेणाधिकप्रमाणस्यापि हितत्वात् । केचित् 'सौवीरकेणाम्लरसेन वाऽपि' इत्यत्र 'सौवीरकेणापि समातुलुङ्गम्' इति पठित्वा बीजपूरकेण सह हिङ्गु पिबेदिति व्याख्यानयन्ति ॥—

क्षौद्रेण लिह्यान्मरिचानि वाऽपि
भार्गीवचाहिङ्गुकृता च वर्तिः ॥ २१ ॥
धूमे प्रशस्ता घृतसंप्रयुक्ता
वेणुत्वगेलालवणैः कृता वा ।

क्षौद्रेणेत्यादि । धूमे धूमविषये, प्रशस्ता हिता, वर्तिः 'षोडशाङ्गुलनेत्रन्यस्ता पीता सती' इति शेषः । वेणुत्वक् वंशच्छल्ली । लवणैः सैन्धवैः ॥ २१ ॥—

मुस्तेङ्गुदीत्वङ्मधुकाह्वमांसी-
मनःशिलालैश्छगलाम्बुपिष्टैः ॥ २२ ॥
विधाय वर्तीश्च पयोऽनुपानं
धूमं पिबेद्वातबलासकासी ।

१ 'बद्धस्थितिकं' इति पा० । २ 'रास्नाबलापद्मकदेवकाष्ठैः' इति पा० ।

१ 'मुख्यां' इति पा० । २ 'सतिल्वकांशाम्' इति पा० ।

अपराण्यपि धूमद्रव्याण्याह—मुस्तेत्यादि । इङ्गुदीत्वक् इङ्गुदीवल्कलम् । आलं हरितालम् । छगलाम्बु छागमूत्रम् । विधाय कृत्वा । पयोनुपानं दुग्धानुपानम् । धूमं पिबेत् पूर्वोक्तविधानेन । यद्यपि पूर्वोक्तयोगानां दोषापेक्षया विषयो नोक्तस्तथाऽपि योगानां रसादीन् बुद्ध्वा यथादोषं वैद्यः पूर्वोक्तयोगान् प्रयोजयेत् ॥ २२ ॥—

पिबेच्च सीधुं मरिचान्वितं वा
तेनाशु कासं जयति प्रसह्य ॥ २३ ॥

पिबेच्च सीधुमित्यादि । सीधुः शास्यकः । तेन मरिचान्वितसीधुना । जयति 'आतुर' इति शेषः । प्रसह्य हठात् ॥ २३ ॥

द्राक्षाम्बुमञ्जिष्ठपुराह्वयाभिः
क्षीरं श्रृतं माक्षिकसंप्रयुक्तम्[१] ।

द्राक्षाम्बुमञ्जिष्ठेत्यादि । अम्बु वालकम् । पुराह्वया शल्की, गुग्गुलुमपरे । क्षीरमित्यत्र 'पिबेत्' इति शेषः । केचित् 'मञ्जिष्ठशुण्ठीजलगोस्तनीभिः क्षीरं घृतं माक्षिकसंयुतं वा'इतीदृशं पाठं पठन्ति ॥—

निदिग्धिकानागरपिप्पलीभिः
खादेच्च मुद्गान्मधुना सुसिद्धान्[२] ॥ २४ ॥

निदिग्धिकेत्यादि । सुसिद्धान् सुपक्वान् मुद्गान् निदिग्धिकादिभिश्चूर्णिताभिः सार्धं मधुना च खादेदिति । तथाच,—"क्षुद्रामृतानागरपिप्पलीभिः खादेच्च मुद्गानथ साधु सिद्धान्" इति । केचित् 'निदिग्धिकामूलसमांशसिद्धान्' इति पठन्ति, तत्र कण्टकारीमूलतुल्यभागेन सह खिन्नानित्यर्थः । अपरे 'कटुकोपगाढान्' इति पठित्वा त्रिकटुप्रगाढानिति व्याख्यानयन्ति ॥ २४ ॥

उत्कारिकां सर्पिषि नागराढ्यां
पक्त्वा समूलैस्त्रुटिकोलपत्रैः ।
एभिर्निषेवेत कृतां च पेयां
तन्वीं[३] सुशीतां मधुना विमिश्राम् ॥ २५ ॥

उत्कारिकामित्यादि । उत्कारिकां लप्सिकाम् । नागराढ्यां शुण्ठ्यधिकाम् । अत्रापि खादेदिति संबन्धनीयम् । 'त्रुटिकोलपत्रैः' इत्यत्र 'वटकोलपत्रैः' इत्यन्ये पठन्ति । एभिरित्यादि । एभिरिति पूर्वोक्तैरुत्कारिकादिद्रव्यैः । तन्वीमल्पसिक्थां बहुद्रवाम् ॥ २५ ॥

यत् स्नैहि सर्पिर्विहितं षडङ्गं
तद्वातकासं जयति प्रसह्य ।
विदारिगन्धादिकृतं घृतं वा
रसेन वा वासकजेन पक्वम् ॥ २६ ॥

१ 'घृतं माहिषसंप्रयुक्तम्' इति पा० । २ 'मुद्गान् सह साधु पक्वान्' इति पा० । ३ 'तन्वीमल्पसंस्कारां विरलसिक्थां च' इति पा० ।

सामान्यचिकित्सितमभिधायेदानीमतिदेशेन वातकासचिकित्सितमाह—यत् स्नैहि सर्पिरित्यादि । षडङ्गं षट्पलं, षट्पलस्य षडङ्गाख्या द्वितीया संज्ञेति प्रतिपादनार्थं षडङ्गकथनम् । तच्च षट्पलप्रमाणं पक्तव्यम् । विदारिगन्धादिगणक्काथकल्कसंस्कृतम् । रसेन क्काथेन ॥ २६ ॥

विरेचनं स्नैहिकमत्र चोक्त-
मास्थापनं चाप्यनुवासनं च ।
धूमं पिबेत् स्नैहिकमप्रमत्तः
पिबेत् सुखोष्णं घृतमेव चात्र ॥ २७ ॥
हिता यवाग्वश्च रसेषु सिद्धाः
पयांसि लेहाः सघृतास्तथैव ।

विरेचनमित्यादि । अत्र वातकासे । आस्थापनं निरूहणम् । ननु कासे वस्तिनिषेधात् कथमत्रास्थापनमुच्यते ? सत्यं; निषिद्धमप्यास्थापनं वातकासे प्रयुज्यते, दोषप्रत्यनीकत्वात् । धूमं पिबेदित्यादि । अत्र 'यथोक्तविधिना' इति शेषः । स्नैहिकं मधूच्छिष्टसर्जरसवसादिभिः कृतम् । अप्रमत्तः सावधानः । सुखोष्णमीषदुष्णम् । घृतमसंस्कृतम् । अत्र वातकासेऽन्यदपि यद्धितं तदाह—हिता यवाग्वश्चेत्यादि । रसेषु सिद्धाः मांसरसेषु सिद्धाः । पयांसि वातहरद्रव्यसिद्धानि । लेहाः पूर्वोक्ताः ॥ २७ ॥—

प्रच्छर्दनं कायशिरोविरेका-
स्तथैव धूमाः कवलग्रहाश्च ॥ २८ ॥
उष्णाश्च लेहाः कटुका निहन्युः
कफं विशेषेण विशोषणं च ।
कटुत्रिकं चापि वदन्ति पथ्यं
घृतं कुलिङ्गस्वरसे विपक्वम् ॥ २९ ॥
निर्गुण्डिपत्रस्वरसे च पक्वं
सर्पिः कफोत्थं विनिहन्ति कासम्[१] ।
पाठाविडव्योषविडङ्गसिन्धु-
त्रिकण्टरास्नाहुतभुग्बलाभिः ॥ ३० ॥
शृङ्गीवचाम्भोधरदेवदारु-
दुरालभाभार्ग्यभयाशटीभिः ।
सम्यग्विपक्वं द्विगुणेन सर्पि-
र्निदिग्धिकायाः स्वरसेन चैतत् ॥ ३१ ॥
श्वासाग्निसादस्वरभेदभिन्ना-
न्निहन्त्युदीर्णानपि पञ्च कासान् ।

कफकासचिकित्सितमाह—प्रच्छर्दनमित्यादि । प्रच्छर्दनं वमनम् । कायशिरोविरेका इति कायविरेको विरेचनं, शिरोविरेको नस्यभेदः; स च पिप्पल्यादिकृतः । तथैव धूमा विरेचना इत्यर्थः । उष्णा लेहाः कटुद्रव्यकृता इत्यर्थः । कटुकाः कफहरकटुद्रव्यकृताः । कफं कफकासं, कारणे कार्योपचारात् ।

१ 'जयति' इति पा० ।

विशोषणं लघुरूक्षाल्पभोजनम्, अन्ये नानाप्रकारलङ्घनमाहुः; तथाचोक्तम्,—"चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ। पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम्"—इति । पथ्यं हितम् । कृमिघ्नस्वरसे विपक्वमार्द्रविडङ्गस्वरसविपक्वं, स्वरसालाभे च पूर्वोक्तकल्पनया सविडङ्गचूर्णं रात्रिपर्युषितं जलं ग्राह्यम् । अन्ये तु कृमिघ्नशब्देन कृमिघ्नानि यानि द्रव्याणि सुरसादीनि तान्याहुः । निर्गुण्डिपत्रस्वरसे च पक्वमित्यादि निर्गुण्डिपत्रस्वरसे नीलसिन्धुवारस्वरसे, नीलसिन्धुवारश्च शेफालिकेति लोके । पाठेत्यादि । व्योषं त्रिकटुकम् । सिन्धु सैन्धवम् । त्रिकण्टो गोक्षुरकः । हुतभुक् चित्रकः । अम्भोधरः मुस्तम् । स्वरभेदभिन्नान् कांस्यपात्रादिस्वरभेदेन भिन्नान् । पञ्च कासान् हन्तीति स्तुतिवाक्यं, तस्मात् कफकासं हन्तीति ज्ञातव्यं, कफकासप्रस्तावात् । यद्यपि वातकासानन्तरं पित्तकासाभिधानं युक्तं न कफकासाभिधानं, तथाऽपि कफकासप्रतिकारस्योभयहितत्वप्रतिपादनार्थं कथनम् ॥ २८-३१ ॥—

विदारिगन्धोत्पलसारिवादीन्
निःक्वाथ्य वर्गं मधुरं च कृत्स्नम् ॥ ३२ ॥
घृतं पचेदिक्षुरसाम्बुदुग्धैः
काकोलिवर्गे च सशर्करं तत् ।
प्रातः पिबेत् पित्तकृते च कासे
रतिप्रसूते क्षतजे च कासे ॥ ३३ ॥

इदानीं पित्तजक्षयजक्षतकासानां चिकित्सितमाह—विदारिगन्धेत्यादि । आदिशब्दो विदारिगन्धादिभिः सह प्रत्येकं संबध्यते; तेन विदारिगन्धादिः, उत्पलादिः, सारिवादिश्च । मधुरं वर्गं काकोल्यादिकम् । कृत्स्नं समग्रम् । अत्रापि निःक्वाथ्येति संबध्यते । द्रवप्रमाणं च प्रत्येकं स्नेहसमम् । तथा च परिभाषा—"पञ्चप्रभृति यत्र स्युर्द्रवाणि स्नेहसंविधौ । तत्र स्नेहसमान्याहुरर्वाक् च स्याच्चतुर्गुणम्"—इति । काकोलीवर्गे 'कल्कीकृते' इति शेषः । सशर्करं शर्कराप्रक्षेपम् । प्रातः पूर्वाह्णे, पित्तादिकासे पिबेत् ॥ ३२ ॥ ३३ ॥

खर्जूरभार्गीमगधाप्रियाल-
मधूलिकैलामलकैः समांशैः ।
चूर्णं सिताक्षौद्रघृतप्रगाढं
त्रीन् हन्ति कासानुपयुज्यमानम् ॥ ३४ ॥

खर्जूरभार्गीत्यादि । प्रियालश्चारः । मधूलिका मर्कटकः । समांशैस्तुल्यप्रमाणैः । त्रीन् कासान् पित्तोरःक्षतक्षयजान् । खर्जूरादिभिस्तुल्यभागैः कृतं चूर्णं सिताक्षौद्रघृतप्रगाढं लेहत्वेनोपयुज्यमानं त्रीन् कासान् हन्तीति पिण्डार्थः । पित्तकासचिकित्सितं यदत्रोरःक्षतक्षयकासाभ्यां सहैव कथितं तदुभयतुल्यचिकित्सितख्यापनार्थम् ॥ ३४ ॥

रक्ताहरिद्राञ्जनवह्निपाठा-
मूर्वोपकुल्या विलिहेत् समांशाः ।
क्षौद्रेण कासे क्षतजे क्षयोत्थे
पिबेद्घृतं चेक्षुरसे विपक्वम् ॥ ३५ ॥

रक्तेत्यादि । रक्ता मञ्जिष्ठा, अञ्जनं सौवीराञ्जनं समानतन्त्रदर्शनात्, वह्निः अजमोदा, मूर्वा चोरस्नायुः, उपकुल्या पिप्पली । समांशास्तुल्यभागाः । मञ्जिष्ठादीनि पिप्पल्यन्तानि द्रव्याणि तुल्यभागानि चूर्णीकृतानि क्षतजे क्षयोत्थे च कासे मधुना विलिहेत्, चकारात् पित्तकासेऽपि; इक्षुरसे विपक्वं वा घृतं पिबेदिति पिण्डार्थः ॥ ३५ ॥

चूर्णं पिबेदामलकस्य वाऽपि
क्षीरेण पक्वं सघृतं हिताशी ।

तेषामपरमपि चिकित्सितमाह—चूर्णमित्यादि । आमलकस्य चूर्णं सघृतं विपक्वं हिताशी क्षीरेण सह पिबेदिति संबन्धः । 'हिताशी' इत्यत्र 'हिताय' इति केचित् पठन्ति; तत्र कासशान्तये इति व्याख्यानम् ॥—

चूर्णानि गोधूमयवोद्भवानि
काकोलिवर्गश्च कृतः सुसूक्ष्मः ॥ ३६ ॥
कासेषु पेयस्त्रिषु कासवद्भिः
क्षीरेण सक्षौद्रघृतेन वाऽपि ।

पित्तजादिकासत्रयेऽपरमपि चिकित्सितमाह–चूर्णानीत्यादि । गोधूमादिचूर्णानि चूर्णीकृतः काकोल्यादिगणश्च मधुघृतयुक्तेन दुग्धेन पित्तोरःक्षतक्षयजकासवद्भिः पुरुषैः पेय इत्यर्थः । केचिद्गोधूमचूर्णादिचूर्णत्रयं यथाक्रमं त्रिषु कासेषु त्रिभिरेव क्षीरादिभिर्द्रवैः पेयमिच्छन्ति ॥ ३६ ॥—

गुडोदकं वा क्वथितं पिबेद्धि
क्षौद्रेण शीतं मरिचोपदंशम् ॥ ३७ ॥

गुडोदकमित्यादि । गुडोदकं शीतकषायविधिना गृहीतं, क्वथितमिति पक्वमित्यर्थः; एतेन शीतकषायीकृतस्य गुडोदकस्य पश्चात्किंचित्पक्वस्य शीतीभूतस्य क्षौद्रेण सह पानमित्यर्थः । वेति विकल्पस्तु पूर्वयोगापेक्षया । मरिचोपदंशं समरिचभक्षणम् ॥ ३७ ॥

प्रस्थत्रयेणामलकीरसस्य
शुद्धस्य दत्त्वाऽर्धतुलां गुडस्य ।
चूर्णीकृतैर्ग्रन्थिकचव्यजीर-
व्योषेभकृष्णाहपुषाजमोदैः ॥ ३८
विडङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पिचुप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥ ३९ ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।

१ 'कफकासचिकित्सितस्य क्षयजहितत्वप्रतिपादनार्थं' इति पा० ।
२ 'वर्गान्' इति पा० ।

अनेन सर्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥ ४० ॥
शाम्यन्ति चायं चिरमन्तराग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणां च वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रतीतः ॥ ४१ ॥

कल्याणगुडमाह—प्रस्थत्रयेणेत्यादि । शुद्धस्य निर्मलस्य । अर्धतुलां पञ्चाशत्पलानि । ग्रन्थिकं पिप्पलीमूलं, व्योषं त्रिकटु, इभकृष्णा हस्तिपिप्पली, सिन्धु सैन्धवं, अग्निश्चित्रकः । पिचुप्रमाणैः कर्षप्रमाणैः; 'पलप्रमाणैः' इत्यन्ये पठन्ति; तन्न, समानतन्त्रविरोधात् । दत्त्वा त्रिवृच्चूर्णपलानि चाष्टावित्यत्र 'ईषत्तैलभृष्टानि' इति शेषः, त्रिवृतो रेचनीयतास्फोटनार्थं वृद्धपारम्पर्यस्मरणात् । यथावत् मृदुमध्यक्रूरकोष्ठक्रमानुरूपं खरमृदुमध्यपाकेनेत्यर्थः । अयमिति कल्याणकः । पुंस्त्वस्य शुक्रस्य, अत्रापि हतस्येति संबध्यते । कल्याणक इति कल्याणकरणात् ॥ ३८-४१ ॥—

द्विपञ्चमूलेभकणात्मगुप्ता-
भार्गीशटीपुष्करमूलविश्वान् ।
पाठामृताग्रन्थिकशङ्खपुष्पी-
रास्नाग्न्यपामार्गबलायवासान् ॥ ४२ ॥
द्विपालिकान् न्यस्य यवाढकं च
हरीतकीनां च शतं गुरूणाम् ।
द्रोणे जलस्याढकसंयुते च
क्वाथे कृते पूतचतुर्थभागे ॥ ४३ ॥
पचेत्तुलां शुद्धगुडस्य दत्त्वा
पृथक् च तैलात् कुडवं घृताच्च ।
चूर्णं च तावन्मगधोद्भवाया
देयं च तस्मिन्मधु सिद्धशीते ॥ ४४ ॥
रसायनात् कर्षमतो विलिह्या-
द्द्वे चाभये नित्यमथाशु हन्यात् ।
तद्राजयक्ष्मग्रहणीप्रदोष-
शोफाग्निमान्द्यस्वरभेदकासान् ॥ ४५ ॥
पाण्ड्वामयश्वासशिरोविकारान्
हृद्रोगहिक्काविषमज्वरांश्च ।
मेधाबलोत्साहमतिप्रदं च
चकार चैतद्भगवानगस्त्यः ॥ ४६ ॥

अगस्त्यावलेहमाह—द्विपञ्चमूलेत्यादि । द्विपञ्चमूलं दशमूलम् । इभकणा गजपिप्पली । आत्मगुप्ता कपिकच्छूः । ग्रन्थिकं पिप्पलीमूलम् । अग्निश्चित्रकः । यवासो धन्वयवासकः, पूर्वपदलोपात् । न्यस्य प्रक्षिप्य । यवाढकं चतुःषष्टिपलानि । गुरूणामतिस्थूलानाम् । जलद्रोणे द्वादशाधिकपञ्चशतपलेषु । द्विपञ्चमूलादीन् प्रत्येकं द्विपलप्रमाणान् यवाढकं च तथा हरीतकीशतं जलद्रोणे प्रक्षिप्य तावत् पचेद्यावत् पादावशेषितं, ततश्च तस्मिन् कषाये वस्त्रपूते गुडतुलां शुद्धखिन्नहरीतकीशतं तथा घृततैलयोः प्रत्येकमष्टौ पलानि प्रक्षिप्य पचेद्यावत्तन्तुमत्वाज्जलपतितं न शीर्यते, ततश्च पिप्पलीचूर्णं चतुःपलं मधु चाष्टपलप्रमाणं दत्त्वा स्थापयेत्, ततस्तस्माद्रसायनात् कल्कमर्धपलप्रमाणं लिह्यात्, हरीतकीद्वयं च खादेत् । एतद्रसायनं भगवता अगस्त्येन कृतम् ॥ ४२-४६ ॥

कुलीरशुक्तीचटकैणलावा-
न्निःक्वाथ्य वर्गं मधुरं च कृत्स्नम् ।
पचेद्घृतं तत्तु निषेव्यमाणं
हन्यात् क्षतोत्थं क्षयजं च कासम् ॥ ४७ ॥
शतावरीनागबलाविपक्वं
घृतं विधेयं च हिताय कासिनाम् ।

कुलीरशुक्तीत्यादि । कुलीरः कर्कटः, शुक्तिः जलशुक्तिः, चटको ग्रामचटकः, एणः कृष्णमृगः, मधुरवर्गः काकोल्यादिः । कृत्स्नं समग्रम् । केचित् 'निःक्वाथ्य वर्गैर्मधुरैस्तथाऽन्यं' इति पठित्वा काकोल्यादिसहितानि लावादीनि निःक्वाथ्य तथा अन्यैर्मधुरैर्जीवनीयैः कल्कीकृतैर्घृतं पचेदिति व्याख्यानयन्ति । चकारात् पित्तजकासमपि । शतावरीनागबलेत्यादि । केचित् शतावरीनागबलाकल्के घृतं सिद्धमिच्छन्ति; तन्न, समानतन्त्रविरोधात् ॥ ४७ ॥—

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां
सुश्रुतव्याख्यायामुत्तरतन्त्रे कासप्रतिषेधो नाम
द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशत्तमोऽध्यायः ।

अथातः स्वरभेदप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

श्वासकासप्रतिषेधानन्तरमूर्ध्वगतत्वसामान्यात् श्वासकासचिकित्सितसाध्यत्वाच्च स्वरभेदप्रतिषेधारम्भो युक्त इत्यत आह —अथात इत्यादि । स्वरभेदः स्वरोपघातः ॥ १ ॥ २ ॥

अत्युच्चभाषणविषाध्ययनातिगीत-
शीतादिभिः प्रकुपिताः पवनादयस्तु ।
स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां
हन्युः स्वरं भवति चापि हि षड्विधः सः ॥ ३ ॥

स्वरभेदहेतुसंप्राप्तिसंख्या आह—अत्युच्चभाषणेत्यादि । अध्ययनमनवरतं वेदादिपाठः । अतिगीतं निरन्तरं मङ्गला-

१ 'द्विपालिकांशांशांश्च' इति पा० ।

१ 'शतावरी नागबलादिकाथे' इति पा० । २ '०विषाध्ययनाभिघात०' इति पा० ।

दिगानम् । शीतादिभिरित्यत्रादिशब्दात् पित्तकफकोपहेतवो गृह्यन्ते । यदत्र अत्युच्चभाषणादीनां वातकोपहेतूनामेव साक्षात् कथनं कृतं न पित्तकफकोपहेतूनां तत् स्वरोपघातकर्तृत्वे वायोः प्राधान्यख्यापनार्थम् । अन्ये तु शीतादीत्यत्रादिशब्देन गुरुलघुस्निग्धरूक्षादीन् गुणान् गृह्णन्ति । स्वरवहेषु स्रोतःसु शब्दवाहिनीषु धमनीषु, ते वातादयः, गताः प्राप्ताः, प्रतिष्ठां स्थितिम् । षडविधः षट्प्रकारः; पृथक् वातादिभिस्त्रयः, सन्निपातेनैकः, मेदःक्षयाभ्यां प्रत्येकमेकः; एवं षट्प्रकारः । ननु, समानतन्त्रे 'वातात् पित्तात् कफात् कासाद्रक्तवेगात् सपीनसात्' इत्यत्र यथा षड्विधः स्वरभेद उक्तस्तेन सार्धं कथं न विरोधः । सत्यं, कासजप्रतिश्यायजयोर्लिङ्गत्वेनोक्तत्वाद्ग्रहणं, रक्तजस्य तु कफग्रहणेनैव ग्रहणं, यतो रक्तं कफयुक्तं स्वरभेदं करोति समानतन्त्रोक्तत्वात् । यद्येवं तर्हि कथं न संख्याधिक्यं ? सत्यं, कासजप्रतिश्यायजयोर्वातिकत्वेन ग्रहणम् । अत्युच्चभाषणेत्यादिको हेतुः, प्रकुपिताः पवनादय इत्यादिका संप्राप्तिः, भवति चापि हि षड्विधः स इति संख्या ॥ ३ ॥

वातेन कृष्णनयनाननमूत्रवर्चा
भिन्नं शनैर्वदति गद्गदवत् स्वरं च ।

वातिकस्वरभेदलक्षणमाह—वातेनेत्यादि । कृष्णशब्दो नयनादिभिर्विर्चःपर्यन्तैः संबध्यते । भिन्नमनवस्थितम् । उक्तं च तन्त्रान्तरे—"स्वरभेदो भवेद्वाताद्रूक्षः क्षामबलस्वरः"—इति । 'गद्गदवत् स्वरम्' इत्यत्र केचित् 'गर्दभवत् खरं' इति पठन्ति ॥—

पित्तेन पीतवदनाक्षिपुरीषमूत्रो
ब्रूयाद्गलेन परिदाहसमन्वितेन ॥ ४ ॥

पित्तजस्वरभेदलक्षणमाह—पित्तेनेत्यादि । पीतशब्दो वदनादिभिर्मूत्रान्तैः संबध्यते । 'स विदाहसमन्वितेन' इति केचित् पठन्ति, तत्र स इति स्वरभेदी पुरुषः ॥ ४ ॥

कृच्छ्रात् कफेन सततं कफरुद्धकण्ठो
मन्दं शनैर्वदति चापि दिवा विशेषः ।

कफजस्वरभेदलक्षणमाह—कृच्छ्रादित्यादि । सततमनवरतम् । कफरुद्धकण्ठः श्लेष्मावृतकण्ठः । मन्दं शनैरिति मन्दं मन्दमित्यर्थः । दिवा विशेष इति दिवसे विशेषो भवेत्, कफक्षयात् । 'दिवा विशेषात्' इति केचित् पठन्ति; रात्रौ तावत् कफरुद्धकण्ठत्वान्न वदत्येव, दिवा पुनः कफापचयाद्विशेषो भवति, तस्माच्च विशेषान्मन्दं मन्दं वदतीति व्याख्यानयन्ति ॥—

सर्वात्मके भवति सर्वविकारसंप-
दव्यक्तता च वचसस्तमसाध्यमाहुः ॥ ५ ॥

सान्निपातिकस्वरभेदलक्षणमाह—सर्वात्मक इत्यादि । सर्वात्मके सन्निपातोत्थस्वरभेदे । सर्वविकारसंपद् वातादिलिङ्गप्रादुर्भावः । अव्यक्तता च वचसः अस्पष्टवाक्त्वम् । तं सान्निपातिकस्वरभेदम् ॥ ५ ॥

धूप्येत वाक् क्षयकृते क्षयमाप्नुयाच्च
वागेष चा(वा)पि हतवाक् परिवर्जनीयः ।

क्षयजस्वरभेदलक्षणमाह—धूप्येतेत्यादि । धूप्येत मुखाद्धूममिवोद्वमति, 'ब्रुवन्' इति वाक्यशेषः । क्षयमाप्नुयाद् वागिति वचनक्षयं प्राप्नुयात् 'वातात्' इति शेषः ॥—

अन्तर्गलं स्वरमलक्ष्यपदं चिरेण
मेदश्चयाद्वदति दिग्धगलौष्ठतालुः ॥ ६ ॥

क्षीणस्य वृद्धस्य कृशस्य चापि
चिरोत्थितो यश्च सहोपजातः ।
मेदस्विनः सर्वसमुद्भवश्च
स्वरामयो यो न स सिद्धिमेति ॥ ७ ॥

मेदोजस्वरभेदलक्षणमाह—अन्तर्गलमित्यादि । अन्तर्गलं गलस्यान्तरे । स्वरं वदति शब्दं करोति । 'अन्तर्गतं' इति केचित् पठन्ति, तत्रापि स एवार्थः । यतोऽन्तर्गलं स्वरं वदति अत एव अलक्ष्यपदमिति, न लक्ष्यन्ते पदानि यस्येत्यर्थः । मेदश्चयान्मेदोवृद्धेः । दिग्धं मेदोदिग्धं गलौष्ठताल्वु यस्य स तथा । 'मेदोऽन्वयात्' इति केचित् पठन्ति ॥ ६ ॥ ७ ॥

स्निग्धान् स्वरातुरनरानपकृष्टदोषान्
न्यायेन तान् वमनरेचनबस्तिभिश्च ।
नस्यावपीडमुखधावनधूमलेहैः
संपादयेच्च विविधैः कवलग्रहैश्च ॥ ८ ॥

स्वरभेदस्य सामान्यचिकित्सामाह—स्निग्धानित्यादि । यद्यपि कफजमेदोजयोः स्वरभेदयोरपतर्पणसाध्यत्वात् स्नेहनं न युक्तं, तथाऽपि यथादोषप्रत्यनीकैर्यथादोषप्रत्यनीकसाधितैश्च स्नेहैः स्नेहनं युक्तमेव, अथवा मेदःकफजयोरपि वायुसद्भावात् स्नेहनोपदेशः । अपकृष्टदोषान् आकृष्टदोषान्; अत्र वमनविरेचनबस्तिभिरिति संबध्यते । न्यायेन यथाविधीत्यर्थः । वमनादिभिरपकृष्टदोषान् स्वरभेदातुरान् किं कुर्यादित्याह—नस्यावपीडेत्यादि । अवपीड्य दीयते इत्यवपीडो नस्यभेदः । मुखधावनं गण्डूषादि । संपादयेत् योजयेत् । विविधैः दोषप्रत्यनीकत्वेन नानाप्रकारैः । कवलग्रहैः गण्डूषभेदैः । तथा च—"सुखं संचार्यते या तु गण्डूषे सा प्रकीर्तिता । असंचार्या तु या मात्रा कवले सा प्रकीर्तिता"—इति ॥ ८ ॥

यः श्वासकासविधिरादित एव चोक्त-
स्तं चाप्यशेषमवतारयितुं यतेत ।

१ 'च विदाहसमन्वितेन' इति पा० । २ 'विशेषात्' इति पा० ।

१ 'अन्तर्गतस्वरं' इति पा० । २ 'मेदोऽन्वयात्' इति पा० । ३ 'संयोजयेच्च' इति पा० । ४ 'भिषग्वरैः' इति पा० ।

अन्यदपि स्वरभेदचिकित्सितमतिदेशेनाह—य इत्यादि । श्वासकासप्रतिषेधे सामान्येनादौ यः श्वासकासविधिरुद्दिष्टस्तं विधिं समस्तमपि यथादोषं कर्तुं यतेतेति पिण्डार्थः ॥—

वैशेषिकं च विधिमूर्ध्वमतो वदामि
तं वै स्वरातुरहितं निखिलं निबोध ॥ ९ ॥

वैशेषिकमित्यादि । अत इति सामान्यचिकित्सानन्तरम् । तं वै स्वरातुरहितमिति स्वरभेदातुरहितम् । निबोध जानीहि ॥९॥

स्वरोपघातेऽनिलजे भुक्तोपरि घृतं पिबेत् ।
कासमर्दकवार्ताकमार्कवस्वरसे शृतम् ॥ १० ॥
पीतं घृतं हन्त्यनिलं सिद्धमार्तगले रसे ।

तमेव वैशेषिकविधिमाह—स्वरोपघात इत्यादि । भुक्तोपरि भोजनोपरि । मार्कवो भृङ्गराजः, शृतं पक्वम् । अनिलं वातजस्वरभेदम्, उपचारात् । आर्तगलः ककुभः ॥ १० ॥—

यवक्षाराजमोदाभ्यां चित्रकामलकेषु वा ॥ ११ ॥
देवदार्वग्निकाभ्यां वा सिद्धमाज्यं समाक्षिकम् ।

अपरमपि वातजे घृतत्रयमाह—यवक्षाराजमोदाभ्यामित्यादि । अग्निको अजमोदा । आज्यं 'घृतं' इति शेषः । समाक्षिकं समधु । अत्रापि पीतमिति योज्यम् ॥ ११ ॥—

सुखोदकानुपानो वा ससर्पिष्को गुडौदनः ॥ १२ ॥

वातिके पथ्ययोगमाह—सुखोदकानुपान इत्यादि । सुखोदकमीषदुष्णोदकम् । केचिदमुं योगं पैत्तिके मन्यन्ते; तन्न, समानतन्त्रेषु वातिकस्वरभेद एव प्रयुक्तत्वात् ॥ १२ ॥

क्षीरानुपानं पित्ते तु पिबेत् सर्पिरतन्द्रितः ।

पैत्तिकस्वरभेदचिकित्सामाह—क्षीरानुपानमित्यादि । अतन्द्रितोऽनलसः ॥—

अश्नीयाच्च ससर्पिष्कं यष्टीमधुकपायसम् ॥ १३ ॥

पैत्तिके पथ्ययोगमाह—अश्नीयादित्यादि । यष्टीमधुकपायसमिति यष्टीमधुकसाधितक्षीरसिद्धांस्तण्डुलान्; अथवा यष्टीमधुकान्वितं पायसं यष्टीमधुकपायसम् ॥ १३ ॥

लिह्यान्मधुरकाणां वा चूर्णं मधुघृताप्लुतम् ।
शतावरीचूर्णयोगं बलाचूर्णमथापि वा ॥ १४ ॥

लिह्यादित्यादि । मधुरकाणां काकोलीप्रभृतीनाम् । शतावरीचूर्णयोगमिति शतावरीचूर्णस्य योगः संयोगो यत्र तत्तथा, अत्रापि मधुघृताप्लुतं लिह्यादिति संबन्धनीयम् ॥ १४ ॥

पिबेत् कटूनि मूत्रेण कफजे स्वरसंक्षये ।
लिह्याद्वा मधुतैलाभ्यां भुक्त्वा खादेत् कटूनि वा॥

कफजस्वरभेदचिकित्सामाह—पिबेदित्यादि । कटूनि त्रिकटुकादीनि । मूत्रेण गोमूत्रेण प्राधान्यात् । स्वरसंक्षये स्वरभेदे । लिह्याद्वा मधुतैलाभ्यामित्यादि मधुतैलाभ्यां वा कटूनि त्रिकटुकप्रभृतीनि लिह्यात्, भुक्त्वा वा तानि खादेत् ॥ १५ ॥

स्वरोपघाते मेदोजे कफवद्विधिरिष्यते ।

मेदोजस्वरभेदे कफजचिकित्सामतिदिशन्नाह—स्वरोपघात इत्यादि । कफवत् कफजस्वरभेदवत् ॥—

सर्वजे क्षयजे चापि प्रत्याख्यायाचरेत् क्रियाम्॥१६॥

सान्निपातिकक्षयजयोरसाध्ययोरपि चिकित्सा कर्तव्येत्याह—सर्वज इत्यादि । प्रत्याख्याय असाध्यत्वेन निराकृत्य । आचरेत् कुर्यात् । क्रियामिति सान्निपातिके सर्वेषां वातादिस्वरभेदानां सर्वमेव चिकित्सितं कार्यं, क्षयजे तु क्षयोक्तमिति; केचिदुभयोरपि सामान्यचिकित्सितं कुर्यादित्याहुः ॥ १६ ॥

शर्करामधुमिश्राणि शृतानि मधुरैः सह ।
पिबेत् पयांसि यस्योच्चैर्वदतोऽभिहतः स्वरः ॥ १७ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे छर्दिप्रतिषेधो नाम (पञ्चदशोऽध्यायः, आदितः) त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

अत्युच्चभाषणोत्थस्वरभेदस्य वातात्मकत्वेऽपि निमित्तभेदमाश्रित्य विशिष्टां चिकित्सामाह—शर्करेत्यादि । मधुरैः काकोल्यादिभिः श्रृतानि पयांसि शर्करामधुमिश्राणि पिबेदिति पिण्डार्थः । पयांसीत्यत्र बहुवचनं गोमहिष्यजानां क्षीरपरिग्रहाय ॥ १७ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे स्वरभेदप्रतिषेधो नाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशत्तमोऽध्यायः ।

अथातः कृमिरोगप्रतिषेधमध्यायं व्याख्यास्यामः॥१
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥
अजीर्णाध्यशनासात्म्यविरुद्धमलिनाशनैः ।
अव्यायामदिवास्वप्नगुर्वतिस्निग्धशीतलैः ॥ ३ ॥
माषपिष्टान्नविदलबिसशालूकसेरुकैः ।
पर्णशाकसुराशुक्तदधिक्षीरगुडेक्षुभिः ॥ ४ ॥
पललानूपपिशितपिण्याकपृथुकादिभिः ।
स्वाद्वम्लद्रवपानैश्च श्लेष्मा पित्तं च कुप्यति ॥ ५ ॥
कृमीन् बहुविधाकारान् करोति विविधाश्रयान् ।
आमपक्वाशये तेषां कफविड्जन्मनां पुनः ॥
धमन्यां रक्तजानां च प्रसवः प्रायशः स्मृतः ॥ ६ ॥

केषांचित् कृमीणां सामान्यं हेतुमाह—अजीर्णेत्यादि । अजीर्णमामविदग्धादिभेदभिन्नं, अध्यशनमजीर्णभोजनं, असात्म्यं यत् सेवितं सुखार्थं न संपद्यते, विरुद्धं हिताहितीयोक्तं, मलिनं

समलम्। पिष्टान्नं तण्डुलपिष्टादि, विदलं मकुष्ठादि, बिसं बिसाण्डकं, शालूः पद्मकन्दः। पर्णशाकं पत्रशाकं, सूक्तं संधानकविशेषः। पललस्तिलकल्कः, आनूपपिशितमानूपमांसं, पिण्याकं यन्त्रपीडिततिलखली 'पीता' इति लोके, पृथुकश्चिपिटकः, आदिशब्दादेवंप्रकारा अन्येऽपि। बहुविधाकारान् विविधाकारान्। विविधाश्रयानिति नानाप्रकाराश्रयानित्यर्थः। प्रसव उत्पत्तिः। प्रायोग्रहणादन्यत्रापि संभवो ज्ञातव्यः। केचिदत्र अजीर्णाध्यशनादिकं हेतुगणं न पठन्ति, तेषां च हेत्ववगतिर्वक्ष्यमाणात् 'क्षीराणि मांसानि' इत्यादिप्रतिषेधविधानात्; मया तु सुखबोधार्थं हेतुगणः पठितः। अपरे तु 'अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्टगुडोपभोक्ता। व्यायामजातानि च वर्ज्यमानः खप्नादिवान् वै लभते क्रिमीचा' इति पठन्ति ॥ १–६ ॥

विंशतेः क्रिमिजातीनां त्रिविधः संभवः स्मृतः।
पुरीषकफरक्तानि, तासां वक्ष्यामि विस्तरम् ॥ ७ ॥

इदानीं विंशतिसंख्यानामपि क्रिमिजातीनां कारणत्रैविध्यमाह—विंशतेरित्यादि। जातिग्रहणं क्रिमीणामानन्त्यख्यापनार्थं; तच्चानन्त्यं विंशत्यामेवावरुद्धं, अतो विंशतिसंख्याकरणं सार्थकम्। संभवः कारणम्। कस्त्रिविधः संभव इत्याह—पुरीषेत्यादि। ननु, अजीर्णाध्यशनादयो हेतव उक्ताः कथं पुरीषादय उच्यन्ते? सत्यं, अजीर्णादयः पुरीषादीनां हेतवः, पुरीषादयश्च क्रिमीणामिति। यद्यपि क्रिम्यारम्भका न पुरीषादयः, तथाऽप्युपचारात् पुरीषादीनामपि क्रिम्यारम्भकत्वम्। पुरीषाद्यधिष्ठिता दोषाः पुरीषादि, घृतादिदग्धवत्; एतेनाजीर्णादिभिः प्रकुपिता दोषाः पुरीषादीन्यधिष्ठाय क्रिमीन् जनयन्ति। तासां क्रिमिजातीनाम्। केचित् 'विस्तरं' इत्यत्र 'लक्षणं' इति पाठान्तरं सव्याख्यानं पठन्ति; तच्च शिष्यबुद्धिव्याकुलत्वहेतुत्वात् परित्यक्तम् ॥ ७ ॥

अजवा विजवाः किप्याश्चिप्या गण्डूपदास्तथा।
चूरवो द्विमुखाश्चैव ज्ञेयाः सप्त पुरीषजाः ॥ ८ ॥

पुरीषजक्रिमिनामान्याह—अजवा इत्यादि। अजवादयो द्विमुखान्ताः सप्त पुरीषजाः क्रिमयः ॥ ८ ॥

श्वेताः सूक्ष्मास्तुदन्त्येते गुदं प्रति सरन्ति च।
तेषामेवापरे पुच्छैः पृथवश्च भवन्ति हि ॥ ९ ॥
शूलाग्निमान्द्यपाण्डुत्वविष्टम्भबलसंक्षयाः।
प्रसेकारुचिहृद्रोगविड्भेदास्तु पुरीषजैः ॥ १० ॥

पुरीषजानां लक्षणमाह—श्वेता इत्यादि। य एते पुरीषजाः क्रिमयः श्वेताः सूक्ष्माश्च भवन्ति, ते बाहुल्येनादृष्टत्वाद्गुदं तुदन्ति प्रतिसरन्ति च। तेषामेव सप्तानां मध्ये अपरे पुच्छैः पृथवो भवन्ति। पुरीषजैः सप्तभिः क्रिमिभिः शूलाग्निमान्द्यादयो भवन्ति। विष्टम्भो गुडगुडाशब्दः। प्रसेको लालास्रावः। विड्भेदः द्रवपुरीषता ॥ ९ ॥ १० ॥

रक्ता गण्डूपदा दीर्घा गुदकण्डूनिपातिनः।
शूलाटोपशकृद्भेदपक्तिनाशकराश्च ते ॥ ११ ॥

तेषामेव सप्तानां पुरीषजानां मध्ये गण्डूपदानां लक्षणं कर्म चाह—रक्तेत्यादि। पक्तिनाशकरा अग्निनाशकराः, कारणे कार्योपचारात् ॥ ११ ॥

दर्भपुष्पा महापुष्पाः प्रलूनाश्चिपिटास्तथा।
पिपीलिका दारुणाश्च कफकोपसमुद्भवाः ॥ १२ ॥

कफक्रिमिनामान्याह—दर्भपुष्पा इत्यादि। दर्भपुष्पादिका दारुणपर्यन्ताः कफकोपजाः षट् क्रिमयः ॥ १२ ॥

रोमशा रोममूर्धानः सपुच्छाः श्यावमण्डलाः।
रूढधान्याङ्कुराकाराः शुक्लास्ते तनवस्तथा ॥ १३ ॥

तेषामाकृतिमाह—रोमशा इत्यादि। रोमशाः सर्वतो रोमान्विताः। रोममूर्धानः सरोममस्तकाः। श्यावमण्डलाः श्याममण्डलयुक्ताः ॥ १३ ॥

मज्जादा नेत्रलेढारस्तालुश्रोत्रभुजस्तथा।

तेषामेव कर्मविशेषेण संज्ञान्तरमाह—मज्जादा इत्यादि ॥—

शिरोहृद्रोगवमथुप्रतिश्यायकराश्च ते ॥ १४ ॥

तेषां सर्वेषामेव कर्माण्याह—शिरोहृद्रोगेत्यादि। रोगशब्दः शिरोहृद्भ्यां संबध्यते, तेन शिरोरोगो हृद्रोगश्च, वमथुः छर्दिः। चकारादन्यानपि कफजव्याधीन् कुर्वन्ति। ते कफजाः क्रिमयः ॥ १४ ॥

केशरोमनखादाश्च दन्तादाः किक्किशास्तथा।
कुष्ठजाः सपरीसर्पा ज्ञेयाः शोणितसंभवाः ॥ १५ ॥

रक्तजक्रिमिनामान्याह—केशरोमेत्यादि। केशादाद्याः परीसर्पान्ताः सप्त रक्तजाः क्रिमयः ॥ १५ ॥

ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च पृथवस्तथा।

तेषामाकृतिमाह—त इत्यादि। ते रक्तजाः क्रिमयः। पृथवः स्थूलाः ॥—

रक्ताधिष्ठानजान् प्रायो विकारान् जनयन्ति ते ॥ १६ ॥

तेषां कर्माण्याह—रक्ताधिष्ठानजानित्यादि। रक्ताधिष्ठानजान् व्याधिसमुद्देशीयोक्तान् कुष्ठविसर्पपिडकादीन् ॥ १६ ॥

माषपिष्टान्नविदलपर्णशाकैः पुरीषजाः।
मांसमाषगुडक्षीरदधितैलैः कफोद्भवाः ॥ १७ ॥
विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि।
ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः ॥ १८ ॥
भक्तद्वेषोऽतिसारश्च संजातक्रिमिलक्षणम्।

---

१ 'व्यायामवर्जी च दिवाशयानो विरुद्धभुक् संलभते क्रिमींस्तु' इति माधवनिदाने पाठान्तरम्। २ 'अयवा बियवाः' इति पा०।

१ 'उपचारात्' इति पा०।

पुरीषजादिक्रमीणां सामान्यकारणमभिधायेदानीं विशेषकारणमाह—माषपिष्टान्नविदलेत्यादि । पिष्टान्नं तण्डुलादिपिष्टजम् ॥ १७ ॥ १८ ॥—

दृश्यास्त्रयोदशाद्यास्तु क्रमीणां परिकीर्तिताः ॥ १९ ॥
केशादाद्यास्त्वदृश्यास्ते द्वावाद्यौ परिवर्जयेत् ।

इदानीं कृमीणां दृश्यादृश्यत्वेन साध्यासाध्यत्वेन च विभागकरणार्थमाह—दृश्या इत्यादि । आद्यास्त्रयोदशेति अजवाद्या दारुणान्ता इत्यर्थः । केशादाद्या इति केशादाद्याः परीसर्पान्ता रक्तजाः कृमय इत्यर्थः । द्वावाद्याविति रक्तजापेक्षयैव आद्यौ, तेन केशादरोमादावित्यर्थः । तथाचोक्तम्—"असाध्यौ द्वौ तु विज्ञेयौ रोमकेशादसंज्ञितौ" इति ॥ १९ ॥—

एषामन्यतमं ज्ञात्वा जिघांसुः स्निग्धमातुरम् ॥२०॥
सुरसादिविपक्केन सर्पिषा वान्तमादितः ।
विरेचयेत्तीक्ष्णतरैर्योगै-

निदानमभिधायेदानीं चिकित्सावसरः—एषामन्यतममित्यादि । एषां क्रिमीणां मध्ये अन्यतममेकतमं जिघांसुः, स्निग्धमातुरं सुरसादिगणविपक्केन सर्पिषा स्निग्धमातुरं ज्ञात्वा, आदितश्च वान्तं तीक्ष्णतरैर्योगैः कफघ्नैर्विरेचनकल्पोक्तैर्विरेचयेदिति पिण्डार्थः । 'दुष्टे च कोष्ठे कृमिभिर्मनुष्यं न वामयेत्' इत्यादिना कृमियुक्तस्य पुंसो वमननिषेधः, तथाऽपि कृमियुक्तस्य प्रथमावस्थायां वमनं शस्तम्, अतो वान्तमादित इत्युक्तम् ॥ २० ॥—

रास्थापयेच्च तम् ॥ २१ ॥
यवकोलकुलत्थानां सुरसादेर्गणस्य च ।
विडङ्गस्नेहयुक्तेन क्वाथेन लवणेन च ॥ २२ ॥

विरेकानन्तरं किं कुर्यादित्याह—आस्थापयेदित्यादि । तमातुरं यवकोलादीनां क्वाथेन तथा सुरसादिगणस्य क्वाथेन विडङ्गसाधितस्नेहयुक्तेन सैन्धवलवणान्वितेनास्थापयेदिति पिण्डार्थः । गणस्य चेति चकारात् सुरसादिकल्कोऽपि ग्राह्यः ॥ २१ ॥ २२ ॥

प्रत्यागते निरूहे तु नरं स्नातं सुखाम्बुना ।
युञ्ज्यात् कृमिघ्नैरशनैस्ततः शीघ्रं भिषग्वरः ॥२३॥
स्नेहेनोक्तेन चैनं तु योजयेत् स्नेहबस्तिना ।

आस्थापनानन्तरं किं कुर्यादित्याह—प्रत्यागत इत्यादि । प्रत्यागते व्याघुटिते पतिते इत्यर्थः । सुखाम्बुना उष्णोदकेन । कृमिघ्नैरशनैः कृमिघ्नद्रव्यसाधितैः स्वभावतः कृमिघ्नैश्च । स्नेहेनोक्तेन विडङ्गसाधितस्नेहेन । स्नेहबस्तिना अनुवासनेन ॥२३॥—

ततः शिरीषकिणिहीरसं क्षौद्रयुतं पिबेत् ॥ २४ ॥

अतोऽनन्तरं कृतान्नसंसर्गः किं कुर्यादित्याह—तत इत्यादि । तत इति अनुवासनानन्तरम् । किणिही कटभी ॥२४॥

केबूकस्वरसं वाऽपि पूर्ववत्तीक्ष्णभोजनः ।

पानान्तरमाह—केबूकेत्यादि । केबूकः 'केसुरं' इति नाम्ना प्रसिद्धः । पूर्ववदिति क्षौद्रयुतमित्यर्थः । तीक्ष्णभोजनः तीक्ष्णद्रव्यसंस्कृताहारः ॥—

पलाशबीजस्वरसं कल्कं वा तण्डुलाम्बुना ॥ २५ ॥

अपरमपि पानयोगमाह—पलाशबीजेत्यादि । पलाशबीजस्वरसं कल्कं वेति पलाशबीजकल्कं वा तण्डुलाम्बुना पिबेदित्यर्थः ॥ २५ ॥

पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत् ।
पत्तूरस्वरसं वाऽपि पिबेद्वा सुरसादिजम् ॥ २६ ॥

अपरमपि पानयोगमाह—पारिभद्रकपत्राणामित्यादि । पारिभद्रः पर्वतनिम्बः । पत्तूरः शिरवालिका । सुरसादिकः सुरसादिगणः ॥ २६ ॥

लिह्यादश्वशकृच्चूर्णं वैडङ्गं वा समाक्षिकम् ।

कृमिघ्नमवलेहयोगमाह—लिह्यादित्यादि । अश्वशकृच्चूर्णं घोटकपुरीषचूर्णम् । वैडङ्गं विडङ्गचूर्णम् । वैडङ्गमित्यत्र वैडालमिति केचित् पठन्ति; तत्र विडालविट्चूर्णमिति व्याख्यानम् ॥—

पत्रैर्मूषिकपर्ण्या वा सुपिष्टैः पिष्टमिश्रितैः ॥ २७ ॥
खादेत् पूपलिकाः पक्वा धान्याम्लं च पिबेदनु ।

क्रिमिघ्नपूपलिकामाह—पत्रैर्मूषिकपर्ण्या वेत्यादि । मूषिकपर्णी दन्ती, अन्ये मूषिककर्णाख्यं द्रव्यान्तरमाहुः । पिष्टमिश्रितैः यवपिष्टमिश्रितैः, तस्य विशेषेण क्रिमिहरत्वात् । धान्याम्लं काञ्जिकम् । अन्विति पूपलिकाभक्षणानन्तरम् । यद्यपि 'क्षीराणि मांसानि घृतानि च' इत्यादिग्रन्थोक्तादम्लवर्जनादत्र काञ्जिकस्यापि वर्जनं प्राप्नोति, तथाऽपि काञ्जिकस्य प्रायोगिकत्वात् क्रिमिहरत्वाच्चात्र काञ्जिकानुपानं, तथाहि गुणोपवर्णने काञ्जिकं कृमिघ्नत्वेन दृष्टम् ॥ २७ ॥—

सुरसादिगणे पक्वं तैलं वा पानमिष्यते ॥ २८ ॥
विडङ्गचूर्णयुक्तैर्वा पिष्टैर्भक्ष्यांस्तु कारयेत् ।

कृमिघ्नतैलमाह—सुरसादिगणे इत्यादि । तैलमिति सुरसादिगणे 'क्वाथकल्कीकृते' इति शेषः । विडङ्गेत्यादि । पिष्टैर्यवादिपिष्टैः । भक्ष्यान् लड्डूकादीन् । विकल्पविधानं पूर्वयोगापेक्षया ॥ २८ ॥—

तत्कषायप्रपीतानां तिलानां स्नेहमेव वा ॥ २९ ॥

तत्कषायप्रपीतानामित्यादि । तत्कषायप्रपीतानां विडङ्गक्वाथभावितानाम् । अत्रापि कारयेदिति संबन्धनीयम् ॥२९॥

श्वाविधः शकृतश्चूर्णं सप्तकृत्वः सुभावितम् ।
विडङ्गानां कषायेण त्रैफलेन तथैव च ॥ ३० ॥

---

१ 'केजक' इति पा० । २ 'विडङ्गचूर्णपिष्टाभ्यां तस्मिन् भक्ष्यं तु कारयेत्' इति पा० ।

क्षौद्रेण लीढ्वाऽनुपिबेद्रसमामलकोद्भवम् ।
अक्षाभयारसं वाऽपि

श्वाविध इत्यादि । श्वाविधः सेढायाः, शकृत् विष्ठा, तस्याश्चूर्णं सप्तवारान् विडङ्गक्वाथेन भावितं पुनस्त्रिफलाक्वाथेन तथैव भावितं, क्षौद्रेण लीढ्वा, अनु पश्चात्, आमलकोद्भवं बिभीतकोद्भवं वा हरीतकीरसं वाऽपि क्षौद्रेण पिबेदिति संबन्धः ॥ ३० ॥—

विधिरेषोऽयसामपि ॥ ३१ ॥

अमुमेव विधिं लौहचूर्णानामप्यतिदिशन्नाह—विधिरित्यादि । एष विधिः श्वाविधः शकृच्चूर्णविधिः । अयसामपीति त्रपुसीसताम्ररजतकृष्णलोहानामपि । एतेनैतदुक्तं भवति—प्रत्येकं लोहादिचूर्णानां श्वावित्पुरीषचूर्णविधानवद्विधिः कार्यः ॥ ३१ ॥

पूतीकस्वरसं वाऽपि पिबेद्वा मधुना सह ।
पिबेद्वा पिप्पलीमूलमजामूत्रेण संयुतम् ॥ ३२ ॥
सप्तरात्रं पिबेद्घृष्टं त्रपु वा दधिमस्तुना ।

पूतीकश्चिरबिल्वः । पिबेदित्यादि । अजामूत्रेण छागमूत्रेण । पिबेद्घृष्टमित्यादि । त्रपु रङ्गं, 'कथीर' इति लोके । दधिमस्तुग्रहणमन्यमस्तुनिषेधार्थं; अन्ये दधिमस्तुनेत्यत्र दधिग्रहणं कूर्चिकामस्तुपरिहारार्थमिति व्याख्यानयन्ति । तन्न, दधिमस्तुग्रहणेन कूर्चिकामस्तुग्रहणमसंभवं, सर्वनिबन्धविरोधात् समानतन्त्रविरोधाच्च ॥ ३२ ॥—

पुरीषजान् कफोत्थांश्च हन्यादेवं क्रमीन् भिषक् ॥

यत् पूर्वमेतच्चिकित्सितमुक्तं तत् पुरीषकफजानां कार्यमिति दर्शयन्नाह—पुरीषजानित्यादि । एवमिति पूर्वोक्तेन विधिनेत्यर्थः ॥ ३३ ॥

शिरोहृद्घ्राणकर्णाक्षिसंश्रितांश्च पृथग्विधान् ।
विशेषेणाञ्जनैर्नस्यैरवपीडैश्च साधयेत् ॥ ३४ ॥

पुरीषकफजानां सामान्यचिकित्सितमभिधायेदानीं कफजानामाश्रयविशेषेण चिकित्सामाह—शिरोहृद्घ्राणेत्यादि । शिरःप्रभृतिसंश्रितान् नानाप्रकारान् क्रमीन् विशेषेणाञ्जनादिभिः साधयेदिति पिण्डार्थः । चकाराद्गण्डूषकवलग्रहादिभिरपि । अन्ये तु यद्यप्यञ्जनादिकं सामान्येनोक्तं, तथाऽप्यञ्जनं नेत्रस्थे, नस्यावपीडौ घ्राणशिरःसंश्रिते च, विशेषेणाञ्जनादीनां नेत्रादिजक्रमिहरत्वात्; हृद्गतानां कर्णगतानां चार्थवशादेव क्रमिजहृद्रोगक्रमिकर्णकचिकित्सितैश्चिकित्सा कार्या; चकाराच्छिरःस्थितानां क्रमीणां क्रमिशिरोरोगचिकित्सितैश्चिकित्सा कार्येति गृह्यत इति व्याख्यानयन्ति । 'संश्रितान्' इत्यत्र 'व्रणजान्' इति केचित् पठन्ति; अन्ये 'संश्रितात्' इत्यत्र 'संस्रतान्' इति पठन्ति; कर्णस्थाने च वक्रं पठन्ति ॥ ३४ ॥

शकृद्रसं तुरङ्गस्य सुशुष्कं भावयेदति ।
निष्क्वाथेन विडङ्गानां चूर्णं प्रधमनं तु तत् ॥ ३५ ॥

शिरःप्रभृतिसंश्रितक्रमिघ्नं प्रधमनमाह—शकृद्रसमित्यादि । शकृद्रसं तुरङ्गस्येति घोटकपुरीषस्य रसमित्यर्थः । सुशुष्कमिति पुरीषरसस्य विशेषणम् । प्रधमनमिति नासायां चूर्णप्रक्षेपणं ज्ञेयम् ॥ ३५ ॥

अयश्चूर्णान्यनेनैव विधिना योजयेद्भिषक् ।
सकांस्यनीलं तैलं च नस्यं स्यात्सुरसादिके ॥ ३६

अमुमेव प्रधमनविधिं लोहचूर्णेष्वतिदिशन्नाह—अयश्चूर्णानीत्यादि । अनेनेति घोटकपुरीषस्वरसप्रधमनविधानेन । सकांस्यनीलं कांस्यापमार्जनमसीसहितम् । सुरसादिके इत्यत्र 'विपक्वं' इति शेषः । तेन सुरसादिगणक्वाथविपक्वं तैलं कांस्यमसीसहितं नस्यं स्यादिति । तथा चोक्तं,—"सुरसादिशृतं तैलं नस्यं कांस्यमलान्वितम्—" इति ॥ ३६ ॥

इन्द्रलुप्तविधिश्चापि विधेयो रोमभोजिषु ।

रोमादादीनामतिदेशेन चिकित्सामाह—इन्द्रलुप्तेत्यादि । रोमभोजिषु रोमादेषु । चकारेण केशभोजिष्वपीन्द्रलुप्तविधिः कार्य इति समुच्चीयते ॥—

दन्तादानां समुद्दिष्टं विधानं मुखरोगिकम् ॥ ३७

दन्तादानामप्यतिदेशेन चिकित्सितमाह—दन्तादानामित्यादि । मुखरोगिकं क्रमिदन्तोक्तं, विशेषेण क्रमिदन्तोक्तचिकित्सितस्य दन्तानां हितत्वात् । यद्यपि रोमाददन्तादानां रक्तजत्वाद्रक्तजसामान्यचिकित्सानन्तरमिन्द्रलुप्तविध्यादिकं विशेषचिकित्सितं कर्तुमुचितं भवति, तथाऽपि कफजा अपि रोमदन्तभक्षणं कुर्वन्तीति प्रव्यक्तकटुकं भोजनं हितं भवेदिति प्रतिपादनार्थं रोमदन्तादानां प्रथमं चिकित्सितमुक्तम् ॥ ३७ ॥

रक्तजानां प्रतीकारं कुर्यात् कुष्ठचिकित्सिते ।

इदानीं सामान्यचिकित्सितं रक्तजानामतिदेशेनाह—रक्तजानामित्यादि । कुष्ठचिकित्सिते इत्यत्र पूर्वोक्तमेव समुद्दिष्टमिति पदं संबन्धनीयम् । केचित् कुष्ठचिकित्सितादिति पठन्ति ॥—

सुरसादिं तु सर्वेषु सर्वथैवोपयोजयेत् ॥ ३८ ॥

सुरसादिं तु सर्वेष्वित्यादि । सर्वेषु पुरीषजादिषु । सर्वथैव अन्नपानस्नानादिविधिना ॥ ३८ ॥

प्रव्यक्ततिक्तकटुकं भोजनं च हितं भवेत् ।

भोजने विध्यन्तरमाह—प्रव्यक्तेत्यादि । प्रव्यक्ततिक्तकटुकमिति तिक्तकटुकोत्कटमित्यर्थः ॥—

कुलत्थक्षारसंसृष्टं क्षारपानं च पूजितम्[१] ॥ ३९ ॥

पानेऽपि विध्यन्तरमाह—कुलत्थेत्यादि । कुलत्थक्षारसंसृष्टं कुलत्थभस्मोदकसंयुक्तम् । क्षारपानं यवक्षारपानं, तथा चोक्तं विश्वामित्रेण,—"यावशूकस्य पानं तु कुलत्थक्षारवारिणा"—इति । केचित् कुलत्थक्षारेत्यत्र विडङ्गक्षारेति पठन्ति ॥ ३९ ॥

१ 'कुलत्थक्वाथसंसृष्टं क्षीरपानं च पूजितम्' इति पा० ।

क्षीराणि मांसानि घृतानि चैव
दधीनि शाकानि च पर्णवन्ति ।
समासतोऽम्लान्मधुरान् हिमांश्च
क्रमीन् जिघांसुः परिवर्जयेत्तु ॥ ४० ॥

इति सुश्रुतहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे क्रमिप्रतिषेधो नाम (षोडशोऽध्यायः, आदितः) चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

प्रवृत्तिलक्षणं चिकित्सितमभिधायेदानीं निवृत्तिलक्षणं चिकित्सितमाह—क्षीराणि मांसानीत्यादि । यद्यपि 'संक्षेपतः क्रियायोगो निदानपरिवर्जनम्' इति *वाक्यादेव* क्षीरादीनां निषेधविधिः सिद्धः, तथाऽपि क्षीरादीनां प्रतिषेधकरणं नियमार्थं; तेन क्रमीणां निदानमपि क्षीरादिकं मदात्यये मद्यवद्भेषजं माभूदित्यर्थः ॥ ४० ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे क्रमिप्रतिषेधो नाम चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशत्तमोऽध्यायः ।

अथात उदावर्तप्रतिषेधमध्यायं व्याख्यास्यामः १
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

क्रमिप्रतिषेधानन्तरं क्रमिचिकित्सितस्य कटुतिक्तकषायादेरुदावर्तहेतुत्वादुदावर्तप्रतिषेधारम्भो युक्त इत्यत आह—अथात इत्यादि । उत् ऊर्ध्वं वातविण्मूत्रादीनां आवर्तो भ्रमणं यस्मिन् रोगे स उदावर्तः; अन्ये पुरीषं वायुना वर्तुलीकृतमुदावर्तं मन्यन्ते, लोकप्रसिद्धत्वात् ॥ १ ॥ २ ॥

अधश्चोर्ध्वं च भावानां प्रवृत्तानां स्वभावतः ।
न वेगान् धारयेत् प्राज्ञो वातादीनां जिजीविषुः ३

वेगधारणस्यैकान्तेनोदावर्तहेतुत्वाद्वेगधारणनिषेधमाह—अधश्चोर्ध्वं चेत्यादि । अधोभावा मूत्रादयः, ऊर्ध्वभावा उद्गारादयः, तेषां भावानां वातादीनां वेगान् न धारयेत् । किम्भूतानां? स्वभावतः प्रवृत्तानां, प्रकृत्यैव स्वाशयच्युतानाम् । एतेनैतेऽप्रवृत्ता बलान्नोदीरणीया इति सूचयति । जिजीविषुः जीवितुमिच्छुः पुरुषः । केचित् 'प्राज्ञः' इत्यत्र 'प्राप्तान्' इति पठन्ति । ते च व्याख्यानयन्ति—वेगग्रहणेनैव प्राप्तानिति प्राप्तं यस्मादप्राप्तो वेगो न भवति, अतः प्राप्तग्रहणमधिकं, तेनाधिकेन प्राप्तग्रहणेन केषाञ्चित् प्राप्ता अपि वेगा धारणीया इत्यर्थाधिक्यमावेदयति; तथाच तन्त्रान्तरे—"इमांस्तु धारयेद्वेगान् हितैषी प्रेत्य चेह च । लोभेर्ष्याद्वेषमात्सर्यरागादीनां यतेन्द्रियः"—इति । तच्च व्याख्यानं न युक्तं, यस्माद्विशेषाभिधानादेव लोभादीनां वेगधारणं सिद्धं; तस्मात् प्राप्तानुन्मुखीभूतानिति व्याख्यानं युक्तम् । अन्ये तु वातादीनां प्राप्तान् युक्तान् वेगान् न धारयेत्, न तु साहसादिवेगान् न धारयेदिति व्याख्यानयन्ति ॥ ३ ॥

१ 'प्राप्तग्रहणमधिकं सत् केषांचित्' इति पा० । २ जितेन्द्रियः' इति पा० ।

वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः ।
व्याहन्यमानैरुदितैरुदावर्तो निरुच्यते ॥ ४ ॥

उदावर्तस्य निरुक्तिद्वारा कारणान्याह—वातविण्मूत्रेत्यादि । अश्रु नेत्रोदकं, क्षवश्छिक्का; इन्द्रियमत्र शुक्रमभिप्रेतं, 'शुक्राश्मरी तत्स्रवणं भवेद्वा' इत्यादिवक्ष्यमाणवचनात्; अभिधाने चेन्द्रियशब्दः शुक्रे दृष्टः; तथाच तद्वचः—"श्रोत्रवागादि सत्त्वं च शुक्रं चेन्द्रियमुच्यते"—इति । व्याहन्यमानैरवरुध्यमानैः । उदितैरिति ऊर्ध्वगतैः ॥ ४ ॥

क्षुत्तृष्णाश्वासनिद्राणामुदावर्तो विधारणात् ।

अन्येषामपि विधारणादुदावर्तसंभवमाह—क्षुत्तृष्णेत्यादि । वातविण्मूत्रादिकात् क्षुत्तृष्णादीनां भिन्नपाठो वातादीनां सन्निहितकारणत्वं तथा क्षुदादीनां विप्रकृष्टकारणत्वं सूचयति; अथवा अनेन भिन्नपाठेन वक्ष्यमाणं हेतुमाहाराश्रितं सूचयति । यथा—'वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः' इत्यादि । ये क्षुदादीनां भिन्नपाठं न पठन्ति; तन्मते ईदृशः पाठः,—'वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः । क्षुत्तृष्णाश्वासनिद्राणां धृत्योदावर्तसंभवः' इति । धृत्या धारणेनेत्यर्थः । ननु, अधोवेगरोधादपानप्रकोपादुदावर्तसंभवो युक्तः, अश्रुजृम्भादिवेगधारणात् कथं तस्योत्पत्तिः? सत्यं, अश्रुजृम्भादिवेगरोधात् कोष्ठगतो वायुर्यदा भवति तदाऽपानप्रकोपादुदावर्तसंभवः ॥—

तस्याभिधास्ये व्यासेन लक्षणं च चिकित्सितम् ५

तस्याभिधास्ये इत्यादि । तस्य उदावर्तस्य । अभिधास्ये कथयिष्यामि । व्यासेन विस्तारेण ॥ ५ ॥

त्रयोदशविधश्चासौ भिन्न एतैस्तु कारणैः ।

तस्य संख्यामाह—त्रयोदशविध इत्यादि । भिन्नो भेदं गतः । एतैः कारणैः पूर्वोक्तैर्वातविण्मूत्रादिभिः ॥—

अपथ्यभोजनाच्चापि वक्ष्यते च तथाऽपरः ॥ ६ ॥

वातादिवेगरोधात्त्रयोदशोदावर्तानभिधायेदानीं कारणभेदादपरमप्याह—अपथ्येत्यादि । अपरो वाताद्यवरोधजेभ्योऽन्यः ६॥

आध्मानशूलौ हृदयोपरोधं
शिरोरुजं श्वासमतीव हिक्काम् ।
कासप्रतिश्यायगलग्रहांश्च
बलासपित्तप्रसरं च घोरम् ॥ ७ ॥
कुर्यादपानोऽभिहतः स्वमार्गं
हन्यात् पुरीषं मुखतः क्षिपेद्वा ।

वातजोदावर्तलक्षणमाह—आध्मानशूलावित्यादि । हृदयोपरोधं हृदयावरणम् । बलासपित्तप्रसरं श्लेष्मपित्तप्रसरणम् ।

अभिहतोऽवरुद्धः। खमार्गे गुदे । हन्यात् पुरीषं पुरीषक्षयं कुर्यात्। क्षिपेद्वेत्यत्रापि पुरीषमिति संबन्धनीयम्। गलग्रहांश्चेति चकारात् क्रिम्यादीनां समानतन्त्रनिर्दिष्टानां ग्रहणम्। अपानावरोधेन प्राणादीनामपि प्रकोपाच्छिरोरुक्कासादिसंभवो युक्तः ॥ ७ ॥—

आटोपशूलौ परिकर्तनं च
सङ्गः पुरीषस्य तथोर्ध्ववातः ॥ ८ ॥
पुरीषमास्यादपि वा निरेति
पुरीषवेगेऽभिहते नरस्य ।

पुरीषजोदावर्तलक्षणमाह—आटोपशूलावित्यादि । आटोप उदरापूरः। परिकर्तनं गुदमेढ्रवस्त्यादिषु कृन्तनमिव वेदना। ऊर्ध्ववातो वहूद्गारता। आस्यात् मुखात्। निरेति निर्गच्छति। परिकर्तनं चेति चकारात् पिण्डिकोद्वेष्टनादयः ॥ ८ ॥—

मूत्रस्य वेगेऽभिहते नरस्तु
कृच्छ्रेण मूत्रं कुरुतेऽल्पमल्पम् ॥ ९ ॥
मेढ्रे गुदे वङ्क्षणवस्तिमुष्के-[1]
नाभिप्रदेशेष्वथवाऽपि मूर्ध्नि ।
आनद्धवस्तिश्च[2] भवन्ति तीव्राः
शूलाश्च शूलैरिव भिन्नमूर्तेः ॥ १० ॥

मूत्रोदावर्तलक्षणमाह—मूत्रस्येत्यादि। वङ्क्षणमुदरोरुसन्धिः। मुष्कौ अण्डौ। मूर्ध्नि उत्तमाङ्गे । आनद्धबस्तिः आध्मातमूत्राधारः। आनद्धबस्तेरिति केचित् पठन्ति, ते च आनद्धबस्तेर्मूर्ध्नि शूला भवन्तीति योजयन्ति । तन्न, समानतन्त्रविरोधात्। भिन्नमूर्तेः भिन्नशरीरस्य[3] ॥ ९ ॥ १० ॥

मन्यागलस्तम्भशिरोविकारा
जृम्भोपघातात् पवनात्मकाः स्युः ।
श्रोत्राननघ्राणविलोचनोत्था
भवन्ति तीव्राश्च तथा विकाराः ॥ ११ ॥

जृम्भोदावर्तलक्षणमाह—मन्येत्यादि। स्तम्भशब्दो मन्यागलाभ्यां प्रत्येकं संबध्यते। गलस्तम्भो गलग्रहः । शिरोविकाराः सूर्यावर्तादयः। पवनात्मकाः कम्पसुप्त्यादयः, चकारादरुचिविभ्रमादयश्च ॥ ११ ॥

आनन्दजं शोकसमुद्भवं वा
नेत्रोदकं प्राप्तममुञ्चतो हि ।
शिरोगुरुत्वं नयनामयाश्च
भवन्ति तीव्राः सह पीनसेन ॥ १२ ॥

अश्रुजोदावर्तलक्षणमाह—आनन्दजमित्यादि । नेत्रोदकमश्रु, प्राप्तं प्रवृत्त्युन्मुखम्। पीनसोऽत्र प्रतिश्यायः, समानतन्त्रदर्शनात्। चकारात् प्रतिश्यायादयः ॥ १२ ॥

भवन्ति गाढं क्षवथोर्विघाता-
च्छिरोक्षिनासाश्रवणेषु रोगाः ।
कण्ठास्यपूर्णत्वमतीव तोदः
कूजश्च वायोरुत वाऽप्रवृत्तिः ॥ १३ ॥

छिक्काजोदावर्तलक्षणमाह—भवन्तीत्यादि । क्षवथोर्विघातात् छिक्कावरोधात्। कण्ठास्यपूर्णत्वमिति कण्ठमुखे वायुना पूर्णे इव भवतः। अतीव तोदोऽतीव व्यथा, कण्ठमुखयोरेव। केचित् 'कण्ठस्य' इति पठन्ति, तन्मते कण्ठस्यैव पूर्णत्वं तोदश्च। कूजोऽव्यक्तवचनम्। वायोरप्रवृत्तिरुच्छ्वासावरोधः। उत वा अथवेत्यर्थः। चकारान्मन्यास्तम्भादयः ॥ १३ ॥

उद्गारवेगेऽभिहते भवन्ति
घोरा विकाराः पवनप्रसूताः ।

उद्गारजोदावर्तलक्षणमाह—उद्गारवेग इत्यादि। घोरा कष्टतराः। 'घोराः' इत्यत्र 'जन्तोः' इति केचित् पठन्ति । पवनप्रसूताः कम्पहिक्काहृद्विबन्धादयः ॥—

छर्देर्विघातेन भवेच्च कुष्ठं
येनैव दोषेण विदग्धमन्नम् ॥ १४ ॥

छर्दिजोदावर्तलक्षणमाह–छर्देर्विघातेनेत्यादि । कुष्ठग्रहणमत्र शीतपित्तकोपाद्युपलक्षणार्थम्। येनैव दोषेण विदग्धमन्नमिति येनैव वाताद्यन्यतमेन दोषेण विदग्धं दुष्टमन्नं भवेत्तद्दोषाधिकमेव कुष्ठं स्यादित्यर्थः। चकारादरोचकादयः ॥ १४ ॥

मूत्राशये पायुनि मुष्कयोश्च[1]
शोफो रुजो मूत्रविनिग्रहश्च ।
शुक्राश्मरी तत्स्रवणं भवेद्वा
ते ते विकारा विहते तु शुक्रे ॥ १५ ॥

शुक्रजोदावर्तलक्षणमाह—मूत्राशय इत्यादि । मूत्राशये बस्तौ। पायुनि गुदे। शोफः श्वयथुः । रुजोऽपि मूत्राशयादिष्वेव भवन्ति। मूत्रविनिग्रहो मूत्राप्रवृत्तिः। तत्स्रवणं शुक्रस्रवणं, समानतन्त्रप्रत्ययात्। ते ते विकारा इति हृत्पीडाङ्गमर्दादयः शुक्रवेगविघातजाः समानतन्त्रोक्ताः ॥ १५ ॥

तन्द्राङ्गमर्दारुचिविभ्रमाः स्युः[2]
क्षुधोऽभिघातात् कृशता च दृष्टेः ।

क्षुज्जोदावर्तलक्षणमाह—तन्द्रेत्यादि । तन्द्रा वैकारिकी निद्रा; अङ्गमर्दोऽङ्गोद्वेष्टनमिव वेदना, स्फुटनिकेत्यन्ये; विभ्रमोऽत्यर्थं चक्रारूढस्येव भ्रमणम् । कृशता च दृष्टेः दृङ्मान्द्यम्; चकाराद्दौर्बल्यादयस्तन्त्रान्तरोक्ता ग्राह्याः ॥—

कण्ठास्यशोषः श्रवणावरोध-
स्तृष्णाभिघाताद्धृदये व्यथा च ॥ १६ ॥

तृष्णाजोदावर्तलक्षणमाह—कण्ठास्यशोष इत्यादि । श्रवणावरोधो बाधिर्यम् । चकाराच्छ्रमस्वेदादयः समानतन्त्रोक्ताः ॥ १६ ॥

---

१ 'वङ्क्षणमुष्कयोश्च' इति पा०। २ 'आनद्धबस्तेः' इति पा०। ३ 'विद्धशरीरस्य' इति पा०।

१ 'वा गुदमुष्कयोश्च' इति पा०। २ 'तन्द्राङ्गमर्दावरुचिः श्रमश्च' इति पा०।

श्रान्तस्य निःश्वासविनिग्रहेण
हृद्रोगमोहावथवाऽपि गुल्मः ।

उच्छ्वासजोदावर्तलक्षणमाह—श्रान्तस्येत्यादि । श्रान्तस्य द्रुतगमनादिना खिन्नस्य । श्रान्तस्येत्यनेनाश्रान्तस्य श्वासधारणादपि पीडा न भवतीति सूच्यते । मोहो वैचित्त्यम् ॥—

जृम्भाऽङ्गमर्दोऽङ्गशिरोक्षिजाड्यं
निद्राभिघातादथवाऽपि तन्द्रा ॥ १७ ॥

निद्राजोदावर्तलक्षणमाह—जृम्भेत्यादि । जाड्यशब्दोऽङ्गादिभिः संबध्यते; जाड्यमपाटवं, गौरवमिति तात्पर्यार्थः ॥ १७ ॥

तृष्णार्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम् ।
शकृद्वमन्तं मतिमानुदावर्तिनमुत्सृजेत् ॥ १८ ॥

परित्याज्योदावर्तलक्षणमाह—तृष्णार्दितमित्यादि । परिक्लिष्टमत्यर्थमवसन्नं, क्रियारहितमिति यावत्; अन्ये समन्ततो भावेन क्लेशमुपगतं परिक्लिष्टं मन्यन्ते । अभिद्रुतं पीडितम् । उत्सृजेत् परित्यजेत् ॥ १८ ॥

सर्वेष्वेतेषु विधिवदुदावर्तेषु कृत्स्नशः ।
वायोः क्रिया विधातव्याः स्वमार्गप्रतिपत्तये ॥१९॥
सामान्यतः पृथक्त्वेन क्रियां भूयो निबोध मे ।

सर्वेदोदावर्तेषु वायोः सद्भावात् सामान्येन वातहरीं क्रियामाह—सर्वेष्वेतेष्वित्यादि । विधिवद्यथाविधि । कृत्स्नशः सामस्त्येन । क्रियाः स्नेहस्वेदादिकाः । स्वमार्गप्रतिपत्तये वायोरात्ममार्गप्रवर्तनाय । सामान्यतः सामान्येन । 'सर्वेषु' इत्यत्र 'नवसु' इति पठित्वा वातजोदावर्तादिषु नवसंख्येषु वायोः क्रिया विधातव्येति व्याख्यानयन्ति; तन्न, बुभुक्षोद्भवादिष्वपि चतुर्षूदावर्तेषु वायोः सद्भावाद्वातहरी क्रिया क्रियत इति । पृथक्त्वेन क्रियामित्यादि । पृथक्त्वेन प्रत्येकम् ॥ १९ ॥—

आस्थापनं मारुतजे स्निग्धस्विन्ने विशिष्यते ॥२०॥

आस्थापनमित्यादि । आस्थापनं निरूहः, तच्चानुलोमिकवातहरद्रव्यकृतम् । स्निग्धस्विन्ने 'आतुरे' इति शेषः । विशिष्यते विशिष्टं भवति, विशेषेण क्रियत इति तात्पर्यार्थः ॥२०॥

पुरीषजे तु कर्तव्यो विधिरानाहिको भवेत् ।

पुरीषज इत्यादि । आनाहिको विधिः फलवर्त्यादिको वातव्याध्युक्तो विसूच्यां वक्ष्यमाणो वा । तुशब्दादनुक्तमन्यदपि पुरीषानुलोमनं कर्तव्यम् ॥—

सौवर्चलाढ्यां मदिरां मूत्रे त्वभिहते पिबेत् ॥२१॥
एलां वाऽप्यथ मद्येन क्षीरं वाऽपि पिबेन्नरः ।
धात्रीफलानां स्वरसं सजलं वा पिबेन्नयहम् २२
रसमश्वपुरीषस्य गर्दभस्याथवा पिबेत् ।
मांसोपदंशं मधु वा पिबेद्वा सीधु गौडिकम् २३
भद्रदारु घनं मूर्वा हरिद्रा मधुकं तथा ।
कोलप्रमाणानि पिबेदान्तरिक्षेण वारिणा ॥ २४ ॥
दुस्पर्शास्वरसं वाऽपि कषायं कुङ्कुमस्य च ।
एर्वारुबीजं तोयेन पिबेद्वाऽलवणीकृतम् ॥ २५ ॥
पञ्चमूलीशृतं क्षीरं द्राक्षारसमथापि वा ।

सौवर्चलाढ्यामित्यादि । सौवर्चलाढ्यां सौवर्चलोत्कटाम् । मदिरां मद्यम् । तुशब्दात् सर्पिषोऽवपीडनादिकं समानतन्त्रोक्तं ग्राह्यम् । किं मदिरामेव पिबेदथवाऽन्यदपीत्याह—एलामित्यादि । धात्रीफलानां स्वरसं सजलं वेति न केवलं दुग्धं पिबेदामलकरसं सोदकं पिबेदित्यर्थः । गर्दभस्येत्यत्रापि पुरीषरसमिति संबध्यते । मांसोपदंशं मांसभक्षणसहितं, मधु मद्यम् । तच्च द्राक्षोद्भवं, समानतन्त्रदर्शनात् । तथाच तद्वचः,—"द्राक्षोद्भवं चापि पिबेन्मद्यं मांसोपदंशकम्"—इति । गौडिकं सीधु गुडकृतं सस्यकं; अत्रापि मांसोपदंशमिति संबध्यते । भद्रदार्वित्यादि । भद्रदारु देवदारु । घनं मुस्ता । मूर्वा चोरस्नायुः । मधुकं यष्टीमधु । कोलप्रमाणान्यर्धकर्षप्रमाणानि । दुःस्पर्शा दुरालभा । एर्वारुः ग्रीष्मकर्कटिका । अलवणीकृतमीषत्सैन्धवयुक्तम् । पञ्चमूली लघुपञ्चमूलं, समानतन्त्रसंवादात्; तथाचोक्तम्—"लघुना पञ्चमूलेन शृतं क्षीरं पिबेन्नरः"—इति ॥ २१–२५ ॥—

योगांश्च वितरेदत्र पूर्वोक्तानश्मरीभिदः ॥ २६ ॥
मूत्रकृच्छ्रक्रमं चापि कुर्यान्निरवशेषतः ।
भूयो वक्ष्यामि योगान् यान् मूत्राघातोपशान्तये

इदानीं मूत्रजोदावर्ते अश्मरीमूत्रकृच्छ्रमूत्राघातचिकित्सितान्यतिदिशन्नाह—योगांश्च वितरेदित्यादि । वितरेत् दद्यात् । अत्र मूत्रजोदावर्ते । पूर्वोक्तान् 'कुशः काशः शरः' इत्यादिनाऽश्मरीचिकित्सितोक्तान् । भूयोऽतिशयेन । वक्ष्यामि यान् योगानित्यत्रापि तान् कुर्यादिति संबध्यते ॥ २६ ॥ २७ ॥

स्नेहैः स्वेदैरुदावर्तं जृम्भाजं समुपाचरेत् ।

जृम्भणजोदावर्तचिकित्सितमाह—स्नेहैरित्यादि । स्नेहैः स्वेदैरिति पदद्वयेऽपि बहुवचनाच्चतुर्भिः स्नेहैश्चतुर्भिश्च स्वेदैरित्यर्थः ॥—

अश्रुमोक्षोऽश्रुजे कार्यः स्निग्धस्विन्नस्य देहिनः२८

अश्रुजोदावर्तचिकित्सामाह—अश्रुमोक्ष इत्यादि । अश्रुमोक्षोऽश्रुनिःसारणम् । अत्र लुप्तचकारनिर्देशात्तीक्ष्णमञ्जनादिकं वक्ष्यमाणमत्रापि संबन्धनीयम् ॥ २८ ॥

तीक्ष्णाञ्जनावपीडाभ्यां तीक्ष्णगन्धोपशिङ्घनैः ।
वर्तिप्रयोगैरथवा क्षवसक्तिं प्रवर्तयेत् ॥ २९ ॥
(तीक्ष्णौषधप्रधमनैरथवाऽऽदित्यरश्मिभिः ।)

क्षवजोदावर्तचिकित्सितमाह—तीक्ष्णाञ्जनावपीडाभ्यामित्यादि । तीक्ष्णशब्दोऽञ्जनावपीडाभ्यां सह संबध्यते । अवपीडो

१ 'धावनादिना' इति पा० । २ 'विधातव्या' इति पा० ।

नस्यभेदः । तीक्ष्णगन्धोपशिङ्घनैः मरिचादिचूर्णावघ्राणैः । वर्तिप्रयोगा धूमवर्तिप्रयोगाः । अत्र लुप्तादिशब्दादर्करश्मिविलोकनादयो गृह्यन्ते । तथाच,—"तीक्ष्णधूमाञ्जनाघ्राणनावनार्कविलोकनैः । प्रवर्तयेत् क्षुतिं सक्ताम्"—इत्यादि । क्षवसक्तिं छिक्काया अप्रवर्तनम् । केचित्तीक्ष्णाञ्जनावपीडाभ्यामिति पदमश्रुजोदावर्ते एव मन्यन्ते न क्षवजे, अनौपयिकत्वात्तन्त्रान्तरविरोधाच्च ॥ २९ ॥—

उद्गारजे क्रमोपेतं स्नैहिकं धूममाचरेत् ॥ ३० ॥
सुरां सौवर्चलवतीं बीजपूररसान्विताम् ।

उद्गारजे क्रमोपेतमित्यादि । क्रमोपेतं धूमनस्यकवलग्रहचिकित्सितोक्तक्रमसंयुक्तम् । किमुद्गारजे स्नैहिकं धूममेवाचरेदुतान्यदपीत्याह—सुरामित्यादि ॥ ३० ॥—

छर्द्याघातं यथादोषं सम्यक् स्नेहादिभिर्जयेत् ३१
सक्षारलवणोपेतमभ्यङ्गं चात्र दापयेत् ।

छर्द्याघातमित्यादि । छर्द्याघातं छर्द्याघातजमुदावर्तं, कारणे कार्योपचारात् । यथादोषं दोषस्यानतिक्रमेण । आदिशब्दाद्वमनादयः । सक्षारलवणोपेतमीषद्यवक्षारसैन्धवसंयुक्तं; यद्यपि तन्त्रान्तरे तैलाभ्यङ्ग उक्तस्तथाऽप्यत्र वृद्धसंप्रदायाद्घृताभ्यङ्गः कार्यः । चकाराद्व्यायामोपवासादयो गृह्यन्ते । 'वम्याघातं' इति केचित् पठन्ति ॥ ३१ ॥—

बस्तिशुद्धिकरावापं चतुर्गुणजलं पयः ॥ ३२ ॥
आवारिनाशात् क्वथितं पीतवन्तं प्रकामतः ।
रमयेयुः[1] प्रिया नार्यः शुक्रोदावर्तिनं नरम् ॥३३॥

बस्तिशुद्धिकरावापमित्यादि । बस्तिशुद्धिकरावापं कूष्माण्डकतृणपञ्चमूलादिप्रक्षेपम् । प्रक्षेपद्रव्यप्रमाणं क्षीराष्टांशेन । पयः क्षीरम् । प्रकामतः स्वेच्छया नार्यः शुक्रोदावर्तिनं नरं रमयेयुः भजेयुः । यदत्र रमणे स्त्रीणां कर्त्रीत्वेनाभिधानं तच्छुक्रोदावर्तिनो हर्षाधिक्यसंजननार्थम् । प्रिया मनोनुकूलाः । लुप्तचकारात्ताम्रचूडादयस्तन्त्रान्तरोक्ता ग्राह्याः ॥ ३२ ॥ ३३ ॥

क्षुद्विघाते हितं स्निग्धमुष्णमल्पं च भोजनम् ।

क्षुद्विघाते हितमित्यादि । चकाराल्लघ्वपि ॥—

तृष्णाघाते पिबेन्मन्थं यवागूं वाऽपि शीतलाम् ३४

तृष्णाघाते पिबेन्मन्थमित्यादि । मन्थः सघृतशीतलजलप्लुताः सक्तवः । यवागूरत्र पेया । अपिशब्दाच्छीतलजलावगाहपानादिकं ग्राह्यम् ॥ ३४ ॥

भोज्यो रसेन विश्रान्तः श्रमश्वासातुरो नरः ।

भोज्यो रसेनेत्यादि । भोज्यो भोजयितव्यः । रसेन मांसरसेन ॥—

निद्राघाते पिबेत् क्षीरं स्वप्याच्चेष्टकथो नरः ॥३५॥

निद्राघाते पिबेत् क्षीरमित्यादि । क्षीरं गोक्षीरं न माहिषं, प्रधानकल्पनाश्रयणात् समानतन्त्रदर्शनाच्च । तथाच तन्त्रान्तरम्,—"निद्राघाते पिबेत् क्षीरं गोस्तनादथवा नरः—" इति । इष्टकथा अनुकूल[1]कथाः, 'शृणुयात्' इति शेषः । 'इष्टकथारतः' इति पाठान्तरम् । स्वप्यान्निद्रां गच्छेत् ॥ ३५ ॥

आध्मानाद्येषु रोगेषु यथास्वं प्रयतेत हि ।
यच्च यत्र भवेत्प्राप्तं तच्च तस्मिन् प्रयोजयेत् ३६

उदावर्तचिकित्सितमभिधायेदानीं तदुपद्रवचिकित्सितमाह—आध्मानाद्येषु रोगेष्वित्यादि । आध्मानाद्येषु वेगावरोधजातेषु । आदिशब्दाच्छूलपरिकर्तिकापुरीषसङ्गादीनां ग्रहणम् । यथास्वं यस्याध्मानादेर्यदात्मीयमौषधं वातव्याध्यादिचिकित्सितोक्तं तेन प्रयतेत प्रयत्नं कुर्वीत । अन्यदप्युचितं चिकित्सितमाध्मानादिषु कार्यमित्याह—यच्चेत्यादि । यदौषधं यस्मिन् आध्मानादौ प्राप्तं युक्तम् ॥ ३६ ॥

वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ।
भोजनैः कुपितः सद्य उदावर्तं करोति हि ॥३७॥
वातमूत्रपुरीषासृक्कफमेदोवहानि वै ।
स्रोतांस्युदावर्तयति पुरीषं चातिवर्तयेत् ॥ ३८ ॥
ततो हृद्बस्तिशूलार्तो गौरवारुचिपीडितः ।
वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः ॥ ३९ ॥
श्वासकासप्रतिश्यायदाहमोहवमिज्वरान् ।
तृष्णाहिक्काशिरोरोगमनःश्रवणविभ्रमान् ॥ ४० ॥
लभते च बहूनन्यान् विकारान् वातकोपजान् ।

'अपथ्यभोजनाच्चापि वक्ष्यते च तथाऽपरः' इति यदुक्तं तस्यावसरः—वायुरित्यादि । कोष्ठानुगो वायुरत्रापानः, समानतन्त्रदर्शनात् । तस्य लक्षणमाह—वातेत्यादि । उदावर्तयति ऊर्ध्वमावर्तयति, अधोवहानि स्रोतांस्यूर्ध्ववहानि करोतीत्यर्थः । पुरीषं चातिवर्तयेदिति उष्ट्रादिपुरीषवत् कठिनं कुर्यादित्यर्थः । ततस्तस्माद्धेतोः । विभ्रमो व्यापद्विशेषः । अन्यान् आध्मानप्रत्याध्मानादीन् ॥ ३७–४० ॥—

तं तैललवणाभ्यक्तं स्निग्धं स्विन्नं निरूहयेत् ४१
दोषतो भिन्नवर्चस्कं भुक्तं चाप्यनुवासयेत् ।

तस्य चिकित्सितमाह—तं तैलेत्यादि । तमुदावर्तिनम् । दोषत इत्यादि । भिन्नवर्चस्कं निरूहभिन्नपुरीषं पुरुषं दोषमपेक्ष्य भुक्तवन्तमनुवासयेदिति संबन्धः । केचिदत्रानुवासनं निरूहातियोगव्यापत्प्रशमनार्थं मन्यन्ते; तन्न, समानतन्त्रविरोधात्; तथा च,—"उदावर्ते त्वपथ्योत्थे सुनिरूढं ततो भिषक् । यथादोषं भुक्तवन्तमाशु चैवानुवासयेत्"—इति । केचित् 'भिन्नवर्चस्कं' इत्यत्र 'भिन्नवर्चांसि' इति पठित्वा अनुलोमनीयानि भुक्तवन्तमिति व्याख्यानयन्ति ॥ ४१ ॥—

न चेच्छान्तिं व्रजत्येवमुदावर्तः सुदारुणः ॥४२॥
अथैनं बहुशः स्विन्नं युञ्ज्यात् स्नेहविरेचनैः ।

निरूहानुवासनाभ्यामप्यप्रशाम्यत्युदावर्ते चिकित्सितमाह—न चेच्छान्तिमित्यादि । एवं पूर्वोक्तविधिना । एनमुदावर्तिनम् । स्विन्नं स्निग्धस्विन्नम्, आदिलोपात् । स्नेहविरेचनैरेरण्डतैलादिभिः ॥ ४२ ॥—

१ 'रमयेरन्' इति पा० । २ 'स्वप्याच्चेष्टक थारतः' इति पा० ।

१ 'अनुरक्तजनकथाः' इति पा० ।

पाययेत त्रिवृत्पीलुयवानीरम्लपाचनैः ॥ ४३ ॥
हिङ्गुकुष्ठवचास्वर्जिविडङ्गं वा द्विरुत्तरम्।
योगावेतावुदावर्तं शूलं चानिलजं हतः ॥ ४४ ॥

अपथ्यजोदावर्ते योगद्वयमाह—पाययेतेत्यादि। पीलुः उष्ट्रप्रियो गुडफलो भादानके 'पीलु' इति प्रसिद्धः। अम्लपाचनैः अम्लं काञ्जिकं, पाचनानि चित्रकादीनि, तैः सह पाययेदित्यर्थः। त्रिवृदादिरेको योगः, हिङ्ग्वादिस्तु द्वितीयः। स्वर्जी स्वर्जिकाक्षारः। द्विरुत्तरमिति आद्याच्च द्रव्याद्युत्तरोत्तरं द्रव्यं द्विगुणं ग्राह्यम्। द्विरुत्तरमिति पदं न पूर्वयोगे संबन्धनीयं, 'द्विरुत्तरा हिङ्गुवचा सकुष्ठा' इत्यादिना तन्त्रान्तरे दर्शितत्वात्। यवानीरित्यत्र यवागूमिति केचित् पठन्ति। अपरे 'अम्लपाचनैः' इत्यत्र 'अम्लपानकैः' इति पठित्वा अम्लद्रवैरिति व्याख्यानयन्ति ॥ ४३ ॥ ४४ ॥

देवदार्वग्निकौ कुष्ठं शुण्ठीं पथ्यां पलङ्कषाम्।
पौष्कराणि च मूलानि तोयस्यार्धाढके पचेत् ४५
पादावशिष्टं तत् पीतमुदावर्तमपोहति।

देवदार्वग्निकावित्यादि। अग्निकोऽजमोदा। पथ्या हरीतकी। पलङ्कषा गुग्गुलुः। अर्धाढकं द्वात्रिंशत्पलानि, पादावशिष्टमष्टपलप्रमितं, वृद्धवैद्यव्यवहारात्तन्त्रान्तरदर्शनाच्च। तथाच तन्त्रान्तरे उक्तम्,—"कुष्ठं पलङ्कषां पथ्यां शुण्ठीं दार्वग्निपुष्करम्। द्वात्रिंशता तोयपलैः पक्त्वा पादावशेषितम्। पाययेत्"—इत्यादि। यद्यपि 'क्वाथस्याञ्जलिरिष्यते' इति परिभाषा विद्यते, तथाऽपि मानानुक्तौ परिभाषाश्रयणं न पुनरुक्ते माने। केचिदर्धाढकं चतुःषष्टिपलानि मन्यन्ते, ते च षोडशपलोन्मितं क्वाथं पाययन्ति; अपरे क्वाथबाहुल्यात् क्रमशः क्वाथपानमिच्छन्ति न पुनरेकस्मिन्नेव दिवसे; तच्च, समानतन्त्रविरोधात् ॥ ४५ ॥—

मूलकं शुष्कमार्द्रं च वर्षाभूः पञ्चमूलकम् ॥४६॥
आरेवतफलं चाप्सु पक्त्वा तेन घृतं पचेत्।
तत् पीयमानं [१]शास्त्युग्रमुदावर्तमशेषतः ॥ ४७ ॥

उदावर्ते पानार्थं घृतमाह—मूलकमित्यादि। शुष्कमिति मूलार्द्रकयोर्विशेषणम्। वर्षाभूः पुनर्नवा। पञ्चमूलकं बिल्वादिपञ्चमूलम्। आरेवतफलं गिरिमालकफलम्। पक्त्वेति क्वाथपाकपरिभाषया। तेन क्वाथेन। शास्ति हन्तीत्यर्थः ॥४६॥४७॥

वचामतिविषां कुष्ठं यवक्षारं हरीतकीम्।
कृष्णां निर्दहनीं चापि पिबेदुष्णेन वारिणा ॥४८॥

वचामतिविषामित्यादि। निर्दहनी अग्निमन्थः, गणिकारिकेत्यन्ये ॥ ४८ ॥

इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचाम्।
कुष्ठं किण्वाग्निकौ चैव पिबेत्तुल्यानि पूर्ववत् ॥४९॥
मूत्रेण देवदार्वग्नित्रिफलाबृहतीः पिबेत्।

इक्ष्वाकुमूलमित्यादि। इक्ष्वाकुः कटुतुम्बी। विशल्या काष्ठपाटला, इन्द्रवारुणीत्यन्ये। किण्वं सुराबीजं; अग्निकोऽजमोदा। पूर्ववदिति उष्णोदकेनेत्यर्थः। मूत्रेण गोमूत्रेण। अग्निश्चित्रकः ॥ ४९ ॥—

यवप्रस्थं फलैः सार्धं कण्टकार्या जलाढके ॥५०॥
पक्त्वाऽर्धप्रस्थशेषं तु पिबेद्धिङ्गुसमन्वितम्।

यवप्रस्थमित्यादि। कण्टकारीफलयवयोः समुदितेन समभागेन प्रस्थं षोडशपलानि। जलाढकं तोयस्य चतुःषष्टिपलानि, वृद्धवैद्यव्यवहारादत्र तोयद्वैगुण्यपरिभाषा नाद्रियते। अर्धप्रस्थशेषमष्टौ पलानि। अत्र क्वाथस्याष्टौ पलानि बहुत्वात् कथं पातव्यानीति नाशङ्कनीयं, "ऋषयस्त्वेव जानन्ति द्रव्यसंयोग[१]जं फलम्"—इत्युक्तेः। ये तु पूर्वोक्तदेवदार्वादिपानवदत्रापि तोयस्य मानाधिक्यमिच्छन्ति, ते कण्टकारिफलान्यपि प्रस्थप्रमितानि गृह्णन्ति। केचित् 'यवप्रस्थं पले द्वे च कण्टकार्याः' इति पठन्ति ॥ ५० ॥—

मदनालाबुबीजानि पिप्पलीं सनिदिग्धिकाम् ५१
संचूर्ण्य प्रधमेन्नाड्या विशल्येतद्यथा गुदम्।

मदनालाबुबीजानीत्यादि। मदनं मदनफलं, तस्य बीजानि वैतरणसंवादात्। तथाच तद्वचः,—"मदनालाबुनोर्बीजं कण्टकारीकणान्वितम्"—इत्यादि। निदिग्धिका कण्टकारी। एतानि संचूर्ण्य नाड्या प्रधमेत् मुखादिवायुना कृत्वा गुदे प्रेरयेत् ॥ ५१ ॥—

चूर्णं निकुम्भकम्पिल्लश्यामेक्ष्वाकाग्निकोद्भवम् ५२
कृतवेधनमागध्योर्लवणानां च साधयेत्।
गवां मूत्रेण ता वर्तीः कारयेत्तु गुदानुगाः।
सद्यः शर्मकरावेतौ योगावमृतसंमतौ ॥ ५३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे उदावर्तप्रतिषेधो नाम (सप्तदशोऽध्यायः, आदितः) पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

चूर्णमित्यादि। निकुम्भो दन्तीवृक्षः, कम्पिल्लः रोचनिका, श्यामा अरुणमूला त्रिवृत्, इक्ष्वाकुः कटुतुम्बी, अग्निकोऽजमोदा। कृतवेधनं कोशातकीभेदः, मागधी पिप्पली। लवणानि सैन्धवादीनि। गुदानुगा गुदप्रवेशयोग्यप्रमाणा। शर्मकरौ सुखकरौ। एतौ योगाविति मदनादिचूर्णप्रधमनयोगवर्तियोगौ। अमृतसंमितौ अमृततुल्यौ, जीवनीयात्मकत्वात्। वर्तिकल्पनां कथयति—निकुम्भादीनां चूर्णं गोमूत्रेण पक्त्वा घने शीतीभूते च सति वर्तीः कारयेत् ॥ ५२ ॥ ५३ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे उदावर्तप्रतिषेधो नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

१ 'चापि नियच्छतः' इति पा०। २ 'वचां' इति पा०। ३ 'शमयेदुदावर्तमशेषतः' इति पा०।

१ 'योगसंयोगजं' इति पा०।

षट्पञ्चाशत्तमोऽध्यायः ।

अथातो विसूचिकाप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

उदावर्तप्रतिषेधानन्तरमुदावर्ताश्रितवातप्रातिलोम्यकृतमन्दाग्निर्विसूचिकाहेतुत्वाद्विसूचिकाप्रतिषेधारम्भो युक्त इत्यत आह—अथात इत्यादि । विसूचिकेत्यत्र आदिशब्दो लुप्तो द्रष्टव्यः, तेनालसकविलम्बिकयोर्ग्रहणम् ॥ १ ॥ २ ॥

अजीर्णमामं विष्टब्धं विदग्धं च यदीरितम् ।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥३॥

विसूच्यादीनां कारणमाह—अजीर्णमाममित्यादि । यदीरितमिति 'अन्नपानविधौ' इति शेषः । तस्मादजीर्णात् । यदत्र चतुर्थाजीर्णस्य रसशेषस्योपादानं न कृतं तदपरिणाममात्रत्वेन तस्य विसूच्याद्यारम्भकत्वाभावादेकीयमतत्वेनोक्तत्वाच्च । विसूच्यलसकाभ्यां यद्विलम्बिकायाः पृथग्विभक्तिनिर्देशः कृतः, तत्तस्या असाध्यत्वावबोधनार्थम्, इतरयोश्च प्रायः कृच्छ्रसाध्यत्वबोधनार्थम् ॥ ३ ॥

सूचीभिरिव गात्राणि तुदन् संतिष्ठतेऽनिलः ।
यस्याजीर्णेन सा वैद्यैरुच्यते ति[१] विसूचिका ॥४॥

विसूच्या निरुक्तिमाह—सूचीभिरित्यादि । वैद्यैराद्यैरित्यर्थः । उच्यते तीति वर्णागम इत्यादिना इकारलोपात् साधुः । 'तुदन्'इत्यत्र 'भिन्दन्'इति केचित् पठन्ति । यदत्र विसूच्यादीनां प्राग्रूपं न भणितं तद्रूपाण्येवाल्पान्यासां प्राग्रूपं, न तु प्राग्रूपान्तरमस्तीति बोधयति ॥ ४ ॥

न तां परिमिताहारा लभन्ते विदितागमाः ।
मूढास्तामजितात्मानो लभन्ते कलुषाशयाः[२] ॥५॥

इदानीमजीर्णपरिवर्जने यत्नातिशयः कार्य इति प्रतिपादनार्थमाह—न तामित्यादि । परिमिताहारा अनिषिद्धाशनं भुञ्जानाः । विदितागमा ज्ञातभोजनोपदेशाः । मूढाः पशुतुल्याः, सेव्यासेव्याहारानभिज्ञा इत्यर्थः । अजितात्मानोऽजितेन्द्रियाः । कलुषाशयाः प्रदुष्टामाशयाः, आमाशयदुष्टिश्च दुष्टान्नसंपर्काद्वातादिकोपाच्च; केचित् 'अशनलोलुपाः' इति पठन्ति ॥ ५ ॥

मूर्च्छातिसारौ वमथुः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः ।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः ॥ ६ ॥

विसूचिकालक्षणमाह—मूर्च्छातिसारावित्यादि । वमथुः छर्दिः । उद्वेष्टनं जङ्घादीनां मोटनं, खल्लीति लोके । तस्यां विसूचिकायाम् । शिरसश्च भेदः शिरोविदारणमिव वेदना ॥ ६ ॥

१ 'तु' इति पा० । २ 'ऽशनलोलुपाः' इति पा० ।

कुक्षिरानह्यतेऽत्यर्थं प्रताम्यति विकूजति ।
निरुद्धो मारुतश्चापि कुक्षौ विपरिधावति[१] ॥ ७ ॥
वातवर्चोनिरोधश्च कुक्षौ यस्य भृशं भवेत् ।
तस्यालसकमाचष्टे तृष्णोद्गारावरोधकौ[२] ॥ ८ ॥

अलसकलक्षणमाह—कुक्षिरित्यादि । कुक्षिः उदरम् । आनह्यते आध्मानयुक्तो भवति । अत्यर्थमतिशयं यथा तथा । ताम्यति तमसि प्रविशतीव । विकूजति अव्यक्तशब्दं करोति । विपरिधावति विशेषेण समन्ताद्गच्छति ॥ ७ ॥ ८ ॥

दुष्टं तु भुक्तं कफमारुताभ्यां
प्रवर्तते नोर्ध्वमधश्च यस्य ।
विलम्बिकां तां भृशदुश्चिकित्स्या-
माचक्षते शास्त्रविदः पुराणाः ॥ ९ ॥

विलम्बिकालक्षणमाह—दुष्टमित्यादि । भुक्तं भोजनम् । दुष्टमित्यत्र कफमारुताभ्यामिति संबन्धनीयम् । यद्यपि विलम्बिका बाहुल्येन विदग्धाजीर्णाज्जायते, विदग्धाजीर्णाच्च पित्तं दुष्टं न वायुर्दुष्टो भवति न वा श्लेष्मा, तथाऽपि पित्तदुष्ट्या इतरयोरपि[४] दुष्टिः, तस्मात् कफमारुताभ्यां दुष्टमित्युक्तं; एवं बाहुल्येन आमाविशिष्टत्वोत्थितयोर्विसूच्यलसकयोः[५] कफवाताधिकयोरपीतरदोषसद्भावो ज्ञेयः । दुष्टमित्यत्र लीनमिति केचित् पठन्ति । इयमेव विलम्बिका तन्त्रान्तरे 'दण्डालसक' इति नाम्ना कथ्यते ॥ ९ ॥

यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः ।
दोषेण येनावततं स्वलिङ्गैस्तं[६] लक्षयेदामसमुद्भवैश्च ॥

इदानीं पूर्वोक्तलक्षणविशेषमतिदेशेनाह—यत्रस्थमाममित्यादि । यत्रस्थं यस्मिन् देशे स्थितं, येन च दोषेणावततं व्याप्तमामं स्यात्, तमेव देशं यस्माद्विशेषेण रुजेत्तस्मात् कारणात्तं देशं तद्दोषलक्षणैर्विकारजातैस्तोदादिभिरामसमुद्भवैश्च लिङ्गैः स्तम्भाध्मानादिभिर्लक्षयेदिति पिण्डार्थः । ननु, यत्रस्थमित्यनेन आमस्थानकथनेन किं प्रयोजनं? यस्माद्यत्र स्थितो विकृतो दोषो भविष्यति तत्रैव रुजं करिष्यति? सत्यं, नैवं सर्वत्र, यथा गण्डमालादौ पिण्डिकास्थितस्यापि दोषस्य ग्रीवादौ विकारकर्तृत्वदर्शनात् । आमपीडितदेशावबोधश्चात्र सुखचिकित्साकरणार्थमुक्तः । अर्थात् यत्र यस्मिन् स्थाने स्थितमाममजीर्णं विरुजेद्विशिष्टं रुजं कुर्यात् तमेव देशं लक्षयेद्वैद्यः, कैर्विकारजातैः? आमसमुद्भवैः स्तम्भगौरवादिभिः । ब्रह्मदेवस्तु येन दोषेण वाताद्यन्यतमेनानुगतमामजं दोषं स्वलिङ्गैर्वाताद्यन्यतमदोषलिङ्गैर्लक्षयेदिति व्याख्यानयति । अपरेऽन्यथा पठित्वा व्याख्यानयन्ति, तच्च शिष्यबुद्धिव्याकुलकर्तृत्वाद्ग्रन्थगौरवभयाच्च परिहृतम् ॥ १० ॥

१ 'कुक्षावुपरिधावति' इति पा० । २ 'तृष्णोद्गारौ तु यस्य तु' इति पा० । ३ 'तु विवर्जनीयां' इति पा० । ४ 'पित्तदुष्टावितरयोरपि' इति पा० । ५ 'आमाविष्टब्धोच्छ्रितयोः' इति पा० । ६ 'शरीरं तल्लक्षणैरामसमुद्भवैश्च' इति पा० ।

यः श्यावदन्तौष्ठनखोऽल्पसंज्ञ-
श्छर्यर्दितोऽभ्यन्तरयातनेत्रः ।
क्षामस्वरः सर्वविमुक्तसन्धि-
र्यायान्नरः सोऽपुनरागमाय ॥ ११ ॥

असाध्यलक्षणमाह—य इत्यादि । श्यावशब्दो दन्तादिभिः प्रत्येकं संबध्यते । अल्पसंज्ञो मन्दचेतनः । अभ्यन्तरयातनेत्रः क्षीणदृष्टिः । अपुनरागमाय अपुनरावृत्तये ॥ ११ ॥

साध्यासु पार्ष्ण्योर्दहनं प्रशस्त-
मग्निप्रतापो वमनं च तीक्ष्णम् ।
पक्वे ततोऽन्ने तु विलङ्घनं स्यात्
संपाचनं चापि विरेचनं च ॥ १२ ॥

इदानीं चिकित्सितमाह—साध्याखित्यादि । साध्यासु विसूचिकासु । पार्ष्णिदहनमत्र संज्ञाप्रबोधनार्थमधोऽतिप्रवृत्तिवारणार्थं च । अग्निप्रतापनमामपाचनार्थम् । तीक्ष्णं च वमनमन्नशल्यनिर्हरणार्थम् । साध्याखिति पदमसाध्यपरिहारार्थं, साध्यज्ञाने यत्नातिशयप्रतिपादनार्थं च । पाकाभिमुखेऽन्ने दोषशेषनिर्हरणार्थमाह—पक्व इत्यादि । पक्वे पाकाभिमुखे । विलङ्घनं विविधलङ्घनं; तच्च यथावस्थं योज्यं; अन्ये विशिष्टं लङ्घनमाहुः, तच्चोपवासः । संपाचनमत्र स्वेदादिभिः । विरेचनमत्र फलवर्त्यादिभिः । यद्यपि विरेचनमत्र सामान्येनोक्तं, तथाऽपि विष्टम्भे सति ज्ञातव्यम् । अन्ये तु पठन्ति 'वान्ते ततोऽन्ने तु विलङ्घनं स्यात् संपाचनं रेचनदीपने च' इति । ते च विसूच्यां वमने प्रयुक्ते पश्चाद्विलङ्घनादिकं योज्यमिति मन्यन्ते । पाचनमतीसारोक्तं देवदार्वभयेत्यादिकं, दीपनं पिप्पल्यादिकं, शेषं पूर्ववत् । अन्ये 'पक्षे ततोऽन्ये तु' इति पठन्ति, ते च पक्षाद्विरेचनं देयमिति केचिन्मन्यन्त इति व्याख्यानयन्ति; तत्र टीकाकृद्भिर्बहु व्याहृतं तच्च ग्रन्थगौरवभयात् परित्यक्तम् ॥ १२ ॥

विशुद्धदेहस्य हि सद्य एव
मूर्च्छातिसारादिरुपैति शान्तिम् ।

कस्माद्विसूच्यां वमनविरेचने प्रयोक्तव्ये इत्याह—विशुद्धदेहस्येत्यादि । हि यस्मात् । उपैति गच्छति ॥—

आस्थापनं चापि वदन्ति पथ्यं
सर्वासु योगानपरान्निबोध ॥ १३ ॥

इदानीमास्थापनस्यापि हितत्वं दर्शयितुमाह—आस्थापनमित्यादि । यद्यपि 'तत्रोन्मादभयशोकपिपासारोचकाजीर्णार्श' इत्यादिनाऽजीर्णे आस्थापननिषेध उक्तस्तथाऽप्यत्र पाकाभिमुखेऽन्ने विष्टम्भनाशनाय पाचनपूर्वकमास्थापनमपि शस्यते । सर्वासु विसूचीषु; केचित् सर्वासु विसूच्यलसकविलम्बिकाखिति मन्यन्ते । 'सर्वासु' इत्यत्र केचित् 'सर्वांश्च' इति पठन्ति, ते वक्ष्यमाणयोगविशेषणं कुर्वन्ति । योगानित्यादि । अपरान् वक्ष्यमाणान् । निबोध जानीहि । 'अपक्वस्य पाचनार्थं पक्वस्य चानुलोमनार्थं' इति शेषः ॥ १३ ॥

१ 'दोषशेषनिवारणार्थमाह' इति पा० । २ 'पक्वे विष्टब्धे सति' इति पा० । ३ 'टीकाकृद्भिर्यदुक्तं' इति पा० ।

पथ्यावचाहिङ्गुकलिङ्गगृञ्ज-
सौवर्चलैः सातिविषैश्च चूर्णम् ।
सुखाम्बुपीतं विनिहन्त्यजीर्णं
शूलं विसूचीमरुचिं च सद्यः ॥ १४ ॥

तानेव योगानाह—पथ्येत्यादि । कलिङ्ग इन्द्रयवः । गृञ्जनो रसोनभेदः । अजीर्णमामशेषः, न तु तरुणाजीर्णं; तत्रौषधनिषेधात् । विसूचीति शेषा नतु सद्योत्था विसूची, तत्राप्यौषधनिषेधात् ॥ १४ ॥

क्षारागदं वा लवणं विडं वा
गुडप्रगाढानथ सर्षपान् वा ।
अम्लेन वा सैन्धवहिङ्गुयुक्तौ
सबीजपूरौ सघृतौ त्रिवर्गौ ॥ १५ ॥
कटुत्रिकं वा लवणैरुपेतं
पिबेत् स्नुहीक्षीरविमिश्रितं तु ।
कल्याणकं वा लवणं पिबेत्तु
यदुक्तमादावनिलामयेषु ॥ १६ ॥

क्षारागदमित्यादि । क्षारागदं धवाश्वकर्णशिरीषेत्यादिना दुन्दुभिस्वनीयोक्तम् । लवणं विडलवणम् । अत्राप्युष्णाम्बुना पिबेदिति संबन्धनीयम् । गुडप्रगाढानित्यादि । गुडप्रगाढान् गुडाढ्यान् । अम्लेनेत्यादि । अम्लेन काञ्जिकेन । सबीजपूरौ बीजपूरसहितौ । सघृतौ तुल्यप्रमाणौ । त्रिवर्गौ त्रिफलात्रिकटुकौ । 'सबीजपूरौ' इत्यत्र केचित् 'सशाकबीजौ' इति पठित्वा शाकवृक्षबीजसहिताविति व्याख्यानयन्ति । यदुक्तमादाविति गण्डीरपलाशेत्यादिना वातव्याधिचिकित्सिते यदुक्तमित्यर्थः । 'आमेष्वनिलामयेषु' इति केचित् पठित्वा आमवाते इति व्याख्यानयन्ति । अत्रापि अम्लेनेति संबध्यते ॥ १५ ॥ १६ ॥

कृष्णाजमोदक्षवकाणि वाऽपि
तुल्यौ पिबेद्वा मगधानिकुम्भौ ।
दन्तीयुतं वा मगधोद्भवानां
कल्कं पिबेत् कोषवतीरसेन ॥ १७ ॥
उष्णाभिरद्भिर्मगधोद्भवानां
कल्कं पिबेन्नागरकल्कयुक्तम् ।

कृष्णाजमोदेत्यादि । क्षवः फणिज्जकाकारः प्रायशः पारियात्रे भवति । 'क्षवकाणि वाऽपि' इत्यत्र 'क्षवकाग्निकान् वा' इति केचित् पठन्ति । अत्रापि अम्लेनेति संबध्यते । तुल्यौ पिबेद्वेत्यादि । निकुम्भो दन्ती । अत्राप्यम्लेनेति संबध्यते । मग-

१ 'गुडोत्कटान्' इति पा० ।

धानिकुम्भपानं विष्टम्भे सति विरेकार्थम् । केचिदुष्णोदकेन पानमिच्छन्ति । दन्तीयुतमित्यादि । कोषवती घोषकः । केचित् "उष्णाभिरद्भिर्मगधोद्भवानां कल्कं पिबेन्नागरचूर्णयुक्तम्" ईदृशं पठन्ति ॥ १७ ॥—

व्योषं करञ्जस्य फलं हरिद्रे
मूलं समं चाप्यथ मातुलुङ्ग्याः ॥ १८ ॥
छायाविशुष्का गुटिकाः कृतास्ता
हन्युर्विसूचीं नयनाञ्जनेन ।

विसूच्यां प्रमीलकादिशान्त्यर्थमञ्जनमाह—व्योषमित्यादि । केचिन्मातुलुङ्गीं मधुकर्कटीमाहुः । विसूचीशब्देन विसूचीजनिताः प्रमीलकशिरोरोगादयो गृह्यन्ते, कारणे कार्योपचारात्; अथवा विसूचीमेवाञ्जनप्रभावाद्धन्युः ॥ १८ ॥—

सुवासितं साधुविरेचितं वा
सुलङ्घितं वा मनुजं विदित्वा ॥ १९ ॥
पेयादिभिर्दीपनपाचनीयैः
सम्यक्क्षुधार्तं समुपक्रमेत ।

शुद्धस्य सुलङ्घितस्य पथ्यदानार्थमाह—सुवासितमित्यादि । केचिदत्र "कुष्ठं चागुरु पत्रं च रास्नाशिग्रुवचात्वचम् । पिष्टमम्लेन तच्छ्रेष्ठं विसूच्यामङ्गमर्दनम् ॥ चित्रकं पूतिपिण्याकं कुष्ठं भल्लातकानि च । द्वौ क्षारौ सैन्धवं चैव शुक्तं तैलं विपाचयेत् ॥ एतदुद्वर्तनं कुर्यात् प्रदेहं वा विचक्षणः ।" इति योगद्वयं पठन्ति; तन्न पठितव्यं, समानतन्त्रादर्शनात् ॥ १९ ॥—

आमं शकृद्वा निचितं क्रमेण
भूयो विवद्धं विगुणानिलेन ॥ २० ॥
प्रवर्तमानं न यथास्वमेनं
विकारमानाहमुदाहरन्ति ।

इदानीं विसूचिकातुल्यचिकित्सितत्वाद्विसूचिकोपद्रवत्वाच्चानुक्तमप्यानाहमाह—आममित्यादि । आममपक्वान्नरसः, शकृत् पुरीषं, निचितं वृद्धिंगतं, विबद्धमवरुद्धं, विगुणानिलेन उन्मार्गवायुना, न प्रवर्तमानमिति नाधःप्रवर्तमानमित्यर्थः, यथास्वं यथामार्गमित्यर्थः; एवमामं निचितं विगुणानिलेन विबद्धं सत् स्वमार्गेऽप्रवर्तमानं शकृद्वा एवंभूतमानाहं विकारमुदाहरन्तीति पिण्डार्थः । केचिदाममिति शकृद्विशेषणं मन्यन्ते; तन्न, समानतन्त्रे आमादप्यानाहस्य दर्शितत्वात् । तथाच तद्वचः—"आनाहे त्वामसंभूते विड्भूतेऽपि वा भिषक्"—इत्यादि ॥ २० ॥—

तस्मिन् भवन्त्यामसमुद्भवे तु
तृष्णाप्रतिश्यायशिरोविदाहाः ॥ २१ ॥
आमाशये शूलमथो गुरुत्वं
हृल्लास उद्गारविघातनं च ।

आमजानाहलक्षणमाह—तस्मिन्नित्यादि । तस्मिन् आनाहे । गुरुत्वमपि आमाशये आमजानाहे प्रायशो भवति । केचित् 'हृल्लास' इत्यत्र 'हृत्स्तम्भ' इति पठित्वा हृदयस्य विबन्धत्वमिति व्याख्यानयन्ति । उद्गारविघातनमुद्गारस्यासम्यक्प्रवृत्तिः । केचिदामसमुद्भवे आमाशयसमुद्भवे इति व्याख्यानयन्ति, पदेष्वपि पदैकदेशप्रयोगात्; ते च आमाशयसमुद्भवमामादेवेच्छन्ति; तत्रापि स एव तात्पर्यार्थः ॥ २१ ॥—

स्तम्भः कटीपृष्ठपुरीषमूत्रे
शूलोऽथ मूर्च्छा सं शकृद्वमेच्च ॥ २२ ॥
श्वासश्च पक्वाशयजे भवन्ति
लिङ्गानि चात्रालसकोद्भवानि ।

पुरीषजानाहलक्षणमाह—स्तम्भ इत्यादि । स्तम्भशब्दः कट्यादिभिर्मूत्रान्तैः सह प्रत्येकं संबध्यते । शूलोऽप्यत्र कट्यादिष्वेव । स पुरुषः । पक्वाशयजे आनाहे इत्यर्थः । मञ्चाः क्रोशन्तीतिवदुपचारात् पक्वाशयशब्देनात्र पुरीषमभिप्रेतं, अथ च बाहुल्येन पक्वाशये भवति । केचित् पक्वाशयजे पक्वाशयस्थे आनाहे इति व्याख्यानयन्ति । ते च पक्वाशयोद्भूत आनाहः पुरीषाद्भवतीतीच्छन्ति; तथाऽपि स पूर्वोक्त एव परिफलितार्थः ॥ २२ ॥—

आमोद्भवे वान्तमुपक्रमेत
संसर्गभक्तक्रमदीपनीयैः ॥ २३ ॥

संप्रत्यामोत्थानाहचिकित्सामाह—आमोद्भव इत्यादि । आमोद्भवे अविपक्वरसजे आनाहे । केचिदामोद्भवे आमाशयोद्भवे, पदेष्वपि पदैकदेशप्रयोगात् । एष पक्षश्चानन्तरमेव विवृतः । वान्तं कृतवमनं नरम् । संसर्गभक्तक्रमः पेयादिक्रमः । दीपनीयानि पिप्पल्यादिसाधितानि ॥ २३ ॥

अथेतरं यो न शकृद्वमेत्त-
मामं जयेत् स्वेदनपाचनैश्च ।

पुरीषजानाहचिकित्सामाह—अथेतरमित्यादि । यः पुमान् शकृत् पुरीषं न वमेत्, तस्य पुंसस्तमानाहमितरं पुरीषजमामान्वितं स्वेदनादिभिर्जयेदिति संबन्धः । यस्तु शकृद्वमेत्तस्य आमं न जयेत्, तथा सत्यसाध्यत्वादिति भावः । कार्तिककुण्डस्तु इतरं पक्वाशयजानाहवन्तं नरं, मत्वर्थीयप्रत्ययान्तत्वात् । असावपि पक्षोऽनन्तरं विवृतः । 'स्वेदनपाचनीयैः' इत्यत्र च कार्तिककुण्डः 'स्वेद्य यथाविधानं' इति पठित्वा व्याख्यानयति —स्वेद्य स्वेदयित्वा, उपसर्गलोपात् साधु; यथाविधानमिति विण्मूत्रानुलोमनविधानेन ॥—

विसूचिकायां परिकीर्तितानि
द्रव्याणि वैरेचनिकानि यानि ॥ २४ ॥
तान्येव वर्तीर्विरचेद्धिचूर्ण्यं
महिष्यजावीभगवां तु मूत्रैः ।
स्विन्नस्य पायौ विनिवेश्य ताश्च
चूर्णानि चैषां प्रधमेत्तु नाड्या ॥ २५ ॥

१ 'तथाऽपि' इति पा० । २ 'च शकृद्विमिश्रं' इति पा० ।

अतिदेशेनानाहचिकित्सामाह—विसूचिकायामित्यादि । विसूचिकायां परिकीर्तितानि कथितानि यानि वैरेचनिकानि द्रव्याणि दन्त्यादीनि, तानि विचूर्ण्य महिष्यादीनां मूत्रैर्विपाच्य वर्तीर्विरंचेत् कुर्यात् । ताश्च वर्तीः खिन्नस्य नरस्य गुदे विनिवेश्य, एषां वैरेचनिकानामेव चूर्णानि नाड्या प्रधमेदिति संबन्धः । इभो हस्ती ॥ २४ ॥ २५ ॥

मूत्रेषु संसाध्य यथाविधानं
द्रव्याणि यान्यूर्ध्वमधश्च यान्ति ।
क्वाथेन तेनाशु निरूहयेच्च
मूत्रार्धयुक्तेन समाक्षिकेण ॥ २६ ॥
त्रिभण्डियुक्तं लवणप्रकुञ्चं
दत्त्वा विरिक्तक्रममाचरेच्च ।

आनाहे निरूहमाह—मूत्रेषु संसाध्येत्यादि । यानि द्रव्याणि ऊर्ध्वमधश्च यान्ति तानि मूत्रेषु यथाविधानं संसाध्य तेन क्वाथेनार्धमूत्रान्वितेन समाक्षिकेण त्रिभण्डियुक्तलवणं प्रकुञ्चं दत्त्वा निरूहयेदिति पिण्डार्थः । मूत्रेष्विति अनन्तरोक्तेषु महिष्यादिजेषु । संसाध्य पक्त्वा । यथाविधानं क्वाथपाकविधिना । द्रव्याणि यान्यूर्ध्वमधश्च यान्ति संशोधनसंशमनीयोक्तानि कोशातक्यादीनि । आशु शीघ्रम् । मूत्रार्धयुतेन अर्धमूत्रान्वितेन क्वाथेन । कार्तिककुण्डस्तु मात्रार्धयुक्तेनेति पठति, व्याख्यानयति च—अर्धमात्रिकेणेति । माक्षिकं मधु । त्रिभण्डियुक्तं लवणप्रकुञ्चमिति त्रिवृत्सहितमेव सैन्धवपलमित्यर्थः । विरिक्तक्रमं सम्यग्विरिक्तस्य यः क्रमस्तमाचरेदित्यर्थः; केचिदाचरेदित्यन्तर्भावितकारितार्थं मन्यन्ते; तेन, आचरेत् वैद्येनाचारयेदित्यर्थः । इदमास्थापनमानाहे पाचनोत्तरकालं देयं, न त्वामावस्थायाम् ॥ २६ ॥—

एष्वेव तैलेन च साधितेन
प्राप्तं यदि स्यादनुवासयेच्च ॥ २७ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे विसूचिकाप्रतिषेधो नाम (अष्टादशोऽध्यायः, आदितः) षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

आनाहेऽनुवासनमाह—एष्वेवेत्यादि । एष्विति अनन्तराभिहितनिरूहोक्तेषु कोशातक्यादिषु । प्राप्तं प्राप्तकालं प्राप्तावस्थमित्यर्थः; एतेन परिपक्कामं सुनिरूढं वातकोपे सत्यनुवासयेदित्यर्थः ॥ २७ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे विसूचिकाप्रतिषेधो नाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

१ 'वितरेत् दद्यात्' इति पा० ।

सप्तपञ्चाशत्तमोऽध्यायः ।

अथातोऽरोचकप्रतिषेधमध्यायं व्याख्यास्यामः ॥१॥ यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

विसूचिकाप्रतिषेधानन्तरं रसदोषजत्वसाम्यादग्निमान्द्यहेतुत्वसाम्याच्चारोचकप्रतिषेधारम्भः—अथात इत्यादि । अत्रादिशब्दो लुप्तो द्रष्टव्यः; तेनाविपाकस्यापि ग्रहणम् ॥ १ ॥

दोषैः पृथक् सह च चित्तविपर्ययाच्च
भक्तायनेषु हृदि चावतते प्रगाढम् ।
नान्ने रुचिर्भवति तं भिषजो विकारं
भक्तोपघातमिह पञ्चविधं वदन्ति ॥ ३ ॥

संप्राप्तिद्वारेण संख्यामाह—दोषैरित्यादि । दोषैः पृथगिति त्रयः, सह चेति समस्तैरेकः, चित्तविपर्ययात् कामशोकभयादिभिर्विलुप्तचित्तत्वात्, चित्तविपर्ययात्त्वेकः; केचित् 'चित्तविपर्ययात्' इत्यत्र 'शोकसमुच्छ्रयात्' इति पठन्ति, तन्मते कामादिजानामसंग्रहः । भक्तायनेषु अन्नवहेषु स्रोतःसु । भक्तायनमिति जिह्वोपलक्षणं, समानतन्त्रदर्शनात् । तथाच—"पृथग्दोषैः समस्तैश्च जिह्वाहृदयसंसृतैः । जायतेऽरुचिराहारे द्विष्टैरन्यैश्च मानसैः"—इति । अवतते इति भक्तायनेष्वित्यत्रापि वचनविपरिणामात् संबन्धनीयम् । अवतते व्याप्ते । भक्तोपघातमरोचकं; अरोचकाभक्तच्छन्दान्नद्वेषाः पर्याया बोद्धव्याः; कैश्चिदेषां परस्परं भेदोऽङ्गीक्रियते । तथाच वृद्धभोजः,—"प्रक्षिप्तं तु मुखे चान्नं जन्तोर्न स्वदते मुहुः । अरोचकः स विज्ञेयो, भक्तद्वेषमतः शृणु ॥ चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वाऽपि भोजनम् । द्वेषमायाति यंजन्तुर्भक्तद्वेषः स उच्यते ॥ यस्य नान्ने भवेच्छ्रद्धा सोऽभक्तच्छन्द उच्यते—" इत्यादि । इह अस्मिन् शास्त्रे । संख्येयनिर्देशादेव संख्यायां सिद्धायां पञ्चविधमिति संख्याकरणं नियमार्थं; तेन कामादिजा अरोचकाः पृथङ्न गणनीयाः ॥ ३ ॥

हृच्छूलपीडनयुतं विरसाननत्वं
वातात्मके भवति लिङ्गमरोचके तु ।

वातिकारोचकलक्षणमाह—हृच्छूलपीडनयुतमित्यादि । हृच्छूलपीडनयुतमिति विरसाननत्वमित्येतस्य विशेषणम् । अपरे तु हृत् हृदयं शूलपीडनाभ्यां युक्तं भवतीति व्याख्यानयन्ति । अरोचकानां प्राग्रूपानभिधानं रूपाणामेवाव्यक्तानां प्राग्रूपत्वात् ॥—

हृद्दाहचोषबहुता मुखतिक्तता च
मूर्च्छा सतृड् भवति पित्तकृते तथैव ॥ ४ ॥

पित्तजारोचकलक्षणमाह—हृद्दाहचोषेत्यादि । हृद्दाहचोषबहुतेति हृदि हृदये दाहचोषयोर्बाहुल्यमित्यर्थः । चोष आचूष्यत इव वेदना । अन्ये 'हृद्दाहचोषबहुलं' इति पठित्वा हृदयं दाहचोषबहुलं भवतीति व्याख्यानयन्ति ॥ ४ ॥

१ 'यो जन्तुः' इति पा० ।

कण्डूगुरुत्वकफसंस्रवसादतन्द्राः
श्लेष्मात्मके मधुरमास्यमरोचके तु ।

कफजारोचकलक्षणमाह—कण्डूगुरुत्वेत्यादि । कफसंस्रवः श्लेष्मस्रुतिः । सादोऽङ्गग्लानिः । आस्यं मुखम् । केचित् 'सादतन्द्रा' इत्यत्र 'कण्ठसादा' इति पठित्वा अभ्यवहरणाद्यशक्तिरिति व्याख्यानयन्ति ॥—

सर्वात्मके पवनपित्तकफा बहूनि
रूपाण्यथास्य हृदये समुदीरयन्ति ॥ ५ ॥

सान्निपातिकारोचकलक्षणमाह—सर्वात्मक इत्यादि । सर्वात्मके सान्निपातिकारोचके पवनादयो दोषा बहूनि रूपाण्यस्य हृदये समुदीरयन्ति कुर्वन्तीति पिण्डार्थः । यद्यपि सान्निपातिके हृद्रोगे सर्वजारोचके च वाहुल्येन समान्येवं लिङ्गानि भवन्ति, तथाऽपि संप्राप्तिभेदात् किञ्चिल्लक्षणभेदाच्च तयोर्भेदः । सान्निपातिकारोचकोऽसाध्यः, "सर्वात्मकं चापि विवर्जयेत्" इति समानतन्त्रोक्तत्वात् ॥ ५ ॥

संरागशोकभयविप्लुतचेतसस्तु
चिन्ताकृतो भवति सोऽशुचिदर्शनाच्च ।

अवशिष्टं पञ्चममरोचकमाह—संरागशोकेत्यादि । संरागः कामः । विप्लुतचेतसः विकृतचित्तस्य । स अरोचकः । अशुचिदर्शनात् अमेध्यवस्तुदर्शनात् बीभत्सादिदर्शनादित्यर्थः । चिन्ताकृतस्यारोचकस्य भिन्नलक्षणनिर्देशाच्छेषेषु यथादोषं लक्षणानि ज्ञातव्यानि, कामादिभिः सर्वैर्वातादिप्रकोपात् । तथाच "कामशोकभयाद्वायुः क्रोधात् पित्तं च कुप्यति । श्लेष्मा तु हर्षणात्"—इति । अन्ये तु चिन्ताकृतारोचकस्य वातादिभेदेन लक्षणानि पठन्ति; तद्यथा,—"वातात्मके विरसमास्यमरोचके तु, पित्तेन तिक्तकटुकं, मधुरं कफेन । सर्वैरुपेतमथ सर्वजमेव विद्याद्दैन्यं भृशं भवति शोकसमुद्भवे तु"—इति । अयं पाठो न पठनीयः, अनार्षत्वात् ॥—

वाते वचाम्बुवमनं कृतवान् पिबेच्च
स्नेहैः सुराभिरथवोष्णजलेन चूर्णम् ॥ ६ ॥
कृष्णाविडङ्गयवभस्महरेणुभार्गी-
रास्नैलहिङ्गुलवणोत्तमनागराणाम् ।

इदानीं वातिकारोचकचिकित्सामाह—वात इत्यादि । वाते वातजे अरोचके, कारणे कार्योपचारात् । वचाम्बुवमनं कृतवानिति वचाक्वाथेन कृतवमनो नरः । केचित् एलशब्देन एलवालुकं मन्यन्ते, पदेऽपि पदैकदेशप्रवृत्तेः । 'एलजलेन' इत्यत्र 'उष्णजलेन' इति पाठान्तरम् । लवणोत्तमं सैन्धवम् । इदं चूर्णं वमनैः शुद्धाशयस्य देयम् । कार्तिककुण्डोऽमुं पाठमन्यथा पठति, स चाभावान्न लिखितः ॥ ६ ॥—

पित्ते गुडाम्बुमधुरैर्वमनं प्रशस्तं
स्नेहः ससैन्धवसितामधुसर्पिरिष्टः ॥ ७ ॥

पित्तजारोचकचिकित्सामाह—पित्ते इत्यादि । पित्ते पित्तजारोचके, उपचारात् । मधुरं काकोल्यादि । अत्रापि पूर्ववद्वचारणम् ॥ ७ ॥

निम्बाम्बुवामितवतः कफजेऽनुपानं
राजद्रुमाम्बु मधुना तु सदीप्यकं स्यात् ।

कफारोचकचिकित्सामाह—निम्बाम्बुवामितवत इत्यादि । निम्बाम्बु निम्बक्वाथः, निम्बाम्बुना वामितवतः पुंसः गिरिमालकक्वाथः समधुः साजमोदश्चानुपानं स्यात्; 'कृतभोजनस्य' इति शेषः, समानतन्त्रदर्शनात् । केचिद्दीप्यकशब्देन यवानीमाहुः ॥—

चूर्णं यदुक्तमथवाऽनिलजे तदेव

कफजारोचकेऽतिदेशेन चिकित्सामाह—चूर्णमित्यादि । चूर्णं यदुक्तमिति 'कृष्णाविडङ्गयवभस्म' इत्यादिकम् । तच्चूर्णं कफजे वातानुबन्धे सति देयम् ॥—

सर्वैश्च सर्वकृतमेवमुपक्रमेत ॥ ८ ॥

सान्निपातिकारोचकचिकित्सामाह—सर्वैरित्यादि । सर्वैरिति वातादिजारोचकहरैः पूर्वोक्तैरेव । सर्वकृतं सान्निपातिकमरोचकम् । एवमिति पूर्ववत्, वमनादि कारयित्वेति यावत् । उपक्रमेत 'प्रत्याख्याय' इति शेषः, असाध्यत्वात्तस्य ॥ ८ ॥

द्राक्षापटोलविडवेत्रकरीरनिम्ब-
मूर्वाभयाक्षबदरामलकेन्द्रवृक्षैः ।
बीजैः करञ्जनृपवृक्षभवैश्च पिष्टै-
र्लेहं पचेत् सुरभिमूत्रयुतं यथावत् ॥ ९ ॥
मुस्तां वचां त्रिकटुकं रजनीद्वयं च
भार्गीं च कुष्ठमथ निर्दहनीं च पिष्ट्वा ।
मूत्रेऽविजे द्विरदमूत्रयुते पचेद्वा
पाठां तुगामतिविषां रजनीं च मुख्याम् ॥१०॥
मण्डूकिमर्कममृतां च सलाङ्गलाख्यां
मूत्रे पचेत्तु महिषस्य विधानविद्वा ।
एतान्न सन्ति चतुरो लिहतस्तु लेहान्
गुल्मारुचिश्वसनकण्ठहृदामयाश्च ॥ ११ ॥

इदानीं चतुर्णामप्यरोचकानां यथासंख्येन चतुरो लेहानाह—द्राक्षापटोलेत्यादि । द्राक्षादिः सुरभिमूत्रयुतं यथावदित्यन्त एको लेहः । मुस्तादिः मूत्रेऽविजे इतिपर्यन्तो द्वितीयः । द्विरदमूत्रादी रजनीं च मुख्यामित्यन्तस्तृतीयः । मण्डूकीत्यादिश्चतुर्थः । करीरो गूढपत्रो मरुदेशेऽतिप्रसिद्धः कण्टकिवृक्षः; मूर्वा चोरस्नायुः; अभया हरीतकी, केचिदभयं मन्यन्ते, तन्मते उशीरं, अक्षं बिभीतकं; इन्द्रवृक्षः कुटजः; नृपवृक्षः गिरिमालकः । सुरभिमूत्रयुतं कल्कचतुर्गुणगोमूत्रयुतं, "मूत्रेण चतुर्गुणेन" इत्यादिकाश्यपीयसंवादात् । यथावदिति लेहं पचेदित्यत्र योज्यं, तेन यथावल्लेहं पचेत्; कोऽर्थः? यावल्लेहपाकलक्षणं तन्तुमुद्रादि जायते तावत् पचेदित्यर्थः । निर्द-

१ 'पवनादीनामेव' इति पा० ।

हनी चित्रकः, अजमोदा इत्यन्ये । अविजे मेषोत्थे । असावपि पूर्ववल्लेहवत् पक्तव्यः । द्विरदसूत्रं हस्तिमूत्रम् । तुगा वंशरोचनानुकारि पार्थिवं द्रव्यमाहुः । रजनीं च मुख्यां पिण्डहरिद्राम् । अयमपि पूर्वविधिनैव पक्तव्यः । मण्डूकी ब्राह्मी, अमृता गुडूची, लाङ्गली कलिकारिका । असावपि पूर्ववत् पक्तव्यः । 'एतान्न सन्ति चतुरोऽभ्यसतश्च' इति केचित् पठन्ति । 'एतान् वदन्ति भिषजश्चतुरश्च लेहान् गुल्मारुचिश्वसनकण्ठहृदामयेषु' इत्यपरे पठन्ति ॥ ९—११ ॥

सात्म्यान् स्वदेशरचितान् विविधांश्च भक्ष्यान्
पानानि मूलफलषाडवरागयोगान् ।
अद्यादसांश्च विविधान् विविधैः प्रकारै-
र्भुञ्जीत चापि लघुरूक्षमनःसुखानि ॥ १२ ॥

सात्म्यानित्यादि । सात्म्यान् सुखकरान् । 'सात्म्यान् स्वदेशरचितान् विविधैः प्रकारैर्भुञ्जीत वाऽपि लघुरूक्षमनाः सुखेन' इत्यन्ये पठन्ति । स्वदेशरचितान् विविधांश्च भक्ष्यानिति यस्मिन् देशे ये भक्ष्या बाहुल्येनोपयुज्यन्ते तानित्यर्थः । पानानीत्यत्रापि विविधानीति योज्यं, तेन यथारुचि फलानि शर्करान्वितानि कर्पूरचतुर्जातकसुगन्धीनि गृह्यन्ते । मूलं पिप्पलीमूलादि । फलं दाडिमादि । षाडवा रसालाद्याः । रागाः कपित्थरागादयः । केचित् "सितारुचकसिन्धूत्थैः सवृक्षाम्लपरूषकैः । जम्बूफलरसैर्युक्तो रागो राजिकया कृतः ॥ मधुराम्लकटूनां तु संस्काराः षाडवा मताः" इत्याहुः; अपरे तु षाडवशब्देन यवानीषाडवमाहुः, तन्त्रान्तरसंवादात्; रागशब्देन च रागषाडवं मत्वा द्राक्षादाडिमाद्यन्वितं मुद्गयूषमिति च व्याख्यानयन्ति । रसान् विविधान् मांसरसान् मधुरादिरसान् वा । लघुरूक्षभोजनं श्लेष्मस्थानगतत्वादरोचकस्य । मनःसुखं मनोनुकूलम् । केचित् सात्म्यानिति सात्म्यदेशरोगर्तुप्रकृत्यादीन्यवेक्ष्य भक्ष्यादि कुर्यादिति मन्यन्ते ॥ १२ ॥

आस्थापनं विधिवदत्र विरेचनं च
कुर्यान्मृदूनि शिरसश्च विरेचनानि ।

निषिद्धस्यापि निरूहस्यारोचके प्रयोगमाह—आस्थापनमित्यादि । आस्थापनं निरूहः । विधिवत् यथाविधि । अत्र रोचके । यद्यपि 'तत्रोन्मादभयशोक'–इत्यादिनाऽरोचके आस्थापननिषेधः; तथाऽपि वमनादिक्रमोत्तरकालं वातानुबन्धे सति देयं, न त्वादौ ॥—

त्रीण्यूषणानि रजनीत्रिफलायुतानि
चूर्णीकृतानि यवशूकविमिश्रितानि ॥ १३ ॥
क्षौद्रायुतानि वितरेन्मुखबोधनार्थं-

त्रीण्यूषणानीत्यादि । त्रीण्यूषणानीति त्रिकटुकम् । यवशूको यवक्षारः । वितरेत् दद्यात् । मुखबोधनार्थमिति मुखबोधे सत्यरोचकहानिरित्यर्थः । अवलेहप्रयोग एषः ॥ १३ ॥—

मन्यानि तिक्तकटुकानि च भेषजानि ।
मुस्तादिराजतरुवर्गदशाङ्गसिद्धैः
क्वाथैर्जयेन्मधुयुतैर्विविधैश्च लेहैः ॥ १४ ॥
मूत्रासवैर्गुडकृतैश्च तथा त्वरिष्टैः
क्षारासवैश्च मधुमाधवतुल्यगन्धैः ।

अनुक्तसंग्रहार्थमाह—अन्यानीत्यादि । मुस्तादिः मुस्ताकुष्ठहरिद्रेत्यादिः, राजतरुवर्गः आरग्वधमदनगोपघोण्टेत्यादिः, दशाङ्गं दशमूलम् । जयेत् 'अरोचकं' इति शेषः । मधुयुता लेहा मुस्ताद्यादिकृता एव ग्राह्याः । केचित् 'विविधैश्च योगैः' इति पठित्वा वातश्लेष्महरैरिति व्याख्यानयन्ति । मूत्रासवैरित्यादि मूत्रेण आसूयन्त इति मूत्रासवाः । तैश्च किम्भूतैः ? गुडकृतैः कुष्ठचिकित्सितोक्तविधिना गुडमध्वादिकृतैरित्यर्थः । अरिष्टैरभयारिष्टादिभिः । क्षारासवैरिति मध्वादिभिः पलाशक्षारपानीयेन सह निष्पादितैर्महाकुष्ठाभिहितैः । मधुमाधवतुल्यगन्धैरिति मधु क्षौद्रं, माधवं मधुकृतं मद्यं, तयोस्तुल्यगन्धैरित्यर्थः ॥ १४ ॥—

स्यादेष एव कफवातहते विधिश्च
शान्तिं गते हुतभुजि प्रशमाय तस्य ॥ १५ ॥

पूर्वोक्तमेव विधिमविपाकेऽतिदिशन्नाह—स्यादेष इत्यादि । एष एव विधिरनन्तरोक्त एव । यदत्र कफवातयोरुपादानं न पित्तनिमित्तस्य तत् पित्तादविपाको न भवतीति दर्शयति । शान्तिं गते हुतभुजि अविपाके इत्यर्थः, कारणे कार्योपचारात्; उपचारेण यदत्राविपाकग्रहणं कृतं, न साक्षात्तदप्यग्निमान्द्यमविपाकस्य कारणमिति सूचयति । शान्तिं गते मन्दतां प्राप्ते, हुतभुजि जाठराग्नौ । तस्येत्यत्र चकारो लुप्तो द्रष्टव्यः, तेन तस्य च प्रशमनाय; कोऽर्थः ? अरोचकस्यापि । कार्त्तिक ईदृशं व्याख्यानं न मन्यते, तस्याविपाकस्यैव प्रशमायेति प्रतिपादयति । ये चाग्निमान्द्य एवैनं विधिमिच्छन्ति नत्वरोचकाविपाके, तन्मतेऽस्मिन्नध्यायेऽविपाको न वक्तव्यः ॥ १५ ॥

इच्छाभिघातभयशोकहतेऽन्तरग्नौ
भावान् भवाय वितरेत् खलु शक्यरूपान् ।
अर्थेषु चाप्यपचितेषु पुनर्भवाय
पौराणिकैः श्रुतिशतैरनुमानयेत्तम् ॥ १६ ॥
दैन्यं गते मनसि बोधनमत्र शस्तं
यद्यत् प्रियं तदुपसेव्यमरोचके तु ॥ १७ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रेऽरोचकप्रतिषेधो नाम
(एकोनविंशोऽध्यायः, आदितः)
सप्तपञ्चाशत्तमोऽध्यायः ॥५७॥

इदानीं पञ्चमारोचकचिकित्सामाह—इच्छाभिघातेत्यादि । इच्छाभिघातो वाञ्छितस्याप्राप्तिः । भावान् पदार्थान् । भवाय

१ 'सदेशरन्धितान्' इति पा० । २ 'मुखधावनार्थम्' इति पा० ।

१ अस्याग्रे 'इच्छाभिघातजस्य' इत्यधिकं पठ्यते क्वचित् पुस्तके । २ 'चातिपतितेषु' इति पा० । ३ 'अनुभावयेत्तम्' इति पा० ।

अर्थवशाद्रुच्युत्पादनाय । वितरेत् दद्यात् । कीदृशान् भावान्? शक्यरूपान् प्राप्यानित्यर्थः । ये तावत् प्राप्या भावास्तान् इच्छाविघातायरोचके वितरेत् । ये पुनरप्राप्यास्तद्विषये किं कुर्यादित्याह—अर्थेष्वित्यादि । अर्थेषु पदार्थेषु, अपचितेषु नष्टेषु अप्राप्तेष्वित्यर्थः । पुनरिति अपचितेष्वित्यत्र योज्यम् । भवाय रुच्युत्पादनायेत्यर्थः । पौराणिकैः श्रुतिशतैरनुमानयेदिति नलरामाद्युपाख्यानैरन्यैश्च तथाविधैरनुमानयेत् प्रबोधयेदित्यर्थः। केचित् पौराणिकैः श्रुतिपथैरिति पठन्ति; पौराणिकैः पुराणोक्तैः, श्रुतिपथैः वाक्यैः, श्रुतिः श्रवणं सैव पन्था मार्गो येषां तानि तथोक्तानीति व्याख्यानयन्ति । दैन्यं गते मनसि क्लिष्टचेतसीत्यर्थः । बोधनमाश्वासनैर्हितोपदेशैश्च । केचिदमुं पाठं न पठन्ति ॥ १६ ॥ १७ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रेऽरोचकप्रतिषेधो नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

अष्टापञ्चाशत्तमोऽध्यायः ।

अथातो मूत्राघातप्रतिषेधमध्यायं व्याख्यास्यामः १
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अरोचकप्रतिषेधानन्तरं पारिशेष्यान्मूत्राघातप्रतिषेधारम्भः; परिशेषत्वं च मूत्राघातमूत्रकृच्छ्रयोरेकत्वेन विवक्षितत्वात् कायचिकित्सायां चापरस्याध्यायस्याभावात् । अथात इत्यादि । मूत्राघातो मूत्रावरोधः, केचिदाघातशब्देन दुष्टिमाहुः न त्ववरोधं, मूत्रशुक्रमूत्रसादयोर्मूत्रावरोधासंभवात् ॥ १ ॥ २ ॥

वातकुण्डलिकाऽष्ठीला वातबस्तिस्तथैव च ।
मूत्रातीतः सजठरो मूत्रोत्सङ्गः क्षयस्तथा ॥ ३ ॥
मूत्रग्रन्थिर्मूत्रशुक्रमुष्णवातस्तथैव च ।
मूत्रौकसादौ द्वौ चापि रोगा द्वादश कीर्तिताः ४

इदानीं सुखबोधार्थं मूत्राघातान्नामभिः प्राह—वातेत्यादि । अष्ठीलेति वाताष्ठीलेत्यर्थः । या निदानस्थाने वाताष्ठीला भणिता सा भिन्ना, आध्मानादिलक्षणरहितत्वात् । संख्येयनिर्देशादेव संख्यायां सिद्धायां द्वादशेति संख्याकरणं तन्त्रान्तरोक्ताधिकसंख्यानिवारणार्थम् ॥ ३ ॥ ४ ॥

रौक्ष्याद्वेगविघाताद्वा वायुरन्तरमाश्रितः ।
मूत्रं चरति संगृह्य विगुणः कुण्डलीकृतः ॥ ५ ॥
सृजेदल्पाल्पमथवा सरुजस्कं शनैः शनैः ।
वातकुण्डलिकां तं तु व्याधिं विद्यात् सुदारुणम्

वातकुण्डलिकाया हेतुसंप्राप्तिलक्षणान्याह—रौक्ष्यादित्यादि । अन्तरमाश्रित इति बस्तिमध्यमाश्रित इत्यर्थः । मूत्रं चरति संगृह्येति मूत्रं गृहीत्वा वायुश्चरति भ्रमतीत्यर्थः । कुण्डलीकृत इति कुण्डलाकृत्या वर्तुलीभूतः । सृजेत् प्रवर्तयेत् । सरुजस्कं सवेदनं मूत्रम् । रौक्ष्याद्वेगविघातादिति व्यवहितः सन्निहितश्च हेतुरुक्तः, वायुरन्तरमाश्रित इत्यादिसंप्राप्तिः, कुण्डलीकृत इत्यादिलक्षणम् । 'मूत्रमल्पाल्पमथवा सरुजं संप्रवर्तते' इति केचित् पठन्ति । अपरे 'सरुजं संप्रवर्तयेत्' इति पठन्ति । सर्वेषां मूत्रघातानां वायुरेव प्रायशः कारणं बोद्धव्यम् ॥ ५ ॥ ॥ ६ ॥

शकृन्मार्गस्य बस्तेश्च वायुरन्तरमाश्रितः ।
अष्ठीलावद्घनं ग्रन्थिं करोत्यचलमुन्नतम् ॥ ७ ॥
विण्मूत्रानिलसङ्गश्च तत्राध्मानं च जायते ।
वेदना च परा बस्तौ वाताष्ठीलेति तां विदुः ॥८॥

अष्ठीलाया हेतुसंप्राप्तिलक्षणान्याह—शकृन्मार्गस्येत्यादि । शकृन्मार्गो गुदः, बस्तिर्मूत्राधारः, वायुरत्रापानो गुदबस्तिस्थरोगकरत्वात्, अन्तरं मध्यम् । अष्ठीला उत्तरापथे दीर्घवर्तुलपाषाणविशेषः, अन्ये चर्मकाराणां लौहीं भाण्डीमाहुः । अचलमीषच्चलम् । आध्मानं बस्तौ बोद्धव्यम् । अपानो वायुरत्र हेतुः, शकृन्मार्गस्येत्यादिः संप्राप्तिः, शेषं लक्षणम् ॥ ७ ॥ ८ ॥

वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः ।
निरुणद्धि मुखं तस्य बस्तेर्बस्तिगतोऽनिलः ॥९॥
मूत्रसङ्गो भवेत्तेन बस्तिकुक्षिनिपीडितः ।
वातबस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाधनः १०

वातबस्तेर्हेतुसंप्राप्तिलक्षणान्याह—वेगमित्यादि । अकुशलो मूर्खः । तस्य मूर्खस्य । मूत्रसङ्गो मूत्रस्याप्रवृत्तिः । तेन व्याधिना बस्तिकुक्षिनिपीडित इति बस्तिकुक्षेर्निपीडनं विद्यते यस्य (त्र)स तथा; निपीडितं निपीडनं वेदनेत्यर्थः । कृच्छ्रप्रसाधनः कष्टसाध्यः । वेगं विधारयेदिति हेतुः, निरुणद्धि मुखं तस्य बस्तेरिति संप्राप्तिः, शेषं लक्षणम् ॥ ९ ॥ १० ॥

वेगं सन्धार्य मूत्रस्य यो भूयः स्रष्टुमिच्छति ।
तस्य नाभ्येति यदि वा कथञ्चित्संप्रवर्तते ॥११॥
प्रवाहतो मन्दरुजमल्पमल्पं पुनः पुनः ।
मूत्रातीतं तु तं विद्यान्मूत्रवेगविघातजम् ॥ १२ ॥

मूत्रातीतस्य हेतुं संप्राप्तिं लक्षणं चाह—वेगमित्यादि । वेगं प्रवृत्त्युन्मुखत्वं, तं सन्धार्य सम्यग्धृत्वा, भूयः पुनः, स्रष्टुमिच्छति मोक्तुं वाञ्छति । नाभ्येति मूत्रं नागच्छतीत्यर्थः । प्रवाहत इति निकुहनादित्यर्थः । यद्यपि वेगं सन्धार्य मूत्रस्येत्यनेनैव मूत्रविघातजत्वमस्य व्याधेः प्राप्तं, तथाऽपि पुनर्मूत्रवेगविघातजमिति करणं मूत्रविघातोत्थवातजत्वप्रतिपादनार्थम् । वेगं सन्धार्येत्यादिर्हेतुः, यो भूयः स्रष्टुमिच्छतीत्यादिः संप्राप्तिः, शेषं लक्षणम् ॥ ११ ॥ १२ ॥

मूत्रस्य विहते वेगे तदुदावर्तहेतुना ।
अपानः कुपितो वायुरुदरं पूरयेद्भृशम् ॥ १३ ॥
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम् ।
तं मूत्रजठरं विद्यादधःस्रोतोनिरोधनम् ॥ १४ ॥

---

१ '०लक्षणहेतुत्वात्' इति पा०। २ 'वायुर्बस्तौ सवेदनम्' इति पा०।

मूत्रजठरस्य हेत्वादिकमाह—मूत्रस्येत्यादि । तदुदावर्तहेतुनेति तदुदावर्तो मूत्रोदावर्तः स एव हेतुस्तेनेत्यर्थः; एतेन मूत्रवेगेऽवरुद्धे सति तदुदावर्तहेतुनाऽपानो वायुः कुपितः सन् उदरं पूरयेत्, ततश्च नाभेरधोभागे तीव्रपीडमाध्मानं जनयेत्; तं मूत्रजठरमधःस्रोतोनिरोधनं विद्यात् मूत्रपुरीषमार्गावरोधकं जानीयादित्यर्थः। केचित् 'अधोबस्तिनिरोधजम्' इति पठन्ति । ये तु 'अपानः कुपितो वायुः' इत्यादिकमेव मूत्रजठरं पठन्ति, ते 'मूत्रस्य वेगे विहते तदुदावर्तहेतुना' इति पाठं मूत्रातीतपाठमध्ये पठन्ति । तथाच सति ते प्रकोपकारणानुक्तावपानप्रकोपकारणं बलवद्विग्रहादिकं मन्यन्ते । तादृशश्च पाठो न वृद्धचित्ताह्लादकरः । मूत्रस्य वेगे विहते इत्यादिर्हेतुः, उदरं पूरयेद्भृशमित्यादिः संप्राप्तिः, शेषं लक्षणम् ॥ १३ ॥ १४ ॥

बस्तौ वाऽप्यथवा नाले मणौ वा यस्य देहिनः ।
मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः ॥ १५ ॥
स्रवेच्छनैरल्पमल्पं सरुजं वाऽथ नीरुजम् ।
विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः १६

मूत्रोत्सङ्गस्य हेत्वादिकमाह—बस्तावित्यादि । नाले मेढ्रस्रोतसि । मणौ मेढ्राग्रदेशे । यद्यपि नाले इत्यनेनैव मणेरपि ग्रहणं संजातं, तथाऽपि मणेरुपादनं मणावत्यन्तमूत्रोत्सङ्गप्रतिपादनार्थम् । सज्जेत अवरुध्येत । सरक्तमित्यत्र संसक्तमिति पाठे संसक्तं संबद्धम् । प्रवाहतः निकुन्थनादित्यर्थः । सरुजमतिवातप्रकोपात्, नीरुजं हीनवातप्रकोपात् । विगुणानिलज इति विमार्गवायुजः, वायोर्विमार्गगमनं मार्गावरोधात् स्वहेतुभिश्च; केचिन्मार्गावरोधमेव विमार्गगमने कारणमिच्छन्ति । विगुणानिलजो व्याधिरिति हेतुः, बस्तावित्यादिः संप्राप्तिः, शेषं लक्षणम् ॥ १५ ॥ १६ ॥

रूक्षस्य क्लान्तदेहस्य बस्तिस्थौ पित्तमारुतौ ।
सदाहवेदनं कृच्छ्रं कुर्यातां मूत्रसंक्षयम् ॥ १७ ॥

मूत्रक्षयस्य हेत्वादिकमाह—रूक्षस्येत्यादि । क्लान्तदेहस्य ग्लानदेहस्य । यद्यपि रूक्षग्लानदेहत्वं न पित्तप्रकोपकारणं तथाऽपि वातान्वितपित्तस्य प्रकोपकं ज्ञेयम् । कुर्यातामुत्पादयेताम् । कृच्छ्रं कष्टजननम् । मूत्रसङ्क्षयमिति मूत्रशोषणान्मूत्रसङ्क्षयो रोगः । रूक्षस्येत्यादिर्हेतुः, बस्तिस्थावित्यादिः संप्राप्तिः, शेषं लक्षणम् । 'बस्तिस्थौ पित्तमारुतौ' इत्यत्र 'बस्तौ तिष्ठन् सदागतिः' इति केचित् पठन्ति; स चानार्षः पाठः ॥ १७ ॥

अभ्यन्तरे बस्तिमुखे वृत्तोऽल्पः स्थिर एव च ।
वेदनावानति सदा मूत्रमार्गनिरोधनः ॥ १८ ॥
जायते सहसा यस्य ग्रन्थिरश्मरिलक्षणः ।
स मूत्रग्रन्थिरित्येवमुच्यते वेदनादिभिः ॥ १९ ॥

मूत्रग्रन्थेर्हेत्वादिकमाह—अभ्यन्तर इत्यादि । अभ्यन्तरे बस्तिमुखे इति बस्तिद्वारस्याभ्यन्तरे इत्यर्थः । वृत्तो वर्तुलः । स्थिरोऽचलः । मूत्रमार्गनिरोधनः मूत्रवाहिस्रोतोनिरोधकारीत्यर्थः । सहसा झटिति । अश्मरीलक्षण इत्यत्र वेदनादिभिरिति संबध्यते । तेन वेदनाभिः कृत्वा अश्मर्यास्तुल्यलक्षणो नत्वधिष्ठानादिभिरश्मरीतुल्यलक्षणः, एष एवाश्मरीमूत्रग्रन्थ्योर्भेदः; तथा अश्मर्यां रक्तसंबन्धो नास्ति, मूत्रग्रन्थौ तु तन्त्रान्तरदर्शनाद्रक्तसंबन्धो ज्ञेय इत्यपि भेदः । तथाच तद्वचः,—"रक्तं वातकफाद्दुष्टं बस्तिद्वारे सुदारुणम् । ग्रन्थिं कुर्यात् स कृच्छ्रेण सृजेन्मूत्रं तदावृतम् ॥ अश्मरीसमशूलं तं मूत्रग्रन्थिं प्रचक्षते"—इति । अभ्यन्तर इत्यादिसंप्राप्तिः, वेदनावानित्यादिलक्षणं, हेतुरत्रानुक्तोऽपि उष्णवातहेतुसाहचर्यात् पित्तं ज्ञेयः । यद्येवं तर्हि उष्णवाते वायुरपि हेतुरुक्तः; सोऽत्र किमिति न गृह्यते? सत्यं, मूत्रग्रन्थेर्व्यतिक्रमपाठादेव वायुरत्र कारणं न भवतीति ज्ञेयम् ॥ १८ ॥ १९ ॥

प्रत्युपस्थितमूत्रस्तु मैथुनं योऽभिनन्दति ।
तस्य मूत्रयुतं रेतः सहसा संप्रवर्तते ॥ २० ॥
पुरस्ताद्वाऽपि मूत्रस्य पश्चाद्वाऽपि कदाचन ।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ॥ २१ ॥

मूत्रशुक्रस्य हेत्वादिकमाह—प्रत्युपस्थितेत्यादि । प्रत्युपस्थितमूत्र इति संजातमूत्रवेग इत्यर्थः । यः पुरुषः, मैथुनमभिनन्दति इच्छति करोतीति तात्पर्यार्थः । रेतः शुक्रम् । पुरस्ताद्वाऽपि मूत्रस्य आदावित्यर्थः । भस्मोदकप्रतीकाशं भस्ममिश्रितपानीयतुल्यम् । एतच्च रेतोविशेषणम् । यः पुरुषः संजातमूत्रवेगः सन् मैथुनं करोति तस्य पुंसो भस्मोदकप्रतीकाशं मूत्रयुतं रेतो मूत्रस्यादौ कदाचित् पश्चाद्वा वायोर्विचित्रक्रियाकरत्वात् प्रवर्तते, तन्मूत्रशुक्रमुच्यत इति फलितोऽर्थः । अत्र हेतुसंप्राप्त्यादिकं स्वयमप्यूह्य ज्ञेयम् ॥ २० ॥ २१ ॥

व्यायामाध्वातपैः पित्तं बस्तिं प्राप्यानिलावृतम् ।
बस्तिं मेढ्रं गुदं चैव प्रदहन् स्रावयेदधः ॥ २२ ॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा ।
कृच्छ्रात् प्रवर्तते जन्तोरुष्णवातं वदन्ति तम् २३

व्यायामाध्वातपैरित्यादि । अनिलावृतं वातान्वितं पित्तम् । हारिद्रं हरिद्रावर्णम् । सरक्तमीषद्रक्तवर्णमीषच्छोणितं वा । रक्तं वेति केवलं शोणितम्, अत्यन्तरक्तवर्णं मूत्रं वेत्यर्थः । नन्वत्रोद्देशसूत्रपाठान्मूत्रग्रन्थिमूत्रशुक्रयोरुपादानं प्राप्नोति नोष्णवातस्य, तत् कथमत्रोष्णवातो निर्दिष्टः ? उच्यते-यथा मूत्रक्षयस्य वातपित्ते हेतू तथाऽस्यापि त एव हेतू इति हेतुसाम्याद्व्यतिक्रमेणोष्णवातो निर्दिष्टः । यद्येवं तर्हि उद्देशेऽप्युष्णवातो मूत्रक्षयानन्तरमेव किमिति न पठितः? सत्यं, मूत्रग्रन्थौ केवलपित्तस्यानुवर्तनार्थमुष्णवातो मूत्रक्षयानन्तरं पठितः । व्यायामादिको हेतुः, बस्तिं प्राप्येत्यादिः संप्राप्तिः, शेषं लक्षणम् ॥ २२ ॥ २३ ॥

१ 'सक्तं चापि प्रवाहतः' इति पा० । २ 'वेदनावानभिष्यन्दी' इति पा० । ३ 'वेदवादिभिः' इति पा० ।

१ 'रक्तग्रन्थिं' इति पा० । २ 'क्षारपानीयतुल्यम्' इति पा० । ३ 'पश्चादपि' इति पा० ।

विशदं पीतकं मूत्रं सदाहं बहलं तथा ।
शुष्कं भवति यच्चापि रोचनाचूर्णसन्निभम् ॥ २४ ॥
मूत्रौकसादं तं विद्याद्रोगं पित्तकृतं बुधः ।
पिच्छिलं संहतं श्वेतं तथा कृच्छ्रप्रवर्तनम् ॥ २५ ॥
शुष्कं भवति यच्चापि शङ्खचूर्णप्रपाण्डुरम् ।
मूत्रौकसादं तं विद्यादामयं द्वादशं कफात् ॥ २६ ॥

मूत्रौकसादलक्षणमाह—विशदमित्यादि । विशदं पिच्छिलविपरीतम् । पीतकं पीतवर्णम् । बहलं स्थूलं घनमित्यर्थः । शुष्कमिति आतपादिना शुष्कम् । रोचना गोरोचना । द्वितीयमूत्रौकसादलक्षणमाह—पिच्छिलमित्यादि । पिच्छिलमिति विशदविपरीतम् । संहतं घनम् । श्वेतं श्वेतवर्णम् । कृच्छ्रप्रवर्तनं दुःखेन प्रवर्तत इत्यर्थः । द्वादशेति पुनरुपादानं मूत्रौकसादयोरेकनामत्वादेव मन्दमतीनां चेतस्येकत्वं माभूदिति द्योतनार्थम् ॥ २४—२६ ॥

कषायकल्कसर्पींषि भक्ष्यान् लेहान् पयांसि च ।
क्षारमद्या(ध्वा)सवस्वेदान् वस्तींश्चोत्तरसंज्ञितान् २७
विदध्यान्मतिमांस्तत्र विधिं चाश्मरिनाशनम् ।

मूत्राघातानां चिकित्सामाह—कषायेत्यादि । कषायः क्वाथः, कल्को दृषदि पेषितः सद्रवः । भक्ष्यान् लड्डुकप्रभृतीन् । पयांसि क्षीराणि । आसवो मद्यभेदः । स्वेदा उपनाहाद्याः । वस्तींश्चोत्तरसंज्ञितानिति उत्तरबस्तीनित्यर्थः । चकारात् स्नेहविरेचनमपि । विदध्यात् कुर्यात् । मतिमानिति ऊहापोहविद्वैद्यः । तत्र मूत्राघातरोगे । विधिमश्मरीसाधनमश्मरीचिकित्सितोक्तम् । ननु, यथा वातादिभेदेन भिन्ना मूत्राघाता दर्शिताः, तथैव चिकित्साऽपि भिन्ना वक्तुमुचिता, तत् कथमत्र[1] सामान्येन चिकित्सोक्ता ? उच्यते,—सर्वेषु मूत्राघातेषु यतो वातः कारणमतः सामान्येन चिकित्सितं वक्तुमुचितं भवति; एवं यदि तत्र वायुरेव कारणं किं तर्हि तत्र पित्तकफावप्यारम्भकत्वेन निर्दिष्टौ, तत् कथमेकैव चिकित्सा सर्वेषु मूत्राघातेषु क्रियते ? सत्यं सर्वेऽपि मूत्राघाताः प्रायशो वातजन्याः पित्तकफौ पुनरावरकौ; तस्मात्तेषामेकैव चिकित्सा दोषादिबलविकल्पं द्रव्यतत्त्वं रोगतत्त्वं च ज्ञात्वा भिषजा प्रयोज्या, अत एव मतिमानित्युक्तवानाचार्यः । केचिदत्र 'अतः परं प्रवक्ष्यामि मूत्रदोषस्य भेषजम्' इत्यादिपाठं पठन्ति, स च कषायकल्कमित्यनेनोपसंगृहीत इति न दर्शितः । अपरे तु 'स्त्रीणामतिप्रसङ्गेन' इत्यादिपाठं पठन्ति, स च नार्षः ॥ २७ ॥—

मूत्रोदावर्तयोगांश्च कार्त्स्न्येनात्र[2] प्रयोजयेत् ॥ २८ ॥

मूत्राघातेषु मूत्रोदावर्तचिकित्सितमतिदेशेनाह—मूत्रोदावर्तेत्यादि । मूत्रोदावर्तयोगा य उदिता भवन्ति तेऽत्र योज्या इति अत्रार्थः । मूत्रोदावर्तयोगान् 'सौवर्चलाढ्यां मदिराम्' इत्यादिमूत्रोदावर्तप्रतिषेधोक्तान् । कार्त्स्न्येन सामस्त्येन । एतेन यस्यामवस्थायां ये मूत्रोदावर्तयोगा उचिता भवन्ति तेऽत्र योज्या इत्यर्थः । कात्स्न्र्येनेत्यत्र कार्तिककुण्डेन बहुधा प्रजल्पितं, तत्तु शिष्यबुद्धिव्याकुलहेतुत्वाद्ग्रन्थगौरवभयाच्च परिहृतम् । अत्र मूत्राघाते ॥ २८ ॥

कल्कमेर्वारुबीजानामक्षमात्रं ससैन्धवम् ।
धान्याम्लयुक्तं पीत्वैव मूत्रकृच्छ्रात् प्रमुच्यते ॥२९॥

कल्कमित्यादि । एर्वारुः ग्रीष्मकर्कटिका । अक्षमात्रं कर्षप्रमाणम् । धान्याम्लं काञ्जिकम् । केचिदमुं पाठमन्यथा पठन्ति, स चाभावान्न लिखितः ॥ २९ ॥

सुरां सौवर्चलवतीं मूत्रकृच्छ्री पिबेन्नरः ।
मधु मांसोपदंशं वा पिबेद्वाऽप्यथ गौडिकम् ॥ ३० ॥

सुरामित्यादि । सुरा पिष्टकृता । मधु मद्यं; तच्च मधुकृतं, समानतन्त्रदर्शनात् । तथाच,—"मांसोपदंशं मधुना मद्यं वाऽपि पिबेन्नरः—" इति । मांसोपदंशं मांसभक्षणयुतम् । गौडिकं गुडकृतं मद्यम् ॥ ३० ॥

पिबेत् कुङ्कुमकर्षं वा मधूदकसमायुतम् ।
रात्रिपर्युषितं प्रातस्तथा सुखमवाप्नुयात् ॥ ३१ ॥

पिबेदित्यादि । मधूदकं मधुयुक्तमुदकम् । प्रातरिति पिबेदित्यत्र योज्यं; तेन प्रभाते पिबेदित्यर्थः ॥ ३१ ॥

दाडिमाम्लां[1] युतां मुख्यामेलाजीरकनागरैः ।
पीत्वा सुरां सलवणां मूत्रकृच्छ्रात् प्रमुच्यते ॥३२॥

दाडिमाम्लामित्यादि । दाडिमाम्लां दाडिमेनाम्लीकृताम् । युतामित्यत्र एलाजीरकनागरैरिति योज्यम् । सुरां मुख्यां पैष्टीमित्यर्थः । सलवणां सैन्धवयुक्ताम् ॥ ३२ ॥

पृथक्पर्ण्यादिवर्गस्य मूलं गोक्षुरकस्य च ।
अर्धप्रस्थेन तोयस्य पचेत् क्षीरचतुर्गुणम् ॥ ३३ ॥
क्षीरावशिष्टं तच्छीतं सिताक्षौद्रयुतं[3] पिबेत् ।
नरो मारुतपित्तोत्थमूत्राघातनिवारणम् ॥ ३४ ॥

पृथक्पर्ण्यादिवर्गस्येत्यादि । पृथक्पर्ण्यादिवर्गो विदारिगन्धादिकः ॥ ३३ ॥ ३४ ॥

निष्पीड्य वाससा सम्यग्वर्चो रासभवाजिनोः ।
रसस्य कुडवं तस्य पिबेन्मूत्ररुजापहम् ॥ ३५ ॥

निष्पीड्येत्यादि । वर्चः पुरीषम् । रासभो गर्दभः । बाजी घोटकः । कुडवं चत्वारि पलानि ॥ ३५ ॥

मुस्ताभयादेवदारुमूर्वाणां मधुकस्य च ।
पिबेदक्षसमं कल्कं मूत्रदोषनिवारणम् ॥ ३६ ॥

मुस्तेत्यादि । मूर्वा चोरस्नायुः । मधुकं यष्टीमधु । अक्षसमं कर्षप्रमाणम् ॥ ३६ ॥

१ 'चापरं' इति पा० । २ 'कुतोऽत्र' इति पा० । ३ 'कार्त्स्न्येनेह' इति पा० ।

१ 'इह' इति पा० । २ 'दाडिमाम्लयुतां' इति पा० । ३ 'सिताघृतयुतं' इति पा० ।

अभयामलकाक्षाणां कल्कं बदरसंमितम् ।
अम्भसाऽलवणोपेतं पिबेन्मूत्ररुजापहम् ॥ ३७ ॥

अभयेत्यादि । अक्षो बिभीतकः । बदरसंमितमर्धकर्षप्रमाणम् । अम्भसा पानीयेन । अलवणोपेतं किंचित्सैन्धवयुतम् ॥ ३७ ॥

उदुम्बरसमं कल्कं द्राक्षाया जलसंयुतम् ।
पिबेत् पर्युषितं रात्रौ शीतं मूत्ररुजापहम् ॥ ३८ ॥

उदुम्बरसमं कर्षप्रमाणं, द्राक्षायाः कल्कमुदुम्बरसमं जलान्वितं रात्रिपर्युषितं पिबेदिति पिण्डार्थः ॥ ३८ ॥

निदिग्धिकायाः स्वरसं पिबेत् कुडवसंमितम् ।
मूत्रदोषहरं कल्य-

निदिग्धिका कण्टकारिका । कुडवसंमितं चतुष्पलोन्मितम् । कल्यं प्रातरित्यर्थः ॥—

मथवा क्षौद्रसंयुतम् ॥ ३९ ॥
प्रपीड्यामलकानां तु रसं कुडवसंमितम् ।
पीत्वाऽगदी भवेज्जन्तुर्मूत्रदोषरुजातुरः ॥ ४० ॥

अथ वेत्यादि । प्रपीड्येति वाससा गालयित्वेत्यर्थः । कुडवं चत्वारि पलानि । अगदी भवेन्नीरोगो भवेत् ॥ ३९ ॥ ४० ॥

धात्रीफलरसेनैवं सूक्ष्मैलां वा पिबेन्नरः ।

धात्रीफलरसेनैवमित्यादि । धात्रीफलरसेन आमलकरसेन । एवमिति क्षौद्रयुतामित्यर्थः ॥—

पिष्ट्वाऽथवा सुशीतेन शालितण्डुलवारिणा ॥ ४१ ॥
तालस्य तरुणं मूलं त्रपुसस्य रसं तथा ।
श्वेतं कर्कटकं चैव प्रातस्तु पयसा पिबेत् ॥ ४२ ॥

पिष्ट्वेत्यादि । तालस्याभिनवं मूलं पिष्ट्वा शालितण्डुलोदकेन पिबेत्, त्रपुसस्वरसमथवा पिबेत् । त्रपुसः सुधावासः । श्वेतमित्यादि । श्वेतं कर्कटकं त्रपुसम् । पयसा क्षीरेण, समानतन्त्रदर्शनात्; 'त्रपुसं वाऽथ दुग्धेन मूत्रदोषहरं पिबेत्' इति ॥ ४१ ॥ ४२ ॥

शृतं वा मधुरैः क्षीरं सर्पिर्मिश्रं पिबेन्नरः ।
मूत्रदोषविशुद्ध्यर्थं तथैवाश्मरिनाशनम् ॥ ४३ ॥

शृतमित्यादि । मधुरैः काकोल्यादिभिः । अयं योगो मूत्रशुक्रस्य बाहुल्येन बोद्धव्यः ॥ ४३ ॥

बलाश्वदंष्ट्राक्रौञ्चास्थिकोकिलाक्षकतण्डुलान् ।
शतपर्वकमूलं च देवदारु सचित्रकम् ॥ ४४ ॥
अक्षबीजं च सुरया कल्कीकृत्य पिबेन्नरः ।
मूत्रदोषविशुद्ध्यर्थं तथैवाश्मरिनाशनम् ॥ ४५ ॥

बलाश्वदंष्ट्रेत्यादि । बला ख्यनामख्याता, श्वदंष्ट्रा गोक्षुरकः, क्रौञ्चः पक्षिविशेषः, 'कैंचर' इति लोके, कोकिलाक्षकः खरगली, शतपर्वको जलगण्डीरः । अक्षबीजं बिभीतकमज्जा । एतद्बलादिकं कल्कीकृत्य मूत्रदोषविशुद्ध्यर्थं पिबेदित्यर्थः । तथाऽश्मरीचिकित्सितोक्तमपि मूत्रदोषविशुद्ध्यर्थं पिबेदित्यर्थः । अश्मरीचिकित्सितं यदत्र वारंवारं भणितं, तदत्यन्तहितत्वापादनार्थम् । केचित् भोजसंवादाद् बलादिकं योगचतुष्टयं मन्यन्ते; तन्न, वृद्धानामसंमतत्वात् ॥ ४४ ॥ ४५ ॥

पाटलाक्षारमाहृत्य सप्तकृत्वः परिस्रुतम् ।
पिबेन्मूत्रविकारघ्नं संसृष्टं तैलमात्रया ॥ ४६ ॥

पाटलाक्षारमित्यादि । सप्तकृत्वः सप्तवारान् । परिस्रुतं गालितम् । संसृष्टं संयुक्तम् । तैलमात्रया स्तोकेन तैलेन । अत्र मात्राशब्दोऽल्पवाची । यथा—"मात्रां खादेद्बुभुक्षितः" इत्यादिषु । अत्र क्षारस्य तोयस्य च प्रमाणं क्षारकल्पोक्तं ज्ञातव्यम् । तेन चतुर्गुणेन जलेन क्षारः परिस्रावणीयः ॥ ४६ ॥

नलाश्मभेदद्भैक्षुत्रपुसैर्वारुबीजकान् ।
क्षीरे परिश्रृतान् तत्र पिबेत् सर्पिःसमायुतान् ॥ ४७ ॥

नलाश्मभेदेत्यादि । नलः ख्यनामप्रसिद्धः शुषिरपर्वा, अश्मभेदः पाषाणभेदः, एर्वारुः ग्रीष्मकर्कटिका, बीजकोऽसनसारः । कार्तिककुण्डस्तु वृद्धकाश्यपीयसंवादात्त्रपुसैर्वारुबीजान्येवाचक्षते, बीजकानित्यत्र स्वार्थिकश्च प्रकृतिलिङ्गवचनान्यतिक्रामन्तीत्युक्तत्वात् पुंलिङ्गतेति च कथयति तत्र । मूत्राघाते ॥ ४७ ॥

पाटल्या यावशूकाच्च पारिभद्रात्तिलादपि ।
क्षारोदकेन मतिमान् त्वगेलोषणचूर्णकम् ॥ ४८ ॥
पिबेद्गुडेन मिश्रं वा लिह्याल्लेहान् पृथक् पृथक् ।

पाटल्या इत्यादि । यावशूको यवक्षारः । पारिभद्रः पर्वतनिम्बः, अन्ये पारिभद्रशब्देन कण्टकिवृक्षं रक्तकुसुमं फलभद्रसंज्ञकं वदन्ति । ऊषणं पिप्पली । पाटल्यादीनां क्षारोदकेन सह त्वगेलोषणचूर्णं पिबेत्, पाटल्यादिक्षारोदकगुडकृतान् लेहान् वा लिह्यात् । कार्तिककुण्डस्तु 'त्वगेलोषणचूर्णकं' इत्यत्र 'त्वगेलोषणसंयुतम्' इति पठति । तत्र पाटल्यादितिलान्तानां द्रव्याणां यच्चूर्णं तत् क्षारोदकेन मुष्कककक्षारोदकेन पिबेत्, तत्कृतान्वा पृथक् पृथक् त्वगेलोषणसंयुतान् लेहान् गुडमिश्रितान् लिह्यादिति व्याख्यानयति । तथाच विश्वामित्रः—"पाटल्याः पारिभद्राद्वा तिलाद्वाऽपि यवाग्रजात् । कणैलात्वग्युतं चूर्णं मुष्कककक्षारवारिणा ॥ पिबेद्गुडेन मिश्रं वा लिह्याल्लेहान् पृथक् पृथक्"—इति । 'मतिमान्' इत्यत्र 'मदिरां' इति केचित् पठन्ति, तथा 'गुडेन मिश्रं वा' इत्यत्र 'गुडोपदंशं वा' इति च पठन्ति । तच्च पाठद्वयमनार्षम् ॥ ४८ ॥—

अत ऊर्ध्वं प्रवक्ष्यामि मूत्रदोषे क्रमं हितम् ॥ ४९ ॥
स्नेहस्वेदोपपन्नानां हितं तेषु विरेचनम् ।
ततः संशुद्धदेहानां हिताश्चोत्तरबस्तयः ॥ ५० ॥

१ 'वारि' इति पा० । २ 'शुक्रदोषहरं परम्' इति पा० । ३ 'तथैवाश्मरिशोधनम्' इति पा० ।

१ 'गुडोपदंशान्' इति पा०

सामान्येन[1] च क्रियाक्रमार्थमाह—अत ऊर्ध्वमित्यादि । तेषु मूत्रदोषेषु । 'तेषु विरेचनं' इत्यत्र 'स्नेहविरेचनं' इति केचित् पठन्ति । कार्तिककुण्डस्तु इमं पाठं न पठति, कषायकल्कसर्पीषीत्यादिनैव गतार्थत्वात् । जेज्जटाचार्यस्तु स्निग्धशुद्धदेहानां पूर्वोक्ता योगाः प्रयोक्तव्या इत्यावेदनाय पठति, तत्पठितत्वान्मयाऽपि पठितः ॥ ४९ ॥ ५० ॥

स्त्रीणामतिप्रसङ्गेन शोणितं यस्य दृश्यते ।
मैथुनोपरमस्तस्य बृंहणश्च विधिः स्मृतः ॥ ५१ ॥

अत्र च केचिन्मूत्रदोषप्रसङ्गेन मूत्रमार्गप्रवृत्तरक्तस्यापि विधानं कथयन्ति—स्त्रीणामित्यादि । अतिप्रसङ्गेन अत्यन्तसेवया । मैथुनोपरमो मैथुननिवृत्तिः । बृंहणश्च विधिः मांसक्षीरघृतादिसेवनम् । अमुमपि पाठं कार्तिककुण्डो न पठति, शुक्रक्षयलिङ्गेनैवोक्तत्वात् संख्यातिरेकभयाच्च; जेज्जटस्तु प्रकरणात् तथा शिष्यसुखबोधार्थं पठति; तत्पठितत्वान्मयाऽपि पठितः ॥ ५१ ॥

ताम्रचूडवसा तैलं हितं चोत्तरबस्तिषु ।
विधानं तस्य पूर्वं हि व्यासतः परिकीर्तितम् ॥५२॥

किमेतदेव तत्र रक्ते हितमुतान्यदपीत्याह—ताम्रचूडेत्यादि । ताम्रचूडवसा कुक्कुटवसा । विधानं विधिः । उत्तरबस्तिषु उत्तरबस्तिचिकित्सिते । तस्य उत्तरबस्तेः । 'व्यासतः' इत्यत्र 'व्यापदः' इति केचित् पठन्ति ॥ ५२ ॥

क्षौद्रार्धपात्रं दत्त्वा च पात्रं तु क्षीरसर्पिषः ।
शर्करायाश्च चूर्णं च द्राक्षाचूर्णं च तत्समम् ॥५३॥
स्वयङ्गुप्ताफलं चैव तथैवेक्षुरकस्य च ।
पिप्पलीचूर्णसंयुक्तमर्धभागं प्रकल्पयेत् ॥ ५४ ॥
तदैकध्यं समानीय खजेनाभिप्रमन्थयेत् ।
ततः पाणितलं चूर्णं लीढ्वा क्षीरं ततः पिबेत् ॥५५॥
एतत् सर्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा ।
मूत्रदोषाञ्जयेत् सर्वानन्ययोगैः सुदुर्जयान् ॥ ५६ ॥
जयेच्छोणितदोषांश्च वन्ध्या गर्भं लभेत च ।
नारी चैतत् प्रयुञ्जाना योनिदोषात् प्रमुच्यते ॥ ५७ ॥

क्षौद्रार्धपात्रमित्यादि । क्षौद्रार्धपात्रं मध्वर्धाढकं, क्षीरसर्पिषः क्षीरसंमथनोत्थघृतस्य । स्वयङ्गुप्ताफलादीनां पिप्पल्यन्तानां चूर्णमर्धभागं प्रकल्पयेदित्यर्थः । स्वयङ्गुप्ता कपिकच्छूः । इक्षुरकः कोकिलाक्षकः । खजेन मन्थनदण्डेन । पाणितलं चूर्णमिति अङ्गुलिरहितं हस्ततलं चूर्णमित्यर्थः; अन्ये पाणितलशब्देन कर्षं वदन्ति ॥ ५३–५७ ॥

१ 'परमतेन' इति 'एकीयमतेन' इति च पा० । २ 'सिच्यते' इति पा० । ३ 'पठित्वा तात्पर्यवृत्त्यां नाङ्गीकरोति । तथा ताम्रचूडेत्यादिकं तच्चिकित्सितमप्यरुच्या परमतेन प्रतिपादयति' इति पा० । ४ 'सर्वान् ये च स्युर्भृशदुर्जयाः' इति पा० ।

बला कोलास्थि मधुकं श्वदंष्ट्राऽथ शतावरी ।
मृणालं च कशेरुश्च बीजानीक्षुरकस्य च ॥ ५८ ॥
सहस्रवीर्याऽंशुमती पयस्या सह कालया ।
शृगालविन्नाऽतिबला बृंहणीयो गणस्तथा ॥ ५९ ॥
एतानि समभागानि मतिमान् सह साधयेत् ।
चतुर्गुणेन पयसा गुडस्य तुलया सह ॥ ६० ॥
द्रोणावशिष्टं तत् पूतं पचेत्तेन घृताढकम् ।
तत् सिद्धं कलसे स्थाप्यं क्षौद्रप्रस्थेन संयुतम् ॥६१॥
सर्पिरेतत् प्रयुञ्जानो मूत्रदोषात् प्रमुच्यते ।
तुगाक्षीर्याश्च चूर्णानि शर्करायास्तथैव च ॥ ६२ ॥
क्षौद्रेण तुल्यान्यालोड्य प्रशस्तेऽहनि लेहयेत् ।
तस्य खादेद्यथाशक्ति मात्रां क्षीरं ततः पिबेत् ॥६३॥
शुक्रदोषाञ्जयेन्मर्त्यः प्राश्य सम्यक् सुयन्त्रितः ।
व्यवायक्षीणरेतास्तु सद्यः संलभते सुखम् ॥ ६४ ॥
ओजस्वी बलवान्मर्त्यः पिबन्नेव च हृष्यति ।

अगर्भं बलाघृतमाह—बलेत्यादि । कोलास्थि बदरमज्जा, मधुकं यष्टिमधु, श्वदंष्ट्रा गोक्षुरकः, इक्षुरकः कोकिलाक्षः, सहस्रवीर्या दूर्वा, अंशुमती शालपर्णी, पयस्या अर्कपुष्पी, दुग्धिकामन्ये, काला कालानुसारिवा, श्रीपर्णिकामन्ये, शृगालविन्ना पृश्निपर्णी, बृंहणीयो गणो गुडूचीवर्जितः काकोल्यादिः "गुडूचीरहितो वर्गः काकोल्यादिरुदाहृतः । बृंहणीयः" इत्यादिसमानतन्त्रसंवादात् । चतुर्गुणेन पयसा दुग्धेन, जलेनेत्यन्ये । पूतं वस्त्रगालितम् । पचेत्तेन घृताढकमिति अकल्कमेव । कार्तिककुण्डस्त्वमुं योगमन्यथा पठति व्याख्यानयति च, स च ग्रन्थगौरवभयान्न लिखितः । केचिदेनमनार्षं वदन्ति; तन्न, सुश्रीरसुधीरादिभिष्टीकाकृद्भिरार्षत्वेन वर्णितत्वात् ॥ ५८–६४ ॥—

चित्रकः सारिवा चैव बला कालानुसारिवा ॥ ६५ ॥
द्राक्षा विशाला पिप्पल्यस्तथा चित्रफला भवेत् ।
तथैव मधुकं पथ्यां दद्यादामलकानि च ॥ ६६ ॥
घृताढकं पचेदेभिः कल्कैः कर्षसमन्वितैः[1] ।
क्षीरद्रोणे जलद्रोणे तत्सिद्धमवतारयेत् ॥ ६७ ॥
शीतं परिस्रुतं चैव शर्कराप्रस्थसंयुतम् ।
तुगाक्षीर्याश्च तत् सर्वं मतिमान् परिमिश्रयेत् ॥६८॥
ततो मितं पिबेत्काले यथादोषं यथाबलम् ।
वातरेताः श्लेष्मरेताः पित्तरेतास्तु यो भवेत् ॥६९॥
रक्तरेता ग्रन्थिरेताः पिबेदिच्छन्नरोगताम् ।
जीवनीयं च वृष्यं च सर्पिरेतद्बलावहम् ॥ ७० ॥
प्रजाहितं[2] च धन्यं च सर्वरोगापहं शिवम् ।
सर्पिरेतत् प्रयुञ्जाना स्त्री गर्भं लभतेऽचिरात् ॥७१॥

१ 'कल्कैरिक्षुसमन्वितैः' इति पा० । २ 'प्रजाहितं' इति पा० ।

असृग्दोषाञ्जयेच्चापि योनिदोषांश्च संहतान् ।
मूत्रदोषेषु सर्वेषु कुर्यादेतच्चिकित्सितम् ॥ ७२ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे मूत्राघातप्रतिषेधो नाम (विंशोऽध्यायः, आदितः) अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

महाबलं घृतमाह—चित्रक इत्यादि । चित्रफला गुडदुग्धिका इन्द्रवारुणीपर्यायां । तुगाक्षीर्याश्चेत्यत्रापि प्रस्थसंयुतमिति संबध्यते । मितं मात्रोपेतम् । यथाबलमित्यस्य प्रागग्निशब्दो लुप्तो द्रष्टव्यः, तेन यथाग्निबलमित्यर्थः । केचिदिदं घृतं न पठन्ति ॥ ६५-७२ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे मूत्राघातप्रतिषेधो नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

ऊनषष्टितमोऽध्यायः ।

अथातो मूत्रकृच्छ्रप्रतिषेधमध्यायं व्याख्यास्यामः १
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

मूत्राघातप्रतिषेधानन्तरं बस्तिगतत्वसामान्यान्मूत्रकृच्छ्रप्रतिषेधारम्भः—अथात इत्यादि । मूत्रकृच्छ्रं दुःखेन मूत्रप्रवृत्तिः । मूत्रकृच्छ्रप्रतिषेधमित्यत्र 'मूत्रोपघातप्रतिषेधं' इत्यन्ये पठन्ति, तेऽप्युपघातशब्देन कृच्छ्रतां वदन्ति; अपरे मूत्रदोषप्रतिषेधं' इति पठन्ति, तत्रापि तादृगेवाभिप्रायः । ननु, अश्मरीमूत्राघातोदावर्तादिषु मूत्रकृच्छ्रस्योक्तत्वात् किमर्थं पुनरत्र तदभिधानं ? सत्यं, चिकित्सालक्षणकार्यभेदात् तथा समानतन्त्रेऽपि पृथङ्निर्दिष्टत्वाच्च पुनस्तेषामुपादानम् । केचिच्च पुनरुक्तिभयादेवासुमध्यायं न पठन्ति ॥ १ ॥ २ ॥

वातेन पित्तेन कफेन सर्वै-
स्तथाऽभिघातैः शकृदश्मरीभ्याम् ।
तथाऽपरः शर्करया सुकष्टो
मूत्रोपघातः कथितोऽष्टमस्तु ॥ ३ ॥

वातेनेत्यादि । मूत्रोपघातो मूत्रकृच्छ्र एवेत्यर्थः । अष्टम इति संख्याकरणं नानाप्रकारस्याप्यश्मरीजस्य मूत्रकृच्छ्रस्यैकत्वेन ग्रहणमिति प्रतिपादनार्थम् । केचिदुत्तरार्धमीदृशं पठन्ति, —'शुक्रोद्भवं शर्करया च कष्टं मूत्रस्य कृच्छ्रं प्रवदन्ति तज्ज्ञाः' इति । स चानार्षः पाठः ॥ ३ ॥

अल्पमल्पं समुत्पीड्य मुष्कमेहनबस्तिभिः ।
फलद्भिरिव कृच्छ्रेण वाताघातेन मेहति ॥ ४ ॥

वातकृच्छ्रलक्षणमाह—अल्पमल्पमित्यादि । अल्पमल्पं स्तोकं स्तोकं, समुत्पीड्य अर्थवशान्मुष्कमेहनादिकमेव पीडयित्वा । मुष्कोऽण्डं, मेहनं लिङ्गं, बस्तिर्मूत्राधारः । फलद्भिरिव स्फुटद्भिरिव । कृच्छ्रेण दुःखेन; एतत् पदं मेहतीत्यत्र संबन्धनीयम् । वाताघातेन वातकृच्छ्रेणेत्यर्थः । मेहति मूत्रयति । कार्तिककुण्डोऽमुं पाठमन्यथा पठति, स चाभावान्न दर्शितः ॥ ४ ॥

हारिद्रमुष्णं रक्तं वा मुष्कमेहनबस्तिभिः ।
अग्निना दह्यमानाभैः पित्ताघातेन मेहति ॥ ५ ॥

पित्तकृच्छ्रलक्षणमाह—हारिद्रमुष्णमित्यादि । हारिद्रं हरिद्रावर्णं, रक्तं रक्तवर्णं, एतद्द्वयं न्यूनाधिकपित्तप्रकोपवशात् । दह्यमानाभैरत्यन्तदाहपरीतैः । पित्ताघातेन पित्तकृच्छ्रेण ॥५॥

स्निग्धं शुक्लमनुष्णं च मुष्कमेहनबस्तिभिः ।
संहृष्टरोमा गुरुभिः श्लेष्माघातेन मेहति ॥ ६ ॥

कफकृच्छ्रलक्षणमाह—स्निग्धमित्यादि । अनुष्णमीषदुष्णम् । संहृष्टरोमा उद्धर्षितरोमा । गुरुभिः भारिकैः । श्लेष्माघातेन श्लेष्मकृच्छ्रेण ॥ ६ ॥

दाहशीतरुजाविष्टो नानावर्णं मुहुर्मुहुः ।
ताम्यमानस्तु कृच्छ्रेण सन्निपातेन मेहति ॥ ७ ॥

सान्निपातिकलक्षणमाह—दाहशीतेत्यादि । आविष्टो युक्तः । नानावर्णं पीतरक्तशुक्लादिवर्णम् । ताम्यमानोऽत्यर्थं तमः प्रविशन् । कृच्छ्रेणातिकष्टेन ॥ ७ ॥

मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु च ।
स्रोतःसु मूत्राघातस्तु जायते भृशवेदनः ॥ ८ ॥
वातबस्तेस्तु तुल्यानि तस्य लिङ्गानि लक्षयेत् ।
शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः ॥ ९ ॥
आध्मानं च सशूलं च मूत्रसङ्गं करोति हि ।

मूत्रवाहिषु शल्येनेत्यादि ॥ ८ ॥ ९ ॥—

अश्मरीहेतुकः पूर्वं मूत्राघात उदाहृतः ॥ १० ॥

अश्मरीत्यादि । पूर्वं निदानस्थानेऽश्मरीहेतुको मूत्राघात उदाहृतः ॥ १० ॥

अश्मरी शर्करा चैव तुल्ये संभवलक्षणैः ।
शर्कराया विशेषं तु शृणु कीर्तयतो मम ॥ ११ ॥
पच्यमानस्य पित्तेन भिद्यमानस्य वायुना ।
श्लेष्मणोऽवयवा भिन्नाः शर्करा इति संज्ञिताः १२
हृत्पीडा वेपथुः शूलं कुक्षौ वह्निः सुदुर्बलः ।
ताभिर्भवति मूर्च्छा च मूत्राघातश्च दारुणः ॥१३॥
मूत्रवेगनिरस्तासु तासु शाम्यति वेदना ।
यावदन्या पुनर्नैति गुडिका स्रोतसो मुखम् ॥१४॥
शर्करासंभवस्यैतन्मूत्राघातस्य लक्षणम् ।

---

१ अयं पाठः क्वचित्पुस्तके न पठ्यते ।

१ 'भृशदारुणः' इति पा० । २ 'तुल्यसंभवलक्षणा' इति पा० । ३ 'कुक्षावग्निश्च दुर्बलः' इति पा० । ४ 'यावदस्याः' इति पा० ।

यद्यपि शर्कराकृच्छ्रमश्मरीजकृच्छ्रं च तुल्यं तथाऽपि किञ्चिद्भेदमाश्रित्य शर्कराकृच्छ्रं भिन्नमाह—अश्मरीत्यादि। पच्यमानस्येति पक्वस्येत्यर्थः, अर्थवशात् श्लेष्मण एव; भिद्यमानस्येति भिन्नस्येत्यर्थः, भाविनि भूतवदुपचारात्। वेपथुः कम्पः। सुदुर्बलो मन्दः। ताभिः शर्कराभिः। मूलवेगनिरस्तासु मूलस्याधोवेगेन निःसृतास्वित्यर्थः। नैति नागच्छति। कार्तिककुण्डस्त्वमुं पाठं बहुधा व्याकुलीकृत्य पठति, स तु ग्रन्थगौरवभयात् परित्यक्तः। यद्यपि अश्मरीशर्करामूत्रकृच्छ्रे निदानस्थाने भणिते, तथाऽपि प्रकरणवशात् किञ्चिल्लक्षणाधिक्याच्चात्रापि भणिते॥ ११-१४॥—

चिकित्सितमथैतेषामष्टानामपि वक्ष्यते॥ १५॥

इदानीं मूत्रकृच्छ्रचिकित्सामाह—चिकित्सितमित्यादि। एतेषां मूत्रकृच्छ्राणाम्॥ १५॥

अश्मरीं च समाश्रित्य यदुक्तं प्रसमीक्ष्य तत्।
यथादोषं प्रयुञ्जीत स्नेहादिमपि च क्रमम्॥ १६॥

तदेव चिकित्सितमतिदेशेनाह—अश्मरीमित्यादि। अश्मरीमाश्रित्य यत् प्राक् चिकित्सितमुक्तं स्नेहादिक्रमश्च, तद्यथादोषं प्रसमीक्ष्य प्रयुञ्जीत कुर्यात्। एतेनैतदुक्तं—अश्मरीचिकित्सिते वातादिभेदेन यो विधिरुक्तस्तं तथा स्नेहादिमपि च क्रमं प्रयुञ्जीत कुर्यात्। चकारात् प्रागुक्तमूत्राघातचिकित्सितमपि॥ १६॥

श्वदंष्ट्राश्मभिदौ कुम्भीं हपुषां कण्टकारिकाम्।
बलां शतावरीं रास्नां वरुणं गिरिकर्णिकाम्॥ १७॥
तथा विदारिगन्धादिं संहृत्य त्रैवृतं पचेत्।
तैलं घृतं वा तत् पेयं तेन वाऽप्यनुवासनम्॥ १८॥
दद्यादुत्तरबस्तिं च वातकृच्छ्रोपशान्तये।

इदानीं वातकृच्छ्रचिकित्सितमाह—श्वदंष्ट्रेत्यादि। श्वदंष्ट्रा गोक्षुरकः। अश्मभित् पाषाणभेदः। कुम्भी स्थलकुम्भी यस्यास्त्वक् वर्क्रा[2] भवति। गिरिकर्णिका अपराजिताभेदः[3]। विदारिगन्धादिः प्रथमो गणः। संहृत्य एकीकृत्य। त्रैवृतं तैलं घृतं वेति तत्र त्रिभिर्घृतवसामज्जभिर्वृतं तैलं, तैलवसामज्जभिर्वृतं घृतं वा त्रैवृतम्। तैलं घृतं वेति विकल्पः सात्म्यापेक्षया वातादिबलापेक्षया वा ज्ञेयः॥ १७॥ १८॥—

श्वदंष्ट्रास्वरसे तैलं सगुडक्षीरनागरम्॥ १९॥
पक्त्वा तत् पूर्ववद्योज्यं तत्रानिलरुजापहम्।

अपरमपि वातकृच्छ्रचिकित्सितमाह—श्वदंष्ट्रेत्यादि। कल्कद्रव्यमध्ये पठितमपि क्षीरं द्रवत्वेन बोद्धव्यम्। योज्यं पानानुवासनोत्तरबस्तिषु। अनिलरुजापहं वातोत्थकृच्छ्रनाशनमित्यर्थः॥ १९॥—

१ 'प्रकरणान्तरत्वात्' इति पा०। २ 'वल्कं' इति पा०। ३ 'श्वेतस्यन्दा' इति पा०।

तृणोत्पलादिकाकोलीन्यग्रोधादिगणैः कृ(शृ)तम्२०
पीतं घृतं पित्तकृच्छ्रं नाशयेत् क्षीरमेव वा।

पित्तोत्थकृच्छ्रभेषजमाह—तृणोत्पलादीत्यादि। घृतं तृणादिसंस्कृतं ग्राह्यं; क्षीरमेव वेति विकल्पः सात्म्यापेक्षयाऽग्निबलापेक्षया च भवति॥ २०॥—

दद्यादुत्तरबस्तिं च पित्तकृच्छ्रोपशान्तये॥ २१॥

अन्यदपि पित्तकृच्छ्रभेषजमाह—दद्यादित्यादि। दद्यादुत्तरबस्तिमिति 'तृणादिसंस्कृतस्नेहेन' इति शेषः। यद्यपि वक्ष्यमाणत्रिविधबस्तिग्रहणेनोत्तरबस्तिर्गृहीतस्तथाऽपि पित्तकृच्छ्रे उत्तरबस्तिरत्यन्तं हित इति ज्ञापनार्थं पृथगप्युत्तरबस्तिर्निर्दिष्टः॥ २१॥

एभिरेव कृतः स्नेहस्त्रिविधेष्वपि बस्तिषु।
हितं विरेचनं चेक्षुक्षीरद्राक्षारसैर्युतम्॥ २२॥

अपरमपि पित्तकृच्छ्रविधिमाह—एभिरित्यादि। एभिरेव अनन्तरोक्तैस्तृणोत्पलादिप्रभृतिभिरेव। त्रिविधेषु बस्तिषु निरूहानुवासनोत्तरबस्तिषु। अन्ये निरूहस्थाने शिरोबस्तिं मन्यन्ते; तन्न, समानतन्त्रविरोधात्। रसशब्द इक्षावपि संबन्धनीयः॥ २२॥

सुरसोषकमुस्तादौ वरुणादौ च यत् कृतम्।
तैलं तथा यवाग्वादि कफाघाते प्रशस्यते॥ २३॥

कफकृच्छ्रचिकित्सितमाह—सुरसोषकेत्यादि। सुरसादौ ऊषकादौ मुस्तादौ वरुणादौ च यत् कृतं तैलं, तथा यवाग्वादि, तत् कफाघाते प्रशस्यते। यवाग्वादिरित्यत्रादिशब्दाद्विलेप्यादयः; ते च सुरसादिसंस्कृता एव बोद्धव्याः। कफाघाते कफकृच्छ्रे॥ २३॥

यथादोषोच्छ्रयं कुर्यादेतानेव च सर्वजे।

सन्निपातोत्थमूत्रकृच्छ्रचिकित्सामाह—यथादोषोच्छ्रयमित्यादि।—यथादोषाधिक्यम्। एतानेवेति अनन्तरोक्तवातादिकृच्छ्रहरयोगान्। सर्वजे सान्निपातिके कृच्छ्रे। एतेनैतदुक्तं भवति—सान्निपातिके कृच्छ्रे यस्य दोषस्याधिक्यं दृश्यते तद्दोषोक्तकृच्छ्रहरयोगोत्कटान् पूर्वोक्तवातादिकृच्छ्रयोगानेकीकृत्य कुर्यादिति॥—

फल्गुवृश्चीरदर्भाश्मसारचूर्णं च वारिणा॥ २४॥
सुरेक्षुरसदर्भाम्बुपीतं कृच्छ्ररुजापहम्।

अपरमपि सान्निपातिककृच्छ्रयोगमाह—फल्गुवृश्चीरेत्यादि। फल्गुवृश्चीरादीनां चूर्णं वारिणा पीतं यथादोषं सुरेक्षुरसादिमिश्रं पीतं कृच्छ्ररुजापहं, अर्थवशात् सान्निपातिककृच्छ्ररुजापहं भवतीति पिण्डार्थः। फल्गुः काकोदुम्बरिका। वृश्चीरः शुक्लपुनर्नवा। अश्मसारं शिलाजतु॥ २४॥—

१ 'संस्कृतम्' इति पा०। २ 'कफकृच्छ्रे' इति पा०। ३ 'लोहं' इति पा०।

तथाऽभिघातजे कुर्यात् सद्योव्रणचिकित्सितम् २५

अभिघातजकृच्छ्रस्यातिदेशेन चिकित्सितमाह—तथेत्यादि। अभिघातजे अभिघातजमूत्रकृच्छ्रे, सद्योव्रणचिकित्सितमित्यत्र लुप्तचकारनिर्देशाद्वातकृच्छ्रशान्तिक्रिया कार्या ॥ २५ ॥

मूत्रकृच्छ्रे शकृज्जाते कार्या वातहरी क्रिया ।
स्वेदावगाहाभ्यङ्गबस्तिचूर्णक्रियास्तथा ॥ २६ ॥

पुरीषकृच्छ्रेऽतिदेशेन चिकित्सितमाह—मूत्रेत्यादि । शकृज्जे तामेव वातहरीं क्रियां विवृणोति—स्वेदावगाहावित्यादि । स्वेदादयश्चात्र वातव्याध्युक्ता ग्राह्याः ॥ २६ ॥

ये त्वन्ये तु तथा कृच्छ्रे तयोः प्रोक्तः क्रियाविधिः २७

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते कायचिकित्सातन्त्रे मूत्रकृच्छ्रप्रतिषेधो नाम (एकविंशतितमोऽध्यायः, आदितः) एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

अश्मरीशर्करोत्पन्नयोः कृच्छ्रयोश्चिकित्सामाह—ये इत्यादि । ये द्वे अन्ये कृच्छ्रे अश्मरीशर्करोत्थे तयोः क्रियाविधिः प्रोक्तः अश्मरीशर्कराचिकित्सिते । अपरे 'द्वौ तथाऽन्यौ तु यौ कृच्छ्रौ' इति पठन्ति, तत्रापि स एवार्थः ॥ २७ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः ।

अथातोऽमानुषोपसर्गप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

कायचिकित्सापारिशेष्याद्भूतविद्यामारब्धुकाम आदौ मूत्रकृच्छ्रानन्तरं मूत्रकृच्छ्रे प्रतिक्षणमल्पाल्पं मेहतोऽसम्यगाचमनेनाशौचादमानुषोपसर्गसंभावनायाममानुषजन्यव्याधिप्रतिषेधारम्भो युक्त इत्यत आह—अथात इत्यादि । अथेति कायचिकित्सानन्तरम् । अत इति हेतौ । हेतुश्चापातनिकायामेव प्रकटीकृतः । अमानुषा देवादिग्रहाः, तेषामुपसर्ग उपद्रवः, तस्य प्रतिषेधश्चिकित्सितं, तद्विविधप्रकारमाभिमुख्येन शिष्याणां व्याख्यास्यामः । अन्ये तु 'अमानुषोपसर्गं' इत्यत्र 'अमानुषाबाध' इति पठन्ति; अमानुषाणि भूतानि, तेषामाबाधा पीडेति व्याख्यानयन्ति ॥ १ ॥ २ ॥

निशाचरेभ्यो रक्ष्यस्तु नित्यमेव क्षतातुरः ।
इति यत् प्रागभिहितं विस्तरस्तस्य वक्ष्यते ॥ ३ ॥

निशाचरेभ्य इत्यादि । अत्र निशाचरा देवादिग्रहा उच्यन्ते, निशाविहारित्वादसृगादिभोजनत्वाच; यद्व्रणितोपासनीये रक्षांसीत्युक्तं तद्रक्षसां विशेषेण तथास्वरूपख्यापनाय । प्रागिति द्विव्रणीये । अन्ये तु निशाचरशब्देन राक्षसानेवाहुः ॥ ३ ॥

गुह्यानागतविज्ञानमनवस्थाऽसहिष्णुता ।
क्रिया वाऽमानुषी यस्मिन् सग्रहः परिकीर्त्यते ॥४॥

इदानीं सामान्यग्रहलक्षणमाह—गुह्येत्यादि । गुह्यं गुप्तम्, अनागतं भावि, तयोर्विज्ञानम् । अनवस्था अनवस्थितिः । असहिष्णुता क्रोधनत्वम् । अमानुषी क्रिया वरदानादिका, लङ्घनप्लवनादिकेत्यन्ये, अमानुषी या मानुषैः कर्तुं न शक्यते । यस्मिन् आतुरे । सग्रहो ग्रहसहितः ॥ ४ ॥

अशुचिं भिन्नमर्यादं क्षतं वा यदि वाऽक्षतम् ।
हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि वा ॥ ५ ॥

यादृशं भूतानि हिंसन्ति, यादृशं वा जिघृक्षन्ति, तमाह—अशुचिमित्यादि । भिन्नमर्यादं त्यक्तोचितक्रमम्, अभक्ष्यभक्षणे अगम्यागमने तथा हिंसादौ च प्रवृत्तत्वात्; क्षतं व्रणितम्, अक्षतं व्रणरहितमपि शौचादिहीनं हिंस्युः । हिंसाविहारो वधक्रीडा, तदर्थं; सत्कारार्थं पूजार्थं; अन्ये विहारशब्देन रतिं मन्यन्ते, तत्र हिंसायां या रतिस्तदर्थम् ॥ ५ ॥

असङ्ख्येया ग्रहगणा ग्रहाधिपतयस्तु ये ।
व्यज्यन्ते विविधाकारा भिद्यन्ते ते तथाऽष्टधा ॥६॥

ग्रहाणामसंख्येयत्वं ग्रहाधिपानां चाष्टत्वं दर्शयन्नाह—असंख्येया इत्यादि । ग्रहाधिपतयो देवदैत्यादयः । तुशब्दः पुनरर्थे । व्यज्यन्ते पृथक् प्रतीयन्ते । विविधाकारा विविधलक्षणाः । ते पुनरष्टधा भिद्यन्ते । अन्ये तु 'ग्रहाधिपतिभिस्तु ते । व्यञ्जनैः' इति पठित्वा व्याख्यानयन्ति—ते ग्रहगणा यद्यप्यसंख्येयास्तथाऽपि ग्रहाधिपतिभिः स्वस्वामिभिः कृत्वा अष्टधा भिद्यन्ते अष्टभेदभिन्ना भवन्तीत्यर्थः; किंविशिष्टास्ते ? व्यञ्जनैर्विविधाकारा विलक्षणाः ॥ ६ ॥

देवास्तथा शत्रुगणाश्च तेषां
गन्धर्वयक्षाः पितरो भुजङ्गाः ।
रक्षांसि या चापि पिशाचजाति-
रेषोऽष्टको देवगणो ग्रहाख्यः ॥ ७ ॥

तेषामष्टविधत्वमाह—देवतास्तथेत्यादि । दीव्यन्तीति देवाः । तेषां देवानां शत्रुगणा दैत्यसमूहाः । गन्धर्वा देवगायना हाहाहूहूप्रभृतयः । यक्षाः कुबेरादयः । पितरोऽग्निष्वात्तादयः । भुजङ्गा वासुकिप्रभृतयः । रक्षांसि मनुष्यभक्षणकारीणि हेतिप्रहेतिकुलजातानि । पिशाचाः पिशिताशनाः, तेषां जातिः ॥७॥

संतुष्टः शुचिरपि चेष्टगन्धमाल्यो
निस्तन्द्री ह्यवितथसंस्कृतप्रभाषी ।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति नरः स देवजुष्टः ॥ ८ ॥

---

१ 'विमदादिकाः' इति पा० ।

देवादिग्रहगृहीतानां प्रत्येकं लक्षणमाह—सन्तुष्ट इत्यादि । शुचिः शौचयुक्तः । इष्टानि अभिलषितानि गन्धमाल्यानि यस्य सः; गन्धाः कुङ्कुमचन्दनादिकाः, माल्यानि पुष्पाणि । 'शुचिरपि चेष्टमाल्यगन्ध' इत्यत्रान्ये 'शुचिरहतेष्टगन्धमाल्य' इति पठन्ति, अनुपहतगन्धमाल्य इति व्याख्यानयन्ति । अवितथसंस्कृतप्रभाषी अवितथप्रभाषी संस्कृतप्रभाषी च, अवितथं यथार्थम् । स्थिरनयनो निमेषरहितः ॥ ८ ॥

संस्वेदी द्विजगुरुदेवदोषवक्ता
जिह्माक्षो विगतभयो विमार्गदृष्टिः ।
सन्तुष्टो भवति न चान्नपानजातै-
र्दुष्टात्मा भवति च देवशत्रुजुष्टः ॥ ९ ॥

संस्वेदीत्यादि । संस्वेदी प्रस्वेदयुक्तः । जिह्माक्षो वक्रलोचनः । विमार्गदृष्टिः विमार्गदर्शनो नास्तिक इत्यर्थः । अन्नं भक्तादि, पानं जलादि, तेषां जातैः समूहैः । दुष्टात्मा दुष्टस्वभावः । देवशत्रुजुष्टो दैत्यग्रहजुष्ट इत्यर्थः ॥ ९ ॥

हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः ।
नृत्यन् वै प्रहसति चारु चाल्पशब्दं
गन्धर्वग्रहपरिपीडितो मनुष्यः ॥ १० ॥

हृष्टात्मेत्यादि । हृष्टात्मा हर्षयुक्तः । पुलिनवनान्तरोपसेवी पुलिनवनमध्ये क्रीडनशीलः; पुलिनं जलमध्योत्थितभूप्रदेशः । स्वाचारः शोभनाचारः । प्रियाणि परिगीतगन्धमाल्यानि यस्य स तथा । चारु यथा भवति एवं नृत्यन् अल्पशब्दं यथा तथा प्रहसति ईषद्धसतीत्यर्थः । एवंभूतो मनुष्यो गन्धर्वग्रहजुष्टो ज्ञेयः ॥ १० ॥

ताम्राक्षः प्रियतनुरक्तवस्त्रधारी
गम्भीरो द्रुतमतिरल्पवाक् सहिष्णुः ।
तेजस्वी वदति च किं ददामि कस्मै
यो यक्षग्रहपरिपीडितो मनुष्यः ॥ ११ ॥

ताम्राक्ष इत्यादि । ताम्राक्षो रक्तनेत्रः । प्रियतनुरक्तवस्त्रधारी कमनीयसूक्ष्मरक्तवस्त्रपरिधानशीलः । गम्भीरो गम्भीरशीलः प्रचुरसत्त्व इत्यर्थः । द्रुतमतिः उद्भ्रान्तमनाः । अल्पवाक् अल्पवक्ता । सहिष्णुः क्षमायुक्तः ॥ ११ ॥

प्रेतेभ्यो विसृजति संस्तरेषु पिण्डान्
शान्तात्मा जलमपि चापसव्यवस्त्रः ।
मांसेप्सुस्तिलगुडपायसाभिकाम-
स्तद्भक्तो भवति पितृग्रहाभिभूतः ॥ १२ ॥

प्रेतेभ्य इत्यादि । प्रेतेभ्यो मृतेभ्यः । विसृजति ददाति । संस्तरेषु दर्भसंस्तरेषु । पिण्डान् अन्नमयान् । शान्तात्मा शान्तस्वभावः । जलमपि चेति न परं दर्भसंस्तरेषु पिण्डान् ददाति अपि तु अपसव्यहस्तो दक्षिणहस्तो जलमपि ददाति चेत्यर्थः । पायसः क्षीरसिद्धातण्डुलाः । अभिकामोऽभिलाषुकः । तद्भक्तस्तिलादिभोजनः ॥ १२ ॥

भूमौ यः प्रसरति सर्पवत् कदाचित्
सृक्किण्यौ विलिखति जिह्वया तथैव ।
निद्रालुर्गुडमधुदुग्धपायसेप्सु-
र्विज्ञेयो भवति भुजङ्गमेन जुष्टः ॥ १३ ॥

य इत्यादि । यो भूमौ सर्पवत् प्रसरति उरसा भ्रमति स भुजङ्गमेन जुष्ट इति संबन्धः । सृक्किण्यौ ओष्ठप्रान्तौ । विलिखति विलेढि, धातूनामनेकार्थकत्वात् । तथैवेति सर्पवत् । अन्ये तु 'तथैव' इत्यत्र 'प्रसक्तं' इति पठन्ति, तत्र प्रसक्तं सन्ततं विलेढीत्यर्थः ॥ १३ ॥

मांसासृग्विविधसुराविकारलिप्सु-
र्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः ।
क्रोधालुर्विपुलबलो निशाविहारी
शौचद्विड् भवति च रक्षसा गृहीतः ॥ १४ ॥

मांसासृगित्यादि । विविधाः सुराविकारा माध्वीकादयः । लिप्सुः आस्वादयितुमिच्छुः । शौचद्विड् शौचं द्वेष्टि अशुचिरित्यर्थः ॥ १४ ॥

उद्ध्वस्तः कृशपरुषश्चिरप्रलापी
दुर्गन्धो भृशमशुचिस्तथाऽतिलोलः ।
बह्वाशी विजनहिमाम्बुरात्रिसेवी
व्याविग्नो[२] भ्रमति रुदन् पिशाचजुष्टः ॥ १५ ॥

उद्ध्वस्त इत्यादि । उद्ध्वस्तो विकृतदर्शनः । कृशो दुर्बलः । परुषः कर्कशः । चिरप्रलापी चिरकालं बहुक्षणं व्याप्य प्रलापी । अतिलोलः अतिचपलः । अन्ये तु 'अतिलोलुः' इति पठित्वा अशनलोलुप इति व्याख्यानयन्ति, यथा—भीमो भीमसेन इति । बह्वाशी प्रचुरभोक्ता । विजनं निर्जनस्थानं, हिमाम्बुसेवी शीताम्बुसेवी, रात्रिसेवी रात्रिविहारीत्यर्थः । व्याविग्न उद्विग्नः । अन्ये त्वत्र 'व्याचेष्टं' इति पठन्ति, विरुद्धचेष्टं यथा भवति तथा भ्रमतीत्येवं व्याख्यानयन्ति ॥ १५ ॥

स्थूलाक्षस्त्वरितगतिः स्वफेनलेही
निद्रालुः पतति च कम्पते च योऽति ।
यश्चाद्रिद्विरदनगादिविच्युतः सन्
संसृष्टो नभवति वार्धकेन जुष्टः ॥ १६ ॥

असाध्यलक्षणमाह—स्थूलाक्ष इत्यादि । स्वफेनलेहीति एतेनास्य मुखे फेनागमनमप्युक्तम् । यो ग्रहेण संसृष्टः स्थूलाक्ष इत्यादिलक्षणयुक्तः स्यात् स नभवति विनश्यतीत्यर्थः । यश्च अद्र्यादेर्विच्युतः पतितः सन् ग्रहेण संसृज्यते सोऽपि

---

१ 'द्रुतगतिः' इति पा० । २ 'द्रुतगतिः उत्तालगमनः' इति पा० । ३ 'तद्भक्तः' इति पा० ।

१ 'विलिहति' इति पा० । २ 'व्याचेष्टं' इति पा० ।

विनश्यति । अद्रिः पर्वतः, द्विरदो हस्ती, नगो वृक्षः, आदिशब्दात् श्वभ्रनदीतटादयः । वार्धकेन जुष्टः वृद्धभावेन गृहीत इत्यर्थः; अन्ये 'वर्धकेन' इति पठन्ति, वर्धकेन छेदकेन हिंसार्थिना केनचिद्ग्रहेण जुष्टो गृहीत इति व्याख्यानयन्ति ॥ १६ ॥

देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥१७॥
कृष्णक्षये च पितरः पञ्चम्यामपि चोरगाः ।
रक्षांसि निशि पैशाचाश्चतुर्दश्यां विशन्ति च ॥१८॥

इदानीं देवादिग्रहाणां ग्रहणकालमाह—देवग्रहा इत्यादि । असुरा असुरग्रहाः । सन्ध्ययोरपीत्यत्रापिशब्दः पादपूरणे । प्रायशोऽष्टम्यामिति प्रायःशब्दात् सन्ध्ययोरपि गन्धर्वा विशन्तीति लभ्यते । पितरः पितृग्रहाः । कृष्णक्षये कृष्णपक्षक्षये अमावस्यायामित्यर्थः । पञ्चम्यामपीति अपिशब्दात् कृष्णपक्षक्षयेऽपि । उरगा नागग्रहाः ॥ १७ ॥ १८ ॥

दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा ।
स्वमणिं भास्करस्योस्रा यथा देहं च देहधृक् ।
विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणम् ॥१९॥

ननु, देहं विशन्तो ग्रहाः कुतो न लक्ष्यन्त इत्याह—दर्पणादीनित्यादि । दर्पण आदर्शः, आदिशब्दाज्जलस्नेहखड्गादिग्रहणम् । स्वमणिं सूर्यकान्तं, भास्करस्योस्राः सूर्यरश्मयः । देहं गर्भशरीरं, देहधृक् जीवः । अन्ये देहधृक्शब्देन मनः प्रतिपादयन्ति । ननु, भूतैः शरीरेऽनुप्रवेशः क्रियते न तु शरीरिणि, तत् कथं शरीरिणमिति ? उच्यते—अत्र शरीरिशब्देन शरीरमभिप्रेतं, स्थानिनि स्थानोपचारात् । यथा छायाशीतोष्णादयो दर्पणप्राणिप्रभृतीन् विशन्तो न दृश्यन्ते तद्वद्ग्रहा अपीत्यर्थः । अत्र छायादिदृष्टान्तचतुष्टयेन आद्यैर्हेतुभिः शरीरं क्षोभयित्वैवानुप्रविश्य लिङ्गैरात्मानं दर्शयन्तीत्यर्थः । यथा देहं च देहधृगित्यनेन स्वमूर्तिमन्तर्निधाय विशन्तीति प्रदर्शितम् ॥ १९ ॥

तपांसि तीव्राणि तथैव दानं
व्रतानि धर्मो नियमाश्च सत्यम् ।
गुणास्तथाऽष्टावपि तेषु नित्या
व्यस्ताः समस्ताश्च यथाप्रभावम् ॥ २० ॥

इदानीं ग्रहाणां तीव्रतपोनियमादियुक्तत्वं प्रभाववत्त्वं च दर्शयितुमाह—तपांसि तीव्राणीत्यादि । तपस्तपनलक्षणमुपवासादि । व्रतानि शास्त्रोदितविधिना भोजनादिनियमनादि । धर्मः कायवाङ्मनसां सुचरितम् । गुणास्तथाऽष्टाविति अणिमा, लघिमा, महिमा, गरिमा, प्राकाम्यं, प्राकाश्यं, ईशित्वं, वशित्वं, कामावसायित्वम्, इत्यष्टौ; अन्ये तु—"आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया । दृष्टिः श्रोत्रं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम्"—इत्यष्टविधमैश्वर्यमाहुः । तेषु ग्रहेष्वेते गुणा नित्या न कादाचित्काः । व्यस्ता द्वित्रिचतुराः । समस्ताः सर्वे । यो यस्य प्रभाव इति यथाप्रभावम् । तत्र व्यस्ता गुणा असुरादिग्रहाणां, समस्ता देवग्रहाणाम् ॥ २० ॥

१ 'च स्वतः क्रिया' इति पाठान्तरम् ।

न ते मनुष्यैः सह संविशन्ति
न वा मनुष्यान् क्वचिदाविशन्ति ।
ये त्वाविशन्तीति वदन्ति मोहा-
त्ते भूतविद्याविषयादपोह्याः ॥ २१ ॥

तपोनियमादियुक्ता हि देवादिग्रहाः कथंचिदप्यशुचिं देहं नाविशन्तीत्याह—न ते मनुष्यैरित्यादि । ते देवयोनयो मनुष्यैः सह न संविशन्ति एकत्र न भवन्तीत्यर्थः । न वा मनुष्यान् मानुषदेहान् क्वचिदाविशन्ति अनुप्रविशन्तीत्यर्थः । ये पुनर्वैद्या आविशन्तीति मोहादज्ञानात् प्रवदन्ति ते वैद्या भूतविद्याविषयादपोह्या अपसारणीयास्त्याज्या इत्यर्थः । 'अपोह्या' इत्यत्र 'अपेता' इत्यन्ये पठन्ति, तत्र ग्रहज्ञानाद्बाह्या इत्यर्थः ॥ २१ ॥

तेषां ग्रहाणां परिचारका ये
कोटीसहस्रायुतपद्मसंख्याः ।
असृग्वसामांसभुजः सुभीमा
निशाविहाराश्च तमाविशन्ति ॥ २२ ॥

के तर्हि गृह्णन्तीत्याह—तेषामित्यादि । तेषां देवादीनां, परिचारकाः प्रेष्याः कर्मकरा इत्यर्थः । कोटी शतलक्षप्रमाणं, अयुतं दशसहस्रं, एतेन कोट्याः शतलक्षपरिमिताया यत् सहस्रं तादृशैर्दशभिः सहस्रैरत्रायुतं बोद्धव्यं, तेषां पद्मं चतुर्दशप्रमाणं तदेव संख्या येषां ते तथा । प्राक् 'असंख्येया ग्रहगणा' इत्यभिधाय अत्र कोट्यादिसंख्याया अभिधानं ग्रहगणानामन्योन्यसादृश्यख्यापनार्थम् । सुभीमा अत्यर्थं भयङ्कराः । निशाविहारा रात्रौ भ्रमणशीलाः ॥ २२ ॥

निशाचराणां तेषां हि ये देवगणमाश्रिताः ।
ते तु तत्सत्त्वसंसर्गाद्विज्ञेयास्तु तदञ्जनाः ॥ २३ ॥

देवाद्यनुचराणां स्वप्रभूणामिवानुकारो भवतीत्याह—निशाचराणामित्यादि । तेषां निशाचराणामनुचराणां मध्ये ये अनुचरा यं देवगणमाश्रितास्ते तदञ्जनाः तल्लक्षणा विज्ञेया इति संबन्धः । कुत इत्याह—तत्सत्त्वसंसर्गात् देवादिसत्त्वसंयोगादित्यर्थः ॥ २३ ॥

देवग्रहा इति पुनः प्रोच्यन्तेऽशुचयश्च ये ।
देववच्च नमस्यन्ते प्रत्यर्थ्यन्ते च देववत् ॥ २४ ॥

देवग्रहा इत्यादि । ये पुनरनुचराः शुचयस्ते देवग्रहा इति प्रोच्यन्ते । कुतः ? यतः शुचयः, शुचित्वं पुनस्तत्संसर्गादेव । देववच्च नमस्यन्ते देववन्नमस्क्रियन्ते । प्रत्यर्थ्यन्ते देववदित्यर्थः । अन्ये तु व्याख्यानयन्ति—तदञ्जनास्तद्देवाकारास्तथाविधा एव भवन्तीत्याह—अशुचयस्तु ते; ते पुनरशुचयो

१ 'शुचयश्च ये' इति पा० ।

मोहान्धत्वादशुद्धाः, अत एव गृह्णन्ति। देववन्नमस्कारः पूजा च तदज्ञत्वादेव ॥ २४ ॥

स्वामिशीलक्रियाचाराः क्रम एष सुरादिषु।
निर्ऋतेर्या दुहितरस्तासां स प्रसवः स्मृतः ॥ २५ ॥

स्वामिशीलक्रियाचारा इत्यादि। शीलं स्वभावः। क्रमश्चायं पूर्वोक्तदेवग्रहशुचित्वादिकः। सुरादिषु देवग्रहेषु, यतस्तेऽपि स्वामिशीलक्रियाचाराः। देवग्रहा इत्यादिकं च श्लोकं कार्तिककुण्डो न पठति। तदज्ञत्वेनैवास्यार्थस्य लब्धत्वात्। ननु, यदि तत्सत्त्वसंसर्गाच्छुचयस्तत् कथं मांसादिभुज इत्याह—निर्ऋतेर्या दुहितर इत्यादि। निर्ऋती रक्षसां पितामहः, तस्य या दुहितरः पुत्र्यस्तासां स देवाद्यनुचरगणः प्रसवः, अतः प्रसूतिभावं न त्यजति ॥ २५ ॥

सत्यत्वादपवृत्तेषु वृत्तिस्तेषां गणैः कृता।

तेषां वृत्तिविषयमाह—सत्यत्वादित्यादि। सत्यत्वात् शास्त्रोक्तानुष्ठानात्। अपवृत्तेषु विपरीतानुष्ठानपरेषु। गणैः ग्रहगणैः। तेषामनुचराणां वृत्तिः कृता। केचित् 'गणैः' इत्यत्र 'ग्रहैः' इति पठित्वा ग्रहैः कृता वृत्तिरिति च व्याख्यानयन्ति ॥—

हिंसाविहारा ये केचिद्देवभावमुपाश्रिताः ॥ २६ ॥
भूतानीति कृता संज्ञा तेषां संज्ञाप्रवक्तृभिः।

अतो ग्रहाणां भूतसंज्ञत्वं दर्शयन्नाह—हिंसाविहारा इत्यादि। हिंसाविहारा वधक्रीडनाः। देवभावं देवरूपम्। तेषां हिंसाविहाराणां भूतानीति संज्ञा कृता ॥ २६ ॥—

ग्रहसंज्ञानि भूतानि यस्माद्वेत्त्यनया भिषक् ॥ २७ ॥
विद्यया भूतविद्यात्वमत एव निरुच्यते।

भूतविद्याया निरुक्तिमाह—ग्रहसंज्ञानीत्यादि ॥ २७ ॥—

तेषां शान्त्यर्थमन्विच्छन् वैद्यस्तु सुसमाहितः ॥२८॥
जपैः सनियमैर्होमैरारभेत चिकित्सितुम्।

इदानीं चिकित्सितमाह—तेषामित्यादि। तेषां देवाद्यनुचराणाम्। सुसमाहितः सुष्ठु सावधानः, आत्मानं परिरक्षन्नित्यर्थः। जपैरित्यादि। जपैरोङ्कारपूर्वकगायत्र्याद्यावर्तनैरयुतलक्षकोटिप्रयुतोपलक्षितैः। एतेन दैवव्यपाश्रयं चिकित्सितमुक्तम् ॥ २८ ॥—

रक्तानि गन्धमाल्यानि बीजानि मधुसर्पिषी ॥२९॥
भक्ष्याश्च सर्वे सर्वेषां सामान्यो विधिरुच्यते।

सर्वग्रहाणां सामान्यचिकित्सामाह—रक्तानीत्यादि। रक्तानि गन्धमाल्यानि कुङ्कुमरक्तकरवीरादीनि। बीजानि सर्षपयवप्रभृतीनि। भक्ष्याश्च सर्वे लड्डुकफेनकगुडादयः ॥ २९ ॥—

१ 'स्वामिशीलक्रियाचारक्रमा एव सुरादिषु। निर्ऋतेर्या दुहितरस्तासां सप्रसवाः स्मृताः' इति हाराणचन्द्रसंमतः पाठः। २ 'दिव्यं भावमुपाश्रिताः' इति पा०। ३ 'बीजानि यन्त्रलिखितानि बीजाक्षराणि' इति पा०।

वस्त्राणि गन्धमाल्यानि मांसानि रुधिराणि च ३०
यानि येषां यथेष्टानि तानि तेभ्यः प्रदापयेत्।

सर्वेषां देवादिग्रहाणां विशेषचिकित्सितमाह—वस्त्राणीत्यादि। यानि वस्त्रादीनि येषां देवाद्यनुचराणां यथा यादृशानि इष्टानि तानि वस्त्रादीनि तेभ्यः प्रदापयेदिति संबन्धः। इष्टत्वं च वस्त्रादिवस्तूनां विविधानां 'सन्तुष्टः शुचिरपि चेष्टगन्धमाल्यः' इत्यादिग्रहलक्षणतोऽपि ज्ञातव्यम्। 'वस्त्राणि मद्यमांसानि क्षीराणि' इति क्वचित् पाठः ॥ ३० ॥—

हिंसन्ति मनुजान् येषु प्रायशो दिवसेषु तु ॥ ३१ ॥
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये।

वस्त्रादिप्रदानकालमाह—हिंसन्ति मनुजानित्यादि। देयानि वस्त्रादीनि ॥ ३१ ॥—

देवग्रहे देवगृहे हुत्वाऽग्निं प्रा(दा)पयेद्बलिम् ॥३२॥
कुशस्वस्तिकपूपाज्यच्छत्रपायससंभृतम्।

बलिप्रदानाय व्याख्यानमाह—देवेत्यादि। देवगृहे देवायतने। कुशा दर्भाः, स्वस्तिको यवादिचूर्णैः कृतोऽधोभागे विस्तीर्ण ऊर्ध्वभागे तीक्ष्णो मध्ये वलित्रयमुद्राङ्कितो भक्ष्यविशेषः, पूपः पूपलिका, आज्यं घृतम्; एतैः संभृतं बलिं दापयेदित्यर्थः ॥ ३२ ॥—

असुराय यथाकालं विदध्याच्चत्वरादिषु ॥ ३३ ॥

असुराय यथाकालमित्यादि। असुराय असुरग्रहाय। यथाकालमिति सन्ध्याकाले। विदध्यात् दद्यात्, बलिमित्यर्थः। चत्वरादिषु चतुष्पथ्यादिषु ॥ ३३ ॥

गन्धर्वस्य गवां मध्ये मद्यमांसाम्बुजाङ्गलम्।

गन्धर्वस्येत्यादि। अम्बु पानीयं; जाङ्गलं मांसं, तच्च मांसोपादानाल्लब्धम्, अतः पृथगुपादानं तस्य विशेषपरिग्रहार्थं; अन्ये 'मद्यमांसाम्बुजाकुलं' इति पठन्ति, मद्यमांसाम्बुजाकुलं मद्याद्याकुलं संभृतं बलिमित्यर्थः। पुष्पप्रियत्वाद्गन्धर्वाणामम्बुजं कमलोत्पलादि ॥—

हृद्ये वेश्मनि यक्षस्य कुल्माषासृक्सुरादिभिः ॥३४॥
अतिमुक्तककुन्दाब्जपुष्पैश्च वितरेद्बलिम्।

हृद्ये इत्यादि। कुल्माषासृक्सुरादिभिः कुल्माषा यवपिष्टकृताः शृङ्गाटकादयः, असृक् रक्तम्, आदिशब्दाद्भक्ष्यादयः। अतिमुक्तककुन्दाब्जैरिति अतिमुक्तको माधवीलता 'अवेतक' इति लोके, अम्बुजानि उत्पलादीनि। कुल्माषादिभिरतिमुक्तकादिपुष्पैश्च मनोज्ञे गृहे यक्षस्य बलिं दद्यादित्यर्थः ॥ ३४ ॥—

नद्यां पितृग्रहायेष्टं कुशास्तरणभूषितम् ॥ ३५ ॥

नद्यामित्यादि। इष्टं बलिं तिलगुडपायसादिकम् ॥ ३५ ॥

तत्रैवोपहरेच्चापि नागाय विविधं बलिम्।

तत्रैवेत्यादि। तत्रैव नद्याम्। विविधं गुडमध्वासवपायसैर्नानाप्रकारम् ॥—

१ 'वस्त्राणि मद्यमांसानि क्षीराणि' इति पा०। २ 'मद्यं मांसं च जाङ्गलम्' इति पा०।

चतुष्पथे राक्षसस्य भीमेषु गहनेषु वा ॥ ३६ ॥

चतुष्पथ इत्यादि । अत्रापि 'वितरेद्बलिं' इति संबध्यते । विविधं मांसासृक्सुराविकारैरनेकप्रकारम् । किं चतुष्पथे एव बलिं दद्यादित्याह—भीमेषु गहनेषु वा; 'स्थानेषु' इत्यध्याहार्यम् ॥ ३६ ॥

शून्यागारे पिशाचस्य तीव्रं बलिमुपाहरेत् ।

शून्यागार इत्यादि । तीव्रं बलिं आममांसपशूपहारमद्योत्कटम् ॥—

पूर्वमाचरितैर्मन्त्रैर्भूतविद्यानिदर्शितैः ॥ ३७ ॥
न शक्या बलिभिर्जेतुं योगैस्तान् समुपाचरेत् ।

पूर्वोक्तविधानेन जेतुमशक्यानां विशेषविधानमाह—पूर्वमित्यादि ॥ ३७ ॥—

अजर्क्षचर्मरोमाणि शल्यकोलूकयोस्तथा ॥ ३८ ॥
हिङ्गु मूत्रं च बस्तस्य धूममस्य प्रयोजयेत् ।
एतेन शाम्यति क्षिप्रं बलवानपि यो ग्रहः ॥ ३९ ॥

प्राग्योगैरित्युक्तमतस्तानेव योगानाह—अजेत्यादि । अजश्छगलः ॥ ३८ ॥ ३९ ॥

गजाह्वपिप्पलीमूलव्योषामलकसर्षपान् ।
गोधानकुलमार्जारऋष्यपित्तप्रपेषितान्[१] ॥ ४० ॥
नस्याभ्यञ्जनसेकेषु विदध्याद्योगतत्त्ववित् ।

गजाह्वेत्यादि । गजाह्वा गजपिप्पली । मार्जारो बिडालः, ऋष्यो नीलाण्डो मृगभेदः, पित्तशब्दो गोधादिभिः प्रत्येकं संबध्यते । तेन गजाह्वादीन् गोधादिपित्तपेषितान्नस्यादिषु दद्यादिति संबन्धः । अन्ये ऋष्यस्थाने मत्स्येति पठन्ति; तन्न, आद्यपुस्तके ऋष्यस्य पाठो दृश्यते न मत्स्यस्य । नस्यादिषु पित्तपिष्टेन कथं सेकः कर्तुं पार्यत इत्यतः किञ्चित्तोयमालोडनार्थं देयम् । अत एव योगतत्त्वविदित्युक्तम् । अन्ये तु 'नस्याभ्यञ्जनयोगेषु' इति पठन्ति, अभ्यञ्जनमत्राञ्जनमभिप्रेतं नस्यसाहचर्यादिति च व्याख्यानयन्ति । मार्जारऋष्य(क्ष)पित्तप्रपेषितानित्यत्रासंहितानिर्देशश्छन्दोभङ्गभीतेः ॥ ४० ॥—

खराश्वाश्वतरोलूककरभश्वशृगालजम् ॥ ४१ ॥
पुरीषं गृध्रकाकानां[२] वराहस्य च पेषयेत् ।
बस्तमूत्रेण तत्सिद्धं तैलं स्यात् पूर्ववद्धितम् ॥ ४२ ॥

खराश्वेत्यादि । खराश्वादीनां पुरीषं बस्तमूत्रेण पेषयेत्, ततस्तेन कल्केन छागमूत्रेण तत्सिद्धं तैलं पूर्ववद्धितं स्यादिति संबन्धः । खरो गर्दभः, अश्वतरो वेसरः, करभ उष्ट्रः, श्वा कुकुरो मांसवर्गे[३] प्रोक्तलक्षणः । वराहस्य चेति चकारेण पुरीषं समुच्चीयते । तत्तैलं पूर्ववन्नस्याभ्यञ्जनसेकेषु विदध्यादित्यर्थः ॥ ४१ ॥ ४२ ॥

शिरीषबीजं लशुनं शुण्ठीं सिद्धार्थकं वचाम् ।

१ 'ऋष्यपित्तप्रभावितान्' इति पा० । २ 'गृध्रजं क(न्य)ङ्कोर्वराहस्य' इति पा० । ३ 'क(न्य)ङ्कमांसवर्गे प्रोक्तलक्षणः' इति पा० ।

मञ्जिष्ठां रजनीं कृष्णां बस्तमूत्रेण पेषयेत् ॥ ४३ ॥
वर्त्यश्छायाविशुष्कास्ताः सपित्ता नयनाञ्जनम् ।

शिरीषबीजमित्यादि । सिद्धार्थकः श्वेतसर्षपः । कृष्णा पिप्पली । सपित्ता गोपित्तान्विता, प्रधानकल्पनया; अन्ये श्रुतत्वाद्गोधाद्यन्यतमपित्तं गृह्णन्ति । शिरीषबीजादीनि बस्तमूत्रेण पेषयेत्, ततो वर्त्यः सगोपित्ता छायाशुष्काः, ताभिर्नयनाञ्जनं कार्यमित्यर्थः ॥ ४३ ॥—

नक्तमालफलं व्योषं मूलं श्योनाकबिल्वयोः ॥ ४४ ॥
हरिद्रे च कृता वर्त्यः पूर्ववन्नयनाञ्जनम् ।

नक्तमालफलमित्यादि । कृता वर्त्यः पूर्ववदिति बस्तमूत्रनिष्पिष्टाश्छायाविशुष्काश्च सपित्ताः कार्याः ॥ ४४ ॥—

सैन्धवं कटुकां हिङ्गुं वयःस्थां च वचामपि ।
बस्तमूत्रेण संपिष्टं मत्स्यपित्तेन पूर्ववत् ॥ ४५ ॥
ये ये ग्रहा न सिध्यन्ति सर्वेषां नयनाञ्जनम् ।

ये ये ग्रहा इत्यादि । वयःस्था गुडूची । बस्तमूत्रेणेत्यत्र वाशब्दो लुप्तो द्रष्टव्यः; तेन बस्तमूत्रेण वा पिष्टं मत्स्यपित्तेन वेति लभ्यते । पूर्ववत् छायाशुष्कमञ्जनं कार्यमित्यर्थः ॥ ४५ ॥—

पुराणसर्पिर्लशुनं हिङ्गु सिद्धार्थकं वचा ॥ ४६ ॥
गोलोमी चाजलोमी च भूतकेशी जटा तथा ।
कुक्कुटा सर्पगन्धा च तथा काणविकाणिके ॥ ४७ ॥
वज्रप्रोक्ता[१] वयःस्था च शृङ्गी मोहनवल्लिका ।
अर्कमूलं त्रिकटुकं लता स्रोतोजमञ्जनम् ॥ ४८ ॥
नैपाली हरितालं च रक्षोघ्ना ये च कीर्तिताः ।
सिंहव्याघ्रर्क्षमार्जारद्वीपिवाजिगवां तथा ॥ ४९ ॥
श्वाविच्छल्यकगोधानामुष्ट्रस्य नकुलस्य च ।
विट्त्वग्रोमवसामूत्ररक्तपित्तनखादयः[२] ॥ ५० ॥
अस्मिन् वर्गे भिषक् कुर्यात्तैलानि च घृतानि च ।
पानाभ्यञ्जननस्येषु तानि योज्यानि जानता ॥ ५१ ॥
अवपीडेऽञ्जने चैव विदध्याद्गुटिकीकृतम् ।
विदधीत परीषेके क्वथितं, चूर्णितं तथा ॥ ५२ ॥
उद्धूलने, श्लक्ष्णपिष्टं प्रदेहे चावचारयेत् ।
एष सर्वविकारांस्तु मानसानपराजितः ॥ ५३ ॥
हन्यादल्पेन कालेन स्नेहादिरपि च क्रमः[३] ।

पुराणसर्पिरित्यादि । लशति भिनत्ति रोगानिति लशुनम् । सिद्धार्थकः सिद्धप्रयोगारम्भकत्वात् श्वेतसर्षपः । गोलोमी दूर्वा । अजलोमी श्वेतदूर्वा । भूतकेशी मांसी । जटा गन्धमांसी । कुक्कुटा कुक्कुटशिम्बी, वर्तमानप्रतिपु कुक्कटीति दृश्यते, कुक्कटी कुक्कटसदृशकन्दा महौषधिः । सर्पगन्धा वर्षासु

१ 'ऋष्यप्रोक्ता' इति पा० । २ 'विट्त्वग्रोमवसामज्जरक्तमूत्रनखत्वचः' इति पा० । ३ 'क्रमात्' इति पा० ।

छत्राकारा। काणविकाणिके काकोलीक्षीरकाकोल्यौ। तथेत्यत्र तिक्तेति, विकाणिकेत्यत्र विषाणिकेति च केचित् पठन्ति। तिक्ता कटुतुम्बी, विषाणिका मेषशृङ्गी। वज्रप्रोक्ता वज्रकन्दः, स्नुहीत्यन्ये; वज्रप्रोक्तेत्यत्रान्ये 'ऋष्यप्रोक्ता' इति पठन्ति; वयःस्था गुडूची। शृङ्गी कर्कटशृङ्गी। मोहनवल्लिका वटपत्रिका। लता प्रियङ्गुः। स्रोतोञ्जनं पर्णसानद्यां सिन्धुनदे वा भवति। तल्लक्षणम्,—"वल्मीकशिखराकारं रूपे नीलोत्पलद्युति। स्रोतोञ्जनं प्रशंसन्ति तच्च प्रत्यञ्जने हितम्—" इति। नैपाली मनःशिला। रक्षोघ्ना ये प्रकीर्तिता इति श्वेतसर्षपाः। 'रक्षोघ्नं यच्च कीर्तितं' इत्यन्ये, तत्र रुद्राक्षं; अपरे तु 'यच्चद्रक्षोघ्नमीरितं' इति पठन्ति, गुग्गुलुप्रभृतीनीति च व्याख्यानयन्ति। ऋक्षो भल्लूकः। द्वीपी चित्रकः। मार्जारो बिडालः। वाजी घोटकः। श्वावित् सेहि(ढि)केति लोके। शल्यको गोधानुकारी वज्रशल्यकः। विट् पुरीषम्। नखत्वचः शस्त्रेण तनूकृतनखस्य तनूनि खण्डानि। अस्मिन् वर्गे पुराणसर्पिरित्यादिके यावद्रक्तमूत्रत्वगन्ते, तैलानि घृतानि च भिषक् कुर्यात्; तानि च पानादिषु जानता वैद्येन योज्यानीति संबन्धः। 'अस्मिन् वर्गे' इति वर्गग्रहणादसमस्तेनाप्यनेन तैलादिकं कर्तव्यमित्यर्थः। अवपीडो नस्यभेदः। गुटिकीकृतं वर्तीकृतम्। अस्मिन् वर्ग इति अवपीड इत्यादिष्वनुवर्त्य संबध्यते। तेनास्मिन् वर्गे यत् क्वथितं क्वाथस्तत् परिषेके विदधीत, तथा चूर्णितमुद्धूलने विदधीत, श्लक्ष्णपिष्टं प्रदेहे अवचारयेदित्यर्थः। एष गणोऽपराजितो नाम सर्वविकारान् मानसान् ग्रहकृतांश्चोन्मादादीनल्पेन कालेन निहन्यादिति संबन्धः; अन्ये अपराजितानिति पठन्ति, तत्र अपरैः प्रयोगैरजितान् मानसान् विकारानिति व्याख्येयम्। किमेष एव गणः परमेतान् विकारान् हन्यादित्याह—स्नेहादिरपि च क्रमः। आदिशब्दात् स्वेदवमनविरेकादि ॥ ४६–५३ ॥—

न चाचौक्षं प्रयुञ्जीत प्रयोगं देवताग्रहे ॥ ५४ ॥

नचाचोक्षमित्यादि। अचोक्षमपवित्रं प्रयोगं देवताग्रहे देवादिग्रहे न प्रयुञ्जीतेत्यर्थः। अन्ये नचायुक्तमिति पठन्ति ॥५४॥

ऋते पिशाचादन्यत्र प्रतिकूलं न चाचरेत्।

देवताग्रह इत्यत्र सामान्यवचनात् सर्वेष्वपि ग्रहेषु निषेधः प्राप्त इत्यत आह—ऋते पिशाचादित्यादि। ऋते पिशाचात् पिशाचग्रहं विहाय, अन्येषु ग्रहेषु, प्रतिकूलं निषिद्धम्; अन्यत्रेत्यत्रापि ऋते पिशाचादिति संबध्यते; तेन पिशाचादन्यत्र प्रतिकूलं नच आचरेत्; एतेन पिशाचग्रहे अचौक्षं प्रतिकूलं चोचितमित्युक्तम् ॥—

वैद्यातुरौ निहन्युस्ते ध्रुवं क्रुद्धा महौजसः ॥ ५५ ॥

पिशाचादन्यत्र प्रतिकूलाचरणे किं स्यादित्याह—वैद्यातुरौ निहन्युरित्यादि। ते देवादिग्रहा ध्रुवमवश्यमनुचिताचरणात् क्रुद्धाः सन्तो वैद्यातुरौ निहन्युरित्यर्थः। महौजसः महाप्रभावाः ॥ ५५ ॥

१ 'नचायुक्तं' इति पा०।

हिताहितीये यच्चोक्तं नित्यमेव समाचरेत्।

हिताहारादिकं निर्दिशन्नाह—हिताहितीये यदित्यादि। यच्चोक्तं रक्तशाल्यादिकं तन्नित्यमेव आचरेदित्यर्थः। 'हिताहितीये' इत्यत्र 'हिताहितं च' इत्यन्ये पठित्वा व्याख्यानयन्ति—व्रणितोपासनीयोक्तं हिताहितीयोक्तं च हितविधानं नित्यं समाचरेदहितं च परिहरेदित्यर्थः ॥—

ततः प्राप्स्यति सिद्धिं च यशश्च विपुलं भिषक् ५६

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते भूतविद्यातन्त्रेऽमानुषोपसर्गप्रतिषेधो नाम (प्रथमोऽध्यायः, आदितः) षष्टितमोऽध्यायः ॥ ६० ॥

हिताचरणफलमाह—तत इत्यादि। ततो हिताहितप्रतिपादितक्रियाचरणाद्ग्रहमुक्तिलक्षणं सिद्धिमातुरः प्राप्स्यति, भिषक् विपुलं यशश्च प्राप्स्यतीति। कार्तिककुण्डस्त्वमुं पाठं न पठति ॥५६॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रेऽमानुषप्रतिषेधो नाम षष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः।

अथातोऽपस्मारप्रतिषेधमध्यायं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अमानुषोपसर्गप्रतिषेधानन्तरं मनःप्रदुष्टिसामान्याद्ग्रहचिकित्सितस्यात्रापि शस्तत्वादपस्मारप्रतिषेधारम्भः—अथात इत्यादि। अथेत्यादिकं पूर्ववद्व्याख्येयम्। अपशब्दो गमनार्थः, स्मारः स्मरणं, अपगतः स्मारो यस्मिन् रोगे सोऽपस्मारः; तस्य प्रतिषेधश्चिकित्सितम् ॥ १ ॥ २ ॥

स्मृतिर्भूतार्थविज्ञानमपश्च परिवर्जने।
अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्तकृत् ॥ ३ ॥

अपस्मारस्य निरुक्तिमाह—स्मृतिरित्यादि। भूतार्थज्ञानापसरणादयं व्याधिरपस्मार इति प्रोक्तः। अन्तकृत् विनाशकृत्, अपस्मरणभावाज्जलाग्न्यादौ प्रपतनात्; अन्ये तु अन्तकृदवस्थायां, सा चावस्था 'अपस्मरन्तं बहुशः क्षीणं' इत्यादिका ॥३॥

मिथ्यातियोगेन्द्रियार्थकर्मणामभिसेवनात्।
विरुद्धमलिनाहारविहारकुपितैर्मलैः ॥ ४ ॥
वेगनिग्रहशीलानामहिताशुचिभोजिनाम्।
रजस्तमोभिभूतानां गच्छतां च रजस्वलाम् ॥ ५ ॥
तथा कामभयोद्वेगक्रोधशोकादिभिर्भृशम्।
चेतस्यभिहते पुंसामपस्मारोऽभिजायते ॥ ६ ॥

अपस्मारोत्पत्तिकारणस्य चित्ताभिघातस्य हेतूनाह—मिथ्येत्यादि। अत्रायोगो लुप्तो द्रष्टव्यः, तेन मिथ्यायोगायोगातियोगैः; केचित् मिथ्यादियोगेति पठित्वा आदिशब्देनैव अतियोगमयोगं च गृह्णन्ति। इन्द्रियार्थानां स्पर्शादीनां, कर्मणां कायवाङ्मनसानाम्। अथ शब्दादीनां मिथ्यायोगादयः कथ्यन्ते—तत्र

परुषेष्टविनाशादिश्रवणं मिथ्यायोगः, पटहाद्यतिशब्दश्रवणमतियोगः, सर्वशोऽश्रवणमयोगः; तथा शीतादिस्पर्शानां वैपरीत्येनोपसेवनं मिथ्यायोगः, अतिशीतादीनामतिसेवनमतियोगः, सर्वशोऽसेवनमयोगः; अतिविकृतादिदर्शनं मिथ्यायोगः, अतितेजसामतिदर्शनमतियोगः, सर्वथाऽनवलोकनमयोगः; तथाऽयोग्यरसानामादानं मिथ्यायोगः, रसानामत्यादानमतियोगः, रसानां सर्वथाऽनादानमयोगः; पूत्याद्याघ्राणं मिथ्यायोगः, अतितीक्ष्णादिगन्धानामत्याघ्राणमतियोगः, सर्वशोऽघ्राणमयोगः; तथा कायिककर्मणो व्यायामादेर्निषिद्धकालादिषु सेवनं मिथ्यायोगः, अतिसेवनमतियोगः, सर्वशोऽनुपसेवनमयोगः; तथा वाचनिककर्मणः परुषानृतादिभाषणं मिथ्यायोगः, अतिवाचनादिकमतियोगः, सर्वथा मौनमयोगः; तथा मानसकर्मणः शोकादिचिन्तनं मिथ्यायोगः, अतिमात्रचिन्तनादिकमतियोगः, सर्वथाचिन्तनमयोगः । विरुद्धं हिताहितीयोक्तम् । मलिनशब्द आहारविहाराभ्यां संबध्यते; तत्र मलिनाहारः पूतिद्विष्टामेध्यपर्युषिताः, मलिनो विहारो दृष्टादृष्टार्थः स्मार्तवचनात् ज्ञातव्यः । कुपितैर्मलैरित्यत्र मला वातपित्तश्लेष्माणो रजस्तमसी च, देहमलिनीकरणादुच्यन्ते । वेगेत्यादि । वेगा विण्मूत्रादीनां, तेषां वेगानां निग्रहो धारणं, तत्र शीला वेगनिग्रहरताः । अहिताशुचिभोजिनामिति यद्यप्येषोऽर्थो विरुद्धमलिनाहारादित्यनेनैव प्राप्तः, तथाऽप्यत्यर्थहेतुत्वापादनार्थं पुनः पाठः । रजस्वलां दृष्टार्तवाम् । एतैर्हेतुभिश्चित्ते उपहते दूषिते सति अपस्मारोऽभिजायते ॥ ४-६ ॥

हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता ।
निद्रानाशश्च तस्मिंस्तु भविष्यति भवन्त्यथ ॥ ७ ॥

हेतूनभिधाय पूर्वरूपमाह–हृदित्यादि । प्रमूढताऽतिशयेन विचेतनत्वम् । तस्मिन् अपस्मारे ॥ ७ ॥

संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः ।
रजस्तमःपरीतेषु मूढो भ्रान्तेन चेतसा ॥ ८ ॥
विक्षिपन् हस्तपादं च विजिह्मभ्रूर्विलोचनः ।
दन्तान् खादन् वमन् फेनं विवृताक्षः पतेत् क्षितौ९
अल्पकालान्तरं चापि पुनः संज्ञां लभेत सः ।
सोऽपस्मार इति प्रोक्तः

प्राग्रूपमभिधाय रूपमाह—संज्ञावहेष्वित्यादि । संज्ञावहेषु स्रोतःस्विति कथं बहुवचनं, यतो धमनीव्याकरणे 'द्वाभ्यां प्रबुध्यते' इत्यनेन द्वे एव संज्ञावहे स्रोतसी उक्ते? सत्यं, द्वयोरपि स्रोतसोः सूक्ष्माणां प्रतानानां बहुत्वात् स्रोतःस्वित्युक्तम् । दोषव्याप्तेषु वातादिदोषाभिभूतेषु । रजस्तमःपरीतेषु रजस्तमोव्याप्तेषु । मूढो मोहयुक्तः । केन कृत्वा मूढः ? भ्रान्तेन चेतसा चित्तभ्रान्त्येत्यर्थः । विक्षिपन् इतस्ततः क्षिपन्[३] । विजिह्मभ्रूर्विलोचनः वक्रभ्रूनेत्रः । विवृताक्ष उच्छलिताक्षः । यस्मिन् विकारे विक्षिपन् हस्तपादमित्यादिचेष्टः सन् आतुरः क्षितौ पतति स विकारोऽपस्मार इति प्रोक्त इति संबन्धः ॥८॥९॥—

स च दृष्टश्चतुर्विधः ॥ १० ॥
वातपित्तकफैर्नॄणां चतुर्थः सन्निपाततः ।

अपस्मारस्य संख्यामाह—स च दृष्ट इत्यादि । चतुर्विध इति संख्याकरणं द्वन्द्वजापस्मारनिषेधार्थम् । द्वन्द्वजासंभवस्तु व्याधिस्वभावात् । चातुर्विध्यं विवृण्वन्नाह—वातपित्तकफैरित्यादि । वातादिभिस्त्रयः ॥ १० ॥—

वेपमानो दशन् दन्तान् श्वसन् फेनं वमन्नपि ॥११॥
यो ब्रूयाद्विकृतं सत्त्वं कृष्णं मामनुधावति ।
ततो मे चित्तनाशः स्यात्सोऽपस्मारोऽनिलात्मकः ॥

वातादिजत्वेनापस्मारलक्षणमाह—वेपमान इत्यादि । वेपमानः कम्पमानः । दशन् खादन् दन्तान् । श्वसन् श्वासं कुर्वन् । विकृतं विकृतरूपं सत्त्वम् । कृष्णमित्यत्र कृष्णसत्त्वदर्शनमसत एव संज्ञावहस्रोतोगतवातप्रभावात्; न पुनः सत्त्वं पिशाचादिकं भूतमभिप्रेतम् । तन्त्रान्तरेऽपि "परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात्" इत्यादिना कृष्णादिरूपदर्शनमेवोक्तम् । एवं पित्तकफापस्मारयोरपि बोद्धव्यम् ॥ ११ ॥ १२ ॥

तृट्तापस्वेदमूर्च्छार्तो धुन्वन्नङ्गानि विह्वलः ।
यो ब्रूयाद्विकृतं सत्त्वं पीतं मामनुधावति ॥ १३ ॥
ततो मे चित्तनाशः स्यात् स पित्तभव उच्यते ।

पित्तापस्मारलक्षणमाह—तृडित्यादि । तृट् पिपासा । तापः सन्तापः । धुन्वन् विक्षिपन् । अङ्गानि हस्तपादादीनि । विह्वलो विकलः ॥ १३ ॥—

शीतहृल्लासनिद्रार्तः पतन् भूमौ वमन् कफम् १४
यो ब्रूयाद्विकृतं सत्त्वं शुक्लं मामनुधावति ।
ततो मे चित्तनाशः स्यात्सोऽपस्मारः कफात्मकः१५

कफजापस्मारलक्षणमाह—शीतहृल्लासेत्यादि । हृल्लासः थूत्करणम् ॥ १४ ॥ १५ ॥

हृदि तोदस्तृडुत्क्लेदस्त्रिष्वप्येतेषु संख्यया ।

वाताद्यपस्मारेषु प्रत्येकमेकैकं लक्षणमाह—हृदि तोद इत्यादि । हृदि तोदो व्यथा, वातिके; तृट् पिपासा, पैत्तिके; उत्क्लेशः श्लेष्मनिष्ठीवनं कफजे एतेषु त्रिषु वातादिजापस्मारेषु यथासंख्यं हृत्तोदादिलक्षणं ज्ञेयमिति संबन्धः ॥—

प्रलापः कूजनं क्लेशः प्रत्येकं तु भवेदिह ॥ १६ ॥

वातादिजापस्मारेषु प्रत्येकं प्रलापादिलक्षणत्रितयमाह—प्रलापः कूजनमित्यादि । प्रलापादिकं त्रयं वातादिजापस्मारेषु त्रिष्वपि प्रत्येकं बोद्धव्यं न यथासंख्यम् ॥ १६ ॥

सर्वलिङ्गसमवायः सर्वदोषप्रकोपजे ।

सर्वजापस्मारलक्षणमाह—सर्वलिङ्गसमवाय इत्यादि । सर्वलिङ्गसमवायो वातादिलिङ्गसमावेशः । सर्वदोषप्रकोपज इति प्रकोपोपादानात् स्वकीयकारणप्रकुपितदोषत्रयज इति बोद्धव्यं, न कुपितैकदोषप्रकोपितसर्वदोषज इति ॥—

१ 'सूक्ष्मादिदर्शनं मिथ्यायोगः' इति पा० । २ 'स्मृतिपु विज्ञातव्यः' इति पा० । ३ 'चालयन्' इति पा० ।

अनिमित्तागमाद्व्याधेर्गमनादकृतेऽपि च ॥ १७ ॥
आगमाच्चाप्यपस्मारं वदन्त्यन्ये न दोषजम् ।

स्वमतेनापस्मारस्य दोषजत्वं प्रदर्श्य परमतेनागन्तुकत्वमाह—अनिमित्तागमादित्यादि। अनिमित्तागमादकारणोत्पादनात्, आकस्मिकोद्भवादित्यर्थः । गमनादकृतेऽपि चेत्यत्र 'प्रतीकारे' इति शेषः; तेन प्रतीकारे अकृतेऽपि व्याधेर्गमनादुपशमादित्यर्थः । अकृतेऽपीत्यत्र अकृतादिति क्वचित्; तत्र, अकृतात् प्रतीकाराद्भेषजेनेति द्रष्टव्यम्। आगमाच्चेति स्वकीयात्; न पुनश्चेतरस्मात्, तत्र दोषजत्वेनापस्मारस्य दर्शितत्वात्। 'वदन्त्यन्ये न दोषजं' इत्यत्र अन्ये 'वदन्त्यन्योन्यदोषजम्' इति पठन्ति, अन्योन्यदोषजं रजस्तमोदोषजमित्यर्थः। अपरे तु 'अन्योन्यदूषणात्' इति पठन्ति। तत्र कायमनसोरन्योन्यदूषणात् ॥१७॥—

क्रमोपयोगाद्दोषाणां क्षणिकत्वात्तथैव च ॥ १८ ॥
आगमाद्वैश्वरूप्याच्च स तु निर्वर्ण्यते बुधैः ।
देवे वर्षत्यपि यथा भूमौ बीजानि कानिचित् ॥१९॥
शरदि प्रतिरोहन्ति तथा व्याधिसमुद्भवः ।
स्थायिनः केचिदल्पेन कालेनाभिप्रवर्धिताः ॥ २० ॥
दर्शयन्ति विकारांस्तु विश्वरूपान्निसर्गतः ।
अपस्मारो महाव्याधिस्तस्माद्दोषज एव तु ॥ २१ ॥

परमतनिराकरणाय स्वमतमाह—क्रमोपयोगादित्यादि । स तु पुनरपस्मारः क्रमोपयोगादित्यादिहेतुभिश्चतुर्भिर्दोषज एव बुधैः पण्डितैर्निर्वर्ण्यते कथ्यत इत्यर्थः । अत्र हेतुमाह—क्रमोपयोगाद्दोषाणामिति संचयादिक्रमेण दोषाणां विकारजननयोगादित्यर्थः; एतेन, अनिमित्तागमाद्व्याधेरिति हेतुर्निराकृतः । तथा सर्वपारिषदत्वादायुर्वेदस्य सौगतमतमवलम्ब्य गमनादकृतेऽपि चेत्यस्य हेतोर्निराकरणाय हेतुमाह—क्षणिकत्वात्तथैव चेति । तथैव वातादीनां क्षणिकत्वाद्द्वितीयोऽपि हेतुर्निराकृतः। यतो यावन्मात्रो दोषवेगोऽभूत् तावन्मात्रस्यापगमादकृतेऽपि प्रतीकारे व्याधेरपगमः । तृतीयं हेतुमाह—आगमाच्चेति; स्वतन्त्रात् परतन्त्राच्चेत्यर्थः । तत्रागमे स्वतन्त्रे परतन्त्रे च वातिक-पैत्तिक-श्लैष्मिक-सान्निपातिकाश्चत्वारोऽपस्मारा अभिहिता इति । चतुर्थं हेतुमाह—वैश्वरूप्याच्चेति विश्वेषां समस्तानां वातपित्तश्लेष्मणां मनोदोषयो रजस्तमसोश्च रूपं नानाप्रकारं लिङ्गं यस्यापस्मारस्य स तथा, तद्भावो वैश्वरूप्यं तस्मात् । 'स तु' इत्यत्रान्ये 'तत्र' इति पठन्ति, व्याख्यानयन्ति च—तत्रापस्मारे। यदेवं तर्हि वातपित्तश्लेष्मणां सदैव देहे सद्भावात् सन्ततमपस्मारः स्यादतस्तन्निराकरणार्थमाह—देवे वर्षतीत्यादि । वर्षत्यपि मेघे भूमौ सुकृष्टायामपि अङ्कुरजननसमर्थान्यपि कानिचिद्बीजानि शरद्येव प्ररोहन्ति, तथा सर्वरोगबीजानां वातादीनां कदाचित् कस्यचिदपस्मारादिर्व्याधेरङ्कुरस्थानीयस्य निदानादिसङ्गमे सत्यपि दूष्यादिसमुदायेनैव समुद्भवो भवतीत्यर्थः । अन्ये त्वन्यथा व्याख्यानयन्ति—ननु, संचयादिक्रमेणोपयोगश्चेद्दोषाणां तदा पुनः कथमल्पेनैव कालेन तद्विकारोद्गमः स्यादित्यत आह—देवेऽवर्षतीत्यादि । अवर्षति देवे यथा शरत्काले भूमौ स्तिमितत्वात् कानिचिद्बीजानि प्ररोहन्त्येव, तथाऽल्पेनापि कालेन शरीरस्था दोषाः किञ्चिदुपचिता विकारं जनयन्तीति । एतदेव स्पष्टीकुर्वन्नाह—स्थायिन इत्यादि। स्थायिनोऽवश्यमवस्थायिनो वातादयः, परं केचिदल्पेनापि कालेनाभिप्रवर्धिताः सन्तो विश्वरूपान् नानारूपान् विकारान् दर्शयन्ति । कुतः ? निसर्गतो दूषणस्वभावादित्यर्थः । अपस्मारो महाव्याधिरित्यादि । तस्मादिति पूर्वोक्तक्रमोपयोगादिहेतुसमूहादपस्मारो दोषजो न तु भूतावेशज इति सिद्धान्तः १८-२१

तस्य कार्यो विधिः सर्वो य उन्मादेषु वक्ष्यते ।
पुराणसर्पिषः पानमभ्यङ्गश्चैव पूजितः ॥ २२ ॥
उपयोगो ग्रहोक्तानां योगानां तु विशेषतः ।
ततः सिध्यन्ति ते सर्वे योगैरन्यैश्च साधयेत् ।
शिग्रुकट्वङ्गकिण्वाहिनिम्बत्वग्रससाधितम् ॥ २३ ॥
चतुर्गुणे गवां मूत्रे तैलमभ्यञ्जने हितम् ।

इदानीं चिकित्सितमाह—तस्य कार्यो विधिरित्यादि । तस्य अपस्मारस्य । ननून्मादे यो विधिः पठिष्यमाणोऽस्ति तं विधिमपस्मारे निर्दिश्य तत्रैव किमिति नातिदिश्यते ? उच्यते, —उन्मादे तस्यातिशयेन हितत्वादित्यर्थः । अभ्यङ्गश्चैवेति पुराणसर्पिषा, अस्य त्रिदोषघ्नत्वात् । ग्रहोक्तविधिमुपदिशति—उपयोग इत्यादि । शिग्रुकट्वङ्गेत्यादि शिग्रुः शोभाञ्जनकः, कट्वङ्गोऽरलुः, स्योनाक इत्यन्ये, किणिही श्वेतस्यन्दः; त्वग्रससाधितमिति त्वग् वल्कलं, रसः स्वरसः; एतेन कल्कस्वरसाभ्यां साधितमिति बोद्धव्यम् । गवां मूत्रे इति चेतोविकारहरत्वेन हस्तिच्छागमेडमूत्राणां निर्दिष्टत्वात्तन्निषेधार्थं 'गवां मूत्रे' इति कृतम् । तैलं तिलतैलम् ॥ २२ ॥ २३ ॥—

गोधानकुलनागानां पृषतर्क्षगवामपि ॥ २४ ॥
पित्तेषु सिद्धं तैलं च पानाभ्यङ्गेषु पूजितम् ।

द्वितीयतैलमाह—गोधानकुलनागानामित्यादि । नागो हस्ती । पृषतश्चित्रलो मृगः । ऋक्षो भल्लूकः । गोधादीनां पित्तेषु पृथक् स्नेहसमेषु सिद्धं तैलमित्यर्थः ॥ २४ ॥—

तीक्ष्णैरुभयतोभागैः शिरश्चापि विशोधयेत् ॥ २५ ॥

तैलमभिधाय शिरोविरेचनमाह—तीक्ष्णैरित्यादि । तीक्ष्णैरुभयतोभागैर्विषाणिकाब्राह्मीकारवेल्लकादिभिः । अन्ये तु 'तीक्ष्णैरुभयतोभागैः शिरसश्च विरेचनैः' इति पठन्ति, व्याख्यानयन्ति च—तीक्ष्णैरित्युभयत्र संबध्यते । तेन उभयतोभागैर्वमनविरेचनैस्तीक्ष्णैश्च शिरोविरेचनैरुपाचरेदिति संबध्यते ॥ २५ ॥

पूजां रुद्रस्य कुर्वीत तद्गणानां च नित्यशः ।

केचिदत्र दैवव्यपाश्रयं चिकित्सितं पठन्ति—पूजां रुद्रस्येत्यादि ॥—

१ 'बोद्धव्यम्' इति पा० । २ 'नानारूपत्वादपस्मारस्य दोषान्विता नानारूपत्वेन संभवन्ति, तस्माद्दोषजा एवापस्मारा इति' इति पा० । ३ 'व्याधिविशेषस्य' इति पा० ।

१ 'स्थितम्' इति पा० ।

वातिकं बस्तिभिश्चापि पैत्तिकं तु विरेचनैः ॥ २६ ॥
कफजं वमनैर्धीमानपस्मारमुपाचरेत्।

सामान्यं चिकित्सितं निर्दिश्य वातादिभेदेनापस्माराणां चिकित्सां निर्दिशन्नाह—वातिकमित्यादि। केचिदिमं पाठं पञ्चगव्याख्यघृतपाठस्याग्रे पठन्ति ॥ २६ ॥—

कुलत्थयवकोलानि शणबीजं पलङ्कषाम् ॥ २७ ॥
जटिलां पञ्चमूल्यौ द्वे पथ्यां चोत्क्वाथ्य यत्नतः।
बस्तमूत्रयुतं सर्पिः पचेत्तद्वातिके हितम् ॥ २८ ॥

वातादिजापस्मारेषु घृतं निर्दिशन्नाह—कुलत्थेत्यादि। कोलं बदरम्। पलङ्कषा गुग्गुलुः। जटिला मांसी। पञ्चमूल्यौ द्वे इति शालिपर्ण्यादिर्बिल्वादिश्च, एरण्डबिल्वाद्ये इत्यन्ये। पथ्या हरीतकी। 'यत्नत' इत्यत्रान्ये 'योगत' इति पठन्ति। योगतोग्रहणात् क्वाथमूत्रयोर्मध्ये एकं चतुर्गुणमेकं च समं ग्राह्यमिति व्याख्यानयन्ति ॥ २७ ॥ २८ ॥

काकोल्यादिप्रतीवापं सिद्धं च प्रथमे गणे।
पयोमधुसितायुक्तं घृतं तत् पैत्तिके हितम् ॥ २९ ॥

काकोल्यादिप्रतीवापमित्यादि। काकोल्यादिप्रतीवापं काकोल्यादिकल्कम्। सिद्धं च प्रथमे गणे विदारिगन्धादिके क्वाथीकृते इति ज्ञेयम्। कुतः? काकोल्यादिकल्कोपदेशात्। पयः क्षीरम्। सिता शर्करा। क्षीरादिप्रक्षेपयुक्तं घृतं हितम् ॥२९॥

कृष्णावचामुस्तकाद्यैर्युक्तमारग्वधादिके।
पक्कं च मूत्रवर्गे तु श्लेष्मापस्मारिणे हितम् ॥ ३० ॥

कृष्णावचेत्यादि। कृष्णावचामुस्तकाद्यैरिति पिप्पल्यादिवचादिमुस्ताद्यैः क्वथितैः, आरग्वधादिकैः कल्कीकृतैः, मूत्रवर्गेऽष्टविधे सिद्धं पक्कं घृतं श्लेष्मापस्मारिणे हितमित्यर्थः। अन्ये मूत्रवर्गेष्वित्यत्र चेतोविकारहरत्वेन छागोरभ्रहस्तिमूत्राणि गृह्णन्ति ॥३०॥

सुरद्रुमवचाकुष्ठसिद्धार्थव्योषहिङ्गुभिः।
मञ्जिष्ठारजनीयुग्मसमङ्गात्रिफलाम्बुदैः ॥ ३१ ॥
करञ्जबीजशैरीषगिरिकर्णीहुताशनैः।
सिद्धं सिद्धार्थकं नाम सर्पिर्मूत्रचतुर्गुणम् ॥ ३२ ॥
क्रिमिकुष्ठगरश्वासबलासविषमज्वरान्।
सर्वभूतग्रहोन्मादानपस्मारांश्च नाशयेत् ॥ ३३ ॥

सिद्धार्थकं सर्पिराह—सुरद्रुमेत्यादि। सुरद्रुमः देवदारु। सिद्धार्थः सर्षपः। व्योषं शुण्ठीमरीचपिप्पल्यः। रजनीयुग्मं हरिद्राद्वयम्। समङ्गा लज्जालुः। अम्बुदो मुस्ता। शैरीषं शिरीषबीजम्। गिरिकर्णी श्वेतस्यन्दा। हुताशनश्चित्रकः। एतैः कल्कीकृतैर्मूत्रचतुर्गुणं सर्पिः सिद्धं सिद्धार्थकं नामेति संबन्धः। गरः कृत्रिमं विषम्। बलासः श्लेष्मा ॥३१-३३॥

दशमूलेन्द्रवृक्षत्वङ्मूर्वाभार्गीफलत्रिकैः।
शम्पाकश्रेयसीसप्तपर्णापामार्गफल्गुभिः ॥ ३४ ॥
शृतैः कल्कैश्च भूनिम्बपूतीकव्योषचित्रकैः।
त्रिवृत्पाठानिशायुग्मसारिवाद्वयपौष्करैः ॥ ३५ ॥
कटुकायासदन्त्युग्रानीलिनीक्रिमिशत्रुभिः।
सर्पिरेभिश्च गोक्षीरदधिमूत्रशकृद्रसैः ॥ ३६ ॥
साधितं पञ्चगव्याख्यं सर्वापस्मारभूतनुत्।
चातुर्थकक्षयश्वासानुन्मादांश्च नियच्छति ॥ ३७ ॥

पञ्चगव्यमाह—दशमूलेत्यादि। इन्द्रवृक्षः कुटजः, तस्य त्वक्; अन्ये त्वक्शब्देन त्वचमाहुः। मूर्वा चोरस्नायुः। फल्गुः काष्ठोदुम्बरिका। शृतैः क्वथितैः। भूनिम्बः किरातकः। पूतीकश्चिरबिल्वः। व्योषं त्रिकटुकम्। निशायुग्मं हरिद्राद्वयम्। सारिवाद्वयमास्फोता कालवल्ली च। पौष्करं पुष्करमूलम्। यासो दुरालभा, दन्ती दन्तिनी, उग्रा वचा, नीलिनी रजनिका शारदफला, क्रिमिशत्रुर्विडङ्गम्। दशमूल्यादिभिः काष्ठोदुम्बरिकान्तैः क्वथितैर्भूनिम्बादिभिः क्रिमिशत्रुपर्यन्तैः कल्कीकृतैर्गोक्षीरादिभिः प्रत्येकं स्नेहसमैः साधितं सर्पिः पञ्चगव्याख्यं सर्वापस्मारादीन्नियच्छतीत्यर्थः ॥ ३४-३७ ॥

भार्गीशृते पचेत् क्षीरे शालितण्डुलपायसम्।
त्र्यहं शुद्धाय तं भोक्तुं वराहायोपकल्पयेत् ॥ ३८ ॥
ज्ञात्वा च मधुरीभूतं तं विशस्यान्नमुद्धरेत्।
त्रीन् भागांस्तस्य चूर्णस्य किण्वभागेन संसृजेत् ३९
मण्डोदकार्थे देयश्च भार्गीक्वाथः सुशीतलः।
शुद्धे कुम्भे निदध्याच्च संभारं तं सुरां ततः ॥४०॥
जातगन्धां जातरसां पाययेदातुरं भिषक्।

भार्गीशृते इत्यादि। भार्गीशृते क्षीरे शालितण्डुलपायसं पचेदिति संबन्धः। अत्र क्षीरसाधनविधिः—चतुर्थांशं भार्गीकल्कं दत्त्वा चतुर्गुणेन जलेन क्षीरं साधनीयम्। त्र्यहं शुद्धाय त्रिदिनमुपोषिताय वराहाय तं पायसं भोक्तुं प्रकल्पयेत् दद्यादित्यर्थः। मधुरीभूतं श्लेष्मसंसृष्टं विदाहावस्थामप्राप्तम्; अन्ये तु मधुरीभूतं विषीभूतमिति व्याख्यानयन्ति, यतो मधुरशब्दो विषे वर्तते। अथ पायसः कथं विषीभवतीति चेत्? सत्यं, आधारप्रभावात्। विषीभूतं वराहस्यैव लालास्रावमूर्च्छादिविषलिङ्गैर्ज्ञातव्यम्। तं वराहं, विशस्य हत्वा, अन्नं विषीभूतमुद्धरेत्। तस्य चूर्णस्येत्यादि। तस्य उद्धृतस्यान्नस्य शोषितचूर्णीकृतस्य त्रीन् भागान् किण्वभागेन संसृजेत् सुराबीजैकभागेन मिश्रयेत्। मण्डोदकार्थे सन्धानार्थे भार्गीक्वाथो देयः। अन्ये तु मण्डः सुरामण्डः, दकार्थे उदकार्थे भार्गीक्वाथश्च देय इति व्याख्यानयन्ति। शुद्धे कुम्भे इति कृतसंस्कारे चातुर्जातकघृतमधुपिप्पल्यादिविलिप्ते इत्यर्थः। पायसचूर्णकिण्वभागचतुष्टये भार्गीक्वाथस्तावानेव देयो यावता सम्यक् सुराभावं प्राप्नोति, तद्विदश्च कल्पपालाः प्रष्टव्याः। सुरानिष्पत्तिकालप्रमाणं च जातरसामित्यनेनोक्तम् ॥ ३८-४० ॥—

सिरां विध्येदथ प्राप्तां मङ्गल्यानि च धारयेत् ॥४१॥

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते भूतविद्यातन्त्रेऽपस्मारप्रतिषेधो नाम (द्वितीयोऽध्यायः, आदितः) एकषष्टितमोऽध्यायः ॥६१॥

---

१ 'कटुकामदयन्त्युग्रा' इति पा०।

१ 'कालवल्ली' इति पा०। २ 'नुदतीत्यर्थः' इति पा०। ३ 'पिप्पल्यन्तविलिप्ते' इति पा०।

सिरामित्यादि । प्रोक्तां उरोपाङ्गललाटजाम् । अन्ये तु प्राप्तामिति पठन्ति, हनुसन्धिमध्यगतामिति च व्याख्यानयन्ति। मङ्गल्यानि व्रणितोपासनीयोक्तानि छत्रातिछत्रादीनि । अपरे तु 'मङ्गल्यादि च कारयेत्' इति पठन्ति, तच्च मङ्गल्यमथर्ववेदविहितमिति व्याख्यानयन्ति ॥ ४१ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां
सुश्रुतव्याख्यायामुत्तरतन्त्रेऽपस्मारप्रतिषेधो
नामैकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः ।

अथात उन्मादप्रतिषेधमध्यायं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अपस्मारप्रतिषेधानन्तरं मनोगतसाम्यात्तुल्यचिकित्सितत्वादुन्मादप्रतिषेधारम्भः—अथात इत्यादि । अथात इत्यादिकं पूर्ववद्व्याख्येयम् ॥ १ ॥ २ ॥

मदयन्त्युद्ध(द्ध)ता दोषा यस्मादुन्मार्गमाश्रिताः[2] ।
मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः[3] ॥ ३ ॥

इदानीमुन्मादं निर्वक्ति—मदयन्तीत्यादि । मदयन्ति मनोभ्रमणं कुर्वन्ति । उद्धता उपचिताः । अन्ये 'उद्वृत्ता' इति पठन्ति; तत्र उद्वृत्ता उद्धत्ता उन्मार्गमागता मनोवहानि स्रोतांसि प्राप्ताः । यद्धृदयप्रदूषणं चेतोमोहनं च तन्त्रान्तरे प्रोक्तं, तदत्र उन्मार्गमागता इत्यनेन तथा मदयन्तीत्यनेन च संगृहीतमिति पृथङ्नोक्तम् । अपस्मारोक्तदोषप्रकोपहेतव उन्मादेऽपि सान्निध्याद्बोद्धव्या इति श्रीजेज्जटाचार्यः । उन्मादहेतवस्तन्त्रान्तरे यथा—"विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम् । उन्मादहेतुर्भयहर्षपूर्वो मनोभिघातो विषमाश्च चेष्टाः"—इति । प्रवृद्धा दोषा मनोवहस्रोतांसि प्राप्ताः सन्तो यस्मान्मनो भ्रमयन्ति, अतोऽयं मानसो व्याधिरिति संबन्धः ॥ ३ ॥

एकैकशः समस्तैश्च दोषैरत्यर्थमूर्च्छितैः ।
मानसेन च दुःखेन स पञ्चविध उच्यते ॥ ४ ॥
विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम् ।
स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्ति च ॥ ५ ॥

दोषैर्मनोदुःखेन च पञ्चविधमुन्मादमाह—एकैकशः समस्तैश्चेत्यादि । एकैकशो दोषैस्त्रयः, समस्तैर्दोषैरेकः, मानसदोषदुःखेन चैकः, एवं स उन्मादः पञ्चविध उच्यते । ननु, विषजोऽपि षष्ठोऽस्ति तत् किमिति सोऽपि स पञ्चविध इत्यत्रैव न निर्दिष्टः'? उच्यते—तस्य भिन्नचिकित्सितत्वात् पृथङ्निर्देशः । अत एवाह—यथास्वं तत्र भेषजमिति । स चाप्रवृद्ध इत्यादि ।—स उन्मादः, अप्रवृद्धोऽल्पलिङ्गः, तरुणोऽल्पमात्रः। कैश्चिन्मदशब्देन मदस्य प्रथमो वेग उच्यते[1]; ते तु रोगमेव रोगकारणं मन्यन्ते । अत्र तूत्पन्नमात्रस्याल्पलिङ्गस्य चोन्मादस्य मदसंज्ञा ॥ ४ ॥ ५ ॥

मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम् ।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम्[2] ॥ ६ ॥
वायुनोन्मथनं चापि भ्रमश्चक्रगतस्य वा[3] ।
यस्य स्यादचिरेणैव उन्मादं सोऽधिगच्छति ॥ ७ ॥

इदानीं पूर्वरूपमाह—मोहोद्वेगावित्यादि । मोहो मनसो वैचित्त्यम् । स्वनः श्रोत्रे कर्णयोः शब्दः । गात्राणामपकर्षणं दुर्बलीभवनम् । कलुषभोजनं[4] समलभोजनम् । वायुनोन्मथनमाकुलीकरणं, 'हृदयस्य' इति शेषः । चक्रगतस्य वेत्यत्र वाशब्द इवार्थे, तेन कुलालचक्रस्थितस्येव भ्रम इत्यर्थः । यस्य पुरुषस्य मोहोद्वेगादिकं स्यात्, सोऽचिरेणैव उन्मादमधिगच्छति प्राप्नोतीति संबन्धः । अचिरेणैव उन्मादमित्यत्र छन्दोभङ्गभयादसंहितानिर्देशः ॥ ६ ॥ ७ ॥

रूक्षच्छविः परुषवाग्धमनीततो वा
शीतातुरः[5] कृशतनुः स्फुरिताङ्गसन्धिः ।
आस्फोटयत्यटति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात् ॥ ८ ॥

पूर्वरूपानन्तरं वातजमुन्मादमाह—रूक्षच्छविरित्यादि । परुषवाक् कर्कशवचनः । धमनीततः सिराव्याप्तः । शीतातुरः शीतपीडित इत्यर्थः । 'श्वासातुर' इत्यन्ये पठन्ति । विक्रोशति रोदिति । भ्रमति कम्पते, अटतीत्यनेन चलनस्योक्तत्वात् । केचित् रूक्षच्छविरित्यादिश्लोकार्धं न पठन्ति; जेजटाचार्यास्तु रूक्षच्छविरित्यादिश्लोकार्धं पठन्ति, अनिलादिति सिद्धे अनिलप्रकोपादिति प्रकोपग्रहणात् पारुष्यकार्कश्यारुणवर्णता जीर्णे बलवत्त्वं च गृह्यते इति व्याख्यानयन्ति ॥ ८ ॥

तृट्स्वेददाहबहुलो बहुभुग्विनिद्र-
श्छायाहिमानिलजलान्तविहारसेवी ।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्ताद्दिवा नभसि पश्यति तारकाश्च ॥ ९ ॥

पित्तोन्मादमाह—तृट्स्वेदेत्यादि । तृट्स्वेददाहबहुल इति बहुलशब्दस्तृडादिभिः प्रत्येकं संबध्यते । सेवीशब्दश्छायादिभिः संबध्यते । जलान्तविहारसेवीति पानीयसमीपविचरणशील इत्यर्थः । तीक्ष्णः कोपनः । अपि चेति चकारात् पीतनयनत्वादि विज्ञेयम् । दिवा दिने । नभसि आकाशे ॥ ९ ॥

छर्द्यग्निसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रचारः ।
निद्रापरोऽल्पकथनोऽल्पभुगुष्णसेवी
रात्रौ भृशं भवति चापि कफप्रकोपात् ॥१०॥

कफोन्मादमाह—छर्द्यग्नीत्यादि । अग्निसादोऽग्निमान्द्यम् ।

१ 'रत्नखचितकुण्डलच्छत्रादीनि' इति पा० । २ 'उन्मार्गमाश्रिताः' इति पा० । ३ 'कीर्त्यते' इति पा० । ४ 'एकशोऽथ' इति पा० ।

१ 'यैस्तु मदः पृथग्रोगः कथितः' इति पा० । २ 'कलुषमज्जनम्' इति पा० । ३ 'भ्रमश्च क्रमतस्तथा' इति पा० । ४ 'कलुषमज्जनं समलजलमज्जनं' इति पा० । ५ 'श्वासातुरः' इति पा० ।

सदनमङ्गानामनुत्साहः । योषित्सु विविक्ते एकान्ते च रतिर्यस्य स योषिद्विविक्तरतिः । अल्पमतिप्रचार इति अल्पमतिरल्पप्रचारश्च । अल्पकथनोऽल्पभाषणः । रात्रौ भृशं भवति चेति चकारो रात्रौ इत्यस्याग्रे द्रष्टव्यः, तेन रात्रौ भुक्ते च भृशं भवतीति सिद्धम् । अपिशब्दाच्च नखादिशौक्ल्यादिकं ज्ञेयम् ॥ १० ॥

सर्वात्मके पवनपित्तकफा यथास्वं
संहर्षिता इव च लिङ्गमुदीरयन्ति ॥ ११ ॥

सान्निपातिकमाह—सर्वात्मके इत्यादि । सर्वात्मके सान्निपातिके उन्मादे पवनपित्तकफाः संहर्षिता इव यथास्वं लिङ्गमुदीरयन्तीति संबन्धः । संहर्षिता इवेति स्पर्धावन्त इव सर्वेऽप्यतिशयेन कुपिता इत्यर्थः । अयं पाठो निबन्धकारैः पठितो व्याख्यातश्च । अन्ये त्वेवं पठन्ति,—'सर्वात्मके त्रिभिरपि व्यतिमिश्रितानि रूपाणि वातकफपित्तकृतानि विद्यात् । संपूर्णलक्षणमसाध्यमुदाहरन्ति सर्वात्मकं क्वचिदपि प्रवदन्ति साध्यम्' इति । अयं च श्रीजेज्जटेनैकीयमतेन दर्शितो न तु व्याख्यातः, तस्मादेकीयमतेनैवास्य संबन्धः कथ्यते । प्रत्येकं वातादिकृतानि रूपाणि व्यतिमिश्रितानि सर्वात्मके उन्मादे विद्यादिति संबन्धः । एवं संबन्धे त्रिभिरपीत्यनेन किं प्रयोजनं ? उच्यते—त्रिभिरपि स्वहेतुभिः कुपितैरिति ज्ञापनार्थम् । अस्याग्रे त एवं पठन्ति 'संपूर्णलक्षणमसाध्यमुदाहरन्ति सर्वात्मकं क्वचिदपि प्रदिशन्ति साध्यम्' इति ॥ ११ ॥

चौरैर्नरेन्द्रपुरुषैररिभिस्तथाऽन्यै-
र्वित्रासितस्य धनबान्धवसंक्षयाद्वा ।
गाढं क्षते मनसि च प्रियया रिरंसो-
र्जायेत चोत्कटतरो मनसो विकारः ॥ १२ ॥

मनोदुःखजमुन्मादं प्रतिपादयितुकामः पूर्वं मनसो दुःखकरान् हेतून् विकारोत्पत्तिसहितानाह—चौरैरित्यादि । अरिभिः शत्रुभिः, तथाऽन्यैरिति अतिशयरौद्रैरकारणवैरिभिः शार्दूलादिभिर्वा । गाढमत्यर्थं, क्षते पीडिते, प्रियया रिरंसोः प्रियया सह रन्तुमिच्छोः; 'तस्या अप्राप्तौ' इत्यध्याहार्यम् । मनसि गाढं क्षते इति बोध्यम् । मनसो विकारो मानस उन्मादः ॥ १२ ॥

चित्रं स जल्पति मनोनुगतं विसंज्ञो
गायत्यथो हसति रोदिति मूढसंज्ञः[1] ।

तस्य लक्षणमाह—चित्रमित्यादि । चित्रं नानाप्रकारम् । मनोनुगतमिति यदेवास्य मनसि स्थितं तदबुद्धिपूर्वकं यत्किंचिदेव जल्पति । मनोनुगतं विसंज्ञो गायति उद्भ्रान्तस्मृतित्वाद्विसंज्ञो गायति; विसंज्ञो विपरीतसंज्ञः, नतु विगतसंज्ञः, भाषणगानादिकरणात् । मूढसंज्ञ इति च पदं हेतुफलभावेन समर्थनीयम्[2] ॥—

रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः
श्यावाननो विषकृतेऽथ भवेत् परासुः[3] ॥१३॥

विषोन्मादमाह—रक्तेक्षण इत्यादि । हतबलेन्द्रियभा इति बलमुत्साहोपचयलक्षणम्, इन्द्रियाणि चक्षुरादीनि, भाः कान्तिः । अन्ये तु 'हतबलेन्द्रियवाक्' इति पठन्ति, व्याख्यानयन्ति च—वागित्युपादानमत्यर्थं वागुपघातसूचनार्थम्, अन्यथेन्द्रियग्रहणेनैव सिद्धेः । सुदीनः सुष्ठु ग्लानः । श्यावानन इति धवलकपिलकृष्णमिश्रवर्णमुखः । अथ भवेत् परासुरिति उपेक्षणान्म्रियत इत्यर्थः । अन्ये 'विषकृतेन भवेद्विसंज्ञः' इति पठन्ति; तत्र विसंज्ञो विपरीतसंज्ञः; विषमत्र दूषीविषम् ॥ १३ ॥

स्निग्धं स्विन्नं तु मनुजमुन्मादार्तं विशोधयेत् ।
तीक्ष्णैरुभयतोभागैः शिरसश्च विरेचनैः ॥ १४ ॥
विविधैरवपीडैश्च सर्षपस्नेहसंयुतैः ।
योजयित्वा तु तच्चूर्णं घ्राणे तस्य प्रयोजयेत् १५

निदानं निर्दिश्य चिकित्सामाह—स्निग्धमित्यादि । तीक्ष्णैरुभयतोभागैरिति विषाणिकादेवदालिकाकारवेल्लिकादिभिः । शिरसश्च विरेचनैरिति विडङ्गतण्डुलादिभिः । विविधैर्नानाप्रकारैः । अवपीडैर्नस्यभेदैः । चेतोविकारशमनैरमानुषोपसर्गप्रतिषेधोक्तैः । सर्षपस्नेहसंयुतैरवपीडैरित्यर्थः । योजयित्वेति उन्मादार्तं । तु पुनः । तच्चूर्णं सर्षपस्नेहसंयुक्तम् । उन्मादार्तस्य वमनादिना हृदयकोष्ठेन्द्रियशिरःशुद्धौ मनःप्रसादात् स्मृतिसंज्ञालाभादुन्मादोपशम इति व्यपदेशः ॥ १४ ॥ १५ ॥

सततं धूपयेच्चैनं श्वगोमांसैः सुपूतिभिः ।
सर्षपाणां च तैलेन नस्याभ्यङ्गौ[1] हितौ सदा ॥१६॥

धूपनस्याभ्यङ्गानाह—सततमित्यादि । एनमुन्मादार्तम् । सुपूतिभिः सुष्ठु शटितैः । शटितैश्चापि धूपनेन मनः प्रकृतिमायाति, प्रभावात् ॥ १६ ॥

दर्शयेदद्भुतान्यस्य वदेन्नाशं प्रियस्य वा ।
भीमाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्विषैः ॥ १७ ॥
भीषयेत् संयतं पाशैः कशाभिर्वाऽथ ताडयेत् ।
यन्त्रयित्वा सुगुप्तं वा त्रासयेत्तं तृणाग्निना ॥१८॥
जलेन तर्जयेद्वाऽपि रज्जुघातैर्विभावयेत् ।
बलवांश्चापि संरक्षेत् जलेऽन्तः परिवासयेत् ।
प्रतुदेदारया चैनं मर्माघातं विवर्जयेत् ।
वेश्मनोऽन्तः प्रविश्यैनं रक्षंस्तद्वेश्म दीपयेत् १९
सापिधाने जरत्कूपे[2] सततं वा निवासयेत् ।

दर्शयेदित्यादि । अद्भुतानि अदृष्टपूर्वाणि भीषणानि । अस्य उन्मादार्तस्य । नाशं विनाशं प्रियस्य वस्तुनो वदेत् । भीमाकारैः रौद्ररूपैः । नागैर्हस्तिभिः । दान्तैः शिक्षावद्भिः । व्यालैः सर्पैः । निर्विषैः गोनसादिभिः । भीषयेत् भयमुत्पादयेत् । पाशैर्निगडादिभिः । संयतं बद्धम् । कशाभिश्चर्मयष्टिभिः । निगडादिबन्धनं भ्रान्तमनसः कूपाग्न्यादिप्रवेशनिरासार्थं क्रियासुखकरत्वार्थं च । प्रतुदेत् व्यथयेत् । आरया तीक्ष्णाग्रया शलाकया । एनमुन्मादिनं, वेश्मनो गृहस्य, अन्तर्मध्ये, प्रवेश्य रक्षन्, तद्वेश्म दीपयेत् प्रज्वालयेत् । कूपे निर्जले जलेन वर्जिते । जलेन तर्जयेद्वाऽपीति तप्तेनेति द्रष्टव्यं, तप्तमपि विशेष-

१ 'चापि मूढः' इति पा० । २ 'संबन्धनीयम्' इति पा० ।
३ 'विषकृते च भवेद्विसंज्ञः' इति पा० ।

१ 'नस्यं' इति पा० । २ 'कूपे चक्रपिधाने वा' इति पा० ।

वृत्तेः; यत उक्तं तन्त्रान्तरे–"कपिच्छ्वाऽथवा तप्तैर्लोहतैलजलैः स्पृशेत्–" इति ॥ १७-१९ ॥—

त्र्यहाद्त्र्यहाद्यवागूश्च तर्पणान् वा प्रदापयेत् ॥ २० ॥
केवलानम्बुयुक्तान् वा कुल्माषान् वा बहुश्रुतः ।
हृद्यं यद्दीपनीयं च तत्पथ्यं तस्य भो(यो)जयेत् २१
(विडङ्गत्रिफलामुस्तमञ्जिष्ठादाडिमोत्पलैः ।
श्यामैलवालुकैलाभिश्चन्दनामरदारुभिः ॥ २२ ॥
बर्हिष्ठरजनीकुष्ठपर्णिनीसारिवाद्वयैः ।
हरेणुकात्रिवृद्दन्तीवचातालीशकेशरैः ॥ २३ ॥
द्विक्षीरं साधितं सर्पिर्मालतीकुसुमैः सह ।
गुल्मकासज्वरश्वासक्षयोन्मादनिवारणम् ॥ २४ ॥
एतदेव हि संपक्वं जीवनीयोपसंभृतम् ।
चतुर्गुणेन दुग्धेन महाकल्याणमुच्यते ॥ २५ ॥
अपस्मारं ग्रहं शोषं क्लैव्यं कार्श्यमबीजताम् ।
घृतमेतन्निहन्त्याशु ये चादौ गदिता गदाः ॥ २६ ॥
बर्हिष्ठकुष्ठमञ्जिष्ठाकट्वङ्कैलानिशाह्वयैः ।
तगरत्रिफलाहिङ्गुवाजिगन्धामरद्रुमैः ॥ २७ ॥
वचाजमोदाकाकोलीमेदामधुकपद्मकैः ।
सशर्करं हितं सर्पिः पक्वं क्षीरचतुर्गुणम् ॥ २८ ॥
बालानां ग्रहजुष्टानां पुंसां दुष्टाल्परेतसाम् ।
ख्यातं फलघृतं स्त्रीणां वन्ध्यानां चाशु गर्भदम् ॥)

आहारं निर्दिशन्नाह–त्र्यहादित्यादि । त्र्यहादेकान्तरेणेत्यर्थः । तर्पणान् केवलान् सक्तूनम्बुना युक्तान् दद्यादिति संबन्धः । अन्ये तर्पणमिति पठित्वा तर्पणं लाजा इति व्याख्यानयन्ति । कुल्माषान् वेति यवपिष्टमयान् भक्ष्यान् । अत्र यवाग्वाद्युपदेशो मध्यमन्दबलवदग्निसात्म्याद्यपेक्षया । बहुश्रुतो बहुविचक्षणो भिषक् । हृद्यं हृदयहितं यत् तत् स्रोतःशुद्ध्यर्थं देयम् । अस्याग्रे केचित् कल्याणकं पठन्ति; तन्न, ज्वरप्रतिषेधे तस्य पठितत्वात्; अत्र त्वतिक्रान्तावेक्षणतन्त्रयुक्त्याऽतिदेष्टव्यं फलघृतमिति केचित् पठन्ति; तच्च न पठनीयं, सर्वनिबन्धकारैर्निषिद्धत्वात् ॥ २०-२९ ॥

ब्राह्मीमैन्द्रीं विडङ्गानि व्योषं हिङ्गु सुरां जटाम् ।
विषघ्नीं लशुनं रास्नां विशल्यां सुरसां वचाम् ३०
ज्योतिष्मतीं नागरं च अनन्तामभयां तथा ।
सौराष्ट्रीं च समांशानि गजमूत्रेण पेषयेत् ॥ ३१ ॥
छायाविशुष्कास्तद्वर्तीर्योजयेद्विधिकोविदः ।
अवपीडेऽञ्जनेऽभ्यङ्गे नस्ये धूमे प्रलेपने ॥ ३२ ॥

ब्राह्मीत्यादि । ब्राह्मी मण्डूकपर्णी, अन्ये लवणिकामाहुः । ऐन्द्री इन्द्रवारुणी, अन्ये मत्स्याक्षकभेदमाहुः । सुरा सुराह्वं, अन्तलोपात्; अन्ये तु इन्द्रसुरा इन्द्रवारुणी, इन्द्रशब्दलोपात् । जटा जटामांसी । विषघ्नी हरिद्रा, अन्ये निर्विषामाहुः । विशल्या गुडूची । सुरसा तुलसी । ज्योतिष्मती काकमर्दनी । नागरं शुण्ठी । अत्रान्ये 'नागविन्नाम्' इति पठन्ति, नागविन्ना इन्द्रवारुणीभेदः, वृश्चिकपत्रिकेत्यपरे । अनन्ता उत्पलसारिवा । अभया हरीतकी । सौराष्ट्री तुवरिका । विधिकोविदो विधिज्ञो वैद्यः ॥ ३०-३२ ॥

उरोपाङ्गललाटेषु सिराश्चास्य विमोक्षयेत् ।

उरोपाङ्गेत्यादि । उरः स्तनयोरन्तरालम् । अत्रापाङ्गशब्दः शङ्खे वर्तते, सामीप्यात्; नत्वपाङ्गः शङ्खसन्धिः; कुतः ? तत्रैकस्या एव व्यध्यसिराया निर्दिष्टत्वात् । अस्य उन्मादिनः । भूतविद्यासिद्धान्तादुरःप्रभृतिषु सिराव्यधनमुक्तं, सिराव्यधविधितश्च शङ्खसन्धौ; अतोऽत्र उन्मादे उभयत्रापि सिराव्यधनमिष्टम् ।—

अपस्मारक्रियां चापि ग्रहोद्दिष्टां च कारयेत् ॥ ३३ ॥

इदानीमतिदेशचिकित्सितमाह—अपस्मारेत्यादि । अत्रापस्मारक्रियाया अतिदेशेन वातादिजोन्मादचिकित्सितं प्राप्तं, अतोऽत्र चिकित्सादौ पृथग्दोषजचिकित्सितं नोक्तम् । एवमन्यदप्यनुक्तं पूरणीयम् ॥ ३३ ॥

शान्तदोषं विशुद्धं च स्नेहबस्तिभिराचरेत् ।

शान्तदोषमित्यादि । शान्तदोषं शान्तोन्मादं, विशुद्धं वमनादिना, स्नेहबस्तिभिराचरेदिति पुनरुन्मादोद्गमनिषेधार्थम् ॥—

उन्मादेषु च सर्वेषु कुर्याच्चित्तप्रसादनम् ।
मृदुपूर्वां मदेऽप्येवं क्रियां सूक्ष्मीं प्रयोजयेत् ॥ ३४ ॥
शोकशल्यं व्यपनयेदुन्मादे पञ्चमे भिषक् ।
विषजे मृदुपूर्वां च विषघ्नीं कारयेत् क्रियाम् ३५

इति सुश्रुतसंहितायामुत्तरतन्त्रान्तर्गते भूतविद्यातन्त्रे उन्मादप्रतिषेधो नाम (तृतीयोऽध्यायः, आदितः) द्विषष्टितमोऽध्यायः ॥ ६२ ॥

उन्मादेष्वित्यादि । मृदुपूर्वां मृदुसंशोधनपूर्वां, क्रियां सूक्ष्मीं मृद्वञ्जनाभ्यञ्जनादिकां, प्रयोजयेदिति संबन्धः । एवं पूर्वप्रकारेणेत्यर्थः । शोकशल्यं व्यपनयेदित्यादि व्यपनयेदिति इष्टप्राणसान्त्वनाश्वासनादिभिः । पञ्चमे मनोदुःखजे । विषजे मृदुपूर्वामित्यादि । मृदुपूर्वां मृदुशोधनपूर्वां, विषघ्नीं क्रियां कल्पोपदिष्टां, कारयेदिति ॥ ३४ ॥ ३५ ॥

निबन्धान् निखिलान् दृष्ट्वा वैद्यः श्रीभरतात्मजः ।
भूतविद्यासदं स्पष्टं चक्रे श्रीडल्हणः सुधीः ॥ १ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे उन्मादप्रतिषेधो नाम द्विषष्टितमोऽध्यायः समाप्तः ॥ ६२ ॥

---

१ 'दद्यात्सक्तूञ्जलेन वा' इति पा० । २ 'अहः अहः स्थित्वा यवागूं सक्तून् वा केवलानम्बुनाऽऽक्तान् दद्यात्' इति पा० । ३ 'नागविन्नां' इति पा० । ४ 'अजामूत्रेण' इति पा० ।

१ 'भूतविद्याप्रतिपादिते उरःप्रभृतिष्वित्यत्रापाङ्गशब्देन सामीप्याच्छङ्खे सिराव्यधनमुक्तं, न तु नेत्रान्ते एव, तत्र सिराव्यधनिषेधात् । सिराव्यधविधितश्चापाङ्गसमीपे' इति पा० । २ 'वैद्यश्रीभरताङ्गभूः' इति पा० ।

त्रिषष्टितमोऽध्यायः ।

अथातो रसभेदविकल्पमध्यायं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अथ भूतविद्यां परिसमाप्य औपद्रविके तन्त्रभूषणानां रसभेदादीनामध्यायानां सूचितत्वात् तन्त्रभूषणानारब्धुकामस्तन्त्रोक्तक्रमानुसारेण रसभेदविकल्पाध्यायमाह—अथात इत्यादि । अथात इत्यादि पूर्ववद्व्याख्येयम्[1] । रसभेदविकल्पमिति रसा मधुरादयः पूर्वं व्याख्याताः, रसानां भेदेन द्वित्रिकादिभेदेन विकल्पो विभजनं यस्मिन् स तथा, अथवा रसभेदानां विकल्पो दोषभेदवशादवचारणं यस्मिन् स तथा, तम् ॥ १ ॥ २ ॥

दोषाणां पञ्चदशधा प्रसरोऽभिहितस्तु यः ॥
त्रिषष्ट्या रसभेदानां तत्प्रयोजनमुच्यते ॥ ३ ॥

रसभेदकथने प्रयोजनमाह—दोषाणामित्यादि । यः पञ्चदशप्रकारो व्रणप्रश्नाध्याये दोषाणां प्रसर उक्तः, तद्रसभेदानां त्रिषष्ट्याः प्रयोजनमुच्यत इति संबन्धः । अत्र पञ्चदशधेत्युपलक्षणं, तेन दोषभेदानां त्रिषष्टिरपि गृह्यते । अयमभिप्रायः—त्रिषष्टिप्रकाराणामपि दोषभेदानामुपयोगार्थं[2] रसभेदा उक्ताः ॥ ३ ॥

अविदग्धा विदग्धाश्च भिद्यन्ते ते त्रिषष्टिधा ।
रसभेदत्रिषष्टिं[3] तु वीक्ष्य वीक्ष्यावचारयेत् ॥ ४ ॥

कीदृशा रसास्त्रिषष्टिभेदान्[4] यान्तीत्याह—अविदग्धा इत्यादि । अविदग्धा असंयुक्ता एकाकिनः समवायतो भिद्यन्त इत्यर्थः । विदग्धाः संयोगतः समवायतश्च संयुक्ता रसान्तरसंयोगाद्भिद्यन्ते । विदग्धशब्दः संयुक्ते वर्तते, धातूनामनेकार्थत्वात् । भिद्यन्ते एकैकेनानुगमनाद्भेदं यान्तीत्यर्थः । ते रसाः । तत्र यथासंभवं केचित् संयोगतः केचित् समवायतश्च भिद्यन्ते । संयुक्ता यथा—बदरकपित्थफलादिकं मधुराम्लं (१), उष्ट्रीक्षीरोरभ्रमांसादिकं मधुरलवणं (२), कुक्कुर[5]श्रृगालमांसादिकं मधुरकटुकं (३), श्रीवाससर्जरसादिकं मधुरतिक्तं (४), तैलधन्वनफलादिकं मधुरकषायं (५); ऊषकादिकमम्ललवणं (६), चुक्रादिकमम्लकटुकं (७), सुरादिकमम्लतिक्तं (८), हस्तिनीदधिशुकमांसादिकमम्लकषायं (९); त्रपुसीसादिकं लवणतिक्तं (१०), गोमूत्रस्वर्जिकादिकं लवणकटुकं (११), समुद्रफेनादिकं लवणकषायं (१२); कर्पूरजातीफलादिकं तिक्तकटुकं (१३), लवलीफलहस्तिनीघृतादिकं तिक्तकषायं (१४); भल्लातकमज्जाहरितालादिकं कटुकषायम् (१५); एवं द्विरसभेदाः[6] पञ्चदशधा दर्शिताः । अतः परं रसत्रितय[7]भेदा वक्ष्यन्ते—हस्तिमांसादिकं मधुराम्ललवणं (१), शल्यकमांसादिकं मधुराम्लकटुकं (२), गोधूमोत्थसुरादिकं मधुराम्लतिक्तकं (३), मस्तु[1]तक्रादिकं मधुराम्लकषायं (४); काणकपोतमांसादिकं मधुरलवणकटुकं (५), शम्बूकादिमांसं मधुरलवणतिक्तं (६), पद्मकन्दादिकं गुडसंयुक्तं मधुरलवणकषायं (७), तृणशून्याफलशुष्ककुस्तुम्बर्यादिकं मधुरकटुतिक्तकं (८), गोधामांसैरण्डतैलादिकं मधुरकटुकषायं (९), गुडूचीशाखामृगामिषरतुवरकतैलादिकं मधुरतिक्तकषायं (१०), रौप्यशिलाजत्वादिकमम्ललवणकटुकं (११), हस्तिमूत्रादिकमम्ललवणतिक्तं (१२), सरोमकं हस्तिनीदध्यादि अम्ललवणकषायं (१३), मरिचसंस्कृतसुरादिकमम्लकटुतिक्तकं (१४), अम्लवेतसादिकमम्लकटुकषायं (१५), कीरमांसयुतसुरादिकमम्लतिक्तकषायं (१६), अविमूत्रादिकं लवणकटुतिक्तं (१७), अरुष्करं सरोमकं लवणकटुकषायं (१८), समुद्रफेनाविकं लवणतिक्तकषायं (१९), कृष्णागरुसुरदारुस्नेहादिकं कटुतिक्तकषायं (२०); एवं त्रिकभेदा विंशतिर्दर्शिताः । अतः परं चतुःसंयोगाः पञ्चदशप्रकारा वक्ष्यन्ते—गोमूत्रान्वितशिलाजतुप्रभृतिकं मधुराम्ललवणकटुकं (१), गोमूत्रैकशफक्षीरादिकं मधुराम्ललवणतिक्तकं (२), सैन्धवान्विततक्रादिकं मधुराम्ललवणकषायं (३), लशुनान्वितं सुरादिकं मधुराम्लकटुतिक्तं (४), काञ्जिकान्वितैरण्डतैलादि खदिरान्वितशिलाह्वादिकं च मधुराम्लकटुकषायं (५), उदुम्बरान्वितं यवासशर्करादिकं मधुराम्लतिक्तकषायं (६), वार्ताकफलादिकं मधुरलवणतिक्तकटुकं (७), गोमूत्रान्विततैलादिकं मधुरलवणकटुकषायं (८), तिलगुग्गुल्वादिकं मधुरकटुतिक्तकषायं (९), समुद्रफेनशर्करान्चित्रकान्वितबदर्यादि मधुरलवणतिक्तकषायं (१०), सुवर्चलान्वितहस्तिनीदध्यादिकृतसुरादिकमम्ललवणकटुतिक्तं (११), सौवर्चलान्वितहस्तिनीदध्यादिकमम्ललवणकटुकषायं (१२), औद्भिदलवणान्वितं शुकमांसादिकमम्ललवणतिक्तकषायं (१३), बालमूलकहस्तिनीदध्यादिकमम्लकटुतिक्तकषायं (१४) सरोमकं बालबिल्वादिकं लवणकटुतिक्तकषायं (१५); एवं चतुष्करससंयोगाः पञ्चदश कथिताः । अतः परं पञ्चरससंयोगाः षड् वक्ष्यन्ते—आमकरमर्दान्वितं भृष्टवार्ताकफलादिकं मधुराम्ललवणतिक्तकषायं (१), कटुत्रययवक्षारान्विततक्रादिकं मधुराम्ललवणकटुकषायं (२), औद्भिदान्विततक्रादिकं मधुराम्ललवणतिक्तकषायं (३), हरीतकीधात्रीफलादिकं मधुराम्लकटुतिक्तकषायं (४), रसोनादिकं मधुरलवणकटुतिक्तकषायं (५), भल्लातकरौप्यशिलाजतुमिश्रितनिम्बादिकमम्ललवणकटुतिक्तकषायं (६); एवं पञ्चरससंयोगाः षड् दर्शिताः । अतः परं षड्रसं वक्ष्यते—एणमांसादिकं मधुराम्ललवणकटुतिक्तकषायम् । अतः परमेकैकरसानाह—सन्तानिकागोदुग्धादिकं मधुरं, (१) आमकरमर्दादिकमम्लं

१ 'अथादयः पूर्ववद्व्याख्येयाः' इति पा० । २ 'रसभेदानामुपयोगार्थं दोषभेदा उक्ताः' इति पा० । ३ 'त्रिषष्टिभेदं' इति पा० । ४ 'समवायतो द्विकादिभेदेन रसद्रव्यान्तरद्वारेण कथ्यन्ते' इति पा० । ५ 'कुङ्कुमकेशरश्रृगालमांसादिकं' इति पा० । ६ 'द्विरसयोनयः' इति पा० । ७ 'रसत्रिकसंयोगो वक्ष्यते' इति पा० ।

१ 'सिञ्चितिकाफलादिकं' इति पा० । २ 'कटुकासंस्कृतगुडादिकं' इति पा० । ३ 'मथितसंस्कृतसुरादिकं' इति पा० । ४ 'आर्घ्यादिकं' इति पा० । ५ 'शिलाजतुप्रभृतिकं' इति पा० । ६ 'समुद्रफेनसंयुक्तं चन्दनं मधुरलवणतिक्तकषायम्' इति पा० । ७ 'सुवर्चलासंयुक्तलवणाद्यन्वितमदिरादिकं' इति पा० ।

(२), रोमकादिकं लवणं (३), चव्यादिकं कटुकं (४), निम्बपर्पटादिकं तिक्तं (५), पद्मन्यग्रोधाद्यङ्कुरादिकं कषायं (६); एवं षट् कथिताः । अनेन प्रकारेण त्रिषष्टिः कथिताः । कार्तिककुण्डस्त्वमुं पाठमन्यथा आपातनिकां कृत्वा व्याख्यानयति; तद्यथा—दोषाणां पञ्चदशधा प्रसरो भेदः, तस्य बहुभिस्त्रिषष्टिरसभेदैः सह प्रयोगो दुर्घटः, अतो दोषभेदानामपि बहुत्वमाह—अविदग्धा इत्यादि । अविदग्धा अप्रकुपिताः, विदग्धाः कुपिता दोषाः; यद्यस्मिन् पाठे दोषाणां त्रिषष्टिभेदा उक्ताः, तर्हि पूर्वपाठे पञ्चदशधा प्रसरः किमित्युक्तः? सत्यं, कुपितदोषस्यात्यन्तचिकित्सनीयत्वापादनार्थम्; अन्यद्ग्रन्थगौरवभयात् परित्यक्तम् ॥ ४ ॥

एकैकेनानुगमनं भागशो यदुदीरितम्[1] ।
दोषाणां, तत्र मतिमान् त्रिषष्टिं तु प्रयोजयेत् ५

पूर्वमविदग्धा विदग्धाश्च रसा एकैकेनानुगमनाद्भिद्यन्त इत्युक्तं तदेव स्मारयति—एकैकेनानुगमनमित्यादि । भागशः अंशांशतया । रसानामेकैकेनानुगमनं प्रवर्तनं यदुदीरितमस्मिन्नध्याये भणितं, तद्वशात्ते रसास्त्रिषष्टिधा भिद्यन्त इति पूर्ववाक्येन सह संबन्धः । तां च रसभेदत्रिषष्टिं, मतिमान् ऊहापोहविद्वैद्यः, तत्र दोषभेदेषु प्रयोजयेत् । सतिमानिति पदाद्यादृशा एव दोषाणां हीनाधिकभावेन भेदास्तादृशा एव रसभेदा योज्या इति सूचयति । अन्ये तु 'एवमेवानुगमनं' इति पठित्वा दोषाणामेवं भागशोंऽशांशबलविकल्पैनैकं प्रत्येकस्यानुगमनं दोषभेदीये यदुदीरितं तत्र रसभेदत्रिषष्टिं योजयेदिति । यद्यपि दोषभेदीये यद्वक्ष्यते इति सुन्दरं नतु यदुदीरितमिति, तथाऽपि भाविनि भूतवदुपचाराद्दोषभेदीये यदुदीरितमिति कृतम् । अपरेऽत्रामुं पाठमन्यथा पठित्वा बहु जल्पन्ति, तच्च ग्रन्थगौरवभयाच्छिष्यबुद्धिव्याकुलहेतुत्वाच्च परित्यक्तम् ॥ ५ ॥

यथाक्रमप्रवृत्तानां द्विकेषु मधुरो रसः[2] ।
पञ्चानुक्रमते योगानम्लश्चतुर एव तु ॥ ६ ॥
त्रींश्चानुगच्छति रसो लवणः कटुको द्वयम् ।
तिक्तः कषायमन्वेति ते द्विका दश पञ्च च ॥७॥

तद्यथा—मधुराम्लः १, मधुरलवणः २, मधुरकटुकः ३, मधुरतिक्तः ४, मधुरकषायः ५, एते पञ्चानुक्रान्ता मधुरेण; अम्ललवणः १, अम्लकटुकः २, अम्लतिक्तः ३, अम्लकषायः ४, एते चत्वारोऽनुक्रान्ता अम्लेन; लवणकटुकः १, लवणतिक्तः २, लवणकषायः ३, एते त्रयोऽनुक्रान्ता लवणेन; कटुतिक्तः १, कटुकषायः २, द्वावेतावनुक्रान्तौ कटुकेन; तिक्तकषायः १ एक एवानुक्रान्तस्तिकेन; एवमेते पञ्चदश द्विकसंयोगा व्याख्याताः[3] ८

इदानीं रसभेदत्रिषष्टिं ग्रन्थेनैव विवृण्वन्नाह—यथाक्रममित्यादि । यथाक्रमप्रवृत्तानामिति मधुरादिक्रमप्रवृत्तानां रसानामित्यर्थः । द्विकेषु द्विकसंयोगेषु । अनुक्रमते अनुगच्छति अनुगतो भवतीत्यर्थः । दश पञ्चेति पञ्चदशेत्यर्थः । यद्यपि सूत्रस्थाने रसविशेषविज्ञानीयाध्याये पञ्चदश द्विका इत्यादिना द्विकसंयोगादीनां संख्या उक्ताः, तथाऽपि पुनरत्र संख्याकरणं नियमार्थम् । तेन इयन्त एव रसभेदा गणनीया न तन्त्रान्तरोक्तास्तरतमयोगादिजा इत्यर्थः । तेषामेव द्विकानां पञ्चदशसंख्याकानामुदाहरणान्याह—तद्यथेत्यादि । मधुराम्लौ विद्येते यत्र संयोगे स मधुराम्लः । एवं शेषेष्वपि ज्ञेयम् ॥ ६–८ ॥

त्रिकान् वक्ष्यामः—

आदौ प्रयुज्यमानस्तु मधुरो दश गच्छति ।
षडम्लो लवणस्तस्मादर्धमेकं तथा कटुः ॥ ९ ॥

तद्यथा-मधुराम्ललवणः १, मधुराम्लकटुकः २, मधुराम्लतिक्तः ३, मधुराम्लकषायः ४, मधुरलवणकटुकः ५, मधुरलवणतिक्तः ६, मधुरलवणकषायः ७, मधुरकटुकतिक्तः ८, मधुरकटुकषायः ९, मधुरतिक्तकषायः १०, एवमेषां दशानां त्रिकसंयोगानामादौ मधुरः प्रयुज्यते; अम्ललवणकटुकः १, अम्ललवणतिक्तः २, अम्ललवणकषायः ३, अम्लकटुतिक्तः ४, अम्लकटुकषायः ५, अम्लतिक्तकषायः ६, एवमेषां षण्णामादावम्लः प्रयुज्यते; लवणकटुतिक्तः १, लवणकटुकषायः २, लवणतिक्तकषायः ३, एवमेषां त्रयाणामादौ लवणः प्रयुज्यते; कटुतिक्तकषायः १, एवमेकस्यादौ कटुकः प्रयुज्यते; एवमेते त्रिकसंयोगा विंशतिर्व्याख्याताः ॥ १० ॥

आदावित्यादि । दशेति दशयोगानित्यर्थः । तस्मादर्धमिति त्रीनित्यर्थः । तेषामेव त्रिकानां विंशतिसंख्याकानामुदाहरणान्याह—मधुराम्लेत्यादि । मधुराम्ललवणा विद्यन्ते यत्र स मधुराम्ललवणः । एवं शेषेष्वपि व्याख्येयम् ॥ ९ ॥ १० ॥

चतुष्कान् वक्ष्यामः ।—

चतुष्करससंयोगान्मधुरो दश गच्छति ।
चतुरोऽम्लोऽनुगच्छेच्च लवणस्त्वेकमेव तु ॥ ११ ॥

मधुराम्ललवणकटुकः १, मधुराम्ललवणतिक्तः २, मधुराम्ललवणकषायः ३, मधुराम्लकटुकतिक्तः ४, मधुराम्लकटुकषायः ५, मधुराम्लतिक्तकषायः ६, मधुरलवणकटुकतिक्तः ७, मधुरलवणकटुकषायः ८, मधुरलवणतिक्तकषायः ९, मधुरकटुतिक्तकषायः १०, एवमेषां दशानामादौ मधुरः प्रयुज्यते; अम्ललवणकटुतिक्तः १, अम्ललवणकटुकषायः २, अम्ललवणतिक्तकषायः ३, अम्लकटुतिक्तकषायः ४, एवमेषां चतुर्णामादावम्लः; लवणकटुतिक्तकषायः १, एवमेकस्यादौ लवणः; एवमेते चतुष्करससंयोगाः पञ्चदश कीर्तिताः ॥ १२ ॥

[1] 'एकैकेनानुगमनाद्भागशो य उदीरिताः' इति पा० । [2] 'रसानां' इति पा० । [3] 'एवमेते पञ्चदश द्विकाः' इति पा० ।

१ 'रसः' इति पा० ।

चतुष्कानित्यादि। दशेति 'योगान्' इति शेषः। तेषां चतुष्करससंयोगे पञ्चदशसंख्याकानामुदाहरण्यान्याह—मधुराम्लेत्यादि। मधुराम्ललवणकटुका विद्यन्ते यत्र योगे स मधुराम्ललवणकटुकः; एवं शेषेष्वपि ॥ ११ ॥ १२ ॥

पञ्चकान् वक्ष्यामः—

पञ्चकान् पञ्च मधुर एकमम्लस्तु गच्छति ॥ १३ ॥

मधुराम्ललवणकटुतिक्तः १, मधुराम्ललवणकटुकषायः २, मधुराम्ललवणतिक्तकषायः ३, मधुराम्लकटुतिक्तकषायः ४, मधुरलवणकटुतिक्तकषायः ५, एवमेषां पञ्चानामादौ मधुरः प्रयुज्यते; अम्ललवणकटुतिक्तकषायः १, एवमेकस्यादावम्लः; एवमेते षट् पञ्चकसंयोगा व्याख्याताः ॥ १४ ॥

पञ्चकानित्यादि। पञ्चकानिति पञ्चरससमूहान्। पञ्चेति पञ्चसंख्याकान् 'योगान्' इति शेषः। तेषामेव षण्णामुदाहरणान्याह—मधुराम्लेत्यादि ॥ १३ ॥ १४ ॥

षट्कमेकं वक्ष्यामः; एकस्तु षट्कसंयोगः—मधुराम्ललवणकटुतिक्तकषायः; एष एक एव षट्संयोगः ॥ १५ ॥

तस्य षट्कस्योदाहरणमाह—मधुराम्लेत्यादि ॥ १५ ॥

एकैकश्च षड्रसा भवन्ति—मधुरः १, अम्लः २, लवणः ३, कटुकः ४, तिक्तः ५, कषायः ६, इति ॥ १६ ॥

एषामुदाहरणान्याह—मधुरेत्यादि ॥ १६ ॥

भवति चात्र[1]।

एषा त्रिषष्टिर्व्याख्याता रसानां रसचिन्तकैः[2]।
दोषभेदत्रिषष्ट्यां तु प्रयोक्तव्या विचक्षणैः ॥ १७ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे तन्त्रभूषणाध्यायेषु रसभेदविकल्पाध्यायो नाम (प्रथमः, आदितः) त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

उपसंहारमाह—भवति चात्रेत्यादि। अनुरसो हीनरसः। दोषभेदत्रिषष्ट्यां दोषभेदीयाध्याये वक्ष्यमाणायाम्। यद्यपि परस्परं भिन्नाः सन्तो रसा बहवो भवन्ति, तथाऽपि षट्त्वं नातिवर्तन्ते; यथा वातादिदोषा बहुधा भिन्ना अपि त्रित्वं न त्यजन्ति तथा रसा अपि षट्त्वं नातिवर्तन्ते ॥ १७ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः।

अथातः स्वस्थवृत्तमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

रसभेदविकल्पानन्तरं पूर्वोक्तक्रमेणैव स्वस्थवृत्तारम्भः—अथात इत्यादि। वृत्तमाचारः। केचित् स्वस्थरक्षणीयमिति पठित्वा स्वस्थस्य रक्षणं यस्मिन्नध्याये स तथा, तं व्याख्यास्याम इति व्याख्यानयन्ति ॥ १ ॥ २ ॥

सूत्रस्थाने समुद्दिष्टः स्वस्थो भवति यादृशः।
तस्य यद्रक्षणं तद्धि चिकित्सायाः प्रयोजनम् ॥ ३ ॥

इदानीमतिदेशेन स्वस्थलक्षणं चिकित्साप्रयोजनं चाह—सूत्रेत्यादि। समुद्दिष्टः 'समदोषः समाग्निश्च' इत्यादिना दोषधातुमलक्षयवृद्धिविज्ञानीयाध्याये। तादृशस्वस्थस्य रक्षणं भाविव्याधिनिवारणत्वेन पालनम्। हि स्फुटार्थः। ये तु सूत्रस्थान इत्यादि श्लोकार्धं न पठन्ति ते समदोष इत्यादिकं सूत्रस्थानोक्तं स्वस्थलक्षणमत्रापि पठन्ति, अनुवादत्वेन न पौनरुक्त्यमिति मन्यन्ते। 'चिकित्सायाः प्रयोजनं' इत्यत्र 'चिकित्सायाः परं वपुः' इति केचित् पठन्ति ॥ ३ ॥

तस्य यद्वृत्तमुक्तं हि रक्षणं च मयाऽऽदितः[1]।
तस्मिन्नर्थाः समासोक्ता विस्तरेणेह वक्ष्यते ॥ ४ ॥

ननु, चानागतबाध एव स्वस्थवृत्तस्य दर्शितत्वात् कस्मात् पुनरत्र तदभिधानमित्याशङ्क्याह—तस्येत्यादि। तस्य स्वस्थस्य। आदितः अनागतबाधे। तस्मिन्ननागतबाधोक्तस्वस्थवृत्ते। समासोक्ताः संक्षेपेणैवोक्ताः। इह अस्मिन्नध्याये, वक्ष्यते 'स्वस्थवृत्तं' इति शेषः। केचित् 'विस्तरस्तस्य वक्ष्यते' इति पठन्ति, तस्येति स्वस्थवृत्तस्य। अपरे 'विस्तरश्चात्र वक्ष्यते' इति पठित्वा 'तेषामर्थानां विस्तरोऽत्र वक्ष्यते' इति व्याख्यानयन्ति ॥ ४ ॥

यस्मिन् यस्मिनृतौ ये ये दोषाः कुप्यन्ति देहिनाम्।
तेषु तेषु प्रदातव्याः रसास्ते ते विजानता ॥ ५ ॥

कृताश्रयं स्वस्थवृत्तं संक्षेपेणाह—यस्मिन्नित्यादि। देहिनामित्यत्र देहिशब्देनाभेदोपचाराच्छरीरमुच्यते; न आत्मा, तस्य निर्विकारत्वात्। तेषु तेष्विति धातुषु। ते ते रसास्तद्दोषप्रत्यनीका रसाः। अत्र रसशब्देन रसवन्ति द्रव्याणि भण्यन्ते, केवलरसस्योपयोगासंभवात्। विजानता वैद्येन ॥ ५ ॥

प्रक्लिन्नत्वाच्छरीराणां वर्षासु भिषजा खलु[2]।
मन्देऽग्नौ कोपमायान्ति सर्वेषां मारुतादयः ॥ ६ ॥
तस्मात् क्लेदविशुद्ध्यर्थं दोषसंहरणाय[3] च।
कषायतिक्तकटुकै रसैर्युक्तमपद्रवम् ॥ ७ ॥
नातिस्निग्धं नातिरूक्षमुष्णं दीपनमेव च।
देयमन्नं नृपतये यज्जलं चोक्तमादितः ॥ ८ ॥
तप्तावरतमम्भो वा पिबेन्मधुसमायुतम्।
अह्नि मेघानिलाविष्टेऽत्यर्थशीताम्बुसङ्कुले ॥ ९ ॥
तरुणत्वाद्विदाहं च गच्छन्त्योषधयस्तदा।
मतिमांस्तन्निमित्तं च नातिव्यायाममाचरेत् ॥ १० ॥
अत्यम्बुपानावश्यायग्राम्यधर्मातपांस्त्यजेत्।

१ 'भवति चात्र' इति क्वचित्पुस्तके न पठ्यते। २ 'रसानुरसचिन्तकैः' इति पा०।

१ 'तस्यादितो रक्षणं हि चिकित्सायां मयोदितम्' इति पा०। २ 'वर्षासु खलु देहिनाम्' इति पा०। ३ 'संघ(ह)र्षात्' इति पा०। ४ 'दोषसंरक्षणाय च' इति पा०।

भूबाष्पपरिहारार्थं शयीत च विहायसि ॥ ११ ॥
शीते साग्नौ निवाते च गुरुप्रावरणे गृहे ।
यायान्नागवधूभिश्च प्रशस्तागुरुभूषितः ॥ १२ ॥
दिवास्वप्नमजीर्णं च वर्जयेत्तत्र यत्नतः ।

आर्तवविधिं संक्षेपेणाभिधायेदानीं विस्तरेणाह—प्रक्लिन्नत्वादित्यादि । प्रक्लिन्नत्वादत्यन्तार्द्रत्वात् । भिषजेति पदं देयमन्नमित्यत्र योज्यम् । प्रक्लिन्नत्वादित्यग्निमान्द्यहेतुः, यतोऽम्बुगुणबाहुल्येनाग्निमान्द्यं भवति । ननु, वर्षासु संचयरूपतया पित्तमेव कुपितमस्ति नेतरौ, तत् कथं कुप्यन्ति मारुतादय इत्युक्तं ? सत्यं, प्रावृट्प्रकुपितो वायुरुपशमहेत्वभावाद्वर्षास्वपि कुपित एवानुवर्तते, कफश्च मेघनिःस्यन्दादिहेतुभिरसंचितोऽपि कुप्यति, अतो युक्त एव दोषत्रयप्रकोपः । अथवा अग्निमान्द्याद्दोषत्रयप्रकोपः; तथा चोक्तं,—'शमप्रकोपौ दोषाणां सर्वेषामग्निसंश्रितौ' इति । तस्मादिति यतो वर्षासु शरीरक्लेदो दोषप्रकोपश्च भवति तस्मादित्यर्थः । दोषसंरक्षणं च संचयादिनिवारणेन ज्ञेयम् । रसैर्युक्तमित्यन्नमित्येतस्य विशेषणम् । अपद्रवमपगतद्रवं द्रवहीनमित्यर्थः; अन्ये 'अथाद्रवं' इति पठन्ति, ईषद्रवमिति च व्याख्यानयन्ति । नातिस्निग्धं नातिरूक्षं साधारणमित्यर्थः । नृपतिग्रहणमीश्वरोपलक्षणार्थम् । यज्जलं चोक्तमादित इति 'वर्षास्वन्तरिक्षं' इत्यादिना पानीयवर्गे कथितम् । तप्तावरतं शृतशीतं, तत् संचितपित्तोपशमनार्थम् । मधुसमायुतं समधु, एतच्चानुबलस्य कफस्योपशमनार्थम् । ननु, 'वर्षासु न पिबेत्तोयं' इत्यनेन सह कथमेतन्न विरुध्यते ? उच्यते,—न पिबेदित्यस्याल्पपाने व्यवस्थितेः । तरुणत्वादभिनवत्वात् । विदाहमम्लपाकम् । तदा वर्षाकाले, तन्निमित्तं विदाहैककारणात् । नातिव्यायाममाचरेदित्यनेन मृदुव्यायाममाचरेदित्युक्तं; स च शरीरक्लेदोपशोषार्थं वह्निसन्धुक्षणार्थं च । अवश्यायो विनामेघं सूक्ष्मजलकणानिपातः । ग्राम्यधर्मो मैथुनम् । आतपो घर्मः । तथेति नाचरेदित्यर्थः । विहायःशब्देनात्र धवलगृहोपरिभूरभिप्रेता, अन्ये मञ्चादिकं मन्यन्ते । शीते साग्निनिवातगृहे शयनं वातकोपापशमनाय । गुरुप्रावरणो गुरुवस्त्रावृताङ्गः पुरुषः । गृहे इत्यत्रापि शयीत इति योज्यम् । यायाद् गच्छेत् । नागवधूभिरिति हस्तिनीगमनं च कर्दमाम्बुनोः परिहारार्थम् । प्रशस्तागुरुभूषित इति अगुरुणः शैत्यनिवारकत्वात् । अजीर्णे चेति चकारात् पूर्वानिलमुदमन्थं च वर्जयेत् । सरिज्जलमविहितत्वेनैव वर्ज्यम् । तत्रेति वर्षासु । अतिव्यायामादेर्निषेध्यगणत्वाद्दिवास्वप्नाजीर्णयोः पृथगुपादानमत्यन्तनिषेधार्थम् ॥ ६–१२ ॥—

सेव्याः शरदि यत्नेन कषायस्वादुतिक्तकाः ॥ १३ ॥
क्षीरेक्षुविकृतिक्षौद्रशालिमुद्गादिजाङ्गलाः ।
श्वेतस्रजश्चन्द्रपादाः प्रदोषे लघु चाम्बरम् ॥ १४ ॥
सलिलं च प्रसन्नत्वात् सर्वमेव तदा हितम् ।
सरःस्वाप्लवनं चैव कमलोत्पलशालिषु ॥ १५ ॥
प्रदोषे शशिनः पादाश्चन्दनं चानुलेपनम् ।
तिक्तस्य सर्पिषः पानैरसृक्स्रावैश्च युक्तितः ॥ १६ ॥
वर्षास्वपचितं पित्तं हरेच्चापि विरेचनैः ।
नोपेयात्तीक्ष्णमम्लोष्णं क्षारं स्वप्नं दिवाऽऽतपम् १७
रात्रौ जागरणं चैव मैथुनं चापि वर्जयेत् ।
(स्वादुशीतजलं मेध्यं शुचिस्फटिकनिर्मलम् ॥ १८ ॥
शरच्चन्द्रांशुनिर्धौतमगस्त्योदयनिर्विषम् ।
प्रसन्नत्वाच्च सलिलं सर्वमेव तदा हितम् ॥ १९ ॥
सचन्दनं सकर्पूरं वासश्चामलिनं लघु ।
भजेच्च शारदं माल्यं सीधोः पानं च युक्तितः ॥ २० ॥
पित्तप्रशमनं यच्च तच्च सर्वं समाचरेत् ।)

वार्षिकं विधिमभिधाय शारदमाह—सेव्या इत्यादि । क्षीरेक्षुविकृतीत्यत्र विकृतिशब्दः क्षीरेक्षुभ्यां संबध्यते; क्षीरविकृतिः, इक्षुविकृतिरिति । क्षौद्रं मधु । शालयो विविधाः । मुद्गादीनामित्यादिशब्दाज्जीर्णा यवगोधूमादयो गृह्यन्ते । जाङ्गला इति एणाद्या लावाद्याश्च । श्वेतस्रजः शुक्लपुष्पमालाः । चन्द्रपादाश्चन्द्ररश्मयः । प्रदोषे रात्रिप्रथमप्रहरार्धे । लघु चाम्बरं सूक्ष्मवस्त्रम् । सलिलं च प्रसन्नत्वादिति यद्यपि 'शरदि सर्वं प्रसन्नत्वात्' इत्यनेनैव सर्वं जलं प्राप्तं, तथाऽपि प्रकरणान्तरत्वादुपादानम् । सरःसु दिव्यखातेषु । आप्लवनं प्रतरणम् । कमलोत्पलशालिषु कमलोत्पलभ्राजिषु, शालिष्वित्यत्र शोभिष्विति केचित् पठन्ति; कमलादियुक्ताया विशेषेण पित्तहरत्वम् । प्रदोषे शशिनः पादा इति पुनरभिधानं प्रदोषे एवावश्यं चन्द्रपादसेवा कार्या नतु सर्वरात्रं, अनुबलकफस्याभिस्यन्दभयात् । पित्तसंशमनमभिधायेदानीं संशोधनमाह—तिक्तस्येत्यादि । तिक्तघृतपानं कफरक्तप्रत्यनीकत्वात् । असृङ्मोक्षणं च रक्तस्य प्रदुष्टत्वात् । युक्तित इति योगतः, आतुरबलादिकं वीक्ष्येत्यर्थः । सेव्यमभिधाय वर्ज्यमाह—नोपेयादित्यादि । नोपेयान्न सेवेत । स्वप्नं दिवेति दिवास्वापम् । मैथुनं चापीत्यत्रापिशब्दादवश्यायपूरोवातादिकमपि समानतन्त्रोक्तं वर्जयेत् ॥ १३–२० ॥—

(हेमन्तः शीतलो रूक्षो मन्दसूर्योऽनिलाकुलः ॥ २१ ॥
ततस्तु शीतमासाद्य वायुस्तत्र प्रकुप्यति ।
कोष्ठस्थः शीतसंस्पर्शादन्तःपिण्डीकृतोऽनलः २२
रसमुच्छोषयत्याशु तस्मात् स्निग्धं तदा हितम् ।)
हेमन्ते लवणक्षारतिक्ताम्लकटुकोत्कटम् ॥ २३ ॥
ससर्पिस्तैलमहिममशनं हितमुच्यते ।
तीक्ष्णान्यपि च पानानि पिबेदगुरुभूषितः ॥ २४ ॥
तैलाक्तस्य सुखोष्णे च वारिकोष्ठेऽवगाहनम् ।

१ 'एव वर्तते' इति पा० । २ 'कुप्यति मनाक्' इति पा० । ३ 'शरीरेऽग्निमान्द्यं' इति पा० । ४ 'विदाहकारणम्' इति पा० । ५ 'रात्रिनिपातिनः सूक्ष्मजलकणाः' 'उस' इति लोके' इति पा० । ६ 'दुष्टकर्दमस्खलनयोः' इति पा० । ७ 'शीतशमकत्वात्' इति पा० ।

१ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते । २ 'कमलोत्पलक्षाघिषु' इति पा० । ३ अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते । ४ 'पिबेदगुरुरूपितः' इति पा० ।

साङ्गारयाने महति कौशेयास्तरणास्तृते ॥ २५ ॥
शयीत शयने तैस्तैर्वृतो गर्भगृहोदरे ।
स्त्रीः श्लिष्ट्वाऽगुरुधूपाढ्याः पीनोरुजघनस्तनीः २६
प्रकामं च निषेवेत मैथुनं तर्पितो नृपः ।
(मधुरं तिक्तकटुकमम्लं लवणमेव च ॥ २७ ॥
अन्नपानं तिलान् माषाञ्छाकानि च दधीनि च ।
तथेक्षुविकृतीः शालीन् सुगन्धांश्च नवानपि ॥२८॥
प्रसहानूपमांसानि क्रव्यादबिलशायिनाम् ।
औदकानां प्लवानां च पादिनां चोपसेवयेत् ॥ २९॥
मद्यानि च प्रसन्नानि यच्च किञ्चित् बलप्रदम् ।
कामतस्तन्निषेवेत पुष्टिमिच्छन् हिमागमे ॥ ३० ॥
दिवास्वप्नमजीर्णं च वर्जयेत्तत्र यत्नतः ।)
एष एव विधिः कार्यः शिशिरे समुदाहृतः ॥ ३१ ॥

इदानीं हैमन्तिकं विधिमाह—हेमन्त इत्यादि । अहिमसुष्णम् । अशनं भोजनं, पानानि मद्यादीनि । अगुरुभूषितः अगुरुचूर्णावलिप्तः । वारिकोष्ठे पाषाणादिविरचिते कुशूलाकारे जलपात्रे । साङ्गारयाने अङ्गारपूर्णशकटिकासहिते, एतद्गर्भगृहोदरे इत्येतस्य विशेषणम् । महति विस्तीर्णे । कौशेयास्तरणास्तृते पट्टवस्त्रीयतूलिकाच्छादिते । कौशेयमित्युपलक्षणं, तेन प्रावाराजिनादीनि तन्त्रान्तरोक्तानि गृह्यन्ते । तैस्तैरिति शीतापहैस्तन्त्रान्तरोक्तैर्वस्त्रविशेषैः, वृत इति आच्छादिताङ्गः पुरुषः । गर्भगृहोदरे इति बृहद्गृहमध्ये अपरं यत् क्षुद्रगृहं तस्याभ्यन्तरे । गर्भगृहोदरे इत्युपलक्षणं, तेन भूगृहमपि गृह्यते । श्लिष्ट्वा आलिङ्ग्य । पीनं मांसलं, ऊरु जानुवङ्क्षणयोर्मध्यं, जघनं कट्या अग्रिमभागः । ननु, तन्त्रान्तरे 'गोरसानिक्षुविकृतीः' इत्यादिना यादृश आहारो हेमन्ते दर्शितस्तादृशः किमिति न निर्दिष्टः ? सत्यं, हेमन्ते संचीयमानस्य कफस्य शैत्यात् प्रकुपितस्य वातस्योपशमनार्थं साधारण एव विधिर्यस्माद्युक्तः, अतः साधारणविधिरत्र निर्दिष्टो न तादृश आहारः । यद्येवं तर्हि तन्त्रान्तरे तादृश एवाहारः कुतो निर्दिष्ट इति चेत् ? उच्यते—हेमन्ते शीतानिलस्पर्शसंरुद्धो बली वह्निर्यदि तादृशमाहारं न लभते तदा धातुक्षयमावहति, धातुक्षयाच्च तीव्रवातकोपः स्यादिति भयात्तन्त्रान्तरे तादृश आहारो दर्शितः । (अथवा यस्माद्धेमन्ते प्रबलाग्नित्वादपथ्यक्षमो देहो भवति) । कार्तिककुण्डोऽमुं पाठमन्यथा पठति, स चाभावान्न लिखितः । हेमन्तशिशिरयोस्तुल्यत्वाद्धैमन्तिक एव विधिः शिशिरेऽपि सेव्यः; अतः शिशिरविधानं पृथङ्नोक्तम् । यत्केचिदत्र वर्ज्यविधानं '......... प्राग्वातं रूक्षभोजनम् । वातलानि च द्रव्याणि शीतस्नानं च वर्जयेत्' इति पठन्ति; स त्वनार्षः पाठः, परंपराविच्छेदास्मरणात् समानतन्त्रानभिधानाच्च ॥ २१-३१ ॥

(हेमन्ते निचितः श्लेष्मा शैत्याच्छीतशरीरिणाम् ॥
औष्ण्याद्वसन्ते कुपितः कुरुते च गदान् बहून् ३२
ततोऽम्लमधुरस्निग्धलवणानि गुरूणि च ।
वर्जयेद्वमनादीनि कर्माण्यपि च कारयेत् ॥ ३३ ॥
षष्टिकान्नं यवाञ्छीतान् मुद्गान् नीवारकोद्रवान् ।
लावादिविष्किररसैर्दध्याम्रूषैश्च युक्तितः ॥ ३४ ॥
पटोलनिम्बवार्ताकतिक्तकैश्च हिमात्यये ।
सेवेन्मध्वासवारिष्टान् सीधुमाध्वीकमाधवान् ३५
व्यायाममञ्जनं धूमं तीक्ष्णं च कवलग्रहम् ।
सुखाम्बुना च सर्वार्थान् सेवेत कुसुमागमे ॥३६॥)
तीक्ष्णरूक्षकटुक्षारकषायं कोष्णमद्रवम् ।
यवमुद्गमधुप्रायं वसन्ते भोजनं हितम् ॥ ३७ ॥
व्यायामोऽत्र नियुद्धाध्वशिलानिर्घातजो हितः ।
उत्सादनं तथा स्नानं वनिताः काननानि च ॥ ३८॥
सेवेत निर्हरेच्चापि हेमन्तोपचितं कफम् ।
शिरोविरेचकवमननिरूहकवलादिभिः ॥ ३९ ॥
वर्जयेन्मधुरस्निग्धदिवास्वप्नगुरुद्रवान् ।

वसन्तविधिमाह—औष्ण्यादित्यादि । कोष्णमीषदुष्णम् । अद्रवं द्रवरहितम् । यवमुद्गमधुप्रायं यवादिबहुलम् । व्यायामः शरीरायासजनकं कर्म । अत्र वसन्ते । नियुद्धादिकं व्यायाम इत्येतस्य विवरणम् । नियुद्धं बाहुयुद्धम्, अध्वा मार्गगमनं, शिलानिर्घातः पाषाणास्फालनम् । उत्सादनमुद्वर्तनम् । वनिताः स्त्रियः । संशमनमभिधाय संशोधनमाह—निर्हरेच्चापीत्यादि । शिरोविरेकः नस्यम् । यद्यपि बाहुल्येन वाते निरूहोऽभिहितः, तथाऽपि सर्वदोषहरत्वात् कफेऽपि योज्यः । तथा च,—"बस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते"—इत्यादि । कवलो गण्डूषभेदः । वर्ज्यमाह—वर्जयेदित्यादि । मधुरादिवर्जनमुत्क्लेशपरिहारार्थम् । केचिदत्र 'हेमन्ते निचितः श्लेष्मा' इत्यादिकं पाठं पठन्ति, स च ग्रन्थगौरवभयात् परित्यक्तः ॥३२॥३९॥—

व्यायाममुष्णमायासं मैथुनं परिशोषि च ॥ ४० ॥
रसांश्चाग्निगुणोद्रिक्तान् निदाघे परिवर्जयेत् ।

यस्माद्ग्रीष्मे व्यायामादिसेवनात्तीव्रतरा रोगा भवन्त्यतो व्यायामादिसेवां त्यजेदिति प्रतिपादनार्थं ग्रैष्मं विधिं विवक्षुरादौ वर्जनीयानाह—व्यायाममित्यादि । तत्रायासस्याल्पक्लेशतया व्यायामतो भेदः । उष्णमातपादिकम् । मैथुनमिति यद्यपि पूर्वमनागताबाधे ग्रीष्मकाले पक्षान्मैथुनमुक्तं तथाऽप्यत्र यत्तस्य सर्वथा निषेधाभिधानं तद्ग्रीष्मस्यातिरूक्षताप्रतिपादनार्थम् । परिशोषि शोषणात्मकम् । अग्निगुणोद्रिक्ता रसाः कट्वम्ललवणाः ॥४०॥—

सरांसि सरितो वापीर्वनानि रुचिराणि च ॥ ४१ ॥
चन्दनानि परार्ध्यानि स्रजः सकमलोत्पलाः ।
तालवृन्तानिलाहारांस्तथा शीतगृहाणि च ॥ ४२ ॥
घर्मकाले निषेवेत वासांसि सुलघूनि च ।

१ 'अयं पाठो हस्तलिखितपुस्तके नोपलभ्यते । २ 'अगुरुरूषितः अगुरुचूर्णावगुण्ठितः' इति पा० । ३ अयं पाठः क्वचित् पुस्तके न पठ्यते । ४ अयं पाठः क्वचित्पुस्तके न पठ्यते ।

१ 'अतः परं ग्रैष्मं विधिं विवक्षुर्वर्ज्यसेवातस्तीव्ररोगप्रादुर्भूतेरादौ वर्जनीयानाह' इति पा० । २ 'द्विदलान्नकृतं भक्ष्यम्' इति पा० ।

शर्कराखण्डदिग्धानि सुगन्धीनि हिमानि च ॥४३॥
पानकानि च सेवेत मन्थांश्चापि सशर्करान् ।
भोजनं च हितं शीतं सघृतं मधुरद्रवम् ॥ ४४ ॥
शृतेन पयसा रात्रौ शर्करामधुरेण च ।
प्रत्यग्रकुसुमाकीर्णे शयने हर्म्यसंस्थिते ॥ ४५ ॥
शयीत चन्दनार्द्राङ्गः स्पृश्यमानोऽनिलैः सुखैः ।

अतःपरं सेवनीयानाह—सरांसीत्यादि । सरांसि अमनुष्यखातानि जलाधाराणि, सरिन्नदी, वापी पाषाणादिवद्धा ससोपाना स्वल्पा जलाधारिका । वनानि रुचिराणीति सच्छायानि मनोहराणि काननानि । परार्ध्यानि उत्कृष्टानि । तालवृन्तानिलान् तालपत्रविरचितव्यजनपवनान् । दिग्धानि युक्तानि । सुगन्धीनि कर्पूरादिवासितानि । हिमानि शीतलानि । पानकानि चेति चकारान्मद्योचितस्य बहूदकं मद्यं केचिदिच्छन्ति । मधुरद्रवो रसालपानकादिर्यत्र भोजने तन्मधुरद्रवम् । मन्थान् जलघृताक्तसक्तून् । शृतेन पयसा क्वथितेन दुग्धेन । भोजनं रात्रौ हितमित्युक्ते दिवा मन्थादिपानमेवेति गम्यते । तथा च तन्त्रान्तरं—"दिवा पानानि शीतानि हितं रात्रौ च भोजनम् । ससर्पिःशर्करं शीतं शृतेन पयसा युतम्—" इति । प्रत्यग्रकुसुमाकीर्णे इति नूतनपुष्पास्तृते । हर्म्यसंश्रिते धवलगृहोपरिस्थिते । शयीतेत्यत्रापि रात्राविति संबध्यते; तेन रात्रौ हर्म्यपृष्ठे शयीत, दिवा तु शीतगृहे । तथा च तन्त्रान्तरम् ,—'दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतले । भजेचन्दनदिग्धाङ्गः प्रवाते हर्म्यमस्तके"—इति । सुखैः सुखोत्पादकैः । अत्र केचिद्वहूनि पाठान्तराणि मन्यन्ते; तानि तु विस्तरभयान्न लिखितानि ॥ ४१–४५ ॥—

तापात्यये हिता नित्यं रसा ये गुरवस्त्रयः ॥ ४६ ॥
पयो मांसरसाः कोष्णास्तैलानि च घृतानि च ।
बृंहणं चापि यत्किञ्चिदभिष्यन्दि तथैव च ॥ ४७ ॥
निदाघोपचितं चैव प्रकुप्यन्तं समीरणम् ।
निहन्यादनिलघ्नेन विधिना विधिकोविदः ॥ ४८ ॥
(नदीजलं रूक्षमुष्णमुदमन्थं तथाऽऽतपम् ।
व्यायामं च दिवास्वप्नं व्यवायं चात्र वर्जयेत् ॥४९॥
नवान्नरूक्षशीताम्बुसक्तूंश्चापि विवर्जयेत् ।
यवषष्टिकगोधूमान् शालींश्चाप्यनवांस्तथा ॥ ५० ॥
हर्म्यमध्ये निवाते च भजेच्छय्यां मृदूत्तराम् ।
सविषप्राणिविण्मूत्रलालादिष्ठीवनादिभिः ॥ ५१ ॥
समाप्लुतं तदा तोयमान्तरीक्षं विषोपमम् ।
वायुना विषदुष्टेन प्रावृषेण्येन दूषितम् ॥ ५२ ॥
तद्धि सर्वोपयोगेषु तस्मिन् काले विवर्जयेत् ।
अरिष्टासवमैरेयान् सोपदंशांस्तु युक्तितः ॥ ५३ ॥
पिबेत् प्रावृषि जीर्णांस्तु रात्रौ तानपि वर्जयेत् ।
निरूहैर्वस्तिभिश्चान्यैस्तथाऽन्यैर्मारुतापहैः ॥ ५४ ॥
कुपितं शमयेद्वायुं वार्षिकं चाचरेद्विधिम् ।

एवं नैदाघं विधिमुपदिश्याधुना प्रावृषेण्यं ब्रवीति—तापात्यय इत्यादि । गुरवस्त्रयो रसा मधुराम्ललवणाः । बृंहणं चापि यत्किञ्चिदभिष्यन्दि तथैव चेति आदानकर्शितस्याप्यायनार्थम् । यद्यपि मधुरत्वेनैव पयःप्रभृतिकं प्राप्तं तथाऽपि तेषामुपादानमत्यन्तहितत्वापादनार्थम् । बृंहणं चात्यर्थकर्शितस्योपचयार्थम् । यत् किंचिदिति तृप्तिजनकम् । निदाघोपचितं ग्रीष्मकालसंचितं, प्रकुप्यन्तं प्रकोपं गच्छन्तं, समीरणं वातम् । अनिलघ्नेन विधिना स्नेहस्वेदादिना । विधिकोविदो विधानपण्डितः । अत्रापि केचित् पाठान्तरं पठन्ति, तदपि ग्रन्थगौरवभयात्त्यक्तम् । ननु, वर्षाहेमन्तग्रीष्मेषु दोषसंचय एव वमनादिना संशोधनं निषेवतः शरद्वसन्तप्रावृट्सु दोषप्रकोप एव नास्ति, कुतस्तत्रोक्तो विधिः सार्थकः, तथा चान्यत्राप्युक्तं,—'संचयेऽपहृता दोषा लभन्ते नोत्तरा गतीः'—इति । नैवं, हेत्वन्तरवशाद्यत्र संचयपूर्वकः प्रकोपस्तत्र प्रतिदोषप्रकोपं संचय एव विधिः संशोधनाख्य उक्तः; यस्तु संचयो यथर्तुविधिसेविनः, तत्र स्वस्थवृत्तविधिना संशमनं कार्यम् ॥ ४६–५४ ॥—

ऋतावृतौ य एतेन विधिना वर्तते नरः ॥ ५५ ॥
घोरानृतुकृतान् रोगान्नाप्नोति स कदाचन ।

एवमार्तवविधिमभिधायेदानीं तमनुसरतो मानवस्य स्वास्थ्यलाभमाह—ऋतावृतावित्यादि । एतेन अनन्तरोक्तेन । ऋतुकृतानिति ऋतुकृतशीतोष्णादिभिः कृतान् । रोगान् ज्वरादिकान् । कार्तिकस्तु 'दोषान्' इति पठित्वा दोषान् वातादीन् विकृतानिति व्याख्यानयति । अन्ये तु व्याख्यानयन्ति—ऋतुकृतानिति कृतशब्दस्यादौ विशब्दो लुप्तो द्रष्टव्यः, तेन ऋतुविकृतिकृतान् वातादिदोषान्नाप्नुयादित्यर्थः ॥ ५५ ॥—

अत ऊर्ध्वं द्वादशाशनप्रविचारान् वक्ष्यामः ।
तत्र शीतोष्णस्निग्धरूक्षद्रवशुष्कैककालिकद्विकालिकौषधयुक्तमात्राहीनदोषप्रशमनवृत्त्यर्थाः ॥ ५६ ॥

अतः परमशनप्रविचारान् विवक्षुराह—अत ऊर्ध्वमित्यादि । अशनं भोजनं, विचारोऽत्र पृथग्भावः । ननु, द्वादशाशनप्रविचारस्य रोगविषयत्वात् स्वस्थवृत्तेऽशनप्रविभागविधानमयुक्तं ? उच्यते—स्वस्थेऽपि वयःप्रकृतिभेदेन सात्म्यासात्म्यतया चाहारप्रविचारस्यौचित्यात् । तानेव द्वादशाशनप्रविभागानाह—तत्रेत्यादि । तत्र तेषु द्वादशाशनप्रविभागेषु, शीतादयो द्वादशविधा आहारा अपि वृत्त्यर्थाः ॥ ५६ ॥

तृष्णोष्णमददाहार्तान् रक्तपित्तविषातुरान् ।
मूर्च्छार्तान् स्त्रीषु च क्षीणान् शीतैरन्नैरुपाचरेत् ५७

स्वस्थवृत्ताधिकारे शीतादीनामाहाराणां क्रमेण विषयानाह—

१ 'शर्कराखण्डदुग्धानि' इति पा० ।

१ 'तच्च जेज्जटटीकायां न दृश्यते' इति पा० । २ 'तमनुभवतो गुणलाभमाह' इति पा० । ३ 'ऋतूपाधिभिः शीतोष्णादिभिः' इति पा० । ४ 'अशनस्य भोजनस्य प्रविचारान् प्रकृष्टान् विचारणान् अवचारणरूपान् कथयिष्यामः । ननु चामयाप्रस्तुतत्वात् स्वस्थवृत्तेऽशनप्रविभागाभिधानं कथमौपयिकं ?' इति पा० । ५ 'वयसि अशनप्रविचारस्यौचित्यात्' इति पा० ।

(शीताहारविषयमाह)—तृष्णेत्यादि । शीतैरिति तृष्णादिक्षीणान्तैः प्रत्येकं संबध्यते; तृष्णादिपीडितान् नरान् शीतस्पर्शैः शीतवीर्यैश्चान्नपानैरुपाचरेदित्यर्थः । मदो मद्यशोणितोत्थो विकारः । अन्नैरिति बहुवचनेन पानस्यापि स्वीकारः ॥ ५७ ॥

कफवातामयाविष्टान् विरिक्तान् स्नेहपायिनः ।
अक्लिन्नकायांश्च नरानुष्णैरन्नैरुपाचरेत् ॥ ५८ ॥

उष्णाहारविषयमाह—कफेत्यादि । कफवातामयाविष्टानिति कफवातरोगाक्रान्तान् । अक्लिन्नकायानिति क्लेदरहितशरीरान् ॥ ५८ ॥

वातिकान् रूक्षदेहांश्च व्यवायोपहतांस्तथा ।
व्यायामिनश्चापि नरान् स्निग्धैरन्नैरुपाचरेत् ॥५९॥

स्निग्धाहारविषयमाह—वातिकानित्यादि । वातिकानिति वातप्रकृतीन् । वातिकानामेव रूक्षदेहत्वाद् वातिकानित्येतावतैव रूक्षदेहानिति सिद्धं, विशेषेणाभिधानमवातिकानामपि निमित्ततो रूक्षदेहतापन्नानां स्निग्धान्नेनोपचरणार्थम् ॥ ५९ ॥

मेदसाऽभिपरीतांस्तु स्निग्धान्मेहातुरानपि ।
कफाभिपन्नदेहांश्च रूक्षैरन्नैरुपाचरेत् ॥ ६० ॥

रूक्षभोजनविषयमाह—मेदसाऽभिपरीतानित्यादि । मेदसाऽभिपरीतानिति मेदोव्याप्तशरीरानित्यर्थः । कफाभिपन्नदेहान् कफव्याप्तशरीरान् । स्निग्धानिति स्निग्धशरीरान् । कार्तिकस्तु स्निग्धानित्यत्र स्थूलानिति पठित्वा व्याख्यानयति—मेदसाऽभिपरीतानित्युक्ते स्थूलानिति लब्धे तदभिधानं मेदोदुष्टिभ्यो विशेषेण स्थौल्ये रूक्षभोजनप्रतिपादनार्थम् ॥ ६० ॥

शुष्कदेहान् पिपासार्तान् दुर्बलानपि च द्रवैः ।

द्रवभोजनविषयमाह—शुष्कदेहानित्यादि । शुष्कदेहादिकान् द्रवबहुलैरन्नैरुपाचरेत् ॥—

प्रक्लिन्नकायान् व्रणिनः शुष्कैर्मेहिन एव च ॥ ६१ ॥

शुष्काहारविषयमाह—प्रक्लिन्नेत्यादि । प्रक्लिन्नकायानिति कुष्ठिप्रभृतीन् कुथितशरीरान् । व्रणिन इति क्लिन्नव्रणयुक्तान् । व्रणितोपासनीये व्रणिनो द्रवोत्तरमशनमुक्तं, तदक्लिन्नशुद्धव्रणविषयम् । यदा प्रक्लिन्नकायानिति व्रणिन इत्यस्य विशेषणं तदा अव्रणानां क्लिन्नकायानां शुष्कान्नैरुपचरणं न स्यात्, न च तथेष्यते, तस्मान्नैवं विशेषणम्; अत्र तु सक्लेदत्वाच्छुष्कं व्यवस्थितमिति ॥ ६१ ॥

एककालं भवेदेयो दुर्बलाग्निविवृद्धये ।

एककालमित्यादि । एककालमपि हीनमात्र एव आहारो दातव्यः, वक्ष्यमाणवाक्यात् । 'दुर्बलाग्निविवृद्धये' इत्यत्र 'दुर्बलायाग्निवृद्धये' इति केचित् पठन्ति । तत्र दुर्बलशब्देनैव देहदौर्बल्यादग्निदौर्बल्यमिच्छन्ति ॥—

समाग्नये तथाऽऽहारो द्विकालमपि पूजितः ॥६२॥

समाग्नय इत्यादि । न केवलं द्विकालमपि तु 'अन्नेन कुक्षेर्द्वावंशौ' इत्याद्युक्तमात्रान्वितोऽपीत्यपिशब्देन समुच्चीयते ॥६२॥

औषधद्वेषिणे देयस्तथौषधसमायुतः ।

औषधद्वेषिण इत्यादि । औषधसमायुतः 'आहार' इति शेषः ॥—

मन्दाग्नये रोगिणे च मात्राहीनः प्रशस्यते ॥ ६३ ॥

हीनमात्रस्य भोजनस्य विषयमाह—मन्दाग्नय इत्यादि । मन्दानलाय रोगयुक्ताय च मात्राहीन आहारो देयः; परमेककालमेव, पूर्ववाक्यात् ॥ ६३ ॥

यथर्तुदत्तस्त्वाहारो दोषप्रशमनः स्मृतः ॥

यथर्त्वित्यादि । यथर्तुदत्त इति ऋतुं ऋतुं प्रति यथाभिहितो यथाप्रवृत्त आहारो दोषप्रशमनः कथित इत्यर्थः ॥—

अतः परं तु स्वस्थानां वृत्त्यर्थं सर्व एव च ॥
प्रविचारानिमानेवं द्वादशात्र प्रयोजयेत् ॥ ६४ ॥

अत इत्यादि । अतः परमिति अनन्तरोक्ताद्दोषप्रशमनाहारात् परमूर्ध्वम् । वृत्त्यर्थमिति शरीरधारणार्थम् । स्वस्थानामिति समधातूनां समदोषप्रकृतीनां च । सर्व एवेति समसर्वरस आहारः स्मृत इत्यर्थः ॥ ६४ ॥

अत ऊर्ध्वं दशौषधकालान् वक्ष्यामः । तत्राभक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुर्ग्रासं ग्रासान्तरं चेति दशौषधकालाः ॥ ६५ ॥

अतो दशौषधकालान्निर्दिशन्नाह—अत ऊर्ध्वमित्यादि । तेष्वौषधकालेष्वभक्तादिकं दशप्रकारमौषधं योज्यम् । औषधकालान् प्रत्येकं निर्दिशन्नाह—तत्रेत्यादि । अभक्तमित्यस्य स्थाने निर्भक्तमित्यन्ये पठन्ति ॥ ६५ ॥

तत्राभक्तं तु यत् केवलमेवौषधमुपयुज्यते ॥६६॥

तत्राभक्तमित्यादेरौषधकालोद्देशस्य प्रपञ्चमाह—तत्राभक्तमित्यादि । तत्र तेष्वभक्तादिषु मध्ये यत् केवलमन्नरहितमौषधमुपयुज्यते तदभक्तम् ॥ ६६ ॥

वीर्याधिकं भवति भेषजमन्नहीनं
हन्यात्तथाऽऽमयमसंशयमाशु चैव ।
तद्बालवृद्धवनितामृदवस्तु पीत्वा
ग्लानिं परां समुपयान्ति बलक्षयं च ॥ ६७ ॥

अभक्तस्य स्वरूपमभिधाय गुणं विषयं च प्रतिपादयन्नाह—वीर्याधिकमित्यादि । वनिता स्त्री, मृदवः सुकुमाराः । बालादीनामभक्तौषधनिषेधमभिदधद्बालादिभ्य इतरं तु अभक्तविषयं बोधयति । तत्राभक्तं त्वित्यादिकं भाष्यं, वीर्याधिकमित्यादिका गुणाः, बालवृद्धवनितामृदुविपर्ययो विषयः । कार्तिकस्तु सर्वेषामभक्तादीनां प्रागेव स्वरूपमभिधाय पश्चात् सर्वेषां गुणान् विषयांश्च प्रतिपादयति ॥ ६७ ॥

---

१ 'प्रक्लिन्नदेहांश्च' इति पा० । २ 'प्रक्लिन्नकायानिति क्लेदादिसहितशरीरान्' इति, 'कारणान्तरेणार्द्रतामापन्नान्' इति च पा० । ३ 'स्थूलान्' इति पा० । ४ 'धातुवृद्धया आर्द्रीभूतशरीरान्' इति पा० । ५ 'अन्यत्र' इति पा० । ६ 'देयः कालमथोभयम्' इति पा० ।

१ 'द्वादशान्नप्रविचारानेतानेव प्रचक्षते' इति पा० । २ 'तत्र निर्भक्तं' इति पा० । ३ 'इदानीं दशौषधकालारम्भः, तानुद्देशतो निर्दिशन्नाह' इति पा० । ४ 'तदामयम०' इति पा० । ५ 'तद्बालवृद्धयुवतीमृदवोऽथ पीत्वा' इति पा० ।

प्राग्भक्तं नाम यत् प्राग्भक्तस्योपयुज्यते ॥ ६८ ॥

प्राग्भक्तस्येति भक्तस्यादावित्यर्थः ॥ ६८ ॥

शीघ्रं विपाकमुपयाति बलं न हिंस्या-
दन्नावृतं न च मुहुर्वदनान्निरेति ।
प्राग्भक्तसेवितमथौषधमेतदेव
दद्याच्च वृद्धशिशुभीरुकृशाङ्गनाभ्यः ॥६९॥

प्राग्भक्तस्य गुणं विषयं चाह—शीघ्रमित्यादि । आहारावृतत्वान्मुहुर्मुहुर्वारंवारं वक्त्राद्बहिर्न निरेति । विपाकं सुखपरिणामम् । न चेति निरेतीत्यत्र संबध्यते । वदनान्मुखकुहरात् । निरेति निर्गच्छति । औषधमेतदेवेति प्राग्भक्ताख्यमौषधम् ॥ ६९ ॥

अधोभक्तं नाम-यदधो भक्तस्येति ॥ ७० ॥

अधोभक्तस्य स्वरूपमाह—अधोभक्तमित्यादि । अधोभक्तस्येति भोजनान्त इत्यर्थः ॥ ७० ॥

मध्येभक्तं नाम-यन्मध्ये भक्तस्य पीयते ॥ ७१ ॥

मध्येभक्तमाह—मध्येभक्तमित्यादि ॥ ७१ ॥

पीतं यदन्नमुपयुज्य तदूर्ध्वकाये
हन्याद्गदान् बहुविधांश्च बलं ददाति ।
मध्ये तु पीतमपहन्त्यविसारिभावा-
द्ये मध्यदेहमभिभूय भवन्ति रोगाः ॥ ७२ ॥

अधोभक्तमध्येभक्तयोर्गुणमाह—पीतमित्यादि । बलं ददातीति ऊर्ध्वकाय एव । मध्ये तु पीतं 'भक्तस्य' इति शेषः । अविसारिभावात् अविप्रसरणस्वभावात् । मध्यदेशं कोष्ठम् । अभिभूय व्याप्य ॥ ७२ ॥

अन्तराभक्तं नाम-यदन्तरा पीयते पूर्वापरयोर्भक्तयोः ॥ ७३ ॥

अन्तराभक्तमाह—अन्तराभक्तमित्यादि । अन्तराभक्तं यत् पूर्वापरयोर्भक्तयोरन्तरा मध्ये पीयते, पूर्वापरयोरिति प्रातःसायन्तनयोर्भोजनयोरित्यर्थः ॥ ७३ ॥

सभक्तं नाम-यत् सह भक्तेन ॥ ७४ ॥

सभक्तमाह—सभक्तमित्यादि । सभक्तं भक्तेन सह साधितं, भक्तयुक्तं वा ॥ ७४ ॥

पथ्यं सभक्तमबलाबलयोर्हि नित्यं
तद्द्वेषिणामपि तथा शिशुवृद्धयोश्च ।
हृद्यं मनोबलकरं त्वथ दीपनं च
पथ्यं सदा भवति चान्तरभक्तकं यत् ॥ ७५ ॥

अन्तराभक्तसभक्तयोर्गुणविषयावाह—हृद्यमित्यादि । हृद्यं हृदयाय हितम् । मनोबलकरमिति मनोबलं मनःसामर्थ्यं, तत्करोतीत्यर्थः । अबलाबलयोरिति स्त्रीदुर्बलयोरित्यर्थः । तद्द्वेषिणामिति भेषजद्वेषिणामित्यर्थः ॥ ७५ ॥

सामुद्गं नाम-यद्भक्तस्यादावन्ते च पीयते ॥ ७६ ॥

दोषे द्विधा प्रविसृते तु समुद्गसंज्ञ-
माद्यन्तयोर्यदशनस्य निषेव्यते तु ॥ ७७ ॥

सामुद्गमाह—सामुद्गमित्यादि । द्विधा प्रविसृते ऊर्ध्वाधःप्रसृते इत्यर्थः । एवंविधे दोषे समुद्गसंज्ञं निषेव्यते इति संबन्धः । ननु, सामुद्गविवरणे भक्तस्यादावन्ते चेत्युपादानात् 'आद्यन्तयोर्यदशनस्य' इति गतार्थं ? उच्यते—चूर्णकल्कादीनामपि समुद्गसंज्ञार्थं पुनरुक्तिः, अन्यथाऽनन्तरोक्तस्य 'पीतं' इत्यस्यानुवर्तनात् पानस्यैव समुद्गसंज्ञा स्यात् ॥ ७६ ॥ ७७ ॥

मुहुर्मुहुर्नाम—सभक्तमभक्तं वा यदौषधं मुहुर्मुहुरुपयुज्यते ॥ ७८ ॥

श्वासे मुहुर्मुहुरतिप्रसृते च कासे
हिक्कावमीषु स वदन्त्युपयोज्यमेतत् ॥ ७९ ॥

मुहुर्मुहुरौषधमाह—मुहुर्मुहुरित्यादि । मुहुर्मुहुः भक्तसहितं भक्तरहितं वा यदौषधं वारं वारं प्रयुज्यते तन्मुहुर्मुहुरित्यर्थः । मुहुर्मुहुरित्येतच्छ्वासकासादिपूपयोज्यम् ॥ ७८ ॥ ७९ ॥

ग्रासं तु-यत्पिण्डव्यामिश्रम् ॥ ८० ॥

ग्रासमाह—पिण्डव्यामिश्रमिति कवलव्यामिश्रमित्यर्थः । तन्त्रान्तरदर्शनात् ग्रासं ग्रासमिति बोद्धव्यम् ॥ ८० ॥

ग्रासान्तरं तु यद्ग्रासान्तरेषु ॥ ८१ ॥

ग्रासान्तरमाह—ग्रासान्तरेष्विति कवलान्तरेष्वित्यर्थः ८१

ग्रासेषु चूर्णमबलाग्निषु दीपनीयं
वाजीकराण्यपि तु योजयितुं यतेत ।
ग्रासान्तरेषु वितरेद्वमनीयधूमान्
श्वासादिषु प्रथितदृष्टगुणांश्च लेहान् ॥ ८२ ॥

अनयोर्विषयमाह—ग्रासेष्वित्यादि । अबलाग्निषु दुर्बलाग्निषु । वमनीयधूमानिति स्नायुचर्मखुरप्रभृतिभिः कृतान् ॥ ८२ ॥

एवमेते दशौषधकालाः ॥ ८३ ॥

सांप्रतं संग्रहमाह—एवमित्यादि ॥ ८३ ॥

विसृष्टे विण्मूत्रे विशदकरणे देहे च सुलघौ
विशुद्धे चोद्गारे हृदि सुविमले वाते च सरति ।
तथाऽन्नश्रद्धायां क्लमपरिगमे कुक्षौ च शिथिले
प्रदेयस्त्वाहारो भवति भिषजां कालः स तु मतः ८४

इति सुश्रुतसंहितायामुत्तरतन्त्रे तन्त्रभूषणाध्यायेषु स्वस्थवृत्ताध्यायो नाम (द्वितीयोऽध्यायः, आदितः) चतुःषष्टितमोऽध्यायः ॥६४॥

एवमौषधकालान् प्रदर्श्याऽधुनाऽऽहारस्य श्रेयस्करत्वात्तत्कालमाह—विसृष्टे इत्यादि । (प्रत्यर्तुविहिताहारो हि कालोपयुक्तः सुखत्वाय संपद्यते, अतस्तत्कालं नियमयन्नाह—विसृष्टे इत्यादि ।) विसृष्टे विण्मूत्रे इति प्रवृत्ते विण्मूत्रे । विशदकरणे इति विशदानि करणानि यस्मिन् देहे स विशदकरणस्तस्मिन्, विशदेन्द्रिये इत्यर्थः । देहे सुलघाविति शरीरे गुरुत्वरहिते

१ 'यद्भुक्त्वा पीयते' इति पा० । २ 'तु यत् पूर्वापरयोर्भक्तयोरन्तरे' इति पा० । ३ 'सभक्तं नाम औषधेषु यत् साध्यते भक्तम्' इति पा० । ४ 'तु' इति पा० ।

१ 'मुहुर्मुहुर्यत् सभक्तमभक्तं वा तन्मुहुर्मुहुः' इति पा० । २ 'ग्रासान्तरं नाम यदुभयोर्ग्रासयोर्मध्ये प्रयुज्यते' इति पा० । ३ 'ग्रासेषु पीतमुपयाति विपकमाशु वृद्धेऽबलेषु च हितं प्रवदन्ति सन्तः' इति पा० ।

इत्यर्थः । विशुद्धे चोद्गारे इति मधुराम्लधूमगन्धिवियुक्ते इत्यर्थः । हृदि सुविमले इति निराकुले हृदये इत्यर्थः । वाते सरतीति अधः प्रवहति वाते इत्यर्थः । अन्नश्रद्धायां भक्ताकाङ्क्षायामित्यर्थः । क्लमपरिगमे इति अनायासश्रमरहिते इत्यर्थः । कुक्षौ च शिथिले इति बुभुक्षोदयात् स्रस्ते कुक्षौ स्तब्धतारहिते इत्यर्थः । आहारो दातव्यो भवति भिषजा वैद्येन, यतः कालः स तु मतः स एव मत इत्यर्थः । तुशब्दोऽत्रावधारणार्थः । भिषग्ग्रहणं वैद्यप्रत्यवेक्षितस्याहारस्य भोज्यत्वप्रतिपादनार्थम् ॥ ८४ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः ।

अथातस्तन्त्रयुक्तिमध्यायं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

स्वस्थवृत्तानन्तरं स्वस्थविध्यर्थस्य तन्त्रयुक्तिभिः प्रसाधनात्तन्त्रयुक्त्यध्यायारम्भः—अथात इत्यादि । अथात इति पूर्ववत् व्याख्येयम् । त्रायते शरीरमनेनेति तन्त्रं शास्त्रं चिकित्सा च, तस्य युक्तयो योजनास्तन्त्रयुक्तयः, ता अधिकृत्य कृतोऽध्यायः, तम् । वेदोत्पत्तिवदत्र तद्धितलोपः । ताश्च तन्त्रयोजना द्विविधाः—वाक्ययोजना अर्थयोजनाश्च; तत्र वाक्ययोजना योगोद्देशनिर्देशाद्याः, अर्थयोजना अधिकरणपदार्थादयः ॥१॥२॥

द्वात्रिंशत्तन्त्रयुक्तयो भवन्ति शास्त्रे । तद्यथा—अधिकरणं १, योगः २, पदार्थः ३, हेत्वर्थः ४, उद्देशः ५, निर्देशः ६, उपदेशः ७, अपदेशः ८, प्रदेशः ९, अतिदेशः १०, अपवर्जः ११, वाक्यशेषः १२, अर्थापत्तिः १३, विपर्ययः १४, प्रसङ्गः १५, एकान्तः १६, अनेकान्तः १७, पूर्वपक्षः १८, निर्णयः १९, अनुमतं २०, विधानम् २१, अनागतावेक्षणम् २२, अतिक्रान्तावेक्षणं २३, संशयः २४, व्याख्यानं २५, स्वसंज्ञा २६, निर्वचनं २७, निदर्शनं २८, नियोगः २९, विकल्पः ३०, समुच्चयः ३१, ऊह्यम् ३२, इति ॥ ३ ॥

संख्यांभेदेन तन्त्रयुक्तीर्निर्दिशन्नाह—द्वात्रिंशदित्यादि । शास्त्रे सौश्रुते । अधिकरणमित्यादिसंख्येयनिर्देशादेव द्वात्रिंशत् संख्या लब्धा, अतस्तत्करणमन्यतन्त्रोक्ताः षट्त्रिंशच्चत्वारिंशद्वा तन्त्रयुक्तय इति संख्यानिषेधार्थम् । शास्त्रे इत्यत्रान्ये समासेनेति पठित्वा व्याख्यानयन्ति—अन्यत्र विस्तरेण षट्त्रिंशच्चत्वारिंशद्वा तन्त्रयुक्तयः, अत्र द्वात्रिंशदिति समासेनोक्तम् । कतमास्तास्तन्त्रयुक्तय इत्याह—तद्यथेत्यादि । तद्यथेति निदर्शनम् । अधिकरणादीनि सूत्रकार एव व्याख्यास्यति ॥ ३ ॥

अत्रासां तन्त्रयुक्तीनां किं प्रयोजनम्? उच्यते—वाक्ययोजनमर्थयोजनं च ॥ ४ ॥

एवं तन्त्रयुक्तीरुद्देशतः प्रतिपाद्य तासां तन्त्रयुक्तीनां प्रयोजनमाह—अत्रासामित्यादि । अत्र चिकित्साशास्त्रे । वाक्ययोजनमर्थयोजनं चेति वाक्यस्यासंबद्धस्य योजनं संबधनं वाक्ययोजनं, लीनस्यासङ्गतस्य चार्थस्य प्रकाशनं सङ्गतीकरणं चार्थयोजनम् । तत्र कासांचित्तन्त्रयुक्तीनां योगोद्देशनिर्देशादीनां वाक्ययोजनं, कासांश्चिदधिकरणपदार्थोह्यादीनामर्थयोजनं प्रयोजनम् ॥ ४ ॥

भवन्ति चात्र श्लोकाः ।

असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम् ।
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः ॥ ५ ॥
व्यक्ता नोक्तास्तु ये ह्यर्था लीना ये चाप्यनिर्मलाः ।
लेशोक्ता ये च केचित्स्युस्तेषां चापि प्रसाधनम् ॥ ६ ॥

अत्रैव पूर्वाचार्यपठितौ श्लोकावधिकार्थख्यापनायाह—असद्वादिप्रयुक्तानामित्यादि । असद्वादिनो हि प्रतिरसपाकवादिनः पाकत्रयवादिनो गुणकर्तृत्ववादिनो वेत्यादयः । प्रतिषेधनमपदेशादिभिस्तन्त्रयुक्तिभिः परपक्षदूषणम् । स्ववाक्यसिद्धिः स्ववाक्यस्थापनं निर्णयाख्यया तन्त्रयुक्त्या । यथा—प्रतिरसं पाक इत्यसद्वादिदर्शनमपदेशाख्यया तन्त्रयुक्त्या द्रव्यादिविज्ञाने निराकृतं, तत्रैव द्विविधः पाक इत्यादिस्वमतसाधनं निर्णयाख्यया तन्त्रयुक्त्या कृतम् । व्यक्ता नोक्ताः स्पष्टतया नोक्ताः । लीना असम्यग्दर्शिताः । अनिर्मला लेशेनोक्ताः । तेषां प्रसाधनं योगप्रभृतिभिः क्रियते ॥ ५ ॥ ६ ॥

यथाऽम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ।
प्रबोधस्य प्रकाशार्थं तथा तन्त्रस्य युक्तयः ॥ ७ ॥

केचिदत्र तन्त्रयुक्तीनां स्तुत्यर्थं श्लोकं पठन्ति—यथाऽम्बुजवनस्यार्क इत्यादि । एष च श्लोकष्टीकासु मूलत्वेन न वर्णितः ॥७॥

तत्र यमर्थमधिकृत्योच्यते तदधिकरणं; यथा—रसं दोषं वा ॥ ८ ॥

अतः परमुद्दिष्टानां तन्त्रयुक्तीनां विवरणमाह—तत्रेत्यादि । तत्र तासु तन्त्रयुक्तिषु मध्ये; यमर्थमधिकृत्य अपरे अर्था अभिधीयन्ते तदधिकरणसंज्ञं भवति । उदाहरणमाह—रसं दोषं वेति । एतेनैतदुक्तं भवति—रसं दोषं वा अधिकृत्य यत्तदुल्लेखाभावेऽ-

---

१ 'चिकित्सितम्' इति पा० । २ 'कियत्यस्तन्त्रयुक्तय इत्याह—' इति पा० । ३ 'समासेनेत्यर्थः । व्यासतश्च षट्त्रिंशत्तन्त्रयुक्तयः कैश्चित् प्रतिपादिताः । अत्र संख्येयनिर्देशादेव संख्यालाभे सति संख्योपादानं नियमार्थं कृतम्' इति पा० ।

१ 'तन्त्रयुक्तिभिः' इति पा० । २ 'व्यत्यासोक्ताश्च' इति पा० । ३ 'कचित्तन्त्रे' इति पा० । ४ 'व्यत्यासोक्ता विपर्ययेणोक्ताः' इति पा० । ५ 'असद्वादिप्रयुक्तानां वचनानां प्रतिषेधनं परमतं निराकृत्य स्वमतयोजना, असद्वादिवाक्यप्रतिषेधयुक्तयो द्रव्यादिविज्ञाने दर्शिताः । स्ववाक्यं मधुरकटुकावित्यादिकं स्वमतस्थापनं, इदमपि तत्रैव दर्शितम् । व्यत्यासोक्ता विपर्ययेणोक्ताः, ते विपर्ययाख्यतन्त्रयुक्त्या व्याख्यायन्ते; लीना असम्यग्दर्शिता विशेषा द्वित्र्यादिवाचकाः, ते प्रकरणादिभिः स्पष्टीक्रियन्ते । 'अमर्मोपहते देशे सिरासन्ध्यस्थिवर्जिते' इत्यादिका ह्यर्था अनिर्मलाः, ते व्याख्यानादिभिरूहादिभिर्व्यज्यन्ते । तेषां चापि प्रसाधनं तन्त्रयुक्तिभिः क्रियते' इति पाठान्तरम् । ६ 'प्रबोध्यस्य' इति पा० ।

प्यर्थजातमभिहितं तत् सर्वं तदधिकारे प्रतीयत इत्यर्थः ॥ ८ ॥

येन वाक्यं युज्यते स योगः । यथा—
'तैलं पिबेच्चामृतवल्लिनिम्ब-
हिंस्राभयावृक्षकपिप्पलीभिः ।
सिद्धं बलाभ्यां च सदेवदारु
हिताय नित्यं गलगण्डरोगे' ॥
इत्यत्र तैलं सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धमिति प्रयुक्तं, एवं दूरस्थानामपि पदानामेकीकरणं योगः ॥ ९ ॥

योगाख्यां तन्त्रयुक्तिमाह—येनेत्यादि । येन व्यत्यासोक्तानां सन्निकृष्टविप्रकृष्टानां पदानामेकीकरणं स योग इत्यर्थः । व्यत्यासेनोक्तं पदयोगं दर्शयन्नाह—तैलमित्यादि । विपर्ययेणोक्तस्य पदस्यैकीकरणं योग इत्यर्थः । येनेत्यादि सूत्रं, येन व्यत्यासोक्तानां इत्यादिसूत्रार्थः, यथेत्याद्युदाहरणम् । एवं सन्निकृष्टस्य विपर्ययोक्तस्य पदस्यापहरणं मुख्यमेकीकरणं प्रतिपाद्य दूरस्थानामप्युद्देशेनाह—एवं दूरस्थानामपीति ॥ ९ ॥

योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः, पदस्य पदयोः पदानां वाऽर्थः पदार्थः; अपरिमिताश्च पदार्थाः । यथा—स्नेहस्वेदाञ्जनेषु निर्दिष्टेषु द्वयोस्त्रयाणां वाऽर्थानामुपपत्तिर्दृश्यते, तत्र योऽर्थः पूर्वापरयोगसिद्धो भवति स ग्रहीतव्यः; यथा—'वेदोत्पत्तिमध्यायं व्याख्यास्याम' इत्युक्ते सन्दिह्यते बुद्धिः—कतमस्य वेदस्योत्पत्तिं वक्ष्यतीति, यतः ऋग्वेदादयस्तु वेदाः; विद विचारणे, विद्लृ लाभे, इत्येतयोश्च धात्वोरनेकार्थयोः प्रयोगात्, तत्र पूर्वापरयोगमुपलभ्य प्रतिपत्तिर्भवति-आयुर्वेदोत्पत्तिमयं विवक्षुरिति; एष पदार्थः ॥ १० ॥

पदार्थाभिधां तन्त्रयुक्तिमाह—योऽर्थोऽभिहित इत्यादि । पद्यते गम्यते येनार्थ इति सूत्रस्यापि पदत्वात् सूत्रे योऽर्थः प्रतिपादितः स पदार्थः । पदार्थाख्यतन्त्रयुक्तिप्रतिपादकं लक्षणमभिधायेदानीं तद्व्याख्यातुकामः प्रथमं तदवयवस्य समासमभिधत्ते-पदस्येत्यादि । अधुना बहुषु पदार्थेषु निर्द्धार्य विशिष्टपदार्थग्रहणाय पदार्थबहुत्वं प्रतिपादयति—अपरिमिता इत्यादि । कथमित्याह-यथेत्यादि । तत्र स्नेहशब्दे निर्दिष्टे हि गुणप्रेमसर्पिषां त्रयाणामर्थानामुपपत्तिर्दृश्यते, स्वेदशब्देनापि साग्निनिरग्निकयोरूष्मणोः प्राप्तिः, अञ्जनशब्देनापि नयनाञ्जनाभ्यञ्जयोः प्राप्तिः, तेषु पदार्थेषु यादृशः पदार्थो गृह्यते तादृशमाह—तत्र योऽर्थ इत्यादि । पूर्वोक्तपरोक्तवाक्यसंबन्धेनोपपन्नो योऽर्थो भवति स ग्रहीतव्य इत्यर्थः । उदाहरणमाह—यथा वेदोत्पत्तिमित्यादि । सन्दिह्यते सन्देहं गच्छतीत्यर्थः । कथं सन्दिह्यत इत्याह—कतमस्येत्यादि । यतः ऋग्वेदादयो वेदास्ततः कतमस्य वेदस्योत्पत्तिं वक्ष्यतीति सन्दिह्यते, तस्मिन् सन्देहे यथा प्रत्ययार्थः स्वीकर्तव्यस्तथाऽऽह—विदित्यादि—'आयुर्वेदमिच्छाम इहोपदिश्यमानम्' इत्यस्मिन्नायुर्वेदशब्दः श्रूयते, अतोऽत्र वेद आयुर्वेद इत्यभिप्रायः ॥ १० ॥

यदन्यदुक्तमन्यार्थसाधकं भवति स हेत्वर्थः । यथा—मृत्पिण्डोऽद्भिः प्रक्लिद्यते तथा माषदुग्धप्रभृतिभिर्व्रणः प्रक्लिद्यत इति ॥ ११ ॥

हेत्वर्थतन्त्रयुक्तेर्लक्षणमाह—यदन्यदित्यादि । उदाहरणमाह—यथा मृदित्यादि । अत्र बाह्येन मृत्पिण्डदृष्टान्तेन माषदुग्धयोगादिभिराभ्यन्तरो व्रणप्रक्लेदः साध्यते ॥ ११ ॥

समासवचनमुद्देशः । यथा—शल्यमिति ॥ १२ ॥

उद्देशलक्षणमाह—समासेत्यादि । संक्षेपेण भणनमुद्देश इत्यर्थः । उदाहरणमाह—यथा शल्यमिति । सर्वमेवाबाधजननं संक्षेपेण शल्यमुच्यते, न तु शारीरागन्तुभेदेन प्रपञ्चनात् ॥ १२ ॥

विस्तरवचनं निर्देशः । यथा-शारीरमागन्तुकं चेति ॥ १३ ॥

निर्देशलक्षणमाह—विस्तरेत्यादि । विस्तरेण भाषणं निर्देश इत्यर्थः । उदाहरणमाह—यथा शारीरमागन्तुकं चेति । शारीरशल्यमागन्तुकं च शल्यमिति शल्यं द्विविधमुच्यते ॥ १३ ॥

एवमित्युपदेशः । यथा—'तथा न जागृयाद्रात्रौ दिवास्वप्नं च वर्जयेत्' इति ॥ १४ ॥

उपदेशलक्षणमाह—एवमित्यादि । एवं कुर्यादित्युपदेश इत्यर्थः । उदाहरणमाह—यथेत्यादि । ननूपदेशनियोगयोः को भेदः ? उच्यते, प्रायिक उपदेशः, यथा—रात्रौ न जागृयादिति प्रायिकत्वेनोपन्यस्तं, कफाद्यभिभूते तु तत्र रात्रिजागरणस्यापि शस्तत्वात्; दिवा न स्वापं कुर्यादित्यपि प्रायिकं, ग्रीष्मे तृष्णाद्यन्वये च दिवास्वापस्योचितत्वात्; नियोगश्चाप्रायिकः, यथा—पथ्यमेव भोक्तव्यमिति; यद्यपि 'ज्वरितोऽहितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत्' इत्यादिनाऽपथ्यभोजनस्याप्यवकाशः, तथाऽपि तदानीमपथ्यस्यैव पथ्यत्वमिति नियोगस्य व्यभिचारो नास्ति ॥ १४ ॥

अनेन कारणेनेत्यपदेशः, यथाऽपदिश्यते—मधुरः श्लेष्माणमभिवर्धयतीति ॥ १५ ॥

---

१ 'अस्यायमर्थः—यमर्थमधिकृत्य येऽर्था अभिधीयन्ते तदधिकरणसंज्ञं सर्वस्याभिधेयस्येति । तमेवार्थमाह—यथा—रसं दोषं चेति, रसविज्ञाने रसमधिकृत्य दोषविज्ञाने दोषमधिकृत्य चोच्यत इति' इति पा० । २ 'वेदस्यायमुत्पत्तिं विवक्षुरिति' इति पा० ।

१ 'पद्यते गम्यतेऽनेनार्थोऽस्मिन्निति व्युत्पत्त्या सूत्रस्यापि पदत्वं, अतः सूत्रोक्तार्थस्यापि पदार्थता । अन्ये तु सूत्रपदे इति पठित्वा व्याख्यानयन्ति—सूत्रस्य पदं सूत्रपदं तस्मिन् योऽर्थः स पदार्थः । पदे इत्येकत्वनिर्देशादेकस्यैव पदस्य योऽर्थः स एव परं पदार्थः स्यादित्यत आह—पदस्येत्यादि । अनेकार्थं पदं दर्शयन्नाह—तत्र स्नेहेत्यादि । स्नेहशब्दो मैत्र्यां रसधातौ सर्पिरादौ च वर्तते; स्वेदशब्दोऽग्निस्वेदोष्मस्वेदादिषूक्तः, अञ्जनशब्दो नेत्राञ्जनाभ्यञ्जयोः । पूर्वापरयोगसिद्ध इति पूर्वापरसंबन्धी यो योगः प्रकृतिप्रत्ययसंबन्धः तेन सिद्धः; वृद्धव्यवहाराद्यः सिद्ध इत्यन्ये । तमेव संशयमाह—कमतस्येत्यादि ।' इति पा० । २ 'यदुक्तमुभयार्थसाधकं' इति पा० ।

अपदेशलक्षणमाह—अनेनेत्यादि । अनेन कारणेनेति कार्यं प्रति हेतुकथनमपदेश इत्यर्थः । उदाहरणमाह—यथोपदिश्यत इत्यादि । यथोपदिश्यत इति उदाहरणोपक्रमे । द्रव्यविशेषो मधुरः कुतः श्लेष्माणं वर्धयति? अत्र मधुरः श्लेष्माणं वर्धयति अर्थान्निजभावेन मधुरत्वेन वर्धयति ॥ १५ ॥

प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः । यथा—देवदत्तस्यानेन शल्यमुद्धृतं तथा यज्ञदत्तस्याप्ययमुद्धरिष्यतीति ॥ १६ ॥

प्रदेशमाह—प्रकृतस्येत्यादि । उदाहरणमाह—यथा देवदत्तस्येत्यादि । अत्र यज्ञदत्तस्य शल्योद्धरणं प्रस्तुतं, तद्देवदत्तस्य शल्योद्धरणेनातिक्रान्तेन साध्यते ॥ १६ ॥

प्रकृतस्यानागतस्य साधनमतिदेशः । यथा—यतोऽस्य वायुरूर्ध्वमुत्तिष्ठते तेनोदावर्ती स्यादिति ॥१७॥

अतिदेशमाह—प्रकृतस्येत्यादि । अनागतस्य भविष्यतः । उदाहरणमाह—यथाऽनेनेत्यादि । अत्र वायोरूर्ध्वमुत्थानं प्रकृतम् । तेन प्रस्तुतेन अनागतं भविष्यदुदावर्तित्वं साध्यते । उदावर्ती स्यात् उदावर्ती संभाव्येत ॥ १७ ॥

अभिव्याप्यापकर्षणमपवर्गः । यथा—अस्वेद्या विषोपसृष्टाः, अन्यत्र कीटविषादिति ॥ १८ ॥

अपवर्गमाह—अभिव्याप्येत्यादि । (गुणक्रियादिभिः सर्वतो वा अभिव्याप्य कस्यचित् पदार्थस्य तेभ्यो गुणक्रियादिभ्यः पृथक्करणमपवर्गः) । उदाहरणमाह—यथा अस्वेद्या इत्यादि । उत्सर्गरूपतया विषोपसृष्टानस्वेद्यान् प्रतिपाद्यापवादमाह—अन्यत्रेत्यादि ॥ १८ ॥

येन पदेनानुक्तेन वाक्यं समाप्येत स वाक्यशेषः । यथा—शिरःपाणिपादपार्श्वपृष्ठोदरोरसामित्युक्ते पुरुषग्रहणं विनाऽपि गम्यते पुरुषस्येति ॥ १९ ॥

वाक्यशेषमाह—येनेत्यादि । उदाहरणमाह—यथा शिर इत्यादि । गम्यते ज्ञायत इत्यर्थः ॥ १९ ॥

यदकीर्तितमर्थादापद्यते साऽर्थापत्तिः । यथा—ओदनं भोक्ष्ये इत्युक्तेऽर्थादापन्नं भवति—नायं पिपासुर्यवागूमिति ॥ २० ॥

अर्थापत्तिमाह—यदकीर्तितमित्यादि । अकीर्तितमप्रतिपादितम् । तदुदाहरणमाह—यथौदनमित्यादि । नायं पातुमिच्छुर्यवागूमित्यर्थः ॥ २० ॥

यद्यत्राभिहितं तस्य प्रातिलोम्यं विपर्ययः । यथा—कृशाल्पप्राणभीरवो दुश्चिकित्स्या इत्युक्ते विपरीतं गृह्यते दृढादयः सुचिकित्स्या इति ॥ २१ ॥

विपर्ययमाह—यदत्राभिहितमित्यादि । प्रातिलोम्यं विपरीतम् । उदाहरणमाह—यथा कृशाल्पेत्यादि । विपर्ययेण विपरीतमेव गम्यते, अर्थापत्त्या अविपरीत एवार्थः प्रतीयत इत्यनयोर्भेदः ॥ २१ ॥

प्रकरणान्तरेण समापनं प्रसङ्गः, यद्वा प्रकरणान्तरितो योऽर्थोऽसकृदुक्तः समाप्यते स प्रसङ्गः । यथा—पञ्चमहाभूतशरीरिसमवायः पुरुषस्तस्मिन् क्रिया सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय, भूतचिन्तायां पुनरुक्तं-यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति, स खल्वेष कर्मपुरुषश्चिकित्साधिकृत इति ॥ २२ ॥

प्रसङ्गमाह—प्रकरणान्तरेणेत्यादि । प्रकरणान्तरेणेति प्रकरणान्तरोक्तेनार्थेनेत्यर्थः । समानं तुल्यम् । उदाहरणमाह—यथेत्यादि । प्रकरणान्तरेषु असकृदुक्तः पुनः पुनरुक्तः । समाप्यते समाप्तिं नीयते । तदेव कथ्यते—यथेत्यादि । अपरे तु 'अधिकरणान्तरितो योऽर्थोऽसकृदुक्त' इति पठित्वा व्याख्यानयन्ति—स्नेहविरेकाधिकारयोर्नवज्वरी निषिद्धः, पुनर्ज्वराधिकारे तरुणज्वरिणः स्नेहशोधने निषिद्धे इति अधिकरणेऽन्तरितस्यार्थस्यासकृदुक्तिः ॥ २२ ॥

(सर्वत्र)यदवधारणेनोच्यते स एकान्तः । यथा—त्रिवृद्विरेचयति, मदनफलं वामयति(एव) ॥ २३ ॥

एकान्तलक्षणमाह—सर्वत्रेत्यादि । अवधारणेन अविकल्पेन, नियमेनेत्यर्थः; उदाहरणेऽवधारणवाचिन एवकारस्य निर्देशात् । उदाहरणमाह—यथा त्रिवृद्विरेचयतीति ॥ २३ ॥

क्वचित्तथा क्वचिदन्यथेति यः सोऽनेकान्तः । यथा—केचिदाचार्या ब्रुवते द्रव्यं प्रधानं, केचिद्रसं, केचिद्वीर्यं, केचिद्विपाकमिति ॥ २४ ॥

अनेकान्तमाह—क्वचित्तथेत्यादि । उदाहरणमाह—यथा केचिदाचार्या ब्रुवते द्रव्यं प्रधानमित्यादि । स्पष्टार्थः ॥ २४ ॥

आक्षेपपूर्वकः प्रश्नः पूर्वपक्षः । यथा—कथं वातनिमित्ताश्चत्वारः प्रमेहा असाध्या भवन्तीति ॥२५॥

पूर्वपक्षमाह—आक्षेपेत्यादि । उदाहरणमाह—यथेत्यादि । अत्रैव दोषजानां साध्यत्वेनोपलब्धेरिति हेतोः पूर्वपक्षावतारः । निर्णयाङ्गत्वेनार्थसाधनत्वमेव संशयस्यापि ॥ २५ ॥

तस्योत्तरं निर्णयः । यथा—शरीरं प्रपीड्य पश्चादधो गत्वा वसामेदोमज्जानुविद्धं मूत्रं विसृजति वातः, एवमसाध्या वातजा इति ॥ २६ ॥

तथा चोक्तम्—

कृत्स्नं शरीरं निष्पीड्य मेदोमज्जावसायुतः ।
अधः प्रकुप्यते वायुस्तेनासाध्यास्तु वातजाः २७

निर्णयमाह—तस्योत्तरमित्यादि । तस्य पूर्वपक्षस्य यदुत्तरं स निर्णय इत्यर्थः । उदाहरणमाह—यथा शरीरमित्यादि । यतः शरीरपीडादिकं कृत्वा वसाद्यन्वितं मूत्रं वातो विसृजति, अतो मज्जाक्षये पूर्वपूर्वधातुक्षयादसाध्यत्वमित्यर्थः ॥२६॥२७॥

---

१ 'तस्मात्' इति पा० । २ हाराणचन्द्रस्तु 'इतरत्र विहितस्य विधेरितरत्र प्रयोगायोपदेशोऽतिदेशः; यथा-'एष एव विधिः कार्यः शिशिरे समुदाहृतः' इति' पठति, अयमेव साधुपाठः । ३ 'यद्विहितं' इति पा० ।

१ 'समानं' इति पा० । २ 'योऽर्थः पुनरुक्तः' इति पा० । ३ अयं पाठः क्वचित्पुस्तके नोपलभ्यते ।

परमतमप्रतिषिद्धमनुमतम्। यथा—अन्यो ब्रूयात्—सप्त रसा इति, तच्चाप्रतिषेधादनुमन्यते कथंचिदिति ॥ २८ ॥

अनुमतमाह—परमतमित्यादि। अप्रतिषिद्धमधिगतमित्यर्थः। उदाहरणमाह—यथेत्यादि। कथञ्चिदिति केनापि प्रकारेणेत्यर्थः ॥ २८ ॥

प्रकरणानुपूर्व्याऽभिहितं विधानम्। यथा—सक्थिमर्माण्येकादश प्रकरणानुपूर्व्याऽभिहितानि २९

विधानमाह—प्रकरणेत्यादि। प्रकरणानुपूर्व्याऽभिहितमिति यथाक्रममुक्तम्। चन्द्रनन्दनेन च 'परिपाट्याऽर्थकथनं विधानम्' इति विधानलक्षणं कृतम्। उदाहरणमाह—यथा सक्थीत्यादि। मर्मणां प्रकरणानुपूर्व्या अभिधानं क्षिप्तलहृदयेत्यादिकम् ॥ २९ ॥

एवं वक्ष्यतीत्यनागतावेक्षणम्। यथा—श्लोकस्थाने ब्रूयात्-चिकित्सितेषु वक्ष्यामीति ॥ ३० ॥

अनागतावेक्षणमाह—एवमित्यादि। अनागतस्य भविष्यतः अवलोकनं कार्यार्थमवेक्षणमित्यर्थः। उदाहरणमाह—यथा श्लोकेत्यादि ॥ ३० ॥

यत्पूर्वमुक्तं तदतिक्रान्तावेक्षणम्। यथा—चिकित्सितेषु ब्रूयात्—श्लोकस्थाने यदीरितमिति ॥३१॥

अतिक्रान्तावेक्षणमाह—यदित्यादि। अतिक्रान्तस्य अतीतस्यावेक्षणम्। उदाहरणमाह—यथा चिकित्सितेष्वित्यादि ॥ ३१ ॥

उभयहेतुदर्शनं संशयः। यथा—तलहृदयाभिघातः प्राणहरः, पाणिपादच्छेदनमप्राणहरमिति ॥ ३२ ॥

संशयमाह—उभयेत्यादि। उभयोर्विसदृशयोरर्थयोर्हेतुः तस्य दर्शनम्। उदाहरणमाह—यथा तलेत्यादि। ननु, एतत् संशयज्ञानार्थमुदाहृतं, संशयोऽस्ति कुतः? तलहृदयाभिघातस्य तथा पाण्यादिच्छेदस्य प्राणहरत्वाप्राणहरत्वाभ्यां पृथग्दर्शितत्वात्। सत्यं, परं यत्र घातच्छेदयोर्द्वयोः सद्भावस्तत्र किं तलहृदयाभिघातान्मरणमुत पाणिपादच्छेदाज्जीवनमित्येवं संशयः[1] ॥ ३२ ॥

तन्त्रेऽतिशयोपवर्णनं व्याख्यानम्। यथा—इह पञ्चविंशतिकः पुरुषो व्याख्यायते, अन्येष्वायुर्वेदतन्त्रेषु भूतादिप्रभृत्यारभ्य चिन्ता[3] ॥ ३३ ॥

व्याख्यानमाह—तन्त्रे इत्यादि। तन्त्रे शास्त्रे। अतिशयस्य अतिरिक्तस्यार्थस्य उपवर्णनं ख्यापनं व्याख्यानम्। 'तत्रातिशय' इति पाठे तत्रेति निर्धारणे। उदाहरणमाह—यथेहेत्यादि। पञ्चविंशतिकः पुरुष इति पञ्चविंशतितम इत्यर्थः, अव्यक्तादीनामष्टानां प्रकृतिविकारैः षोडशभिः सह चतुर्विंशतित्वात्। पुरुष इति क्षेत्रज्ञः। स्वमतमभिधाय परमतमाह—अन्येष्वायुर्वेदतन्त्रेष्वित्यादि। भूतादिस्तामसोऽहङ्कारः; एतेन भूतादिमहङ्कारमारभ्यान्यायुर्वेदतन्त्रेषु चिन्ता नत्वव्यक्तमारभ्येति ॥ ३३ ॥

अन्यशास्त्रासामान्या स्वसंज्ञा। यथा—मिथुनमिति मधुसर्पिषोर्ग्रहणं; लोकप्रसिद्धमुदाहरणं वा ॥ ३४ ॥

स्वसंज्ञामाह—अन्यशास्त्रासामान्या स्वसंज्ञेत्यादि। अन्यानि शास्त्राणि आयुर्वेदादपराणि व्याकरणादीनि तेषु, असामान्या असाधारणा, तत्राननुगता स्वशास्त्रेष्वेव प्रयोजनवतीत्यर्थः। उदाहरणमाह—यथा मिथुनमित्यादि। ननु, स्वसंज्ञाप्रणयनं व्यवहारार्थं क्रियते, न चात्र मिथुनसंज्ञया यन्मधुसर्पिषोर्ग्रहणं तद्द्वारेण व्यवहारो दृश्यते? उच्यते—उदाहरणमात्रमेतद्यथाकथंचिदिति। अत एव पक्षान्तरमाह—लोके प्रसिद्धमुदाहरणं वा। स्वसंज्ञया ग्राह्यमित्यर्थः। यथा चतुर्षु स्नेहेषु महास्नेहसंज्ञा। अतः परं केचिदधीयते—यथोष्णभयाच्छायामनुसरतीति। ते तूदाहरणमपि तन्त्रयुक्तिष्विच्छन्ति। तन्न युक्तं, उद्देशसूत्रे उदाहरणाख्यतन्त्रयुक्तेरनुक्तेः, संख्याधिक्यप्रसक्तेश्च; तस्माद्यथोष्णेत्यादिकोऽपपाठ एवेति ॥ ३४ ॥

निश्चितं वचनं निर्वचनम्। यथा—आयुर्विद्यतेऽस्मिन्ननेन वा आयुर्विन्दतीत्यायुर्वेदः ॥ ३५ ॥

निर्वचनमाह—निश्चितमित्यादि। उदाहरणमाह—यथा आयुरस्मिन् विद्यत इत्यादि ॥ ३५ ॥

दृष्टान्तव्यक्तिर्निदर्शनम्। यथा—अग्निर्वायुना सहितः कक्षे[4] वृद्धिं गच्छति तथा वातपित्तकफदुष्टो व्रण इति ॥ ३६ ॥

निदर्शनमाह—दृष्टान्तव्यक्तिरित्यादि। दृष्टान्तेन व्यक्तिर्यस्मिन् वाक्ये तत्तथा। एतेनैतदुक्तं भवति—दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनमिति। अत एव च निदर्शनात् हेत्वर्थो भिद्यते, हेत्वर्थस्य दृष्टान्तमात्रत्वात्[5]। उदाहरणमाह—यथाऽग्निरित्यादि। तथेति अभिवृद्धिं गच्छतीत्यर्थः ॥ ३६ ॥

इदमेव कर्तव्यमिति नियोगः। यथा—पथ्यमेव भोक्तव्यमिति ॥ ३७ ॥

नियोगमाह—इदमित्यादि। उदाहरणमाह—यथा पथ्यमित्यादि। (क्वचिन्नियोगो व्यभिचरति, यथा—ज्वरितस्यारुचौ सत्यामपथ्यमपि दीयते; तदुक्तं—'ज्वरितोऽहितमश्नीयाद्यस्य ह्यरुचिर्भवेत्। अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा'

१ 'उभयथा दर्शनं यथा-किं पित्तव्यतिरेकादन्योऽग्निराहोस्वित् पित्तमेवाग्निरिति' इति पा०। २ 'अत्राश्रयघातेनाश्रितोपघातात् पाणौ पादे वा छिन्ने सति तलहृदयस्याप्याहतत्वमिति प्राणहरणमप्राणहरणं वा भवत्विति संशयः स्यादिति' इति पा०। ३ 'भूतादिमारभ्य चिन्तेति' इति, 'भूतादिप्रकृतिविकृत्यारब्धचिन्तः' इति च पाठान्तरम्।

१ 'भूतादिप्रभृतीनि अहङ्कारमारभ्येत्यर्थः। एतेनान्यत्र पञ्चविंशतिकः पुरुषः' इति पा०। २ 'यथा मिथुनीभूतयोर्वातपित्तयोर्वातश्लेष्मणोः पित्तश्लेष्मणोश्च द्वन्द्वशब्देन ग्रहणं, तथाभूतयोश्च तैलसर्पिषोर्यमकशब्देनेति' इति पा०। ३ 'दृष्टान्तेन दर्शनं निदर्शनम्' इति, 'दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनम्' इति च पाठान्तरम्। ४ 'कोष्ठे' इति पा०। ५ 'अन्यार्थसाधकमात्रत्वात्' इति पा०। ६ अयं पाठः क्वचित्पुस्तके नोपलभ्यते।

इति । तन्त्रान्तरेऽप्युक्तं—"उत्पद्यते हि साऽवस्था देशकालबलं प्रति । यस्यां कार्यमकार्यं स्याद्वर्जितं कार्यमेव च'—इति) ॥ ३७ ॥

इदं चेदं चेति समुच्चयः । यथा—मांसवर्गे एणहरिणादयो लावतित्तिरिशारङ्गाश्च प्रधानानीति ॥ ३८ ॥

समुच्चयमाह—इदमित्यादि । उदाहरणमाह—यथा मांसेत्यादि । एणादयः प्रधानानि लावादयश्च प्रधानानीति समुच्चयश्च ॥ ३८ ॥

इदं वेदं वेति विकल्पः । यथा—रसौदनः सघृता यवागूर्वा (भवत्विति) ॥ ३९ ॥

विकल्पमाह—इदं वेत्यादि । प्रत्येकं वाशब्दोपादानमत्रोदाहरणे यन्न कृतं तदेकेनापि वाशब्देन बहुषु विकल्पतादर्शनार्थं; क्वचिद्वाशब्दं विनाऽपि विकल्पो भवति, यथैकं रोगं प्रति बहुषु योगेषु वाशब्दं विनाऽप्यन्यतमो योगो योज्य इति विकल्पः । उदाहरणमाह—यथा रसौदन इत्यादि ॥ ३९ ॥

यदनिर्दिष्टं बुद्ध्याऽवगम्यते तदूह्यम् । यथा—अभिहितमन्नपानविधौ चतुर्विधं चान्नमुपदिश्यते—भक्ष्यं भोज्यं लेह्यं पेयमिति, एवं चतुर्विधे वक्तव्ये द्विविधमभिहितम्; इदमत्रोह्यम्—अन्नपाने विशिष्टयोर्द्वयोर्ग्रहणे कृते चतुर्णामपि ग्रहणं भवतीति; चतुर्विधश्चाहारः प्रविरलः, प्रायेण द्विविध एव; अतो द्वित्वं प्रसिद्धमिति । किञ्चान्यत्—अन्नेन भक्ष्यमवरुद्धं, घनसाधर्म्यात्; पेयेन लेह्यं, द्रवसाधर्म्यात् ॥ ४० ॥

सांप्रतमूह्याख्यां तन्त्रयुक्तिमाह—यदित्यादि । अनिर्दिष्टमिति साक्षादित्यर्थः । उदाहरणमाह—यथाऽभिहितमित्यादि । कथमत्रोह्यं भवतीति कथनायाह—भक्ष्यं भोज्यं लेह्यं पेयमिति चतुर्धा वक्तव्ये द्विविधमभिहितमत्रोह्यं भवति चातुर्विध्यमत्रोह्यं भवतीत्यर्थः । बुद्धिगम्यमूह्यं प्राक् प्रतिपादितं तत् कीदृश्या बुद्ध्या गम्यत इत्याह—अन्नपाने इत्यादि । अन्नपानयोर्विशिष्टयोरभ्यवहार्ययोर्ग्रहणे चतुर्णामभ्यवहार्यविशेषाणां भक्ष्यभोज्यलेह्यपेयानां ग्रहणं भवतीति । चातुर्विध्यमेव किमिति नोक्तमित्याशङ्क्याह—चतुर्विध इत्यादि । प्रविरल इति प्रकर्षेण विरलः क्वचित्कथंचिद्भावात् । प्रकारान्तरेणापि चतुर्विधत्वमाह—किञ्चान्यदित्यादि । अत्र केचित्पूर्वपक्षं कुर्वन्ति वाक्यार्थस्यास्पष्टाविद्यमानस्य योजनादूह्यं न तन्त्रयुक्तिरिति, लीनस्यानिर्दिष्टस्य चार्थस्य वाक्यादेवोहनेनोभयरूपस्य योजनादूह्यं तन्त्रयुक्तेरेव ॥ ४० ॥

भवन्ति चात्र—

सामान्यदर्शनेनासां व्यवस्था संप्रदर्शिता ।
विशेषस्तु यथायोगमुपधार्यो विपश्चिता ॥ ४१ ॥
द्वात्रिंशद्युक्तयो ह्येतास्तन्त्रसारगवेषणे ।
मया सम्यग्विनिहिताः शब्दार्थन्यायसंयुताः ॥ ४२
यो ह्येता विधिवद्वेत्ति दीपीभूतास्तु बुद्धिमान् ।
स पूजार्हो भिषक्श्रेष्ठ इति धन्वन्तरेर्मतम् ॥ ४३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे तन्त्रभूषणाध्यायेषु तन्त्रयुक्तिर्नाम (तृतीयोऽध्यायः, आदितः) पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

एवं तन्त्रयुक्तीरभिधायोपसंहरन् प्रतिपादिततन्त्रयुक्तिविशेषप्रतिपत्तये श्लोकमाह—भवन्ति चात्रेत्यादि । तन्त्रयुक्तीनां विशेषो यथासंबन्धं विदुषा उपधारणीय इत्यर्थः । कार्तिकस्तु द्वात्रिंशद्युक्तय इत्यादिकं श्लोकद्वयं पठति ॥ ४१–४३ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः ।

अथातो दोषभेदविकल्पमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

तन्त्रयुक्त्यनन्तरं परिशिष्टत्वाद्दोषाभेदाध्यायारम्भः–अथात इत्यादि । अथेत्यादिकं पूर्ववद्व्याख्येयम् । धातून् दूषयन्तीति दोषा वातादयः, तेषां भेदः पृथक्संसर्गसन्निपातभेदेन, तस्य विकल्पनमेकैकाद्युनगमनेन नानात्वकरणं प्रपञ्चनं दोषभेदविकल्पः, तमधिकृत्य कृतः, तम् ॥ १ ॥ २ ॥

अष्टाङ्गवेदविद्वांसं दिवोदासं महौजसम् ।
छिन्नशास्त्रार्थसंदेहं सूक्ष्मागाधागमोदधिम् ॥ ३ ॥
विश्वामित्रसुतः श्रीमान् सुश्रुतः परिपृच्छति ।

अष्टाङ्गेत्यादि । अष्टाङ्गानि शल्यादीनि वाजीकरणान्तानि, तान्येव वेद आयुर्वेदः, तेन तत्र वा विद्वान् यस्तम् । महौजसं महाप्रभावम् । सूक्ष्मा लीनार्थाः, अगाधा दुरवगाहा ये आगमा एवोदधयस्ते सन्त्यस्मिन्निति । श्रीमानिति राजश्रिया ब्राह्म्या वा अलङ्कृतः । ननु विश्वामित्रो गाधिराजः, तत्सुतत्वेन राजश्रिया योगो युक्तः, कथं ब्राह्म्या श्रियेति ? सत्यं, विश्वामित्रस्य ब्राह्मण्यं तपसा, ततो ब्राह्म्या श्रिया योगो युक्त एव । अन्ये तु क्षत्रियाणां ब्रह्मर्षिजातत्वेनोभययोग इति मन्यन्ते, अपरे तु विद्यासमाप्त्या ब्राह्म्या श्रिया योग इति मन्यन्ते । तथाचोक्तम्—"विद्यासमाप्तौ ब्राह्मं वा सत्त्वमार्षमथापि वा । ध्रुवमाविशति ज्ञानात्तस्माद्वैद्यो द्विजः स्मृतः"—इति ॥ ३ ॥—

द्विषष्टिर्दोषभेदा ये पुरस्तात्परिकीर्तिताः ॥ ४ ॥
कति तत्रैकशो ज्ञेया द्विशो वाऽप्यथवा त्रिशः ।

द्विषष्टिरित्यादि । पुरस्तात्परिकीर्तिता इति रसभेदविकल्पे । कुतो द्विषष्टिर्दोषभेदास्त्रिषष्टी रसभेदा इति ? उच्यते—"द्विषष्टिर्दोषभेदाः स्यू रसभेदास्त्रिषष्टिधा । स्वास्थ्यं त्रिषष्टं विज्ञेयं तत्र षड्रसयोजनम्"—इति । कति तत्रैकशो ज्ञेया द्विशो वाऽप्यथवा

१ 'अस्य चानैकान्तिकत्वं प्रागेव परिहृतम्' इति पा० । २ 'बुद्धिगम्यं तदूह्यम्' इति, 'बुद्धिमता तदूह्यम्' इति च पा० । ३ 'किंचान्यत् अन्नेन भक्ष्यमवरुद्धमन्नसाधर्म्यात्, पेयेन लेह्यं, द्रवसाधर्म्यात्; चतुर्विधश्चाहारः प्रायेण द्विविधः प्रसिद्ध इति' इति पा० । ४ 'सामान्यलक्षणेनैता व्यासतः संप्रदर्शिताः' इति पा० ।

१ 'शब्दन्यायार्थसंयुताः' इति पा० । २ 'अष्टाङ्गायुर्वेदविदं' इति पा० । ३ 'नानार्थत्वात्' इति पा० ।

त्रिश इत्याह—"एकशः षट् द्विशस्त्वेकविंशतिश्चतुरन्विता। त्रिशो द्वात्रिंशदित्येवं त्रयो दोषास्त्रिषष्टिधा"—इति ॥ ४ ॥—

तस्य तद्वचनं श्रुत्वा संशयच्छिन्महातपाः ॥ ५ ॥
प्रीतात्मा नृपशार्दूलः सुश्रुतायाह तत्त्वतः।

शिष्यप्रश्नमाकर्ण्य गुरुराह—तस्येत्यादि। तस्येति सुश्रुतस्य। तदिति पूर्वोक्तम्। संशयच्छिदिति संदेहच्छेत्ता। प्रीतात्मा तृप्तान्तःकरणः। नृपशार्दूलो राजसत्तमः। तत्त्वत इति यथार्थभावेन ॥ ५ ॥—

त्रयो दोषा धातवश्च पुरीषं मूत्रमेव च ॥ ६ ॥
देहं सन्धारयन्त्येते ह्यव्यापन्ना रसैर्हितैः।

किमाह भगवानित्याह—त्रय इत्यादि। त्रयो दोषा वातादयः, धातवः सप्त रसादयः। अव्यापन्ना अविकृतिंगताः। रसैर्हितैरिति मधुरादिरसैः पथ्यैरित्यर्थः। ननु यथाप्रश्नं प्रत्युत्तरे वाच्ये किमर्थं कति तत्रैकश इत्यादिप्रश्नस्योत्तरार्थं त्रयो दोषा इत्याद्यभिधानं? उच्यते—धातूनां मलानां च दोषसंसर्गे दोषव्यपदेश इत्यादिप्रतिपादनार्थं; अत एवासृजा सह पुरा पञ्चदश प्रसरा अभिहिताः। यद्येवं तर्हि मांसादिभिः सह प्रसरः कुतो न कीर्तितः? उच्यते—असंख्येयत्वात्। अथ कथं तदधिगन्तव्यमिति चेत्, दोषलिङ्गेनैव। तथा चात्र वक्ष्यति—तस्मात् प्रसङ्गं संयम्येत्यादि। ननु दोषधातुमलमूलं हि शरीरमित्यनेनैव दोषादिकार्यत्वमभिहितं; न च शरीराद्देहो भिन्नार्थः, तयोः पर्यायशब्दत्वात्; तत्कथं पुनरुच्यते—एते देहं धारयन्तीति? उच्यते—देहशब्देनात्र कर्मपुरुषस्य चिकित्साधिकृतस्य विवक्षितत्वात् ॥ ६ ॥—

पुरुषः षोडशकलः प्राणाश्चैकादशैव ये ॥ ७ ॥
रोगाणां तु सहस्रं यच्छतं विंशतिरेव च।
शतं च पञ्च द्रव्याणां त्रिसप्तत्यधिकोत्तरम् ॥ ८ ॥
व्यासतः कीर्तितं तद्धि

कीदृशः पुनरयं देहशब्दाभिधेयः कर्मपुरुष इति पूर्वप्रतिपादितस्यैव कर्मपुरुषस्य स्वरूपं वाच्यं, तत्प्रसंगेनापरमपि प्राणादिकं यत्तत्प्रतिपादयितुं सुखस्मरणार्थं प्रतिपादयति—पुरुष इत्यादि। अत्रैके कलाशब्देन पञ्चभूतानि एकादशेन्द्रियाणीति षोडशविकारा इति व्याचक्षते, परमेतन्नायुर्वेदे प्रमाणीकृतम्। अन्ये तु कलाशब्दमङ्गप्रत्यङ्गेष्वामनन्ति—शिरोग्रीवापाणिपादपार्श्वपृष्ठोदरांसीत्यष्टाङ्गानि, चिबुकनासौष्ठवङ्क्षणाङ्गुष्ठाङ्गुलिपार्ष्णिगुल्फाः प्रत्यङ्गानीति। स्वतन्त्रपरतन्त्राभिप्रायानुवर्तिभिराचार्यैः कलाशब्दो गुणवाची पठितः। ते च सर्वभूतचिन्ताशारीरोक्तसुखदुःखेच्छाद्वेषप्रयत्नादीन् षोडशगुणानाचक्षते। चतुष्पादं षोडशकलं भेषजं चरकाचार्येणोक्तं; तत्र षोडशकलं षोडशगुणमिति व्याख्यानयन्ति। प्राणाश्चैकादशेति अग्निः सोमो वायुः सत्त्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मेति प्राणाः। योऽसौ भूतात्मा स एव षोडशकलः, संयोगिन एव प्राणव्यपदेशभाजः, इत्येकादशत्वम्। रोगाणां तु सहस्रं यच्छतं विंशतिरेव चेति विंशत्यधिकैकादशशतानि रोगाणाम्। अत्र सौश्रुते तन्त्रे षट्स्थानेषु प्रोक्ता रोगाः श्लोकैरभिधीयन्ते।—

"हीनातिदग्धैः क्षारेण, त्रयः क्षुद्गादयोऽग्निना।
चतुर्थो धूमविहतः पञ्च शोणितदुष्टयः ॥ १ ॥
दोषधातुमलादीनां द्वात्रिंशत् क्षयवृद्धितः।
द्वे स्थौल्यकार्श्ये त्रिविधो विस्रंसाद्यो बलक्षयः ॥ २ ॥
षट् शोफाः षड्व्रणा वह्नित्रितयं विषमादिकम्।
आमं विदग्धं विष्टब्धमजीर्णं च तथा त्रिधा ॥ ३ ॥
इति षट्षष्टिरातङ्काः सूत्रस्थाने निदर्शिताः।
आमपक्वाशये श्रोत्रे तथेन्द्रियचतुष्टये ॥ ४ ॥
त्वगामिषसिरास्नायुसन्ध्यस्थिमज्जसंभवाः।
शुक्रे चैकाङ्गसर्वाङ्गगताः सप्ताधिका दश ॥ ५ ॥
त्रयोदशावृतैरन्यैर्दोषैः स्युर्मारुतैः खलु।
चतुर्विधं वातरक्तमाक्षेपश्चापतानकः।
पक्षाघातोऽपतन्त्रश्च मन्यास्तम्भोऽर्दितस्तथा ॥ ६ ॥
गृध्रसी सह विश्वाच्या शिरः क्रोष्टुकपूर्वकम्।
खञ्जः पङ्गुः कलायाख्यः कण्टकः पाददाहकृत् ॥ ७ ॥
पादहर्षोऽवबाहुश्च मूकमिम्मिनगद्गदाः।
तून्याध्मानद्वयेऽष्ठीलाद्वयमर्शांसि षट् तथा ॥ ८ ॥
चर्मकीलश्चतस्रश्चाश्मर्यः पञ्च भगन्दराः।
तथाऽष्टादश कुष्ठानि किलासानि पुनस्त्रिधा ॥ ९ ॥
प्रमेहा विंशतिः प्रोक्ताः पिडिका नव तत्कृताः।
उदराणि तथाऽष्टौ च मूढगर्भस्तथाऽष्टधा ॥ १० ॥
बाह्या विद्रधयः षट् स्युस्तथाऽन्तःस्थाः स्मृता दश।
विसर्पनाडीस्तनजास्तथैव पञ्च पञ्च च ॥ ११ ॥
ग्रन्थयः सप्त चैका स्यादपची सप्तधाऽर्बुदम्।
गलगण्डास्त्रयः सप्त वृद्धयः परिकीर्तिताः ॥ १२ ॥
उपदंशा मताः पञ्च श्लीपदं च तथा त्रिधा।
भग्ना अष्टादश ज्ञेयाः शूकदोषास्तथैव च।
चत्वारिंशत्तथाऽष्टौ च क्षुद्ररोगाः प्रकीर्तिताः ॥ १३ ॥
अष्टावोष्ठभवा दन्तमूलेषु दश पञ्च च ॥ १४ ॥
अष्टौ दन्तेषु जिह्वायां पञ्च तालुगता नव।
कण्ठे चाष्टादश ज्ञेयाश्चतुःसर्वसरा गदाः ॥ १५ ॥
एवं मुखे सप्तषष्टिरिति स्थाने द्वितीयके।
द्वाचत्वारिंशदधिका त्रिशती परिकीर्तिता ॥ १६ ॥
अष्टौ शुक्रगता रोगा अष्टावार्तवदुष्टयः।
चत्वारोऽसृग्दराः प्रोक्ता अपातस्त्वपराकृतः ॥ १७ ॥
मक्कल्लीनशोषाश्च नैगमेशाहृतस्तथा।
नागोदरः सुतिर्गर्भे शारीरे सप्तविंशतिः ॥ १८ ॥
अथ मेदोनिलावेगाच्छ्वयथुः सरुजश्च यः।
आढ्यवातः सर्वसराः शोफाः पञ्च प्रकीर्तिताः।
कर्णपाल्यामयाः पञ्च क्लैब्यमुक्तं चतुर्विधम् ॥ १९ ॥
वान्तरेचितयोः प्रोक्ता व्यापदो दश पञ्च च।

१ 'नरशार्दूलः' इति पा०। २ 'शतानि पञ्च द्रव्याणां त्रिसप्तत्यधिकानि च' इति पा०। ३ 'तस्य पुरुषस्य, सुखदुःखेच्छादयो भूतचिन्ताशारीरोक्ताः षोडशगुणाः' इति पा०।

१ 'आमपक्वाशयश्रोत्रेष्विन्द्रियाधिष्ठितेषु च' इति पा०। २ '०सन्धिकीकसमज्जसु' इति पा०। ३ 'जठरा मूढगर्भाः स्यूरष्टावष्टौ तथैकशः' इति पा०। ४ 'क्लीबाः पञ्चविधास्तथा' इति पा०।

षण्णेत्रप्रणिधानस्य नेत्रस्यैकादशैव तु ॥ २० ॥
पञ्च बस्तिकृतास्तत्र चत्वारः पीडने कृताः ।
एकादश द्रव्यकृताः सप्त शय्याकृतास्तथा ॥ २१ ॥
चत्वारिंशच्चतस्रश्च वैद्यतो व्यापदस्तथा ।
क्रोधायासादिकाः पञ्च दश चातुरहेतुकाः ॥ २२ ॥
स्नेहस्य कारणान्यष्टावप्रत्यागमकृन्ति च ।
इति नेत्रादिदोषेण षष्टिः सप्त समासतः ॥ २३ ॥
एवं चिकित्सितस्थाने रुजोऽष्टानवतिस्तथा ।
अन्नादिरक्षाविज्ञाने विंशतिर्विषहेतुकाः ॥ २४ ॥
वेगाः स्युः स्थावरे दर्वीकरमण्डलिनां विषे ।
राजिलवैकरञ्जानां प्रत्येकं सप्त सप्त च ॥ २५ ॥
मूषिकास्तु दशाष्टौ च सप्त वेगा अलर्कजाः ।
सप्तषष्टिशतं[1] चात्र कीटानां विषदायिनाम् ॥ २६ ॥
सप्तचत्वारिंशद्युतं कल्पस्थाने शतद्वयम् ।
नव सन्ध्याश्रयाः प्रोक्ता वर्त्मजाश्चैकविंशतिः ॥ २७ ॥
शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः ।
सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु ॥ २८ ॥
बाह्यजौ द्वौ नेत्ररोगाविति षट्सप्ततिः स्मृताः ।
कुकूणकः शिशोरेव कर्णेऽष्टाविंशतिर्नृणाम् ॥ २९ ॥
एकत्रिंशद्घ्राणगताः सप्रतिश्यायपञ्चकाः ।
एकादश[2] शिरोरोगाः परं शालाक्यसंज्ञिते ॥ ३० ॥
आतङ्कानां शतं प्रोक्तं षड्चत्वारिंशता युतम् ।
नव बालग्रहा योनिव्यापदो विंशतिः स्त्रियाः ॥ ३१ ॥
एवं कुमारतन्त्रेऽस्मिन्नेकोनत्रिंशदामयाः ।
अष्टौ ज्वरा ह्यतीसाराः षट् चतस्रः प्रवाहिकाः ॥ ३२ ॥
चत्वारो ग्रहणीदोषा यक्ष्मैको गुल्मपञ्चकम् ।
हृद्रोगाः पञ्च चत्वारः पाण्ड्वाख्याः कामलाद्वयम् ॥ ३३ ॥
हलीमकः पानकी च रक्तपित्तं चतुर्विधम् ।
षट्प्रकारा मता मूर्च्छा विकाराः सप्त मद्यजाः ॥ ३४ ॥
दाहाः पञ्च तृषः सप्त छर्दयः पञ्च देहिनाम् ।
हिक्काः श्वासास्तथा कासाः प्रत्येकं पञ्च पञ्च च ॥ ३५ ॥
स्वरभेदास्तथा षट् स्युर्विंशतिः कृमिजातयः ।
नवोदावर्तका दृष्टा विसूच्यस्तिस्र एव च ॥ ३६ ॥
आनाहौ द्वावामविट्कौ तथाऽरोचकपञ्चकम् ।
मूत्राघाता द्वादश स्युरिति कायचिकित्सिते ॥ ३७ ॥
आमयानां शतं प्रोक्तं चत्वारिंशच्च सप्त च ।
देवता-दैत्य-गन्धर्व-यक्ष-पितृहि-रक्षसाम् ॥ ३८ ॥
पिशाचस्यामिषज्ञेण गदाश्चाष्टौ प्रकीर्तिताः ।
अपस्माराश्च चत्वार उन्मादाः षडुदीरिताः ॥ ३९ ॥
अष्टादशगदा भूतविद्यायां सूक्ष्मदर्शिभिः ।
एवं हि सौश्रुते तन्त्रे काशीराजेन कीर्तिताः ॥ ४० ॥
रोगाणां तु सहस्रं यच्छतं विंशतिरेव च ।

व्यासतो विस्तरतः । हिशब्दो हेत्वर्थे, यस्मात् कारणात् ॥ ७ ॥ ८ ॥—

भिन्ना दोषास्त्रयो गुणाः ।
द्विषष्टिधा भवन्त्येते भूयिष्ठमिति निश्चयः ॥ ९ ॥

भिन्ना इत्यादि । भिन्ना भेदंगता द्विषष्टिधा भवन्तीत्यर्थः ।
त्रयो दोषा वातपित्तश्लेष्माणः । गुणा गुणमयाः सत्त्वरजस्तमोमयाः । तद्यथा—रजोभूयिष्ठो मारुतः, रजो हि प्रवर्तकं सर्वभावानां; पित्तं सत्त्वोत्कटं, लघुप्रकाशकत्वात्, रजोयुक्तं वेत्येके; कफस्तमोबहुलः, गुरुप्रावरणात्मकत्वादित्याहुर्भिषजः । यद्येवं तत् कथं कफप्रकृतिके पुंसि सत्त्वगुणोपपन्नता पठिता ? उच्यते—गुणद्वितयमपि कफे ज्ञातव्यं, 'सत्त्वतमोबहुला आपः' इत्युक्तत्वात् ॥ ९ ॥

त्रय एव पृथक् दोषा द्विशो नव समाधिकैः ।
त्रयोदशाधिकैकद्विसममध्योल्वणैस्त्रिशः ॥ १० ॥
पञ्चाशदेवं तु सह भवन्ति क्षयमागतैः ।
क्षीणमध्याधिकक्षीणक्षीणवृद्धैस्तथाऽपरैः[1] ॥ ११ ॥
द्वादशैवं समाख्यातास्त्रयो दोषा द्विषष्टिधा ।

कथमेते द्विषष्टिधा भवन्तीत्याह—त्रय एवेत्यादि । तत्र पृथक् प्रत्येकं, दोषा वातपित्तश्लेष्माणस्त्रय एव, इतरौ च द्वौ स्वस्थाविति ज्ञेयौ । वृद्धो वातः स्वस्थौ पित्तश्लेष्माणौ १, वृद्धं पित्तं स्वस्थौ वातश्लेष्माणौ २, वृद्धः श्लेष्मा स्वस्थे वातपित्ते ३, इति । द्विशो नव समाधिकैरिति[2] तत्र समवृद्धाभ्यां द्वाभ्यां दोषाभ्यां त्रयः संसर्गा भवन्ति; यथा—वातपित्ते समे वृद्धे स्वस्थः श्लेष्मा १, वातश्लेष्माणौ समौ वृद्धौ स्वस्थं पित्तं २, पित्तश्लेष्माणौ समौ वृद्धौ स्वस्थो वातः ३, इति । अन्यतराधिकवृद्धाभ्यां षट्; तद्यथा—वातपित्तयोर्वृद्धयोर्वातोऽधिको वृद्धः स्वस्थः श्लेष्मा १, वातपित्तयोर्वृद्धयोः पित्तमधिकवृद्धं स्वस्थः श्लेष्मा २, वातश्लेष्मणोर्वृद्धयोर्वातोऽधिकवृद्धः स्वस्थं पित्तं ३, वातश्लेष्मणोर्वृद्धयोः श्लेष्माऽधिकवृद्धः स्वस्थं पित्तं ४, पित्तश्लेष्मणोर्वृद्धयोः पित्तमधिकं वृद्धं स्वस्थो वातः ५, पित्तश्लेष्मणोर्वृद्धयोः श्लेष्मा अधिकवृद्धः स्वस्थो वातः ६ । त्रिशस्तु वृद्धैस्त्रयोदश; तत्र त्रिभिरधिकैरेकः, अधिकैकदोषास्त्रयः, अधिकद्विदोषास्त्रयः, सममध्योल्वणदोषाः षट् । तद्यथा—वातपित्तश्लेष्मणां वृद्धानां वातोऽधिकवृद्धः १, वातपित्तश्लेष्मणां वृद्धानां पित्तमधिकवृद्धं २, वातपित्तश्लेष्मणां वृद्धानां श्लेष्माऽधिकवृद्धः ३ । अथाधिकद्विवृद्धदोषाः; तद्यथा,—वातपित्तश्लेष्मणां वृद्धानां वातपित्ते अधिकवृद्धे १, वातपित्तश्लेष्मणां वृद्धानां वातश्लेष्मणौ अधिकवृद्धौ २, वातपित्तश्लेष्मणां वृद्धानां पित्तश्लेष्माणावधिकवृद्धौ ३ । क्षीणो वातः स्वस्थौ पित्तश्लेष्माणौ १, क्षीणं पित्तं स्वस्थौ वातश्लेष्माणौ २, क्षीणः श्लेष्मा स्वस्थे वातपित्ते ३, एवं पृथक् त्रय एव । अथ हीनमध्योल्बणवृद्धाः षडुच्यन्ते, तत्र समः समवृद्धो हीनवृद्ध इत्यर्थः; तद्यथा—हीनवृद्धो वातः, मध्यवृद्धं पित्तं, अधिकवृद्धः श्लेष्मा १; हीनवृद्धो वातः, मध्यवृद्धः श्लेष्मा, अधिकवृद्धं पित्तं २; हीनवृद्धं पित्तं, अधिकवृद्धो वातः, मध्यवृद्धः श्लेष्मा ३; मध्यवृद्धो वातः, हीनवृद्धं पित्तं, अधिकवृद्धः श्लेष्मा ४; हीनवृद्धः श्लेष्मा, अधिकवृद्धं पित्तं, मध्यवृद्धो वातः ५; अधिकवृद्धो वातः, मध्यवृद्धं पित्तं, हीनवृद्धः श्लेष्मा ६ । सर्वदोषैः समवृद्धैरेकः । उक्तं च तन्त्रान्तरे—"द्व्युल्वणैकोल्वणैः षट् स्युर्हीनमध्याधिकैश्च[3] षट् । समैश्चैको

१ 'सप्ताष्टं तु शतं चात्र कीटानां विषदर्पिणाम्' इति पा० । २ 'दश दृष्टाः शिरोरोगाः' इति पा० ।

१ 'क्षीणमध्याधिकद्व्येकक्षीणवृद्धास्तथाऽपरे' इति पा० । २ 'द्विशो नव, तत्र समैस्त्रयः, तद्यथा;' इति पा० । ३ 'अधिकैस्तु षड्भेदाः' इति पा० ।

विकारास्ते सन्निपातास्त्रयोदश"–इति। पञ्चाशदित्यादि। एवमनेन प्रकारेण क्षयमागतैः पञ्चविंशतिदोषभेदैः सह पञ्चाशद्भवन्ति। तद्यथा—वातपित्तकफैरेकैकैः क्षीणैस्त्रयो भेदा भवन्ति, द्विशो नव प्रोच्यन्ते। तद्यथा—वातपित्ते समक्षीणे स्वस्थः श्लेष्मा १, वातश्लेष्माणौ समक्षीणौ स्वस्थं पित्तं २, पित्तश्लेष्माणौ समहीनौ स्वस्थो वातः ३। अधिकक्षीणाः षट्; तद्यथा-वातपित्तयोः क्षीणयोर्वातोऽधिकक्षीणः स्वस्थः श्लेष्मा १, वातपित्तयोः क्षीणयोः पित्तमधिकक्षीणं स्वस्थः श्लेष्मा २, वातश्लेष्मणोः क्षीणयोर्वातोऽधिकक्षीणः स्वस्थं पित्तं ३, वातश्लेष्मणोः क्षीणयोः श्लेष्माऽधिकक्षीणः स्वस्थं पित्तं ४, पित्तश्लेष्मणोः क्षीणयोः पित्तमधिकक्षीणं स्वस्थो वातः ५, पित्तश्लेष्मणोः क्षीणयोः श्लेष्माऽधिकक्षीणः स्वस्थो वातः ६। अथ क्षीणदोषत्रयभेदास्त्रयोदश प्रोच्यन्ते; तत्र—त्रिभिरपि समक्षीणैरेकः; अधिकैकैकक्षीणैश्च त्रयः। यथा,—वातपित्तश्लेष्मणां क्षीणानां वातोऽधिकक्षीणः १, वातपित्तश्लेष्मणां क्षीणानां पित्तमधिकक्षीणं २, वातपित्तश्लेष्मणां क्षीणानां श्लेष्मा अधिकक्षीणः ३। अथाधिकक्षीणद्विदोषाः; तद्यथा—वातपित्तश्लेष्मणां क्षीणानां वातपित्ते अधिकक्षीणे १, वातपित्तश्लेष्मणां क्षीणानां वातश्लेष्माणावधिकक्षीणौ २, वातपित्तश्लेष्मणां क्षीणानां पित्तश्लेष्माणावधिकक्षीणौ ३। अथ हीनमध्योल्वणक्षीणाः षट् प्रोच्यन्ते; तद्यथा,—हीनक्षीणो वातः, मध्यक्षीणं पित्तं, अधिकक्षीणः श्लेष्मा १; मध्यक्षीणो वातः, हीनक्षीणं पित्तं, अधिकक्षीणः श्लेष्मा २; अधिकक्षीणो वातः, मध्यक्षीणं पित्तं, हीनक्षीणः श्लेष्मा ३; हीनक्षीणो वातः, अधिकक्षीणं पित्तं, मध्यक्षीणः श्लेष्मा ४; अधिकक्षीणो वातः, हीनक्षीणं पित्तं, मध्यक्षीणः श्लेष्मा ५; मध्यक्षीणो वातः, अधिकक्षीणं पित्तं, हीनक्षीणः श्लेष्मा ६। क्षीणेत्यादि अत्र मध्यशब्देन स्वस्थोऽभिधीयते, अधिकशब्देन च वृद्धः। तत्र क्षीणमध्याधिकभेदेन षट्। तद्यथा—क्षीणो वातः, स्वस्थं पित्तं, वृद्धः श्लेष्मा १; क्षीणो वातः, वृद्धं पित्तं, स्वस्थः श्लेष्मा २; स्वस्थो वातः, पित्तं क्षीणं, वृद्धः श्लेष्मा ३; वृद्धो वातः, क्षीणं पित्तं, स्वस्थः श्लेष्मा ४; स्वस्थो वातः, पित्तं वृद्धं, क्षीणः श्लेष्मा; वृद्धो वातः, स्वस्थं पित्तं, क्षीणः श्लेष्मा ५। अथ द्विक्षीणैकवृद्धांस्त्रीनाह—वातपित्ते क्षीणे वृद्धः श्लेष्मा १, वातश्लेष्माणौ क्षीणौ पित्तं वृद्धं २, पित्तश्लेष्माणौ क्षीणौ वातो वृद्धः ३। अथ द्विवृद्धैकक्षीणानाह—वातपित्ते वृद्धे क्षीणः श्लेष्मा १, वातश्लेष्माणौ वृद्धौ क्षीणं पित्तं २; पित्तश्लेष्माणौ वृद्धौ क्षीणो वातः ३। एवमनेन प्रकारेण, समाख्याताः कथिताः, त्रयो दोषा वातपित्तश्लेष्माणः। स्वस्थैस्तु वातपित्तश्लेष्मभिः स्वास्थ्यं त्रिषष्टमिति। अयमेवार्थः श्लोकैरुच्यते। तद्यथा,—

पृथग्वृद्धैर्मरुत्पित्तकफैर्भेदत्रयं भवेत्।
संसर्गे तु भवन्त्येषां भेदस्तुल्याधिकेन च ॥ १ ॥
वातपित्ते समे वृद्धे समावेवं मरुत्कफौ।
समौ पित्तकफावेवं स्युस्त्रयस्तुल्यवृद्धितः ॥ २ ॥
वृद्धिं गते मरुत्पित्ते पवनस्त्वधिकस्तयोः।
अन्यस्मिन् पित्तमधिकं वृद्धयोर्वातपित्तयोः ॥ ३ ॥
वृद्धौ समीरणकफावेतयोरधिकोऽनिलः।
अधिके तु तयोरेव भवेद्भेदान्तरं कफे ॥ ४ ॥
वृद्धौ पित्तकफौ तद्वदेतयोः पित्तमुत्कटकम्।
वृद्धयोरेतयोरेव बलासस्त्वधिकः पुनः ॥ ५ ॥
इत्येकाधिकसंसर्गदोषभेदा भवन्ति षट्।
एवमेतैः समुद्दिष्टा भेदास्तुल्याधिकैर्नव ॥ ६ ॥
पूर्वैः सह भवन्त्येवं विकल्पा द्वौ तथा दश।
सन्निपातेषु जायन्ते दोषभेदास्त्रयोदश।
एकस्तत्र विकल्पः स्याद्वृद्धिप्राप्तैः समैस्त्रिभिः।
वृद्धिंगतेषु सर्वेषु तेषु वृद्धतमो मरुत् ॥ ७ ॥
पुनः पित्तं पुनः श्लेष्मेत्येकाधिकतमैस्त्रयः।
प्रवृद्धे वातपित्ते च भेदोऽन्यस्मिन् बलासतः ॥ ८ ॥
मरुत्कफौ तथा पित्ताद्वातः पित्तकफादपि।
आधिक्येन द्वयोरेवं दोषभेदास्त्रयो मताः ॥ ९ ॥
हीनमध्याधिकैर्दोषैर्विकल्पाः संभवन्ति षट्।
अन्योन्यापेक्षया तेषां हीनवृद्धः समीरणः ॥ १० ॥
मध्यवृद्धं तथा पित्तं श्लेष्मा तत्राधिको मतः।
मध्यः समीरणोऽन्यस्मिन् हीनं पित्तं कफोऽधिकः ॥ ११ ॥
मध्यं पित्तं मरुत्तीव्रः स्वल्पः श्लेष्माऽपरत्र तु।
मध्यः श्लेष्मोल्बणं पित्तं हीनो वातस्तथा स्थितः ॥ १२ ॥
मध्यः श्लेष्मोल्वणो वायुः पित्तं हीनं तथा स्थितम् ॥ १३ ॥
मध्यवातोऽधिकं पित्तं हीनवृद्धस्तथा कफः।
एवमेते भवन्त्यत्र सन्निपातास्त्रयोदश ॥ १४ ॥
पूर्वैर्द्वादशभिः सार्धं विकल्पाः पञ्चविंशतिः।
यथा वृद्धैस्तथा क्षीणैर्दोषैः स्युः पञ्चविंशतिः ॥ १५ ॥
क्षीणस्वस्थाधिकैरेभिर्दोषभेदा भवन्ति षट्।
क्षीणः समीरणस्तत्र स्वस्थं पित्तं कफोऽधिकः ॥ १६ ॥
क्षीणो वायुः कफः स्वस्थः पित्तमत्राधिकं तथा।
क्षीणं पित्तं मरुत् स्वस्थो भेदोऽन्यस्मिन् बली कफः ॥ १७ ॥
क्षीणं पित्तं कफः स्वस्थः प्रवृद्धस्त्वधिको मरुत्।
श्लेष्मा क्षीणोऽनिलः स्वस्थः पित्तमत्र तथोल्बणम् ॥ १८ ॥
कफः क्षीणः समं पित्तं प्रवृद्धस्तु समीरणः।
क्षीणस्वस्थाधिकैरेवं भेदाः षट् परिकीर्तिताः ॥ १९ ॥
क्षयंगते मरुत्पित्ते प्राप्तो वृद्धिं तथा कफः।
क्षीणौ समीरणकफौ तथा स्यात् पित्तमुत्कटम् ॥ २० ॥
क्षीणौ पित्तकफौ तद्वन्नभस्वान् स्यात्तु वृद्धिमान्।
द्वौ क्षीणावेकवृद्धश्च भेदत्रयमिति स्मृतम् ॥ २१ ॥
वातपित्ते गते वृद्धिं संप्राप्तश्च क्षयं कफः।
वृद्धौ वातकफौ तद्वत् पित्तं चाथ क्षयं गतम् ॥ २२ ॥
तद्वत् पित्तकफौ वृद्धौ प्रक्षीणः पवनः पुनः।
एकक्षीणद्विवृद्धैश्च त्रयो भेदा भवन्त्यमी ॥ २३ ॥
क्षीणमध्याधिकैस्त्वेवं भेदा द्वादश कीर्तिताः।
प्रकृतिस्थैः समीराद्यैस्तथैकः परिकीर्तितः ॥ २४ ॥
त्रिषष्टिर्दोषभेदानामिति सम्यङ्निरूपिता ॥ इति।

एतेषां वातपित्तश्लेष्मणां वृद्धक्षीणानां लक्षणान्युच्यन्ते—तद्यथा—वातवृद्धौ वाग्बाहुल्यं कार्श्यं काष्र्ण्यं गात्रस्फुरणमूष्मकामिता निद्रानाशोऽल्पबलत्वं गाढवर्चस्त्वं चेति, पित्तवृद्धौ पीतावभासता सन्तापः शीतकामित्वमल्पनिद्रता मूर्च्छा बल-

१ 'मन्दोऽन्यत्र तु मारुतः' इति पा०। २ 'क्षयादप्येवमेवैते भवेयुः पञ्चविंशतिः' इति पा०। ३ 'द्विक्षीणैरेकवृद्धैश्च' इति पा०। ४ 'वाक्पारुष्यं' इति पा०।

ह्रानिरिन्द्रियदौर्बल्यं पीतविण्मूत्रनेत्रत्वं चेति, श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्यं गौरवमवसादस्तन्द्रा निद्रा सन्ध्यस्थिविश्लेषश्च । वातक्षये मन्दचेष्टता अल्पवाक्त्वमप्रहर्षो मूढसंज्ञता च, पित्तक्षये मन्दोष्माग्निता निष्प्रभता च, श्लेष्मक्षये रूक्षताऽन्तर्दाह आमाशयेतरश्लेष्माशयशिरसां शून्यता सन्धिशैथिल्यं तृष्णा दौर्बल्यं च । एवमेतैर्लक्षणैः प्रकृतिसमसमवेतानां वृद्धानां क्षीणानां च वातपित्तश्लेष्मणामवगमो मिश्रैश्च लक्षणैः संसर्गसन्निपातावगम इति । क्षीणमध्याधिकव्द्वयेकक्षीणवृद्धानां केषांचिल्लक्षणानि लिख्यन्ते । तद्यथा--

एको वृद्धः समश्चैकः क्षीणस्त्वेको यदा भवेत् ।
क्षीण एकः प्रवृद्धौ द्वौ क्षीणौ द्वौ वृद्धिमांस्तथा ॥ २५ ॥
एक एव स्थितस्तत्र व्यक्तरूपेण देहिनि ।
प्रवृद्धो मारुतः पित्तं प्रकृतिस्थं कफक्षये ॥ २६ ॥
गृहीत्वा स्थानतो यत्र यत्राङ्गेषु विसर्पति ।
तत्र तत्रास्थिरो दाहः श्रमः खेदो बलक्षयः ॥ २७ ॥
क्षीणे पित्ते यदा वायुर्वृद्धौवस्थः समं कफम् ।
विकर्षति तदा शूलं शैत्यमत्यन्तगौरवम् ॥ २८ ॥
वृद्धं कफक्षये पित्तं प्रकृतिस्थं प्रभञ्जनम् ।
यदा रुणद्ध्यस्य तदा दाहः शूलः प्रजायते ॥ २९ ॥
वृद्धं वातक्षये पित्तं प्रकृतिस्थं यदा कफम् ।
निरुणद्धि तदा तस्य स्युस्तन्द्रागौरवज्वराः ॥ ३० ॥
श्लेष्मा वृद्धो यदा वायुः समः पित्तपरिक्षये ।
निरुणद्धि तदा तस्य गौरवं शीतकज्वरम् ॥ ३१ ॥
कफोऽनिलक्षये पित्तं प्रकृतिस्थं यदा बली ।
निरुणद्धि तदा तस्य मृद्वग्नित्वं शिरोव्यथा ॥ ३२ ॥
प्रलापो गुरुता तन्द्रा निद्रा स्यात्तु सुहृद्रुजा ।
छीवनं पित्तकफयोर्नखादीनां च पीतता ॥ ३३ ॥
कफः पित्तेन संयुक्तो बलहानिं भृशं क्षयम् ।
करोत्यपाकमरुचिं गौरवं गात्रसादताम् ॥ ३४ ॥
मारुतेन युतः श्लेष्मा हीनपित्तः समाचरन् ।
करोति मृदुतां वह्नेर्भक्ते नानाभिलाषिताम् ॥ ३५ ॥
वेपनं गौरवं स्तम्भशैत्यतोदांस्तथाऽचिरात् ।
शुक्लत्वं च नखादीनां पारुष्यं वपुषोऽपि च ॥ ३६ ॥
कुपितौ पित्तपवनौ परिक्षीणकफे यदा ।
उद्वेष्टनं श्रमं तोदं कुरुते स्फोटनं तथा ॥ ३७ ॥
तथाऽङ्गमर्ददाहौ च चोषं दूयनधूपने ।
श्लेष्माऽपिधत्ते स्रोतांसि यदा पित्तानिलक्षये ॥ ३८ ॥
चेष्टानाशं तदा कुर्यान्मूर्च्छां वाग्भङ्गमेव च ।
देहौजः संसयत् पित्तं वातश्लेष्मक्षये तृषाम् ॥ ३९ ॥
कुर्यादिन्द्रियदौर्बल्यं मूर्च्छां ग्लानिं क्रियाक्षयम् ।
मर्माणि पीडयन् वायुः श्लेष्मपित्तपरिक्षये ॥ ४० ॥
संज्ञाप्रणाशं कुरुते प्रकम्पं विदधाति च ।
दर्शयन्ति प्रवृद्धाः स्वं लिङ्गं दोषा हि केवलम् ॥ ४१ ॥
क्षीणा जहति लिङ्गं स्वं समाः स्वं कर्म कुर्वते ।
समं रक्षञ्जयन् वृद्धं क्षीणं दोषं च वर्धयन् ॥ ४२ ॥

१ 'स्थितो यत्र तत्र यत्स्याद्ब्रवीमि तत्' इति पा० । २ 'श्रमो मेदो बलक्षयः' इति पा० । ३ 'वृद्धः कर्षेत्समं कफम् । विदधाति' इति पा० । ४ 'संयुक्तश्चरन् हीनबलस्वरम्' इति पा० ।

विधिनाऽनेन विषमं सन्निपातं जयेद्भिषक् । इति ॥ १० ॥ ११ ॥

मिश्रा धातुमलैर्दोषा यान्त्यसंख्येयतां पुनः ॥ १२ ॥
तस्मात् प्रसङ्गं संयम्य दोषभेदविकल्पनैः ।
रोगं विदित्वोपचरेद्रसभेदैर्यथैरितैः ॥ १३ ॥
भिषक् कर्ताऽथ करणं रसा दोषास्तु कारणम् ।
कार्यमारोग्यमेवैकमनारोग्यमतोऽन्यथा ॥ १४ ॥

धातुभिरसृगादिभिर्मिश्रा मलैश्चासंख्येयतां यान्ति । तत्र वातस्य धातुमलमिश्रस्य लक्षणं वातव्याधिनिदाने प्रोक्तम् । पित्तश्लेष्मणोस्तु वृद्धवाग्भटः प्राह—

पित्तं त्वचि स्थितं कुर्याद्विस्फोटकमसूरिकाः ।
रक्ते विसर्पं दाहं च मांसे मांसावकोथनम् ॥ १ ॥
सदाहान् मेदसि ग्रन्थीन् स्वेदतृङ्वमनं भृशम् ।
अस्थिदाहं भृशं मज्जि हारिद्रनखनेत्रताम् ॥ २ ॥
पूतिपीतावभासं च शुक्रं शुक्रसमाश्रितम् ।
सिरागतं क्रोधनतां प्रलापं स्नायुगं तृषाम् ॥ ३ ॥
कोष्ठगं मदतृड्दाहान् व्यापिनोऽन्यांश्च यक्ष्मणः ।
श्लेष्मा त्वचि स्थितः कुर्यात् स्तम्भं श्वेतावभासताम् ॥ ४ ॥
पाण्ड्वामयं शोणितगो मांसस्थश्चार्बुदापचीः ।
आर्द्रचर्मावनद्धाभगात्रतां त्वचि गौरवम् ॥ ५ ॥
मेदोगः स्थूलतां मेहमस्थ्नां स्तब्धत्वमस्थिगः ।
मज्जगः शुक्लनेत्रत्वं शुक्रस्थः शुक्रसंचयम् ॥ ६ ॥
विबन्धं गौरवं चाति सिरास्थः स्तब्धगात्रताम् ।
स्नायुगः सन्धिशूलत्वं कोष्ठगो जठरोन्नतिम् ॥ ७ ॥
अरोचकाविपाकौ च तांस्तांश्च कफजान् गदान् ।
विण्मूत्रयोः साश्रययोस्तत्र तत्रोपदिश्यते ॥ ८ ॥
उपतापोपघातौ च स्वाश्रयेन्द्रियगैर्मलैः ॥ इति ॥ १२-१४ ॥-

अध्यायानां तु षट्षष्ट्या ग्रथितार्थपदक्रमम् ।
एवमेतदशेषेण तन्त्रमुत्तरमृद्धिमत् ॥ १५ ॥
स्पष्टगूढार्थविज्ञानमगाढमन्दचेतसाम् ।
यथाविधि यथाप्रश्नं भवतां परिकीर्तितम् ॥ १६ ॥
सहोत्तरं त्वेतदधीत्य सर्वं
ब्राह्मं विधानेन यथोदितेन ।
न हीयतेऽर्थान्मनसोऽभ्युपेता-
देतद्वचो ब्राह्ममतीव सत्यम् ॥ १७ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे दोषभेदविकल्पो नाम षषष्टितमोऽध्यायः ॥ ६६ ॥

निबन्धान् बहुशो वीक्ष्य वैद्यः श्रीभरतात्मजः ।
उत्तरस्थानमकरोत् सुस्पष्टं डल्डणो भिषक् ॥ १५-१७ ॥

इति श्रीडल्हणाचार्यविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

इति सौश्रुते आयुर्वेदशास्त्रे उत्तरस्थानं समाप्तम् ॥ १५ ॥ १६ ॥

१ अस्याग्रे 'राजमृगाङ्काभिधानेन बहवो रोगाः प्रदर्शिताः । अन्यैस्तु मुनिभिरग्निवेशभेडजातुकर्णपराशरहारीतक्षारपाणिनिमिकाङ्कायनगार्ग्यगालवप्रभृतिभिर्बहवो रोगाः कथिताः । तस्मात् प्रसङ्गं संयम्य परित्यज्य हितमेवाचरणीयम् ।' इत्यधिकं पठ्यते क्वचित्पुस्तके ।

समाप्तमिदं सुश्रुततन्त्रम् ॥